अथशांकरपादभूषणप्रारंभः

...नस्याज्ञानमात्रेनिवर्तकत्वेनस...
...त्यक्षस्यस्थूलोहमित्यादिविसंवादिप्र...

अ०१पा०१अ० रूपायश्रीपरब्रह्मणेनमः ॥१॥ मेघ
श्यामलमुज्वलांबरध डाल्लसत्कुंडलं ॥ चक्राद्यायुधधारिणं
हृदिगतंवंदारुमंदारकंवृंदा ॥२॥ अद्वैतवस्तुप्रतिपादनायद्वैतस्यमिथ्या
त्वविनिश्चयाय ॥ यः सूत्ररूपंनिब ...तंव्यास...धगुरुमानतोस्मि ॥३॥ मिथ्याज्ञानविजृंभमाणजगना
मान्यंतरेभुंजतःस्वारब्धानिनिरीक्ष्यजीवनिचयान्मूढानविद्यावशात् ॥ देवःकारुणिकोवतीर्यसमग्रासद्यस्तुशा
रीरकेभाष्यंतंप्रणमामिशंकरगुरुंनिःश्रेयसावाप्तये ॥४॥ आनंदतीर्थादिभिरादरेणयद्दूषितंभाष्यमनल्पबोधैः
तदुद्धृतौ त कृतिदूषणेचव्युजृंभतेसौरघुनाथसूरिः ॥५॥ सर्वज्ञभगवत्पादकृतंसूत्रार्थवर्णनं ॥ वाचस्पत्यादि
विज्ञेयमव्युत्पन्नेन दूषितं ॥६॥ तदुद्धारेप्रवृत्तस्यपरकीयोक्तिदूषणैः॥ भाष्यादिभावसाकल्याज्ञानंनैवप्रदुष्य
ति ७ यक्षानुरूपोबलिरित्याहुर्यस्मान्मनीषिणः ॥ फलंतुश्रीमदाचार्यसेवयेश्वरतोषणं ॥८॥ आंकरानंदतीर्थीय
ब्रह्मसूत्रार्थनिर्णये ॥ विवादपरिहारायकुर्वेशंकरभूषणं ॥९॥ अद्वैतग्रंथानालोड्यसारंसुभृत्यंयत्नतः ॥ ग्रंथा
नानंदतीर्थीयानाकलय्यापिभूरिशः ॥१०॥ आनंदतीर्थीयनयेदूषणंचवदाम्यहं ॥ हीयतिश्रीपतिप्रीत्यैरघु
नाथोविदामपि ११ श्रीमच्छांकरसूत्रार्थःश्रारब्धंद्दडवामलः ॥ अनाद्यज्ञानसंभूतद्वैतवासनयायुतैः ॥१२॥ आ
नंदतीर्थतच्छिष्यैः स्वग्रंथेषुप्रदूषितः ॥ अद्वैतवादविद्वेषात्स्वकर्मपरिपाकतः ॥१३॥ कालिकालाद्वैयाबुध्या

वेदमार्गविरुध्द्या ॥ तान्दृष्ट्वाशास्त्रनत्यज्ञाः पंडिताः सूक्ष्मबुध्दयः ॥१४॥ नमुह्येयुस्तथाप्यज्ञजनोमुह्या
त्संशयः ॥ परमार्थाश्रयत्वेनविपरीतार्थदर्शनात् ॥ १५॥ अतोहंतदपार्थत्वंप्रतिपादयितुंजनान् ॥ प्रवृत्तः
शास्त्रयुक्तिभ्यांतदीशोमेनुगृह्यतां ॥१६॥ मीमांसान्यायपंचास्यराघवाचार्यसूरिणां ॥ शिष्यस्त्वंशांकरेपक्षदू
षणेपरदूषणे ॥ १७॥ कृतिर्वितनुतांमोदंसतांभक्तिंचमेहरौ ॥ भक्त्याप्रसन्नोभगवान्मुक्तिंममप्रयच्छतु ॥१८॥
ज्ञातृज्ञापकमप्रयोजनमनारब्धव्यमेवेतिचेत्शास्त्रंनास्यविशिष्टमात्रपरताबंधस्यनोवस्तुता ॥ इत्याशून्यविशु
ध्दमेवविषयस्त्वेवंगुरुर्नोब्रवीदन्यस्त्वस्याविरुध्दमेवतदिदंजिज्ञास्यमस्मत्कृतौ ॥१९ ॥ अथातोब्रह्मजिज्ञासा॥
अस्मिन्सूत्रेविवरणाद्यभिप्रेतेत्थमधिकरणरचनाप्रत्यगभिन्नब्रह्मविचारात्मकवेदांतमीमांसाशास्त्रमारं
भणीयंउतनारंभणीयमितिवक्ष्यमाणरीत्याविषयासंभवसंभवरूपपूर्वपक्षसिध्दांतयुक्तिभ्यांसंशयेनारंभ
णीयंविषयप्रयोजनयोरभावात्तथाहि ॥ नास्यशास्त्रस्यप्रत्यक्ब्रह्मैक्यंविषयः अहंकरोमिभुंजेइत्यादिप्र
त्ययसिध्दकर्तृत्वादिजीवधर्मस्य तत्विरुध्दस्याकर्तृत्वादेर्ब्रह्मधर्मस्यचैकत्रसमावेशायोगात् ॥ नापिकर्तृत्वा
दिरूपबंधनिवृत्तिः प्रयोजनंज्ञानस्याज्ञानमात्रनिवर्तकत्वेन सत्यस्यकर्तृत्वादिबंधस्यज्ञानान्निवृत्त्ययोगात् ॥
नचाहंकरोमिभुंजेइत्यादिप्रत्यक्षस्यस्थूलोहमित्यादिविसंवादिप्रत्यक्षसजातीयस्यउपलभ्याप्सुचेदृं धंके
चित्स्त्रसुरनैपुणाः पृथिव्यामेवतंविद्यादपोवायुंचसंश्रितमितिबलवत्प्रमाणानुरोधेनसुरभिजलंसुरभिः

पवमान इत्यादिप्रत्यक्षस्य पार्थिवावयवसंसर्गेणवासंगत्वबोधकप्रबलागमानुसारेणां-
तःकरणधर्माधिगाहितयाभ्रमत्वोपपत्तौ स्वाभाविकासंगत्वबाधितकर्तृत्वादेर्नब्रह्मात्मै-
क्यविरोधित्वमितिसंभवत्येवविषयइतिवाच्यं ॥ प्रत्यक्षागमयोर्विरोधेउपजीव्यतयाप्रत्य-
क्षानुसारेणागमस्यान्यथानेयत्वादन्यथावेदांतार्थबोधस्यानुदयप्रसंगात् ॥ कर्तृत्वादिव
दूर्णपदप्रत्ययानांबाधात् ॥ तमःप्रकाशवद्विरुध्दस्वभावयोरात्मदेहाद्योर्ममननः ममदेहइ-
तिभेदग्रहेतत्तादात्म्यग्रहाधीनतध्दर्माध्यासायोगाच्चेति पूर्वपक्षे ॥ सिध्दांतः ॥ अथातोब्रह्म-
जिज्ञासेति ॥ अयमत्रसिध्दांताभिप्रायः ॥ तमःप्रकाशवद्विरुध्दस्वभावयोरप्यात्मानात्मनोर्व-
क्ष्यमाणन्यायैरद्वितीयप्रत्यगभिन्नब्रह्मात्मनिनिर्णीततात्पर्यकत्वेनप्रबलवेदांतवाक्यजन्या
खंडब्रह्मसाक्षात्कारात्मकमनोवृत्तेः पूर्वमहंगौरः अहंकर्ताभोक्तेतिप्रतीयमानतादात्म्यान्यथा-
नुपपत्यातादृशमनोवृत्तिसमुच्छेद्यसकलभ्रमनिदानत्वेनकल्प्यमानानाद्यज्ञानेनकर्तृत्वाद्य-
ध्यासेनकाचिदनुपपत्तिरितिसंभवत्येवप्रत्यक्ब्रह्मात्मैक्यंविषयः ॥ नचोपजीव्यप्रत्यक्षवि-
रोधाद्वेदांतार्थविबोधासंभवः पूर्वपक्षोक्तःस्ववचः ॥ वक्ष्यमाणरीत्याप्रत्यक्षादेरागमेनंतात्विक-
त्वापहारेपिव्यावहारिकसत्तानपहारेणतावन्मात्रेणवेदांतार्थविबोधरूपकार्यक्षमत्वोपपत्तेः ॥

ममममनइत्यादिभिन्नरूपेणाभेदग्रहस्याहंमनुष्यः कर्तेत्याद्यभेदग्रहाविरोधित्वादात्मानात्मनोस्ता
दात्म्यग्रहाधीनकर्तृत्वाद्यध्याससंभवाच्चेति ॥ अत्रैववाचस्पत्यादिसंमतत्स्यमधिकरणरचना ॥ उ
क्तरीत्यैवविषयाद्यसंभवासंभवयुक्तिभ्यांसंशयेप्रत्यगात्मन एवब्रह्मत्वात् ॥ तस्यचाहमिति-
प्रकाशमानत्वेनासंदिग्धत्वान्नविचारविषयत्वं ॥ नाप्यविद्यानिवृत्तिः प्रयोजनंउक्तरीत्यात्मनि-
ज्ञायमानेपितदनिवृत्तेः ॥ नचाहंप्रत्ययःस्थूलोहंदुःखीतिगृण्हातितद्विपरीतश्चवेदांतप्रतिपा
द्यः संदिग्धइतिविषयादिसिद्धिरितिवाच्यं ॥ वेदांतानामध्ययनविध्यापादितप्रयोजनवदर्था
वबोधानामपिप्रबलाहंप्रत्ययबाधितत्वेनजपमात्रोपयोगित्वेनाविवक्षितार्थत्वादुपचरितार्थ
त्वाद्वावेदांतविचारोनारंभ्यइतिपूर्वपक्षेवेदांतवाक्यैर्ज्ञानानंदैकरसाद्वितीयोदासीनस्वभा-
वआत्मोपक्रमादिभिःप्रतिपाद्यते ॥ नचक्रियाःसमभिव्याहारेणेनाहंगात्मतत्त्वमभिदधतितत्परा
णिसंतियुक्तमुपचरितार्थानीतिवक्तुं ॥ प्रत्यक्षंतुसंभावितदोषमपौरुषेयेणनिर्दोषेणागमेनबा-
ध्यते ॥ तेनवेदांतवेद्यःशुद्धोहंप्रत्ययेनभातीतिविषयादिसंभवादारंभणीयंब्रह्ममीमांसाशा-
स्त्रमितिसिद्धांतः ॥ यत्तुचंद्रिकायांकर्तृत्वादिविशिष्टस्यैवसंभावितदोषेणातत्त्वावेदकेनप्रत्य-
क्षानुमानादिनाभिध्याभेदेगृहीतेपितात्विकाभेदेमानांतरविरोधाभावेनतत्त्वंपदमुख्यार्थ

त्वापत्तल्लक्षितचिन्मात्रेभेदाप्रसक्त्यातत्वमसीतिवाक्याद्वैक्यश्यायचविशिष्टस्यैवनिर्दोषया
श्रुत्यानात्विकाभेदबोधनसंभवेनविषयार्थमध्यासस्यावक्तव्यत्वात् ॥ नापिप्रयोजनार्थंतदुक्तिः
सत्वज्ञानाकार्यस्यपापस्यसेतुज्ञानान्निवृत्तेस्तस्माद्विवरणमतंनयुक्तमितिव्यासतीर्थेनोक्तेत
त्रब्रूमः ॥ तत्वमसीतिमहावाक्येनजीवत्वेश्वरत्वरूपविरुद्धधर्मविशिष्टयोस्तात्विकाभेदबोध
नेनेहनानास्तिकिंचननात्रकाचनभिदास्तीत्यादेर्विशिष्टयोर्मिथ्यात्वबोधकश्रुत्यंतरस्यविरो
धोदुर्वारएवजीवत्वेश्वरत्वविशिष्टयोर्भेदस्यव्यावहारिकत्वेनाभेदस्यव्यावहारिकतायाः
समानसत्ताकयोः प्रतियोग्यभावयोरेकत्रविरोधेनासंभवात्प्रातीतिकत्वापत्यातद्बोधनेताह
शवाक्यस्याप्रामाण्यापतिश्च ॥ जीवत्वोपलक्षितेईशत्वोपहिताभेदोपिनतद्वाक्यजन्यबोध
विषयः ताहशबोधस्योक्तरीत्याव्यावहारिकेशत्वविषयकत्वासंभवात्प्रातिभासिकेशत्ववि-
षयकत्वेनतद्बोधक वाक्याप्रामाण्यापत्तेः ॥ सर्वज्ञत्वकिंचिज्ज्ञत्वोपहितयोरभेदस्यबाधित
त्वादयोग्यतापातान्नतदुपलक्षितचिन्मात्रपरत्वमेववाक्यस्योपेयं ॥ नचतत्वंपदमुख्यार्थ
त्वानुपपत्तिश्चांद्रिकोक्तासम्यक् ॥ उपक्रमोपसंहारैक्यरूप्यादितात्पर्यनिर्णायकैर्लिंगैर्जीव
ब्रह्मैक्यएवतात्पर्यनिर्णयेनतात्पर्यविषयीभूतार्थबोधकत्वरूपमुख्यार्थत्वाबाधात् ॥ नचतत्वं

यथासोयंदेवदत्तइतिवाक्याद्विशिष्टाभेदोनबोधयितुंशक्यः॥तथाहितत्रतद्देशकालविशिष्टएतद्दे-
शकालविशिष्टत्वंप्रतिपाद्यते॥एतद्देशकालविशिष्टेवातद्देशकालवैशिष्ट्यं॥तत्तद्देशकालयोरै-
क्यंवा॥तद्विशिष्टयोरैक्यंवा॥नाद्यः॥प्रत्यक्षादिनायज्ज्ञातंतदुद्देशेनाज्ञातंज्ञापयितुंसोयमित्या-
दिवाक्यमुच्यतेतद्देशकालविशिष्टंतुनप्रत्यक्षमितितद्देशकालविशिष्टत्वेननोद्देश्यतासंभवः त-
द्देशकालवैशिष्ट्यस्येदानींसत्वापत्तेश्च॥नद्वितीयः एतत्कालादेरन्यदासत्वापत्तेः॥नतृतीयःबा-
धात्॥अतएवनचतुर्थोपिविशेषणयोर्भिन्नत्वेनविशेषणाविशेष्यतत्संबंधात्मकविशिष्टस्यभि-
न्नत्वादतोधंसनवाअयंनैवसः इतिसंशयविपर्ययविरोधिज्ञानविषयतत्तोपलक्षितप्रतियोगिकभेद-
विरहवदिदंत्वोपलक्षितदेवदत्तस्वरूपस्यैवबुभुत्सितत्वेनसोयमितिवाक्यस्यैतदिदंपदलक्षितताद्-
शदेवदत्तस्वरूपएवतात्पर्यात्॥भेदविरहश्चनकश्चिद्धर्मःकिंतुस्वरूपंतदेवचैक्यंतस्यचप्रत्यक्षसि-
द्धत्वेपितत्तेदंतोभयोपस्थितिद्वारकतदुभयोपलक्षितस्वरूपैक्यबोधस्यैक्तसंशयविपर्ययनिवर्त-
कत्वेनतदिदंपदद्वयोपलक्षितस्वरूपेभेदाप्रसक्तावपिताद्दशस्वरूपैक्यबोधकस्यत दिदंपदद्व-
यात्मकवाक्यस्यनवानवैयर्थ्यं॥तथाजीवत्वेश्वरत्वोपलक्षितचिन्मात्रस्वरूपेभेदाप्रसक्तावपि

तादृशचिन्मात्रस्य स्वप्रकाशतया तत्त्वंपदार्थबोधकत्वैश्च स्फुरणेनाशु लक्षितत्वेऽपि च जी
वत्वोपलक्षितेश्वरत्वोपलक्षितयोर्भेदसंशयादिविपर्ययविरोधिज्ञानविषयैश्वर्योपलक्षितप्रातियो
गिकभेदविरहरूपजीवत्वोपलक्षितस्वरूपैक्यस्य कोऽप्याभासोऽतिसुखसुलभत्वासंभवेन जीवत्वेश्वरत्वाद्यु
पस्थितिद्वारकतत्त्वंपदलक्षितचिन्मात्रस्वरूपैक्यबोधस्यैव तादृशसंशयादिविपर्ययनिवर्तकतया
न तादृशबोधजनकस्य तत्त्वमसीतिवाक्यस्य वैयर्थ्यं ॥ न चोपहितभेदसंशयादिविपर्ययनिवर्तना
योपहितयोरभेदपरत्वं तर्हि वाक्यस्यास्तामिति वाच्यं ॥ भेदस्य व्यावहारिकत्वेन तादृशभेदस्योक्तरी
त्या व्यावहारिकत्वासंभवेन प्रातीतिकस्यापि स्यात्तर्हि एकत्र यत्तादृशस्य स्वभावाप्यानिर्वाहात् ॥ उप
हितयोर्भेदस्य व्यावहारिकत्वेन ब्रह्मज्ञानमात्रबाध्यत्वाच्चोपहिताभेदज्ञानस्य तादृशभेदसंशयादि
विरोधित्वाभावाच्च ॥ तथा च तत्त्वमस्यादिवाक्यतात्पर्यविषयप्रत्यगभिन्नब्रह्मरूपविषयस्यैव
जिज्ञासासूत्रे महर्षिणा सूचितत्वात्तादृशविषयोपपादकं कर्तृत्वादिधर्मि व्याख्यानाय भाष्ये तद्व्यास
वर्णनमितिविवरणाद्युक्तं युक्तमेव ॥ ननु जीवब्रह्मैक्यरूपविषय एव सूचित इत्यत्र किं मानमिति चे
दुच्यते ॥ जिज्ञासासूत्रे हि ब्रह्मज्ञानं विचारफलत्वेन सूचितं तस्य च स्वतः पुरुषार्थतया स्वरूपवि
नाविचारासाध्यतया मुक्तेरनित्यत्वापत्त्यानित्यस्वर्गादिसुखादिभोगविरक्तस्यैव ब्रह्मजिज्ञासा

धिकाराच्च स्वरूपसाक्षात्कारत्वेन तस्याः स्वतः पुरुषार्थत्वेऽपि न मुमुक्षुजिज्ञास्यता संभवइति परिशे
षात्ब्रह्मज्ञानस्य जीवगतकर्तृताध्यासरूपबंधनिवर्तकत्वेनैव काम्यता वाच्या ॥ तथा च भिन्नविषय
योरध्यासतत्वज्ञानयोर्निवर्त्यनिवर्तकभावासंभवात्प्रत्यगभिन्नब्रह्मैव विचार्यमिति सिध्यति ॥ य
त्तु नारायणप्रसादादेव बंधनाद्यरूपो मोक्षो न ज्ञानमात्रात् ॥ यस्य प्रसादात्परमार्तिरूपादस्मात्सं-
सारान्मुच्यते नापरेणेत्यादिश्रुतेः ॥ मत्प्रसादात्तरिष्यसीत्यादिस्मृतेश्च ॥ न च ज्ञानं विनात्यर्थप्रसा-
दः ॥ कर्मणा त्वधमः प्रोक्तः प्रसादः श्रवणादिभिः ॥ मध्यमो ज्ञानसंपत्त्या प्रसादस्तूत्तमो म-
तः ॥ प्रसादात्त्वधमाद्विष्णोः स्वर्गलोकः प्रकीर्तितः ॥ मध्यमाज्जनलोकादिरुत्तमस्त्वेव मुक्तिदइ
ति पुराणात् ॥ ज्ञानं च श्रवणादिसाध्यं ॥ श्रवणं मननं चैव ध्यानं भक्तिस्तथैव च ॥ साधनं ज्ञानसं
पत्तौ प्रधानं नान्यदिष्यते ॥ न चैतानि विना कश्चिज्ज्ञानमाप कुतश्चनेति पुराणात् ॥ श्रवणादि
साध्यज्ञानस्य प्रसादफलकत्वावगमात् ॥ श्रवणादिसाध्यज्ञानं प्रसादद्वारैव मोक्षहेतुरित्युक्तं
पुराणे यथा दृष्ट्वा प्रसन्नः सन्राजा बंधापनोदकृत् ॥ एवं दृष्टः स भगवान्कुर्याद्बंधविमोचनमि-
ति ॥ न चैवं सति दृष्ट्वैव तं मुच्यतइति श्रुतावधारणविरोधइति वाच्यं ॥ तस्यायोगव्यवच्छेदार्थक
त्वात् ॥ मोक्षहेतुप्रसादे अन्ययोगव्यवच्छेदार्थकत्वाद्वा ॥ अतएव एवं ज्ञाते तु भगवाननादिः पुरुषो

त्त मः ॥ प्रसीदत्यच्युतस्तस्मिन् प्रसन्ने क्लेशसंक्षय इति विष्णुपुराणमपि संगच्छते तेन याच मोक्षसाध-
न प्रसादहेतुनयैव विचारफलब्रह्मज्ञानस्य काम्यते तिपरेणोक्तं ॥ तदसत् ॥ तत्त्वज्ञानोत्तरं याव
ता कालेन भुज्यमान कर्मसमाप्तिस्तदन्यकालविलंबनिषेधं मोक्षं प्रतिकथयंत्यास्तस्य तावदेव चि
रं यावन्न विमोक्ष्ये अथ संपत्स्य इति श्रुतेर्विरोधेन मुक्तौ ज्ञानेन प्रसादापेक्षायाः वक्तुमशक्यत्वात् ॥
अन्यथा भुज्यमान कर्मकाले प्रसादानुत्पत्तौ तदन्यकाल विलंबाय रयं भावेनोक्तश्रुत्यर्थबाधापत्तेः
न च यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वामिति श्रुतिरपि ज्ञानस्य प्रसादापेक्षां द
र्शयति तथा भक्तिजन्य प्रसादस्य ननु साक्षात्कार एवोपयोगस्य बोधनात् ॥ यं मुमुक्षुं एष परमा-
त्मा वृणुते प्रसादेनानुगृह्णाति तेन लभ्यः साक्षात्क्रियते तत्तस्य संबंधेन एष परमात्मा स्वां तनुं स्व
स्वरूपं विवृणुते प्रकटयति आवरणं विनाशयते नैकापि पततीति ताहृशश्रुत्यर्थात् ॥ नापि प्रारब्धकर्म
क्षये प्रसादविनियोगोक्तिः साधीयसी ॥ प्रसाद निरपेक्ष भोगादेव तत्सिद्धेः ॥ प्रारब्धकर्मणां
भोगादेव क्षय इति वचनसिद्धत्वात् ॥ अत एव तच्चिंता विपुलाल्हाद क्षीणपुण्यचया तथा ॥ तद
प्राप्ति महादुःखविलीनाशेषपातका ॥ निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यकेति पुराणोक्तौ-
आल्हाद दुःखभोगयोरेव कर्मनाशकत्वमुक्तं न प्रसादस्येति संगच्छते ॥ किंचाधिष्ठान प्रमात्वेन मि-

ध्यानिवर्तकत्वस्य लोके क्लृप्तत्वमिव ज्ञानस्य प्रसादहेतुत्वं न क्लृप्तं किंतु सेवाया एव प्रसादहेतुत्वं
लोके क्लृप्तं तदनु रोधेन तरति शोकमात्मविदिति श्रुत्या विद्वान्नामरूपाद्विमुक्तः ज्ञात्वा देवं मुच्यते सर्व
पाशैरित्यादि श्रुत्या च ज्ञानस्यैव बंधनिवृत्तिरूपमोक्षसानत्वबोधांगीकारावश्यकत्वाद्यस्य प्रसा-
दादित्यादेरीश्वरसेवाजन्य प्रसादो ज्ञानद्वारेण मोक्षजनक इत्येवार्थः॥ यस्य देवे परा भक्तिर्यथा देवे त
था गुरौ ॥ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मन इति श्रुत्यात थैव बोधनाच्च ॥ न चोक्तपुराणवच
नविरोधः ज्ञानसंपत्या प्रसादस्तूत्तमो मत इत्यत्र एवं ज्ञाते त्वित्यादि विष्णुपुराणवाक्ये च ज्ञानं न तत्व
दर्शनं किंतु सर्वत्र विष्णुरूपत्वदर्शनरूपं समत्वमेव विवक्षितं ॥ यतितव्यं समत्वे च निर्वाणमपि चे
च्छता॥ देवा मनुष्याः पशवः पक्षिवृक्षसरीसृपाः ॥ रूपमेतदनंतस्य विष्णोर्भिन्नमिव स्थितं ॥ एत
द्विजानता सर्वं जगत्स्थावरजंगमं ॥ द्रष्टव्यमात्मवत् विष्णुर्यतोयं विश्वरूपधृक् इति पूर्ववाक्यात्
॥ अत एव रागद्वेषविषय ... त्वायोग्यत्वरूपात्मतुल्यत्वस्य ज्ञानं सर्वत्र विष्णुरूपत्वदर्शनसमत्वस्य
फलमित्युक्तं ॥ अत एव च सर्वत्र दैत्याः समतामुपेत समत्वमाराधनमच्युतस्य ॥ तस्मिन् प्रसन्ने कि
मिहास्त्यलभ्यमित्युक्त्वा समाश्रितात् ब्रह्मतरोरनंतान्निःसंशयं प्राप्स्यथ वै महत्फलमित्यनेन वि-
ष्णुपुराण एव समत्वरूपाराधनजन्यप्रसादस्य तदाश्रयणदृष्टांतेन परंपरया मोक्षफलप्रयोजक

त्वमुक्तं संगच्छते ॥ नहि सफलत्वं श्रवणस्याध्ययनविधानेन फलवदापकत्वनियमः किंतु लोकादिव्या
पारस्य च विधानेनेति नियमाद्दर्शनेत्यादेस्तु अनन्यो राजा प्रजापतिः तथा मोक्षफलस्तथैवेत्यर्थः ॥ नहि रा-
जावर्धं प्रति हिंसात्वेन प्रसक्तः प्रत्युत स्वापराधं च वधं प्रति भूयो निग्राहक ॥ तमेवेत्यादिश्रुत्या विद्या
नामरूपाद्विमुक्त इति श्रुत्या च शुद्धात्मज्ञानस्य सर्वदुःखनिवर्तकत्वोक्त्या प्रसादहेतुत्वासंभवाच्च ॥
दृष्टैवेत्यादौ प्रसादे अन्ययोगव्यवच्छेदपरत्वमवधारणस्येत्युक्तिरप्ययुक्तैव ॥ अहं सर्वानमुच्य
तइत्यस्यैव ततः प्रतीतेः प्रसादस्याश्रुतत्वाच्च ॥ एवं च जीवगतकर्तृत्वादिरूपबंधनिवर्तकत्वेनैव
विचार्यप्रत्यगभिन्नब्रह्मज्ञानस्य काम्यत्वात् बंधस्य सत्यत्वे तस्य ज्ञानान्निवृत्त्ययोगाद्बंधनिवृत्ति
रूपप्रयोजनार्थमेव साध्ये अध्यासोक्तिरित्यपि विवरणाद्युक्तं सत्यमेव ॥ सत्यज्ञानाकार्यस्यापि स-
त्यपापस्य सेतुदर्शनान्निवृत्तेर्न प्रयोजनार्थं तदुक्तिरिति विरोधिकोक्तं दूषणं तु न सत् ॥ नान्यः पंथा अ-
यनाय विद्यत इति श्रुतेर्बंधनिवृत्तिरूपमोक्षस्य ज्ञानैकसाध्यत्वानुरोधेनाधिष्ठानाज्ञानकार्यस्याधि
ष्ठान साक्षात्कारत्वेनाधिष्ठानसाक्षात्कारमात्रनिवर्त्यत्वनियमात्ततः ॥ सेतुदर्शनमात्र-
स्य न दुरितनाशकत्वं देवात्तआगतस्य म्लेच्छादेरपि सेतुदर्शनात् दुरितनाशप्रसंगात् ॥ ज्ञानविधेर्व
हुशआकरेषु निरस्तत्वाच्च परिषदुपस्थापनपूर्वकमपादुकादिवर्जनदोषख्यापनाभिस्नानभोजि-

त्वदूरगामित्वादिव्रतकलापविशिष्टत्वेनैवदर्शनविधिस्तथाचविशेषणस्यव्रतकलापस्यकृ
तिसाध्यत्वाद्विशिष्टदर्शनविधिः सचचइतितादृशादर्शननिवर्त्यपापस्यतु अधिष्ठानज्ञानमात्र
निवर्त्यत्वाभावात् कारणात्मनानिवृत्त्यभावाच्च नात्यंतिकीनिवृत्तिः आत्मज्ञानेतु नकिंचित् विशेष
णंकृतिसाध्यंकर्मसमुच्चयस्यनिरसनीयत्वात् श्रवणादीनांतत्वसाक्षात्कारएवोपक्षीणतया-
आत्माज्ञानकृतबंधस्यात्मज्ञानमात्रनिवर्त्यतास्ततेर्नकिंचिदेतत् ॥ यदपिचंद्रिकायांव्यासती
र्थेनोक्तं ॥ शुध्दोनभातीतिकोर्थः किमात्मस्वरूपेकिंचिद्भातिकिंचिन्नभातिकिंवाआत्मस्वरूपमे
वनभातियद्वानात्मापिभातीति ॥ आद्येअभासमानोंशः शरीरादिभ्योभेदोवाकर्तृत्वभोक्तृत्वा
द्यभावोवाब्रह्मात्माभेदोवाद्वितीयमात्राभावोवाआत्मभिन्नः सत्यश्चेत् अपसिध्दांतः मिथ्याचे-
न्नतत्वावेदकशास्त्रवेद्यः आत्ममात्रत्वेद्वितीयपक्षांतर्भावः तथापिकल्पितेनभेदनागृहीतइवभा
तीतिचेन्न ॥ तत्वतोगृह्यमाणेधिष्ठानेभेदकल्पनायाअगृहीतत्वारोपस्यचायोगात् ॥ नचमिथ्या
भूतेनापितेनोपलक्षितात्माशास्त्रवेद्यः सचसत्यइतिवाच्यं ॥ स्वप्रकाशत्वेननित्यसिध्दात्मावबो
धार्थमुपलक्षणत्वोक्त्ययोगात् ॥ उपलक्षणत्वएवतात्पर्येचाप्रामाण्यापातात् ॥ अतएवन
द्वितीयः तस्यस्वप्रकाशत्वेनभानायोगात् स्वप्रकाशस्याप्यविद्यावशेनाभानेअविद्यादुःखादेः

प्रकाशोनस्यात्तस्यचैतन्यप्रकाशाधीनप्रकाशत्वोपगमात् ॥ युक्तंचापौरुषेयस्याप्यागमस्यश्रु-
कितात्पर्यभ्रमरूपदोषस्ययजमानः प्रस्तर इत्यादेरिवप्रत्यक्षविरोधेनप्रतीतार्थव्यावर्तनं उक्ता
चत्वयापितत्त्वमसीतिवाक्येप्रत्यक्षाविरोधायमत्वर्थलक्षणातस्मात् परमतेस्वरूपमात्रस्यस्वप्र
काशत्वेननित्यसिद्धत्वात् अन्यस्यचाज्ञानकल्पितत्वेनाज्ञानविषयत्वायोगादज्ञानासंभवादज्ञा-
तोविषयोऽज्ञाननिवृत्तिः फलमज्ञानीचाधिकारीनयुक्त इतिशास्त्रमनारंभणीयमेवेतिभामतिम
तंतावदयुक्तमेवेतिवाचस्पतिदूषणं ॥ तत्रब्रूमः ॥ जिज्ञासासूत्रेउक्तरीत्याविचारफलत्वेनसूत्रि
तस्यब्रह्मज्ञानस्यजीवगताविद्यादिबंधनिवर्तकत्वेनैवकाम्यत्वात् इज्यतेत्वयथाबुध्येतिश्रुत्यात
त्त्वमस्यादिवाक्योत्थंज्ञानंमोक्षस्यसाधनं ज्ञानेत्वनाहृतेतस्मिन् सर्वंब्रह्ममयंभवेदितिबृहन्नारदी
यवचनेनज्ञानशब्दोदितसाक्षात्कारत्वेनानाहृत तच्छब्दोदितदोषराहित्यादिनाचयुक्तंवेदांतजन्य-
शुद्धब्रह्मात्मैक्यज्ञानस्यैवसकलभ्रमनिदानाविद्यानिवर्तकत्वं ॥ दोषाश्चेदंवाक्यंप्रत्यगभिन्न-
ब्रह्मपरंनभवतीतिप्रमाणासंभावनारूपएकः ॥ विरुद्धतयाभासमानेप्रतीचिकथंब्रह्माभेद इति
प्रमेयासंभावनारूपोद्वितीयः ॥ कर्तृताध्यासस्यस्वरसवाहितारूपोविपरीतभावनात्मकस्तृ-
तीयः ॥ तेचक्रमेणश्रवणमनननिदिध्यासनैः प्रत्येकंक्रमेणनिरसनीयास्तथाचनिदिध्यासनांत

साधनैर्निरुक्तदोषापगमे वेदांतवाक्यजन्यनिर्विकल्पकब्रह्मात्मैक्यसाक्षात्कार एवाविद्यानिवर्तकः ॥ अहंप्रत्ययस्तु न तादृशसाक्षात्कारात्मक इत्येवाहंप्रत्यये शुद्धो न भातीत्यस्य वाचस्पतिवाक्यस्यार्थः ॥ वेदांतवेद्य इति तद्वाक्येनायमेवार्थः सूचितः ॥ अन्यथा शुद्धोऽहंप्रत्ययेन भातीत्येवोक्त्वा वेदांतवेद्य इत्यनर्थकमेव स्यात् ॥ तथा च तादृशात्मसाक्षात्काराय वेदांतविचारात्मकशास्त्रमारंभणीयमेवेति वाचस्पत्युक्तं सम्यगेव ॥ शुद्धोऽहंप्रत्ययेन भातीत्यस्माद्वाक्यात्कथमप्यप्रतीतानां स्वबुद्धिमात्रपरिकल्पितानां केषांचिदर्थानां तथा विकल्पनेऽपि न दोषः ॥ तथाहि ॥ आत्मस्वरूपे किंचित् बुध्यादिसहितत्वांशो भाति न हि निर्मुक्तत्वकर्तृत्वाभावाद्यंशो न भातीति तदर्थः साधुरेव तस्याभासमानांशस्याधिकरणात्मकत्वेन तदात्मना सत्यत्वमेव तदंशत्वेन मिथ्यात्वेऽपि मिथ्यात्वेन तद्बोधकशास्त्रस्य तत्त्वावेदकत्वाबाधात् ॥ तस्य स्वकांशात्मस्वरूपत्वेऽपि कल्पितेन भेदेनागृहीत इव भातीत्यपि सुवचं ॥ अधिष्ठानसाक्षात्कारात्मकग्रहविशेषस्यैव वक्ष्यमाणरीत्या सकलकल्पनानिदानाविद्यानिवर्तकत्वात् ॥ मिथ्याभूतेनापि तेनोपलक्षितात्मा शास्त्रवेद्यः स च सत्य इत्यपि युक्ततरं ॥ आत्मनः स्वकांशत्वेऽपि ब्रह्मकर्तृत्वाद्युपस्थितिमूलकब्रह्मात्मैक्योपस्थितेरेव संशयविपर्ययविशेषविरोधितया तदुपलक्षितात्मस्वरूपस्यैव बुभुत्सितत्वेन तत्रैव शास्त्रतात्

यविधारणात् ॥ तस्यैवशास्त्रेवेद्यतायाअवश्यंवक्तव्यत्वात् ॥ आत्मापिनभातीत्यत्रोपिकश्चनः
यद्यप्यात्माजंतुमात्रस्यसंदेहविपर्ययापरोक्षपरोक्षप्रमास्थलेतदभावदशायांसुषुप्तियोगशा-
स्त्रसिद्धनिरोधाख्यसमाधिकालयोश्चैकरूपेणतत्साक्षिनयानिर्णीतः प्रथमेआंतराश्चज्ञानादयः
सहोत्पत्तिविनाशाभ्यामव्यभिचरितप्रकाशाःतदेतत्सर्वस्य साक्षिणमंतरेणपपादयितुमशक्यं
सुखदुःखादिषुजन्यज्ञानासंभवात्तार्किकादिमतेअनुव्यवसायगम्यंज्ञानंनचोत्पन्नेज्ञानेनियमेन
तदनुव्यवसायोस्तीतिस्वचंतथासत्यांतरज्ञानधाराणामविच्छेदप्रसंगेनबाह्यव्यवहारविलोपप्र
संगात्ज्ञानोसन्निप्रत्यक्षंचदुर्वचंप्रत्यक्षेविषयस्यकारणत्वात्उत्पन्नानंतरक्षणेतेनभासितत्वेंत
प्रचोत्पन्नेरभावस्तस्याःक्षणिकत्वात् ॥ आत्मनोप्यव्यभिचरितप्रकाशत्वंतन्मतेनसंभवतित्व
गतविशेषगुणानवगाह्यात्मप्रत्यक्षस्यतन्मतेऽनंगीकारादात्मनोऽव्यभिचरितप्रकाशत्वापातरज्ञा
नधाराभ्युपगमेबाह्यपदार्थविज्ञानविलयप्रसंगइतिस्वप्रकाशआत्माऽवश्यमभ्युपगंतव्यस्तथा
चतस्याभानायोगस्तथाप्यस्तिभातीत्येवंरूपाव्यभिचारप्रकाशत्वायसद्रूपेणभानात्मना अभा-
नासंभवेपिसाक्षिस्वरूपानंदेभासमानेपिस्वरूपप्रकाशेनसहानुवर्तमानानाद्यविद्ययादुःखाद्यपुरु
षार्थसंबंधोपितत्रारोपितस्तयातारतम्यापन्नतत्तद्विषयसंपर्कजनितवृत्तितादात्म्याध्यासात्सा

क्षिण्यपितारतम्यमध्यस्तंतत्तश्चस्वरूपभूतनिरतिशयानंदेऽनुभूयमानेपिइतोप्यधिकआनंदोस्तिस
मम नभातिसमयाऽनवास इत्येवंकल्पिताभानयोगएवनभातीत्यस्यार्थः॥ एतेनस्वप्रकाशस्याप्यविद्याव
शेनाभाने अविद्यादेः प्रकाशोनस्यात्तस्यचैतन्यप्रकाशाधीनप्रकाशत्वादितिचंद्रिकोक्तदूषणंनिरस्तं
॥ सदाद्यात्मनाप्रकाशमादायैवतत्प्रकाशोपपत्तेः॥ अतएवस्वप्रकाशत्वात्स्फुरतिचैतन्यमविद्या
वृतत्वाच्चनस्फुरति॥ नचविरोधः स्फुरणस्यतात्विकत्वादस्फुरणस्यचातात्विकत्वादेवंचनकोपिदो
षः स्फुरत्वादज्ञानादिसाधकत्वस्यास्फुरत्वाद्विषयत्वस्यचसंभवादित्यपिसाधुनिरतिशयानंदांशेअ
नाद्यविद्याकृतकल्पितावरणस्यैवास्फुरणपदार्थत्वात्स्वरूपप्रकाशेनसहानुवर्तमानानाद्यविद्याव
शेनाध्यस्तस्यतस्यस्वप्रकाशेप्यात्मनिसंभवात्स्फुरत्यस्फुरणायोगस्योक्तत्वादितिचंद्रिकोक्तदू
षणानवकाशः॥ अथस्वप्रकाशतयानित्यंभासमानेआत्मनि अविद्यायास्तत्कृताध्यासादेश्चासंभ-
वः ज्ञानाज्ञानयोर्विरोधादितिचेदत्रवदंति॥ तथाभूतेप्यात्मन्यहमज्ञः मामहंनजानामीत्यनुभवाद
निर्वचनीयभावरूपाज्ञानात्मकाविद्यासंबंधोपपत्तेः॥ तदुक्तंस्वप्रकाशेकुतोविद्यातांविनाकथमावृ
तिः॥ इत्यादितर्कजालानिस्वानुभूतिर्ग्रसत्यसौ॥ अज्ञानेनावृतंज्ञानंतेनमुह्यंतिजंतवइतिच॥ अ
यमभिप्रायः अधिष्ठानभानमात्रंनाज्ञानतत्कृतारोपादिविरोधितयासतीदंरजतमित्यादिभ्रमानु

दयप्रसंगात्तत्रापीदंतायाः अधिष्ठानस्वरूपभूतायाः भानात् नाप्यधिष्ठानासाधारणस्वरूपज्ञानं
तथाह्यदंताचननथेतिवक्तुंयुक्तंशंखः श्वेत इत्यधिष्ठानासाधारणस्वरूपज्ञानेपिपीतभ्रमोपादाना-
ज्ञानानिवृत्तेः नाप्यधिष्ठानासाधारणस्वरूपापरोक्षज्ञानंतथासतीयंशुक्तिरित्याप्तोपदेशादज्ञाना
धनिवृत्तिप्रसंगःवृक्षाधोग्रत्वादिभ्रमस्यतादृशज्ञानानिवर्त्यत्वाच्च ॥ नचसोपाधिकभ्रमेष्वपरोक्ष
ज्ञानमन्यत्रतुपरोक्षमपरोक्षंवाज्ञानमज्ञाननिवर्तकमितितिनियमः ॥ तथाचशुक्तिरजतादिभ्रमाणां
परोक्षापरोक्षज्ञानसाधारणाधिष्ठानासाधारणस्वरूपज्ञानत्वेनैवज्ञानंनिवर्तकंपीतशंखादिभ्रमा
णांतुतादृशापरोक्षज्ञानमेवेतिवाच्यं ॥ शुक्तिरजतादिभ्रमव्यावृत्तस्यपीतशंखभ्रमेषुसोपाधिक
भ्रमत्वस्यानुगतस्यवक्तुमशक्यत्वात् शुक्तिरजतादिभ्रमेषु सादृश्यादिरूपदोषस्योपाधित्वसंभवा
त् नहिपित्तादिदोषएवोपाधिर्नसादृश्यादिरित्यत्रकिंचिद्गमकमस्तितस्मात्प्रमाणानुसारेणयादृश
भ्रमेयज्ज्ञानंनिवर्तकतयाप्राप्नोतितदेवतथेतिस्वीकर्तव्यंआत्मविषयकाज्ञाननिवर्तकतयाचशा
स्त्रबलाद्दृढंतवाक्यजन्यमेवज्ञानमधिष्ठानतत्वावगाह्यपरोक्षरूपंनिरस्तसमस्तपूर्वोक्तदोषमेवा
भ्युपेयमितिसर्वमनवद्यं ॥ एतेनदुःखादेः श्रवणादिसंस्कृतांतःकरणवृत्तिनाश्यत्वेशुक्तिरूप्यादौतद
दर्शनात्सत्येभ्रमरादिध्याननिवर्त्यकीटादौतद्दर्शनादज्ञानस्यसत्यत्वंचस्यादितिचंद्रिकोक्तदूषणंनिर

स्तं ॥ प्रमाणबलेन शुक्त्यधिष्ठानापरोक्षस्यैव शुक्तिरूप्याज्ञाननिवर्तकत्वात् विजातीयाविषय-
कध्येयमात्रविषयकवृत्तिसंतानरूपस्य ध्यानस्येच्छाधीनस्य तदनधीनज्ञानतो वैलक्षण्येन तत्वज्ञा
नत्वाभावाच्च न प्रत्युदाहरणत्वसंभवः ॥ अत एवोक्तं न बुद्धिं मर्दयन् दृष्टो घटतत्वस्य वेदिता ॥ उपमृ
द्नाति चेद्बुधिं ध्याता सो न तु तत्वविदिति ॥ यथा षड्जादयो गांधर्वशास्त्राभ्यासात् प्रागपि स्फुरंतः
तद्रूपेणानुल्लिखिता नश्रोत्रेण व्यज्यंते व्यज्यंते तु शास्त्रवासितेन एवं वेदांतवाक्यजन्यब्रह्मात्मैक्या
कारवासनावासितांतःकरणेन तद्भावाभिव्यक्तिर्न प्रागिति भामत्युक्तमपि समीचीनमेव ॥ तत्र प्राग
स्फुरतः पश्चाच्च स्फुरतः षड्जत्वादिजातिभेदस्येव प्रकृते तदभावादिति चंद्रिकोक्तदूषणं तु अनाद्य
विद्याकल्पितधर्मभेदस्य ब्रह्मणि संभवात् बहुशो दत्तोत्तरं चर्वितचर्वणमेव ॥ न च क्रियाऽस
मभिव्याहारेणेत्यादिकं वाचस्पत्युक्तं त्वति सम्यगेव युक्तं चापौरुषेयस्याप्यागमस्य यजमानः प्रस्त
र इत्यादेरिव प्रत्यक्षविरोधेन प्रतीतार्थच्यावनमुक्तां च त्वया पि तत्वमसीति वाक्ये प्रत्यक्षाविरोधा
पलक्षणेति चंद्रिकोक्तदूषणं तु परमाग्रहनिबंधनं ॥ अर्थक्रियादिरूपपरीक्षापरीक्षितस्य प्रत्यक्ष
स्य प्राबल्येन व्यवहारदशायामेव तद्विरुद्धार्थग्राहिणो यजमानः प्रस्तर इत्यादेस्तद्विरोधेनामुख्या
र्थकत्वेपि अद्वैतागमस्य परीक्षितप्रमाणाविरोधाभावेन मुख्यार्थत्वस्यैव स्वीकरणमुचितं प्रत्यक्षादेर्हि

परीक्षया व्यावहारिकप्रामाण्यमेव सिद्धं तच्च नाद्वैतागमेन बाध्यते न बाध्यते तु तात्विकं प्रामाण्यं न तु न
परीक्षयासिद्धमिति न विरोधः ॥ किंचाद्वैतागमस्योपक्रमादिभिस्तात्पर्यनिर्णायकैर्लिंगैरद्वैतपरत्व
निर्णयान्मुख्यार्थत्वमेव यथा चैतत्तथा जन्माधिकरणे वक्ष्यामः ॥ यजमानः प्रस्तर इत्यादौ प्रतीतार्थे
उपक्रमाद्यभावादयुक्तं प्रत्यक्षविरोधेन स्वार्थत्यजनं ॥ यद्यपि प्रस्तरयजमानादेरभेदस्यापूर्वत्वरूपैक
लिंगस्य ताद्दशार्थे तात्पर्यग्राहकत्वसंभवः एकैकलिंगस्य तात्पर्यनिर्णायकत्वेन दन्यलिंगानामनु
वादकत्वाद्वाहुल्यमप्रयोजकमित्यद्वैतागमसाम्यशंका संभवति तथापि यजमानः प्रस्तर इत्यस्य
प्रस्तरमुत्तरं बर्हिषः सादयतीति विध्यर्थवादत्वेन स्वापेक्षितस्तुतिपरत्वनिश्चयादन्यपरात्तस्मा
न्न प्रत्यक्षविरुद्धार्थसिद्धिरिति न तेन प्रत्यक्षस्य व्यवहारकाले बाधः ॥ तत्वमस्यादिवाक्येपि न-
प्रत्यक्षानुरोधाय लक्षणा किंतु उपक्रमादिभिस्तात्पर्यनिर्णायकैर्लिंगैर्निर्णीताद्वैतब्रह्मात्मतात्प
र्यनिर्वाहायैव तदुक्तं सिद्धांतबिंदौ मधुसूदनसरस्वतीभिः ॥ इच्छंति ह्यकाशपदादपि निर्विक-
ल्पकं स्मरणं तात्पर्याधीनत्वात् शब्दवृत्तेरिति ॥ तस्मादित्यादिना अधिकार्याद्यसंभवोक्तिरपि चं-
द्रिकोक्ता न विचारसहा ॥ नह्यविद्याकल्पिते अविद्या अस्माभिः स्वीक्रियते किंतु चैतन्यमात्र एव
तस्मिंस्तु सर्वं जडजातं कल्पितमित्येकाश्रयाश्रितत्वसंबंधाज्जडावच्छिन्नचैतन्यमावृत्तमज्ञानी

तिव्यपदिश्यतइत्यज्ञानीअधिकारीतितुसुष्टूक्तमेवेतिदिक् ॥ यत्वनिर्वचनीयभावात्मकानाद्यविद्याकृ-
तावरणसंभवेपूर्वोक्तंसर्वंसंगच्छतेनतुतत्संभवत्यविद्यायाउक्तरूपायाः लक्षणतः प्रमाणतश्चनिरूप-
णानर्हत्वादितिपरेणोक्तंतल्लक्षणप्रमाणसद्भावान्नसाधु ॥ तथाहि ॥ अनादिभावत्वेसतिज्ञाननिव
र्त्यत्वंतल्लक्षणंतावत्कथयं ॥ नचाकाशादावतिव्याप्तिरात्मनआकाशःसंभूतइतिश्रुत्याआकाशोत्प-
त्तिबोधनेनतस्यानादित्वानभ्युपगमात् ॥ महादिकस्थानीयस्याव्याकृताकाशस्यब्रह्माविद्याति
रिक्तत्वानभ्युपगमात् ॥ ज्ञानप्रागभावेऽतिव्याप्तिवारणायभावत्वनिवेशः ॥ उत्तरोत्तरमनोवृत्तेःपूर्व-
पूर्वमनोवृत्तिध्वंसरूपत्वोपगमेतादृशमनोवृत्तिष्वतिव्याप्तिवारणायानादित्वनिवेशः ॥ यद्वाप्रागभा
वध्वंसःप्रतियोगिजन्यइतिमतेज्ञानप्रागभावेऽतिव्याप्तिवारणायभावत्वनिवेशः ॥ अविद्याध्वंसः
ज्ञानानतिरिक्तोज्ञानजन्यइतिमतेअविद्याध्वंसेतिव्याप्तिवारणायानादित्वनिवेशः ॥ चिदविद्यासं
बंधेऽतिव्याप्तिवारणायज्ञानजन्येति ॥ साक्षाज्ज्ञानजन्यत्वेत्यर्थकमविद्यासंबंधध्वंसस्यज्ञानजन्यावि
द्याध्वंसजन्यत्वान्नतत्रातिव्याप्तिः ॥ नचानादिभावस्यज्ञाननिवर्त्यत्वानुपपत्तिःअभावस्येवभावस्या
पिनाशनाशयोर्विरोधिसन्निपाततदभावप्रयुक्तत्वेनविपक्षेबाधकशून्यतयाअनादिभावत्वस्या
विनाशित्वव्याप्यत्वेमानाभावात् ॥ भ्रमोपादानत्वंवातल्लक्षणं ॥ यत्तुभ्रमपदेनरजत रूपा

र्थोविवक्षितः ज्ञानंवा ॥ नाद्यः ॥ पदार्थस्यासत्वेनतदुपादानतायाः असंभवात् ॥ नद्वितीयः ॥ अंतः
करणेऽतिव्याप्तेरितिपरेणोक्तंतदसत् ॥ भ्रमविषयस्यापारमार्थिकत्वेप्यनिर्वचनीयस्वरूपाभ्युपगमेननत
दुपादानतायाःसंभवात् ॥ नाप्यंतःकरणेऽतिव्याप्तिः ॥ तस्यप्रमोपादानत्वेपिभ्रमंप्रत्यतथात्वात् ॥
तादृशाज्ञानेप्रत्यक्षानुमानश्रुतयश्चप्रमाणानि ॥ तथाहिअहमज्ञइतिप्रत्यक्षंतादृशानिर्वचनी-
यभावरूपानाद्यज्ञानेप्रमाणं ॥ नचाहमज्ञइत्यादिप्रतीतौज्ञानाभावएवविषयोस्त्वितिवाच्यं ॥ ध
र्मिप्रतियोगिज्ञानसत्वेपिजायमानस्यतस्यज्ञानसामान्याभावविषयकत्वेव्याघातात् ॥ नहिप्रति-
योग्यधिकरणेप्रतियोग्यधिकरणलक्षणावच्छेदेनतदत्यंताभावस्तवाप्यभिमतः ॥ धर्मिप्रतियोगि
नोःसाक्षिग्राह्यत्वाभ्युपगमेपिसाक्षिरूपज्ञानेनैवव्याघातोदुर्वारः ॥ किंबहुनानजानामीत्यभावग्र
हणेपिस्वकालेस्वाभावावगाहनात्व्याघातोदुर्वारः ॥ अज्ञानस्यस्वरूपतःसाक्षिगम्यत्वेप्युक्तवि
शेषणविशिष्टस्यप्रमाणगम्यत्वान्नतत्रानुमानोपन्यासासंगतिः ॥ त्वदुक्तमर्थंनजानामीतिप्रत्य
क्षानुपपत्तिश्चतादृशाज्ञानानभ्युपगमे ॥ ननुकिमत्रसर्वानुवादेनव्यवहारःकिंवासामान्यतः ॥ ना-
द्यः ॥ तादृशव्यवहारस्यैवाभावात्भावेवात्वदुक्तंप्रमात्वेननजानामीत्येवंपरत्वोपपत्तेः ॥ प्रतिवाक्या
दधिगतस्यार्थस्यानुवादपुरःसरंप्रमाणाभावेननिरसनदर्शनात् ॥ नचत्वदुक्तेर्थेप्रमाणज्ञानंमेना-

स्तीत्यस्यविशिष्टविषयज्ञानस्यप्रमाणत्वात्तद्विशेषणतयाअर्थस्यापिप्रमाणत्वेनावगमात्स्ववचन
व्याघातइतिशंक्यं ॥ एतत्प्रमाणज्ञानस्यप्रमाणाभावविषयकत्वेपितदर्थस्यातद्विषयत्वात् ॥ अ-
न्यथाभ्रमोममनास्तीत्यादिप्रमाणज्ञानस्यापिविशिष्टार्थभ्रमविषयतयाभ्रमविषयस्यापिप्रामाणिक
त्वापातात् ॥ नद्वितीयः ॥ सामान्यानुवादेनविशेषव्यवहारोपपत्तेः विशेषस्याप्यधिगमानधिगमयोर्नै
वव्यवहारइतिचेन्न ॥ अस्तिकश्चिद्विशेषइतिसामान्यतोज्ञातत्वात् ॥ किंचभावरूपाविद्याभ्युपगमे
पिपूर्वमर्थोज्ञातोनवासर्वथापिप्रश्नायोगः ॥ अस्मन्मतेसर्ववस्तुज्ञाततयाअज्ञाततयावासाक्षिचैत-
न्यविषयएवेतिप्रमाणज्ञानोदयात्प्राक् अज्ञातत्वविशेषितोर्थः साक्षिसिद्धोऽनुवादगोचरोभवति-
प्रश्नार्हइतिचेन्न ॥ साक्षिसिद्धतयापिसिद्धेऽर्थेव्यवहारायोगात् ॥ साक्षिणाज्ञातेपिप्रमाणबुभु
त्सयाव्यवहारइतिचेन्न ॥ साक्षिसिद्धत्वेप्रमाणबुभुत्सायाः निष्फलत्वात्तथाचत्वयापिसामान्य
तः साक्षिसिद्धोर्थोविशेषज्ञानायनिरूपणविषयइतिवक्तव्यमेवेतिचेन्मैवं ॥ त्वदुक्तार्थत्वेनानुवादे
पिव्याघातस्यदुर्वारत्वात् ॥ त्वदुक्तार्थंनजानामीत्यत्रहित्वदुक्तार्थविषयकज्ञानसामान्याभावः प्रत्येत-
व्यः प्रतियोग्यंशेसामान्यधर्मस्यैवविशेषणत्वात्प्रतियोगिविशेषणतानापन्नस्यापिधर्मस्याभावप्र
तीतौप्रतियोगितावच्छेदकसंसर्गत्वेनघटकतयाभानोपगमेघटवत्यपिभूतलेघटोनास्तीतिप्रतीतिप्रसं

गात् अतएवतादृशप्रतीतेः प्रमाणाभावविषयकत्वेनाभ्युपगंतुंयुक्तं ॥ किंचत्वदुक्तार्थविषयकप्र
माणज्ञानंनास्तीतिज्ञानस्यापिप्रमाणज्ञानतयात्वदुक्तार्थविषयकप्रमाणज्ञानसामान्याभाववि
षयकत्वेव्याघातोदुर्वारः ॥ यत्तुएतत्प्रमाणज्ञानस्यप्रमाणाभावविषयकत्वेपितद्विषयस्यैवतद्वि
षयतानास्तीतितन्न ॥ प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यनवगाहिनोऽभावप्रत्ययस्याप्रामा
णिकत्वात् ॥ नचत्वदुक्तत्वावांतरधर्मप्रकारकज्ञानसामान्याभावोविषयः नातउक्तदोषइतिवाच्यं
त्वदुक्तार्थत्वव्याप्यधर्मवानितिसामान्यतोविशेषधर्मज्ञानवतामपितादृशव्यवहारदर्शनात् ॥ नच
त्वदुक्तार्थत्वव्याप्यधर्मनिष्ठनिरवच्छिन्नप्रकारताशालिज्ञानाभावस्तद्विषयइतियुक्तं ॥ तथासति
परोपन्यस्तमर्थंकंबुग्रीवादिमत्त्वाद्युपाधिपुरस्कारेणजानतामपितादृशव्यवहारापत्तेः ॥ ननुत्वदु
क्तार्थत्वव्याप्यत्वानवच्छिन्नत्वदुक्तार्थत्वावांतरधर्मनिष्ठविषयताशालिज्ञानसामान्याभावस्तद्वि
षयइतियुक्तं ॥ त्वदुक्तार्थउभयावृत्तिधर्मवानितिप्रत्ययवतामपितादृशव्यवहारदर्शनात्भावरू
पाज्ञानस्वीकारेतुज्ञानविशेषस्यैवोक्तरीत्यातादृशाज्ञानविरोधित्वस्यमन्मते स्वीकारान्नदोषः ॥ किं
चेत्यादिकमपिनयुक्तं अज्ञातत्वेनसाक्षिसिद्धेपिवस्तुनि अज्ञाननिवर्तकंज्ञानंसंपाद्यबुभुत्सादर्शनात्
सफलत्वाच्चेतिदिक् ॥ देवदत्तप्रमातत्स्वप्रागभावातिरेकिणः अनादेर्ध्वंसिकाप्रमात्वादवगतप्रमाय

र्थेनितत्त्वप्रदीपोक्तं ॥ देवदत्तप्रमा देवदत्तनिष्ठप्रमाप्रागभावातिरिक्तस्यानादेर्ध्वंसिका प्रमात्वात् चैत्री
यप्रमावदित्यनुमानमपि ताहृशाज्ञाने प्रमाणं ॥ अत्र साध्ये प्रमापदं चोपरंजकं न तु तन्निवेशस्तथा चाभावप्रा
गिति विशेषणानुपादाने भावरूपस्याज्ञानस्यापि स्वाभावाभावत्वेन प्रमायां देवदत्तगताभावातिरिक्तनि
वर्तकत्वाभावाद्बाध इति तन्निवेशः ॥ देवदत्तनिष्ठेति प्रागभावविशेषणं नानादेस्तेन चैत्रीयप्रमाया दे
वदत्तनिष्ठानादेर्निवर्तकत्वाभावेपि न दृष्टांतासिद्धिः ॥ यत्तु परेणास्मिन्ननुमाने घटोयमेतत्प्रागभावाति
रिक्तानादेर्निवर्तकः घटत्वात् घटांतरवदित्याभाससाम्यमुक्तं तदसत् ॥ रूप्यादेः शुक्त्यादिनिष्ठतया प्र
तीयमानस्य शुक्त्यादिनिष्ठाज्ञानोपादानकत्वस्यावश्यंभावात्तस्य चोपादानस्य लाघवेनानादितयाज्ञा
नेनाज्ञानं तत्कार्यं च नष्टमित्यनुभवादज्ञानानुभवस्य चज्ञानाभावविषयत्वासंभवस्योक्तत्वादुपादान
नाशं विनोपादेयनाशासंभवादज्ञानस्य ज्ञाननिवर्त्यत्वावश्यकत्वमिति प्रमापक्षकोक्तानुमाने अनुकू
लतर्कस्यैव त्वदुक्तानुमाने साध्यं विनापि हेतुसंभवेनानुकूलतर्काभावात् ॥ प्रमापक्षकोक्तानुमाने चैत्रासमवे
तत्वचैत्रान्यसमवेतत्वमुपाधिरित्यपि नाशंका युक्ता ॥ स्वप्रागभावनिवर्तके सत्त्वादौ साध्याव्यापकत्वात् ॥ एतेन
विगीतो भ्रमः एतज्जनकाबाध्यातिरिक्तोपादानकः विभ्रमत्वात् संप्रतिपन्नवदित्यनुमानमपि व्याख्या
तं ॥ तत्र संप्रतिपन्नवदित्यस्य पुरुषांतरभ्रमवदित्यर्थः पुरुषांतरीयभ्रमे अबाध्यपुरुषांतरोपादानक

त्वस्यैव परेणास्वीकाराद्बाध्यातिरिक्तोपादानकत्वरूपसाध्यस्य दृष्टांते असिद्धिरिति जनकांतोपादानं ॥
धिगीतो भ्रमः .. एतत्भ्रमजनकबाध्यान्योपादानकः विभ्रमत्वात् संमतवदिति सत्प्रतिपक्षानुमानं तु
नाशंकनीयं एतत्भ्रमजनकबाध्यस्य परमते अप्रसिध्यातद्घटितसाध्याप्रसिद्धेः ॥ एतत्भ्रमजनकं यद्बा
ध्यान्यत् तदुपादानकत्वस्य साध्यतायां तु तादृशब्रह्माधिष्ठानमयोपादानकत्वपर्यवसानमादायाविरो-
धः ॥ अबाध्यमात्रोपादानकत्वस्य साध्यत्वे भ्रमस्याबाध्योपादानकत्वेबाध्यत्वानुपपत्तिश्च प्रतिकू
लस्तर्क इति ॥ एवं विमतं प्रमाणज्ञानं स्वप्रागभावातिरिक्तस्वनिवर्त्यस्वविषयावरणस्वदेशगतव
स्त्वंतरपूर्वकं अप्रकाशितार्थप्रकाशत्वादंधकारे प्रथमोत्पन्नप्रदीपप्रभावदिति विवरणोक्तमनुमान
मपि तादृशाज्ञाने प्रमाणं ॥ नन्वेतदनुपपन्नं जडे अज्ञानानुपगमात् हेतुमतामंतःकरणवृत्तिलक्षण
जडविषयकप्रमाणज्ञानानां तथाविधवस्तुपूर्वकत्वाभावेनोक्तहेतोरनैकांतिकत्वादिति चेन्न ॥ जडस्य
प्रकाशाप्रसक्त्यभावेनावरणकृत्यशून्यतयातदावरणानुपगमेपि तदवच्छिन्नचितः प्रकाशप्रसक्त्यान
स्याः अज्ञानविषयत्वानपायात् स्वविषयावरणेत्यनेन स्वविषयावच्छिन्नावरणस्य विवक्षितत्वात् प्रमा
मात्रस्य च सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यवस्थिते इतिरीत्या अधिष्ठानसद्रूपब्रह्मविषयकत्वनियमात्
घटाद्यवच्छिन्नचैतन्यघटाद्याकारांतःकरणवृत्तिलक्षणप्रमाणज्ञानविषयत्वानपायाच्च ॥ यत्तु साध्ये

स्वप्रागभावातिरिक्तेति विशेषणंव्यर्थंस्वनिवर्त्यत्वविशेषणेनैवतत्तद्व्यावृत्तेः नहिभावः प्रागभावस्य निवर्तकः अपितुभावोसन्निरेवभावाभावयोः सहावस्थानविरोधादितिपरेणोक्तंतदसत् ॥ प्रागभावध्वंसस्यप्रतियोग्यात्मनः तदजन्यत्वेपिप्रतियोगिध्वंसात्मनस्तस्यतज्जन्यतयोक्तविशेषणेनतद्व्यावृत्तेः ॥ प्रतियोगिवत्तद्ध्वंसस्यापिप्रागभावध्वंसत्वंवक्तव्यमन्यथाप्रतियोगिध्वंसदशायामतीतः प्रागभावइतिव्यवहारानुपपत्तिः ॥ अतीतत्वंहिवर्तमानध्वंसप्रतियोगित्वंउक्तञ्चायमर्थः प्रमाणतत्वविद्भिस्तार्किकैरपि ॥ प्रतियोग्येवप्रागभावध्वंसइतिमतेपितुल्यन्यायेनज्ञानमेवाज्ञानध्वंसइतिवक्तव्यतयातार्किकादीन्प्रत्येतदनुमानप्रवृत्तेर्विवक्षितसाध्यसिद्धयेस्वनिवर्त्यत्वमित्यनेनस्वोत्पत्त्यधिकरणक्षणोत्पत्तिकध्वंसप्रतियोगित्वस्यैवविवक्षणीयतयातस्यप्रागभावेपिसत्त्वात्तद्व्यावृत्तेः प्रागभावातिरिक्तेत्यस्यसार्थकत्वात् ॥ उक्तन्यायस्यतेजस्तिमिरयोरपिसत्वान्नदृष्टांतस्यसाध्यविकलता ॥ यत्तुज्ञानप्रतिबंधकस्यदुरितस्यसिद्धतयासिद्धसाधनमितिपरोक्तंदूषणंतदसत् ॥ तस्यज्ञानानिवर्त्यत्वात्नहिकार्योत्पत्त्यव्यवहितक्षणेप्रतिबंधकसत्तायुज्यतेनवातदव्यवहितप्राक्क्षणेतत्क्षणेचासन्नस्तन्नाश्यत्वंवदुत्पत्त्यधिकरणक्षणोत्पत्तिकध्वंसप्रतियोगित्वादिरूपंपूर्वोक्तंयुज्यते ॥ यदपिप्रागभावस्यस्वविषयावरणत्वाभावेनैवव्युदासात्तद्वारकविशेषणांतरोपादानंव्यर्थमितिपरेणदूषणमुक्तंतदपिन-

मादायार्थांतरमिति वाच्यं ॥ यत्स्वांतरपदेन स्वसमानाधिकरणजन्यज्ञानानधिकरणकालवृत्तित्वस्यता
दृशमनःपरिणामानधिकरणकालवृत्तित्वस्याविवक्षणीयत्वात् ॥ नचैवमपि चाक्षुषस्पार्शनदर्शनादि
रूपविजातीयज्ञानेच्छादियौगपद्यस्य सिद्धांते कादाचित्कस्येष्टतया स्वजनकादृष्टचरमफलभूतज्ञाने-
च्छासमानकालीनोत्पत्तिके आद्यघटज्ञाने तादृशज्ञानजनकादृष्टपूर्वकत्वमादायार्थांतरं दुर्वारमिति वा
च्यं ॥ स्वसमानकालोत्पत्तिकत्वसंबंधेन स्वसमानाधिकरणविशेषगुणविशिष्टान्यत्वस्यापि पक्षविशेषण
तायाविवक्षितत्वात् ॥ संयोगादित्यादिकमादायार्थांतरं च स्वदेशान्यदेशासंबंधित्वरूपस्वदेशगतत्ववि
वक्षया निरसनीयं स्वव्याप्यतमोनिवर्तकप्रभाया दृष्टांतत्वसंभवाच्च न दृष्टांतस्य साध्यविकलता ॥ यद्य
पि भूतलादिगतस्य तमसः प्रभासंबंधशून्यतत्क्षणविशेषविशिष्टतद्भूतलादिसंबंधतया नकस्यापि
तमसः प्रभाव्याप्यतासंभवः तथापि स्वाधिकरणतादात्म्यवदन्यावृत्तित्वरूपव्याप्यत्वविवक्षया न दो-
षः ॥ विशिष्टस्यातिरिक्तनामते आद्यघटज्ञानप्रागभाववत्तत्क्षणादिविशिष्टांतःकरणादिकमादायार्थां
तरं तु विशिष्टान्यत्वनिवेशेनैव निरसनीयं ॥ नच विशिष्टत्वमनुगतमनतिप्रसक्तं दुर्वचमिति वाच्यं ॥ स्वा
श्रयसमानाधिकरणाभावप्रतियोगित्वस्वाश्रयत्वैतदुभयसंबंधेन साध्यधर्मविशिष्टत्वस्यैव प्रकृते वि
शिष्टशब्देन विवक्षितत्वात् ॥ अप्रकाशितार्थप्रकाशत्वं च स्वसमानाधिकरणस्वान्यूनविषयकसंश-

यान्यसविषयकाव्यवहितोत्तरत्वशून्यप्रमात्वप्रमान्यतरत्वमन्यतरत्वंचाखंडातिरिक्तंकभेदविशिष्टापरभेदा
त्यंताभावरूपंतेनतादृशप्रमात्व तत्वमाप्तादीनामुक्तसाध्यव्याप्यतावच्छेदकत्वविशिष्टानांतादृशा-
न्यतरत्वघटकत्वेपिधूमप्रागभावत्वस्येवनव्यर्थविशेषणघटितत्वंहेतुतावच्छेदकस्यतादृशात्यंताभा-
वत्वरूपहेतुतावच्छेदकसमानाधिकरणत्वाभावात् ॥ स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मांतरघ
टितत्वस्यैवव्यर्थविशेषणतारूपत्वात् ॥ तद्यथाहिरण्यनिधिंनिहितमक्षेत्रज्ञाउपर्युपरिचरंतोनविंदुरे
वमेवेमाःप्रजा अहरहर्गच्छंत्य एतंब्रह्मलोकंनविंदुरनृतेनहिप्रत्यूढाइतिछांदोग्याष्टमाध्यायस्थश्रुति
रपिब्रह्मज्ञानप्रतिबंधकत्वेनानृतंब्रुवंतीतादृशाज्ञानेप्रमाणं ॥ नचऋतंपिबंतावित्यत्रऋतशब्दस्यसत्क
र्मणिप्रयोगदर्शनात्ऋतंसत्यंतथाधर्मइतिस्मृतेश्चऋतशब्दस्यसत्कर्मवाचितयैतच्छ्रुतिस्थानृतशब्द
स्यनऋतमनृतमितिव्युत्पत्त्यादुष्कर्मपरत्वमेवनाज्ञानपरत्वमितिपरोक्तंसम्यक् ॥ य आत्मा अपहतपा
प्मेत्युत्तरवाक्ये अपहतपाप्मेत्यनेनात्मनःपापशून्यस्वभावत्वोक्त्यातादृशात्मनःदुष्कर्मप्रत्यूढत्वोक्ति
विरोधात् ॥ नचमिथ्याभूतस्यव्यावहारिकपापस्यस्वाभाविकपापशून्यस्वभावाविरोधित्वात्तादृशा-
पापमेवब्रह्मज्ञानप्रतिबंधकंतदानीमास्तामितिवाच्यं ॥ अनिर्वचनीयाज्ञानंविनातत्परिणामभूतस्य
[illegible]त्वरूपमिथ्यात्वासंभवात्[illegible]प्रतीत्यादिव्यवहारप्रतिबंधकावरणरूपत्वस्य

कर्मणाअनुपपत्तेश्च ॥ नच पापानामपि प्रवाहरूपेणानादित्वादुक्तरूपमावरणत्वं तेषामपि संभवती
ति वाच्यं ॥ तथा सति तत्कालीनस्यानेकस्य पापस्य पुण्यस्य वा मिथ्याज्ञानजन्यसंस्कारस्य वा तथा
भूतस्य प्रतिबंधकत्वमित्यत्र विनिगमकाभावाल्लाघवाच्च पापादिभिन्नैकानाद्यज्ञानस्यैव प्रतिबंधक
त्वकल्पनौचित्यात् ॥ नचानृतशब्दस्य पापे मुख्यवृत्त्यनुसरणमेव तस्योक्तरूपावरणत्वकल्पकमिति
शक्यते वक्तुं ॥ सत्यवाचकस्य ऋतशब्दस्य सत्यब्रह्मप्रमापकत्वेन पुण्ये गौणत्वस्यैव सत्यब्रह्मप्रा-
प्तिविरोधित्वेन पापेप्यनृतशब्दस्य गौणत्वेन मुख्यत्वाभावात् ॥ नचोक्तावरणत्वरूपयुक्त्या अज्ञा
नकल्पनापेक्षया पापादीनां श्रुत्यैव प्रतिबंधकत्वकल्पनमुचितमिति वाच्यं ॥ पापादीनां श्रुत्यैव मि
थ्यात्वोक्तेस्तन्निर्वाहायानाद्यज्ञानकल्पनस्यावश्यकत्वात् ॥ सुषुप्तौ कार्यमात्रलयेन दुष्कर्मणोप्य
भावेन पापस्य निरुक्तावरणत्वकल्पनानुपपत्तेश्च ॥ कारणगतसंस्काररूपेण तदानीं तदवस्था
नोपगमे तत्त्वज्ञानसिद्धेरप्रत्यूहत्वाच्च ॥ अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतव इति श्रुत्युक्तावरकत्वगु
णयोगादनृतशब्देनाज्ञानमेवोच्यते ॥ न तं विदाथ य इमा जजाना न्यद्युष्माकमंतरं बभूव नीहारेण
प्रावृता जल्प्या चासुतृप उक्थशासश्चरंति ॥ सुषुप्तिकाले सकले विलीने तमोभिभूतः सुखरूपमेती
त्यादिश्रुतिगतनीहारतमःशब्दावप्यनृतशब्दस्याज्ञानपरत्वे आवरकत्वगुणयोगाद्युज्येते ॥ न तं वि

दाथेतिवाक्यस्यायमर्थः हेनराः नतंजानीथयः इमाःप्रजाःजजानजनितवान् तत्रहेतुःयुष्माकमन्यदेवां
तरंव्यवधानंबभूवतदुच्यतेनीहारसदृशेनाज्ञानेनप्रावृताःयूयंजल्प्याःअहंमनुष्यइत्यादिजल्पनशी
लाःअसून्प्राणान्तर्पयंतिउक्थंस्तोत्रविशेषादिकंशंसंतिचरंनीतिउक्थशासःऐहिकामुष्मिकभोग
मात्रसाधनकर्मपराश्चरंतितानिकर्माणिकुर्वंति ॥ नमोभिभूलेत्यस्यतमःसदृशाज्ञानेनावृतइत्यर्थः॥एव
मावरकस्यानीशयाशोचतिमुह्यमानइतिश्रुत्युक्तजीवेश्वरभेदकत्वंमायांतुप्रकृतिंविद्यान्मायिनंतु
महेश्वरमितिश्रुत्युक्तं॥सकलकार्योपादानत्वंचानृतशब्दस्याज्ञानपरत्वेसंगच्छते॥ अनीशयेतिश्रुते
रयमर्थःमोहःअज्ञानंतत्प्रयुक्तानीशयाईश्वरत्वविरोधिनेशाभेदेनशोचतिसंसरतिसंसारफलंसुख
दुःखादिकमनुभवति अनृतशब्दार्थकर्मणआवरकत्वेतस्यैवमोहत्वाज्जीवेशाभेदकत्वंकार्यमात्रोपा
दानत्वंचवाच्यंनचसादेस्तस्यानादिजीवेशाभेदकत्वंसकलकार्योपादानत्वंवासंभवति॥ विभेदज
नके ऽज्ञानेनाशमात्यंतिकंगते॥आत्मनोब्रह्मणोभेदमसंतंकःकरिष्यति॥ भेदश्चतस्याज्ञानकृतइ-
त्यादिविष्णुपुराणवाक्यैर्जीवब्रह्मणोर्भेदकत्वस्याज्ञानएवस्पष्टमभिधानात् ॥ देवादिभेदमध्वास्ते
नास्त्येवावरणेनसःइतिचविष्णुपुराणवाक्येनभेदनास्तित्वेतस्यावरकप्रयुक्तत्वस्यैवहेतूकृतत्वाद

कर्मणोऽनुपपत्तेश्च ॥ नच पापानामपि प्रवाहरूपेणानादित्वादुक्तरूपमावरणत्वं तेषामपि संभवती-
तिवाच्यं ॥ तथासति तत्कालीनस्यानेकस्य पापस्य पुण्यस्य वा मिथ्याज्ञानजन्यसंस्कारस्य वा तथा-
भूतस्य प्रतिबंधकत्वमित्यत्र विनिगमकाभावाल्लाघवाच्च पापादिभिन्नैकानाद्यज्ञानस्यैव प्रतिबंधक-
त्वकल्पनौचित्यात् ॥ नचानृतशब्दस्य पापेषु रूढ्यनुसरणमेव तस्योक्तरूपावरणत्वकल्पकमिति
शक्यते वक्तुं ॥ सत्यवाचकस्य ऋतशब्दस्य सत्यब्रह्मप्रमापकत्वेन पुण्ये गौणत्वस्यैव सत्यब्रह्मप्रा-
प्तिविरोधित्वेन पापेष्वनृतशब्दस्य गौणत्वेन मुख्यत्वाभावात् ॥ न चोक्तावरणत्वरूपयुक्त्या अज्ञा-
नकल्पनापेक्षया पापादीनां श्रुत्यैव प्रतिबंधकत्वकल्पनमुचितमिति वाच्यं ॥ पापादीनां श्रुत्यैव मि-
थ्यात्वोक्तेस्तन्निर्वाहकानाद्यज्ञानकल्पनस्यावश्यकत्वात् ॥ सुषुप्तौ कार्यमात्रलयेन दुष्कर्मणोऽप्य-
भावेन पापस्य निरुक्तावरणत्वकल्पनानुपपत्तेश्च ॥ कारणगतसंस्काररूपेण तदानीं तदभ्यु-
नोपगमे त्वज्ञानसिद्धेरप्रत्यूहत्वाच्च ॥ अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव इति श्रुत्युक्तावरकत्वगु-
णयोगादनृतशब्देनाज्ञानमेवोच्यते ॥ न तं विदाथ य इमा जजाना न्यद्युष्माकमन्तरं बभूव नीहारेण
प्रावृता जल्प्याचासुतृप उक्थशासश्चरन्ति ॥ सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेती-
त्यादिश्रुतिगतनीहारतमःशब्दावप्यनृतशब्दस्याज्ञानपरत्वे आवरकत्वगुणयोगाद्युज्येते ॥ न तं वि-

दार्थेतिवाक्यस्यायमर्थः हे नराः तं न जानीथ यः इमाः प्रजाः जजान जनितवान् तत्र हेतुः युष्माकमन्यदेवां
तरं व्यवधानं बभूव तदुच्यते नीहारसदृशेनाज्ञानेन प्रावृताः यूयं जल्प्याः अहं मनुष्य इत्यादिजल्पनशी
लाः असून् प्राणान् तर्पयंति उक्थं स्तोत्रविशेषादिकं शंसंति चरंति उक्थशासः ऐहिकामुष्मिकभोग
मात्रसाधनकर्मपराश्चरंति तानि कर्माणि कुर्वंति ॥ नमोभिभूतेत्यस्य तमःसदृशाज्ञानेनावृत इत्यर्थः ॥ एव
मावरकस्यानीशया शोचति मुह्यमान इति श्रुत्युक्तजीवेश्वरभेदकत्वं मायां तु प्रकृतिं विद्यान्मायिनं तु
महेश्वरमिति श्रुत्युक्तं ॥ सकलकार्योपादानत्वं चानृतशब्दस्याज्ञानपरत्वे संगच्छते ॥ अनीशयेति श्रुते
रयमर्थः मोहः अज्ञानं तत्प्रयुक्तानीशया ईश्वरत्वविरोधिनेशभेदेन शोचति संसरति संसारफलं सुख
दुःखादिकमनुभवति अनृतशब्दार्थकर्मण आवरकत्वे तस्यैव मोहत्वाज्जीवेशभेदकत्वं कार्यमात्रोपा
दानत्वं च वाच्यं न च सादेस्तस्यानादिजीवेशभेदकत्वं सकलकार्योपादानत्वं वा संभवति ॥ विभेदज
नके ऽज्ञाने नाशमात्यंतिकं गते ॥ आत्मनो ब्रह्मणो भेदमसंतं कः करिष्यति ॥ भेदश्च तस्याज्ञानकृत इ-
त्यादिविष्णुपुराणवाक्यैर्जीवब्रह्मणोर्भेदकत्वस्याज्ञान एव स्पष्टमभिधानात् ॥ देवादिभेदमध्यास्ते
नास्त्येवावरणे न सः इति च विष्णुपुराणवाक्येन भेदनास्तित्वे तस्यावरकप्रयुक्तत्वस्यैव हेतूकृतत्वाद
ज्ञानस्यैव तत्प्रामाणिकं न पापस्य तस्य नीहारेण प्रावृता जल्प्याचा सुतृप उक्थशासश्चरंतीति श्रुत्या नीहारस्याव

कर्मणोऽनुपपन्नेश्च ॥ न च पापानामपि प्रवाहरूपेणानादित्वाद्दुःखरूपमावरणत्वं तेषामपि संभवती
ति वाच्यं ॥ तथा सति लयकाले नस्याने कस्य पापस्य पुण्यस्य वा मिथ्याज्ञानजन्यसंस्कारस्य वा तथा
भूतस्य प्रतिबंधकत्वमित्यत्र विनिगमकाभावाद्धा पचाच्च पापादिभिन्नैकानाद्यज्ञानस्यैव प्रतिबंधक
त्वकल्पनौचित्यात् ॥ न चानृतशब्दस्य पापे मुख्यवृत्त्यनुसरणमेव तस्यैकरूपावरणत्वकल्पकमिति
शक्यते वक्तुं ॥ सत्यवाचकस्य ऋतशब्दस्य सत्यब्रह्मप्रमापकत्वेन पुण्ये गौणत्वस्यैव सत्यब्रह्मप्रा-
प्तिविरोधित्वेन पापेष्वनृतशब्दस्य गौणत्वेन मुख्यत्वाभावात् ॥ न चोक्तावरणत्वरूपमुक्त्या अज्ञा
नकल्पनापेक्षया पापादीनामपि स्वैव प्रतिबंधकत्वकल्पनमुचितमिति वाच्यं ॥ पापादीनां बहुत्वे युवि
ध्यात्वोक्तेस्तन्निर्वाहाय नाद्यज्ञानकल्पनस्य लाघवकत्वात् ॥ सुषुप्तौ कार्यमात्रलयेन दुष्कर्मणोऽप्य
भावेन पापस्य निरुक्तावरणत्वकल्पनानुपपत्तेश्च ॥ कारणगतसंस्कारस्वरूपेण तदानींतदवस्था
नोपगमे तत्त्वज्ञानसिद्धेरप्रत्यूहत्वाच्च ॥ अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतव इति श्रुत्युक्तावरकत्वगु
णयोगादनृतशब्देनाज्ञानमेवोच्यते ॥ न तं विदाथ य इमा जजाना न्यद्युष्माकमंतरं बभूव नीहारेण
प्रावृता जल्प्या चा सुतृप उक्थशासश्चरंति सुषुप्तिकाले सकले विलीने तमोभिभूतः सुखरूपमेती
त्यादिश्रुतिगतनीहारतमःशब्दाभ्यामप्यनृतशब्दस्याज्ञानपरत्वे आवरकत्वगुणयोगाद्युज्येते ॥ न तं वि

दार्थेतिवाक्यस्यायमर्थः हे नराः तंनजानीथयः इमाः प्रजाः जजानजनितवान् तत्रहेतुः युष्माकमन्यदेवां
तरंव्यवधानंवभूवतदुच्यतेनीहारसदृशेनाज्ञानेनप्रावृताः यूयंजल्प्याः अहंमनुष्यइत्यादिजल्पनशी
लाः असून्प्राणान्तर्पयंतिउक्थशस्तोत्रविशेषादिकंशांसंतिचरंतीतिउक्थशासः ऐहिकामुष्मिकभोग
मात्रसाधनकर्मपराश्चरंतितानिकर्माणिकुर्वंति ॥ तमोभिभूतेत्यस्यतमःसदृशाज्ञानेनावृतइत्यर्थः॥ एव
मावरकस्यानीशयाशोचतिमुह्यमानइतिश्रुत्युक्तजीवेश्वरभेदकत्वंमायांतुप्रकृतिंविद्यान्मायिनंतु
महेश्वरमितिश्रुत्युक्तं॥ सकलकार्योपादानत्वंचानृतशब्दस्याज्ञानपरत्वेसंगच्छते॥ अनीशयेतिश्रुते
रयमर्थः मोहः अज्ञानंतत्प्रयुक्तानीशयाईश्वरत्वविरोधिनेशाभेदेनशोचतिसंसरतिसंसारफलंसुख
दुःखादिकमनुभवति अनृतशब्दार्थकर्मणआवरकत्वेतस्यैवमोहत्वाज्जीवेशाभेदकत्वंकार्यमात्रोपा
दानत्वंचवाच्यंनचसादेस्तस्यानादिजीवेशाभेदकत्वंसकलकार्योपादानत्वंवासंभवति॥ विभेदज
नके ऽज्ञानेनाशमात्यंतिकंगते॥ आत्मनोब्रह्मणोभेदमसंतंकःकरिष्यति॥ भेदश्चतस्याज्ञानकृतइ-
त्यादिविष्णुपुराणवाक्यैर्जीवब्रह्मणोर्भेदकत्वस्याज्ञानएवस्पष्टमभिधानात्॥ देवादिभेदमध्वास्ते
नास्त्येवावरणेनसः इतिचविष्णुपुराणवाक्येनभेदनास्तित्वेतस्यावरकप्रयुक्तत्वस्यैवहेतूकृतत्वाद
ज्ञानस्यैवतत्प्रामाणिकंनपापस्यतस्यनीहारेणप्रावृताजल्प्याचा सुतृपउक्थशासश्चरंतीतिश्रुत्यानिहाररूपाव

रणाप्रयुक्तत्वस्यैवोक्तत्वेनावरकस्वरूपत्वासिद्धेः॥ तस्याभिध्यानाद्योजनात्तत्वभावाद्भूयश्चांतेविश्वमा-
यानिवृत्तिस्तरतिशोकमात्मवित्ज्ञानेनतुतदज्ञानंयेषांनाशितमात्मनःइत्यादिश्रुतिस्मृतिवाक्यैरस्ति-
भातीत्यादिव्यवहारप्रतिबंधकस्वरूपावरकाज्ञानसामान्यस्यविश्वमायाशब्दितस्यज्ञाननिवर्त्यत्वरूप
मिथ्यात्वोक्तेस्तस्यचतवमतेसत्यत्वेनाभिमतेपादादावभावान्नानृतपदाभिधेयत्वंसंभवति॥ एवमेवै
षामायास्वाव्यतिरिक्तानिपरिपूर्णानिक्षेत्राणिदर्शयित्वाजीवेशावाभासेनकरोतिमायाचाविद्याचस्वय
मेवभवतीतिश्रुत्यामायाविद्ययोरभेदप्रतिपादनात्॥ ऋतेर्थंयत्प्रतीयेतनप्रतीयेतचात्मनि॥ तद्विद्या
दात्मनोमायांयथाभासोयथातमइतिभागवतेमृषात्वविशिष्टस्यमायापदशक्यत्वबोधनात्मिथ्याज्ञान
मेवोक्तश्रुतौरूढ्यामायाशब्दार्थः॥ अर्थस्यप्रतीयमानस्याभावेपियत्प्रतीयतेस्वाधिकरणेवर्तमानाभा
वप्रतियोगीनियावत्तन्मायापदार्थइतिविद्यादज्ञानीयात्तस्यचात्मैवावच्छिन्नानवच्छिन्नरूपेणाधि-
ष्ठानमन्यस्यसर्वस्यकल्पितत्वादित्याशयेनात्मनइत्युक्तं॥ ननुस्वप्रकाशस्यात्मनःसदाभानात्कथं
तत्रारोपइतिशंकायामाहनप्रतीयेतचात्मनीतिपूर्णानंदस्वप्रकाशरूपात्मनिनप्रतीयतइतियत्तदपि
मायेत्यर्थः॥ तथाचस्वप्रका शोप्यप्रकाशस्यकल्पितत्वात्तन्मूलकोन्यस्यसर्वस्यारोपःस्वरूपप्रका
शएवजगदुपादानमज्ञानंमायेतिभावः॥ अर्थाभावेपिप्रतीयमानत्वेदृष्टांतमाहयथाभासइति॥ य

था शुक्त्यादौ रूप्याद्याभास इत्यर्थः प्रकाशस्वरूपे तदभावत्वेन कल्प्यमानत्वे दृष्टांतमाह यथा तम इति
॥ यथा मध्यान्हे सूर्यालोके तदभावत्वेनोलूकैः कल्प्यमानं तम इत्यर्थः ॥ मय श्च शंबरश्चैव महामाया
विनावुभौ पर्जन्यवारुणीमायेव्यधत्तामित्यादिना हरिवंशे पर्जन्यवारुणास्त्राभ्यां मंत्रविशेषविशिष्टा
भ्यां जनिते मिथ्याभूतेऽर्थे तथा मायामृगं दयितयोज्झितमित्यादिना मिथ्यामारीचमृगे मायाशब्दप्रयोगः
॥ तथा मायाच्छद्मेति क्वचित् ग्रंथकृतो व्याख्यानं मिथ्यात्वेन संप्रतिपन्ने ऐंद्रजालिकादावियं मायेति
लौकिकी प्रसिद्धिश्च तत्र तत्र मायागनदुर्घटकारित्वरूपविचित्रशक्तिगुणयोगान्निरूढलक्षणयैव। ति
लरसे मुख्यार्थस्य तैलशब्दस्य सार्षपादिरसे भूरिप्रयोगात् निरूढलक्षणाया एव स्वीकारात् अथवा अ
न्यथा भावेन भासमानाया एव क्रियायाश्छद्मत्वात् छद्मादिकमपि मिथ्याभूतं रूढ्यैव मायापदार्थोऽस्तु ॥
ननु शुक्तिरूप्यादौ मिथ्याभूते मायाशब्दाप्रयोगात् न मायाशब्दो मृषार्थक इति वाच्यं ॥ व्यंजकाभावदशा
यां वज्रादौ पृथिवीति व्यवहाराभावेऽपि पृथिवीत्ववत् शुक्तिरूप्यादौ मृषात्वोपपत्तेः ॥ व्यंजकदशायां
वज्रादौ पृथिवीत्वव्यवहारवत् शुक्तिरूप्यादौ मायात्वं व्यवह्रियत एव अत एव यत्तु दृष्टिपथं मासंतन्माये
व सतुच्छकमिति सांख्यव्याख्याने दृश्यमात्रे मायात्वं व्यवहृतं ॥ किंच कष्टं कर्मेत्यनुभवेन क्रियामात्रस्य
दुःखजनकत्वेऽपि इदानीं मम दुःखमिति सर्वदा न व्यवहारः प्रकृष्टदुःखकाल एव तद्व्यवहारात् तथा च म

त्कारविशेषाधायकत्वेन प्रकृष्टमायायामेवमायापदप्रयोगः अत एव मायाह्येषा मया सृष्टा यन्मां पश्यसि नारद ॥ सर्वभूतगुणैर्युक्तं नैवं मां द्रष्टुमर्हसीति नारदं प्रति भगवद्वाक्ये दृश्यमानस्य प्रतिपन्नोपाधौ निषेध्यत्वरूपमिथ्यात्वे मायात्वमेव हेतूकृतं ॥ यत्तु मायाशब्दार्थो नाज्ञानं तथा सति मायिनं तु महेश्वरमित्यादिश्रुतिप्रतिपाद्यस्य मायिन ईश्वरस्याप्यज्ञानित्वप्रसंगेन तस्य सर्वज्ञत्वनिरवद्यत्वादेः श्रुत्युक्तस्यानुपपत्तेः जीवेश्वरयोरविशेषापत्तेश्चेति दूषणं तदसत् ॥ बिंबभूत ईश्वरः प्रतिबिंबो जीव इति पक्षे उपाधेः प्रतिबिंबं प्रत्येवावरकत्वरूपप्रतिबिंबपक्षपातित्वस्वीकारेणेश्वरे सार्वज्ञ्याद्यप्रयोगस्यापादनासंभवात् ईश्वरे सार्वज्ञ्यैश्वर्यादेर्मायोपाधिनिमित्तत्वाच्च ॥ जीवेश्वरयोर्द्वयोः प्रतिबिंबत्वपक्षेउपाधिगतनैर्मल्यतदभावाभ्यां दर्पणादिप्रतिबिंबितमुखयोरिव मलिनसत्त्वशुद्धसत्त्वाभ्यामुपाधिगताभ्यां वशीकृतोपाधित्वतदभावाभ्यां वा जीवेशयोरज्ञत्वसार्वज्ञ्यत्वरूपविशेषसंभवाच्च ॥ अज्ञानातिरिक्तस्यावरकस्यज्ञाननिवर्त्यत्वानुपपत्त्या सादरनेकस्य पापस्यावरकत्वानुपपत्तावप्यनादेः कर्मप्रधानमेवावरकमनृतपदाभिधेयमस्त्विति शंकापि तन्मते कर्मवत् प्रधानस्यापि ज्ञाननिवर्त्यत्वानुपपत्तेर्निरस्ता ॥ नासदासीन्नो सदासीदित्यादिश्रुत्युक्तमावरकतमसः सदसद्विलक्षणत्वरूपानिर्वचनीयत्वमपि न परमते संत्यसेन स्वीकृतस्य पापादेः संभवतीति नानिर्वचनीयाज्ञानभिन्नस्य पापादेरावरकानृतशब्दार्थता ॥ नास-

दासीन्नो सदासीत्यादित्यादिश्रुत्युक्तमावरकं तमसः सदसद्विलक्षणत्वरूपानिर्वचनीयत्वमपि न परमते
सत्यत्वेन स्वीकृतस्य पापादेः संभवतीति अनिर्वचनीयाज्ञानभिन्नस्य पापादेरावरकान्नृतशब्दार्थता ॥ नास
दासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत् ॥ किमावरीवः कुह कस्य शर्मन्नंभः किमासीद्गहनं गभी
रं ॥ न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः ॥ आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं
चनास ॥ तम आसीत्तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वमा इदं ॥ तुच्छ्येनाभ्वपिहितं यदासीत्तपसस्तन्म-
हिनाजायतैकं ॥ कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीदिति वाक्येयमर्थः ॥ प्रलयेऽस्थितं
कारणस्वरूपमाह ॥ नासदासीदिति ॥ तदानीं प्रलये असन्निरुपाख्यं नासीत्तादृशस्य कारणत्वासंभवा
त् नापि सत्त्वेन निर्वाच्यमासीत् सद्रूपस्य तद्विलक्षणजगत्परिणा   मित्वासंभवात् तथा चानिर्वचनीय
मासीदित्यर्थः नासीद्रज इति रजांसि लोका इति यास्कः एकवचनं सामान्यापेक्षं व्योमादेर्वक्ष्यमाणत्वात् त
दन्यलोकस्तदानीं नासीदित्यर्थः तथा व्योम अंतरिक्षलोकः परः परस्तादुपरि द्युलोकादि सत्यलोकांतं च न
दानासीत् एवं चतुर्दशभुवनगर्भं ब्रह्मांडं निषिध्य तदावरकत्वेन पुराणप्रसिद्धानि भूतानि निषेधति आवृणो
र्वकवृणोतेर्यङ्लुगंतात् छंदसि लिटि तिपि आवरीवः इति रूपं किमावरणीयं कर्मजातमावृणोतु आवर-
णीयाभावात् आवरकभूतान्यपि तदानीं नासन्नित्यर्थः कुह कुत्र प्रदेशे स्थित्वा भूतमावृणुयात् तादृशदेशो-

मितदानेत्यर्थः कस्यशर्मन्शर्मणे कस्य भोगायापृणुयात् भोक्तारोप्युपाधिमतोऽपात्तदानासन्नित्यर्थः ॥ आपो
वाइदमग्रेसलिलमासीदितिश्रुत्या अंभःसत्त्वभ्रमंनिरस्यति अंभःकिमासीदितिप्रलयेसंहर्तामृत्युःस्यात्त-
त्राह ॥ नमृत्युरस्तिनतर्ह्यमृतंजीवनंस्यात्तत्राह ॥ अमृतमितितथारात्र्या अन्हश्चप्रकेताजानन्नासीत्चंद्रसू
र्याभावात् ॥ आसीदितितत्सर्ववेदांतप्रसिद्धंब्रह्मानीत्जीवितवत् ॥ ननुकथंब्रह्मणोजीवनंप्राणसंबंधा
भावात्तत्राह ॥ अवातमितिआसीदित्यर्थकमानीदित्युक्तमितिभावः ॥ स्वधयामाययासहितंस्वस्मिन्
धार्यतइतिस्वधांस्वधयेत्यनेनसहार्थकतृतीययाचमायायाईश्वराताश्रितत्वमीश्वरेक्षणानपेक्षकत्वंच
सांख्योक्तंवार्यते एकमद्वितीयंसर्वदाद्वितीयशून्यंएवंचस्वधयासाहित्यंव्यवहारतःनपरमार्थतःइतिबोध्यं
॥ ननुस्वधयासहितंब्रह्मयदितदानीमस्तितर्हिनरजइत्याद्यसंगतंनहिमायातोऽन्यद्रजआदिकंतत्राह ॥
तस्माद्धान्यदित्यादि ॥ तस्मात्स्वधयायुक्तब्रह्मणःअन्यत्रजआदिपरःसृष्टिकालेजायमानंनासत्तदानीं
धभूपहशहेनोक्तब्रह्मान्यस्यानिर्वाच्यस्यजगतःप्रसिद्धिंद्योतयति ॥ ननुयदिजगत्तदानींनासीत्कथंत-
र्हिजनिक्रियाकर्तृत्वंकारकविशेषस्यकर्तृत्वात्निमित्तस्यैवकारकत्वात्पूर्ववर्तिनएवनिमित्तत्वात्त
त्राह ॥ तमआसीत्तमसागूढमग्रइति ॥ तमसाअंधकारवद्भावरूपेणात्मसंबंधिस्वरूपावरकेणाज्ञानेन
गूढंसंस्काररूपापत्त्यास्ववशीकृतंतमोऽज्ञानाभिन्नंजगत्तदानीमप्यासीदित्यर्थः ॥ तथाचाविर्भावःस्थू

लतापत्तिरूपः उसत्तिः॥ संस्कारावस्थैवनाशइतिभावः॥ एतेनासत्कार्यवादिनः परास्ताः॥ ननुतम
सागूढंतमः थिरुद्धंतत्राह॥ अप्रकेतमप्रज्ञायमानंकार्यकारणयोरत्यंताभेदाभावात्तमसोत्यंतभेदभा
नशून्यमित्यर्थः॥ अतएवसलिलंकारणीभूततमसिसंगतंतत्तादात्म्यापन्नमितियावत्॥ षल गताथि
त्यस्मात्धातोरौणादिकइलप्रत्ययः सर्वंजगत्माइदंआसीत्यद्वासलिलमितिलुप्तोपमायथानीरंक्षीरयु
क्तमेकतापन्नंतथाकारणगतंजगदित्यर्थः॥ तुच्छ्येनसद्विलक्षणेन अपिहितंनिगूढंएकंसंस्काररूपैका
वस्थापन्नंआभुआसमंतात्भुवनयुक्तंयज्जगदासीत्तत्तपसः ईश्वरालोचनस्यमहिम्नास्थूलविचित्ररू
पेणअजायतआविर्बभूव॥ अथवाअपिहितंआवृतंएकमद्वितीयंआभुभ्वादिसंस्कारतापन्नंजगदनु-
स्यूतंयत्ब्रह्मआसीदित्यर्थः॥ यत्तुसदसन्निषेधकालीनतमःसत्वमनिर्वचनीयोक्ताज्ञानंविनानुपपन्न-
मित्यर्थापत्तिबलाद्यद्यनिर्वाच्याज्ञानसिद्धिस्तदापरमार्थतयांगीकृतस्यब्रह्मणोप्यनिर्वचनीयतापत्ति-
स्तस्याप्यानीदवातमितिवाक्येनप्रलयकालेपरिशिष्टत्वबोधनात्सदसन्निषेधकालीनब्रह्मसत्वंत-
स्यानिर्वचनीयत्वंविनानुपपन्नमित्यर्थापत्तिसंभवादितिदूषणंपरेणोक्तंतदविचाररमणीयं॥ सदेवसो
म्येदमग्रआसीदेकमेवाद्वितीयंसत्यंज्ञानमनंतंब्रह्मेतिश्रुत्यंतरेणब्रह्मणः पारमार्थिकत्वबोधनात्तद्वि
रोधेनब्रह्मांशेउक्तार्थापत्त्यसंभवात्॥ नचैवंसतिनोसदासीदित्यभिधानविरोधः ब्रह्मणस्तदानींसत्वादि

ति वाच्यं ॥ आनीदवातमिति श्रुत्यैकवाक्यतया ब्रह्मान्यसत एव नोसदासीदित्यनेन निषेधात् ॥ न च ब्रह्मान्यसतः सिद्धौ तन्निषेधायोगः असिद्धौ निषेधवैयर्थ्यमिति सिद्ध्यसिद्धिभ्यां व्याघातः शंक्यः ॥ ब्रह्मान्यत्वे सतीत्यंशपूरणेन नोसदासीदित्यंशस्य व्याख्यानेन सति ब्रह्मान्यत्वनिषेधपर्यवसाने न तदानीमद्वितीयब्रह्मसत्तेति विवक्षितार्थसिद्धेः ॥ न चैवमपि नासदासीदित्यंशाविरोधः उक्तनिषेधप्रतियोगित्वरूपमिथ्यात्वस्य तमःसाधारण्यादिति वाच्यं ॥ असत्पदस्यात्र सत्तादात्म्यशून्यपरत्वात् ॥ न चोक्तासन्निषेधे असत्प्रतिषेधापत्तिः ॥ सतो निषेधे सद्भिन्नत्वेन सर्वदेशकालनिष्ठाभावप्रतियोगित्वरूपासत्वस्यापाततः आनुमानिकप्रसिद्धिसंभवात् अद्वैतब्रह्मबोधनाय प्रवृत्तोक्तवाक्यस्योक्तनिषेधतात्पर्याभावात् ॥ सुचिस्रुपर्णनिधायाग्निचयनं कर्तव्यमित्येतदर्थतात्पर्यकेनांतरिक्षेग्निश्चेतव्य इत्याद्यविरोक्तनिषेधांशेनित्यानुवादत्वादसत्प्रतिषेधेपि बाधकाभावात् ॥ निषेधांशे वाक्यतात्पर्ये एव प्रतियोगिप्रसक्तेरपेक्षितत्वात् ॥ न चैवं सति तमोन्यत्वे सतीत्यंशपूरणेन तमोन्यत्वेन सदभावेपि नोसदासीदित्यस्यार्थः स्यादिति शंकनीयं ॥ ब्रह्मण इव तमसः पारमार्थिकत्वग्राहकप्रमाणाभावेन तदध्याहारे प्रमाणाभावात् ॥ यत्तु मूर्तं सदिति संप्रोक्तममूर्तमसदुच्यते ॥ मूर्तामूर्तेतरत् ब्रह्म न सत्तन्नासदुच्यत इति पैंगिश्रुतौ सदसच्छब्दयोर्मूर्तामूर्तवाचकतया उक्तत्वेन ब्रह्मान्यत्वेनेत्यध्याहारस्यासत्

पदस्य सत्तादात्म्यशून्यत्वेलक्षणायाश्च कल्पनामपेक्ष्य नासदासीन्नोसदासीदिति भागद्वयस्य मूर्तामूर्त
निषेधपरत्वमेवयुक्तमिति परेणोक्तं ॥ तन्नसम्यक् ॥ सदसत्शब्दयोः पारमार्थिकापारमार्थिकपरतया
लौकिकवैदिकप्रयोगप्राचुर्येण श्रुतिमात्रसिद्धमूर्तामूर्तपरत्वकल्पनायाअयुक्तत्वात् अध्याहारल
क्षणायाअजहन्निरूढलक्षणातोजहन्निरूढलक्षणायाजघन्यत्वात् उक्तश्रुतेर्यथाकथंचित्बोधकत्वमात्रे
णोपपत्तौमूर्तामूर्तवाचकत्वकल्पनेप्रमाणाभावाच्च ॥ यदप्युक्तव्याख्यानेनतदानीमित्यस्यवैयर्थ्यंरज आदेर
पिसन्निषेधेनैवनिषेधलाभात् पृथक्तत्ग्रहणानौचित्यंच ॥ तस्यपारमार्थिकत्वासंप्रतिपत्तावप्यसन्नि
षेधेनैवतन्निषेधलाभादिति दूषणंपरोक्तं ॥ तदप्यसत् ॥ वाय्वोरूपंनास्तीतिवाय्वोरूपनिषेधेपितस्यपृथि-
व्यादौसत्वमिवकालांतरेसदसन्निषेधकालांतरेतमःसत्वप्रसक्त्यानाद्यानिषेधस्यतमसोऽनिर्वचनी
यत्वासाधकतयाविवक्षितासिध्यातन्निषेधाधिकरणकालेतत्सत्वाभिधायकस्यतदानीमित्यस्याव
श्यकत्वात् तथासतितमसःप्रतिपन्नोपाधावुक्तनिषेधप्रतियोगित्वरूपमिथ्यात्वलाभाद्विवक्षितसि
द्धेःसत्वंपरमार्थसत्तैव असत्वंसत्तादात्म्यशून्यत्वमितिपारमार्थिकतुच्छयोरेवप्रकृतनिषेधविषयत्वे
नरजआदीनामुक्तमिथ्यात्वलाभायरजआदिनिषेधस्यावश्यकत्वाच्च ॥ तदानीमित्यस्यरजआदिनि
षेधएवान्वयइत्यद्वैतसिद्धावुक्तंतत्प्रकारश्चतत्रतदीयटीकायांचस्पष्टः विस्तरभयान्नेहलिख्यते ॥

नासदासीदित्यस्यासदन्यदासीन्नोसदासीदित्यस्यचसदन्यदासीदित्यर्थः॥ नचनञर्थस्यनोद्देश्यतावे
च्छेदकत्वसंभवस्तथासतिजलंनद्रव्यंगंधवदित्यादितोजलभिन्नंद्रव्यंगंधवदितिप्रत्ययापत्तेरि-
तिवाच्यं॥ नञ सत्नासदितिसमासेइहाप्राणइत्यादिवत्नञर्थस्योद्देश्यतावच्छेदकत्वाविरोधा
त्उक्तप्रसिद्ध्यतिक्रममपेक्ष्यवैरूप्यस्यापियुक्तत्वाच्च॥ नचसदसतोःसत्त्वमात्रेणोक्तनिषेधद्वयो
पपत्तावनिर्वचनीयत्वासिद्धिरितिवाच्यं॥ सदन्यस्यकालसंबंधाभिधानेनैवतात्सिद्धेः॥ नचास
दन्यस्यसत्त्वाभिधानमसंगतंनिरर्थकत्वादितिवाच्यं॥ सदन्यस्यकथंकालसंबंधइतिशंकानिरासा
र्थत्वेनतदभिधानसार्थक्यादितिनासदीयवाक्यार्थइतिध्येयं॥ एवंलक्षणतःप्रत्यक्षानुमानश्रुति
प्रमाणेभ्यःभावरूपानिर्वचनीयानाद्यज्ञानसिद्धौपरेणाश्रयासिद्ध्यादिदूषणेनाद्वैतिमतासिद्धाज्ञा
नखंडनंयत्स्वकीयग्रंथेकृतंतत्तुनविचारसहं॥ शुद्धचित एवकल्पित तादृशाज्ञानाश्रयत्वोप
पत्तेः॥ तदुक्तंआश्रयत्वविषयत्वभागिनीनिर्विभागचितिरेवकेवलेति॥ यत्तुअज्ञत्वसर्वज्ञत्वयो
रेकाश्रयाश्रितत्वानुपपत्तिरितिपरेणदूषणमुक्तंतदसत्॥ तदीयज्ञानविरोधिनस्तत्कालेतदाश्रित-
त्वायोगेप्यन्यदीयज्ञानविरोधिनस्तदाश्रितत्वेबाधकाभावात्॥ नचैवमज्ञंब्रह्मब्रह्मण्यज्ञानमिति
व्यवहारापत्तिरयमज्ञइत्यत्रपार्थएवयजुर्धरइत्यत्रविरोध्यस्यापिपार्थस्यभेदविशेषणत्वेनान्य

यात् पार्थान्यवृत्त्यभावप्रतियोगिधनुर्धरत्ववान् पार्थ इति बोधस्येव व्युत्पत्तिवैचित्र्येण ज्ञानविरोधिरूपा
ज्ञानपदार्थैकदेशे ज्ञानविशेषविशेष्यस्यार्थपदार्थस्य विशेषणत्वेनान्वयेनैतद्वृत्तिनिवृत्त्यात्मकज्ञानवि
शेषविरोध्याश्रयोयमिति बोधस्वीकारेणोक्तव्यवहारप्रसंगाभावात् ॥ ब्रह्माश्रितं च ज्ञानं परमतइव
मन्मतेपि स्वरूपभूतमेव तच्च नाज्ञानविरोधि यत्स्यावरकत्वमज्ञानस्य तदाश्रितज्ञानविशेषेणैव त
स्याविरोधात् ब्रह्माश्रितज्ञानविरोध्यज्ञानाश्रयो ब्रह्मेति वाक्यार्थस्य तादृशव्यवहारविषयस्याप्रसि
द्धेः ॥ एवमज्ञानान्वितं सप्तम्यर्थविशेषणीभूतप्रकृत्यर्थस्य तस्मिन्नज्ञानमित्यादावज्ञानपदार्थैक
देशे ज्ञाने धर्मिपारतंत्र्येणान्वयोपगमेन न ब्रह्मण्यज्ञानमिति व्यवहारप्रसंगः ॥ ब्रह्मवृत्तिज्ञानविरो-
धिब्रह्मवृत्त्यज्ञानरूपस्याप्रसिद्धेः ॥ नन्विदमयुक्तं जीवब्रह्मणोरभेदस्य त्वयांगीकारादिति चेन्न ॥
स्वरूपैक्येप्यज्ञानकल्पितौपाधिकभेदाभ्युपगमात् जीवोपाधिस्तु सुषुप्तिप्रलयानुवृत्तसंस्कारसाधा
रणं मनस्त्वाश्रयमात्रं मनस्त्वविशिष्टतत्संस्कारान्यतरपर्यवसितं ॥ अविद्याप्रतिबिंबो जीव इतिप-
क्षेप्युक्तविद्याश्रिता ज्ञानमयुक्त एव जीवेश्वरभेदः मुखमात्रसंबंधिदर्पणाद्युपाधिकृतमुखप्रति
मुखादिभेदवदिति तादृशप्रतिबिंबभूतजीवनिरूप्यत्वमेवाज्ञानस्य जीववदीशोप्यविद्याप्रतिबिंब ए-
वोपाधिगतनैर्मल्यतदभावाभ्यामवशीकृतोपाधिस्तनद्भावाभ्यां च जीवेशयोर्विशेषः ॥ सर्वज्ञता-

चेज्ञानिष्ठानमुध्दचिन्निष्ठा एवं च शुध्दचितोऽज्ञानाश्रयत्वेऽपि न क्षतिः तस्याः सर्वविषयकचिद्रूपत्वेऽपि
तदाधारत्वानुपगमादिति केचित् ॥ वाचस्पतिमिश्रास्तु जीवाश्रितामेवाविद्यां मन्यंते ॥ ननु न मते जीवो-
पाधिरविद्यातिरिक्तः सत्यश्चेदद्वैतहानिरनित्यश्चेदविद्याधीनो वाच्यः सा चोपाध्यंतराधीना सचाविद्याधी
नइत्यनवस्था ॥ यदि चैकमेवाज्ञानमुपाधिश्चेक एवेत्युच्यते तदान्योन्याश्रयः ॥ उपाधिनिर्वाह्यभेदोपपाद्य
धिकरणकमज्ञानं तन्निर्वाह्यश्चोपाधिरिति ॥ एकस्या अविद्याया एव स्वस्योपाधित्वे आत्माश्रय इति चे
न्नैवं ॥ अविद्या तदुपहितत्वभेदो नाम विद्योपहितचिद्रूपाया स्तास्त्रयोऽप्यनादित्वेनोत्पन्नत्वाज्ञ सो वात्माश्र
याभावात् ॥ नचाविद्यातिरिक्तानादिदृश्यस्याविद्याजन्यत्वाभावेन सत्यत्वापत्त्या अद्वैतहानिरिति वा
च्यं ॥ तस्य तदजन्यत्वेऽपि तत्प्रयुक्तत्वेन सत्यत्वासंप्रतिपत्तेः ॥ अविद्याकृतोपकाराभावेन तत्प्रयुक्तत्वमयुक्तमिति
चेन्न ॥ अविद्यानाशाधीननाशप्रतियोगित्वेन तदधीनस्थितिकस्याविद्यातिरिक्तानादिदृश्यस्य प्रति
बंधकाधीनकार्यप्रागभावस्येव न तत्वतः उपकारशून्यत्वासिध्देः ॥ यत्तु उपाधिर्विद्यमानस्य भेदस्य ज्ञाप
क एव दृष्टपूर्वः न तु कारकः महापटादिरंजनाद्युपाधौ विद्यमान परावयवभेदव्यंजकताया एव दृष्टत्वा
त् ॥ नचायं परस्यैव भेदकृन्तद्वीपदादित्यप्रतीतेः ॥ नच दंडकुंडलोपाधिभ्यां एक देवदत्तोऽभिद्यत इति वा
च्यं ॥ देवदत्तभेदप्रतीतेः दंडकुंडलसंबंधाहितविशिष्टद्वयस्यैवासत्तेः ॥ नचैवमेवास्तु प्रकृतेऽपीति वाच्यं ॥ उ

पाध्यपगमेजीवस्यनाशएवनब्रह्मैक्यमित्यापत्तेः ॥ विशेषणाविशिष्टजीवेनष्टेस्वरूपमात्रावशेषएवतन्
मोच्यतइतिचेत्तर्हिब्रह्मण्येवबंधमोक्षौस्यातामितिदोषापत्तिरितिपरेणोक्तंतदसत् ॥ धर्माधर्माधीनमो
गाश्रयत्वलक्षणस्यबंधस्यब्रह्मण्यात्यंतिकलयरूपमोक्षस्यचविशिष्टगतत्वेनशुध्दस्वरूपेणअसं
गाभावात्जीवस्यैवौपाधिकस्वरूपेणमुक्त्यनन्वयेप्यनौपाधिकशुध्दस्वरूपेणतदन्वयस्यनिष्प्रत्यू
हत्वात् ॥ महापटरंजनादेःस्वोपहितभेदभेदकत्वाभावेअत्रपटोरक्तोनात्रेतिप्रतीतेरनिर्वाहप्रसंगा-
त् ॥ नचतत्रपटाद्यवयवविशेषस्यरक्तत्वाद्यधिकरणताप्रतीयतेनतुपटादेरितिवाच्यं॥अत्रपटोरक्तइतिप
टेरक्तत्वानुभवविरोधात्॥ नचतत्रावयवविशेषावच्छेदेनपटेरक्तताप्रतीयतइतित्वयावक्तुंशक्यं॥ न
थासत्यवयवविशेषावच्छेदेनपटेरक्तत्वाभावस्यापितुल्यन्यायेनस्वीकारापत्त्याप्रतियोग्यभाव
योर्विरोधस्योच्छेदापत्तेः ॥ नचप्रतियोग्यभावयोरवच्छेदकभेदान्नायंदोषः ॥ एकावच्छेदेनैकत्रा
विद्यमानत्वस्यैवविरोधरूपत्वादितिनैय्यायिकमतवत्त्वयावक्तुंशक्यते ॥ कार्यकारणविलक्ष
णावंशांशिनावित्युपपादनपरत्वदीयग्रंथविरोधात् ॥ तत्रहि किंचाकाशस्यापितावदंशाः संतीत्यं
गीकार्यमन्यथाआकाशेविहंगशरीरभावाभावौनस्यातांसंयोगः स्यात्यंताभावसमानाधिकरणइ
तिचेन्न॥ विरोधात्अन्यथासर्वत्रभावाभावयोरविरोधप्रसंगात् ॥ नचोपाधिकृतांशसद्भावा-

दविरोधः उपाधेरपि विहंगमशरीरसमानयोगक्षेमत्वात् ॥ नचाकाशस्योपादानकारणमस्तितस्मा
त्कार्यकारणातिरिक्तावंशांशिनौ स्वीकार्यावित्यभिधानात् ॥ नन्वज्ञानं भावोवा अभावोवा नाद्यस्तथात्वे
अनादेर्भावस्यानिवृत्त्ययोगादनिर्मोक्षप्रसंगात् ॥ नद्वितीयः ॥ जगदुपादानत्वानुपपत्तेरितिचेन्न ॥ अ
ज्ञानस्यभावत्वेपि यथोक्तदोषस्तथाऽज्ञानलक्षणएवोपपादितत्वात् ॥ अथवाअज्ञाने भावत्वाभावत्व
योर्घटनानुपपत्तिस्तस्यसदसद्विलक्षणत्वरूपानिर्वाच्यत्ववादे भूषणमेवनहि मायायादुर्घटत्वंदूष
णंभवतिक्वापिलौकिकमायायामपितद्दर्शनात् तस्माद्भावाभावविलक्षणैवाविद्या ॥ यत्तु दुर्घटत्वं
भूषणंचेत्स्यादविद्यात्वमात्मनः ॥ अंधंतमोप्यलंकारोनित्यंदुःखशिरोमणेरिति परेणदूषणमु
क्तं ॥ तत्त्वकर्मपरिपाकसंजाताद्वैतवादविद्वेषमात्रनिबंधनं ॥ नह्युक्तानुपपत्तिमात्रंभूषणमित्यद्वै
तिसंमतंयेनत्वदुक्तप्रलापप्रसक्तिः स्यात् किंतु भेदे भावत्वानुपपत्तावभावत्ववत् घटादेरभावत्वा
नुपपत्तौभावत्ववत् उभयानुपपत्तौ प्रमाणसिद्धार्थस्याप्रतिक्षेपायोगादुभयविलक्षणतायांबाध
काभावमात्रंतथाच पूर्वोक्तप्रत्यक्षानुमानश्रुतिप्रमाणसिद्धायामविद्यायांभावत्वमभावत्वंवाव-
श्यमुपपादनीयमित्यत्रकुलधर्माद्यभावादुभयविलक्षणत्वेपि नबाधकमतएवनास्तिनभवतीत्या
दिप्रत्यक्षप्रमाणसिद्धस्याभावत्वस्यान्योन्याश्रयादिदोषादिना भावत्वाभावत्वादिनानिरूपणान

ईस्याखंडोपाधित्वं भावाभावविलक्षणत्वापरपर्यायं नार्किकावदंति ॥ ज्ञानस्वरूपस्यात्मनोऽविद्यात्वे
सर्वदाऽभूतत्वप्रसंगेन प्रकाशकाभावात् जगदांध्यप्रसंगः ॥ अविद्यानिवृत्तावात्मनोऽविनाशापत्त्याज्ञा
ननिवर्त्यविलक्षणसत्यस्वरूपत्वबोधकबलवत्श्रुतिप्रमाणविरोधस्यैव बाधकत्वान्नात्मनोऽविद्या
त्वं भूषणं ॥ न चैवं ब्रह्मणि सर्वज्ञताग्राहकत्वबलवत्प्रमाणविरोधादज्ञानाश्रयत्वानुपपत्तिः शंक्या तत
दाश्रयत्वेपि सर्वज्ञतायाः पूर्वमेवोपपादितत्वेन विरोधाभावात् ॥ नन्वज्ञानं तत्प्रयुक्तं न वा ॥ नाद्यः ॥
आत्माश्रयात् ॥ ⊛ ⊛ ॥ न द्वितीयः ॥ ज्ञानान्निवृत्त्ययोगात् ॥ मैवं अनादावप्यज्ञाने स्वस्मिन् स्व
प्रयुक्तत्वोपगमे बाधकाभावस्य पूर्वमेवोक्तत्वात् यथाद्यभावाधिकरणकाभावस्याधिकरणस्वरूपत्व
वादिनैय्यायिकमते दंडाभावस्य स्वात्मकघटाभावप्रयोजकत्वं ॥ तत्र घटाभावत्वेन प्रयोज्यत्वं दंडा
भावत्वेन प्रयोजकत्वमित्येवं रूपभेदेन तदभ्युपगम इति चेदिहापि पूर्वक्षणसंबंधित्वेन प्रयोजक-
त्वमुत्तरक्षणसंबंधित्वेन प्रयोज्यत्वमित्येवं रूपभेदस्याविद्यायां सत्वेन तत्संभवात् ॥ वस्तुतस्तु ज्ञा
ननाश्यत्वे अज्ञानत्वमेव प्रयोजकं अज्ञाननाश्यत्वे तत्प्रयुक्तत्वमेव प्रयोजकमित्यज्ञानस्य तदप्रयु
क्तत्वेपि न दोषः ॥ नन्वज्ञानस्य तदप्रयुक्तत्वे अनिर्वचनीयत्वमेव न स्यादिति चेन्न ॥ किमनिर्व
चनीयत्वं तत्प्रयुक्तत्वव्याप्यं येन तदभावात् तदभाव आपाद्यते न देव न किंतु सदसत्वादि-

ग्राहकप्रमाणराहित्यमेवतच्चाज्ञानेप्यस्तीतिनतस्यानिर्वचनीयत्वानुपपत्तिः॥ अनादिभावत्वेसति
ज्ञाननिवर्त्यत्वमितिपूर्वोक्ताज्ञानलक्षणेअर्थक्रियाकारित्वरूपमेवभावत्वंविवक्षितंततोभावत्वस्य
दुर्निरूपत्वात्॥ नन्वेवंशुद्धब्रम्हणःजगदुपादानत्वंतत्कर्तृत्वंचनास्तीतिमतेनस्यभावत्वानुपपत्ति
रितिवाच्यं॥ स्वाश्रयत्वस्वाश्रयनिरूपितानवच्छिन्नतादात्म्यप्रतियोगित्वान्यतरसंबंधेनार्थक्रिया
कारित्वपर्यायाएवतन्मतेभावत्वरूपत्वोपगमात्॥ श्रीमद्गुरुपदांभोजस्मरणप्लवसंश्रयात्॥ अ
ज्ञानसाधनाब्धिर्मेसंतारस्करवदोभवत्॥ एवंचोक्तरीत्यानिर्वचनीयभावरूपानाद्यज्ञानसिध्यात-
त्कृतावरणेनविषयप्रयोजनाधिकार्यादिसिद्धौविवरणवाचस्पत्यादिनिबंधोक्तरीत्याशास्त्राना
रंभारंभरूपपूर्वपक्षसिध्दांतग्रंथनरूपेणतदधिकरणयोजनानिनरांरम्येवेतिदिक्॥ आनंदतीर्थीयास्तु
वेदांतमीमांसाशास्त्रंनारंभणीयंन्यायानुसंधानात्मकजिज्ञासायाएवाकर्तव्यत्वात्तदकर्तव्यत्वंच
निर्विषयत्वादिहेतुभ्यःतत्रतावद्विषयत्वेनाभिमतंब्रम्हनजीवचैतन्याभिन्नंतत्प्रमानाभावात्कर्मकांड
स्यकर्मपरत्वात्वेदांतेश्चोपक्रमादिभिरखंडप्रत्यगात्ममात्रप्रत्यायनात्तस्यचाहमितिस्वप्रकाश-
तयाभासमानत्वादितिचंद्रिकायांनिर्विशेषेचतत्रनिरूपणीयधर्माणामभावादित्यधिकमन्यत्समा
नमितिपूर्वपक्षे॥ भवेदेवंनिर्विषयत्वंयदिविचार्यत्वाभिमतंब्रम्हजीवरूपत्वेनसंशयाविषयत्वानास्य

दंस्यात्‌नत्वेवं तद्धि जिज्ञासस्वतत्‌ब्रम्हेति विचारविषये धर्मिग्राहि श्रुतेन ब्रम्हशद्बेनैव गुणपूर्तिर्वाचिना अल्पगुणाज्जीवनिकायाद्धि लक्षणत्वासिध्देः तस्य गुणपूर्तिर्वाचितात्र कस्मादुच्यते ब्रम्हेति बृहंतो ह्य स्मिन्‌गुणा इति श्रवणात्‌ स्वरूपतो गुणतश्चापरिछिन्नत्वविषयाय यपशात्त्याचेति सिध्दांतइति त्वैतदधिकरणरचनामाहुः॥ तत्र पूर्वपक्षस्तावदयुक्त एव अहंप्रत्ययेप्रत्यगात्मनो भाने पि तेन स्थूलो हं दुःखी कर्ता भोक्तेत्येवं रूपेणैव तद्ग्रहणात्तद्विपरीत वेदांत वेद्य शुध्दात्मनः संदिग्धतया ज्ञास्य सविषयत्व सिध्देर्नि प्रत्यूहत्वाद्यथा चैतत्तथा व्याख्यातं शुध्दो हं प्रत्ययेन भातीति पाचस्पति वाक्य विवरणे विस्तरेण शुध्दो हं प्रत्ययेन भातीति को र्थ इत्यादि चंद्रिकोक्त विकल्प खंडनावसरे॥ सिध्दां तोप्ययुक्त एव आनंदवल्यां वक्ष्यमाण सर्वगत सर्वात्म स्वरूप परब्रम्ह विज्ञानात्‌ परब्रम्ह भावरूप परब्र म्ह प्राप्तिमभिधायतादृशब्रम्ह विज्ञान साधन निरूपणपर भृगुवल्यां ब्रम्हविज्ञान साधन ब्रम्हवि चारविधिपरे तद्धि जिज्ञासस्व तत्‌ब्रम्हेति वाक्ये ब्रम्हशद्बस्य जिज्ञासासूत्रे प्रत्यगभिन्न ब्रम्हण एव विषयत्व प्रतिपादकोक्त युक्त्या प्रत्यगभिन्न ब्रम्हपरत्वेनाल्पगुणजीव भिन्न बृहद्गुणक ब्रम्ह-परत्वायोगात्‌ तथात्वेन हि ज्ञानानन्दन्यस्य जीवस्य ब्रम्हविदाप्नोति परमित्युक्ता यास्तत्वाप्तेरयो-गात्‌ तत्यन्यस्य विज्ञानादन्यस्य प्राप्तिरस्ति दृष्टवा ब्रम्हशद्बस्य प्रत्यगभिन्न ब्रम्हपरत्वे तु यथा दृश्य

मस्याव्यवहितस्यस्वस्वरूपतयाप्राप्तस्यापि सतोबाह्यसंख्येयासक्ततयानैवपर्तामहइति विपर्यासंप्राप्त
वतः स्वरूपादर्शनेन दशमोऽप्राप्तइतिमन्वानस्य दशमस्त्वमसीतिकेनचित्स्मारितस्यस्वरूपाज्ञाननि
वृत्त्यादशमप्राप्तिवत्सर्वगतसर्वात्मभूतब्रह्मरूपस्यजीवस्यान्यस्यान्येनपरिच्छिन्नस्यपरिच्छिन्नेने
वमुख्यायाः परब्रह्मप्राप्तेरसंभवेप्यनाद्यविद्यामूलांशकृतबाह्यान्नमयाद्यानंदमयांतानात्मनः-
आत्मत्वेनपश्यतस्तेभ्योनान्योहमितिमन्वानस्याविद्ययानाप्तब्रह्मस्वरूपस्यश्रुत्युपदिष्टसर्वात्मब्र
ह्मण आत्मत्वज्ञानेनानात्मत्वभ्रमनिवृत्त्यात्मकतदाप्तिरौपचारिकीउपपद्यते॥ अवश्यंचब्रह्मविदा
प्नोतिपरमितिफलवाक्यस्याविद्यानिवृत्त्यौपचारिकब्रह्मप्राप्तिपरत्वंवक्तव्यंनाप्राप्तप्राप्तिपरत्वम
संभवात्ब्रह्मप्राप्तिसाधनत्वेनब्रह्मविद्यामात्रोपदेशाद्विज्ञानस्याविद्यानिवृत्त्येकफलत्वस्यदृष्ट-
त्वात्॥ नचतदात्मत्वेतज्ज्ञानमात्रसाधनोपदेशोनहेतुःग्रामंगंतुःस्वतोग्रामत्वाभावेपिमार्गज्ञा
नोपदेशादर्शनात्तथाचजीवस्यस्वतोब्रह्मत्वाभावेपिब्रह्मविद्योपदेशःप्रसाददिद्वारापराभिम
तब्रह्मप्राप्तिहेतुर्भविष्यतीतिशंक्यं॥ दृष्टांतेग्रामविषयंविज्ञानंग्रामंगंतुर्नोपदिश्यतेकिंतुतत्प्राप्ति
साधनमार्गविषयविज्ञानमेवप्रकृतेतुतत्त्वमसियोयोदेवानांप्रत्यबुध्यतसएवतदभवदथर्षीणांब्र
ह्मवित्ब्रह्मैवभवतितदात्मानमेवावेदहंब्रह्मास्मितत्त्वमस्यादिवाक्योत्थंयज्जीवपरमात्मनोः

अभेदविषयंज्ञानं तदिदं मुक्तिसाधनमित्यादिश्रुतिस्मृतिसंभवंजीवाभिन्नब्रह्मविषयविज्ञान
मेव परब्रह्मप्राप्तिसाधनत्वेनोपदिश्यत इति दृष्टांतेन धर्म्येणपत्रस्यात्मविषयविज्ञानमेवस्वप्रा-
प्तिसाधनत्वेनोपदिश्यते तत्र दशमदृष्टांतेनाविद्यानिवृत्त्यात्मकौपचारिकस्य प्राप्तेरेवविद्याफल
त्वस्यावश्यंवक्तव्यत्वात् ब्रह्मविज्ञानस्यप्रसादादिद्वाराब्रह्मप्राप्तिरूपमोक्षसाधनतायाःपूर्वमेव
निराकृतत्वाच्च ॥ तत्सृष्ट्वा तदेवानुप्राविशदिति ब्रह्मणः सृष्ट्युत्तरं कार्यप्रवेशश्रुतेश्च न जीवभिन्नं
ब्रह्म ब्रह्मशब्दार्थः तत्र हि क्त्वाप्रत्ययेन सृष्टिप्रवेशक्रिययोरेककर्तृकत्वबोधनात् स्रष्टुरेव प्रवेशो बो-
ध्यते स च सृष्टिसमय एव कार्ये ब्रह्मणः कारणरूपेणास्थितत्वान्मुख्यो न संभवति अप्रविष्ट एव मठा
दौ देवदत्तस्य प्रवेशव्यवहारदर्शनात् अतो यो वेद निहितं गुहायामिति प्रकृतमेव ब्रह्माकाशादिका
रणं कार्यं सृष्ट्वा तदनुप्रविष्टमिवांतर्गुहायां बुद्धौ द्रष्टृश्रोतृमंत्रित्येवं विशेषवदुपलभ्यते अनेन जी
वेनात्मनानुप्रविश्येति श्रुत्यंतरात् परमार्थतस्तु नान्योतोस्ति श्रोता नान्योतोस्ति मंता नान्योतोस्ति
विज्ञातेति श्रुत्यंतराच्च स एव तस्य प्रवेश इत्यस्यैव वक्तव्यत्वात् यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽ
निरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विंदते अथ सोऽभयंगतो भवति यदा ह्येवैष एतस्मिन्नुदरमंतरं कु-
रुते अथ तस्य भयं भवतीत्यनेनादृश्यत्वादिविशेषणके जिज्ञास्यत्वेनोक्ते ब्रह्मण्यात्मभावं जानतो

विदुषः अभयमनिष्ठोक्ते भेददर्शिनश्च भयोक्तेरपि यदि तु रात्वे [illegible]
हि विद्वान्स्वात्मनोऽन्यं न पश्यति तदा अभयं प्रतिष्ठां विंदते इति [illegible]
तिरिक्तेश्वरदर्शिनश्च भयहेतुसद्भावादभयप्रतिष्ठानुपपत्तेः द्वितीयाद्वै भयं भवतीति श्रुतेः॥ [illegible]
श्ये अविकारे अनात्म्ये अशरीरे अनिरुक्ते निरुक्तिप्रयोजकगुण [illegible] अनि-
लयने अनाधारे अभयमिति क्रियाविशेषणं लिंगविपरिणामे [illegible] विशेषणाद्वि
ष्यभावो वा उत अपि अरं अल्पं उपास्योपासकभावादिलक्षणं [illegible]
स्य भयं भवतीत्यर्थः॥ जिज्ञास्यं ब्रह्मणि श्रुतं तदप्येषः श्लोको [illegible]
प्य मनसा सह इति वाङ्मनःप्रवृत्त्यविषयत्वं ब्रह्मशब्दस्य बृहद्‌ [illegible]
नुपपन्नं प्रवृत्तिनिमित्तगुणसत्त्वे तयाल्पयोगात् निवर्तन्त इति [illegible]
किंतु साकल्येन शब्दागोचरत्वमिति तु आनंदमयाधिकरणे निराकरिष्यत इति दिक्॥ [illegible] आनंद
तीर्थीयानां निर्विशेषजीवरूपस्य ब्रह्मणः वेदांतनिरूप्यत्व [illegible]
र्वपक्षः गुरूणां भणति परंपराविषये महापुरुषेत च्छिष्यादित [illegible]
माणशिखामणयो हि वेदांतानितांतमनधिगतार्थमन्विष्यंति [illegible]

णावगंतुं शक्येऽप्यर्थे श्रोतृबुद्धिसौकर्यार्थं प्रवृत्तानि स्वोक्तमप्यर्थमविस्मरणायाभेडयंति न तथानधि
गतार्थत्वसनितामनुभवंति तत्वश्चवेदांता अपि स्वप्रकाशस्वरूपे कर्तृत्वभोक्तृत्वादिरहिततया अकर्म
शेषतां प्रतिपाद्यमाने स्वातंत्र्येण पर्यवस्यंति तदा शास्त्रपर्यवसाने कानुपपत्तिः पूर्वपक्षिणापि वेदांतानां
प्रामाण्यसंरक्षणाय स्वप्रकाशात्मकजीवस्वरूपमात्रपरत्वेपि अनधिगतार्थकत्वं कथंचिदुपपादनीय
मेवतेनैव शास्त्रस्यापि सविषयत्वोपपत्तिरित्याहुः ॥ यत्तु पूर्वपक्षिणा वेदांतानां प्रामाण्यं न संरक्षणी
यं तेषामुपक्रमादिन्यायैः स्वप्रकाशतया सिध्दजीवस्वरूपपरत्वेन यदि प्रामाण्यं न निर्वहेत्तर्हि माभूत्
न्यायलब्धेर्थे किं कुर्मः ॥ अत एवोक्तं चंद्रिकायां निरुक्तपूर्वपक्ष एव सिध्दचैतन्यबोधने श्रुतेरनुवादक
त्वं वायुर्वै क्षेपिष्ठादिवाक्यवत् सह्यं वेदांताध्ययनं तु जपार्थमेवास्तु यथाह्यर्थवादाधिकरणेऽपौरुषे
यत्वेप्यर्थवादादीनामक्रियार्थत्वेन विध्येकवाक्यत्वाभावादानर्थक्यमिति भट्टमतेन पूर्वपक्षः ॥ प्रा
भाकरमते चार्थवादानां विध्येकवाक्यत्वेपि हेतुसमर्पकत्वात् हेतुसापेक्षचोदनानाम प्रामाण्यमिति पू
र्वपक्षः ॥ यथा वा परमते शास्त्रयोनित्वाधिकरणे ईक्षत्यधिकरणे च कारणवाक्यमनुमानसांख्यस्मृ
तिप्राप्तकारणानुवादीनि पूर्वपक्षे तथेहापि स्वतःसिध्दप्रत्यगात्मानुवादका वेदांता इति पूर्वपक्ष इति त
न्न ॥ यस्तु पूर्वपक्षिणा वेदांतानां निर्विशेषचिन्मात्ररूपजीवविषयत्वेपि अनधिगतविषयत्वमहूतिरी

स्यासमर्थनीयमेवउपक्रमादिस्वारस्यावगताखंडजीवस्वरूपचिन्मात्रपरत्वंपरित्यज्यनहिलक्षणसगुण
विष्णुपरत्वंवासमर्थनीयमन्यथातेषांत्वन्मतरीत्याब्रह्मतर्कसिद्धप्रामाण्यव्याघातोदुर्वारः॥ इत्थंहित्वन्म
तंअस्तिब्रह्मतर्काभिधानंशास्त्रंविष्णुनानारायणरूपेणातिविस्तरेणकृतंपुनर्व्यासरूपेणतेनैवसंक्षि
प्तंतदेवचचतुर्दशविद्यास्थानांतर्गतंतर्कशास्त्रंनतुगौतमादिप्रणीतंतच्चास्यब्रह्ममीमांसाशास्त्रस्यांगं
ब्रह्ममीमांसाशास्त्रंहिसर्वेषांकर्मब्रह्मकांडरूपाणां वेदानांसकलगुणपूर्णोभगवान्विष्णुरेवमुख्या
र्थइतिनिर्णयायप्रवृत्तंब्रह्मतर्काभिधानंतुब्रह्ममीमांसानिर्णेयार्थानांवेदानांतदर्थनिर्णायकानांप्रत्य
क्षादीनामुपक्रमादीनांश्रुतिलिंगादीनांच स्वरूपाणांप्रामाण्यतद्बलाबलनिर्णायकत्वेनब्रह्ममीमांस
या अपेक्षितमतस्तदंगंतदुक्तमनुव्याख्याने प्रमाणन्यायमीमांसाक्रियतेतर्कशास्त्रतः॥ मानन्यायैस्तु
संसिद्धैर्मीमांसामेयशोधनं॥ ब्रह्मतर्कंचभगवान्सएवकृतवान्प्रभुः॥ पंचाशत्कोटिविस्तारान्ना
रायणतनौकृतात्॥ उद्धृत्यपंचसाहस्रंकृतवान्बादरायणइति॥ तथाचत्वत्पूर्वपक्षिणा
त्वन्मतरीत्याब्रह्मतर्कसिद्धप्रामाण्यानांवेदांतानामप्रामाण्यमसिद्धप्रामाण्याक्रियार्थवादवाक्याप्रा-
माण्यपूर्वपक्षोदाहरणेनपूर्वपक्षितुमशक्यमेवनहिअपगतक्रियार्थत्वेनसिद्धप्रामाण्यानांवेदवाक्या
नामप्रामाण्यमाशंकितंजैमिनिनापूर्वतंत्रेसिद्धप्रामाण्येपुत्रेधातंदुत्वान्विभजेत्सृष्टीरुपदधातिकपाले

शुश्रूषयतित्यादिवेदवाक्येषु अन्यतः प्राप्तिमतोऽर्थान् परित्यज्य लक्षणादिना अनधिगतार्थपर्यवसानस्यनेनांगीकृतत्वात् ॥ शास्त्रयोनित्वाधिकरणेईक्षत्यधिकरणे च कारणवाक्यमनुमानादिप्रमाणकारणानुवादीति पूर्वपक्षौ नास्माकं संमतौ शास्त्रयोनित्वाधिकरणे उपादानस्य कर्तृत्वादिरूपमभिन्ननिमित्तोपादानत्वशक्तिं ब्रह्मणो लक्षणं न संभवति तद्धटक कर्तृत्वोपयोगिसर्वज्ञत्वस्य ब्रह्मण्यसंभवात् यद्वा जगदंतःपाति वेदस्यानित्यत्वाद्यावज्जगत्कर्तृत्वं ब्रह्मणो लक्षणं न संभवतीति पूर्वपक्षः ॥ ईक्षत्यधिकरणे जगत्कारणत्वेन सद्विद्यातात्पर्यविषयत्वं प्रधानस्यैव न ब्रह्मण इति पूर्वपक्षः एतच्चैतादृशाधिकरणयोर्निपुणतरं प्रतिपादयिष्यामइति चंद्रिकोक्तमनुक्तोदाहरणमेव ॥ यत्तु अद्वैतिमतसिद्धोपक्रमादिजालमालंब्यैवायं पूर्वपक्षः तदुक्तं चंद्रिकायां यद्वा प्रमाणभूतवेदांतगतिर्न पूर्वपक्षिणा वाच्या किंतु प्रमेयस्य ब्रह्मणो ऽद्वितीयब्रह्मवादाद्वैतिरीत्यास्य प्रकाशजीयत्वैतन्याभेदान्नाविचार्यत्वेतिप्रमेयाश्रयेणैवेतितदप्यसत् ॥ तन्मते जीवगतकर्तृत्वादीन्यनिशमनुभवन् साक्षीनित्यत्वेनाप्रामाण्यादिहेतुदोषाद्यभावात्सर्वप्रमाणाधिकः तस्य सर्वप्रमाणाधिकत्वं प्रमाणमीमांसारूपब्रह्मतर्कसिद्धमतः साक्षिविरुद्धे ऽर्थे श्रुतिरपि न प्रमाणं सर्वेषामपि प्रमाणानामुपक्रमादुपसंहारो बलीयानित्यादिरूपोमतांतराद्विलक्षणो बलाबलविभागोपि ब्रह्मतर्क एव सिद्धः ॥ उपक्रमादिलिंगानां बलीयोत्युत्तरोत्तरं ॥

श्रुत्यादौ पूर्वं पूर्वंतु ब्रह्मतर्कविनिर्णयादित्यनुव्याख्यानोक्तेः॥ यदभिमतोपक्रमादिबलाबलानुसारीवे
दानामर्थस्त्वन्मते विचारात्प्रागेव गुरुमुखादवगंतव्यः यावच्छक्तिसकलवेदाध्ययनपूर्वकंमति
वाक्यमस्य वाक्यस्यायमर्थ इति सर्वेषां वेदवाक्यानां गुरुमुखादर्थग्रहणं श्रवणं तच्च यावदज्ञाननिवृ
त्तेरेकस्माद्गुरोस्तत्तदुत्तमगुरुत्वाभेबहुभ्योवासम्यगावर्तनीयं एवं श्रवणावृत्तिलब्धस्य वाक्यार्थग्र
हणस्यस्थिरीकरणाय न्यायविचारात्मकयुक्त्यनुसंधानं मननं नतु तदेवश्रवणं ततश्च विचारविधि
शास्त्रं मननविधिमूलं न श्रवणविधिमूलमिति तवमर्यादा तथाच साक्षी सर्वप्रमाणाधिकः इति ज्ञा
नन्निर्विशेषनिष्प्रपंचजीवाभेदवाक्यानामपि सगुणसप्रपंचजीवभिन्नत्वाभिमतब्रह्मपरत्वेन-
बोधयतां स्वाभिमतगुरूणां सकाशात् बहुधावर्तितश्रवणलब्धसकलवाक्यार्थावधारणस्तदनुगुणप्र-
माणस्वरूपबलाबलव्यवस्थापकब्रह्मतर्काभ्यासेन लब्धश्रवणसंवादस्तदनंतरं निरुक्तमननाख्य
के विचारे प्रवर्तमानः शिष्यः सर्वप्रमाणाधिकसाक्षिप्रत्यक्षादेः तर्कशास्त्र प्रसिद्धप्रमाणस्वरूपत
द्बलाबलानुगुणमनेकासोपदिष्टमर्थं परित्यज्य सर्ववेदांतानां निर्विशेषजीवचिन्मात्रमेवार्थ इति प्र
त्यक्षादिविरुद्धमर्थं कथमाशंकेत तदाशंकाभावे च कथं पूर्वपक्षोदयः योग्याशंकैव हि वादकथारू
पे शास्त्रे पूर्वपक्षो नामेति त्वन्मते नैवं पूर्वपक्षसंभवः किंच त्वत्पूर्वपक्षिमते वेदांतानामबलन्यायै

निर्विशेषजीवचैतन्यपरत्वं प्रतिपादयत्शास्त्रमस्तिनचानचेत् प्रत्यक्षादिविरुद्धं सविषयानेकार्थांतरवाक्य
कृतांतःकलहप्रतिरुद्धंवेदांतानां निर्विशेषचिन्मात्रपरत्वं पूर्वपक्षिणाकस्मात्गृहीतं पदचलंब्य पूर्वपक्षः सम
र्थनीयः॥ अस्तिचेत्तदारंभमपेक्ष्याविषयाभावेन तदनारंभः समर्थ्यत इति कथं नव्याघातः॥ यान्त्वसतिविवरण
योर्मतेतु प्रत्यगात्मन एव ब्रह्मत्वाविषयत्वं प्रत्यक्ब्रह्मणोरैक्यस्यवाविषयत्वंसिद्धांत्यभिमतमेवानूद्यतयो
रेकस्यासिद्धत्वेनान्यस्यासिद्धत्वेन विषयत्वासंभवइति पूर्वपक्षो प्रवृत्तोनतः प्रत्यगात्मैवब्रह्मेतिकुतःकुतः प्र
त्यक्ब्रह्मणोरैक्यमितियापूर्वपक्षिणं प्रतिसिद्धांतिनोहत्वाकांक्षायाअनुदयेनविषयोपपादकशास्त्रारंभमनपे
क्ष्यतदनारंभपूर्वपक्षप्रवृत्तेर्नव्याघातः॥ तन्मतेतु निर्विशेषचिन्मात्रजीवस्वरूपं ब्रह्मेति सिद्धांत्यनभि
मतएवार्थोविषयत्वमापाद्य पूर्वपक्षप्रवृत्तिस्तस्मिन्नर्थेसिद्धांतिनोकुत एतदिति आकांक्षोदयात्तदुपपादक
शास्त्रारंभस्य तत्पूर्वपक्षिणोपेक्षितत्वाद्भवत्येवव्याघातः पूर्वोक्तः॥ अथोच्येत स्वप्रकाशचिन्मात्रपरत्वं
प्रबलन्यायैः प्रतिपादयत्शास्त्रमस्त्येवेदमपितथाभूतंचेत्तेनगतार्थंसगुणब्रह्मप्रतिपादकमिदंचेत्तेन
बाधितमित्युभयथाप्यपहृतविषयत्वादनारभ्यंशास्त्रमितिपूर्वपक्षशरीरकरणान्नव्याघात इति
चेत्तर्हिजीवस्यस्वप्रकाशत्वेनसंदिग्धतोक्तिः पूर्वपक्षेऽनुपयुक्तैव॥ कणभुगादिशास्त्रेणाप्यपहृतविष
यतयाअनारंभेआक्षेप्तुंशक्यत्वेनिर्विशेषशास्त्रएवतेपक्षपातोनयुक्तः॥ संशयपादेतत्सर्वंनिराकर्त

व्यमस्ति चेदिदमपि त्वदनभिमतं तत्रैव निराकर्तुं योग्यमिति दिक् ॥ सर्वेषां वेदान्तानामद्वैते तिरीत्याउ
पक्रमादिभिरखंडप्रत्यगात्मब्रह्मणि तात्पर्यमाश्रित्य कृतोक्तपूर्वपक्षे तद्धि जिज्ञासस्व तद्ब्रह्मेति-
विचारविधिगतब्रह्मशब्दस्य बृंहतोह्यस्मिन् गुणा इति व्युत्पत्त्याश्रयणेनाल्पगुणजीवसमुदायाभिन्न
ब्रह्मपरत्वप्रतिपादनेन न सिद्धान्तोपि सर्ववेदान्तानां जीवाभिन्नगुणपूर्तिमद्ब्रह्मणि तात्पर्यप्रसाधनमन्त
रा केवलं ब्रह्मशब्दस्य शक्तिप्रदर्शनमात्रेणायुक्त एव ॥ उक्तव्युत्पत्त्या ब्रह्मशब्दस्य गुणपूर्तिनिमित्त-
त्वेपि तादृशार्थे तात्पर्यप्रसाधनमन्तरा अद्वैतिदर्शितप्रबलोपक्रमादिभिस्तात्पर्यनिर्णायकैर्लिंगैर
द्वैते ब्रह्मणि निर्णीततात्पर्यकसर्ववेदान्तविरोध्यर्थकत्वासंभवात् प्रत्युत भूयोनुग्रहस्यन्याय्यत्वेन स
र्ववेदान्तगुणीभूतत्वा त्तदनुगुणाद्वैतवाद्यभिमतत्रिविधपरिच्छेदराहित्यमेव बोधयेन्न गुणपूर्तिम्भू
योनुग्रहन्यायश्चानन्दतीर्थीयैरपि न स्थानतोपीत्यधिकरणे दर्शितः ॥ तत्र हि कार्यकारणबद्धौ ताविष्ये
ते विश्वतैजसौ ॥ प्राज्ञः कारणबद्धस्तु द्वौ तु तुर्ये न सिध्यतः ॥ इत्यादिश्रुतेर्विश्वतैजसप्राज्ञादिरूपस्य
भगवतोपि बद्धत्वरूपदोषप्राप्त्याशंक्योक्तमनुव्याख्याने ॥ सर्वत्राशेषदोषोज्झत्पूर्णकल्याणचिद्गुणः ॥
तद्धि रुद्धं तु यत्तत्र मानं नैव भवेत् क्वचित् ॥ महातात्पर्यरोधेन कथं तन्मानमत्र तु इत्यादि॥ न्यायसुधा-
यां चोक्तं सकलश्रुतिस्मृतिपुराणानां परमेश्वरस्याशेषदोषविधुरत्वे समस्तगुणपरिपूर्णत्वे च य-

न्महातात्पर्यंतद्विरोधेनतद्वाक्यमात्रंभगवतोदोषित्वादौकथंमानंभवेदित्यादि॥ यत्तुजीवातिरि
क्तंब्रह्मणिप्रमाणंनास्तीतिप्रत्यवतिष्ठमानंपूर्वपक्षिणंप्रतितत्प्रमाणतयोपन्यस्तंब्रह्मपदंतच्चा-
ज्ञातज्ञापकत्वेनोत्पत्तिस्थानीयमितितत्प्रतिपादितगुणपूर्त्यादिउत्पत्तिशिष्टंतेनजीवादिभिन्नब्रह्म
णिसिद्धेउत्पत्तिशिष्टप्राबल्यन्यायाच्चसर्वैरपिवेदान्तैस्तत्रैवभवितव्यमितितदसत्॥ नहिजिज्ञास्य
तद्ब्रह्मेत्यत्रब्रह्मशब्दस्ययतोवाइमानीतियदुपबंधबलेनजगत्कारणतयासहप्राप्तस्यधर्मिणोऽनु
वादकत्वावगमेनाज्ञातज्ञापकत्वाभावात्सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयंआत्मावाइदमे
कएवाग्रआसीदित्यादिकारणवाक्यमेवतत्प्रापकंतत्रचस्वरसतःसजातीयविजातीयस्वगतभेद
निषेधएवप्रतीयतेसएवोत्पत्तिशिष्टगुणोनगुणपूर्तिरितिविपरीतमेवबलाबलं॥ अस्तुवाब्रह्मपद
मेवाज्ञातज्ञापकंतथापिनात्रोत्पत्तिशिष्टन्यायावतारःउत्पत्तिशिष्टस्यापिभूरिबाधासमर्थत्वात्अ
तएवपशुमालभेतेत्यादावुत्पत्तिवाक्येदेवतासंबंधेनावगतमपिपशोर्हविष्ट्वंपशुंविशास्तिहृदय
स्याग्रेऽवद्यतिअथजिह्वायाअथवक्ष सइत्यादिहृदयादिहविष्ट्वागमकानेकवाक्यविरोधात्त्य
क्तं॥ ब्रह्मपदेबृहंतोह्यस्मिन्गुणाइतिश्रुतिसहाय्यवत्तत्रापिजुष्टंदेवानामिदमस्तुहव्यमितित
दुपाकरणमंत्रसाहाय्याविशेषात्तत्रब्रह्मपदानवाक्यविरोधात्त्यक्तमितिचेदत्राप्यनेकाद्वैत

स्मिन् न गुणाइ इति श्रुतेः सगुणोपास्यब्रह्मप्रकरणस्थाया व्यावहारिकानेकगुणविशिष्टतायास्तुति
परत्वेनाप्युपपत्तौ गुणनिष्ठबृहत्त्वस्य गुणिनि ब्रह्मधर्मौ निमित्तत्वतात्पर्यकत्वकल्पनाया अयु
क्तत्वादन्यथा रूपत्वरसत्वादीनि निमित्तीकृत्य घटे विरूपादिशब्दप्रयोगप्रसंगो दुर्वारः ॥ किंचेश्वरः
स्वयमेकः सन्नपि तस्मिन् आनंदमयाधिकरणोक्तरीत्या अन्नमयप्राणमयादिरूपेण नानात्वस्य आ
नंदमयोऽवयवी सन्नपि तस्मिन् तदीयशिरःपक्षमध्यपुच्छावयवत्वस्य गुहाधिकरणोक्तरीत्या क-
र्मफलभोक्तृरूपेणांतरात्मरूपेण च नानात्वस्य न संख्योपसंग्रहादित्यधिकरणोक्तरीत्या पंचज
नरूपेण न स्थानतोपीत्यधिकरणोक्तरीत्या विश्वतैजसप्राज्ञरूपेण च नानात्वस्यैव चैकत्वादि
विरुद्धस्य ॥ अंगांगित्वेन भगवान् क्रीडते परमेश्वरः ॥ ऐश्वर्यान्न विरोधश्चाचिंत्यस्तस्मिन्ज
नार्दने ॥ इत्यादिवचनेनाचिंत्याद्भुतशक्तेः परमेश्वरस्यैश्वर्यवशात् संक्रमं बहुमानस्य तव मन्ते
सकलगुणपूर्णस्य ब्रह्मणोल्पगुणजीवभावोपि नदीयैश्वर्यवशादेव संभवतीति स्कवचतया न-
जीववैलक्षण्यं तस्य ब्रह्मशब्देन सिध्यति ॥ किंच नेह नानास्ति किंचनेति स्वगतावयवतावयवितादि
भेदनिषेधकश्रुतिबलात् तस्मिन्नेकत्वानेकत्वादिविरुद्धधर्मव्यवहारादिसमावेशाय भेदाभावेपि भे-
दाधीनो व्यवहारो यत्र दृश्यते यथा लोके नीलं सुगंधि महदुत्पलमिति वेदे सत्यं ज्ञानमनंतं आनं

दोब्रह्मेत्यादौनीरूपभावादीनां ज्ञानानंदादीनां च धर्मिणः परस्परस्माद्भेदाभावेपि अपर्यायशब्दैरुक्तिस्तन्नि-
र्वाहाय यथा विशेषमंगीकृत्य स्वयमेकोपि परमेश्वरो विशेषबलात् अनेक इति अनेकविरुद्धव्यवहारवि-
षय इति यथा त्वन्मते स्वीक्रियते तथा जीवब्रह्मभेदनिषेधकश्रुतिबलादेवतयोर्विरुद्धधर्मसमावेशाय
विरुद्धानेकव्यवहाराय चाभेदस्थाने विशेषं अद्वैतरीत्या तत्कल्पकानाद्यज्ञानं वास्वीकृत्य परमेश्वर
एव विशेषबलात् जीवभावेन संसरति जीवभावेन व्यवहारविषयो भवतीति कल्पयितुं सुशकमेव ॥
नहीश्वरे स्वगतभेदनिषेधकश्रुतितो जीवेश्वरभेदनिषेधकश्रुतेः कश्चित् विशेषः उपपादयितुं शक्य
इति न ब्रह्मशब्दमात्रेण जिज्ञास्यस्य जीववैलक्षण्यं निर्णेतुं शक्यं ॥ यत्तु नात्र ब्रह्मशब्देनैव जिज्ञा-
स्यस्य जीवाभेदं प्रसाध्य सिद्धांतोऽस्मत्संमतः किंतु सर्वासां श्रुतीनां निखिलगुणाकरे विश्वातिशा-
यिनि भगवति जीवभेद एवैकमत्येन स्वारस्यं तात्पर्यलिंगैः प्रसाध्याद्वैतेतासामत्यंतं वैरस्यं तत्तन्न्या-
यैरुपपाद्य ब्रह्मशब्दश्चाप्युपचयमात्रमिति समाधानं तत् पूर्वापरस्वसिद्धांतग्रंथविरुद्धं त्वन्मते हि-
अद्वैतश्रुतीनां विरोधं परिहृत्य प्राधान्येन जीवब्रह्मभेदसाधनं पृथगुपदेशादित्यधिकरणे कृतं त-
थाहि तत्र त्वदीयं भाष्यं ॥ तत्त्वमसि अहं ब्रह्मेत्यादिषु जीवस्य परेणाभेदः प्रतीयते नित्यो नित्यश्चेतन-
श्चेतनानां द्वा सुपर्णेत्यादिषु भेदः अत उच्यते पृथगुपदेशात् ॥ भिन्नोऽचिंत्यः परमो जीवसंघात् पूर्णः

परोजीवसंयोग्यपूर्णः॥ अतस्त्वसौनित्यमुक्तोह्ययंनबध्योमोक्षंनतएवाभियांच्छेदितिसोपपत्तिकफौ
शिकश्रुतेर्भिन्नएवजीवः॥ नतद्गुणसारत्वात्तद्व्यपदेशःप्राज्ञवत्॥ ज्ञानानंदादिब्रह्मगुणाएवास्यसारःस्वरू
पमतोऽभेदव्यपदेशःयथासर्वगुणात्मकत्वात्ब्रह्मणउच्यतेसर्वंखल्विदंब्रह्मेति॥ मविष्यत्पर्णीच॥ भि
न्नाजीवाःपरोभिन्नस्तथापिज्ञानरूपतः॥ प्रोच्यतेब्रह्मरूपेणवेदवादेषुसर्वशइति॥ नन्वत्यतत्समकाधिकाया
मपि॥ जगत्कारणेब्रह्मणिश्रुतीनांसमन्वयो निरूपितःसचाद्वैतश्रुत्याभेदश्रुतेर्विरोधेअनुपपन्नःस्या
दित्यवश्यमसौनिरसनीयः इत्युक्त्वाजीवविषयेश्रुतिविवादंतस्यब्रह्मभिन्नत्वाभिन्नत्वेसंशयबीजंभेद
र्शनतत्वमसीतिमतीकंधृत्वापरमात्माभिन्नएवजीवइतिपूर्वपक्षः॥ तत्वमसीत्यादिश्रुतेः॥ नचविपर्य
येप्यस्तिश्रुतिरितिवाच्यं॥ अद्वैतश्रुतेःषड्विधतात्पर्यलिंगयुक्तायाबलवत्त्वादेकमेवाद्वितीयमित्युपक्रमात्त
त्वमसीत्युपसंहारादित्यादिनाषड्विधतात्पर्यलिंगानिप्रदर्श्यइतिप्राप्तेसिद्धांतीदन्तत्सूत्रमवतार्यव्याचष्टे
अतइतिपृथगेवजीवःपरमात्मनःभिन्नोचिंत्यइतिश्रुतेः॥ नचास्तिविपर्ययेपिश्रुतिरितिवाच्यं॥ विरुद्धध
र्माधिकरणयुक्तियुक्तत्वेनभेदश्रुतेःप्राबल्यादितिभावः॥ नन्वेवमद्वैतश्रुतेर्निर्विषयत्वेनाप्रामाण्यंप्रसक्त
मित्याशंकांपरिहरन्सूत्रमुप न्यस्यव्याचष्टेनतदिति॥ नाद्वैतश्रुतेरप्रामाण्यापत्तिःपरमात्मगुणसदृशा-
नंदादिस्वरूपत्वेनजीवस्यगौण्यावृत्त्याऽभेदव्यपदेशोपपत्तेः॥ यथाखलुसकलजगद्गुणसदृशागुणात्म

कत्वेन परमात्मनि जगदादिनिर्व्यपदेशः सर्वं खल्विदं ब्रह्मेत्यादौ तथैवेति भाव इति॥ अप्राधान्येन जीव
ब्रह्मभेदसाधनं च किंचिन किंचित् भेदवाक्यमालंब्य तत्र तन्नाधिकरणे॥ तथा च यद्यप्य सफलं द्वैताद्वैतश्रुति
प्राबल्य दौर्बल्य चिंतन पासर्वप्रकारेण तत्साधनमस्मिन्नधिकरणे एव क्रियते तत् दात तदधिकरणे तत्र तन्नतत्सा
धनं च निष्फलमेव स्यादित्यस्मिन्नधिकरणे ब्रह्मशब्दे नैव सिद्धांतस्त्वन्मत इति तत्वया नांगीकर्तव्यं॥ तदिदं अ
नंदमयाधिकरणे भेदव्यपदेशाच्चेति सूत्रस्य पौनरुक्त्यपरिहारार्थं के॥ न जीव भेदसूत्राणां शंक्यात्र पु
नरुक्तता॥ वाक्यांतरद्योतकत्वात् पृथगित्यत्र पूर्णतित्यनुव्याख्यान श्लोके स्पष्टं तत् श्लोकं व्याचक्षा
णेन न्यायसुधाकृतापि तथैव व्याख्यातं॥ तथाहि तत्र सुधायां यः अनशास्त्रे तत्र तत्र प्रकरणे द्वैक्यवि
वक्षायां चोदितायां तत्तद्गत भेदवाक्यद्योतनेन सूत्रेषु भेदसमर्थनं क्रियते अतस्तात्पर्यभेदान्न पुनरु
क्तिः शंक्या॥ तथाहि जिज्ञासावाक्ये ब्रह्मभेदशंकायां तद्गतब्रह्मशब्देन भेदसमर्थनं जिज्ञास्यस्य ब्रह्मणो जी
वत्वे शंकिते तत्पूर्वोक्तिवाक्योक्तलक्षणेन भेदसाधनं एवमेव भेदव्यपदेशाच्चान्य इत्यादावपि पुनरु
क्तता दोषः परिहरणीयः इयांस्तु विशेषः अन्नमयादिशब्दा विकारार्थमयट्प्रत्ययानुरोधात् जीववा
चिनस्तेषु ब्रह्मशब्दप्रयोगस्तु ब्रह्माभेदविवक्षयेति शंकिते तत्प्रकरणगतेन स यश्चायं पुरुषे इति भे
दव्यपदेशेन मत्यपरस्थानमिति॥ अपि चाग्रे आनंदतीर्थीयमते निरूपणीयं न्यायजातमपि न --

जीवेशयोर्भेदं व्यवस्थापयितुं प्रवर्तितत्वाद्धि तत्र तत्र न्यायाः । प्रत्यक्षं तावत् जीवेशयोर्भेदे प्रमाणं
यद्यप्यनवगतेश्वरस्य पुंसः स्वात्मनि तद्भेदो न प्रत्यक्षस्तथापि शास्त्रावगतसर्वज्ञत्वसर्वशक्तिक-
त्वादिमदीश्वरस्य स्वात्मानं च तद्विरुद्धाल्पज्ञत्वाल्पशक्तिकत्वादिधर्मकं साक्षिणानुभवतः स प्रत्य-
क्ष एव यो हि परमर्थमधिगम्य तद्विरुद्धधर्माणं यमर्थं पश्यति स तस्माद्भेदं प्रत्यक्षप्रतीतिव्याप्तेः शा-
स्त्रीयलक्षणाज्ञानसाचिव्येन रत्नतत्त्वसाक्षात्कारवच्छास्त्रीयज्ञानसाचिव्येन स्वात्मनि तद्भेदसा-
क्षात्कारो नानुपपन्नः ॥ एवं प्रत्यक्षागमावगतविरुद्धधर्मवत्त्वेन दहनतुहिनवत्तयोर्भेदोऽनुमा-
तुं शक्य एवेत्यनुमानमपि द्वितीयं तत्र प्रमाणं विरुद्धधर्माधिकरणत्वोपपत्तिसहिता भिन्नोऽचिंत्य
इत्यादिश्रुतिरपि तत्र तृतीयं प्रमाणं ॥ न चाद्वैतश्रुतिविरोधादुक्तश्रुतेरन्यथानयनं शंक्यं ॥ भिन्नो-
चिंत्य इत्यादिसोपपत्तिकश्रुतिविरोधादुपजीव्यप्रत्यक्षविरोधाच्च दुर्बलाद्वैतश्रुतीनां गौणाभेद-
परत्वात् ॥ न चोपक्रमादिभिरद्वैत एव तासां श्रुतीनां तात्पर्यावधारणाद्भेदश्रुतिर्व्यावहारिकभेद-
परेति वाच्यं ॥ उपजीव्यप्रत्यक्षादिविरुद्धे तात्पर्यकल्पनाया एवानुत्थानात् गृह्यमाणज्ञानस्य स्व-
तः प्रामाण्याभ्युपगमेन प्रमाणत्वेनैव ग्रहात् प्रथमोपस्थितप्रत्यक्षप्रामाण्यस्वारस्येनागमस्वार-
स्यं बाधित्वा गौणार्थताया एवाद्वैतश्रुतेर्युक्तत्वाच्च ॥ अत एव तत्त्वप्रकाशिकायां तद्गुणसारत्वादित्य

धिकरणे तत्त्वमस्यादिवाक्यानां गौणाभेदपरत्वं व्याख्याय गौणी वृत्तिरमुख्येति चेन्न सत्यं मुख्यार्था
संभवादाश्रीयत इत्याद्युक्तोपजीव्यप्रमाणविरुद्धं चाद्वैतबोधनमित्युक्तं ॥ तत्रेदमुच्यते उपलभ्याप्सु
चेद्गंधं केचिद्ब्रूयुरनैपुणाः ॥ पृथिव्यामेव तं विद्यादपो वायुं च संश्रितमिति वचनविरुद्धस्य सुरभि जलं
सुरभिः पय इत्यादिप्रत्यक्षस्य पार्थिवावयवसंसर्गेणैव रूढो हं स्थूलोहं मनुष्योहं कुणिरहमिति
बहुपुद्दष्टप्रामाण्यक प्रत्यक्षसजातीयस्याहमल्पज्ञोल्पशक्तिमान् अहं कर्ता भोक्ता सुखी दुःखीत्या
दिप्रत्यक्षस्यांतःकरणतादात्म्येन तदुपाधिकधर्मविषयत्वेन याथार्थ्योपपत्तेस्तदनुरोधेन निरस्तसम
स्तदोषाशंकानामुपक्रमोपसंहारैक्यरूप्यादिभिस्तात्पर्यनिर्णायकैर्लिंगैरद्वैत एव गृहीततात्पर्या-
णां तत्त्वमस्यादिवाक्यानां तथाबुध्याद्यांऽतःकरणधर्मा एव तदुपाधिकजीव एव तद्व्यवहारः जीव
स्यासंग एवेत्येवं बोधयतां असंगो ह्ययं पुरुषः असंगो न हि सज्जते कामः संकल्पो विचिकित्सा श्रद्धाऽ
श्रद्धा धृतिरधृतिर्धीर्भीरित्येतत्सर्वं मन एवेत्यसमानः सन्नुभौ लोकावनुसंचरति ध्यायतीव लेलाय
तीव ॥ निर्वाणमय एवायमात्माज्ञानमयोऽमलः ॥ दुःखाज्ञानमला धर्माः प्रकृतेस्ते न चात्मनः ॥ इ
त्यादिश्रुतिस्मृतिवाक्यानां च गौणार्थत्वस्यान्यार्थत्वस्य चायुक्तत्वात् ॥ प्राबल्यमागमस्यैव जात्या
तेषु त्रिषु स्मृतमिति स्मृतेश्च प्रत्यक्षस्यागमापेक्षया दुर्बलत्वाच्च न प्रत्यक्षानुरोधेनागमान्यथानयनं

युक्तं ॥ उपजीव्य मापत्यन्यायेनागमस्य गौणार्थकत्वकल्पनं तु न युक्तं तादृशा सामान्यन्याय स्योप-
जीव्योपजीवकयोरनुपदेशोपदेशत्वे विपरीतं बलाबलमिति विशेषन्यायेन बाधात् ॥ न चात्र योजक-
त्वांशस्य मनुपदेशस्य दुष्टत्वसंभवात् दोषश्चाप्रामाण्यशंकाकलंकितत्वं कुचित्किंचित्प्रभृत्यादि
कं तद्यथा कुंडपायिनामयने श्रुतस्य यो होता सोऽध्वर्युरिति वाक्यस्य विरुद्धार्थकयोर्होत्रध्वर्युशब्दयोः
सामानाधिकरण्यनिर्वाहार्थं प्रथमश्रुतहोतृशब्दानुसारेणाध्वर्युशब्देन लक्षणयोपस्थिते अध्वर्युका-
र्ये होतृविधायकत्वे स्थिते यूपपरिव्याणकरणस्य परिवीरसीति मंत्रस्यान्यत्राध्वर्युप्रयोज्यस्याति-
अत्र वचनेन होत्रा प्रयोगः प्राप्नोति अतिदेशानुसारेण च होतृकार्ये निर्गतेषु युवा सुवासा इति वर्तमान-
तानुवादिमंत्रे होता प्राप्नोति न चोभावपि मंत्रौ होत्रा प्रयोक्तुं शक्यौ परिव्याणसंकल्पमारभ्य तत्समा-
प्तिपर्यंतः कृत्स्नोपि वर्तमानः काल इति तावंतं कालं वर्तमानतानुवादिमंत्रः प्रयोक्तव्यः परिव्याणाव्यव-
हितपूर्वकाले च करणमंत्रः समापनीय इति एककालसमावेशात्तत्रान्यतरबाधेऽवश्यं कर्तव्ये वर्तमा-
नतानुवादिमंत्र बाध एवाश्रितः पूर्वतंत्रेण तत्र होतुरनिदेशः तत्कार्यस्य प्रत्यक्षेण यो होता सोऽध्वर्युरित्य-
नेनोपजीव्यः प्राप्तोभयानुवादेन संबंधमात्रविधानात् होतृप्राप्त्यर्थं होतृकार्यमुपजीव्यं पदार्थानां कार्य-
मुखेनैव विकृतिषु प्राप्तिस्वीकारात् ॥ न चात्र सावकाशनिरवकाशयोर्निरवकाशं बलीय इति न्याय

स्य प्रवृत्तिः वचनस्य परिवीरसीति मंत्रातिरिक्ते आध्वर्यवे साधकत्वात् अनउपजीव्यस्यापि विलंबितप्रवृत्तिकत्वेन शीघ्रप्रवृत्तिकेनोपदेशेन बाध इत्येव स्वीकृतं एवं प्रकृतेपि संभाविताप्रामाण्य कस्य प्रत्यक्षस्योपदेशेन तद्विरुद्धेन बाध एव स्वीकार्यः ॥ यदपि प्रत्यक्षज्ञानप्रामाण्यस्य प्राथम्यं तत्प्राबल्ये प्रयोजकत्वेनाभिहितं तदपि न सत् ॥ तत्रैव प्रथमस्य प्राबल्यं यत्रोत्तरेण तदपेक्ष्यते यथा प्रजापतिर्वरुणायाश्वमनयत् स स्वां देवतामार्च्छत् स पर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत् तन्निरवपत् इत्युपक्रमेणासंजातविरोधिना दातुरिष्टिरिति बोधे सति एकवाक्यतापन्नानां संभूयैकार्थप्रतिपादकत्वमिति स्युः सत्यानमपेक्ष्यमाणस्य यावतोश्वान् प्रतिगृह्णीयात् तावतो वारुणांश्चतुष्कपालान् निर्वपेदिति तदुपसंहारस्य तद्विरोधेन प्रतिगृहीतुरिष्टिरित्येवंरूपार्थबोधकत्वानुपपत्त्या णिजंतार्थनिर्भावेण दातुरिष्टिरित्येवंरूपार्थबोधकत्वमुपेयते अनपेक्ष्यत्वे तु स्वप्रमाणानुसारेण लब्धात्मकस्योत्तरज्ञानस्यैव प्राबल्यं यथा बहिष्पवमानार्थं बहिर्निर्गच्छतामाम्नातान्वारंभाणां कुतश्चित् निमित्तात् विच्छेदे प्रायश्चित्तमाम्नायते यदुद्गाता अपच्छिद्येत अदक्षिणं तं यज्ञं परिसमाप्य पुनर्यजेत तत्र तद् दद्यात् यत्पूर्वस्मिन् दास्यं स्यात् यदि प्रतिहर्ता सर्ववेदसं दद्यात् इति तत्र विरुद्धयोः क्रमेणापच्छेदे कर्तव्यतया प्रसक्तयोः समुच्चयासंभवादन्यतरबाधे अव

श्यंस्वीकर्तव्येपूर्वनैमित्तिकज्ञाना नपेक्षेणास्य प्रमाणप्रासेनोत्तरनैमित्तिककर्तव्यताज्ञानेन पूर्वनैमित्ति
ककर्तव्यतायाएवबाध आश्रितः लोकेपिनेदंरजतमितिज्ञानेन पूर्वस्येदंरजतमितिज्ञानस्यबाधद-
र्शनाच्चोत्तरात्मज्ञानेन प्रत्यक्षप्रामाण्यज्ञानस्यबाधएवासिद्धेबाधेव्यावहारिकप्रामाण्यमुपजीव्यं
तच्चनबाध्यते॥ आगमेनबाध्यतेचतात्त्विकंप्रामाण्यंतच्च नोपजीव्यमितिवक्तुंशक्यत्वाच्चनोपजीव्य
विरोधः अधिकमद्वैतसिद्धितदीयटीकादौप्रत्यक्षबाधोद्धारेद्रष्टव्यं॥ यत्तुममदेहइतिभेदग्रहेसति
अहंमनुष्यइत्याद्यभेदग्रहएवनसंभवतीतितन्नदृष्टांतेनाहंकर्तेत्यादिप्रत्ययानामप्रामाण्यशंकाकलं
कितनयाश्रुतितोदौर्बल्योक्तिरयुक्तैव॥ नचमनुष्योहमित्यभेदभ्रमाभावेकथंसामानाधिकरण्यव्यव
हारःशब्दाभिलापरूपः मनुष्योहमितिव्यवहर्तव्यज्ञानाभावेव्यवहारानुपपत्तेरितिवाच्यं॥ नायंव्य
वहारःसामानाधिकरण्यावगाही किंतुशरीरसंबंधावगाही अर्शआद्यच्संभवात् अचश्चतदस्यास्त्य-
स्मिन्निति मतुबिति विहितमत्वर्थीयतया संबंधवाचकत्वमुपपन्नमेवेतितन्न सम्यक्॥ ममशरीरमि
तिभिन्नरूपेणाभेदग्रहस्य मनुष्योहमितिभिन्नरूपेणाभेदग्रहविरोधित्वाभावस्य पूर्वमेवोक्तत्वात्
मनुष्योहमित्यादावर्शआद्यच्प्रत्ययसंभवेपि अहंगच्छामि अहंकुणिरित्यादौतदसंभवेनतत्रभ्रम-
त्वावश्यकत्वेनदृष्टांतेनाहंकर्तेत्यादिप्रत्ययानामप्रामाण्यशंकाकलंकितत्वोपपत्तेर्मनुष्योहमित्या

दावृत्तिः अस्यार्थः सूत्रस्य पेयलोपापत्तेश्चाधिकमन्यत्रानुसंधेयमिति न सूत्रेण जीवब्रह्मणोर्भेदसि
द्धिः॥ नापि कर्तृत्वाकर्तृत्वाल्पज्ञत्वसर्वज्ञत्वादिविरुद्धधर्माधिकरणत्वादिलिंगकानुमानेन तत्सिद्धिः जीवे
श्वरयोः पक्षयोरीदृक्त्वासिद्धेः कामः संकल्प इत्यादि सर्वं मन एवेत्यंतश्रुत्या मम मनः कामयते इच्छतीत्यादिप्रत्य
क्षेणानुभवेन कामादीनामंतःकरणधर्मत्वसिद्धेर्यत्किंचिद्विषयाकारेणपरिणममानपरिच्छिन्नाल्पांतः
करणोपाधिकत्वेन जीवेऽल्पज्ञत्वकर्तृत्वादिव्यवहारस्येंद्रो मायाभिः पुरुरूप ईयत इत्यादिश्रुत्या ईश्वरस्या
पि मायावशादेव पुरुरूपत्वोक्त्या सर्वविषयाकारेण परिणममानापरिच्छिन्नमायोपाधिकत्वेनैवेश्वरे स
र्वज्ञत्वादिव्यवहारस्य संभवात्॥ एकस्यैव चैतन्ये अंतःकरणमायाद्युपाधिभेदाद्यवच्छेदेन वा सर्वज्ञत्वाल्प
ज्ञत्वादिधर्मस्वीकारसंभवेन तेषां विरोधाभावाच्च॥ न चैवं सति वृक्षे संयोगतदभाववदीदृग्योरिव जीवे सर्वज्ञ
त्वाद्यनुभवोऽपि स्यादिति चेन्न॥ जीवे सतामधिकानंदादीनां जीवाश्रिताऽवरणेन तदननुभवस्याल्पानंदा
द्यनुभवस्य च त्वया पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगादित्यधिकरणे सिद्धांतितत्वेन तन्न्यायेनानाद्यनिर्वच
नीयाविद्यायास्वरूपावरकया जीवे सतामेव सर्वज्ञत्वादीनामननुभवस्याल्पज्ञत्वानुभवस्य चोपपादयितुं
शक्यत्वात्॥ नव्यमते हि तत्त्वप्रकाशिकायामीश्वरे श्रुतिसमन्वयसिध्यर्थं न जीवो ज्ञानानंदादिरूपः अना
नंदादिरूपत्वश्रुतेः तद्रूपेणाननुभवाच्चेति पूर्वपक्षयित्वा सिद्धांतितं। भवत्येवानंदादिरूपो जीवः॥ न चान्त

श्रुतियुक्तिविरोधः ॥ यथा पुरुषयोषिदादीनामपत्योत्पत्तिशक्तिस्वरूपयोग्यत्वेपि कालतस्तदभिव्यक्तेर्ना
यं पूर्वं पुमानिदानीं तु पुमानित्यादि युज्यते एवं जीवस्वरूपत्वेन मुक्तेः पूर्वमपि सतो ज्ञानानंदादेरीश्वरप्रसा
देनाभिव्यक्तिनिमित्तेनानंदी भवतीत्यादिव्यपदेशोपपत्तेः प्रागनभिव्यक्तत्वेनानुभवाभावसंभवात् तदभि
व्यक्त्यर्थं च मुमुक्षूणां प्रयत्नोपपत्तेः ॥ न चावरणानुपपत्तिः ज्ञानाभावातिरिक्ततन्निमित्ताविद्याभ्युपगमा
दिति ॥ सर्वमिदमस्मत्संमतभावरूपानाद्यज्ञानवृत्तावनुवाद एव तदनिर्वाच्यत्वादिकं परं त्वया नेष्य-
ते तच्च साधितं प्राक् प्रमाणप्रदर्शनेन ॥ तत्त्वमस्यहं ब्रह्मास्मीत्याद्यनेकाद्वैतश्रुतिबाधितत्वाच्च नोक्ता
नुमानेन जीवब्रह्मणोर्भेदसिद्धिः ॥ यच्च विरुद्धधर्माधिकरणत्वयुक्तियुक्तत्वेनाभिन्नोऽचिंत्य इति प्रबल
श्रुतेरभेदश्रुतीनां गौणार्थत्वकल्पनं तदपि मंदं ॥ जीवेश्वरयोर्विरुद्धधर्माधिकरणत्वाभावस्योक्तत्वा
त् जीवो ब्रह्माभिन्नः तज्ज्ञाननिवर्त्यतदज्ञानप्रयुक्तकर्तृत्वाद्यध्यासाश्रयत्वादित्यादियुक्तिसाहित्यस्या
द्वैतश्रुतीनां सत्त्वाद्भेदश्रुतेर्बलवत्त्वासिद्धेः ॥ व्यावहारिकभेदपरत्वेन भेदश्रुतेः सावकाशाया निरवकाशा
द्वैतश्रुतितो दुर्बलत्वाच्च ॥ किंच विरुद्धधर्माधिकरणत्वेन जीवेश्वरयोर्भेदसाधनं न त्वया कर्तुं शक्यं पर
स्परानभिमतखांडवदाहप्रग्रामनाभ्यामाराध्यत्वाराधकत्वाभ्यां च विरुद्धगुणाभ्यां युक्तयोरखंडला-
र्जुनयोरंशांशिनोर्निर्भेदत्वस्य एक आत्मनः शरीरे नानादित्यधिकरणे त्वन्मते व्यवस्थापनात् ॥ तत्र चेत्थं

त्वदीयं भाष्यं अंशांशिनोरैकत्वमेवांशांशिकर्मनिर्मितशरीरएवांशस्यभावात् व्यतिरेकस्तु भ्रान्त्या भाविस्वा
भनूपलब्धेश्च ज्ञानादिभेदेऽपि चाभिन्नांशांशिनोः पृथक्भाव एव तदुपासनादिभोगादंशस्य ॥
परमसंहितायां च अंशिनस्तु पृथक् जाता अंशानस्त्वेव कर्मणा ॥ पुनरैक्यं प्रपद्यन्ते नात्र कार्या विचार
णेति ॥ एतेन जीवब्रह्मणोर्भेदाभावे ब्रह्मगतभोगानां जीवेऽप्यनुसंधानं स्यादिति परोक्तं दूषणं निरस्तं ॥
त्वन्मते भेदाभावेऽप्यर्जुनगतेंद्रभोगाननुसंधानवज्जीवगतब्रह्मभोगाननुसंधा नोपपत्तेः ॥ अथेंद्रा
र्जुनादीनां भेदाभावेऽपि भूम्याद्येकदेशावस्थानगर्भप्रवेशमानुषान्नभोगादिकं निमित्तीकृत्याचिंत्या
द्भुतशक्तिकेन परमेश्वरेणार्जुनादिगतेंद्रभोगाननुसंधानं क्रियत इति चेदंतःकरणदेहविशेषोपाधिं
निमित्तीकृत्याचिंत्याद्भुतानिर्वचनीयेशशक्त्या अविद्यामायाभिधया जीवगतब्रह्मभोगाननुसंधानं
क्रियत इत्यपि किं न स्यात् ॥ यत्तु मा भूद्विरुद्धगुणाक्रांतिर्जीवब्रह्मणोर्भेदसाधकोऽन्यायः तयोरन्यत्व
व्यपदेश एव तत्र न्यायः स्फुटश्च दृश्यते हि द्वा सुपर्णा इत्यादि तयोरन्यः पिप्पलं स्वाद्वत्यनश्नन्नन्यो अ-
भिचाकशीति भिन्नोऽचिंत्यः परमो जीवसंघात् पूर्णः परो जीवसंघोऽत्यपूर्णः अन्यश्च परमो राजन् तथा-
न्यः पंचविंशकः भेदव्यपदेशाच्चान्य इत्यादिषु श्रुतिस्मृतिसूत्रेषु तयोर्भेदव्यपदेशादिति तदसत् ॥ द्वासु
पर्णेत्यादौ पूर्वार्धेन तावद्भेदः प्रमेयः अपदार्थत्वात् अवाक्यार्थत्वाच्च प्रत्युतद्वित्वार्थापत्तिसमधिगम्य-

स्यभेदस्यापि श्रौतत्वमेवेति स्वीकारेऽपि द्वौ चंद्रमसावित्यादाविव काल्पिकभेदानुवादेनाप्युपपत्तेरद्वैत
श्रुतिविरोधेन पारमार्थिकभेदपरत्वाभावात्॥ अतएवोत्तरार्धस्यापि न तात्विकभेदपरत्वं॥ वस्तुतस्तु
तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्वमनश्नन्नन्योऽभिचाकशीतीत्यनश्नन्नन्यो पश्यति ज्ञस्तावेतौ सत्वक्षे
त्रज्ञाविति पैंगिरहस्यब्राह्मणे अस्य मंत्रस्य सत्वक्षेत्रज्ञपरतया व्याख्यानान्नास्य मंत्रस्य जीवेशाभे
दपरत्वं॥ सत्वक्षेत्रज्ञौ बुद्धिविभुद्धसाक्षिणौ॥ अथ समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमा
नः॥ जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक इत्युत्तरमंत्रे जीवेशयोः प्रतिपाद्यमानत-
यानंदैकरूपायास्यापि जीवेश्वरपरत्वे योचिता॥ ननु दस्ति पृथिव्यां यावद्विदेवेषु वा पुनः॥ सत्वं प्रकृतिजै
र्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैरित्यत्र देवेष्विति पदसमभिव्याहारे सत्वपदस्य जीवपरतायाः॥ यस्त्वात्मनः
कारयितारं क्षेत्रज्ञं प्रचक्षते इत्यादौ क्षेत्रज्ञपदस्य परमात्मपरतायाश्च प्रसिद्धत्वादिति चेन्न॥ तावेतौ सत्व
क्षेत्रज्ञावित्युक्त्वा तदेतत् सत्वं येन स्वप्नं पश्यत्यथ योऽयं शारीर उपद्रष्टा स क्षेत्रज्ञस्तावेतौ सत्वक्षेत्रज्ञाविति
सत्वक्षेत्रज्ञपदयोः श्रुत्यैव बुद्धिजीवपरतया व्याख्याततया न तयोर्जीवेशपरत्वकल्पनासंभवात्॥ मनस्तु
यया बुद्धिरिति स्थाने मनसः सत्वमुत्तमामित्यन्यत्र दर्शनात् बुध्यापि सत्वशब्दः प्रसिद्धः प्रधानक्षेत्रज्ञप
तिर्गुणेश इत्यादिषु क्षेत्रज्ञपदं जीवेपि प्रसिद्धमिति नाप्रसिद्धार्थकल्पनं॥ ननु येन स्वप्नं पश्यति तत्सत्व

मित्यत्र येनेतीत्थंभावे तृतीया तथाच यदुपहितपरमात्मा स्वप्नं पश्यतीत्यर्थे जीवोपहितपरमात्मनः स्वप्नदर्शनोपाधिभूतो जीव एव सत्त्वशब्देनोच्यते ॥ अथ योयमित्यत्रापि शारीरपदेन परमात्मैवोच्यते इति वाच्यं ॥ येनेत्यस्य करणार्थत्वेन कारकविभक्तित्वसंभवे इत्थंभावार्थकोपपदविभक्तित्वस्यान्याय्यत्वात् ॥ उपपदविभक्तेः कारकविभक्तिर्बलीयसीति नियमात् यः स्वप्नं पश्यतीति ऋजुनिर्देशेनैव जीवलाभे येनेति निर्देशस्य निरर्थकक्लिष्टकल्पनापत्तेश्च शारीरपदस्य च शारीरश्चोभयेपि हि भेदेनैनमधीयते अनुपपत्तेस्तु न शारीर इति सूत्रे यो जीव एव स्फुमसिद्धेः सति प्रमाणांतरे कथंचित्परमात्मपरत्वस्य कल्पयितुमशक्यत्वात् ॥ ननु समाने वृक्षे पुरुषो निमग्न इत्युत्तरमंत्रे जुष्टं यदा पश्यत्यन्यमीशमिति जीवान्येशज्ञानस्य मोक्षहेतुत्वोक्त्या जीवेशपरत्वावगमात्तदेकरूप्याय तथा कल्पनमित्यपि भ्रमितव्यं ॥ जुष्टं यदा पश्यत्यन्यमीशमिति वाक्ये कस्मादन्यमित्याकांक्षायां शारीरादन्यं स्वात्मानं पश्यतीत्यर्थ एव प्रकृतोपयुक्तो विवक्षितः न स्वस्मादन्यमीशं पश्यतीत्यर्थः कुत इति चेत्समाने वृक्षे पुरुषो निमग्न इति पूर्वार्धे निमग्नपदेन शोकहेतुतया शारीरतादात्म्यस्योक्तत्वेन इह वीतशोकताहेतुतया प्रतिपाद्यमानस्य दर्शनस्य शोकहेतुदर्शनविरोधिन एव वक्तव्यत्वात् देहतादात्म्यभ्रमेण देहान्यताज्ञानमेव विरोधि ॥ यदि तु अन्यमीशमित्यत्र स्वस्मादन्यं परमेश्वरं पश्यतीत्यर्थो विवक्षितः स्यात्त

दापूर्वार्धे देहनिमग्नत्वादिप्रतिपादनं व्यर्थमेव स्यात् उत्तरार्धस्य चानुपयोगश्च स्यात् नहि स्वाभिन्ने-
श्वरज्ञानं विशोकताहेतुरित्यत्र देहतादात्म्यभ्रमः शोकहेतुरिति प्रतिपादनमुपयोगीति समंजसं के-
नापि वक्तुं देहभिन्नात्मज्ञानं विशोकहेतुरित्यभ्युपगमे तु उपपन्नतया पूर्वार्धमुपयुज्यते यतो देहात्मत्व-
भ्रमः शोकहेतुरतो न हि रोधि देहाद्विविक्तात्मज्ञानं विशोकहेतुरिति ॥ केचित्तु अद्वैतश्रुतिविरोधेन द्वा सु-
पर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ॥ तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीती-
त्यादिश्रुतीनां अत्तृत्वादिना लोकप्रमासिद्धेश्वरभिन्नजीवानुवादेनात्तृत्वाभाववद्ब्रह्मरूपताविधा-
यकत्वेन न भेदपरत्वं दृश्यते हि वस्तुनो मेरुं प्रदक्षिणीकुर्वन्नपि सूर्यः समुद्रतीरवासिनां समुद्रादुदेतीति प्र-
त्ययात् तादृशलोकसिद्धभ्रमानुवादकत्वं ॥ य उदगान्महतोऽर्णवाद्विभ्राजमानः सरिरस्य मध्यात् ॥ स मा
वृषभो लोहिताक्षः सूर्यो विपश्चिन्मनसा पुनातु ॥ नेक्षेतोद्यंतमादित्यं नास्तं यंतं कदाचन ॥ नोपरक्तं न वारिस्थं
न मध्यं नभसो गतमित्यादिश्रुतिस्मृतीनां ॥ न च भेदश्रुतिविरोधादद्वैतश्रुतिरेवान्यपरा परोपदर्शितगौ-
णाभेदपरा किं न स्यादिति वाच्यं ॥ भेदश्रुतेः प्रत्यक्षसिद्धभेदानुवादकत्वेन हीनबलत्वात् अभेदानुरोधेने-
व दुर्बलस्य नेयत्वात् ॥ न चेशानुयोगिकजीवभेदस्य प्रत्यक्षेणाग्रहणान्नानुवादकत्वमिति वाच्यं ॥ जीवे ई-
शभेदस्य प्रत्यक्षसिद्धतया तदन्यथानुपपत्तिसिद्धेशानुयोगिकजीवभेदस्यापि प्रत्यक्षसिद्धतुल्यकक्षत-

थाज्ञातज्ञापकत्वलक्षणानुवादत्वोपपत्तेरनेन प्रत्यक्षस्याप्रामाण्यान्नतादृशभेदानुवादकत्वंश्रुतेरिति
निरस्तं ॥ अनुवादकत्वाभावेपिव्यावहारिकभेदपरत्वेन श्रुतेर्नाभेदविरोधित्वं प्रतीयमानार्थेचाभेदश्रु
तिविरोधेनभेदश्रुतेरप्रामाण्यस्यार्थवादवाक्यवदिष्टत्वादितिवदंति ॥ किंचान्यत्वव्यपदेशः ऽअभेदवि
रोधीतित्वयानवक्तुंशक्यं प्राणमयादिषु अन्योंतरआत्मेत्यादावन्यत्वव्यपदेशोपि प्राणमयादीनांब्रह्माभेद
स्यान्नमयादीनांपंचानामपिब्रह्मत्वमितिवदतात्पर्यविषयत्वात् ॥ अनन्योन्यशब्देन तथैकोबहुरूप
वान् ॥ प्रोच्यते भगवान् विष्णुरैश्वर्यात्पुरुषोत्तम इतिवचनेननन्निर्वाहस्यत्वयाकृतत्वात् तन्न्यायेनजी
वेशावाभासेन करोति मायाचाविद्याचस्वयमेव भवतीतिश्रुत्यनुसारेण मायाविद्याकृतजीवेशयोर्भेदमा
दाय जीवब्रह्मान्यत्वव्यपदेशोपितयोःस्वरूपाभेदबाधकाभावात् ॥ नहिब्रह्मणिब्रह्मान्यत्वव्यपदेशात्
जीवेब्रह्मान्यत्वव्यपदेशो विशेषः कश्चित्प्रपंचः येनसएवाभेदविरोधीसन्नेतिवक्तुंशक्येतउपपत्तेर्निरू
पितत्वाच्चेतिदिक् ॥ व्याचिख्यासितस्यवेदांतमीमांसाशास्त्रस्येदमादिमंसूत्रं ॥ अथातोब्रह्मजिज्ञासेति
॥ तत्रायमाहुः वेदांतमीमांसाशास्त्रंनारंभणीयंपूर्वोक्तरीत्याविषयप्रयोजनयोःसंभवेपिप्रमाणाभावे
नाधिकार्यभावादित्याशंकानिराकरणाय नित्यानित्यवस्तुविवेकभोगमात्रविरागशमदमोपरमतिति
क्षासमाधानानंतरंतदर्थः तथाचतद्यथेहकर्मचितोलोकः क्षीयते एवमेवास्यपुण्यचितोलोकःक्षीय

ते ॥ नास्त्यकृतः कृतेन ब्राह्मणो निर्वेदमायात् शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्ये वा
त्मानं पश्येत् तरति शोकमात्मविदित्यादिश्रुतिप्रमाणको विवेकादिमानधिकारी आनंतर्यप्रतियोगित
या विवेकादिप्रतिपादकाथशब्देन सूचित इति नोक्तशंकावसरः ॥ यद्यपि तद्विजिज्ञासस्वेत्यादिविचा
रविधायकविधिसमभिव्याहृतोक्तवाक्यैरेव तादृशाधिकारिविषयप्रयोजनादीनां ज्ञातुं शक्यत्वाद्व्यर्थ
मिदं सूत्रमिति शंकासंभवति तथापि तादृशाधिकार्यादिश्रुतीनां स्वार्थनिर्णायकसूत्राभावे किं विवेकादिमा
नधिकारी उतान्यः वेदांताः किं पूर्वतंत्रेण गतार्था उतागतार्थाः मुक्तिः किं स्वर्गादिलोकप्राप्तिरुताहो तानंदात्म-
स्वरूपस्थितिरिति वादिविप्रतिसमुद्भूतशंकानामापाततस्तादृशश्रुत्यर्थज्ञानेनानिवृत्तेस्तन्निर्णाय-
कन्यायप्रदर्शनात्मकैतत्सूत्रारंभोऽवश्यकः ॥ एतेन मंगलानंतरारंभप्रश्नकार्त्स्न्येष्वथोऽथेति बहु
ष्वर्थेष्वनुशिष्टस्याथशब्दस्यानंतर्यार्थकत्वमेव कुत इति शंकानवकाशः ॥ अर्थांतराणां च प्रकृतेऽनुप
युक्तत्वं श्रीमद्भाष्यकारचरणैर्दर्शितं तदिह परोक्तदोषोद्धारायानूद्यते ॥ तत्राथशब्द आनंतर्यार्थः परि
गृह्यते नाधिकारार्थः ब्रह्मजिज्ञासाया अनधिकार्यत्वादिति भाष्यं ॥ यद्यपि जिज्ञासाशब्दावयवार्थज्ञा
नेच्छाया आद्यकृतिविषयत्वरूपारभ्यत्वासंभवेऽपि विवरणरीत्या जिज्ञासाशब्दस्य विचारलक्षण-
कत्वेन तल्लक्षितविचारस्यारभ्यत्वं संभवत्येव शास्त्रस्य स्वरूपप्रमाणसाधनफलान्यतममुखेन विचा

रस्यापि प्रत्यधिकरणं क्रियमाणत्वात् ॥ न चारंभाप्रतिपादनेपि आरंभादेव तज्ज्ञानसंभवात्तद-
र्थकपदानर्थक्यं शंक्यं ॥ त्वामस्मि वच्मि विदुषां समवायोत्र तिष्ठति अर्हंते संप्रवक्ष्यामि इत्यादौ
अहमस्मि वच्मि इत्यादेरानर्थक्यपरिहाराय प्राप्तोपदेशरूपतया परिणमदुच्यमानार्थस्यावश्यंक-
र्तव्यत्वप्रयुक्ततया तत्प्रयोगोर्थवानित्यालंकारिकोक्तरीत्यारंभप्रतिपादनमारंभोपरक्ताधि-
कार्यादिकमभिव्यनक्तीत्यर्थवदेव तदिति शंकासंभवति ॥ तथाप्युक्तरीत्या आनंतर्यार्थकत्वे-
अधिकारिविशेषलाभसंभवे अधिकारिसामान्यबोधने असारस्यात् तथा च विचारस्य प्रयोजना-
धिकारिविशेषानवगतौ अनधिकार्यत्वात् प्रेक्षावदनुपादेयत्वादितीत्युक्तभाष्यार्थः एवंचारभ्यत्वे-
न तदभिधानेपि विचारप्रयोजनाधिकारिविशेषादेरन्यस्मात् सौत्रपदादलाभेन तेषांचावश्यंव-
क्तव्यत्वेनाथशब्दस्याधिकारिविशेषप्रतिपत्त्युपयोग्यानंतर्यार्थकत्वमेव युक्तमिति भाष्यता-
त्पर्यं ॥ यत्तु चंद्रिकायामुक्तविवरणरीत्या अधिकारिविशेषसहिशेषणप्रयोजनलाभाया-
थशब्दस्यानंतर्यार्थकतामनूद्य न तावत् विचारविधौ त्वत्पक्षे मुमुक्षुरधिकारी मोक्षश्च फल-
मिति युक्तं ॥ विचारो मोक्षसाधनतया न प्राप्तः इति लिङ्धेरपूर्वविधित्वापातात् ॥ मुमुक्षो-
रपि ज्ञानकामनां विना विचारे प्रवृत्त्यसंभवेनेति वक्ष्यमाणरीत्या ज्ञानकामनानुपपत्तेश्च नापि विचा-

रे अप्रवृत्तेस्त्वन्यतेन च वक्ष्यमाणरीत्या ज्ञानकामनानुपपत्तेश्च नापि विचारविधौ ज्ञानकामोऽधिकारी ज्ञानं
च फलमिति युक्तम् अध्ययनविधेर्ज्ञानकामनाधिकारं निषेधतात्त्वया अज्ञाते ज्ञाने कामनाया अयोगात् ज्ञा-
ते ज्ञाने च तदवच्छेदकविषयस्यापि ज्ञातत्वेन पुनस्तज्ज्ञानकामनाया अयोगादिति युक्त्या ज्ञानकामना-
निषेधादिति दूषणमुक्तं तदेतत् पूर्वापरविवरणग्रंथमनालोच्य तां प्रतारणामात्रं तद्ग्रंथतात्पर्यानवबो-
धनिबंधनं चेति न विघ्नः॥ तथाहि पूर्वापरविवरणग्रंथः अथशब्दार्थविचारे अथशब्दस्यानंतर्यार्थकत्वे-
ऽनेन साधनसंपन्नोऽधिकारी न लभ्यते तत्समर्पकाभावादित्यभिधाय वेदाध्ययनविधौ योऽधिकारी स एव-
विधिना स्वफलार्थबोधायाक्षिप्ते विचारेऽपि भविष्यतीत्याशंक्य अर्थबोधो यदि अध्ययनविधिभाव्यो भवे-
त्तदैव विचारस्याध्ययनविधिप्रयुक्तत्वं भवेदित्यध्ययनविधौ योऽधिकारी स एव विचारेऽपि स्यात् तदेव न
अर्थावबोधस्याध्ययनविधिभाव्यवेदजन्यत्वादित्याद्यभिधायाध्ययने दृष्टफलार्थावबोधकाम एवाधि-
कारीति शंकानिराकरणायार्थज्ञानाभावेन धर्मिके इष्टसाधनताज्ञानाभावेनेच्छाया अनुदयेन तदिच्छाया
उद्देश्यविशेषणत्वासंभव उक्तोक्तं ॥ उपदेशादेवाग्निहोत्रादिवाक्यार्थविशेषाः प्रतिपत्तव्या इति चेत्त-
र्हि वाक्यार्थविशेषज्ञानानां सिद्धत्वान्न तत्र कामनासंभवेत् ॥ अथोपदेशिकज्ञानस्याप्रमाणत्वात्तत्प्रमा-
णत्वज्ञानं काम्यत इति चेत् अप्रामाण्ये निश्चिते तत्र तन्निर्णयकामनायोगात् अर्थस्य विभ्रममात्रत्वा

दोपदेशिकस्य संदिग्धप्रामाण्ये तत्प्रामाण्यविचारस्यैवावसरो नाध्ययनस्येति विवरणग्रंथः ॥ तत्र हि
अर्थज्ञानमुद्दिश्याध्ययनं न विधातुं शक्यं अग्निहोत्रादिविशेषार्थनिर्णयं विना तत्कामनायोगात् तत्-
न्निर्णयस्य वृत्तत्वेन च न तस्योद्देश्यतासिद्धत्वात् ॥ जातेपि निर्णये तत्प्रामाण्यसंदेहात् तद्व्युदासाया
ध्ययनविधिरित्यपि वक्तुमशक्यं ॥ विचारैकसाध्यायाः प्रामाण्यसंशयनिवृत्तेरप्रामाण्यज्ञानानास्कंदि
तनिर्णयस्य वा अध्ययनमात्रासाध्यतया तदुद्देशेन तद्विधानायोगादिति रीत्या ज्ञानकामनाधिकां
रित्वमध्ययनविधेर्निराकृतमिति गम्यते ॥ न चैतावता परोक्षज्ञानकामनामात्रं निषिद्धं विचारसा-
ध्याप्रामाण्यशंकाद्यभावविशिष्टत्वेन तत्कामनाया बाधेनापि सूपपादत्वात् ॥ विवरण एव जिज्ञासा
पदार्थविचारे तन्निश्चयमनिषध्ये वस्तुनि ज्ञानमिष्यमाणं संदिग्धे निश्चयफलं वा परोक्षेऽपरोक्षफलं वे-
ष्यते तत्रोभयं प्रमाणादिविचारप्रयत्नसाध्यमित्यादिना परोक्षज्ञानेपि कामनायाः स्पष्टमभिधानाद्युक्तमे
व विचारविधेर्मुमुक्ष्वधिकारिकत्वं विवरणमते ॥ यदपि चंद्रिकायां परोक्षज्ञाने कामनाया अयोगेपि
परोक्षेण प्रतिबंध्यापरोक्षेण वा ज्ञानेन ज्ञानप्रम्हावच्छिन्नेऽपरोक्षज्ञाने प्रतिबंध्यापरोक्षज्ञाने वा काम
नाविचारविध्यधिकारिविशेषणमस्त्वित्याशंक्येच्छाया अपरोक्षत्वात् तदवच्छेदकज्ञानावच्छेदकवि
षयस्याप्यपरोक्षत्वादिच्छासमकालवर्त्यपरोक्षज्ञानस्य विचारसाध्यत्वानुपपत्तिरिति दूषणमु-

कं ॥ तदपि न सम्यक् ॥ अपरोक्षेच्छावच्छेदकज्ञानावच्छेदकविषयस्यापरोक्षत्वे अपरोक्षेच्छावच्छे-
दकज्ञानावच्छेदकतया धर्मादीनामप्यपरोक्षत्वापत्तेस्तथानियमाभावात् ॥ अविद्यानिवर्तकतावच्छे-
दकशक्तिविशेषविशिष्टत्वेन तादृशशक्तेरसिद्धतया तद्विशिष्टज्ञानस्य प्रागसिद्धतया तज्ज्ञा-
ने कामनायां बाधकाभावाच्च ॥ एतेन श्रवणसाध्यस्य परोक्षज्ञानस्य प्रतिबन्धापरोक्षज्ञानस्य वा श्र-
वणात्प्रागसिद्धत्वेन तदधीनाया अपरोक्षज्ञानादौ कामनाया श्रवणविध्यधिकारिविशेषणत्वायो-
गः ॥ न च कामनाहेतुपरोक्षज्ञानादिकं श्रवणात्प्रागापातप्रतीतिदशायामेव सिद्धमिति वाच्यं ॥ त-
स्यां दशायां निश्चयरूपस्य तस्यासंभवात् ॥ नहि वेदांतवेद्यं सर्वं परोक्षज्ञानादिना निश्चित्यापरोक्ष-
ज्ञानार्थं प्रवर्तते संदेहरूपस्य च तस्य तस्यां दशायां सत्वेपि संदेहेन ज्ञातब्रह्मावच्छिन्नपरोक्षनिश्च-
य एव कामनोपपत्तिः ॥ निश्चितेनिश्चयकामनाया अदर्शनेन तस्यां निश्चयविषयकसंदेहस्यैव तत्र
हेतुत्वादिति चंद्रिकोक्तं दूषणं परास्तं ॥ निश्चितेपि निरुक्तशक्त्यादिविशिष्टत्वेन निश्चयकामना-
यां बाधकाभावात् ॥ परोक्षनिश्चयसामान्यकामनापि नास्मन्मते प्रतिपित्स्येत्युक्तं प्राक् ॥ श्रवणप्रयो-
जककामनायां श्रवणसाध्यस्य विषयत्वेपि हेतुत्वाभावेन तत्सत्त्वाबाधः प्रागनपेक्षणात्तादृशज्ञानज्ञा-
नस्यापेक्षितत्वेपि तमेव विदित्वातिमृत्युमेति तरति शोकमात्मवित् ब्रह्मविदाप्नोति परमित्यादि

धार्म्यधर्म्यज्ञानस्य मोक्षकारणत्वप्रतिपादकैस्तत्वानि पनिरूपयद्यत एवेति न किंचिदपि दूषणं ॥ यदपि चंद्रिकायां किंच संदिग्धस्थाणुत्वादिविशेषापरोक्षज्ञानकामना तद्विशेषधीपूर्विका स्यादिति दूषणमुक्तं तदसदेव ॥ यादृशविषयविशेषितज्ञाने कामना तादृशविषयज्ञानस्य प्रागपेक्षितत्वोपगमात् स्थाणुविषयकमत्संशयो मा भूयादितीच्छायां च स्थाणुत्वप्रकारकज्ञानापेक्षास्त्येव स्थाणुत्वविशिष्टेदमर्थविषयकमत्संशयो मा भूयादितीच्छायामपि तज्ज्ञानं संशयसाधारणमपेक्षितमेव ॥ अथैवमग्निहोत्रादिविषयकसंशयवतां तन्निश्चयकामनोपपत्तौ तन्निराकरणविवरणकर्तुरसंगतं स्यादिति चेन्न ॥ औपदेशिकज्ञानं शाब्दत्वान्न संशयरूपं एवं विशेषणतावच्छेदककोट्यंशे संशयात्मकज्ञानमनुभवविरुद्धमिति मते इदमर्थस्थाणुत्वसंशयदशायां स्थाणुत्वेन रूपेणेदमर्थस्य ज्ञाने विशेषणत्वं न संभवतीति तद्धेतोर्विशेषणतावच्छेदकप्रकारकविशेषणवत्तानिश्चयस्याभावादिति तादृशकामनानिर्वाहाय तादृशनिश्चयात्मकज्ञानमेवावश्यमभ्युपेयं तादृशनिश्चयाभावे तादृशकामनापि नास्तीति मतविशेषाभिप्रायेणैवाग्निहोत्रादिज्ञानकामनानिराकरणात् ॥ यदपि चंद्रिकायां परोक्षज्ञाने कामनानंगीकारे धर्मविचारे प्रवृत्तिर्न स्यादिति दूषणमुक्तं ॥ तदपि उक्तप्रकारेण निश्चयकामनया संशयनिवृत्तिकामनया संजातनिश्चयज्ञाने अप्रामाण्यशंकानिवृत्तिकामनया वा धर्मविचारे प्रवृत्तिसंभवान्निरस्तमेवेति विचारविधेर्ज्ञानकामनाधिकारि

कत्वमुपपन्नतरमेवेति संक्षेपः ॥ यदपि चंद्रिकायां विचारविधौ न्यत्वसे मुमुक्षुरधिकारी मोक्षश्च फल-
मिति न युक्तं विचारस्य मोक्षहेतुतया प्रमाणत्वेन तद्द्वारेण श्रवणाविध्यभ्युपगमे अपूर्वविधित्वापाता
दिति दूषणमुक्तं तदपि विवरणप्रायानवबोधनिबंधनं ॥ विचारविधेर्मोक्षफलकत्वं नाम हि वेधेर्नियमविधि
त्वं च वर्णयतो विवरणकारस्य ब्रह्मसाक्षात्कारद्वारेण मोक्षस्य श्रवणरूपविचारफलकत्वस्याभिप्रेत-
त्वात् ब्रह्मसाक्षात्कारे श्रवणस्य हेतुत्वं च श्रोतव्यार्थसाक्षात्कारे शास्त्रविचारात्मकश्रवणस्य हेतुतायाः
षड्जादिसाक्षात्कारहेतुगांधर्वशास्त्रश्रवणादौ सिद्धत्वादेव सिद्धमिति नापूर्वविधित्वप्रसंगः ॥ न च
श्रोतव्यार्थसाक्षात्कारे श्रवणस्य हेतुत्वमिति न नियमः संभवति धर्मशास्त्रश्रवणे व्यभिचारादिति वाच्यं
॥ विचार्यमाणापरोक्षयोग्यार्थसाक्षात्कारे तादृशार्थकशास्त्रविचारात्मकश्रवणत्वेन हेतुत्वमिति नि
यमस्याबाधितत्वात् ॥ कार्यादिशि विचार्यमाणेति विशेषणाद्विचारं विनापि योगांजनादिनोत्पन्नस्वर्ग
निध्यादिसाक्षात्कारे न व्यभिचारः ॥ अथैवमपूर्वविधित्वाभावेपि नियमविधित्वमनुपपन्नमेव पाक्षिका
प्राप्तौ प्रमाणांशापूरणफलकविधेरेव नियमविधित्वात् पाक्षिकाप्राप्तिश्च साधनांतरप्राप्तौ स्यात् स्वा
त्मज्ञाने साधनांतरप्राप्तिः सुवचा रूपादिरहिते निर्विशेषे चात्मनि प्रत्यक्षानुमानादेः प्रमाणांतरस्याप्रसे
रिति चेदत्र केचित् ॥ यथा पूर्वीयव्रीहिविशेषेषु नखविदलनादेरप्राप्तावपि व्रीहिसामान्ये तत्प्राप्त्याय

याव्रीहीनवहंतीतिनियमविधिः तथानिर्विशेषात्मज्ञानेसाधनांतराप्राप्त्यापिसविशेषेप्रवृत्तप्र-
माणस्यशुद्धमपिविषयइतिसविशेषनिर्विशेषानुस्यूते आत्मनिसामान्यतस्तस्याप्राप्त्यानियमवि-
धिःस्वरूपवच एव॥ नचव्रीहीनवहंतीत्यत्रव्रीहिपदमपूर्वीयद्रव्यपरंनतुव्रीहिमात्रपरंतथासतियवेषुअ
वघातऔपदेशिकोनस्यात् अतिदेशेननीवारेषुअवघातसिद्धिश्चनस्यात् साहियेनयेनदर्शाद्यपूर्वसा
धनद्रव्यमुपकृतंतेनतेनापिकृत्यपूर्वसाधनमुपकुर्यादित्यतिदेशेन वक्तव्याव्रीहित्वेनद्रव्येविशेषितेसा
नस्यादितिनवमे सिद्धांतितंतथाचापूर्वीयद्रव्यएवविदलनादिप्राप्तेर्वक्तव्यत्वात्व्रीहिसामान्येतस्या
प्राप्त्यानियमविधिरितिनयुक्तमितिवाच्यं॥ नियम्यमानावघातस्यापूर्वीयद्रव्यमात्रविषयत्वेपिसामान्य
विषयकप्राप्त्यैवनियमोपपत्तौविशेषप्राप्तेरनपेक्षणात् सजातीयप्राप्त्यापियदासजातीयांतरैर्नियमःतदा
किमुवक्तव्यमेकस्मिन्नेवात्मनिअवस्थाविशेषेणमानांतरप्राप्त्याविशेषांतरेनियमविधिरित्यधिक
महेत्तसिद्ध्यादौद्रष्टव्यमित्याहुः॥ परेतुयथामंत्रार्थज्ञानस्यकल्पसूत्रात्मीयसंग्रहवाक्यादिनापिप्रा
प्तत्वेनपक्षेप्राप्तमंत्रजन्यत्वंनियम्यतेमंत्रैरेवमंत्रार्थस्मृतिरितितद्वन्मोक्षहेतुतयाभिमतब्रह्मसा
क्षात्कारस्यवेदांतमूलकस्त्रीशूद्रादिसाधारणस्मृतिपुराणादिनाप्राकृतभाषादिनिर्मितग्रंथादिनाच
प्राप्त्यापक्षेप्राप्तवेदांतश्रवणंनियम्यतेवेदांतश्रवणेनैवात्मज्ञानंसंपादयेदितितस्माद्ब्राह्मणोनावे

दिकमधीयन इति श्रुतेः श्रोतव्यः श्रुतिवाक्येभ्य इति स्मृतेश्च ॥ अथैवमितिहासपुराणाभ्यां वेदं समुप
बृंहयेदिति स्मृतिविरोधः अविचारितैर्नैतिहासादिना तदुपबृंहणायोगादिति चेन्न ॥ आपातप्रतीत
विरोधेन वेदांतवाक्यानां तात्पर्यसंशये तात्पर्यनिर्णायैतिहासादिविचारस्यापेक्षायामपि ब्रह्मज्ञाने
तदपेक्षाविरहात् अत एव वेदं समुपबृंहयेदित्येवोक्तं न तु वेदार्थं जानीयादिति वदंति ॥ एतेन भामति-
रीत्या जिज्ञासाशब्दस्येच्छावाचकत्वेपि आर्थिकार्थेन विचारेणाध्याहृतस्य कर्तव्यपदस्यैव श्रुतस्याधि
कारार्थकाथशब्दस्यान्वयोस्तु ॥ यथोक्तं कल्पतरौ आर्थिके चास्मिन्नर्थे कर्तव्यपदाध्याहार इति ॥ नचा
र्थिकेनाध्याहृतस्यैवान्वयो न तु श्रुतस्येत्यत्र किंचिन्नियामकमस्ति सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम
इत्यादौ द्रव्यदेवतासंबंधेनाक्षिप्तेन यागेन यदाग्नेयोष्टाकपालो भवतीत्यादौ भवनाक्षिप्तभावनया च वि-
धिप्रत्ययान्वयदर्शनादिति चंद्रिकोक्तं दूषणं परास्तं ॥ न थासत्यधिकारिविशेषाप्रतीतेः नापि मंगला
र्थः मंगलस्य वाक्यार्थे समन्वयाभावादिति भाष्यं ॥ तत्र पदार्थ एव वाक्यार्थे समन्वीयते न चेह मंगलमथ-
शब्दस्य शक्यं लक्ष्यं वा किंतु मृदंगध्वनिवदथशब्दकार्यमिति निबंधग्रंथः ॥ यत्तु चंद्रिकायां मंगलस्याथ
शब्दार्थत्वाभावे तस्य वाक्यार्थे समन्वयाभावस्य हेतूकृतत्वान्नाथशब्दार्थत्वाभावस्य हेतुत्वोक्तौ अन्यो
न्याश्रय इति निबंधरीत्या व्याख्याने दूषणमुक्तं तदसत् ॥ प्राथमिकस्याथशब्दार्थत्वाभावस्य तत्तात्पर्यगो-

परत्वाभावरूपतया अन्योन्याश्रयताविरहात् अन्यथा प्रकृताथशब्दस्यारंभ परत्वाभावेपि नद्वाचक-
तायादुरुपन्हवत यानाधिकारार्थइत्यादेरप्युभयसंमतस्यासंगतत्वापातात् ॥ वाक्यार्थेसमन्वयाभा-
वादित्यस्याधुनिकलक्षणाग्रहाधजन्याथशब्दघटितवाक्यजन्यबोधविषयत्वाभावादित्यर्थइतिनशं-
कांतरावकाशः ॥ इदंचमंगलानंतरेत्यादिकोशस्यमंगलार्थकत्वांशेनप्रामाण्यंमूलाभावात् तस्यान्यां-
गलिकाशुभाश्रितत्वप्रमंगलप्रयोजनकतायाएवोक्तत्वादित्यभ्युपेत्य ॥ उक्तंचपरेणापि अस्माभि-
रप्यानंतर्याभिधेयोऽथशब्दः श्रुत्यामंगलप्रयोजनइत्यंगीकारादिति ॥ अथेत्यनेनमंगल-
स्याप्रतीतेरितिच ॥ विप्रणेतुकोशस्यअमूलत्वेपिनक्षतिः वाक्यार्थेसमन्वयस्तुकर्त्रादिभावेनवैयधि-
करण्येनजिज्ञासान्वयस्यबाधितत्वात्ब्रह्मजिज्ञासामंगलमितिसामानाधिकरण्येनतदन्वयेनिर-
र्थकस्तुत्यनुवादत्वापत्तेश्चनोपपद्यतेइत्युक्तं ॥ यत्तुचंद्रिकायांस धूमोगिरिःसाग्निकइतिवत् ईक्ष-
तेर्नाशब्दमित्यत्रत्वत्पक्षेअशब्दमितिवच्चमंगलत्वात्कर्तव्येतिहेतुत्वेनान्वयोपपत्तेरितिब्रह्मजिज्ञा-
सामंगलमितिसामानाधिकरण्येनान्वयेननिरर्थकानुवादत्वमितिदूषणमुक्तंतदप्यसत् ॥ श्रेयः-
साधनतामात्ररूपस्यान्यस्यवापदार्थांतरसाधारणस्यमंगलत्वस्यहेतुत्वेनसर्वणोविरक्तमुमुक्षु-
कर्तव्यतारूपप्रकृतसाध्यान्वयानुपपत्तेः नहिवह्निमत्वात्पर्वतोधूमवानितिवाक्यंप्रमाणंएतत्त्व-

हेतुत्वस्य विवेचकानां स्पष्टमेव ॥ श्रेयोविशेषसाधनत्वं तु न मंगलत्वं सर्वमंगलसाधारण्याभावात् ज्ञाना
दिरूपश्रेयोविशेषसाधने कर्तव्यत्वान्वयबाधाच्च ॥ एवं कस्यचित् मुमुक्षुरप्रस्तुतत्वात् ब्रह्मजिज्ञासाक
र्तृत्वेनाभिप्रतिपादनस्यानुपयुक्तत्वात् ॥ तथा सत्यवश्यापेक्षिताधिकारिविशेषाप्रतीतेश्च न प्रश्नका
र्त्स्न्ययोरथशब्दार्थत्वं ॥ प्रकृतापेक्षायाश्च फलत आनन्तर्याव्यतिरेकादिति भाष्यं तदित्यमवतार्यं ॥ न
न्वथैष ज्योतिरेतेन सहस्रदक्षिणेन यजेतेत्यत्र प्रकृतज्योतिष्टोमानुवादेन सहस्रदक्षिणारूपगुण ए
व विधीयते न तु कर्मान्तरविधानमिति पूर्वपक्षोपपादकत्वेन पूर्वप्रकृतापेक्षत्वमथशब्दस्य वार्तिक
कृतोक्तं न तद्वत् प्रकृतेऽपि किं न स्यादत आह पूर्वप्रकृतापेक्षायाश्चेति ॥ उक्तपूर्वपक्षे आनन्तर्यार्थक
त्वमेवाथशब्दस्याभिमतं आनन्तर्यं हि पूर्वप्रकृतापेक्षं गुणविधिपरत्वे चाश्रयदानार्थमस्ति ज्यो-
तिष्टोमापेक्षा न कर्मान्तरत्वे ॥ न हि क्रतुः क्रत्वन्तरमपेक्षत इति वार्तिककारीयपूर्वप्रकृतापेक्षोक्तेरा
नन्तर्य एव पर्यवसानादिति तदर्थः ॥ यद्वा अथशब्दः आनन्तर्यपूर्वप्रकृतापेक्षाधिकाराणामेकं सर्वा-
न्वयि विवक्षित्वा प्रयुज्यते धर्मानुक्रमभेदलक्षणानन्तरोक्तत्वात् प्रकृतमपेक्ष्य शेषलक्षण[illegible] ॥ रभ्यते कुत
इत्यपेक्षायामत इति हेत्वपदेशः यस्माद्वेदमधिज्ञाय न शक्यं श्रेयस्कराणां जिज्ञासितुमिति वार्तिके अ
थशब्दस्य पूर्वप्रकृतापेक्षार्थत्वस्याप्युक्तत्वात्तद्वत् प्रकृतेऽपि किं न स्यादत आह पूर्वप्रकृतापेक्षायाश्च

फलत आनन्तर्यं [illegible] केचिदिति ॥ न च [illegible] सूत्र[illegible]रव्याख्यातृभिः श्राद्धादित्वं तत्सहैव सं-
कर्षणकांडे न विचारितम् [illegible] पूर्वोत्तरमीमांसयोरेकपुरुषाध्येयत्वात्प्रयोजकैकग्रंथत्वा-
त्तयोरध्ययनस्यैकपुरुषकर्तृकत्वं सिद्धं युगपदध्ययनासंभवात्क्रमापेक्षायां यथा यवागूपाकं विना यवागू-
रूपद्रव्यानिष्पत्तौ होमस्यैवासिद्धेर्यथाऽग्निहोत्रयवागूपाकयोरर्थात्क्रम आश्रीयते तद्वत्पूर्वमीमांसा-
गतश्रुत्यादिविषयकप्रमाणविचारस्य सर्वत्र वेदांतविचारेऽपेक्षितत्वात्तथा विद्याभेदविचारे शाखांतरादिभिः
कृतधर्मभेदविचारस्य श्रुतिलिंगादिगतप्राबल्यदौर्बल्यविचारस्य च तत्कृतस्य तत्रापेक्षितत्वाच्चोत्तरमीमां-
सयाऽपेक्ष्यमाणपूर्वमीमांसैव पूर्वमध्येयत्वेन प्राप्नोति तथा पूर्वपूर्वाध्यापकपरंपराप्राप्तपाठक्रमानु-
सारेणापि कर्मकांडज्ञानकांडयोर्विचारस्योक्तक्रम एव प्राप्नोतीत्येकदेशिमते ब्रह्मविचारात्पूर्वं कर्मविचा-
रस्य प्रकृतत्वात्तदपेक्षार्थत्वमेवाथशब्दस्येत्येकदेशिमतानुसारेण तदाशंकासंगतिः ॥ कर्मविचारा-
पेक्षानपेक्षयोर्विप्रतिपत्तावपि आनंतर्यार्थत्वे विप्रतिपत्त्यभावादुक्तविप्रतिपत्तेश्चाग्रे निरसनीय-
त्वादानंतर्यार्थत्वविचारे न तद्दूषणाग्रहः कर्तव्य इति तदर्थः ॥ न च तर्हि तदर्थकत्वमेव कुतो नोक्तमिति वाच्यं
॥ सिद्धांते कर्मविचारस्य ब्रह्मविचारापेक्षणीयत्वानुपगमेन तदनुक्तेः ॥ एतेनास्यैवादिसूत्रत्वेन पूर्वप्र-
कृतार्थत्वशंकानुदयादिति चंद्रिकोक्तं दूषणं परास्तं ॥ एकदेशिमतानुसारेण तादृशशंकायां बाधकाभा-

पात् त्रिंशन्निलक्षण्या एकशास्त्रत्वोपपत्तिप्रकारश्चाकरेषु स्पष्टः दिङ्मात्रमत्राभिधीयते ॥ अथातो धर्मजि-
ज्ञासेति सूत्रे अथशब्देन कृत्स्नवेदाध्ययनानन्तर्यमुच्यते अतःशब्दस्य कृत्स्नवेदस्याविवक्षितार्थत्वमुच्यते तत्त-
दनुसारेण धर्मशब्दः कृत्स्नवेदार्थपर एव ततश्च वेदविवक्षितार्थत्वाद्विचारणीयत्वे उपनिषदर्थस्यापि विचा-
रणीयतायासैव ॥ अथवा धर्मशब्दः अलौकिकश्रेयःसाधनत्वं प्रवृत्तिनिमित्तीकृत्य ज्योतिष्टोमादिवत् ब्र-
ह्मणोपि शक्त्यैवाभिधायकः एष ह्येव साधु कर्म कारयति तमेभ्यो लोकेभ्य उन्निनीषत इति श्रुत्या ब्रह्मणोपि
श्रेयःसाधनत्वबोधनात् ॥ ननु श्रेयःसाधनतामात्रस्य धर्मपदप्रवृत्तिनिमित्तत्वे श्येनादीनामपि धर्मता-
स्यादिति बलवदनिष्टाननुबन्धित्वमपि तत्कोटौ निवेशनीयं तच्च न ब्रह्मसाधारणं एष ह्येवासाधु कर्म का-
रयति तं यमधो निनीषत इति श्रुत्या तस्य बलवदनिष्टानुबन्धित्वबोधनादिति चेन्न ॥ बलवदनिष्टाननुबं-
धित्वं न बलवदनिष्टजनकत्वादिरूपं किन्तु बलवदनिष्टप्रयोजकश्रेयोगतो द्वेषनामत्ति योग्यनुष्ठाननिष्प-
न्नत्वं तद्धि शिष्टश्रेयःसाधनत्वं धर्मपदप्रवृत्तिनिमित्तं तच्च ब्रह्मसाधारणं न स्यान्नित्यतया अनुष्ठाननिष्प-
न्नत्वाभावात् एवं चैकप्रतिज्ञाविषयत्वाद् अथातो धर्मजिज्ञासेत्यारभ्यानावृत्तिः शब्दादित्यन्तमेकमेव शास्त्रं
॥ ननु संकर्षणेन सह षोडशलक्षणी कर्ममीमांसा जैमिनिना कृता चतुर्लक्षणी ब्रह्ममीमांसा बादरायण-
कृता जैमिनिबादरायणयोश्च परस्परविरुद्धमताभिनिवेशश्च स्पष्ट एवेति कथं तदुभयकर्तृकविंशति

लक्षण्याएकग्रंथत्वं ॥ किंच ग्रंथतोप्यस्ति विरोधः तथाहि आम्नायस्य क्रियार्थत्वादानर्थक्यम तदर्थानां
तस्मादनित्यमुच्यते इति सूत्रेणाक्रियार्थानामप्रामाण्यमाशंक्य विधिनात्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां
स्युरिति सूत्रेणतेषामर्थवादानां विधिस्तावकत्वेन प्रामाण्यं व्यवस्थापितं मैमिनिना इदं च वेदांतसाधारणमान्य
यपदस्य वेदमात्रपरत्वात् ॥ बादरायणेन तु शास्त्रयोनित्वादिति सूत्रेण वेदांतानां प्रामाण्यं प्रतिपाद्य
र्थवादाधिकरणोक्तं वेदांतानां क्रियाशेषत्वं पूर्वपक्षीकृत्य तत्तु समन्वयादिति सूत्रेण वेदांतानां स्वातंत्र्ये
णब्रह्मणि प्रामाण्यं समर्थितमेव मादिबहु विरोधइति नविंशतिलक्षण्याएकशास्त्रत्वं संभवतु किकमि
तिचेन्न ॥ नतावत् विरुद्धमताभिनिविष्टकथिकर्तृकत्वमेकग्रंथत्वविरोधि ताहृशयोरपिहृयोः किंचिद
र्थमुद्दिश्य समयबंधपूर्वकैकग्रंथनिर्मातृत्वोपपत्तेः हृश्यतेहि परस्परविरुद्धमताभिनिविष्टयोर्जयादि
त्यवामनयोः काशिकाख्यैकग्रंथनिर्मातृत्वं ग्रंथतस्तु विरोध एवं परिहार्यः ॥ अथातो धर्मजिज्ञासेतिहि
द्वे प्रतिज्ञे एकाविंशतिलक्षणसाधारणीतस्यां धर्मशब्दः कर्मब्रह्मसाधारणः ॥ द्वितीयातु कर्मकांडमात्र
विषयातस्यांच धर्मशब्दः कर्ममात्रपरः एकेनापि सूत्रेण प्रतिज्ञाद्वयमावृत्यासूपपादं सूत्राणामावृत्याऽ
नेकार्थत्वस्यालंकारत्वात् ॥ नन्वेवं कुत्रापिन दृष्टमितिचेत् ॥ अथातः शेषलक्षणमिति सूत्रे तथा दृष्ट्वा
लडंदंहि सूत्रं द्विलक्षण्याः परंशिष्टं यावत् किंचनलक्षणं तत्सर्वं वक्तुमारब्धमथातः शेषलक्षणमित्यनेना

वशिष्टदशाध्यायीपरत्वेन व्याख्याय तृतीयाध्यायपरत्वेनापि व्याख्यातं वार्तिककृता ॥ तत्र शेषः परार्थ-
त्वादिति सूत्रं यथा द्वितीयप्रतिज्ञायां लक्षणप्रतिपादकतया संगतं तद्वत् चोदनालक्षणोऽर्थो धर्म इत्यपि सूत्रं
द्वितीयप्रतिज्ञायां तल्लक्षणप्रतिपादकतया संगतं तथा च तेन कर्मणि चोदनायाः प्रामाण्ये द्वितीयप्रतिज्ञया
प्रतिज्ञाते क्रियासमभिव्याहृतानामेव सिद्धार्थपरत्वेन प्रतीयमानानामप्रामाण्यमाशंक्य विधिस्तावक
त्वेन प्रामाण्यं व्यवस्थापितं पूर्वमीमांसायां ॥ तदसमभिव्याहृतानां सिद्धार्थपराणां प्रामाण्यं व्यवस्था
पितमुत्तरमीमांसायामिति न ग्रंथतो विरोध इति ॥ यद्वा ननु पूर्वप्रकृतापेक्षां प्रयोगोपाधिं कृत्वा यथा आ
त्मा नित्य अथानित्य इत्यादौ अनित्यशब्देन विशेष्यतया अन्वयार्थमपेक्ष्यमाणपूर्वप्रकृतात्मवाचित्वमथ
शब्दस्य दृष्टं तद्वत् प्रकृतेऽपि किं न स्यात् सूत्रे कल्पांतरानुपन्यासेऽपि सौत्राथशब्दार्थस्यापेक्षितपूर्वस्य जि
ज्ञासायामानंतर्यात्मकभेदसंबंधेनान्वयः अथानित्य इत्यादौ तदर्थस्यैव धर्मितया तत्राभेदसंबंधेनानित्य
पदार्थेऽन्वय इत्येतावद्विशेषसत्त्वेऽपि तस्य कल्पांतरोपन्यास एवाथशब्दस्यापेक्षितपूर्ववाचित्वं नान्यथेति नि
यमासाधकत्वात् ब्रह्मविचारात् पूर्वं कर्मविचारस्य प्रकृतत्वं पूर्वमुपपादितमेवैकदेशिमतेन ॥ यद्यपि सा-
मानाधिकरण्यार्थमनुषिक्तस्य धर्मिणः अथानित्य इत्यादावपेक्षायामपि न सौत्राथशब्दार्थः एकस्मिन् वाक्ये-
ऽऽत्मनो द्विरुपादानवैयर्थ्यादिति शंकासंभवति तथापि साम्यमयुक्तैव न ह्यात्मानित्य अथानित्य इति दृष्टांते

वाक्यैक्यं दर्शितं अपि तु हि एते वाक्ये आत्मानित्य इत्येकेनोक्ते अपरेणाथानित्य इति उतानित्य इत्यादि
कं मयुज्यते अत एव विप्रतिपत्तिरूपत्वमप्येतस्योपपद्यते विरुद्धार्थकनानावाक्यत्वरूपस्यैव तस्य तं
भ्रांतेरुक्तत्वात् ॥ एतेन सूत्रे कल्पांतरानुपन्यासेन पूर्वप्रकृतापेक्षार्थत्वमथशब्दस्याशक्यशंकमिति
कल्पांतरोपन्यासेऽपि सामानाधिकरण्यार्थमनुषक्तस्य धर्मिणः अनित्य इत्यादावपेक्षायामपि न सोऽथश
ब्दार्थः अन्यथा उतानित्य इत्यादावपि उतादेरपि पूर्वप्रकृतापेक्षार्थत्वं स्यादिति चांद्रिकोक्तं परास्तमित्यतः
आह ॥ पूर्वप्रकृतापेक्षायाश्चेति ॥ अपेक्षितपूर्ववाचितायाः इत्यर्थः ॥ आनंतर्याव्यतिरेकादिति ॥ ब्रह्मजि
ज्ञासायास्तद्धेतुतया अपेक्षितपूर्वविवेकादेरथशब्दार्थत्वेऽपि आनंतर्यसंबंधेन तस्य जिज्ञासायामन्वयस्य वा
च्यतयानस्य संसर्गत्वे प्रकारत्वे वा अर्थतो विशेषाभावात् आनंतर्यार्थत्वपक्षे योऽर्थः तस्यैव पूर्वप्रकृतापे
क्षार्थत्वेऽपि सिद्धेरित्यर्थः ॥ नन्वेवं सत्यथशब्द आनंतर्यार्थ एव परिगृह्यत इत्यानंतर्यावधारणं कुत इ
त्यत आह ॥ फलत इति ॥ उत्पत्तिघटितेत्यर्थः ॥ अयं भावः अपेक्षितपूर्वस्याविवेकादेरुदासीनसाधा
रणतदव्यवहितोत्तरक्षणावृत्तित्वात् प्रकानंतर्यसंबंधेन जिज्ञासान्वये विवेकादेर्हेतुत्वासिद्ध्या अव्यव
हितोत्तरक्षणोत्पत्तिकत्वात्मकानंतर्यसंबंधेनैव जिज्ञासायामन्वयस्य वाच्यतया आद्यक्षणसंबंधरू
प्रत्यासत्तेर्गुरुत्वात्तथा तद्घटितपरंपरासंबंधस्य संबंधत्वे विवादात् परिशेषादानंतर्यार्थत्वमेवाथश

द्रस्येति ॥ विवरणेतु प्रकृतादर्थादर्थांतरत्वशंकया प्रकृतापेक्षायाश्चेति नापूर्वप्रकृतार्थोऽर्थां-
तरसंहि यतः कुतश्चेत्यर्थः अवश्यं हि पुरुषः किंचित्कृत्वा किंचित्करोति पुष्कलकारणाच्चेदानंतर्याभि-
धानं विना कारणत्वासिद्धिरानंतर्याभिधाने च प्रकृतादर्थादर्थांतरत्वस्यांतर्णीततया सिद्धि-
रिति तदभिप्रायो वर्णितः ॥ यत्त्वानंतर्यानभिधानेपि वैयर्थ्यपरिहारार्थमेव प्रकृतस्य हेतु-
त्वासिद्धेः प्रकृतादर्थादर्थांतरत्वपरित्यागे नोक्तबीजसंभवः अन्यथा आनंतर्यार्थकत्वेपि तत्त्वाभियोगि-
नोहेतुत्वासिद्धेरिति चंद्रिकायां दूषणमुक्तं तद्विवरणभावानवबोधनिबंधनं आनंतर्यं हि तद्व्यव-
हितोत्तरक्षणवृत्तित्वमात्रं ज्येष्ठ्यात्तात्कनिष्ठस्यानंतरइति व्यवहारापत्तेः किंतु तदव्यवहितक्षणोत्प-
न्निकत्वमेव तदेव च मुख्यमन्यत् गौणं ॥ भवति हि तदप्रयोज्यात्तत्प्रयोज्यं मुख्यमिति ॥ एवं च धनं-
लभते अथ सुखी भवति क्षिप्रानदी पूर्णजला यदाथननोति राजोपवनानि तीरे अशोकपुन्नागरसा-
लसालकपित्थजंबूपनसादिवृक्षैरित्यादाव सति बाधके आनंतर्यपरकोसत्तौ आनंतर्यप्रतियोगि-
तावच्छेदकावच्छिन्नप्रयोज्यत्वप्रतीतेरथशब्दसमभिव्याहारस्युसन्निलक्ष्यतया अथशब्दस्यानंतर्या-
र्थकत्वे विचारप्रवृत्त्युसन्निप्रयोजकतावच्छेदकत्वस्य साधनचतुष्टयत्वे संग्रहनयात्तादृशापूर्वप-
स्ररूपं तदीयपुष्कलकारणत्वं साधनचतुष्टयेसंग्रहं प्रकृतादर्थादर्थांतरपरत्वे चनस्यातिद्वादत्कार्थ

ज्ञानमिति विवरणाभिप्रायः ॥ यादृशसमुदायत्वावच्छिन्नात् कार्योत्पत्तिरव्यवहिताव्यभिचरिता च तादृ
शसमुदायत्वस्य कार्योत्पत्तिप्रयोजकतानवच्छेदकत्वनियमाभिप्रायेण कारणादानन्तर्यमव्यवधेरव्य
भिचाराच्चेति विवरणेन बाधकासत्त्वप्रदर्शनाय कारणस्याव्यवधिरव्यभिचारश्चोक्त इति न चैदिकोक्तदूषणान्त
रावकाशः ॥ तत्सिद्धमवश्यापेक्षिताधिकारिविशेषप्रतिपत्त्युपयोग्यानन्तर्यार्थकत्वमेवाथशब्दस्येति ॥ अ
थैवमपि कथमधिकार्यादिप्रतिपत्तिरिति चेदित्थं ॥ अथशब्देनानन्तर्याभिधाने योग्यतदवधित्वाकांक्षा-
यां श्रवणविधिं सूत्रयतस्तत्प्रकरणस्थवाक्यैर्विवेकादीनां बुद्धिस्थत्वेन तेषां तदवधित्वसिद्धौ विवेका
दिसाधनसंपन्नः श्रवणविध्यधिकारनिमित्तत्वावगमात् विचारे विवेकादिमानधिकारी ज्ञानद्वारा मोक्ष
स्य विचारप्रयोजनमिति प्रवर्तितस्मात् प्रतिपत्तिरिति ॥ विवेकादिसाधनसंपत्तिश्च यदानन्तर्यमथशब्देनोच्यते तत्
कथमित्याक्षिप्य उच्यते नित्यानित्यवस्तुविवेकः इहामुत्रार्थभोगविरागः शमदमादिसाधनसंपत् मुमु
क्षुत्वं चेत्यादिभाष्यप्रदर्शिता ग्राह्या ॥ तत्र शमदमादीत्यादिपदेनोपरतितितिक्षाश्रद्धा ग्राह्याः ॥ अथ शम
दमादीन्यादिपदेनोपरत्यादेरिव विवेकादीनामपि ग्रहणसंभवात् पृथक् तदुपादानं भाष्यकृतः किमभि
प्रायमिति चेन्न सर्वशाखाप्रत्ययन्यायेन यथाग्निहोत्रादिविधीनां सर्वशाखास्वैक्यं तथा सोऽन्वेष्टव्यः तर्हि
जिज्ञासस्व श्रोतव्य इत्यादौ सर्वत्र श्रवणविधेः फलत्वमेव न यावत्सोऽन्वेष्टव्य इत्यत्र न तद्यथेह कर्मचितो लोकः

क्षीयत इत्यादिनास्य कृतः कृतेनेत्यंतेन ज्ञानफलमोक्षस्य नित्यत्वं कर्मफलस्वर्गादेरनित्यत्व
मिति नित्यानित्यविवेकाश्रुतः ॥ विचारसाध्यज्ञानप्रकरणे परीक्ष्य लोकान्कर्मचितान्ब्राह्म-
णो निर्वेदमायादिति वैराग्यं श्रुतं ॥ अन्यत्र शांतो दांत उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वेति शां
त्यादि श्रुतं ॥ ब्रह्म वेद ब्रह्मैव भवतीति फलश्रुतिर्मुमुक्षा गम्या ॥ एवं विशाकलितानाम-
प्यधिकारिविशेषणानां पूर्वोक्तन्यायेनैक श्रवणविध्यधिकारनिमित्तत्वं निराबाधमेव ॥ त-
दुक्तं ॥ नन्वत्र विवेकादि श्रुतमेकत्र नीयते ॥ सर्वशाखाप्रत्ययेन विधेरेकत्वनिश्चयादिति
॥ यद्यपि मुमुक्षायामधिकारिविशेषणत्वेन संगृहीतायां ततः प्राचीनान्यर्थाल्लभ्यंते अधिकार्यपे
क्षाभिशाम्यतीति तदानंतर्यमेव वक्तव्यमन्यथा विवेकादिहेत्वानंतर्यस्यापि वक्तव्यता स्यात् ॥
तथापि शास्त्रेण सर्वेषां संकीर्तितत्वात्तद्वैयर्थ्यान्यथानुपपत्त्या श्रुतानामेव सर्वेषां समुच्चिता
नां परस्परकार्यकारणभावेन परस्परोपयुक्तानां वा अधिकारिविशेषणत्वरूपनिमित्तत्वमित्यभि
प्रायेणैव विवेकादीनां पृथक् श्रुतानां पृथक्कथनं ॥ शांतो दांत इत्यत्र श्रुतानां शमदमादीत्या
दिना पृथक् आदिपदेन ग्रहणमित्यभिप्रायात् ॥ किंच मुमुक्षा हि निर्दुःखसुखाभिलाष एव स-
च सर्वसाधारण इति नाधिकारिविशेषणं भवितुमर्हति किंतु उत्कट एवेति वक्तव्यं तदुत्कटत्वं चा

धिकारिणावश्यं निर्णेतव्यं अन्यथा संन्यासपूर्वकं श्रवणारंभे उत्कटमुमुक्षाया अभावे च फल
पर्यवसायिश्रवणासंभवात् व्यर्थः प्रयासः स्यादिति शंकाकुलस्य श्रवणे प्रवृत्तिर्न स्यादुत्कटमु
मुक्षा च सैवोच्यते या विवेकादिपरंपरया प्राप्ता विवेकादिसहिता या अतस्तदुत्कटत्वाभिव्यंजक
तया विवेकाद्युपन्यासेन न तदादिमुमुक्षानंतर्यमेवाभिहितं विवेकादिहेतूनामधिकारिविशेषण
तया श्रवणविधिसमभिव्याहारे श्रुत्यनुक्ततया तदुत्कटत्वानभिव्यंजकतया च न तदानंतर्यव
क्तव्यताप्रसंगः ॥ एतेन किंच भामतिरीत्या साधनचतुष्टये पूर्वपूर्वस्योत्तरोत्तरहेतुत्वेन मुमु
क्षैवाधिकारिविशेषणमन्यत्तद्धेतुभूतं किंवा विवरणैकदेशोक्तरीत्या मुमुक्षावद्विवेकादिरप्य
धिकारिविशेषणमाद्ये मुमुक्षानंतर्यमेवाथशब्दार्थः स्यात् न साधनचतुष्टयानंतर्यं अन्यथा विवेक
हेत्वानंतर्यमपि तदर्थः स्यादिति विरागशमदमादिमुमुक्षासु सतीषु विवेकाभावेन फलपर्यंतविचा-
राभावस्यादर्शनादित्यादि चंद्रिकोक्तदूषणं भाष्यनिबंधादेरुक्ततात्पर्यानवबोधनिबंधनमेव ॥ न
था शमदमादीत्यत्रादिपदं न युक्तं तेन तितिक्षादेरग्रहणं न विवेकादेः इति तितिक्षाद्यनुगतविवेका
दिव्याप्तस्योपसंग्राहकस्य धर्मस्याभावादिति च चंद्रिकोक्तदूषणमुक्तभाष्यादिग्रंथाभिप्रायाज्ञानमू
लमेव शांतो दांत इति श्रुत्युपात्तकर्तृविशेषणत्वरूपानुगतमनतिप्रसक्तधर्मसौलभ्यस्यातिस्पष्टत्वाच्च ॥ तथ्व

ध्ये अथशब्दस्याधिकारानंतर्यार्थकत्वस्यैवोक्तत्वेनाधिकारस्य चाविष्णुपादक संन्न ...
दिमुमुक्षारूपतयास्तेन व्याख्याततया न आप्युक्तशंकया दूषणभूषणयोः समानयोगक्षेमत्वेनास्म
दीयभाष्यकारोक्ते अथशब्दस्यानंतर्यार्थकत्व एव दूषणोद्भावनं मंदमतिप्रतारणमात्रमेव अयं परो
विशेषः अस्मद्भाष्यकारोक्ताधिकारिविशेषणानि सर्वाणि श्रोतव्यविधिसमभिव्याहृतवाक्यबोधितानि
निविष्णुपादैकसंश्रयत्वरूपाधिकारस्तु न श्रवणविधिसमभिव्याहृतवाक्यबोधित इति तस्मात् तत्पा
दनेश्रुत्यनभिप्रेतार्थकत्वमेव सूत्रस्यापतेदिति ॥ अथकोयं नित्यानित्यविवेक इति चेदत्र केचित् ॥
आत्मा नित्यः अनित्यमन्यत् आत्मा सत्यः असत्यमन्यदिति वा विवेक एव स इत्याहुः ॥ ज्ञानफलं नित्यं
कर्मफलमनित्यमिति विवेक एव सः अनित्यत्वं चात्र ध्वंसप्रतियोगित्वं तद्भिन्नत्वं च नित्यत्वमित्यपरे
॥ अथकेषांचिन्मते शास्त्रेण ज्ञातव्यस्यात्मनित्यत्वादेः शास्त्रविचारात् प्रागेव ज्ञातत्वात् विचारविधा
यकशास्त्रवैयर्थ्यमिति चेन्नैवं ॥ ज्ञातोपि निरुक्तविवेकः अधीतसांगस्वाध्यायस्य गृहीतपद पदार्थ
संबंधस्य कस्यचित् अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति विश्वं सत्यमित्येवमादिवाक्यं पश्य
तः परस्परविरुद्धार्थकसगुणनिर्गुणबोधकवाक्यानि तथा ह्रासंकर्पणानि तत्त्वमसीत्यादिभेदाभेदबोध
कवाक्यानि तथात्मानेकत्वैकत्वादिबोधकवाक्यानि च पश्यतः शंकाकलंकित एव भवतीति तादृशशां ... कानिष्ट

तस्य कस्यचित् तत्त्वेश्वरानुग्रहाद्धि रुद्धवाक्यान्यन्यथा आस्थेयानीति इदं निश्चयात् तत एव सं
नयतिकस्यचित् प्रथमसूत्रविचारेण साङ्गोपाङ्गादिना भवतीत्याशोपदेशोऽल्प आनन्दव्यपदेशेन अथ
शेषाः सर्वाः शंकाः उत्तरत्र निराकरिष्यन्त इत्यध्यापक यत्नेनोऽधिकृदासपूर्वक तत्तदधिकरणविचारेण
मानिवर्तत इति शंकाकर्त्तुं किन्तु सामान्यरूपविवेकदार्ढ्याय शास्त्रसार्थक्यात् ॥ एतेन आत्मानित्यः
अनित्यमन्यादिति केषांचिन्मतसिद्धविवेकमाक्षिप्य ज्ञानस्यस्य आगेय ज्ञानत्वाद्विचारवैयर्थ्यमिति
॥ नच सगुणनिर्गुणविवेकाखंडसमन्वयाद्यर्थं शास्त्रमिति युक्तं मामत्वानित्यानित्यत्वादृयोः स-
त्यानृतपरत्वेनोक्तनयाब्रह्मैव सत्यमसत्यमन्यादिति विवेकस्य आगेयसिद्धौ न दर्थस्य सगुणनि
र्गुणविवेकादेरप्यनपेक्षत्वात् नहि श्रुतितात्पर्यधीः स्वरूपेणापेक्षिता किंतु ज्ञेयनिश्चायकतया न चोक्त
दन्यमुमुक्षुज्ञेयमस्ति जीवब्रह्मभेदस्यापि ब्रह्मातिरिक्ततया तन्निष्ट्यात्स्य तद्भेदस्यापि ब्रह्ममात्र
स्वरूपतया नत्सत्यत्वस्यापि नैनैवाभिन्चितत्वाच्चेति चंद्रिकोक्तं दूषणं निरस्तं ॥ तन्मतेऽपि नारायणो
सौपरमोऽधिचिंत्यो मुमुक्षुभिः कर्मपाशाद्मुक्षादित्यादिप्रथमसूत्रनिर्णयार्थज्ञानफलस्य विष्णुपादे-
कसंश्रयत्वरूपाधिकारस्य पूर्वमेव सिद्धौ शास्त्रवैयर्थ्यपरिहारस्य मदुक्तरीत्यातिरिक्तप्रकारांत-
राभावात्तद्वदीयोक्तं दूषणोद्भावनं मंदमतानां नामात्रे पर्यवसन्नमेव ॥ यदपि चंद्रिकायां नच वि

चरणरीत्या नित्यानित्यग्राहकौ ध्वंसाप्रतियोगिप्रतियोगिपरावित्यादिना ब्रह्मज्ञानफलं नित्यं कर्मफल
मनित्यमिति परेत्यादिनोक्तं नित्यानित्यविवेकमाक्षिप्य तन्न युक्तं ॥ प्रतिपन्नोपाधावत्यंताभावप्रतियो
गित्वरूपबाध्यत्ववतोऽनात्मनो ध्वंसप्रतियोगित्वायोगात् पारमार्थिकत्वाकारेणात्यंताभावः स्वरूपे
ण तु ध्वंस इति चेन्न ॥ पारमार्थिकत्वस्याबाध्यत्वरूपत्वेनान्योन्याश्रयात् ॥ तथात्यंताभावप्रतियोगित्व
स्य निराकारे ब्रह्मण्यपि संभवात् अतात्विके रूप्यादावनित्यत्वाव्यवहाराच्च गौरनाद्यंतवती एषोऽश्वत्थः सना
तन इति श्रुत्यनुसाराय मोक्षस्य तात्विकी अनुवृत्तिर्निवृत्तिस्तु नात्विकी मुक्तेर्बाधाद्धि श्रव्यं तु नात्विकनिवृत्तिस
त्ताभावे गौत्वापातात् तस्यासरमते नित्यानित्यविवेको न युक्त इति दूषणमुक्तं ॥ तत्रेदं विचार्यते प्रतिपन्नोपा
धिगतात्यंताभावप्रतियोगिनो ध्वंसप्रतियोगिता कुतो न युज्यते किमत्यंताभावाधिकरणे ध्वंसायोगादुतोक्तप्र
तियोगिनोऽत्यंतासत्वरूपतया अत्यंतासतश्च शशविषाणादेर्नाशादर्शनात् ॥ नाद्यः ॥ ध्वंसप्रागभावयोरत्यंता
भावविरोधित्वे प्रमाणाभावात्तदधिकरणेऽप्यत्यंताभाववृत्तौ बाधकाभावात् स्पष्टं चेदं नव्यतार्किकमताभि
ज्ञानां ॥ न द्वितीयः ॥ सद्विशेषस्यात्मनो नाशादर्शनवत् असद्विशेषेतददर्शनस्याकिंचित्करत्वात् ॥ प्रतिप
न्नोपाधिगतात्यंताभावप्रतियोगिनोऽपि वियदादेः शुक्तिरूप्यादेश्चार्थक्रियाकारितया इदं सर्वमसृजत सत्यं
चानृतं च सत्यमभवदिति श्रुतिसिद्धोत्पत्तिमत्तया चात्यंतासद्वैलक्षण्येनानात्ममात्रस्यात्यंतासत्वा

भावास्तु ॥ शुक्तिरूप्यादेरपि भ्रान्तिजनकधीविषयत्वादर्थक्रियाकारित्वमक्षतमेव ॥ पारमार्थिक-
त्वस्याबाध्यत्वरूपत्वेनान्योन्याश्रयतोक्तिरपि न साधीयसी अबाध्यं सर्वं मेयमित्याकारकवाक्यता
सर्वधीविषयधीत्वं केवलं हि मेयता याथापारमार्थिकत्वग्राहकनियंत्रिता या सा तद्व्यक्तित्वेनाभावप्रतियो-
गितावच्छेदकतया मिथ्यात्वलक्षणे निवेश्यत्वेनान्योन्याश्रयताविरहात् ॥ निरुक्तधीव्यक्तिरूपमान्या
मप्यवश्यमुपेयैवं इयानेव विशेषः यश्च ते ज्ञानानिवर्त्यत्वरूपमबाध्यत्वं तच्च विषयस्त्वन्मते चात्यंता-
भावाप्रतियोगित्वमन्यद्धात हि विषय इति ॥ अनुपपत्तिनाहृता धीविषयत्वमस्त्येवेति न निराकारेऽप्र-
ह्णपपीत्याद्युक्तातिप्रसंगः ॥ शुक्तिरूप्यादावपि निरुक्तरीत्यार्थक्रियाकारित्वादत्यंतासत्त्वासंभ-
वादनित्यत्वव्यवहारस्योभाभ्यामपि कथमपि वारयितुमशक्यतया सदृष्ट एव ॥ गौरनाद्यंतवतीति
श्रुतिश्च नास्मत्प्रतिकूला अनादिश्चासावंतवती चेति तदर्थात् अन्यथा अनाद्यंतेति वक्तुमुचितत्वा-
त्तुपपत्त्यपनैरर्थक्यापत्तेः ॥ एषोऽश्वत्थः सनातन इत्यत्र मुक्तिकालातिरिक्तसकलकालसंबंधः प्रो-
च्यते ॥ अश्वत्थमेनं सुविरूढमूलमसंगशस्त्रेण दृढेन छित्त्वा ततः पदं तत्परिमार्गितव्यमिति नि-
लयश्रवणवदुक्तिसंवादादिति न मोक्षे पीत्यादिदूषणावकाशः ॥ यदपि चंद्रिकायां किंचिन्निरुक्तविवेको
भेदस्य तद्धीमात्रस्य प्राज्ञानं तस्य प्रमात्वे ब्रह्मविचारेण निष्फलकः स्यात् प्रमात्वे भेदः सत्यः स्यादिति दु

षणमुक्तं तदपि न विचारसहं निरुक्तज्ञानस्य परमार्थसन्मात्रविषयकत्वलक्षणप्रामाण्याभावेपि
घटादिज्ञानप्रामाण्यसमकक्षस्य व्यवहारकालाबाध्यविषयकत्वलक्षणप्रामाण्यस्याभ्युपगमेन
भेदस्य व्यावहारिकसत्यत्वमेवापद्येत तच्चास्माकमिष्टमेव तदर्थैव विचारप्रवृत्त्युपपत्तेः पारमा
र्थिकसत्यत्वं तु न तस्य व्यावहारिकप्रामाण्यादापाद्यं किंच नित्यत्वादेर्ब्रह्मविषयत्वरूपबाधितत्वं य-
दि तदधिकरणस्यानित्यतां विना नोपपद्येत तदैव त्वदुक्तदोषः संभवति तदेव तु न नित्यतात्यंताभा
वात् अतिरिक्तस्यैव तदव्यापकस्योक्तध्वंसप्रतियोगित्वरूपानित्यत्वस्य यथाप्रमाणमस्माभिरभ्यु
पगमान्न किंचिदेतत् ॥ अथैवं सति नित्यानित्यशब्दयोर्निरुक्तयथाश्रुतार्थं परित्यज्य वाचस्पति
कल्पतर्वोः सत्यासत्यपरतया व्याख्यानं निरभिप्रायमेव ब्रह्मानंद एक एव नित्यः इतरत् सर्वं कर्म
फलादिकमनित्यमिति ज्ञानस्यारंभात् प्रागेव ज्ञातं सत्यसंभवस्तु सतोनुपपत्तेरित्यादितन्नित्यत्वा
नित्यत्वव्यवस्थापकसूत्रवैयर्थ्यशंकायां श्रुत्यंतरविरोधशंकापरिहाराय तत्सार्थक्यमिति समाधा
नवत् प्रागेव संसारबंधानृतत्वनिश्चये तव्य वस्थापकतद्गुणसारत्वादित्यादिसूत्रवैयर्थ्यशंका
यां श्रुत्यंतरविरोधपरिहाराय तत्सार्थक्यसमाधानस्य समानत्वादिति चेदभिप्रायभेदात्तदर्थकर
णात् ॥ इत्थं हि वाचस्पतिकल्पतर्वोरभिप्रायः नित्यानित्यवस्तुविवेकादिक्रमेण साधनचतुष्टयं प्र

न्द्जिज्ञासाहेतुत्वेन वर्णयिता श्रीमद्भाष्यकारेण नित्यानित्यविवेकानंतरं सांसारिकफलं सर्वमनित्यमि
ति तद्वियोगावश्यंभावेनावश्यमेवास्मात् शोकाख्यं दुःखं भविष्यतीति ज्ञानं यतः कस्यचिन्नित्यफलमे
दसामनपेक्ष्य तद्विवेकमात्रेण कर्मफलविराग उक्तः नित्यफलमेवस्यात ततोस्तूपायान्वेषणं च पश्चादुक्तं
अयंक्रमो नित्यत्वं सत्यत्वमनित्यत्वमसत्यत्वमित्यादिव्याख्यान एव युज्यते ननु नित्यत्वं स्थायित्वमनित्यत्व
मस्थायित्वमित्यादिव्याख्याने अस्थायिनं भोगं भुंजानस्तत्र स्थिरभोगे स्थायिभोगमालक्ष्यैव तत्रास्तूपायमन्वि
ष्यन् ततो विरज्यते नान्यथा अनृतात् सतस्तु कश्चित् तदनृतत्वमालोच्य तथाविधसत्यवस्तुलाभमन
नुसंधायापि ततो विरज्यत इति नित्यानित्यवस्तुविवेकासिद्धिशंकापरिहाराय कर्मफलनित्यत्वप्र
तिपादकवाक्येभ्यस्तदनित्यत्वप्रतिपादकवाक्यानां प्राबल्यस्यैवोपपत्तिमत्तया अतः ग्राह्यस्य व्याख्ये
यतया प्रसिद्ध नित्यानित्यविवेक एवात्र विवक्षितः ननु सत्यासत्यविवेकस्तथा सति बंधसत्यत्वप्रति
पादकवाक्येभ्यस्तन्मिथ्यात्वप्रतिपादकवाक्यस्य प्राबल्यपरतयैव तद्व्याख्यानकरणौचित्यादिति
विवरणाभिप्रायः॥ अथ सत्यासत्यविवेकस्य न वैराग्यहेतुत्वं संभवति अनृततया स्वाप्निकपदार्था
नवगच्छतोपि कामुकस्य तेषां स्वरससाधनतामवगत्य तदुपयोगिमंत्रौषधिसेवादौ प्रवृत्तिदर्शना
दिति नैतन्मते विवेकादिक्रम उपपद्यत इति चेत् कस्यचित् निर्लज्जस्य कामुकस्य तथा प्रवृत्तिदर्शनेपि॥

बुध्वाप्यत्यंतवैरस्यं यः पदार्थेषु दुर्मतिः ॥ बध्नातिवासनांभूयोनरोनासौसगर्दभइत्यभियुक्तवचनमनुसंदधानस्येश्वरानुग्रहेणलब्धसत्वशुद्धेरात्मातिरिक्तस्यासत्यतामनुसंदधतः पुरुषधौरेयस्यतेषुविरागोभवत्येवेतितादृशपुरुषविशेषाभिप्रायेणविवेकादिक्रमकथनस्यैतन्मतेप्यविरोधादधिकमाकरेषुद्रष्टव्यं ॥ यत्तुनस्मात्सरमतेनित्यानित्यविवेकोनयुक्त इत्युक्त्वानापीहामुत्रार्थफलभोगविरागः संभवतिविषयरणोविषयैरपिनित्यात्मस्वरूपमेवसुखमभिव्यज्यतेनतुजन्यंसुखमस्तीत्युक्तत्वेनवैषयिकसुखेपिविरागायोगात् मोक्षेरागवतः तत्त्वतोभेदशून्येभोगेविरागायोगाच्चेतिचंद्रिकायांदूषणमुक्तंतदसत् ॥ वैषयिकसुखस्यब्रह्मानंदरूपतोपगमेपितस्यानभिव्यक्तस्यापुरुषार्थतयाकाम्यमानायाश्चविषयसंबंधाधीनतदभिव्यक्तेरनित्यत्वयाततोविरागेबाधकाभावात् कर्माधीनासुखाभिव्यक्तिः स्वोत्तरावरणनियताज्ञानरूपाधीनब्रह्मानंदाभिव्यक्तिश्च नतथेतिविवेकस्यतादृशवैराग्यहेतुत्वसंभवाच्चनशंकांतरावकाशः ॥ अतिरिक्तेवैषयिकसुखेब्रह्मानंदमतिर्यौगिकतात्त्विकभेदशून्यत्वेपिअनित्यत्वस्यदुरुपन्हवतयातत्रवैराग्येबाधकाभावाच्च ॥ ततःव्याख्यातशमादिसंपत् ॥ ततः मोक्षेच्छा ॥ मोक्षश्चात्यंतिकीअविद्यानिवृत्तिस्तदुक्तं अविद्यानिवृत्तिर्मोक्षः साचबंधउदाहृतइतितस्याश्चाधिकरणीभूतनित्यब्रह्मानंदरूपत्वात्पुरुषार्थत्वमविरुद्धं ॥ अथैवंमोक्षस्यनित्यसिद्धत्व

रूपस्यकाम्यत्वानुपपत्तिःनहि केवलनित्यानंदरूपेणाहोस्वित् मानविषयत्वेनोताविद्यात्मकत्वंधाभावचि
शिष्टत्वेन॥नाद्यःतस्यनित्यसिद्धत्वात्॥ नद्वितीयस्तस्यस्वप्रकाशतयामानाविषयत्वात्॥ नतृतीयः॥आ
वरणस्यतत्रकल्पितत्वेनतदभावस्यावरणकालेऽपिसत्त्वादितिचेन्न॥ निवृत्तिरात्मामोहस्यज्ञातत्वे
नोपलक्षितइत्युत्तरार्धेनचरमवृत्त्युपलक्षितनित्यसिद्धात्मनएवाविद्यानिवृत्तिरूपमोक्षस्वरूपत्वा
भिधानेनतस्यनित्यसिद्धपूर्णानंदस्यस्वरूपतोनित्यत्वावगमेऽपिदुःखनिदानतदावरणविद्वेषात्तदा
वरणविरोधिवृत्त्युपलक्षितत्वेनतादृशवृत्तिविशिष्टत्वेनवाकाम्यतोपपत्तेः॥ वृत्तिरूपोपलक्षणस्य
विशेषणस्यवासाध्यतयैवमोक्षस्यविचारसाध्यता॥ नचोपलक्षणादिनिवृत्त्यामुक्तेरपिनिवृत्त्यापत्तिः
शंक्या॥ पाकेनिवृत्तेऽपिपाचकनिवृत्तेरदर्शनात्॥ तदुक्तंउपलक्षणनाशेऽपिमुक्तिःस्यात्पाचकादिव
त् इति॥ एतेनमुमुक्षोश्चपरमतेनयुक्तामोक्षस्यनित्यसिद्धात्ममात्रत्वेनतत्रेच्छायोगादितिचंद्रिको
क्तंनिरस्तं॥ यदपिचंद्रिकायांवृत्त्युपलक्षितस्यपश्चादिवपूर्वमपिसत्त्वाच्चेत्युक्तंतदभिप्रायस्तुनि
रुक्तात्मनःमोहकालेऽपिसत्त्वेनतदानीमपितद्धान्यापत्तिरितितदपिमंदं॥ पूर्वमसिद्धस्योपलक्ष
णत्वायोगात्नहिपाकसंबंधात्पूर्वंपाचकोभवतितथात्वव्यवह्रियतेवा अपितुपाकानंतरमेवेतिताद
शवृत्तेरनित्यत्वेऽपितदभिव्यक्तानंदस्यनित्यतयानविचारस्यनिष्फलकत्वानुपपत्तिःआनंदाभिव्य

किरपि स्वरूपभूतानजन्यसाक्षात्कारः॥ अथ तादृशानंदाभिव्यक्तेः पुमर्थता असंभव दुक्तिकैवन-
हि सुखवत्तया पुमर्थः सुखी स्यामितीच्छावत् सुखं स्यामितीच्छाया अदर्शनात् पुमर्थताया इच्छानियम्य-
त्वात् अन्यथा बौद्धमतसिद्धनित्यात्मनाशादेरपि पुमर्थता स्यात् अत एव परकीयसुखं न पुमर्थः तथेच्छा
विरहात्॥ मैवं सुखादौ पुमर्थत्वं हि न स्वकीयत्वादिमधुक्तं गौरवात् किंतु साक्षात्क्रियमाणतया नत्वान्या
न्येच्छानधीनेच्छाविषयस्यैव तादृशेच्छाविषयकसाक्षात्कारविषयस्यापि पुमर्थत्वान्मुक्तेः पुमर्थत्वाक्षतेः
नच साक्षात्क्रियमाणतया सुखस्य पुरुषार्थत्वे अस्मदादिसुखवदीश्वरस्यापि पुमर्थः स्यादिति वाच्यं॥ हे-
यतया अज्ञातत्वस्यापि तत्र प्रयोजकत्वात्॥ स्वसंबंधित्वेन सुखादेः पुरुषार्थत्ववादिनापि निषिद्धत्वसु-
खे पुरुषार्थत्ववारणाय तत्र तस्य प्रयोजकत्वस्यावश्यं वाच्यत्वेनास्मन्मते गौरवविरहात्॥ अथैवमपि
कस्यायं मोक्षः पुमर्थः किमहमर्थस्याहोस्वित् चिन्मात्रस्य॥ नाद्यः अहमर्थस्य मुक्त्यनन्वयात् नांत्यः॥ अहं मुक्तः
स्यामितिवत् चिन्मात्रं मुक्तं स्यादिति कस्यापीच्छाया अननुभवात् मैवं॥ अहमर्थगतचिदंशमहं मुक्तः
स्यामितीच्छोपलक्षितमुक्तिकालान्वयिनं प्रति मोक्षस्य पुमर्थत्वाविरोधात् स्वाभाविककर्तृत्वाश्रयीभूतस्य
चिदंशस्यैवाहमर्थत्वेनभासमानस्यानात्मत्वोपगमात् विशिष्टधर्माणामपि केषांचित् असति बाधके प्रमाणा-
नुसारेण विशेष्यगतत्वोपगमाच्च॥ एतेन किमहं मुक्तः स्यामितीच्छा मुमुक्षा चिन्मात्रं मुक्तं स्यादितीच्छा

धानाद्यः ॥ तस्मातेहमर्थस्यानुगमनन्यथानुपपत्त्या नान्यद् इत्यादिचोदितोक्तमपास्तं ॥ यादृशविशेषणवत्ताकामि
तं तादृशविशेषणवति जीवन्मुक्ते मुक्त्यन्यपोस्तं धर्मन्यनेनवर्ण्यमनंतु लोकान्तरमासेरेव मोक्षवत् तथा काम
यितृशरीराद्यविशेषितएव तदन्यपरस्यवाक्यनयानवपत्तेएवानुपपत्तेश्च ॥ ननूक्तविवेकादिसाधन
चतुष्टयमसिद्धं अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति अपाम सोमममृता अभूम स्वर्गे लोके
न भयं किंचनास्ति न तत्र त्वं जरया बिभेति उभे तीर्त्वाऽशनायापिपासे शोकातिगो मोदते स्वर्गलोके इ
तिवाक्यैः कर्मफलानामपि ... शोकादिरहितत्वप्रतिपादनात् ॥ नचैतानि वाक्यानि यत्कृत-
कं तदनित्यमिति न्यायानुसारेण कर्मफलानां चिरकालावस्थायित्वबोधकानीति शंक्यं ॥ वचनवि
रोधे न्यायस्याभासत्वादिति शंकायां सूत्रे अतः शब्दः ॥ ननु न शब्देनाथशब्दलभ्यविवेकादेर्यदि ग्र
हणं तदा अथशब्देनोक्तस्यैव पुनरतः शब्देन परामर्शकृत्वात्तस्य जिज्ञासां प्रति हेतुत्वं प्रतिपाद्यत इति
वक्तव्यं तच्चायुक्तं आनंतर्याभिधायकाथशब्देन तल्लाभादिति चेन्न ॥ अथशब्देनोक्तस्यैव पुरुषार्था
त्वा अतःशब्देन परामर्शोपि नद्धेनुत्वापवादशंकायाम्यर्थसत्तापयतीति न्यायेन लक्षणया लब्धा
त्मत्वेन परामृश्यते तेन चालब्धात्मत्वशंकोपोद्बलकतया अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भ
वतीति वाक्यं सूच्यते लक्षितेन च तदुपपत्तिनयात् तद्यथेह कर्मचितो लोकः क्षीयते एवमेवास्य पुण्य

चितो लोकः क्षीयत इति वाक्यं सूच्यते ॥ एतेनाथशब्दोक्ताधिकारानभिधायिनापवादशंकानिरासे अथ
शब्दे नैव तन्निरासप्रसंगादिति चंद्रिकोक्तं विवरणदूषणं परास्तं ॥ तथा च न केवलमुक्तन्यायेनोक्तश्रु-
तीनामन्यथानयनं किंतु न्यायोपोद्बलितश्रुत्या तद्यथेह इत्यादिश्रुतिर्हि यत्कृतकं तदनित्यमिति न्यायम-
नूद्य कर्मफलानित्यत्वं प्रतिपादयति अतः सा श्रुतिरुपपत्तिरूपतात्पर्यलिंगसहिता तद्रहिता अक्षय्यमि
त्यादिश्रुतितो बलवती एवं आत्तो वै सशरीरः प्रियाप्रियाभ्यामिति वचनं तथा न ह वै सशरीरस्य प्रिया
प्रिययोरपहतिरस्तीति वचनं चोपपत्तिरूपतात्पर्यलिंगसहितं स्वर्गे लोके न भयमित्यादिवाक्यात्
बलवत् ॥ अपि च विधिशिष्टहिरण्यगर्भस्यैव भयमाम्नायते सोऽबिभेत् स वै नैव रेमे इति का कथा इतरेषां
तस्मादक्षय्यमित्यादिवाक्यमापेक्षिकामृतत्वाभिप्रायं तथा स्मृत्युपबृंहितं आभूतसंप्लवं स्थानममृतत्वं
भाष्यत इति न विवेकाद्यसिद्धिः ॥ अत इति ल्यप्लोपे पंचमी न तथा चेमां मुमुक्षामवाप्येत्यर्थ इति के-
चित् ॥ अस्मिन्नर्थे न परोक्तदूषणावकाशोऽपि तरति शोकमात्मवित् विद्वान्नामरूपाद्विमुक्तः ब्रह्मवि
द्ब्रह्मैव भवति तमेव विदित्वातिमृत्युमेति ॥ यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ॥ तदा देवमविज्ञा
य दुःखस्यान्तो भविष्यति ॥ तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य साधनं ॥ ज्ञानेन त्वाहते तस्मिन् सर्वं ब्रह्म
मयं भवेत् ॥ तत्त्वमस्यादिवाक्योत्थं यज्जीवपरमात्मनोः अभेदविषयं ज्ञानं तदिदं मोक्षसाधनमित्यादि

श्रुतिस्मृतिवाक्यैर्निर्विकल्पकसाक्षात्कारात्मकाखंडब्रम्हज्ञानस्य मोक्षसाधनत्वमवगम्यते तच्चज्ञा
नं मुमुक्षोंतसाधनसंपत्त्यनंतरं शुभतमकर्मभिराराधितेश्वरप्रसादजनितासंभावनादिसकलचित्त
दोषनिवृत्तेः शुद्धचित्तस्यैकस्य चित्साक्षिमात्रभास्यप्रमात्वकरूपस्वतःप्रामाण्यकवेदांतवाक्येभ्य
एव संभवतीति तं प्रति विचारशास्त्रस्य वैय्यर्थ्येपि आपाततो विरुद्धार्थकतया प्रतीयमानानि वा-
क्यांतराण्यालोचयतः असंजातचित्तदोषनिवृत्तेः संजाततात्पर्यसंशयस्य मंदाधिकारिणः उत्सर्ग
सिद्धनिरुक्तस्वतःप्रमात्वकवेदांतेभ्यो जातज्ञानस्यापि स्वतःप्रमात्वापवादकतात्पर्यभ्रमसंशया
दिनानिश्चितप्रामाण्यकत्वस्य संदिग्धप्रामाण्यकत्वस्य च वा दुर्वारतया नाविद्यानिवर्तकत्वमिति
तात्पर्यभ्रमसंशयादिनिरासाय विचारशास्त्रमावश्यकमित्यभिप्रायेण ब्रम्हजिज्ञासोपदिष्टा भग-
वता सूत्रकारेण ॥ तदुक्तं श्रीमता भाष्यकारेण ब्रम्हजिज्ञासापदस्यावयवार्थकथनावसरे ज्ञातुमिच्छा-
जिज्ञासा अवगतिपर्यंतं ज्ञानं सन्वाच्याया इच्छायाः कर्मफलविषयत्वादिच्छायाः ज्ञानेन हि प्रमाणे-
नावगंतुमिष्टं ब्रम्ह ब्रह्मावगतिर्हि पुरुषार्थः निःशेषसंसारबीजाविद्यानिबर्हणादिति तत्रायमर्थः ॥ नन्व
नवगते वस्तुनि इच्छाया अदर्शनात्तस्या मूलभूतं विषयज्ञानं वक्तव्यं ब्रम्हज्ञानं तु जिज्ञासायाः फलं
तदेव कथं मूलमित्याशंक्याहावगतीति ॥ आवरणनिवृत्तिरूपाभिव्यक्तिमच्चैतन्यमवगतिः तत्पर्यं

तोऽवधिर्यस्यात्मसाक्षात्कारस्य तद्वृत्तिज्ञानस्य तदेवं जिज्ञासायाः कर्मत्वे तदेव फलं मूलं त्वापातज्ञान
मिति फलमूलज्ञानयोर्भेदान्न जिज्ञासानुपपत्तिः ॥ ननु गमनस्य ग्रामः कर्म तत्प्राप्तिः फलमिति भेदा
त्कर्मैव फलमित्ययुक्तमित्याशंक्याह कर्मेति ॥ क्रियांतरेण भेदेपि स्वविषयेच्छादिरूपायाः क्रियायाः
फलविषयत्वात्कर्मैव फलमित्यर्थः ॥ ननु ज्ञानावगत्योरैक्याद्भेदोक्तिरयुक्तेत्यत आह ॥ ज्ञानेनेति ज्ञा
नं वृत्तिरवगतिस्तत्फलमिति भेद इति भावः ॥ अवगंतुमभिव्य   ज्यितुं अवगतेः फलत्वं स्फुटय-
ति ब्रह्मेति ॥ हि शब्दोक्तं हेतुमाह निःशेषेति ॥ बीजमविद्या आदिर्यस्यानर्थस्य तन्नाशकत्वादित्यर्थः ॥
ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा ब्रह्मेत्य जन्माद्यस्य यत इति वक्ष्यमाणलक्षणं न ब्राह्मणत्वादिजाति-
वेदकमलासनादिस्तथा सति जगत्कारणत्वलक्षणप्रतिपादकसूत्रासांगत्यप्रसंगात् ब्रह्मण इति
कर्मणि षष्ठी न शेषे जिज्ञासेत्यत्र सन्प्रत्ययवाच्यायाः इच्छाया ज्ञानं कर्म तस्य ज्ञानस्य ब्रह्म कर्म तत्र
सकर्मकक्रियायाः कर्मज्ञानं विना ज्ञातुमशक्यत्वादिच्छाया विषयज्ञानजन्यत्वाच्च प्रथमापेक्षितं क
र्मैव षष्ठ्या वाच्यमिति युक्तं ॥ नन्वब्रह्मविषयकप्रमाणादिकमन्यदेव शेषषष्ठीपक्षे तत्कर्मास्तु ब्र
ह्म तु शेषितया तत्र संबध्यतामिति वाच्यं तथासति श्रुतं कर्मत्यक्त्वान्यदश्रुतं कर्मकल्पयतः पिंडमुत्सृ
ज्य करं लेढीति न्यायेन प्रयासवैफल्यात् ॥ ननु शेषषष्ठीपक्षे ब्रह्मसंबंधिजिज्ञासा प्रतिज्ञा लाभेन ब्र

ब्रह्माश्रितलक्षणप्रमाणयुक्तिज्ञानसाधनफलानामपि विचारप्रतिज्ञालाभो भवतीति तज्जिज्ञासया अ-
पि ब्रह्मज्ञानार्थत्वेन ब्रह्मसंबंधित्वात् कर्मषष्ठ्यां तु ब्रह्मकर्मकविचारः प्रतिज्ञातो भवतीति न प्रयास
वैफल्यमिति वाच्यं ॥ सूत्रेण मुख्यतः प्रधानस्य ब्रह्मणः विचारे प्रतिज्ञाते यैर्विचारितैर्विना ब्रह्मविचा
रितं न भवति तेषामुपकरणानां विचारस्यार्थिकप्रतिज्ञासिद्धेः ॥ तद्धि जिज्ञासस्वेति जिज्ञासामूलभू
तश्रुतौ द्वितीयया मुख्यत एव ब्रह्मणः कर्मत्वोक्तेः श्रुतिसूत्रयोरैकार्थ्याय कर्मणि षष्ठ्या एवोचितत्वा-
त् स्पष्टं चेदं भाष्यादौ विवरणमते जिज्ञासाशब्दः ज्ञातुमिच्छा जिज्ञासेति योगेन ज्ञानेच्छायां यौगिकः
ज्ञा धातोर्ज्ञानार्थकत्वात् सन्प्रत्ययस्येच्छार्थकत्वात् इष्यमाणफलीभूतज्ञानानुकूलेच्छासाध्ये वि-
चारे निरूढलाक्षणिकः ॥ अथातः शब्दौ पूर्वोक्तार्थकावेव कर्तव्यपदं चाध्याहार्यं तथा च विवरणमते
अथ नित्यानित्यवस्तुविवेकादिसाधनसंपत्त्यनंतरम् अत उक्तश्रुतीनां सत्त्वात् मुमुक्षुणेष्यमाणफलीभू
तब्रह्मज्ञानाय वेदांतवाक्यैस्तादृशज्ञानानुकूलविचारः कर्तव्य इति सूत्राक्षरार्थः ॥ यत्तु जिज्ञासाश
ब्दो हीच्छामज्ञात्वैव विजानते विचारं लौकिकास्तेन न तत्रायं रूढ इष्यते अन्यथा मंडपादीनां ग्रहादौ स्या
न्न रूढता गंगाशब्दात्तु तीरादेरत्र पूर्वं प्रकाशते ॥ तथाहि जिज्ञासाशब्दान्मीमांसाशब्दादिवेच्छाप्रती
त्यभावेऽपि विचारः प्रतीयते अन्यथा बुभुत्सापदादपि विलंबेन तत्प्रतीतिसंभवात् नियमेन जिज्ञासापदं

नच युज्येत स्वीकृतश्चेत्तथापि विचारसाध्यज्ञानेच्छा जिज्ञासापदात्प्रतीयते नोपदेशमात्रसाध्य
ज्ञानविषयेच्छेति वदता विचारप्रतीतेरिच्छाप्रतीतिपूर्वकत्वाभावः एवं च तत्र हि जिज्ञासस्वेत्यादावस्मिं
श्च सूत्रे नविधौ लक्षणा अन्यथा लोके मंडपशब्दस्य मंडपानकर्तृरूपयौगिकार्थसंबंधात्गृहविशेषे
प्रवीणकुशलादिशब्दानां च प्रकृष्टवीणावादकादिगतप्रागल्भ्यगुणयोगादेव निपुणे वाजिशब्द-
स्य वाजशब्दवाच्यान्नवत्संबंधादश्वजातौ प्रयोगसंभवाद्रूढिर्न स्यात् ॥ वेदेचापरिमितं देयमित्या
धानप्रकरणे श्रुतस्यापरिमितशब्दस्य परिमितान्यरूपमुख्यार्थनिष्ठानेकत्वरूपगुणयोगादेव बहु
त्वपति प्रयोगसंभवात्रूढिर्न स्यात् ॥ उक्ता च रूढिरिष्टैव ॥ न च प्रवीणादिशब्देष्टापत्तिः यौगिका
र्थप्रतीत्यभावेपि नैपुण्यप्रतीतेः ॥ न चैवं वैश्वदेवेन यजेतेत्यादौ वैश्वदेवीमामिति वाक्यविहितयागे
यौगिकस्य वैश्वदेवशब्दस्य वैश्वदेवा वैश्वदेवसमुदाये गंगादिपदादिश्चनीरादौ लक्षणा न स्यात् किंतु रू
ढिरेव स्यादिति वाच्यं ॥ तत्र मुख्यार्थप्रतीतिपूर्वकमेवेतरप्रतीतेः प्रकृते च तदभावादित्यस्योक्तत्वात्
किंच ज्ञानसामान्येच्छायास्तन्मते शक्यत्वाभावादपरोक्षज्ञानेच्छायां च जिज्ञासाशब्दस्यावयवशक्त्यभा
वात् समुदायशक्तेः कल्प्यत्वाविशेषे विचारे समुदायशक्तिरपरोक्षेच्छायां च लक्षणेत्येव किं न स्यात् त
स्मात् जिज्ञासाशब्दो विचारे रूढ एवेति परेणोक्तं न दसत् ॥ जिज्ञासाशब्दादिच्छाप्रतीतिं विना विचार

प्रतीतेरसिद्धेरन्यथानिरूढलाक्षणिके सर्वत्रैवेत्यमाख्यातुं शक्यत यानिरूढलक्षणोच्छेदप्रसंगात्
उक्ता हि साकाव्यप्रकाशव्याख्यायां कुशलादिपदेषु ॥ कर्मणि कुशल इत्यादौ दर्भग्रहणायोगान्मुख्या
र्थबाधे विवेचकत्वादौ संबंधे रूढितः प्रसिद्धेरिति ॥ काव्यप्रदीपेपि रूढितो यथा कर्मणि कुशल इत्या
दौ ॥ अत्र दर्भग्रहणायोग्यत्वान्मुख्यार्थबाधः विवेचकत्वं च संबंधः एवं त्वगादिपदानां चर्मवाचका
नां त्वगिंद्रियादावपीति ॥ यद्यपि कैश्चिदालंकारिकादिभिः ॥ . कुशललावण्यकुंडलादिपदेषु दक्ष
त्वादिकं प्रवृत्तिनिमित्तमवलंब्यावयवार्थाप्रतीतावपि तत्प्रतीतिं चोपेत्य रूढिरेवोपगता तथापि यत्र
प्रवृत्तिनिमित्तस्यावयवार्थप्रयोगप्राचुर्याभावात्तस्य झटित्यप्रतीतिर्बाधप्रतिसंधानं विना ...पि तत्प्र
तीतिश्च तत्रैव रूढिशक्तिरुपगता न त्वन्यत्रापि यथोक्तं काव्यप्रदीपोद्योते कुशलो लावण्यं मंडपः कुं
डलमित्यादौ व्युत्पत्तिनिमित्तस्य झटित्यप्रतीतेर्बाधप्रतिसंधानं विनापि प्रतीतेश्च कुचैः कलशि कुशल
पदस्य साधनाच्च रूढिशक्तिरेवात्रेति केचित् इत एवास्वरसादाह त्वगिति एवं तैलपदस्य तिलविका
रद्रवे शक्तस्य सार्षपेपि निरूढलक्षणेति कश्चिदवयवार्थाप्रतीतावपि तत्प्रतीतिरस्तीति तु शंगादि
पदात् क्वचित् प्रवाहादिप्रतीतिं विनापि जायमानतया तीरप्रतीत्यासम्भवास्य तेन कुशलमंडपा
दिशब्देष्विवात्रावयवार्थमंथरप्रवृत्तिकः किं पदस्य जिज्ञासिते शक्तिः आनंतर्याभिधानप्रयोज

कजिज्ञासाजनकज्ञानविषयोऽर्थः संगानिरित्यादिप्रचुरप्रयोगस्य ज्ञानेच्छायामप्युपलंभात् ॥ एतेन
शाजिज्ञाद्वौव्याख्यातः ॥ यत्वपरिमितंदेयमित्यत्रापरिमितशब्दस्य बहुत्ववाचकत्वमुक्तं तदयुक्तं ॥
परिमितान्यसुरत्वार्थस्यालौकत्वात् प्रक्रान्तपरिमित्यभावस्य लक्षणैकगम्यत्वाच्च ॥ विवरणमतेज्ञा
नसामान्येच्छाया असत्वकथनं तु ज्ञानं खल्विष्यमाणविषयेण सहावगतमिष्यते अनवगतविषये इ
च्छाया अयोगात् तत्र च प्रतिपन्ने वस्तुनि ज्ञानमिष्यमाणं संदिग्धनिश्चयफलं वा परोक्षे ऽपरोक्षफलं
वेष्यते इति तन्मतस्य विवरणायं येनाचार्यानभिप्रेतत्वात् पूर्वमेव व्याख्यातं ॥ घटेन जलमाहरेत्या
दौ योग्यतया छिद्रेतरघटादेरिव निश्चयरूपस्यापरोक्षरूपस्य वा ज्ञानस्य योग्यतया जिज्ञासापदा
भ्दानेऽपि न तत्र तादृप्येण ज्ञाधातुर्बोध्यत्वमपि विचारसाध्यज्ञानेच्छात्वेनापि न तद्बोध्यता किंतु वस्तुतो
यद्विचारसाध्यं ज्ञानं तद्विषयकेच्छाया ज्ञानेच्छात्वसामान्येनैवेति जिज्ञासाशब्दे विचारसाध्यापरो
क्षज्ञानेच्छावाचकत्वमस्माकमनुमतमित्यपि न युक्तं ॥ एवं ज्ञानेच्छारूपवाच्यार्थसंबंधिनि विचारे
निरूढलक्षणेति मतेन काचिदनुपपत्तिः ॥ विधिस्थलेऽपि लक्षणान्यायानुगृहीतानदोषायेति तु सर्व
संमतं ॥ निबंधे तु जिज्ञासानामनविचारः इच्छायां सन्विधानात् ॥ न च शास्त्रप्रवृत्त्यंगविषयप्रयोजन
सूचनेन स्वार्थपरत्वोपपत्तौ विचारलक्षणमयुक्तं एवं च मुमुक्षानंतरं ब्रह्मजिज्ञासा भवितुं युक्तेत्येवं श्री

तः सूत्रार्थः विचारस्त्वार्थिकः ज्ञातुमिच्छा हि संदिग्धे विषये निर्णयाय भवति निर्णयश्च विचारसापेक्ष
इति इच्छानिमित्तेन विचाराक्षेपादार्थिके चास्मिन्नर्थे कर्तव्यपदाध्याहार इत्युक्तं ॥ यत्तु श्रौतार्थेऽनुवा
दत्वापत्तिरिति परोक्तदूषणं ॥ तदसत् सुफलानुवादत्वस्येष्टत्वात् फलस्य दर्शितत्वात् ॥ निबंधम
तेन हि जिज्ञासस्वेत्यादेरप्यविधिरूपत्वान्न सूत्रस्य श्रुत्यननुसारिता आर्थिके विचारे कर्तव्यता
भिधानं च सिद्धांतकोटिनिगमनरूपतया न निष्फलं विचारस्यार्थं चय एव शास्त्रारंभसिद्धेः विचारं
विना इच्छाया अनुपपत्तिरित्यस्य तं विना इच्छाया विषयसिध्यनुपपत्तिरित्यर्थः ॥ एतेन तद्धि जि
ज्ञासस्वेति श्रुत्यनुसारिणा सूत्रेणेच्छाया अविधेयत्वेन लक्षणयापि विचारस्य विधेयत्वमावश्यकं
किं चैवं सति जिज्ञासासंभवप्रदर्शनमात्रेण नैराकांक्ष्यान्नार्थिकविचारकर्तव्यतापरत्वं शास्त्रारंभव
त्त्वस्य फलत्वेनैव सिद्धेः कथं च विचारं विनेच्छाया अनुपपत्तिः येन विचाराक्षेपकता न हि कारणस्य
कार्यं विनानुपपत्तिः ॥ ननु इच्छा विचारसामग्रीफलेच्छायां सत्यामपि साधनानुष्ठानादिति परमतमपि
तं निरस्तं ॥ कोसुयांतु यस्मादधिकारिणां ब्रह्मज्ञानेच्छासंपन्नानां स्यात् ब्रह्मविचारः कर्तव्य इत्यर्थान्तर-
वाक्ये श्रुत्या इच्छापरत्वेपि महावाक्ये लक्षणया विचारपर इत्युभयपरो जिज्ञासाशब्द इत्युक्तं ॥ नच
त्र युगपत् वृत्तिद्वयप्रसंगः आवृत्तौ वृत्तिद्वयस्यादोषत्वात् अनावृत्तावपि गंगायां मत्स्यघोषौ स्त

इत्यादौ श्रुतिहृदयाभ्युपगमाच्च विषयत्वेन फलत्वेन च सूचनस्य जिज्ञासापदेन च सम्भवाच्च स
प्रयोजनानेकार्थत्वं हि सूत्राणां विद्वतो मुखत्वलक्षणत्वात् भूषणमेव ॥ अत्र प्रसंगात्प
रोक्तदूषणानां निरासाय तत्पुनर्ब्रह्म प्रसिद्धमप्रसिद्धं वा स्यात् यदि प्रसिद्धं न जिज्ञासितव्य
म् अथाप्रसिद्धं नैव शक्यं जिज्ञासितुमिति उच्यते ॥ अस्ति तावत् ब्रह्म नित्यशुद्धबुद्धमुक्तस्व
भावं सर्वज्ञं सर्वशक्तिसमन्वितं ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रती
यन्ते बृहतेर्धातोरर्थानुगमात् सर्वस्यात्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धिः सर्वो ह्यात्मास्तित्वं प्रत्ये-
ति न नाहमस्मीति यदि हि नात्मास्तित्वप्रसिद्धिः स्यात् सर्वो लोको नाहमस्मीति प्रतीयात् आत्मा च
ब्रह्म यदि तर्हि लोके ब्रह्मात्मत्वेन प्रसिद्धमस्ति ततो ज्ञातमेवेत्यजिज्ञास्यत्वं पुनरापन्नं ॥ न
तद्विशेषं प्रति विप्रतिपत्तेः ॥ देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृता जना लोकायति
काश्च प्रतिपन्नाः इंद्रियाण्येव चेतनान्यात्मेत्यपरे ॥ मन इत्यन्ये ॥ विज्ञानमात्रं क्षणिक
मित्येके ॥ शून्यमित्यपरे ॥ अस्ति देहादिव्यतिरिक्तः संसारी कर्ता भोक्तेत्यपरे ॥ भोक्तैव केव
लं न कर्तेत्येके ॥ अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित् ॥ आत्मा स भोक्तु
रित्यपरे ॥ एवं बहवो विप्रतिपन्नाः युक्तिवाक्यतदाभाससमाश्रयाः संतः तत्राविचार्य किं

चित् प्रतिपाद्यमानो निःश्रेयसप्रतिद्वन्द्वेन अनर्थहेयात् तस्मात् ब्रह्मजिज्ञासोपन्यासमु-
खेन वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयत इति भाष्यं-
संक्षेपतो व्याख्यायते ॥ प्रथमवर्णके बंधस्याध्यस्तत्वात्स्याविषयत्वादिप्रसिद्धावपि ब्र-
ह्मसिद्ध्यप्रसिद्ध्योर्विषयादिसंभवासंभवाभ्यां शास्त्रारंभसंदेहे पूर्वपक्षमाह तत्तु-
नरिति ॥ तत्रायमाशयः वेदान्तमहावाक्यतात्पर्यनिर्णयेन तादृशवाक्यार्थप्रतिपत्तिप्रयोजनमि-
दं शास्त्रमित्युक्तं न युक्तं नहि तत्त्वपदार्थप्रसिद्ध्यभावेन तादृशवाक्यार्थस्य दुर्ज्ञेयत्वात् ॥ पद
चाधीतसांगस्याध्यायस्य निगमनिरुक्तव्याकरणादिना ब्रह्मादिपदानां प्रसिद्धिस्तर्हि-
तत एव पदार्थज्ञानवद्वाक्यार्थज्ञानमपि विनैव विचारं सिध्यतीति विचारवैयर्थ्यमेवेति
नारंभणीयं शास्त्रमिति ॥ उच्यत इति सिद्धान्तभाष्यं ॥ तत्रास्ति तावत् ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभा-
वमित्यादि सर्वस्यात्मत्वाच्चेत्यतः प्राकृतनं तत्पदार्थप्रसिद्धिप्रदर्शनपरं सर्वस्यात्मत्वाच्चेत्यादि
प्रतीयादित्यंतं त्वंपदार्थप्रसिद्धिप्रदर्शनपरं आत्मा च ब्रह्मेति भाष्यमुक्तपदार्थभागैक्यवाक्यार्थप्रति-
त्त्युपयोगितामदर्शनपरं यदि तर्हीत्यादि पुनरापन्नमित्यंतं पूर्वोक्ताक्षेपकर्मांशस्फुटीकरणपरं॥

नतद्विशेषं प्रति विप्रतिपत्तेरित्यादिभाष्यं चाप्रामाण्यज्ञानानास्कंदिततन्निर्णयात्मनो मुख्याधिकारिनि
वर्तकतावच्छेदकशक्तिमतो ज्ञानस्य प्रागसत्त्वप्रदर्शनेन विचारसाफल्योपपादकं ॥ तत्राधिक
रण्यायानां बलाबलज्ञाननिर्णये सत्यपि पक्षतया तत्त्वानिर्णयप्रतिरोधः तत्संशयाद्यावान्निश्चये कथं
चित्ज्ञाने अप्रामाण्यसंशयोत्पादुर्वारः दुर्लभश्चाप्रामाण्यज्ञानविशेषोऽसति प्रतिबंधकयोरसंभाव
नाविपरीतभावनयोः प्रतिबंध इत्यवश्यं कर्तव्यो विचार इत्यभिप्रायकं ॥ तत्र कर्तृत्वाद्युपलक्षि
तं जगत्कारणत्वाद्युपलक्षितसच्चिदानंदघनब्रह्मैक्यरूपवाक्यार्थप्रतिपत्तौ विरोधिनीर्विप्रतिप
त्तीराह देहमात्रमित्यादिना ॥ तत्र त्वंपदार्थधर्मिकाः विप्रतिपत्तयो लोकायतादिसांख्यांतानां ॥ तत
श्चास्ति तद्व्यतिरिक्त इति विप्रतिपत्तिः सेश्वरसांख्यकणभुगक्षपादपाशुपतादीनां ॥ आत्मा स भो
क्तुरिति तु सिद्धांतकोटिप्रदर्शनं ॥ स सर्वज्ञत्वाद्युपलक्षितानंतसच्चिदानंदघनः परमात्मा भोक्तु
रौपाधिकभोगवतो जीवस्यात्मा पारमार्थिकं रूपमिति तदर्थः ॥ एतेन ब्रह्मणो जिज्ञास्यत्वार्थमेव
प्रत्यगर्थेऽहमस्मीति प्रत्यक्षरूपेण सामान्येन प्रतिपत्तिश्चार्वाकानामहमर्थे देहेंद्रियमनःशून्य
त्वादिविप्रतिपत्तेर्विशेषप्रतिपत्तिश्चेत्युक्तमिति चंद्रिकादावस्मन्मतमनूद्य नचैतद्युक्तं ॥ व्यधिक
रणत्वात् ॥ प्रत्यगर्थो ब्रह्मैवेति चेदस्तु तावत्तथापि न तावता धर्म्यंशं ब्रह्मजिज्ञासा धर्मिप्रतिबिंबे-

जिज्ञासायामदर्शनेन ब्रह्मोद्देश्यप्रत्यगभेदादिविधानाय ब्रह्मण्येव तयोर्*वक्तव्यत्वात् ॥ नापि देह-
त्वादिनाविप्रतिपन्नः प्रतिबिंबः प्रत्यगर्थ एव जिज्ञासाधर्मी ॥ प्रतीचो ब्रह्मत्वेन जिज्ञासा च ब्रह्मजिज्ञासेति यु-
क्तं ॥ लोके निश्चितेन धर्मिणि वा निश्चितेन प्रकारेण विचारपदप्रयोगेण सूत्रे अश्रुतप्रत्यक्पद-
कल्पनापातात् धर्मजिज्ञासेत्यादाविव श्रुतस्य ब्रह्मपदस्य कथं विचार इति प्रथमाकांक्षित धर्मि-
परत्वसंभवेन तत्परित्यागेन तद्विपरीतप्रकारपरत्वे श्रुतहानापाताच्च विरुद्धांशत्यागेन सुखमात्रस्ये-
व चिन्मात्रस्यैवाभेदस्वीकारेण विशिष्टयोरभेदाभावेन ब्रह्माभेदविधानाय तस्योद्देश्यत्वासंभवा-
च्च ॥ किंच धर्मिण्यतदारोपनिमित्तत्वाल्लक्षणस्योत्तरसूत्रे प्रत्यगर्थः ब्रह्मत्वेन लक्षणीयः स्या-
त् न हि वस्तुतः पुरुषे इदं त्वादिना ज्ञायमाने स्थाणुत्वारोपः करचरणादिमान्पुरुष इति पुरु-
षलक्षणोक्त्या निवर्तते किंत्वयमित्याद्युक्त्या न वा जिज्ञासुना प्रतीचो ब्रह्मत्वं निश्चितं येन ब्रह्म-
णि लक्षिते प्रतीचि लक्षणविरोधाकारो मिथ्येति ज्ञायेत नापि लक्षणं प्रतीचोऽसाधारणधर्मत-
या तेन निश्चितं येन ब्रह्मणि तत्कथनमुखेन ब्रह्माभेदो ज्ञायेत तत्त्वपक्षेपि शारीरश्चोभयेऽपि हि भे-
देनैनमधीयते प्राणभृच्च अधिकं तु भेदनिर्देशादित्यादौ जन्मादिसूत्रोक्तलक्षणस्य जीवे निषेधात्-

*उक्तसामान्यविशेषप्रतिपत्त्योः

अत एवोभयानुगतचिन्मात्रे त्वंपदलक्ष्ये विप्रतिपत्तिः जिज्ञासाधर्मि तु विंब्रह्म चिन्मात्रमेवेति प्रत्यु
क्तं विशेष्यमात्रे विप्रतिपत्त्या विशिष्टधर्मिकविचारादर्शनात् विशिष्टस्य मुमुक्षुभिरविचार्यत्वा-
च्चिन्मात्रे देहत्वादिविप्रतिपत्तेरभावाच्च सौत्रब्रह्मशब्दास्वारस्याच्च ॥ अथ जिज्ञासाधर्मिणि ब्र
ह्मण्येव प्रतीचोऽन्यन्न वेति विप्रतिपत्तेर्न वैयधिकरण्यं तर्हि भवदीयभाष्ये इह सूत्रे प्रतीचि देह
त्वादिविप्रतिपत्त्युक्तिरुत्तरसूत्रे जीवाभेदकस्य लक्षणस्योक्तिश्चायुक्ता॥ किंच ज्ञातं सामान्यतो ज्ञातं विशेषे
णाविचार्यते ज्ञाताज्ञातविभागस्तु निर्विशेषे न युज्यते ॥ उक्तं चानुव्याख्याने इदमित्थमिति ज्ञानं जिज्ञा
सायाः प्रयोजनमिति दूषणोद्भावनं परास्तं ॥ निरंकुशबृहत्ववाचिना ब्रह्मशब्देन च जिज्ञास्यस
र्वज्ञत्वाद्युपलक्षिते वस्तुनि जीवतात्त्विकरूपाभेदस्यापि लब्धत्वेन सर्वज्ञत्वाद्युपलक्षितप्रत्यग
भिन्नधर्मिजिज्ञासायाः कर्तव्यतालाभात् तादृशधर्मिज्ञानस्य चाधीतैः सांगैर्वेदांतैरेव सिद्धतया
तदर्थविचारो न कर्तव्य इत्याशंकायामध्ययनमात्रसिद्धा प्रतीतिः नाज्ञाननिवर्तनक्षमा तात्पर्य-
संशयस्यानपोदितत्वेन संशयरूपत्वादप्रामाण्यशंकास्कंदितत्वात् असंभावनादिरूपाज्ञाननिव
र्तकतावच्छेदकशक्तिविरोधिदोषसान्निध्याच्च ॥ तात्पर्यसंशयश्च वादिविप्रतिपत्त्या ॥ यदि जी
वस्य तात्त्विकं रूपं देहेंद्रियादि तस्य ब्रह्माभेदायोगः यदि क्षणिकं विज्ञानं तदा नित्याभेदायोगः य

दिभून्यं तदा सदभेदायोगः यदि च स्वाभाविकपरमार्थकर्तृत्वभोक्तृत्वादिमत् तदा तादृशसर्व
ज्ञत्वाद्युपलक्षितब्रह्माभेदायोगः भोक्तैव केवलमिति सांख्यपक्षेपि जीवानां परस्परं भेदोपग-
मात् निरंकुशापरिच्छेदभून्यवस्तुभेदायोगइति जीवस्य यदनौपाधिकं त्वंपदलक्षणीयं रूपं
तत् देह एवेत्यादिविप्रतिपत्तयो भवंति अनपोदितानिर्णीतबलाबलाश्च तात्पर्यसंज्ञायद्वारा
वाक्यार्थनिर्णये तन्निश्चयधर्मिकाप्रामाण्यग्रहे असंभावनाविपरीतभावनादिदृढीकरणे च-
हेतवः एवं तत्पदार्थधर्मिकविप्रतिपत्तावप्यूह्यमिति द्वैयधिकरण्यशंकावकाशः कृताकृतहा
नमश्रुतकल्पनं वास्पष्टश्चायमर्थो निबंधकल्पतर्वादिषु दर्शितः ॥ पंचपादिकायामपि ताश्च वस्तु
तो ब्रह्मपदार्थविषया एव तदेकार्थत्वात् ब्रह्मज्ञानस्येत्युक्तं तत्र तदेकार्थत्वादित्यस्य प्रत्यगभि-
न्नार्थकत्वादित्यर्थः ॥ पूर्वोक्तरीत्या वस्तुपरिच्छेदराहित्यबोधनेन तल्लाभादिति भावः ॥ एवं ब्रह्म
णि विप्रतिपत्तिप्रदर्शनस्य प्रक्रांतत्वात् अहंप्रत्ययविषयविप्रतिपत्त्यापि प्रणाड्या ब्रह्मविप्रति
पत्तिरेव निर्दिश्यते यतो नाहंप्रत्ययविषयविप्रतिपत्तिप्रदर्शनेन न किंचित् फलमस्ति तस्मात् सा
ध्वेतदात्मा स भोक्तुरित्यपरइति ॥ योयमहमित्युल्लिख्यमानश्चेतनो भोक्ता स ब्रह्मैवेति केचित्
प्रतिपन्नस्तस्याहंप्रत्ययसिद्धौ भोक्तृत्वावभासो मिथ्यैवानाद्यनिर्वाच्याविद्याविलसितः परमा

र्थवस्तु यः सर्वज्ञ ईश्वरोऽहं प्रत्यग्येऽनंतमूर्तिः मां स्वात्माभेदरूपेण भूतेष्ववमत्यो भूतस्य यथान्यथानुब्रह्मशब्दाभिधानीयत्वं लभते इतरथा तद्रूपविकल्पस्य न निरंकुशं धृहत्त्वमिति न ब्रह्मशब्दाभिधेयत्वं स्यादिति पंचपादिकायामेव प्रपंचितं ॥ तत्रायमर्थः प्रनाड्या ॥ परंपरया ॥ ब्रह्मविप्रतिपत्तिरेव ॥ प्रत्यगभिन्नत्रिविधपरिच्छेदशून्यवस्तुविप्रतिपत्तिरेव ॥ उक्तरीत्या प्रतीचो देहेंद्रियादिरूपत्वाभ्युपगमे च शुद्धबुद्ध्याद्यात्मकेतदभेदायोगादिति भावः ॥ अहं प्रत्ययेऽनंतमूर्त इति ॥ अविद्योपाधिकस्यांतःकरणाद्युपाधिकस्य च मायाविद्याविषयत्वतदाश्रयत्वाद्युपाधिकात् जीवात् व्यावहारिकभेदोपगमादिति भावः ॥ तदुपदर्शनार्थमेव भोक्तृत्वादौ भेदकधर्मे अविद्याविलसितत्वाद्यभिधानं ॥ अखंडार्थप्रतीताद्युद्देश्यताविधेयतारूपविषयताद्यनभ्युपगमाच्च विरुद्धांशोत्पादकमक्षानिकरं ॥ एकस्या एव च तादृशविषयताया ज्ञाताज्ञानोभयात्मकवस्तुवृत्तितयोद्देश्यताविधेयतात्मनापरं साध्यवच्छीयते ॥ जन्मादिसूत्रोक्तं लक्षणमप्यविद्यांतःकरणाद्युपाधिकात् कल्पितभेदात् जीवरूपात् व्यावृत्तमेवोपाधिकानिर्वाच्यभेदस्यापि तादृशविरुद्धधर्मासांकर्योपपादकतायाः व्यवस्थापितत्वात् तादृशभेदश्च न नास्तिकाद्युक्तविरोधी ज्ञातं सामान्यतो ज्ञातमित्यादि दूषणाभासश्च प्रागेव निरस्त इति सर्वमनवद्यं ॥

॥श्रीमच्छंकरपादाब्जभूषणे परदूषणे॥ शास्त्रस्याद्याधिकरणे स्वपक्षपरपक्षयोः ॥१॥ सदसत्त्वज्ञापिकेयं रघुनाथकृतिः स्फुटं ॥ भूयात्सतां तोषणाय दुर्वादिविजयाय च ॥२॥

श्रीगणेशाय नमः ॥ मायाकाममपि विशुद्धसत्त्ववपुषं संगृह्य लीलावशात् सृष्ट्यादित्रयमिदं प्रकाशकृत
या सर्वज्ञशब्दोदितः ॥ कोशाकारतया विभाति विभुरप्यंतः परिच्छिन्नवत् तं प्रत्यंचमसंगमद्वयममृतं
संविद्घनं दाम्यहं ॥१॥ यद्विश्वस्थितिभंगकर्तृ तदिह ब्रह्मेति सूत्रोदितं व्याचख्यौ खलु विस्तरेण भग
वानाचार्यवर्यः स्फुटं ॥ तत्राक्षेपशतं निवार्य कुधियामाक्षिप्य तत्कल्पितं यत्नात् शंकरपादभूषणमिदं
पद्यं तु सत्सूरयः ॥२॥ जन्माद्यस्य यतः ॥ प्रथमसूत्रे ब्रह्मस्वरूपप्रमाणादिविचारः प्रतिज्ञातः तत्र
यत्र सर्वविशेषजातं कल्पितं यच्च सत्यज्ञानादिपदार्थेषु धर्मिभूतमखंडं वस्तु वस्तुगत्या स एव ब्रह्म-
शब्दार्थस्तादृशे ब्रह्मणि सर्वे वेदांताः प्रमाणमिति शास्त्रयोनित्वात् तत्तु समन्वयादित्येताभ्यामग्रि
मसूत्राभ्यां क्रियमाणः प्रमाणोपन्यासः जिज्ञास्यत्वाभिमततादृशब्रह्मणः लक्षणेन निर्देशं विना
नाकांक्षित एव स्यात् लक्षणेन ज्ञात एवार्थे प्रमाणाकांक्षोदयादिति लक्षणमुखेन ब्रह्मस्वरूपनिर्णयार्थ
मिदं सूत्रं ॥ तत्र पूर्वाधिकरणे परिच्छेदत्रयरहितस्यात एव प्रत्यगभिन्नस्य ब्रह्मणो जिज्ञास्यत्वमु
क्तं तदिहाक्षिप्यत इत्यनंतरसंगतिः॥ यतो वेत्यादिस्पष्टब्रह्मलिंगानां वाक्यानां ज्ञेये ब्रह्मणि समन्व
यप्रतिपादनादध्यायसंगतिः पादसंगतिश्च ॥ तत्र वाचस्पत्यादिसंमतेत्थमधिकरणरचना ॥ निरु
क्तस्य ब्रह्मणो जिज्ञास्यत्वं संभवति वा न वा तदर्थं यतो वेत्यादिवाक्यं ब्रह्मलक्षणं प्रतिपादयति न वेति-

पूर्वोक्तरयुक्तिभ्यांवक्ष्यमाणाभ्यांसंशयेययावदनुभूयतेतत्सर्वंपरिमितमशुद्धंविध्वंसवत्वंच॥नच
तेनोपलब्धेनतद्विरुद्धंनित्यशुद्धमुक्तबुद्धस्वरूपस्यब्रह्मणःस्वरूपंलक्षयितुंशक्यं॥नहिजातुकश्चि
त्कृतकत्वेननित्यंलक्षयतीतिनयतोवेत्यादिवाक्यंब्रह्मलक्षणार्थं॥नापिसत्यंज्ञानमनंतंब्रह्मेति
वाक्यंतथाभूतब्रह्मलक्षणप्रतिपादकं॥तद्धिसत्यत्वादिधर्मस्यलक्षणत्वंबोधयतिउतसत्यादिरू
पधर्मिणः॥नाद्यः॥जिज्ञास्यत्वेनोक्तस्यपरिच्छेदत्रयरहिताद्वितीयब्रह्मणोविरोधेनतादृशधर्मव
त्वासंभवात्॥नापिद्वितीयःसत्यादिशब्दैर्लोकेसत्यत्वादिधर्मविनिर्मुक्तसत्यादिस्वरूपाव्यवहा
रेणतादृशस्वरूपाप्रसिद्धेः॥नचश्रुत्यैवतादृशधर्मिस्वरूपप्रसिद्धिःयज्जगज्जन्मादिकारणंब्रह्म
तत्सत्याद्यात्मकमित्येवंरूपेणकारणत्वसत्यत्वादिरूपोद्देश्यतावच्छेदकविधेयाद्यनेकधर्मसंसृष्ट
तयाब्रह्मबोधिकायाःश्रुतेःसकलधर्मविनिर्मुक्तधर्मिबोधकत्वासंभवात्॥किंचासाधारणधर्मो
हिलक्षणंनधर्मीअभेदेलक्ष्यलक्षणभावानुपपत्तेरितिपूर्वपक्षे॥यतोवेत्यादिवाक्योक्तंजगज्जन्मा
दिकारणत्वंब्रह्मणोलक्षणंसंभवत्येवतदुक्तंवाचस्पतिमिश्रैः॥माभूदनुभूयमानंजगत्परिच्छिन्नत्वा
त्तद्धर्मतयातदात्मतयावाब्रह्मलक्षणंतदुत्पत्त्यादित्तुभविष्यत्येवदेशांतरप्राप्तिरिवसवितुर्व्रज्यायाइति
॥तस्यचलक्षणस्येतरावृत्तितयाकाल्पनिकसंबंधेनब्रह्मवृत्तितयाचनातिव्याप्त्यसंभवापकाशःकल्पि

तेनापि तेनोपलक्षणेन यद्रजतमभात् सा शुक्तिरिति कल्पितेन रजतेन शुक्तिरिव यज्जगज्जन्मादि
कारणं तद्ब्रह्मेति ब्रह्म लक्ष्यते कल्पितस्य तस्य मिथ्यात्वेन परमार्थतो निर्धर्मकब्रह्मस्वरूपाविरोधित्वा
त् कल्पितत्वेपि तस्य ब्रह्मासाधारणत्वाल्लक्षणत्वमुपपन्नमेवासाधारणधर्मसंबंधो हि लक्ष-
णनिमित्तं न तत्सत्यत्वं काकादीनामसंबद्धानां गृहोपलक्षणत्वादर्शनात् चंद्रस्य शाखाग्रमिव जगज्ज
न्मादिकारणत्वस्य तटस्थतयोपलक्षणत्वविवक्षयाच न विशिष्टत्वे यतापत्त्यादिपरोक्तदूषणं ॥ एवं स
त्यं ज्ञानमनंतमितिच श्रुतिप्रतिपाद्यमखंडं सत्यज्ञानादिस्वरूपमपि ब्रह्मलक्षणं संभवति ॥ नच तादृशवाक्या
नां पूर्वपक्षोक्तरीत्या तादृशाखंडब्रह्मस्वरूपबोधकत्वासंभवः ॥ यथार्थवादवाक्येषु मुख्येर्थेउद्देश्यतावच्छे
दकविधेयादिसंसर्गबोधे सत्यपि लक्षणीयेस्तुतिरूपेन तत्संसर्गोभासते तद्वत् सत्यादिवाक्येषु द्वारीभू
ते मुख्यार्थे तद्भानेपि लक्षिते स्वरूपमात्रेपि न स भासत इति लक्षणया तादृशाखंडब्रह्मस्वरूपबोधक-
त्वाविरोधात् ॥ पर्यवसितबोधे पदांतरार्थसंसर्गभानमावश्यकमिति नियमस्याप्रामाणिकत्वा
च्च ॥ अर्थवादोपस्थितप्राशस्त्यादौ यागदेवतासंबंधभानेपि न प्रकृते पदांतरार्थसंसर्गभानमस
क्तिः ॥ किंचित्तत्र दृष्टमात्रेणाव्याप्यापादने लौकिकवाक्यानां प्रमाणांतरसिद्धार्थ एव प्रामाण्यं
न तु कार्यप्रतिमादिसिद्धे इति दृष्टत्वाज्ज्योतिष्टोमादिवाक्येष्व लौकिकार्थासिद्धिप्रसंगः ॥

तत्र स्वतःप्रमाणवेदवाक्यतात्पर्यानुरोधाल्लोकसिद्धनियमानादरेणालौकिकार्थसिद्धिरिति चेन्नहि प्रकृतेपि तथा वक्तुं शक्यमेव ॥ अपि च प्रकृष्टप्रकाशश्चंद्र इति लौकिकवाक्येष्वपि पदांतरार्थसंसर्गगोचरप्रमितिजनकत्वाभावोपि दृष्टः ॥ नहि तत्र प्रकृष्टप्रकाशः चंद्रेतरव्यावृत्तः चंद्रपदवाच्यो वा इति बोधः संभवति प्रकृष्टप्रकाशवैशिष्ट्यस्य चंद्रेतरव्यावृत्तत्वस्य च प्रत्यक्षेण गृहीतत्वात् ॥ चंद्रत्वं जातिविशेषस्तं प्रवृत्तिनिमित्तीकृत्य तदाश्रये चंद्रपदं प्रवर्तत इति आप्तोपदेशात्पूर्वमेव ग्रहात् ॥ किंच ता-
त्पर्यानुसारेण वाक्यार्थो वर्णनीयस्तत्र यदि वाच्यवाचकाद्यभिप्रायेण प्रश्नस्तदा तत्परत्वमेवास्तु वाक्यस्य न तत्राग्रहः ॥ यदि चंद्रशब्दवाच्यत्वाश्रयो यो व्यक्तिविशेषः स क इति प्रष्टुरभिप्रायस्तदा तन्मात्रप्रश्नोत्तरत्वात्प्रकृष्टप्रकाशस्य ज्ञातत्वेनाजिज्ञासितत्वात्प्रकृष्टप्रकाशानुवादेन तन्मात्रपरत्वमेव ताहशवाक्यस्योपेयं ॥ प्रकृष्टप्रकाशानुवादेन विना व्यक्तिविशेषस्य बोधयितुमशक्यतया तदनुवादः सफलः ॥ नच प्रष्टुर्यावद्बुभुत्सितं तावदपरयं वक्तव्यमित्येव नियमः न तु तदधिकं न वक्तव्यमिति अन्यथा काश्याः को मार्ग इति प्रश्ने तदतिरिक्तमार्गचिन्हगिरिनद्यादिनिरूपणं न स्यादिति वाच्यं ॥ यत्र बुभुत्सितवस्तु भाति यत्तु पयोग्यज्ञातं भवति तत्र प्रष्टुर्जिज्ञासाप्रवत्येयेति तत्र प्रश्नं विनापि वाक्यतात्पर्यस्वीकारेण तन्निरूपणेपि प्रकृते जिज्ञासिते प्रकृष्टप्रकाशसंबंधस्य प्रत्यक्षतो ज्ञातत्वेन तत्र न तात्पर्यं कल्पनीयं किंतु व्यक्तिविशेष एवेति सिद्धं पदांतरार्थसंसर्गगोचरप्र-

मितिजनकत्वाभाववत्त्वं लक्षणवाक्यस्य ॥ इयान् विशेषः लौकिकदर्शितलक्षणवाक्यार्थप्रतिप-
दिकार्थचंद्रस्वरूपे चंद्रत्वसंबंधोभासते सत्यादिवाक्ये सत्यत्वब्रह्मत्वसंसर्गोपि न भासते अपितु प्र-
तिपादकार्थमात्रं मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति उदरमंतरं कुरुते अथ तस्य भयं भवती-
त्यादिश्रुतिभिर्भेददर्शनस्य निंदितत्वेन स्वरूपमात्र एव श्रुतितात्पर्यावगमात् अधिकमखंडार्थवि-
चारे अद्वैतसिद्धितट्टीकादौ द्रष्टव्यं ॥ ननु सत्यादिवाक्ये सत्यादिस्वरूपप्रतिपादकार्थमात्र-
तात्पर्ये तादृशस्यैकेनापि पदेन बोधनसंभवात् पदांतरवैयर्थ्यमेवं ॥ सत्यत्वज्ञानत्वाद्युपलक्षितशु-
द्धानामैक्यनिश्चयाय पदांतरोपादानात् अन्यथा सत्यत्वाद्युपलक्षिताभेदो ज्ञानत्वानंतत्वाद्युपलक्षि-
तशुक्तिरिति भ्रमानिवृत्त्या ब्रह्मस्वरूपमोक्षस्य स्वप्रकाशचिदानंदादिभिन्नेनानवस्त्वरूपेणाभेदबु-
ध्यात तस्मासेरपुरुषार्थत्वं ज्ञानेन तत्साधनश्रवणादौ प्रवृत्त्यनुपपत्तेः ॥ तस्य मिथ्यात्वबुध्या ब्रह्मज्ञाने
मिथ्याविषयकत्वरूपभ्रमत्वज्ञानात्तस्याज्ञाननिवर्तकत्वानुपपत्तिश्च ॥ तावत्सदसतोस्तु समानविभ-
क्तिकसत्यादिपदजन्यशाब्दबुद्धिविषयत्वान्यथानुपपत्त्या सत्यादिपदार्थानामैक्यनिश्चयान्नोक्तभ्रम-
संभव इति सत्यादिवाक्यप्रतिपाद्यमखंडं स्वरूपं लक्षणं कथं चमेवस्वरूपैक्येपि कल्पितलक्ष्यल-
क्षणाकारभेदाभ्युपगमात् नाभेदे लक्ष्यलक्षणभावानुपपत्तिरिति पूर्वपक्षोक्तदोषः ॥ सत्यज्ञानानंता

दित्वरूपं न मुख्यं लक्षणमपि तु तदवगम इतरव्यावृत्तावनुपयुज्यत इति तस्य लक्षणत्वोपचार इ-
ति केचित् ॥ जन्माद्यस्य यत इति सूत्रेण जन्मादीत्यनेन जगज्जन्मादिनिमित्तकारणत्वस्य लक्षणत्व
लाभः यत इति पंचम्यनुरोधात् यतः सत्यादिरूपादित्यर्थविवक्षया सत्यादिरूपस्य स्वरूपलक्षणत्वं
च लभ्यत इति सिद्धांतः ॥ यत्तु चंद्रिकायां अत्र परैरित्यादिनोक्तपूर्वपक्षमनूद्य तन्नेत्यादिना जिज्ञा-
स्यस्येतरव्यावृत्त्यर्थं लक्षणसूत्रेऽस्मद्रीत्या अव्यावृत्तिपूर्वपक्षस्यैवोचितत्वादित्युक्तं ॥ तदविचारर
मणीयं ॥ तुल्यन्यायेनोक्तरीत्या लक्षणाप्रतिपत्तौ लक्षणेनाज्ञाते ऽर्थे विचारासंभवशंकाया अप्यवश्य
निरसनीयत्वेन त्वदुक्तशंकामात्रस्यौचित्ये बीजत्वस्य त्वदेकवेद्यत्वात् ॥ धर्मविचारप्रतिज्ञानंतर
मितरव्यावृत्तधर्मस्वरूपप्रतिपत्त्यै तदनुगुणायाश्चोदनालक्षणोऽर्थो धर्म इति धर्मलक्षणपरसू
त्रप्रवृत्तेरिव ब्रह्मविचारप्रतिज्ञानंतरमितरव्यावृत्तब्रह्मस्वरूपप्रतिपत्त्यै तदनुगुणाया ब्रह्मल
क्षणपरसूत्रप्रवृत्तेरेवोचितत्वेन वाक्यशेषगतब्रह्मशब्दरूढ्या जीवपरत्वपूर्वपक्षस्य त्वदभिमत
स्य सूत्राननुगुणत्वात् ॥ प्रकारांतरेण त्वदुक्तरीतेरग्रे निरसनीयत्वाच्च ॥ यदपि तत्रैव चंद्रिकायां
अनित्यादिरूपस्य शब्दादेः नित्यादिरूपाकाशादेर्लक्षणत्वदर्शनाज्जगत इव कारणत्वस्याप्यनात्म
तया आत्मविरुद्धस्वभावत्वादित्युक्तं ॥ तदभिप्रायस्तु अनित्यशब्दस्य नित्याकाशलक्षणत्वदर्शना

त्सिद्धांतेप्यनात्मभूतस्य कारणत्वादेर्ब्रह्मलक्षणत्वस्वीकाराद्विरुद्धस्वभावयोर्ऐक्यलक्षणाभावानुपपत्तिशंका पूर्वपक्षे न युक्तेति ॥ तदपि वाचस्पत्यादिनिबंधहृदयानवबोधनिबंधनं ॥ शब्दस्य जगत्कारणत्वादेश्चाविरुद्धस्वभावस्य गगनब्रह्मादिस्वरूपलक्षणत्वासंभवस्यैव तत्रोक्तत्वात् ॥ अत एव तेन च ब्रह्मणः स्वरूपं न लक्षयितुं शक्यमिति पूर्वपक्षग्रंथे वाचस्पतिमिश्रैरुक्तं अन्यथा ब्रह्म लक्षयितुं न शक्यमिति विन्यासो पेक्षायां बीजाभावः ॥ ननु जगतः कारणत्वादेर्यातटस्थलक्षणत्वानाक्षेपेन्यूनता स्यादिति तन्निरासाय विरुद्धस्वभावस्यैव तत्रापि हेतुत्वं वक्तव्यं हेत्वंतरानुक्तौ रित्युक्तासंगतिरपरिहार्यैवेति वाच्यं ॥ तत्रोपलब्धमात्रस्य यावदनुभूयते तत्सर्वं परिमितमित्यादिनापरिच्छिन्नताकीर्तनेन धर्मतयोपलब्धस्य परिच्छिन्नवृत्तितासूचनात् अतिव्याप्तेर्धर्मत्वेनानधिगतस्य लक्षणवृत्तित्वाभावेनासंभवस्य चातिस्फुटतयान्यूनताशंकानुदयात् ॥ अत एव वाचस्पतिग्रंथे धर्मलक्षणशंकायां नापि नित्यत्वकारणत्वादीत्यादिना नित्यत्वादिकमेवोक्तं ॥ तस्य चाभाधानामधिकरणस्वरूपत्वपक्षे स्वरूपलक्षणत्वस्यापि संभवात् तेन स्वरूपं लक्ष्यत इत्यनभिधाय तल्लक्ष्यत इत्येवोक्तं ॥ ननु देशांतरप्राप्तेः सवितृभज्यायामसत्वेन तल्लक्षणत्वाभावात् उक्तसिद्धांते देशांतरप्राप्तिरिवेत्यादिनाऽनिबंधेन दृष्टांतोक्त्यसंगतिरिति चेन्न ॥ तत्प्रतीतिजनकप्रती-

त्तिविषयत्वरूपलक्षणत्वमात्रे एवास्य दृष्टांतत्वात् ॥ वस्तुतस्तु दार्ष्टांतिके जगदुत्पत्त्यादावपि नसा
क्षात् ब्रह्मनिष्ठत्वमित्यसंभववारणाय यत इति श्रुतिसौत्रपंचम्यनुरोधाच्च तदुत्पत्तिपदस्य तदुत्प
त्तिकारणतापरत्वं स्वनिरूपितकारणतासंबंधे नोत्पत्तेर्वा लक्षणत्वमपरथं वाच्यं तथा च देशांतर
प्राप्तिपदस्यापि तज्जनकतापरत्वात् देशांतरप्राप्तेरपि स्वनिरूपितजनकतासंबंधेन सवितृक्र-
व्यावृत्तित्वेन तल्लक्षकत्वाद्दानासंगतिः ॥ देशांतरप्राप्तिरित्यस्य च देशभेदावच्छिन्नो महादिक्-
सूर्यसंयोगोर्थः जनकताचासमवायिकारणतारूपाग्राह्या तेन संयोगजनके द्रव्ये नातिव्याप्तिः ॥ सि
द्धांते समवायानभ्युपगमेपि तत्स्थाने तादात्म्यलक्षणसंबंधाभ्युपगमेन नासमवायिकारणत्वं दु-
र्वचं एतेन देशांतरप्राप्तेः सूर्यगत्यनुमापकत्वेपि तल्लक्षणत्वाभावात् ॥ न चात्र सूत्रे यतो वेत्यादिश्रु
तौ उत्पत्त्यादिकमद्वितीये ब्रह्मणि लिंगत्वेनोच्यत इति तत्र यापि स्वीकृतमिति चंद्रिकाकारोक्त श्रु-
क्तसिद्धांतमनूद्य दूषणं निरस्तं निरस्तं च चंद्रिकोक्तं जिज्ञास्यत्वेनाद्यसूत्रे प्रकृतस्य निर्विशेषब्रह्म
णो भ्रमाधिष्ठानत्वेनाकारणत्वात् भ्रमाधिष्ठानत्वस्यैव विवक्षायां श्रुतिसूत्रयोर्जन्मोक्त्ययोगादिति दू
षणं उक्तरीत्योत्पत्तिपदस्य लक्षणया कारणत्वपरतया लक्षीभूतब्रह्मशब्दार्थे निष्प्रपंचत्वमति
प्रत्युपयोगितया अध्यारोपन्यायेन यद्रजतमभात् सा शुक्तिरित्यारोपितरजतस्येवारोपितकार-

पक्षस्योपलक्षणात्तथा निर्विशेषब्रह्मणो लक्षणत्वसंभवस्योपपादितत्वात् ॥ सूत्रे अस्येति जन्ममा-
त्रस्येत्यर्थः ॥ उत्तराधिकरणे वेदनित्यताया दार्ढ्यायोक्तलक्षणाक्षेपपक्षे तु अविद्याद्यनादिभिन्नस्येत्य-
र्थः ॥ जन्मादीति जन्म आदिर्यस्य तज्जन्मादीति विग्रहे जन्मस्थितिभंगं समासार्थः नपुंसकैकवच-
नेन समाहारबोधनात् तथा च जन्मादिभिस्तथहेतुत्वं लक्षणं यतो वेति श्रुत्यनुसारात् ॥ जन्महेतुत्वमवि-
द्याया मध्यस्यतो भंगेपि तद्धेतुत्वमविद्यानाशोपीत्युपपादितं ॥ सत्तास्फूर्तिः स्थितिस्तां भाति चाव-
च्छिन्नाकाशं भाति महाकाशस्येव ब्रह्मणो हेतुत्वं तत्सुलक्षणांतरमिति केचित् ॥ स्थितिसंहा-
राभ्यामुपादानत्वं विवक्षितं नत्वाविद्याया मध्यस्थतो जन्महेतुत्वं तत्र कर्तृत्वरूपं तेनाविद्याद्यन्यं भवति
कर्तृत्वे सति उपादानत्वं लक्षणं फलितं ॥ धूमप्रागभावादिहेतौ धूमत्वस्य प्रागभावावृत्तित्वात्
प्रागभावस्यैव कर्तृत्वस्योपादानत्वावृत्तित्वात् उपादानत्वस्य न वैयर्थ्यमिति परे ॥ सिद्धांते सर्व-
मेव लक्षणवाक्यं वाच्यतावच्छेदकतत्तद्धर्मोपस्थितिद्वारा तदुपलक्षिताखंडव्यक्तितात्पर्यकमि-
त्यंगीक्रियते तथा च यतो वेत्यादिलक्षणवाक्ये सृष्टिस्थितिप्रलयानामेकैककारणत्वोक्तौ तदुपस्थि-
तिद्वारा तदुपलक्षितसत्वरजस्तमसामेकैकगुणोपलक्षितब्रह्मस्वरूपस्यैव वाक्याल्लाभेन तस्यैव महावाक्यतात्प-
र्यविषयत्वं तथा निर्णयेन च महावाक्याधीनमुमुक्षुनिर्णयविषयत्वं स्यात् न तु गुणत्रयोपलक्षितस्य तथा च गुणत्र-

योपलक्षितेनेशस्वरूपेणजीवस्वरूपाभेदाज्ञानसंशयादिकंनविवर्ततेनहि छत्रिमात्रेतात्पर्या
धीनः छत्रीचैत्रइतिवाक्यजन्योऽखंडार्थबोधः छत्रीकुंडलीचासस्थानचैत्रइतिभ्रममहेत्वज्ञाननिव
र्तकत्वेनानुभाविकः तथाचमहावाक्यगततत्पदार्थस्वरूपस्याखंडस्यस्वच्छत्वाद्युपस्थितिद्वारा-
बोधकंयतोवेतिवाक्यमितिनकिमपिव्यर्थमित्यपरे॥ जन्मकारणत्वाद्येकैकस्योपलक्षणतयाल
क्षणत्वसंभवेपिनिरंकुशापरिच्छिन्नत्वोपपादनपरत्वेनकारणत्वांतरस्योपलक्षणत्वेनलक्ष
णत्वाभिधानस्यसप्रयोजनत्वमन्यथाकारणांतरस्यान्यस्यसंभावनायांनिरंकुशापरिच्छिन्नत्व
निर्णयोदुर्घटएवेत्यपिकेचित्॥ यत्तुचंद्रिकायांयच्चोक्तंपरैःजन्मादीत्यत्रोत्पत्तिस्थितिभंगमेवो
च्यतेनलयन्यत्यतोवेत्यादिश्रुत्यनुसारादित्यादिनोक्तसिद्धांतमनूद्यतन्न॥ यतोवेत्यत्रचतुर्णां
तमेवैकंजानथेत्यादौयस्मिन्द्यौरितिस्थित्यादीनामेकैकस्यैवश्रवणात्॥ नचाभिसंविशंतीत्ये
तदपिलयपरंप्रयंतीत्यनेनपौनरुक्त्यापत्तावस्यमोक्षपरत्वात्॥ नचप्रयंतीत्यनेनसुषुप्तौ-
प्रस्कृप्ताभिरुच्यतेतथापिचतुष्टवापरिहारात्जगतोजन्यांगीकारेऽनित्यत्वापत्त्यामिथ्यात्वा-
सिद्धेरुक्तत्वादितिदूषणमुक्त्वासृष्टयाद्यष्टकमेवजन्मादिपदार्थः यतोवेत्यत्रसृष्टिस्थितिभङ्ग
यमोक्षाणांचआत्मानमंतरोयमयतित्वंमुक्तिदोबंधदोतोमतोनत्वंज्ञानदोऽज्ञानदश्चासि-

विष्णोरित्यादौ नियमनादीनामप्युक्तेः विचारविधायकनानावाक्यपरामर्शेन सूत्रकृतैवस्कां
देजन्माद्यष्टकर्तृत्वस्य लक्षणत्वेनोक्तत्वादभापिलक्षणत्वेन तस्यैव विवक्षणीयत्वात् ॥ यद्वा सर्वैर्मु
मुक्षुभिर्विशिष्याष्टकर्तृत्वस्यैवान्यकर्तृत्वस्य ज्ञेयत्वनियमाभावात् नान्यदिहादिशब्दार्थः ॥ उक्तं
च सृष्टिरक्षाहृतिज्ञानं नियत्यज्ञानबंधनात् ॥ मोक्षं च विष्णुतश्चैव ज्ञात्वा मुक्तिर्न चान्यथे
ति अथवा विषयोपपादकगुणपूर्तिसिद्धये जीवाभेदेदके जन्मादिभितयहेतुत्वेऽभिहितेपि
प्रयोजनसिद्धये मोक्षदत्वस्यापिवक्तव्यत्वात् तस्य च बंधकत्वं विनाऽयोगात् तयोश्च लब्धेतुज्ञा
नाज्ञानदत्वं विनानुपपत्तेस्त्रितयहेतुत्वस्यापिवक्तव्यत्वात् ॥ पुनश्च दीपस्तमइव ज्ञानं बंध
काज्ञानं स्वयमेव हंतिकिमीश्वरेणेति शंकायां दीपज्ञानादिस्वभावोपि भगवदायत्त इति वा-
च्यत्वात् प्रकृतोपियोगित्वादष्टकोक्तिरिति स्वमतेन सिद्धांत उक्तः ॥ तत्रोच्यते यतो वेत्यादि
वाक्ये अभिसंविशंतीत्यस्य लयपरत्वया लयकारणत्वस्यैवोक्तेः अत एव सुषुप्तौ ब्रह्मभासेरपि
न पृथगभिधानमिति चतुर्णां कारणत्वानामनुक्तेः ॥ अथैवं प्रयंतीत्यनेन पौनरुक्त्यपरिहा
राय प्रयंत्यभिसंविशंतीत्यनयोः पौनरुक्त्यपरिहारेण सप्रयोजनत्वं कथमिति चेत्स्वयाख्ये
न हृत्कृत्यमेव प्रयंतीत्यनेनोत्पत्तिमदभावमात्रं संविशंतीत्यनेन मोक्षोविवक्षित इति मया-

च्छिन्नस्याभावे तत्प्रतियोगि[illegible]प्रामाण्यमिति चेत् [illegible] एवं च [illegible] दाहः [illegible] तद्धर्मावच्छिन्ना

[illegible] निरूपित [illegible] विषयि [illegible] स्यादिति चेत् [illegible] श्रुति-

स्मृतिपुराणादावु[illegible] सत्यत्व [illegible] प्रपञ्चस्य [illegible] संप्रतिपन्नस्य तत्त्वतो मिथ्यात्वे श्रुति

ताप्युपपन्ना [illegible] एकत्र [illegible] पदार्थयोर्भेदः [illegible] सत्योपि पर[illegible]

[illegible] कारणत्वं [illegible] भेदे [illegible] उपादानं [illegible] भाज्यो त्व-

लोऽपि भावरूपोऽज्ञान संयोगो [illegible] अन्यथानुपपत्ति [illegible] प्रमाण [illegible] तेन न

[illegible] कारणत्वस्य [illegible] सिद्धि [illegible] कत्वात् ॥ ननु [illegible] त्व-

स्यान्तं [illegible] संनिवेश [illegible] संविशन्ति [illegible] अभिसंविशन्ति [illegible]

[illegible] भूतानि [illegible] यथा [illegible] जीवन्ति [illegible]

[illegible] अभिसंविशन्तीत्येताभ्यामुपादानत्वा[illegible] पृथगुपादानत्व [illegible] मात्रस्य

[illegible] अभिसंविशन्तीत्येतस्य [illegible] संयोगस्य निर्विषयतापत्तेः ॥ यदपि [illegible]

[illegible] सत्त्व [illegible] निरपि [illegible] कारणत्वेन [illegible] का-

रणत्वस्येव जन्मकारणत्वस्यापि संग्रहेण पृथक् तदुपादानवैयर्थ्यमिति तदपि न सत् ॥ सिद्धान्ते स-

त्कार्यवादाभ्युपगमेन प्रागभावानंगीकारेणोत्पत्तेस्तन्निवृत्तिरूपत्वासंभवात् उत्पत्तेः प्रागभाव
निवृत्तिरूपत्वस्वीकारेऽपि न स्यादुत्पत्त्यनंतरमपि सत्त्वेनार्थोऽपीदानीमुत्पन्न इति व्यवहारापत्त्यादि
वारणाय आद्यक्षणसंबंधविशिष्टप्रागभावनिवृत्तेरेवोत्पत्तिरूपताया अवश्यं स्वीकरणीयतापत्त्या ला
घवेनोत्पत्तेराद्यक्षणसंबंधरूपताया एव युक्तत्वाच्च ॥ ध्वंसरूपताया अपि मुक्तेरभावस्याधिकर-
णस्वरूपत्वोपगमेन स्वरूपात्मस्वरूपत्वेन पुमर्थताया अधिकरणोपपादितत्वाच्च न प-
रोक्तापुमर्थत्वापत्त्यादिदूषणावसरः ॥ तमेवैकं जानथेत्यादौ यस्मिन् द्यौः पृथिवीत्यादिना स्थित्या-
दीनामेकैकस्यैव ग्रहणमुपसंहारन्यायेनान्योपलक्षणमिति न परोक्तदोषः ॥ एवं येन जातानि जीवं-
तीत्यत्रोक्तं प्राण— धारणरूपजीवधातुमुख्यार्थमुपलक्षणीकृत्योत्पत्तिलयातिरिक्ततदीयव्यापार-
सामान्यार्थकस्थितिशब्देन तादृशव्यापारमनुगतीकृत्य यत इति पंचम्या निमित्तोपादानसाधारणत
द्धेतुत्वाभिधानेन नियमनादिहेतुत्वस्यापि लाभात् इमानि भूतानीत्यत्र भवंतीति भूतानीति योगम
नादृत्याकाशादीनामेव रूढ्योपस्थापनात् सम्यगेवोक्तं यतो वेत्यादिश्रुत्यनुसारान् जन्मस्थितिल
यकारणत्वमेव लक्षणं जन्मादिसूत्रप्रतिपाद्यमिति ॥ तदुक्तरीत्या विचारविधायकनानाप्रासंग-
न नानालक्षणानां संग्राह्यत्वे सत्यकामत्वसर्वांतरत्वाद्युपेक्षायां बीजाभावेन जन्माद्यष्टकर्तृत्वस्यैव

लक्षणत्वे आग्रहानौचित्यात् ॥ अथ वेदान्तदर्शने किं तत्त्वं निःश्रेयसोद्देशेन जगज्जन्मादिकं कृतं । सिद्धे तु ज-
गदंतःपातिमोक्षदत्वस्यापि उभयोर्न पृथक्कृतदुःकरत्वेऽसिद्धत्वात् ॥ अन्योन्यत्वस्यापि लोके अन्ये-
न मुक्तिदर्शनात् बंधकत्वं विना मोचकत्वानुपपत्तेरिति लक्षणोक्तिर्विचारणीयैव । एवं मोचकत्वेन ब्रह्मज्ञा-
नदत्वसिद्धेरार्थिकतया पृथक् ज्ञानदत्वस्यापि न पृथक्त्वमेवान्यथाधिकारप्रदत्वं विना ज्ञानदत्वस्या-
प्यसंभवात् विचाराधिकारभूतमनुष्यादिदत्वस्यापि पृथक्कथनापत्तेः साहित्यलक्षणत्वेऽपि जगतो ज-
न्मादिकमुपपद्यत एव ॥ ननु तथाभूते ब्रह्मशून्यासीज्जन्मादि दर्शनात् ज्ञानतोऽपि न मुक्तमिति शंक्यं ॥
सतो ब्रह्मणो तद्दर्शनेन जगतः सत्यत्वं ... जन्मादिकस्य ... एव ... नतु जगतो
जन्मांगीकारे स्यादिदं ... ॥ ...
सत्यज्ञानानंतानंदादिकं ... ॥ ...
रिच्छेदशून्यत्वरूपानंत्यम् ... जगज्जन्मादिकारणत्वरूपं तटस्थलक्षणं सार्थक-
मन्यथोक्तरूपमपि ब्रह्म कथं त्रिविधपरिच्छेदशून्यं जगत उपादानस्य तद्भिन्नस्य वान्यस्य वस्तुनो-
ऽविद्यमानत्वादिति शंकायां ... त्वात् ... शंकानिवृत्तये जगज्जन्मादिकारणत्वं
तत्र ब्रह्मेति बोधनीयं ततश्च तेन जगदुपादानं ब्रह्मेति ज्ञाते तदभिन्नं ब्रह्मेति पर्यवस्यति तत्र सर्वं वस्तु

भावे बोधिते स्वाधिष्ठानगताभावप्रतियोगित्वरूपं मिथ्यात्वं जगतः सिध्यतीति पूर्वोक्तशंकानिरासः ॥ अत एव भिन्नत्वकारणत्वं लक्षणत्वेन निर्दिष्टमन्यथैकैककारणताया अपि ब्रह्मासाधारणत्वेनेतरस्यानतिप्रयोजनकत्वात् ॥ ननु तर्हि तटस्थलक्षणेनैव चारितार्थ्ये किं स्वरूपलक्षणकथनेनेति चेदुच्यते ॥ यथानुमितिकरणत्वादिनानुमाने लक्षितेऽपि अनुमितिकरणत्वस्य लिंगतत्परामर्शादौ वादिविप्रतिपत्त्या संभावितत्वेन लक्ष्यविशेषानिर्णयात् तन्निर्णयाय तच्च लिंगपरामर्शादित्वरूपमुपदर्श्यते यथा वा चंद्रं दिदर्शयिषुः कश्चिदाप्तः चंद्रबुभुत्सया सर्वदिक्षु प्रसारितदृष्टेः दिगंतरगतनक्षत्रतारादिभ्यो दृष्टिव्यावृत्तये केषुचित् दृष्टिस्थिरीकरणार्थं अधिकरणतया संबंधविशेषेण शाखायां चंद्र इति शाखामुपलक्षणतयोपादत्ते ततश्च दिगंतरव्यावृत्तदृष्टेरपि चंद्रसमीपवर्तितारादिषु चंद्रभ्रमो माभूदिति तत्स्वरूपं प्रकृष्टप्रकाशश्चंद्र इति प्रकृष्टप्रकाशत्वं बोधयति एवं हि सत्त्वेन बोध्यमुक्षिश्चंद्रे वतरति तथा जगत्कारणत्वादिना लक्षितेऽपि ब्रह्मशब्दार्थे तद्रूपेण संभाव्यमानप्रधानपरमाण्वादिव्यावृत्तया स्वरूपविशेषनिर्णयासंभवात् तन्निर्णयाय स्वरूपलक्षणाभिधानमप्यावश्यकमेव ॥ यत्तु चंद्रिकायां यच्चोक्तं परैः जन्मादिकारणत्वं तटस्थलक्षणं आनंदादिरेव स्वरूपलक्षणमिति सिद्धांतमनूद्य तन्न ॥ न तावल्लक्ष्यगतागते स्वरूपतटस्थलक्षणे इति युक्तं-

काकादेर्गृहे कारणत्वस्य च ब्रह्मणि अध्यासतटस्थलक्षणस्य च कारणाभिन्न[illegible]
त्वेन स्वरूपलक्षणत्वापातात् आनंदादेः स्वरूपलक्षणत्वासंभवप्रसंगाच्च ॥ एतेन सत्यादेः स्व
पतटस्थलक्षणेऽतिनिरस्तं ॥ काकादेरध्यासतटस्थलक्षणस्य च गृहादावपकल्पितत्वादिति दूषण
मुक्तं ॥ तत्रोच्यते लक्ष्यांतर्गतागतेस्वरूपतटस्थलक्षणेऽतिविवक्षायामुक्तदोषाभावात् तदन्यविवक्षायां ल
क्षे अंतर्गतपदेन लक्ष्यैकदेशोक्तौ लक्ष्यस्याखंडत्वहानिः अभेदोक्तौ प्रकृष्टप्रकाशत्वादेश्चंद्रस्वरूप
लक्षणत्वं न स्यात् तथा लक्षणवाक्यस्याखंडार्थत्वनिर्वाहाय प्रकृष्टत्वादेश्चंद्र[illegible]
भावस्योक्तत्वादिति दूषणं चंद्रिकायामुक्तं तदसत् ॥ लक्ष्यांतर्गतपदेनोपहि[illegible]
त्वंताभिन्नत्वविवक्षायां दोषाभावात् तस्य चाभावस्याधिकरणात्मकत्वप[illegible]
भावरूपे आनंत्ये सत्यज्ञानानंदादौ च सुतरां स्वरूपलक्षणत्वोपपत्तिः नन्वेवं तत्कारण
त्वादौ संभवति तस्य लक्षीभूतशुद्धब्रह्माभिन्नजगज्ज्ञात् लक्षीभूतशुद्धचैतन्योपहितरूप
त्वाभावाच्च प्रकृष्टप्रकाशत्वपदेन प्रकाशत्वसमानाधिकरणस्यैव ज्योतिर्मंडलांतर्गततेजोवधि
कापकर्षशून्यत्वस्य विवक्षणादभावस्याधिकरणरूपत्वात् प्रकृष्टप्रकाशत्वस्य स्वरूपलक्षणत्वानु
पपत्तिः ॥ प्रकृष्टत्वादेश्चंद्रमानिपादिकार्थरूपत्वे तद्धि मर्यादयोभयथापि तत्त्वं संसर्गो वाक्यार्थबोधेन भा

सतेइति पूर्वोक्तरीत्या पदांतरार्थसंसर्गगोचरप्रमितिजनकत्वाभावरूपस्याखंडार्थत्वस्य प्रकृष्टप्रका
शश्चंद्र इति लक्षणवाक्ये निर्बाधात् नदर्थप्रकृष्टत्वादेश्चंद्रप्रातिपदिकार्थत्वे हि धर्मभानावश्यकत्वात् य
द्यप्यानंदादीनां ब्रह्मस्वरूपत्वे ब्रह्मधर्मत्वं दुर्घटमिति प्रतिभाति तथाप्यानंदो विषयानुभवो नित्यत्वं चे
ति संति तद्धर्माः अपृथक्त्वेपि चैतन्यात् पृथगिवावभासंते इति पंचपादिकोक्तेराविद्यकभेदेन तेषामप्य
स्ति ब्रह्मासाधारणधर्मत्वं तच्च न परामर्शतो ब्रह्माभेदविरोधि एवं कल्पिताकारभेदेनैकस्यैव धर्मिणो ल
क्ष्यलक्षणभावो नानुपपन्न इत्याद्युक्तं प्राक् एवं च प्रसिद्धस्यैवानंदत्वादिजात्याद्युपहितस्य कल्पन-
या तादात्म्यविशेषेण ब्रह्ममात्रवृत्तेः परमार्थतो ब्रह्माभिन्नस्योक्तरीत्या स्वरूपलक्षणत्वं निराबाधमेव ॥
एतेन प्रसिद्धस्यासाधारणधर्मस्य लक्षणत्वेनाप्रसिद्धस्य धर्मिणश्च लक्ष्यतथा लक्षणस्य लक्ष्यमात्र-
त्वानुपपत्तेश्चेति चंद्रिकाकारोक्तदूषणं निरस्तं ॥ अखंडार्थत्वविचारे धर्मिणः श्रुतिप्रसिद्धत्वस्योक्तत्वा
त् आनंदो लक्षणमिति चेत्तर्हि जगत्कारणं लक्षणमस्त्विति चंद्रिकाकारोक्तं दूषणाभास एव ॥ तस्य ल
क्षणतया अस्माकमिष्टत्वात् विशिष्टब्रह्मणः शुद्धब्रह्मशक्तिरूपतया पुराणेषु स्पष्टमुक्तत्वाच्चाप्रसि
द्धांतशंकावसरः ॥ तथाहि विष्णुपुराणे प्रथमेंशे तृतीयेध्याये निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः
॥ कथं सर्गादिकर्तृत्वं ब्रह्मणोऽभ्युपपद्यते इति मैत्रेयप्रश्ने पराशरः ॥ शक्तयः सर्वभावानामचिंत्यज्ञानगो

चरः यतोतो ब्रह्मणस्तास्तु सर्गाद्याभावशक्तयः इत्युक्तं ॥ तत्रायमर्थः ब्रह्मणो निर्गुणस्य सत्त्वादिगुणरहितस्याप्रमेयस्य देशकालादिपरिच्छेदरहितस्यातएव शुद्धस्यादेहस्य सहकारिरहितस्य केवलस्याद्वयस्यात्मनः रागादिमलरहितस्य कथं सर्गादिकर्तृत्वं एतद्विलक्षणस्यैव कुलालादेर्लोके घटादिकर्तृत्वदर्शनादिति उक्तमाक्षेपं परिहरति ॥ शक्तयः इति तत्रायमर्थः सर्वेषां भावानां मणिमंत्रादीनां अचिंत्यज्ञानगोचराः अचिंत्यं कुतर्कासहिष्णु यज्ज्ञानं कार्यान्यथानुपपत्तिजन्यं तस्य गोचराः शक्तयः यतः संति अतः तद्वदेव ब्रह्मणोपि सर्गाद्याः सर्गकारणीभूताः शक्तयः संति तथा च मायाख्यशक्तिनिष्ठहेतुत्वं ब्रह्मण्युपचर्यते इति भावः ॥ तथा च श्रुतिः मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति स्वभावभूतसृष्ट्याद्यनुकूलशक्तिमत्त्वान्निर्गुणस्यापि जगतः स्रष्टृत्वमुक्तं ॥ कास्ताः शक्तय इत्यपेक्षायां कूर्मपुराणे उत्तरभागे सर्वासामेव शक्तीनां ब्रह्मविष्णुशिवात्मिकाः प्रधानाः संस्मृता देवाः शक्तयः परमात्मनः आभ्यः परस्ताद्भगवान् परमात्मा सनातन इति शिवपुराणेपि सृष्टेः प्रवर्तको ब्रह्मा स्थितेर्विष्णुर्विमोहनः संहारस्य ततो रुद्रस्तयोर्नित्यं नियामकः तस्मात्त्रयस्तेकथ्यंते जगतः कारणं त्रयं कारणत्रयहेतुश्च शिवः परमकारणं ॥ स्कांदेपि ब्रह्मा विष्णुश्च रुद्रश्च परतत्त्वविभूतयाः एषां त्रयाणामधिकः सर्वकारणमीश्वर इति ॥ तथा च शक्तिरूपाधिविशिष्टब्रह्मात्मकब्रह्मविष्णुरुद्राणामुपहितब्रह्माभेदेन स्व

रूपलक्षणत्वमविरुद्धं कारणत्वस्य शक्तिविशिष्टस्य स्वरूपैक्याभावात्तटस्थलक्षणत्वमिति स
र्वं सुस्थं ॥ एवं स्वप्रत्याय्यव्यावृत्तिभाव्यभाविनि स्वरूपतटस्थलक्षणे स्वप्रत्याय्यव्यावृत्तिकाल
त्वव्यापकत्वं स्वरूपलक्षणत्वं तदभावस्तटस्थलक्षणत्वमिति तदर्थः ॥ कारणतायाः अविद्यात्म-
कशक्तिविशेषरूपायास्तत्त्वज्ञानाव्यवहितोत्तरक्षणे अवर्तमानत्वेन तत्क्षणे वर्तमान स्वप्रत्याय्य द्
श्यभेदकालव्यापकत्वाभावान्न तस्य स्वरूपलक्षणत्वापत्तिः ॥ एवं कर्तृत्वमपि मायावृत्त्यादिरूपं ज
न्यमेवेश्वरगतमिति तस्य स्वप्रत्याय्यव्यावृत्तिकालव्यापकत्वाभावात्तटस्थलक्षणत्वं स्पष्टमेव ॥ ए
वं लक्ष्यकालव्यापकत्व तदभावरूपे यावल्लक्ष्यभाव्यभाविनी स्वरूपतटस्थलक्षणे इत्यपि साधु ॥ य
त्तु चंद्रिकायां त्वन्मते स्वप्रत्याय्ययावद्व्यावृत्तिभाविव्यावर्तकांतराभावात्तस्यैव यावद्व्यावृत्तिभावि-
त्वावश्यंभावादिति कारणत्वे स्वरूपलक्षणत्वापादनं तदुक्तलक्षणकर्तृहृदयानवबोधनिबंधनं त-
थाहि स्वप्रत्याय्येत्यस्य स्वप्रयोज्येत्यर्थविवक्षायामेव व्यावर्तकांतराभावे कारणत्वस्यैव व्यावृत्तिप्र-
योजकस्य यावद्व्यावृत्तिभावित्वावश्यंभावस्त्वदुक्तः साधुः प्रकृते स्वप्रत्याय्यशब्देन स्वज्ञाप्येत्यर्थ
विवक्षया ज्ञापकस्य कारणत्वस्य ज्ञाप्ययावद्व्यावृत्तिभावित्वानावश्यकत्वेन कारणत्वस्य स्वरू
पलक्षणत्वापादनासंभवात् ॥ यद्यपि दृश्यव्यावृत्त्यादिकं मिथ्यैव तथापि तदुपलक्षितस्य तात्त्वि

[illegible] देवेश्विपानं चैत्यैव [illegible]

[illegible]

॥ एतेन [illegible]

द्विकोणकं द्रष्टव्यं निरवकाशं ॥ एवं पूर्वोक्त [illegible]

[illegible]

[illegible]

[illegible] ॥ द्वितीय [illegible]

[illegible] द्विकोण [illegible] ॥ [illegible]

[illegible] ॥ [illegible]

[illegible]

[illegible]

[illegible] ॥ यदपि

द्विकायां [illegible] अर्हत: सर्वभावानां देवस्तु [illegible] तृतीयं [illegible] द्यादि

श्रुत्याकारणत्वादेरपि यावद्वस्तुभावित्वाच्चेत्यादि दूषणमुक्तं ॥ तदपि ईशानत्वप्रभुत्वादीनामुपलक्षण-
त्वात्सुगमसमाधानं ॥ सर्वविषयकत्वोपलक्षितदृक्रूपत्वस्य सार्वकालिकत्वस्याकरादौ स्पष्टमुक्तत्वा-
च्च ॥ स्वयं व्यावर्तकं स्वरूपलक्षणं व्यावर्तकांतरोपस्थापकं तटस्थलक्षणमित्यपि सुवचं काकादिर्हि व्या-
वर्तकसंस्थानाद्युपस्थापयतीति तस्य तटस्थलक्षणत्वं कारणत्वेनोपस्थाप्यव्यावर्तकांतराभावादित्यादि
कंचंद्रिकोक्तमपि दूषणं तु ॥ पूर्वोक्तरीत्या कारणत्वस्य ज्ञेयब्रह्मगतानंत्यरूपव्यावर्तकांतरोपस्थापकत्वा-
न्निरालंबनमेवेति दिक् ॥ प्रकारांतरेणाप्येतदधिकरणरचना वेदांत्यभिमता निरुक्तस्य ब्रह्मणः जिज्ञा-
स्यत्वं न संभवति संभवति वा तदर्थं तर्हि जिज्ञासस्वेत्यत्र जिज्ञास्यपरामर्शको यत्तच्छब्दः सं किं विशिष्टब्रह्म-
परामृशति अथवा जगत्कारणत्वाद्युपलक्षितव्यक्तिमात्रमिति लोके तदादिसर्वनाम्नामुभयविधत्वस्यापि
दर्शनात् संशयः पूर्वपक्षस्तु ॥ तर्हि जिज्ञासस्वेत्यत्र तच्छब्दस्य प्रक्रांतपरामर्शिनो येन रूपेण प्रक्रांततात-
द्रूपविशिष्टपरामर्शकत्वमेवोचितं प्रसति बाधकं शाब्दानां विशिष्टार्थपरत्वस्यौत्सर्गिकत्वात् ॥ न चात्र बा-
धकं किंचिदुपलभ्यते अथाश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवलेति वार्तिकोक्तेः शुद्धस्यै-
वाज्ञानविषयत्वेन विशिष्टस्य तदनुपपत्त्या विशिष्टज्ञानस्य मूलाविद्यारूपबंधहेतुप्रत्यनीकत्वाभावात्
तद्विचारस्य निष्प्रपंचतालक्षणमुक्तिफलत्वानुपपत्तिरेव बाधिकेति चेन्न ॥ विशिष्टज्ञानस्य मोक्षहेतु-

नापाः श्रुतिसंभाविपक्षे तेन तदृढ़ात्मैवग्रहण स्वकृत्वयोभ्यत्वात् ॥ नचन तेषांविशिष्टत्वाभिमुखम्योसिना-
न्यः पंचायननापविधेतइति श्रुतत्वं तरस्य ह्यन्यादिष्टपक्षज्ञानस्यमोक्षहेतुतायाः प्रतिपादितत्वात्तदनुरोधे
नाप्राधिकारणत्वाद्युपलक्षितव्यक्तिपरामर्शकित्वमेवकल्पयितुंयुक्तमितिवाच्यं ॥ नचैवंविद्वान्मृत
इहभवतिएवंपरस्वलेवं मन्यामनएवंविजानन्नित्यादिश्रुत्यंतरेष्वपिविशिष्टज्ञानस्यैवमोक्षहेतुताकः ॥ त
मेवैत्यमनोविदिदि वेतव्यपर्यकरणौचित्यान्निविश्वासादिपक्षज्ञानस्यप्रमाणेनःसंभवात् ॥ तथाहि नताव
त्विनाभाविपक्षज्ञानंप्रत्यक्षं आत्मलोकादिहितिदिपाणिमावेऽस्माकमावेनालोचितत्वात्तस्यसप्रकारा
त्वेन द्युत्वादीनां त्रपकारातावाद्विनानामात्मत्वेनपमाज्ञानाकरणत्वात् ॥ नानिपदंप्रत्युपवर्तं पृच्छामि
नावेदविस्मृतौतंपुरुषमित्यादिश्रुत्यात्स्योपनिषदः स्वभावमीवधत्वादेः ॥ नाप्यनुमितिरूपंतत्
तत्र द्विपस्ततार्थोपपत्तिरालक्षणनौपि पर्यायमात्रत्वेनाहंःनत्वमुपदिनिवासविषयककत्वाभावे
नपरोक्षत्वेनचशुद्धनिमानाविपक्षज्ञानतयप्रयुक्तकार्यरूपापरोक्षाध्यासरूपंबंधानिवर्तकत्वात्तन्ना-
त्यः ॥ अत्यंताभेदसंसर्गसंबन्धात्तद्हदरिद्रिविशिष्टत्वादिज्ञानस्याप्रमात्वेन न हृदादिव्यक्तिभिन्नवस्त
नुयोगिकसंसर्गेणतद्हृदादिव्यक्तिविशिष्टज्ञानत्वं न हृदादिव्यक्तिप्रमात्वमित्यस्यावश्यंवाच्यत्वा-
त्तव्यक्तौतादात्म्यसंबंधेनतद्व्यक्तिविशिष्टज्ञानस्याद्युपाद रूपत्वेनाप्रमाणत्वाच्च पदइति ज्ञान-

षिषयादधिकं यदे द्रव्यत्वसंसृष्टाभेदं विषयीकुर्वतो हि ज्ञानस्य प्रमात्वं युक्तं तद्व्यक्तौ तद्व्यक्तिस्वरूपं तद्व्य-
क्तितादात्म्यं विषयीकुर्वता तु ज्ञानेन तद्व्यक्तिरिति ज्ञानविषयादधिकं किं विषयीकृतं येन धारामध्यगतज्ञा-
नवदप्रमाणं स्यात्तस्मादभेदे सत्यपि उपाधिभेदप्रयुक्तो वा अवच्छेदकभेदप्रयुक्तो वा यत्र विशेषणविशे-
ष्ययोर्व्यक्त्योर्भेदस्तत्रैवाभेदसंसर्गप्रमा यथा घटो द्रव्यं भूतलसंयोगी घटो न भूतलसंयोगीत्यादावत
एव घटाभावो घटाभाववानित्यादावेकत्वादिविशिष्टघटाभावत्वादिरूपेणैव विशेषणता नाप्युपमिति-
स्गौरनेन गवयेन सदृश इत्याद्युपमितिस्थल इव प्रकृते सदृशपस्तु हृदयावगाहने ऽनात्मविषयकत्वा-
पत्तेः नाप्यर्थापत्तिः आत्मनि तत्संसर्गं विना कस्यचिदर्थस्यानुपपन्नत्वाभावात् संसर्गस्यात्मरूपत्वे ऽना-
त्मरूपत्वे वा पूर्वोक्तदोषापत्तेः नाप्यनुपलब्धिकरणकं तस्याभावमात्रे प्रमाणत्वात् प्रमेयस्यात्मरूपत्वे ऽना-
त्मरूपत्वे वा पूर्वोक्तदोषापत्तेः नापि शाब्दं तस्योद्देश्यतावच्छेदकविधेयाद्यनेकसंसर्गविषयकत्वनियमेन शु-
द्धब्रह्मविषयकत्वाभावात् शाब्दस्य परोक्षज्ञानजननस्वाभाव्येन परोक्षस्य तस्यापरोक्षाध्यासानिवर्त-
कत्वस्योक्तत्वान्नेत्यनुपपन्ना सिद्धान्त्यभिमता ब्रह्मजिज्ञासेति पूर्वपक्षो सिद्धान्तः ॥ शाब्दमेव तर्हि
वक्षित चिन्मात्रविषयकं ज्ञानं यतो वेत्यादिवाक्यस्य जगत्कारणत्वाद्युपलक्षितब्रह्मविचारकर्तव्य-
तापरत्वात् ॥ ननु च शाब्दानां विशिष्टार्थपरत्वस्यौत्सर्गिकत्वात्कथमेतदिति वाच्यं ॥ सत्यं पदा

नामैत्समिकिंशिष्टपरत्वं तत्पादिषा दृत्वसादेत्वातत्पात्रिस्यात्किंपक्षपातकांधिलिये दुःखं नैषो
वेत्यादिपास्त्रेपक्ष्य क्रोपवपादस्तुपादत्वं तावत् अतोपनेतन्मुरोतः दसापेक्षं पुरोपाद ध्यानं ब्रह्मविधायु
र्धन्यासहितैवसान्प्रत्यगभिन्नस्यैव ब्रह्मणश्च जगत्कारणतां प्रतिपादयन्ति तावत्पुरोवादानुसारेणानुप
दत्वं नैवतथा अभावप्रत्यगभिन्नस्यैव ब्रह्मणो जगत्कारणता वाच्या तथा च सहितैः प्रदर्शिताभिरेवोप
पादकयुक्तिभिरद्वैतसिद्धिः ब्रह्मानंदादिनिबंधलिखितदर्शनत्वादिलिंगकानुमानादिभिश्च ब्रह्मान्याभिसं
लभ्यं चसमिथ्यात्वापगमात् आद्यसूत्रे कर्तव्यासु किरणतादिन्यायेन प्रमुत्थं तरैक्यब्रह्मज्ञानसाक्षू
त्वादिसंपादितत्वं फलसमूलाज्ञाननिवर्तकत्वेनैव यथा च तथा कारणत्वादयो विषयवस्तु विशिष्टज्ञानस्य
मिथ्याभूतानर्थहेतुकत्वेन सुरूनिहितसर्वमूलाज्ञानस्य ज्ञानविषयत्वाभावेनाज्ञाननिवर्तकत्वा
भावेन उदर्तकं सकलत्वे अथतस्य सर्वमतिपूर्वोत [illegible] त्वेन पक्षपातिइत्यादिश्रुतिभि
र्विशिष्टज्ञानस्य मतद्वेतुत्वं मतेन च हेतुत्वसाधनत्वात् [illegible] दितौ वेति योजनायां श्रुतस
मभिव्याहारसंभावनाभावात् कुत्वात्तन्मे बंधविद्धानिलावदात्मादिज्ञानं ज्ञानस्यैव विपक्षणायतो वेत्यादेः सहि
जिज्ञासत्वेसत्वं तस्यवाप्यस्य जगत्कारणत्वादुपलक्षितब्रह्मविचारकर्तव्यतापरत्वं निष्प्रत्यूहं ॥अ
थ सहितायाः प्रत्यगभिन्ननिर्विशेषब्रह्मपरत्वे मदेवे देवं तदेव नतस्यांजीपभिन्नसविशेषब्रह्मणः प्र

निष्पादनपरत्वावगमात् तथाहि सद्विद्योपक्रमे उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मत
मविज्ञातं विज्ञातमिति सविशेषब्रह्मैव प्रतिपाद्यते आदेशशब्दस्य जगन्नियमनानुकूलव्यापारविशेषरूपाज्ञा-
त्मकशासितृत्वाश्रयपरत्वात् एकविज्ञानेन सर्वविज्ञानप्रतिज्ञावाक्यं तु तत्तदवस्थाविशेषविशिष्टका
रणमेव कार्यमित्यारंभणाधिकरणे निरूप्यमाणं कार्यकारणयोरनन्यत्वं स्वीकृत्य ब्रह्मणि विदिते उपादा
नतया कार्यं तु भविष्यद्ब्रह्माकारेण ज्ञातमेवेति एतदभिप्रायं सत् ब्रह्मणः उपादानता द्योतकं ब्रह्मण-
श्चोपादानत्वं यद्यपि विवर्तमाश्रित्य वक्तुं शक्यते तथापि यथा सौम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं
स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति दृष्टांते परिणाम्युपादानस्य प्रतिपादनात् प
रिणामितयोपादानं ब्रह्म विवक्षितं तत्र वाक्ये शब्दसमर्थः केषांचित् संमतः ॥ एकविज्ञानेन सर्वविज्ञा
नं त्वात्कार्यकारणयोरभेदे उपक्षिप्ते पिंडे दृष्टेपि घटादिगोचरः संशयः पिंडघटयोरर्थक्रियानामा
दिभेदश्च कथमुपपन्न इति शंकायां वाचारंभणमिति वाक्यशेषः ॥ वाचा घटेन जलमाहरेत्यादिका
वाक् तत्पूर्वको व्यवहारश्च वाक्पदार्थः तदर्थं ॥ अध्ययनेन वसतीत्यादाविव फलस्यापि हेतुत्वविव
क्षया तृतीया ॥ विकारो घटादिस्तन्नामधेयं च मृत्तिकया आरंभणं स्पृश्यं संबंधनीयमिति यावत् आलं
भः स्पर्शहिंसयोरिति वचनात् अशब्दार्थकस्यालभतेः संबंधे पर्यवसानात् कर्मणि ल्युट् मृत्तिकेत्येव-

[illegible] मानस्यानुपपत्तेः स्वं मुक्तिकाले [illegible] आसः [illegible] मानं [illegible]

अपहारादर्शनं [illegible] ज्ञानयत्नादि [illegible] व्यवहारार्थं च मुक्ति [illegible] गुणानां संस्कारं च [illegible] आदिनाम [illegible]

[illegible] मिथ्याज्ञानं [illegible] तान् संदेहादिकं सर्वमुपपद्यते इत्युक्तं भवति ॥

[illegible] अपकर्षं [illegible] ज्ञानस्य [illegible] इत्याशंक्याह मुक्ति

[illegible] मुक्तिकाले [illegible] ॥ नयाव

[illegible] इति ॥ आनंदनीयत्वा-

[illegible] ॥ [illegible]

[illegible] संस्का-

[illegible] ॥ [illegible] ॥ [illegible] संस्कारं

[illegible] संस्कारादि [illegible] प्रमाण [illegible] गावाधिद्वेण-

[illegible] ॥ ननु पेनास्य इत्यते एतस्मात् [illegible] पुरासि

[illegible] सत्यपदत्वेन [illegible] ॥ अपरं

[illegible] व्यवहारादिकं संस्कारजन्यं [illegible] संस्कारं [illegible] धानं वा ह

त्वाद्गुणप्रधानदृष्टांततत्ताप्तार्थ्यं च वाचारंभणमित्यादावपि यथा सौम्यैकेनेत्यादिकमनुसंधानीयं ॥ तथा च सप्रपंचब्रह्मणोपादानभूतं निमित्तभूतं वा कारणं प्रस्तावगम्यते प्रतिपादनं तथा सदेव सौम्येदमग्र आसीदित्यत्रासीदिदंशब्देन जगत उपादानात् ॥ तस्य सदेवेत्यनेन सृष्टेः प्रागपि सत्यत्वावधारणात् अग्र इति कालस्य तस्यां दशायां सत्ताप्रतिपादनात् तदनंतरं तदैक्षतेति वाक्येन सृष्ट्यनुकूलज्ञानसंकल्पकृतीनां प्रतिपादनात् सविशेषपर एव सद्विद्योपक्रमोऽवधार्यते ॥ मध्ये च सन्मूलाः सौम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठिता इति प्रजाशब्दोदितानां जीवानां सत्शब्दोदितात् ब्रह्मणो मूलमूलिभावादिना भेदप्रतिपादनमुपलभ्यते ॥ ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इत्युपसंहारे इदंशब्दोदितं तच्छब्देन परामृश्य तत्सत्यमिति सर्वस्य प्रपंचस्य सत्यत्वावधारणात् संबोध्यसंबोधकभावेन श्वेतकेतूद्दालकयोर्भेदेन प्रतिपादनेन जीवनानात्वस्यैवावगमाच्च सप्रपंचत्वैवावगम्यते तथा च सद्विद्यायाः उपक्रमोपसंहारपर्यालोचनया परमार्थतः सप्रपंचब्रह्मप्रतिपादनपरत्वावगमात् तदनुसारेण तत्त्वमसीति वाक्यं जीवब्रह्मभेदाविरोधेनैव व्याख्येयं ॥ तथाहि अनृक्षरा ऋजवः संतु पंथा इत्यत्र यथा बहुवचनस्य स्थादेशः यथा वा उत यत्सुन्वंति सामिधेनीस्तदन्वाहेत्यत्र सुपां सुलुगिति सूत्रेण यत्तदोत्तरसप्तम्याः लुक् यस्मिन् सुन्वंति तस्मिन्नित्यर्थस्य विवक्षितत्वात् यथा वा गा

पत्नीं छंदसां पातेत्यत्र षष्ठिभक्तिकस्यत्वेन द्वितीयाप्रथमार्थे तथा त्वमसीत्यत्र चतुर्थ्या स्वादेशादीनामन्य
तमं स्वीकृत्य तस्मै त्वं समर्पणीयोसीत्यर्थः स्वीकार्यः ॥ ब्रह्मणो त्वा महस ओमित्यात्मानं युंजीतेति श्रुतेः ॥ पं
चम्या वा स्वादेशादीनामन्यतमं स्वीकृत्य तस्मात्त्वमुत्पन्नोसीत्यर्थः ॥ यतो वा इमानि भूतानि जायंत इति
श्रुतेः ॥ षष्ठ्या वा तदन्यतमं स्वीकृत्य तस्य त्वमसि तत्स्वामिकोसीति प्रतिपादनीयं ॥ स कारणं करणाधिपा
धिप इति श्रुतेः ॥ सप्तम्या वा तदन्यतमं स्वीकृत्य तस्मिंस्त्वमसीत्यर्थो ग्राह्यः ॥ सन्मूलाः सोम्येमाः सर्वाः प्रजाः स
दायतनाः सत्प्रतिष्ठिता इति श्रुतेः ॥ शरीरिशरीरभावाभिप्रायं वा सामानाधिकरण्यं भविष्यति प्रजुष्यो ह
मित्यादिवत् यस्यात्मा शरीरमिति श्रुतेः ॥ अघोरापापकाशिनीत्यत्रापापकाशिनीतिप्रश्लेषवदत
त्वमसीति वा स आत्मा तत्त्वमसि श्वेतकेतो इत्यत्रापि प्रश्लेषो भविष्यति तथा च सह द्वाभ्यां सप्रपंचजी
वभिन्नब्रह्मपरत्वावगमात् कथं प्रत्यगभिन्नब्रह्मपरत्वमिति चेदभोच्यते ॥ उत तमादेशमित्युपक्र
मोन ब्रह्मणः शासितृत्वं प्रतिपादयति तथात्वे कर्तरि यः अं स्वीकृत्य तत्परत्वं वक्तव्यं न च तदुपपद्यते प्र
कर्तरि च कारके संज्ञायामिति कर्तरि तस्य पर्युदासात् ॥ न च करणार्थस्यैव कर्तर्युपचारो भविष्यतीति वा
च्यं ॥ तथा क्लेशकल्पनायां मूलाभावात् अक्लेशेनैवोपपत्तौ तद्योगाच्च उपदेशोपि ह्याङ्पूर्वकस्य दिशः प्र
चुरः प्रयोग उपलभ्यते आदित्यो ब्रह्मेत्यादेशः विद्युत् ब्रह्मेत्यादेशः उभयमेतदादिष्टं भवत्य ध्यात्मं चाधि

दैवतं च अथात आदेशो नेति नेति गुह्या एवादेशा मधुकृतः तदादिष्टेन वर्त्मनेत्येवमादौ यथा उपदेश आदेश
योर्भेदेन प्रयोग उपलभ्यते एष आदेशः एष उपदेश इति तथाप्यादेशशब्देनोपदेशसामान्यं प्रतिपादितं
गोबलीवर्दन्यायेनोपदेशशब्दश्चोदनात्मकोपदेशविशेषपरो भविष्यति एषा वेदोपनिषदेतदनुशासनमि
त्युत्तरत्र तथैव दर्शनात् उपदेशार्थत्वस्वीकारे च कर्मणि घञं स्वीकृत्य उपदेशैकगम्यत्वेन ब्रह्मोपक्रांतमि
ति लभ्यते ॥ न चाकर्तरि चेति सूत्रे संज्ञायामिति ग्रहणात् प्रकृते कथं कर्मणि घञ् संभवतीति शंक्यं कोभ
वता दायो दत्तः को भवता लाभो लब्ध इति प्रयोगोपपत्तये असंज्ञायामिति प्रश्लेषस्याभ्युपगमात् अवश्यं
चोपक्रमे उपदेशैकगम्यत्वं वक्तव्यं श्वेतकेतुं स्वपुत्रं गुरुकुलात् सर्वान् वेदानधीत्य गृहमागतं स्तब्धं मा
निनं पितुरुद्दालकस्य स्तब्धतापनोदनार्थोयं प्रश्नः उत तमादेशमप्राक्ष्य इति तत्र स्तब्धस्य मानिनः किमत्र
प्रष्टव्यं स्वत एवायमर्थ ऊहितुं शक्यत इति शंका माभूदिति एवं चाचार्यवान् पुरुषो वेदेत्युपसंहारस्या
प्युपक्रमानुगुण्यं लभ्यते एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा च विवर्ताभिप्रायेणैव व्याख्येया न तु परिणा
माभिप्रायेण वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति वाक्यशेषात् स हि विकारानृततापरः
तथा हि तद्वाक्यार्थः वाचाया आरंभणं आलंबनं विकारो घटशरावादि ॥ तर्हि वाक् तदालंबनं च विकार इति
द्वयं प्राप्तं नेत्याह ॥ नामधेयं ॥ घटः शराव इति नाममात्रं न तु तत्र वस्तुसत्तास्तीति द्योत्यते नामधेयपदे-

नहइंचनामं [illegible] पूर्वं [illegible] ॥ [illegible]
भइतिनाम [illegible] ॥ [illegible] आह [illegible]
[illegible] त्यमिति ॥ [illegible] ॥ [illegible]
[illegible] गुड [illegible]
[illegible] पि [illegible] ॥ [illegible] ॥ [illegible] तीति ॥
एवं [illegible] नवा [illegible] ॥ [illegible]
करणे चंद्रिका [illegible]
सकलं विज्ञा [illegible]
तत्वाभ्रम्ह [illegible]
[illegible] निरूप [illegible] संमतिपन्नं
[illegible] अधिष्ठा [illegible]
[illegible] त्यमिति ॥ [illegible]
कि [illegible] क [illegible] ॥ एकविज्ञानेन सर्व [illegible]

ज्ञानमपि तत्त्वतो सर्वविज्ञानमेवाधिवक्षितं एवं चाधिष्ठानभूते ब्रह्मणि ज्ञाते इदं सर्वं यदयमात्मास
र्वं खल्विदं ब्रह्मेति बाधायां सामानाधिकरण्यानुरोधात् ब्रह्मरूपज्ञातस्वीयतत्त्वकत्वस्य ब्रह्मण्यारो
पिते जगति सत्त्वान्नैकविज्ञानेन सर्वविज्ञानानुपपत्तिः ॥ मृदादिविज्ञानेन घटादीनां विज्ञातस्वी
यतत्त्वकत्वं गुडजिह्विकान्यायेनैवेत्युक्तमेव प्राक् इति न दृष्टांतासंगतिः ॥ यदपि तत्रैव चंद्रिकायां
रज्ज्वां ज्ञातायां भुजंगतत्त्वं ज्ञातं भवति सा हि तस्य तत्त्वमेवं च ब्रह्मज्ञानात् सर्वं तत्त्वतो ज्ञातं भवतीति भा
मत्युक्तमनूद्य ॥ एवं हि ब्रह्मज्ञानेन ब्रह्मैव ज्ञातं भवतीत्यर्थः स्यात्तच्चायुक्तं स्वस्य स्वहेतुत्वायोगात् ये
नाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातं स्यादिति श्रुतौ श्रुतादिपदायोगाच्चेत्यादिकं दूषणमुक्तं त
दपि मंदं ॥ ब्रह्मविज्ञानेन सर्वं तत्त्वतो ज्ञातं भवतीत्यत्र ब्रह्मविज्ञानेनेति अभेदे तृतीया अभेदस्य चाविज्ञातमित्यत्र
विज्ञाने ऽन्वयः तथा च ब्रह्मज्ञानाभिन्नं यत्तत्त्वतो ज्ञानं तद्विषयं स्वीयतत्त्वज्ञानाभिन्नज्ञानविषयब्रह्म
कं सर्वमिति पर्यवसितार्थेन स्वस्य स्वहेतुत्वापत्तिरिति दूषणावकाशः येनाश्रुतं श्रुतं भवतीत्यादावपि-
अश्रुतं वियदादिकं येन तत्त्वतः श्रुतं भवति यदभिन्नश्रुतात्मकस्वीयतात्त्विकरूपवद्भवतीति रीत्या
बाधायां सामानाधिकरण्येन पर्यवसितान्वयेन न श्रुतादिपदायोगोपीति ॥ यदपि तत्रैव विवर्तवा
दे मृत्पिंडमृन्मयादिदृष्टांतानुपपत्तिरिति चंद्रिकायां दूषणमुक्तं तदस्मदीय

यबोधनिबंधनं ॥ वाचारंभणश्रुतिव्याख्यानमाय स्वारस्यमभिप्रायः येनाश्रुतं श्रुतं भवतीति वाक्यार्थसामाना-
धिकरण्यं अश्रुतं विषयादिकं सर्वं तत्तो यदभिन्नं श्रुतमस्त्वतिरिक्तस्वोपनालिकरूपशून्यमित्यर्थः न
यावैकं ब्रह्म सर्वस्याधिष्ठानमित्यर्थः प्रतिज्ञातः तत्र मृत्पिंडव्यतिरेकेण तत्त्वतो न घटादिकारोपणाभासिद्धत्वा
दिहान्तोपयासौम्येकेनेत्यादिनाप्रतिपाद्यते मृत्पिंडपदं च मृत्स्वार्थैकपदयोगात् मृन्मयरूपपिंडार्थकं पिंड
पदं न स्थौल्यविशेषबोधकं मृन्मयमात्रोपादानतायोस्तत्ताभाव ॥ मृन्मयपदं च भूमिविकारमात्रा-
र्थकं ॥ तथा च भूमिरूपविकारः सर्वोऽपि भूमेर्भिन्नः तत्त्वतो नास्तीत्यर्थः भूमिविकारत्वं च साक्षाद्वा भूमि-
श्रणत्वीति भूमेर्भिन्नं कापिंडस्वनामविकारानुपादानत्वेपि न क्षतिः ॥ यद्यपि भूमेरधिष्ठानं तथाप्यधिष्ठान
तावच्छेदकमृत्त्वादिव्यतिरेकेण तत्त्वतो रूप्यादि नास्तीति व्यवहारस्य तत्र भूमिविकारादेस्तद्रूपविचारदशा
यामाधारतावच्छेदकमृत्त्वादिव्यतिरेकेणातत्त्वं न तादृक्कारेनास्तीति व्यवहारस्तद्भुत्वात्पयोक्तं ॥ एवं च स
र्वं मृन्मयं पक्षुलिंगात् कविज्ञातस्यायतत्त्वकामित्यपि न घापांसामानाधिकरण्यं तत्र हेतुभूमिकत्वं च स
त्याविति सर्वमत्यपदं योग्यब्रह्म [illegible] मृत्तिकाभूतिरिति गृह्यमाणं यत्तदवच्छिन्नसद्रूपं
अच्छिन्नदेवसत्यं भूतिकात्तरूपस्य सत्वत्वाभावात्तदवच्छिन्नसद्रूपस्य [illegible] र्धदशायां मृदोऽपि विच्छि-
न्नात् भूमित्वेन ज्ञायमानत्वेन सद्रूपताभावार्थे मृत्तिकेत्येवेत्यत्र इति तुकेरन्यथानद्वयव्यापत्तेः ॥

एतेनशब्दप्रकरणेव्याकरणादौप्रकरणासिद्धंशब्दपरत्वंफलेदित्यप्यनवेतिशब्दस्यस्वार्थपरत्वस्यैवार्थप्रकरणेअ
र्थपरत्वस्यप्रकरणादेवलाभेशब्दपरतायाएववक्तव्यतयातस्यचप्रकृतेऽनुपयुक्तत्वान्मृत्तिकेत्येवेत्यत्रेतिशब्दवै
यर्थ्यमेवेत्यप्रतद्इतिपरोक्तंदूषणमनवकाशं॥ आद्यर्थकोवाइतिशब्दःप्रकृते॥ इतिहेतुप्रकरणप्रकारादिसमाप्ति
षुइतिअमरकोशात्॥ तथाचभूमिविकारस्वरूपस्यविचारदशायांतत्स्वरूपमिवभूमिस्वरूपस्यविचारदशायां
सापिमिथ्यैवतत्कारणापंचीकृतभूतान्येवसत्यानितेषामपिस्वरूपविचारदशायांतान्यपिमिथ्यैवतत्कारणंब्र
ह्मैवसत्यमित्याद्यर्थलाभः॥ एवमेवोत्तरेष्वपिदृष्टांतेषुयोजनीयंमृत्तिकेत्येवसत्यमित्यत्रहेतुर्वाचारंभणं
विकारोनामधेयमित्यादितच्चव्याख्यातंप्राक्॥ अस्मिन्नेवार्थेकोप्रवानिनितिनिर्देशोवाचारंभोऽनर्थकः॥ शि
बिकादारुसंघातोवचनास्थितिसंस्थितः अन्विष्यतांनृपश्रेष्ठतद्भेदेशिबिकात्वया॥ एवंछत्रशलाकानांपृ
थक्भावोविमृश्यतांक्वयातंछत्रमित्येषन्यायस्त्वयितथामयि॥ यस्तुराजेतियल्लोकेयच्चराजभटादिकं॥त
थान्यच्चनृपेत्येतन्नसत्संकल्पनामयंएवमेवमिदंविश्वंनभेदिसकलंजगत्वासुदेवाभिधानस्यस्वरूपंपर
मात्मनःइत्यादिविष्णुपुराणादिवाक्यसहस्रैरुपबृंहणरूपैरनिर्वचनीयापरपर्यायमिथ्यात्वेमिणीनिता-
त्पर्यकंसद्विद्यागतंयदग्नेरोहितं रूपंतेजसस्तद्रूपंयतशुक्लंतदपांयत्कृष्णंतदन्नस्यापागादग्नेरग्नि-
त्वंवाचारंभणंविकारोनामधेयंत्रीणिरूपाणीत्येवसत्यमित्यादिश्रुतिवाक्यंप्रमाणंतत्रहित्रिवृत्कृतस्या-

न्यादिस्वरूपस्याभिप्रेतत्वात्तेजोवन्नस्वरूपव्यतिरेकेणापि वाचारम्भणमित्यादिनिषेधेन तेजोऽन्नादिस्व
चारम्भणमित्यादिनाऽभिमतत्वात्तन्मिथ्येति मतिरायाते परोक्तार्थेऽनुसन्धितव्यप्रमाणप्रसङ्गानवकाश
ते अधिक आरम्भणाधिकरणे संहितादूषणेनैतत्तेजोबन्नानां तथा ज्ञानस्वरूपमसत्तानिर्मितं परमार्थतः तद
थार्थस्वरूपेणाश्रितत्वाभिमतः [illegible] विनिश्चितपुरुषपदस्थानस्वरूपमेव परस्मात्तन्मतः अर्थाकारता-
भासमिथ्येति मतिपादितं ॥ तथा चस्थिति [illegible] दिन अपर्यवसानं [illegible] रूपेणाप्रमाणाद्
जयाभिमतप्रयोजनत्वं तस्य कुतो हि तत्त्वमिति [illegible] आदित्यस्य [illegible] वस्तु [illegible]
अन्यथाभावेऽपि वस्तुतो भावात् इति प्रतिपादितं तथा [illegible] पदार्थ [illegible] तत्त्व [illegible]
सानेऽप्यनन्तः [illegible] मिथ्यात्वादेव [illegible] बुद्धिरिति [illegible] तत्त्व [illegible]
समस्तस्य मन्दादित्यादिना [illegible] प्रतिपादितेति विवर्ताभिप्रायेणैकविज्ञानेन सर्वविज्ञानप्रति
ज्ञापि वर्तनीया इत्युक्तं [illegible] भवति [illegible] वाचारम्भणमुक्तं सत्यत्वेनोपपादनीयापूर्वपक्षो
पदर्शितेऽपि [illegible] तृतीयायाः चतुर्थ्यर्थत्वं [illegible] मृत्तिकेत्यनुषङ्गः [illegible] नामधेयस्यापि
परिणामः मृत्तिकेत्येव [illegible] पदाध्याहारः [illegible] योजनायामतिक्लिष्टत्वात् अस्वारस्यं प्रपञ्चमिथ्यात्वबो
धकोक्तप्रमाणविरोधश्च ॥ आनन्दतीर्थीयसम्मते पूर्वपक्षोपदर्शिते उक्तवाक्यार्थे ह्यस्वारस्यं ॥ तथाहि-

तत्र वाचेत्यनेन वागिंद्रियमात्रं लक्षणीयं अन्यथा व्याकरणानिष्पाद्यत्वालाभेनापभ्रंशालाभापत्तेः मन्त्र
ते वाचेत्यस्य वाङ्मात्रमित्यर्थे नामधेयमित्यत्र नामधेयमात्रमित्यर्थे लक्षणानुश्रुतसामानाधिकरण्यानु
पपत्तिनिबंधना लोकसिद्धा नेति न दोषः यत्तु [illegible] तत्र वाक्ये वाचा व्यवह्रियमाणं विकारं वाचारंभणमिति-
व्याख्योदितमयुक्तं नामधेयत्वविधानस्यैव स्वरसतः प्रतीयते तत्र च श्रुतार्थमादाय सामानाधिकरण्यासंभवा
त् नामधेयपदेन नामधेयवाच्यत्वलक्षणामुपेत्य सामानाधिकरण्योपपादने पौनरुक्त्यापत्तेः मृत्तिकेत्येव
सत्यमिति वाक्यशेषस्वरसात्सार्थपरिसंख्यार्थतामुपेत्य मात्रपदांतर्भावेणाभिव्याख्यापर्यवसायितदर्थक-
थनस्यैव स्वरसत्वात् लोकसिद्धिस्तु दृष्टं च नामधेयपदस्येत्यादिनोक्तैव प्राक् ॥ एवं सत्यशब्दस्या [illegible]
रूढत्वान्नित्यत्वार्थकत्वमपि लक्षणयैव संस्कृतस्यापि मुख्यनित्यत्वाभावेन सदाशब्दमादाय योगासंभ
वेन व्याकरणानिष्पाद्यत्वरूपगौणनित्यत्वे लक्षणापत्तिश्च सदाशब्दस्य त्यप्तत्त्वमपि व्याकरणासिद्ध
मिति प्रामाणिकवैयाकरणसंमतम् अधुना विकारशब्दस्य मुख्यविकारार्थकत्वे तादृशासिध्यासंस्कृतोच्चा
रणाशक्त्योच्चार्यमाणार्थकत्वं लक्षणयैव नामशब्दस्यापि शब्दार्थकत्वं लक्षणयैव अपभ्रंशस्य संकेतव
त्प्रातिपदिकरूपरूढत्वाभावात् यथा सौम्यैकेनेत्यादिकमनुषंजनीयमित्यपि न सत् पूर्ववाक्यप्रविष्ट
भागस्योत्तरवाक्यघटकत्वेन प्रतिसंधानं ह्यनुषंगः स च प्रकृते न संभवति प्रकृते हि मृत्तिकेत्येव सत्यमि

त्यादेःपश्चाद्यथासौम्यैकेनमृत्तिकेत्यनेनसर्वस्तद्विकारोविज्ञातोभवतीत्यादिद्विविवक्षितदृष्टांतलाभा-
यकल्पनीयं॥ नचैतत्पूर्ववाक्येप्रविष्टंकिंचयथावाचारंभणमित्यादिनागुणप्रधानभावः श्रुत्याज्ञापितः
तथामृत्पिंडतद्विकारयोःसादृश्यमपिज्ञाप्येत॥ यदिचमृत्पिंडज्ञानेपितद्विकाराणांघटत्वादिनाज्ञा
नासंभवात्मृत्त्वेनरूपेणैवघटादिज्ञानंमृत्पिंडज्ञानादितिपर्यालोचनात्तत्सदृशज्ञानंतज्ज्ञानाधीनंल
भ्यतइत्युच्यते॥ तर्हिसंस्कृतज्ञानादपभ्रंशज्ञानासंभवात्संस्कृतस्यप्राकृतकार्यकारित्वतात्पर्यकं
मृत्तिकेत्यनेनसर्वस्तद्विकारोविज्ञातोभवतीतिवाक्यंसंभवतीतितदेवश्रुत्योच्येतकिंवाचारंभणमित्या
दिनागुणप्रधानभावज्ञापकेनेतिश्रुतिसारस्यहानिः॥ अपिचकार्ष्णायसांतानांसदृशदृष्टांतानांपश्चा
देववाचारंभणंनामधेयंविकारइतिवत्संस्कृतंसत्यमितिसामान्यतएवोच्येतनतुमृत्पिंडादिदृष्टांत
स्यैकैकस्यांतेविशिष्यमृत्तिकेत्येवेकंशब्दांतराणामपिसंस्कृतानां संभवेनमृत्तिकेत्येवेत्यादेरुपादान
मप्यस्वरसमेव॥ आयसमित्येवसत्यमित्यस्यैवपूर्णत्वसंभवेनकार्ष्णेतिकिमित्युक्तमितिशंकाप्यनु
त्तरा तन्मते मन्मतेतुकार्ष्णायसादिवाचकलघुशब्दांतरसंभवेपिनदोषःघटाद्यर्थविवक्षायांघटादिशब्दा
नामिवकलशादिशब्दानामपितत्पर्यायाणांप्रयोगात्॥ एकविज्ञानेनतत्सदृशंतदधीनंचसर्वंज्ञायतइत्यप्य
संगतमेवतथानियमाभावात्नहिगोज्ञानेगवयादेःराजज्ञानेचप्रजादेःनियतंज्ञानंअनियतज्ञानेचसद

शादरपाकामत्युपादानाभत्यत्राप्यनुत्तरमेव॥ तथाचसद्विद्योपक्रमेप्रतिज्ञातैकविज्ञानेनसर्वविज्ञा
नस्यविकारानृतत्वंस्वीकृत्यविवर्तवादमाश्रित्यैवोक्तरीत्योपपादनीयतयातदुपपादनायैवसदेवसौम्ये
दमग्रआसीदेकमेवाद्वितीयमित्युपक्रमात्ऐतदात्म्यमिदंसर्वंतत्सत्यंसआत्मातत्त्वमसिश्वेतकेतोइत्यु-
पसंहाराच्चाद्वैतब्रह्मणएवमहाप्रकरणितयातदनुसारेणैवतद्वाक्यस्थपदानांव्याख्येयत्वान्नानार्थपदा
नामर्थांतरोपस्थापकत्वसंभवेपिप्रकृतवाक्यार्थानन्वयितयातत्परित्यागेनप्रकृतवाक्यार्थानुकूलपदा-
र्थोपस्थितिपरत्वमेवास्थेयंसदेवसौम्येदमग्रआसीदित्यत्रनिष्प्रपंचात्मतत्त्वरूपप्रकृतवाक्यार्थनिर्वा
हानसंभवतितत्रेदंशब्दोदितेजगतिसदेवेत्यनेनसत्तावधारणात्अग्रइतिकालस्यतस्यांदशायांस-
त्ताप्रतिपादनात्तदनंतरंतदैक्षतनामरूपेव्याकरोदितीक्षणनामरूपद्वैतप्रपंचप्रतिपादनादित्यु-
क्तंतुनसत्॥ सदेवेत्यत्रसत्शब्दोनसत्ताश्रयतयेदंपदार्थपर्यवसितःकिंतुसमानप्रकरणेआत्मावा
इदमेकएवाग्रआसीदित्यत्रसच्छब्दस्थानेआत्मशब्दमुपक्षिप्यएकइतिपुल्लिंगेनतस्यैवविशेषणात्
ब्रह्मपरएव॥ ॐतत्सदितिनिर्देशोब्रह्मणस्त्रिविधःस्मृतइतिस्मृतेस्तस्यब्रह्मवाचकत्वात्तदैक्षतेति
सत्शब्दार्थमाकृष्यतस्येक्षणादिपूर्वकसृष्टृत्वाम्नानाच्चजगतितस्यपाधान्सन्मूलाःसौम्येमाःसर्वाः
प्रजाःसदायतनाःसत्प्रतिष्ठिताइतिस्पष्टतयातेनपदेनब्रह्मणएवप्रतिपादनात्॥ यत्त्वेवंसदेवेदम

सीदित्यनेन सद्भेदविशिष्टप्रपंचेऽप्यासीदितिसत्तां प्रतिपाद्य पुनरद्वितीयपदेन प्रपंचनिषेधे प्रपंचे प्रतीत
स्य सत्त्वस्य व्याघातः नच सदभिन्नस्य सत्त्वविवक्षायां द्वितीयत्वं नविरुद्धं सदात्मनोभयोः संभवादिति सुवचं॥
नह्यत्र सद्रूपब्रह्मणः सत्त्वमुच्यते किंतु सदभिन्नप्रपंचस्य तथाच तन्निषेधेनासत्त्वरूपापि स्यात्तथाचान
सत्त्वस्य चासीदित्यनेनलाभाद्विरोधस्य दुर्वारत्वात् नहि सदसीदित्यस्यासदासीदित्यर्थोऽविरुद्ध इति
तन्न सत् ॥ यथाहि घटादिकं स्वोत्पत्तिपूर्वं मृदेवासीदितिवाक्ये मृदाद्यभेदोपलक्षितमृदेवासीत् घटा-
दिकं मृद्व्यतिरेकेण नासीदित्यर्थस्तथाप्रकृतवाक्येऽपीदंप्रभेदोपलक्षितं सदेवाग्रआसीत् अत्र चाग्र आदेरा
भेतिनेतीत्यादिश्रुतिसिद्धं पदैकं अत्राद्वितीयं सकलद्वैतशून्यं सत्तामात्रस्वरूपं तद्व्यतिरेकेण सृष्टेः प्रागिदं
नामरूपात्मकं किमपि नासीदित्यस्यैवैवकारार्थप्राधान्येन सदेवेत्यादेरर्थत्वात् द्वितीयत्वसंगतेः एकारस्यान्य
योगव्यवच्छेदार्थकतया सदन्यसामान्येऽप्यप्रसक्तसत्ताभावस्यैवबोधनेन प्रपंचे सत्त्वादिसंबंधो वाचा-
चान्नविरोधगंधोऽपि ॥ प्रतिपादितंचैतदारम्भणाधिकरणे सत्त्वाच्चावरस्येत्यादिसूत्रव्याख्याने श्रीमद्भाष्य-
कारादिभिः॥ एकं एव अद्वितीयमितित्रिभिःपदैः स्वगतभेदसजातीयभेदविजातीयभेदत्रयं क्रमेणनि
षिध्यते तदुक्तं॥ वृक्षस्यस्वगतोभेदः पत्रपुष्पफलादिभिः वृक्षांतरात्सजातीयात् विजातीयात् शिलादि
तः तथासद्वस्तुनोभेदत्रयंप्राप्तंनिवार्यते ऐक्यावधारणद्वैतप्रतिषेधैस्त्रिभिःक्रमात् इति स्वगतभेदः नाना-

त्वरूपजीवेश्वरभेदः ॥ सजातीयभेदः ॥ द्रव्यत्वादिना सजातीयपृथिव्यादिभेदः ॥ विजातीयभेदः ॥ गुण
गुणादिभेदः ॥ एकपदेन एवकारेण द्वैतार्थकद्वितीयपदयुक्तेन निषेधार्थकनञा च निषिध्यत इति तदर्थः
॥ यदि च पृथिव्यादिन सजातीयं शुद्धब्रह्मणो द्रव्यत्वानंगीकारादित्युच्यते ॥ तदा जडभेदः विजातीयभेदः ॥
चैतन्यभेदः सजातीयभेदः ॥ स्वभिन्नत्वे सति चिदात्मकत्वं साजात्यं तच्च जीवादौ वर्तत इति तद्भिन्नः सभेदः
स च सर्वानुगतत्वात्तस्य स्वस्मिन्नपि प्रसक्तः ज्ञानानंदादौ स्वरूपे ब्रह्म धर्मत्वस्य कल्पितत्वात् ज्ञानानंदा
दि धर्मधर्मिभेदः स्वगतभेद इति व्याख्येयं ॥ न चास्य गौर्द्वितीयोन्वेष्टव्य इत्युक्तौ गौरेव द्वितीयोन्विष्यते ना
श्वो न गर्दभ इति महाभाष्यानुसारात् समानजातीयद्वितीयपरत्वमेव द्वितीयशब्दस्य वाच्यमिति सजातीय
भेदनिषेधपरत्वमेवाद्वितीयपदस्य विजातीयस्वगतभेदनिषेधपरत्वं तु एकावधारणपदयोरर्थ इष्टं वाच्य
मिति शंक्यं ॥ व्यावर्तकपदांतरयुक्तस्य यद्धर्मविशिष्टवाचकपदस्य सन्निहितं यद्द्वितीयपदं तत् तद्धर्म-
विशिष्टं द्वितीयमभिधत्ते तथा चास्य गौर्द्वितीय इत्यादौ व्यावर्तकेनास्येति पदेन युक्तस्य गोपदस्य सन्निहिते
न द्वितीयपदेन गोरूपद्वितीयस्यैव बोधनेपि प्रकृते व्यावर्तकपदांतराभावात् न सजातीयद्वितीयबोधकत्वं
उक्तनियमादेव द्वितीयगामी नहि शब्द एष न इत्यादौ द्वितीयशब्दस्य द्वितीयसामान्यपरत्वं संगच्छते ॥ न
चाद्वितीयपदेन द्वितीयमद्वितीयमिति तत्पुरुषसमासाश्रयणे ॥ न द्वितीयं किंतु प्रथमं तृतीयं चेत्यर्थः स्या

त्र न योऽश्वमपमत्वादित्वनाद्वितीयपदयोर्व्यक्तां किंतु द्वितीयाभिन्नत्वेन साम्यं संभवति न चोरपि कृत्विदो

स्याद्वितीयत्वादिति न तत्पुरुषसमासः पर्यासंभवान्नाधियते द्वितीयपंथ्येति बहुव्रीहिरेवाभ्रमणीयस्त्वा पार्ये

दमेघमात्रस्याद्वितीयत्वादेकैवैवाद्वितीयपदेन इयधयाभनिषेधसंभवेऽपि कार्यपरणपरत्वोर्वैरस्य भूमिति

यार्च्चं ॥ वलीवर्दपदसान्निधाने गोपदस्यापि शेषार्थे संकोचदृष्टेः सजातीयत्वगतभेदनिषेधार्थे [illegible] तत्रमा

रणपदसन्निधिवशाद्देतपदस्यापि जातीयद्वितीयस्वार्थच्छिन्नमतिबोधितत्वकल्पितेः परस्पर [illegible]

लात् ॥ अभाद्वितीयपदस्यापि जातीयद्वितीयवत्स्वपक्षात्तच्छून्यत्वबोधार्थमिन्नाह [illegible] द्वितीयत्व [illegible]

व्यतेशाद्वएवाताह श्रामेदस्यापि निषेधस्त्वथाह स्वामप्रकरणे आत्माशाइदमेकमेवाद्वितीयं [illegible]

त्रानिषद्दित्यत्रभातूनामनेकार्थत्वादिभिधादित्वासौ इत्यर्थकविस्तैः [illegible] स्याद्वयाख्यानात्र [illegible]

याप्रकृतेद्वितीयपदस्यान्यार्थकत्वाद्वृष्णा [illegible] कत्वाद्वित्वं संख्यापूरकत्वादि [illegible]

जातीयत्वेन लक्षणाप्रयुक्तत्वाद्वाह शास्त्रेनानिषेधेपाप्राकाशादाविभिन्न [illegible] द्रोयस्य जस्ये

यद्विशेषणस्य भेदस्यापि निषेधप्रतीतेः एकपदस्यैकपदार्थकत्वेनैव त्वस्य स्वान्यशून्यत्वरूपतया-

प्रकृते संकोचेन जीवेश्वरादिरूपस्वान्यशून्यबोधकत्वात् भेदनिषेधबोधकत्वं एव कारस्याप्यन्यतादात्म्य

स्य वच्छेदबोधकत्वेपि प्रकृते पृथिव्यादिरूपसजातीयस्वान्यतादात्म्यशून्यत्वबोधकत्वेन विशेषणीभ-

तानां सजातीयतद्भिन्नभेदानामुक्तरीत्या निषेधबोधकत्वमेवं च भेदत्रयस्य पदत्रयेण निषेधोक्तिर्ब्रह्मभिन्न
सामान्यस्य मिथ्यात्वे प्रकृतश्रुतेः पर्यवसानोक्तिश्च न व्याहतेति बोध्यं ॥ अथवा स्वान्यत्वावच्छिन्ने द्वितीयशब्दा
मीश्वाजानीकप्रयोगदर्शनात्तत्र द्वितीयशब्दस्य मुख्यवृत्तत्वात् सजातीयस्वान्यत्वादिना पदत्रयलक्षणापे
क्षया मुख्यया वृत्त्या द्वितीयपदेन स्वान्यत्वेन बोधः पदांतरं तु तत्संकोचतात्पर्यकमित्यद्वितीयपदेनैव भे
दत्रयनिषेधबोधः ॥ एवमनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीत्यनेन मध्येपि जीवब्रह्मणोर
भेदः उक्तरीत्या निष्प्रपंचाद्वितीयब्रह्मपरोपक्रमानुगुण एव परामृश्यते ॥ यद्यपि परमात्मनो यः सर्वेषु
भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्योंतर इत्यंतर्यामिरूपेणाप्यनुप्रवेशोस्ति तथापि स नेह विवक्षितः जीवेनेति
विशेषणादेवमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इत्युपसंहारोप्युपक्रमानुगुण
एवोपलभ्यते ऐतदात्म्यमिदं सर्वमिति हि इदं सर्वं यदयमात्मेत्यादिश्रुत्यंतरानुसारात् सदेव सोम्येदम
ग्र आसीदित्युपक्रमानुसाराच्च एष आत्मा अस्येति बहुव्रीहिं कृत्वा ततो भावप्रत्यये कृते भावप्रत्यय-
स्य प्रकारीभूतप्रकृत्यर्थपरत्वात् बहुव्रीह्यर्थविशेषणीभूतात्मपरामर्शकत्वेन एष आत्मा इदं सर्वमिति
प्रतिपादयन्ति ॥ एष आत्मा इदं सर्वमित्येव वक्तव्ये सामानाधिकरण्यमात्मात्मीयभावेनौपचारिकमिति
शंकानिराकरणाय बहुव्रीहिभावप्रत्यययोरुपादानं तथा सति बहुव्रीहिणैव मुख्यया वृत्त्या आत्मात्मी

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

के नित्य स्वजीव [illegible] ॥ [illegible] जीव [illegible] ॥ [illegible]

कस्य यद्रूपेण [illegible] त्वं [illegible] मापत्त [illegible] नापत्तेः ॥ एतेन [illegible]

[illegible] सिद्धितो [illegible] णां [illegible] त्वात् [illegible]

[illegible] द्वितीयमसत्तापन्नित्यर्थः ॥ एव मे [illegible] नाना [illegible] मिथ्यात्व [illegible] पाद्

एकशब्दस्य नानार्थत्वमेके मुख्यान्यकेवलाः इति कोशात् एकशब्दोपमन्यप्रधानासहायसंख्याप्रथमसमानवा
चीति एको गोत्र इति सूत्रे कैयटोक्तेश्चावगन्तव्यं ॥ तथा च जीवादिभ्योऽन्यत्वं प्राधान्यं वा एकशब्दार्थोऽस्त्विति प
रास्तं निरस्तं ॥ उक्तरीत्योपक्रमोपसंहारपर्यालोचनया ब्रह्माद्वैतस्यैव महाप्रकरणितया तदनुसारेणैव
द्वितीयादिपदानां व्याख्येयतया एकादिपदानां नानार्थत्वेऽपि प्रकृतार्थानन्वयित्वात् ॥ अर्थान्तराणां प्रकृ
तवाक्येऽसंभवदुक्तिकत्वाच्च ॥ तथाहि नाद्वितीयमित्यस्यासहायमर्थः ब्रह्मणः स्रष्टृत्वे अविद्याद्यादि
सहायापेक्षत्वेनासहायत्वासंभवात् स्वतंत्रसहायार्थे द्वितीयशब्दस्य शक्तिग्राहकप्रमाणानुपलंभाल्लु-
क्षणापत्तेश्च ॥ एकशब्दस्यापि नोक्तान्याद्यर्थकत्वं प्रकृते संभवति न तावत् जीवादिभ्योन्यत्वं तदर्थः स्रष्टृ
त्वप्रतिपादनेनैव तल्लाभादनन्यलभ्यस्यैव शब्दार्थत्वात् अत एव न प्राधान्यं प्राथम्यं वा तदर्थः सर्वका-
र्यमूलकारणत्वेनैव तल्लाभात् ईक्षणपूर्वकस्य तस्याविद्यादावसंभवेन तस्य ब्रह्मासाधारणत्वात् ॥
असहायप्राथम्यार्थकत्वासंभवस्तूक्त एव नापि संख्यार्थः एकवचनेनैव संख्यालाभात् अद्वितीयत्वाद्वि-
रोधेन ब्रह्मणि तदसंभवाच्च ॥ नापि साम्यमर्थः सर्वलीलाविग्रहाणां नानाविधतत्कार्यकारित्वेन कार्यतः
साम्यासंभवात् सर्वशरीरावच्छिन्नेशव्यक्तेरेकत्वेनैव गुणतः साम्याभावात् तद्भिन्नत्वे सति तद्गुणस
जातीयगुणवत्त्वस्यैव गुणतः साम्यत्वात् यत्त्वैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसीत्यत्र तत्पदे

नन्वात्मा परमपुरुषो नैतदात्म्यं नपुंसकत्वात् [illegible] मित्यस्यैव [illegible] तदात्म्ये इदं

तदात्म्यमित्यर्थः । एवं चैतदीयं पस्तुत्व न स्यादित्यर्थः ॥ नन्वात्मा भेदः एतदात्म्य [illegible] स्यादित्याद्यर्थे भावप्रत्यये [illegible]

पत्ते स्वतोऽवरम [illegible] यणाभिति ॥ सप्तम्यैव संकृत्तानि संसारक्षिनाहरिः तेन व्याप्तमिदं सर्वमेतदा

त्म्यमतो विदुरिति स्मृते श्चेतिनदस्मत्तस्येदमित्यर्थे [illegible] विधानात् प्रयोगादर्शनाच्च ॥ स्वार्थे च सोऽव्याभि

त्यादिप्रयोगदर्शनात् [illegible] तदात्मत्वभावे [illegible] तदात्म्यमित्येवानिमृहः

[illegible] नपुंसक [illegible] नपुंसकत्वेन निर्देशा

संभवात् [illegible] तत्सत्यमित्यत्र [illegible] असत्कारणानि [illegible] सदेव सोम्येत्यादिना

[illegible] सत्त्व [illegible] आत्मेति [illegible] तस्य [illegible]

[illegible] यथाश्रुत [illegible] परमात्मा [illegible] परवाद न

[illegible] कारणत्वात् [illegible] पनाद्य

[illegible] दूषणपरिहारान् [illegible] रेण ॥ विरुद्धाकार

[illegible] विरुद्धाकार [illegible] अनिर्दिष्टानवधान [illegible] यवा

[illegible] तत्त्वमसीत्यादि [illegible] तात्पर्यात् ॥ पूर्वोक्तं [illegible] सद्धाद [illegible]

श्रीत् सर्वं खल्विदं ब्रह्मेत्यादौ असत्त्वशून्यत्वयोश्चित्त्वजडत्वयोर्वा विवक्षया ब्रह्मणः शून्येन जडेन चैक्यापत्तिरिति परेणोक्तं तदसत् ॥ शून्यसतोश्चिज्जडयोर्वा विरुद्धाकारत्यागेन जीवब्रह्मणोरिवानुस्यूताकारस्याभावात् असतो निःस्वरूपत्वात् जडस्य बाध्यस्वरूपत्वात् ॥ यत्तु जहदजहल्लक्षणास्वीकारे पदद्वयलक्षणापत्त्या पूर्वोक्तश्रुतिसिद्धतज्जत्वात् तदधीनत्वात् तदाश्रितत्वाद्वा मन्यतद्रूपतत्त्वमिति व्यपदेशोस्त्विति परेणोक्तं तदप्यसत् ॥ अभेदतात्पर्ये उक्तरीत्या वृत्तेर्लक्षणाबाहुल्यस्यादोषत्वात् नहि लक्षणाभयानुसारेण तात्पर्यपरित्यागः तदुक्तं न्यायचिंतामणौ तात्पर्याद्वृत्तिर्न वृत्तेस्तात्पर्यं ॥ तात्पर्यात् ॥ उपक्रमोपसंहारादिभिर्निर्णीततात्पर्यात् ॥ वृत्तेर्वृत्तिलाघवात् ॥ इति तदर्थः ॥ वृत्तिलाघवात्तात्पर्यस्वीकारे अर्थवादस्थनानापदमुख्यत्वायोपासीतेत्यादिपदाध्याहारापत्तेः ॥ अत एवोपक्रममात्रानुरोधेन ऋगादिपदे उच्चैर्ऋचा क्रियत इति विधिस्थलेपि लक्षणाश्रिता ॥ यत्र तूपक्रमादिकमनिर्णायकं तत्र तात्पर्यनिर्णायकत्वेन वृत्तिलाघवमप्याद्रीयते यथा स्थपत्यधिकरणे जहदजहल्लक्षणया मुख्यपरत्वे संभवति गौणार्थपरत्वकल्पनानुपपत्तेः तज्जत्वाद्यर्थस्य जीवेनुपपत्तेरुक्तत्वाच्च ॥ यत्तु स आत्मा तत्त्वमसीत्यत्र आतत्त्वमसीति पदच्छेदः शकुनिसूत्रदृष्टान्तानुसारादिति परेणोक्तं तदप्यसत् ॥ एकमेवाद्वितीयमित्युपक्रमानुसारेणातदिति पदच्छेदस्याप्युक्तत्वात् ॥ शकुनिसूत्रयोर्विद्यमानस्यापि भेदस्यानदिति

पदच्छेदासाधकत्वात् पयाऽम्बरादिरोगग्रस्तस्य तन्निर्मोकेस्वास्थ्येन विश्रान्तवत् जाग्रत्स्वप्नावस्थयोःक-
रणव्यापारजनितश्रमानुत्तये जीवस्यदेवनात्मकस्वरूपावस्थानमित्यस्मिन्नर्थे शकुनिसूत्रदृष्टान्त इति त-
स्यान्यथोपपत्तेरेवमन्येषामपिदृष्टान्तानामन्यथोपपत्तिराकरेषु द्रष्टव्यासर्वांशेसाम्यस्य क्वापिदृष्टान्ते ऽ
दर्शनात् सङ्कतोपयुक्तार्थ एवतस्यादरणीयत्वात् ॥ अतदितिपदच्छेदे एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा
विरोधात् ब्रह्मजीवैक्यस्याप्रसक्तत्वेन निषेधानुपपत्तेश्च ॥ यत्तु श्रुतितात्पर्याज्ञानेन तद्धैकआहुरसदेवे-
दमग्रआसीदित्यादाविवकुसमयेन यादेहेन्द्रियादीन्प्रतिसात्वंत्र्यरूपैश्वर्यस्यसर्वैरपिस्वात्मन्याभिम-
न्यमानत्वेन प्रत्यक्षेणवाप्रसक्तिरैक्यस्येतिपरेणोक्तंतन्न साधु ॥ श्रुतितात्पर्याज्ञाने श्रुतितःकस्याप्यर्थ-
स्यप्रसक्तेर्वक्तुमशक्यत्वात् अज्ञानशब्देन तात्पर्यसंशयोक्तौ तत्त्वमसीतिवा अतत्त्वमसीति वाविच्छिन्न
मितिसंशयानिवृत्तेर्वाक्यस्यानिर्णायकत्वापातात् तात्पर्यनिर्णायके लिङ्गे वचनव्यक्तिनिर्णये तु ऐक्यत
परैः स्वदभिमतैः स्वैर्निर्णीत वचनव्यक्त्या ऽद्वैतप्रसक्तेरभावात् अद्वैतप्रसक्त्यतात्पर्यनिर्णायकैरद्वैतपरो
पक्रमोपसंहारादिलिङ्गैस्तात्पर्यस्यप्रमितत्वेन तस्याभिमानिकत्वाभावात्तेन चैदैक्यप्रसक्तिस्तदा तस्य
निषेद्धुमशक्यत्वात् तद्धैकआहुरसदेवेदमग्रआसीदित्यसद्वादमेकीयमतेनानूद्यकथंनुखलुसोम्यै-
वंस्यात्कथमसतः सज्जायेतेति तद्दूषणाभिधानवदैक्यस्यैकीयमतासिद्धत्वेनानुवादादर्शनान्न दू-

पयानुपलंभाच्च तादृशकुसमयानुपलंभाच्चैक्यस्य सह्यादद्दपानादिकुसमयप्रामाण्याभावात् ॥ दे
हेंद्रियादीनांजीवस्यैक्येनाध्यस्तत्वात्ज्ञान् प्रतिस्वातंत्र्याभिमानस्य आर्वलौकिकस्य च कुमताक्यत्वात्त्य-
त्किंचित् प्रतिस्वातंत्र्यस्येश्वरलक्षणत्वाभावाच्चैक्यस्य प्रत्यक्षप्रामाण्यस्य च कुमताक्यत्वाच्च ॥ एतेनैक
मेवाद्वितीयमितिसामान्याधिकराहित्यस्योपक्रमात् ऐतदात्म्यमिति तस्यैवोपसंहारात् अतत्त्वमसीति
नवकृत्वोभ्यासात् शास्त्रांतिमाशास्त्रैकसमधिगम्येश्वरभेदस्याप्रसक्ततयाऽपूर्वत्वादयसंपत्त्या इ
तिफलश्रवणात् येनाश्रुतं श्रुतं भवतीत्यर्थवादात् शकुनिसूत्रादिदृष्टांतैरुपपादनाच्च षड्विधतात्प
र्यलिंगानि भेदपराण्येवेतिनिरस्तं सामान्याधिकराहित्यमात्रबोधेपिनात्विकभेदोपक्रमत्वालाभेन वा
स्तवाभेदेपि सामान्याधिकराहित्यस्य संभवात् सामान्याधिकराहित्येनापकृष्टानां सत्त्वाभेनानात्विक-
भेदप्रत्ययेपिवास्तवाभेदप्रसक्तेरभावात् सामान्याधिकयोः प्रसक्तेरभावात्तन्निषेधायोगाच्च ॥ एकविज्ञाने
न सर्वविज्ञानप्रतिज्ञोपपादनायाद्वितीयसामान्याभावस्यैवोपक्रमइत्यस्यवाच्यत्वात् ॥ आनंदतीर्थीया
स्तु जिज्ञासाकारणीभूतगुणपूर्तिमभिधत्ते ॥ जीवादिभेदकं विष्णोर्विश्वकर्तृत्वमुच्यत इति पूर्वाधिकर
णसंगतिमुक्त्वा तद्धिजिज्ञास्यत्वमस्तीतिवाक्यस्थं ब्रह्म किं जीवउत विष्णुरितिचिंतानतदर्थं ब्रह्मशब्द-
स्य रूढत्वत्यागे हेतुर्नास्तिइतरास्तीति तदर्थं विष्णुरेवयस्थब्रह्मशब्दस्यारस्यापयतोवेत्यादिपूर्ववाक्यंजीवेकथंचि

येतुंयथ्यमुनाद्यथ्यमितिसंशयेजीवस्यांकथांचस्त्रंब्रह्मशुद्धजातिर्जीवकमलःसनआद्युराणिविल्वाभिधा
नात्ब्रह्मशब्दस्यतत्ररूढेःविद्योयौगिकत्वात्रूढेश्चायथार्थौनिरपेक्षायास्तत्सापेक्षयोगाद्बलीयस्त्वस्व
थकारादिदशाह्वुष्टितत्वादितिपूर्वपक्षेसिद्धांतः॥विष्णुरेवजिज्ञास्यंब्रह्मभाष्योक्तश्रुतिभिर्विष्णुमान
निष्ठकारणत्वस्यचतोवेत्यादौश्रवणान्नस्यजीवेनुपपत्त्यारूढेरपिबाधात्अदृष्टद्वारकत्वस्यकल्पेनवाजीव
कारणत्वेजातादिपदानांमुख्यार्थत्यागापत्तेरितिरीत्याधिकरणरचनामाहुः॥नचोच्यतेजिज्ञासाकार
णीभूतेत्यादिनोक्तासंगतिस्तावदनुपपन्नासामान्यतोज्ञातेविशेषतोवेदितव्येनासर्वत्रजिज्ञासादर्श-
नात्विशेषधर्मपुरस्कारेणजिज्ञासांप्रतिसामान्यधर्मप्रकारकज्ञानस्यकारणतायास्तत्त्वाहीकृतत्वा
च्चसामान्यधर्मप्रकारकज्ञानसाध्यायांजिज्ञासायांगुणपूर्तेरकारणत्वात्तत्त्वरूपतोगुणपूर्तेर्ब्रह्मादि-
करणतयातत्कारणत्वस्यासंभवदुक्तिकत्वाच्च॥यदिचकारणीभूतेतिनगुणपूर्तेर्विशेषणंकिंतुगुण
पूर्तिसिद्ध्यर्थेतिनत्याधिकरणत्वमित्युच्यतेतत्रापिब्रह्मविचारानंतरभाविन्याःजगज्जन्मादिकर्तावि
ष्णुरितिज्ञानात्जायमानायाःगुणपूर्णोविष्णुरितिनिश्चयरूपायास्तस्याःकथंजिज्ञासाकारणत्वमन
न्यथासिद्धनियतपूर्ववर्तिनएवकारणत्वात्आपातप्रतिपत्तिरूपायास्तस्याःगुरुमुखात्तन्नद्वाक्या
र्थज्ञानरूपश्रवणेनैवसिद्धत्वात्श्रवणानंतरभाविमननरूपत्वस्यमतसिद्धविचारसाध्यत्वाभावात्

तदर्थं विश्वकर्तृत्वमुच्यत इत्यनुपपन्नमेव जिज्ञासां प्रत्यन्यत्र क्लृप्तसामान्यधर्मप्रकारकज्ञानेन त
त्सहभूतायास्तस्या अन्यथासिद्धत्वान्न कारणत्वकल्पकप्रमाणानुपलंभाच्च न तस्याः कारणत्वं ॥
एतेनान्येष्वनेकेषु सत्सु तस्यैव जिज्ञास्यत्वं बहुत्तविशेषादेव वाच्यं स च गुणपूर्तिरेवेति सा जिज्ञासा
कारणं स्यादिति निरस्तं जिज्ञासाकारणमोक्षहेतुज्ञानविषयत्वरूपसामान्यधर्मप्रकारकज्ञानवि
षयताया अन्यत्रासत्त्वेन मुमुक्षोस्ताज्जिज्ञासानुपपत्तेः श्रुतिप्रतिपन्नस्य तस्य वाक्यगतजगज्जन्मा
दिकारणत्वस्यैव तद्विशेषत्वोपपत्तेश्च गुणपूर्तिरेव विशेष इत्यस्यासिद्धेः अत एव तदनुनिष्पादिनी गुण
पूर्तिर्न तद्धेतुरित्युक्तं प्राक् विश्वकर्तृत्वस्य जीवादिभेदकत्वोक्तिरपि न युक्ता ॥ तद्धि ब्रह्मणि जीवत्वज्ञान
प्रतिबंधकजीवभेदानुमितिजनकज्ञानविषयत्वं तच्च न संभवति ब्रह्मजगज्जन्मादिकारणमिति ज्ञानेपि जीवत्व
जडत्वादिव्याप्यसोपाधिकसत्ताश्रयत्वसंकुचितज्ञानाश्रयत्वादिज्ञानाधीनब्रह्मविशेष्यकजीवत्वादिप्रकार
कज्ञानसंभवात् सत्यत्वादेस्तु निरुपाधिकसत्तारूपत्वेन तत्प्रकारकज्ञानस्य जीवत्वज्ञानविरोधित्वात् संभव
ति व्यावर्तकत्वं ॥ न च जगज्जन्मादिकर्तृत्वस्य जीवत्वाभावव्याप्यतया तज्ज्ञानेन ब्रह्मणि जीवत्वज्ञानमिति वाच्यं
॥ उक्तसत्यत्वादिबोधकस्यानन्दिवाक्यावगमात् प्राक् जीवत्वादिव्यंजकसंकुचितज्ञानाश्रयत्वादिज्ञानाधी-
नतज्जातीयत्वशंकायां व्याप्तिज्ञानप्रतिबंधात् कारणत्वादेरुक्तव्यावर्तकत्वासंभवात् ॥ न च कारणत्वस्य-

जीवापृत्तित्वात् तज्जीवात् ब्रह्मशब्दार्थत्वनिर्णयो नैव कर्तुं शक्यं॥ परंतु रूढसंस्थानस्यापि पृथ्वीत्वाद्यनेक
त्वेपि प्रथमं नगतं नवादिगत पृथिवीत्वाभिव्यंजकं यद्वत् संवंधात्तद्वज्ञानं तथा तु पृथिवीजा
तीयत्वशंकया पृथिवीजातीयत्वाभावसाधकत्वादर्शनेन जीवत्वाभिव्यंजकोऽपि धर्मान्वयज्ञानाधी
नतज्जातीयत्वशंकायास्तत्र पृथिवीधर्मसत्त्वेऽपि तन्निराकरणासंभवात् तद्धर्माभिव्यंजकधर्मविरोधि
त्वेन ज्ञायमानधर्मस्यैव तद्धर्मावच्छिन्नाभावसाधकत्वेन तद्व्यवहारे बोधकतायाः कल्पनया
पृथिवीत्वसमानाधिकरणत्वेन ज्ञायमानस्य पृथिवीत्वावच्छिन्नाभावसाधकतया च साधकत्व
तत् जीवत्वाभिव्यंजकोक्तधर्मसमानाधिकरणत्वेन ज्ञातस्य जगज्जन्मादिकारणत्वस्य जीवत्वे
तत्साधकत्वात्॥ किंच पुरा पृथिवीत्वं कथं ब्रह्मशब्दे नैव जीवाभेदश्रुतिरूढ्या धर्मिविधयकत्वं मुख्यत
इत्युक्तिरपि न साधीयसी॥ अथ कारणत्वेऽपि तदुपपादकं विशिष्टकार्यानुपजीवि दृष्टपदार्थेतरत्व
माकृतस्य पदार्थत्वमिति चेत्॥ कारणत्वं जीवसाधारणं न वाक्यैकवाक्यतया दर्शितयुक्त्या पूर्णत्वादेरपि न त
द्गमकत्वसंभवः॥ द्वितीये कारणत्वाभिन्नं जीवास्याबोधकब्रह्मशब्दे न जीवस्य रूढिभंगः॥ एतेनाभि
ज्ञासायाः स्वप्रकाशशक्त्यतिरिक्तवस्तुविषयतानैक्यत्वात् तस्याश्च पूर्णताप्रतिपत्त्यधीनत्वात्तदुप
पादकं कारणत्वं जीवादिभेदकमिति कल्पनं निरस्तं॥ पूर्वपक्षोप्युक्तः ब्रह्मशब्दस्य शरीरवृंह

कत्वरूपयोगेन च जीवेऽप्रयोगोपपत्त्या तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तो महामुने॥ तत्रैव मुख्यवृत्तोयम
न्यत्र तु पचारतः इति वचनाविरुद्धायां जीवे तद्रूढौ मानाभावः॥ यत्तु वृहजातिजीवकमठासनशब्द
राशिष्वपि तत्प्रमाणप्रदर्शनं तद्व्याकरणभूधर्मैरप्यदर्शितप्रवृत्तिनिमित्तकरणे तथा धातुपाठदर्श
नोक्तेर्नाभ्रष्टव्यं॥ क्रियापरत्वाभावाच्च तादृशधातुरूढिर्न युज्यते न च तत्र वृद्धिक्रियापरत्वेन जीवे बाधः॥
शरीरद्वारा तदुपपादनं च गौणत्वेनाप्युपपन्नं न रूढौ गमकं॥ वृहेर्मनिगंततयानिष्पन्नस्य ब्रह्मशब्द
स्य नावयवशक्तिमात्रनिबंधनत्वं आपेक्षिकवृहत्त्वशालिषु व्यणुकादिषु ब्रह्मशब्दाप्रयोगात् व्यणुकाद्य
पेक्षया तस्यापि महत्त्वात् अतः पंकजशब्दयोगस्य व्यापककुमुदादिव्यावृत्ततामरसानुवृत्तपद्मत्वव
त् ब्रह्मशब्दप्रयोगाविषयाश्मयादिपंचव्यक्तव्यावृत्त्यानुवृत्त्या न्याय्यावृत्ताकारादर्शनेनानेकशक्तिकल्पनस्या
न्याय्यत्वात् प्रवृत्तिनिमित्तपौष्कल्यप्रयोगबाहुल्याभ्यां पूर्वोक्तवचनाच्च ब्रह्मशब्दस्य विष्णावेव रूढिनिश्च
यान्न तस्य जीवे रूढिर्युक्तेत्यपि केचित्पूर्वपक्षायुक्तत्वं वर्णयंति॥ किंच वृह धातुनिष्पन्नस्य ब्रह्मशब्दस्य
जीवे रूढ्यंगीकारे सिद्धांतासिद्धिः ब्रह्मणि तस्य केवलयोगांगीकारेण रूढितस्तस्य दुर्बलत्वात् वैदिक
त्वात् योगः प्रबलः योगस्य वैदिकत्वं अथ कस्मादुच्यते ब्रह्म वृहंतो ह्यस्मिन् गुणा इति श्रुतिसिद्धमिति चे
त्॥ स्वरूपतो दुर्बलस्य पदार्थधर्मक्रमस्य श्रुतिरूपाश्रयबलप्रयुक्तबलवत्तायाः पूर्वतंत्रे शिशाकोपाधि

॥ ...कत्वात् ॥ एवमनन्तरं ब्रह्मपरमकत्वानामानतेश्रुत्या ब्रह्मशब्दस्य विष्णौ रूढ्यभिधाना-
त् ब्रह्मणि योगरूढ एवायं न तु केवलं यौगिकः इत्युक्तत्वमपि निरस्ता ॥ शारीरत्वं हि कत्वादियोगस्य जी-
वेपि संभवात् सान्येन जीवपूर्वपक्षानुत्थितेः सिद्धांतासिद्धेश्च ॥ योगस्थानतिप्रसक्तत्वान्न ब्रह्मणि रू-
ढिरिति पूर्वपक्षाशयवर्णनमपि ब्रह्मगुणेष्वतिप्रसंगाद्धेयं ॥ अथापि ... रूढ्या-
धेनासिद्धांतसमर्थनं तु शिक्षको पाधिकरणविरोधान्निरस्तमेव ॥ योगरूढ्यो नैरूढ्यानि रूढ्यवलक्षणतो
न्यभिन्नत्वेपि नापि अंबिको पस्थितिकतयाभावत्वेपि नेहतथात्वं समुदायशक्तेरपि अंबितप्रतीतिरूढत्वा-
विशेषात् ॥ आर्यम्लेच्छप्रसिद्धिविषयवादिदृष्टांतमदर्शनमपि ...प्रसिद्धिविषयत्वसत्वात्
गृहजातिजीवेतु दाहृत प्रात्यनुशासनमूलिकायाजीवादौ रूढेरत्रसंबंधित्वाभावेन तस्या अपि गृहीतरू-

ढित्वात् यौगिकत्वेन प्राबल्यं चानुपदमेव निरस्तं ॥ तदेवं ब्रह्मपरमं कथं नामेति श्रुत्या विष्णौ ब्रह्मशब्दस्य रू-
ढिकल्पनमपि न साधु ॥ चैत्रः परमधार्मिक इत्यत्र परमशब्देन चैत्रस्य धार्मिकत्वोत्कर्षसिद्धावपि तत्र गच्छ-
द्वस्य रूढ्यसिद्धिवत् विष्णौ बृहत्वोत्कर्षसिद्धावपि तत्रान्यरूढ्यसिद्धेः परमेति विशेषणेनान्यत्रापि ब्रह्म-
शब्दप्रयोगज्ञापनान्नोक्तश्रुतिर्जीवे ब्रह्मशब्दरूढिबाधिका त्येवं वाच्यं स्यपेक्षस्यात्तत्र तस्य मुख्यत्वमेव सिध्यती-
ति न जीवरूढ्या पूर्वपक्षोत्थानं ॥ किंचाज्ञाते निश्चिते चाजिज्ञासाया अदर्शनाज्जिज्ञास्यत्वस्य संदिग्धत्वव्या-
प्यत्वासिद्धौ जीवस्यासंदिग्धतया व्यापकनिवृत्त्या व्याप्यनिवृत्तेरवश्यं वाच्यत्वान्न जीवस्य जिज्ञास्यतेति-
जिज्ञास्यसमर्पकब्रह्मशब्देन कथं जीवरूढ्युपक्षेपः ॥ न च जीवस्यापि देहाद्यन्यतया संदिग्धतया जिज्ञास्यतेव
टीकादौ पूर्वपक्षे जीवस्याजिज्ञास्यत्वोक्तिर्ब्रह्मपदनिगदनत्वाभावापि अपेति नोक्तदोषः इति वाच्यं ॥ तथा
सति तेनैव तत्र स्यात् प्रसिद्धेः कृतं शास्त्रारंभाक्षेपेण ॥ अथ जिज्ञासाविधेरप्रामाण्येन पूर्वपक्षोत्थानमि-
ति चेत् तर्हि प्रामाण्येन पूर्वपक्षसौलभ्ये जीवपूर्वपक्षस्यायुक्तत्वात् ॥ किंच नारायणोसौ परमो विचिंत्य इति जिज्ञा-
स्ये नारायणशब्दश्रवणान्न जीवपूर्वपक्षोत्थानसंभवः ॥ नारायणशब्दस्यान्यत्र रूढ्यभावात् ॥ तद्रूढिभंगेन
पूर्वपक्षेतु ब्रह्मशब्दरूढिरेवात्र किं न भज्यते ॥ न हि जिज्ञासस्वेति जिज्ञासाविधेरत्र मतेमननविधिपूर्वकत्वा-
श्रिंतनस्य मननरूपत्वात् ॥ किंच ब्रह्मशब्दावयवार्थगुणपूर्त्या जीवभेदे पूर्वाधिकरणसिद्धे कथं पुनरि-

गतस्य जीव [illegible] शंकोत्थानं ॥ तदुक्तं पौराणेनैवेति वेत् ॥ कुत इति चेन्नान्दितिश्रुत्या इति ये [illegible] पूर्व-
पक्षिणा [illegible] तत्र संबंधः सर्वस्यापि ब्रह्मशब्दस्य [illegible] तदुक्तं जीवपरत्वात् ॥ एवं ब्रह्मा-
कारजातीनां निरवकाशान रूढिभंगः यथा तदेव ब्रह्म परमं कवीनामित्यत्र यमंत्र सगुणमिति सगुणब्रह्मावि
लिंगात् [illegible] योगः सावकाशा इति चेन्न [illegible] कारणत्व रूपनिरवकाशलिंगसह कृत ता-
दृश योगस्य बलात् रूढिभंग संभवात् कथं पूर्वपक्षोदयः ॥ तदुक्तमादनेन पूर्वपक्षोपपादनं नास्य दोषैः अद-
शितरीत्या पूर्वपक्षोपपादनं संभवेनन्याय्यं ॥ एवं ॥ अभिसंधि [illegible] तदुक्तं बोध [illegible] जीवे
कथमप्यनुपपन्नं कथं जीव पूर्वपक्षसंभावित [illegible] लिंगानां [illegible] त्वात्
[illegible] स्वप्नकार्यलाद्युपपत्त्यादीनां तदुक्तमनुक्त [illegible] त्वान्यथैक [illegible] त्वात् ॥ [illegible]
त्वादनेन पूर्वपक्षप्रवृत्तेः प्रकारांतरेण पूर्वपक्ष [illegible] त्वात् ॥ किं च जगत्कारणत्वादि वा भारणरू
[illegible] जीव भावपूर्वपक्षोत्थानं ॥ जात्यादेर् इत्यादि [illegible] गत [illegible] शब्दानुरोधादिति [illegible]
सम्यक् ॥ तत्र सति [illegible] सोऽपरमोऽविशिष्ट [illegible] जीवो [illegible] जिज्ञास्य इति तत्पूर्वपक्षानु
त्थितेरपरिहारात् ॥ किंचित्सु [illegible] तदपि [illegible] रूपप्रतिपत्त्यैव तदनुगुणस्य चोद
नालक्षणोऽर्थो धर्म इति सूत्रस्य [illegible] ब्रह्म विचारप्रतिज्ञानंतरापि तत्रत्यानुक्तब्रह्म प्रतिपत्त्येतदनु

गुणक [illegible] सूत्र [illegible] पूर्वपक्षो [illegible] त्यास्यावशेष [illegible] ब्रह्मशब्द [illegible] जीवपरत्व पूर्वपक्षस्य सूत्रानुगु
णत्वात् ॥ तस्मिन् संप्रब्रह्मशब्दे तस्य [illegible] महामुने तदेव पुरुषः [illegible] त्वा [illegible] इति व [illegible]
ज्ञाचार्यमाप्तो [illegible] पूर्वपक्ष [illegible] ॥ गतो पेत्यादिनोक्तकारणत्वेन
सिद्धांते ब्रह्मशब्द रूढिबाधनमपि न युक्तं ॥ तर्हि [illegible] पूर्वाधिकरणे सर्वत्रायं न वाक्यार्थविचाराधि
गत ब्रह्मशब्दानुरोधेनान्यथानयनवदिहापि [illegible] न्यथा नयनस्य युक्तत्वात् ॥ पू
र्वाधिकरणे योगार्थानुरोधेन रूढ्यन्यथाकरणे [illegible] करणस्य [illegible] न्याय्यत्वात् ॥
एकेन सावकाशेन ब्रह्मशब्देन निरवकाशानेकलिंगभंगो न युक्त इति चेन्न ॥ [illegible] -
शोऽर्हत्यादि [illegible] करणत्वव [illegible] जीवस्याप्यदृष्टद्वारा [illegible] पूर्वपक्षिणो [illegible] रीत्या जगत्कारणत्व
संभवेन लिंगस्यापि सावकाशत्वात् ॥ नन्वजातादि पदमुख्यार्थत्यागो दोषः ॥ [illegible] गार्हपत्य [illegible] इति श्रुत
इत्यादिविधिवाक्यगत गार्हपत्यपदमुख्यत्वानुरोधेन मंत्रस्थेंद्रपदरूढित्यागवत् विचारविधिगतब्रह्म
शब्दरूढ्यनुरोधेनानुवादगतजातादिपदमुख्यार्थत्यागौचित्यात् ॥ अन्यथा गृहपतेरर्थं गार्हपत्यमितींद्र
सावकाशस्य गार्हपत्यशब्दस्य मंत्रगतनिरवकाशेंद्रपदानुरोधेनान्यथा नयनापत्तेः ॥ दीक्षितास्तु प्रका
रांतरेणोक्तसिद्धांतायुक्तत्वमाहुस्तथाहि ॥ यतो वेत्यादि जगत्कारणत्वानुवादस्य जीवे पर्यवसानायो

गाद्विचारविधिगतस्य ब्रह्मशब्दस्य रूढ्यर्थोपि जीवोपाधिपरित्यज्य तेन दा भृगुवल्ल्यामन्नादिवाक्यानि पंचा
न्यपि ब्रह्मनिर्णायकानि न तु मन्मत इवानंदाद्ध्येव खल्विमानि भूतानि जायंते इति वाक्ये ब्रह्मयोनिर्णा
यकं आनंद एव जगज्जन्मादिकारणं अन्नादयस्तु तत्रायोपि कोशाः अन्नाद्ध्येवेति वाक्यानि स्थूलारुंधती
न्यायेन प्रवृत्तानीति स्वीक्रियते॥ अन्नादिषु पंचस्वपि ब्रह्मशब्दस्य जगत्कारणत्वलक्षणयोजनस्य च द
र्शनात्॥ पुनःपुनरुपसत्तिस्तु अन्नमयादिकोशांतर्गतानां पंचानां ब्रह्मरूपाणां मध्ये पूर्वपूर्वरूपापरोक्षीकरणानं
तरमुत्तरोत्तररूपापरोक्षीकरणाय॥ तपोनुज्ञाप्रामयेप्रतिपर्यायं तद्विज्ञाय पुनरेव वरुणं पितरमुपससारेति तप
सा ब्रह्म विजिज्ञासस्वेति श्रवणादिति न वमते येष्वन्नप्राणमनोविज्ञानानंदादिषु ब्रह्मशब्दस्य प्रवृत्तिस्तत्रानुवादतेन
पि ब्रह्मशब्दस्य वृत्तिस्तथापरित्यक्तव्या स्यात् जगत्कारणत्वानुवादपर्यवसानायोगस्त्वन्येष्वपि समान
त्वात्॥ नहि तव मते मति शारीरं तत्तत्कोशाभिमान्यधिष्ठातृरूपाभिव्यक्तेनान्नादिरूपेण प्रत्यक्षावगतस्य
दिसकलजगत्कर्तृत्वं संभवति॥ तव मते सर्वेषां भगवद्रूपाणां सर्वविशेषाभिन्नत्वेपि तत्तत्स्थानोक्तप-
क्षितानामेव पुराणादिषु वर्णनात् तत्तत्कृत्यं तत्तद्रूपस्यैवेति वक्तव्यत्वादन्यथा रावणवधादिकृत्यमप्ये
कस्मिन्नेव बुपालादिवधादिकृत्यस्याप्रिवर्णनापत्तेः॥ यदि च तात्त्विकाभेददृष्ट्या रूपांतराविष्कृतोपि प्र
हिमा रूपांतरेषु वर्णयितुं युक्तः एवं रावणवधादेः कृष्णरूपाविष्कृतत्वरितमात्रमस्ताव्येष्ववर्णनीपि सर्व

पाभिमानि परब्रह्मदृष्ट्या कृष्णवर्णनमस्त्येव अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तत इति रूपेण वर्णनदर्शनात् अत एतन्नानावताराणां निदानं बीजमव्ययमित्यादिपुराणादिप्रसिद्धमूलरूपाभेददृष्ट्या अन्नादिरूपेष्वपि जगत्कर्तृत्वानुवादो नानुपपन्न इत्युच्यते ॥ तदा ज्ञानानन्दादिरूपेण जीवेऽपि जगत्कर्तृत्वानुवादोऽपि युक्त एव ॥ तद्गुणसारत्वात्तु तद्व्यपदेशः इति सूत्रे ज्ञानानन्दादिगुणा एवास्य गुणाः सारः स्वरूपमतो तत्त्वमसीति अभेदव्यपदेशः भविष्यत्पर्वणि न जीवा भिन्नाः परो भिन्नस्तथापि ज्ञानरूपतया प्रोच्यते ब्रह्मरूपेण वेदवादेषु सर्वशः इति तद्भाष्यकारेण ज्ञानादिरूपेण जीवपरयोरभेदविषयतया तत्त्वमसीत्यभेदविषयतया तत्त्वमसीत्यभेदप्रतिपादनस्य समर्थितत्वात् ॥ अत्रापि सविशेषाभेदस्य वक्तुं शक्यत्वात् ॥ नहि ब्रह्मस्वरूपाणामेव सः न जीवपरयोरित्यत्र किंचिन्नियामकमस्ति प्रतिपादितं चैतदाद्यसूत्र एव प्रपञ्चेन ॥ अथ ज्ञानादिरूपेण जीवस्य न मुख्यः अभेदः मन्मते किंतु गौण एव प्रबलभेदश्रुतिविरोधेन तद्विषयतयैव तत्त्वमसीत्यभेदप्रतिपादनं तद्गुणसारत्वात्तद्व्यपदेशः प्राज्ञवदिति सूत्रे भाष्यकारानुमतं ॥ अत एव तत्त्वप्रकाशिकायां परमात्मगुणसदृशानन्दादिस्वरूपत्वेन जीवस्य गौण्या वृत्त्या अभेदव्यपदेशोपपत्तेरिति तत्सूत्रस्य भाष्यार्थो वर्णितः ॥ न चात्रापि पूर्वपक्षोक्तरीत्या अहंग्रहाराकल्पकत्वेन वा जीवकारणत्वमेवानुवाद्यमास्तामिति वाच्यं बाधितुं ॥ तत्त्वमसीत्यत्र प्रबलभेदश्रुतिविरोधवदत्र संकुचितानुवाद्यज्ञ

वत्कारणत्वग्रहणोपमानाभावादिति भेदसिद्धिरिति ॥ विधेयानुवाद्यरूपतया जीवब्रह्मसंबन्धिकस्याभावाद्
अस्याभेदपरत्वेऽपि धर्मद्वयोपस्थापकत्वाभावाद्विधेयत्वादिरूपेण पृथक्कृतविषयत्वाभावाद्वाक्यार्थबोधे लौकिकलक्षणाविधे
यभागस्य तात्पर्यविषयत्वाभावादनुवाद्यमुख्यार्थत्वेऽपि भावमुख्यार्थपरिग्रहस्यानतिप्रयोजकत्वात्
र्थ इत्यनेन न्यायसिद्धिर्निराकृतत्वाद्वाच्यभागस्यैवार्थबाधः प्रामुख्यस्यापि नारदेऽध्यानेन संस्कारयोनी
नर्थान्मनसा नुभवं त्वं पंचसंवेदि किमु न्नुपान्निषिधां सुविधिबोधः मनोरथादौ स्वपलपूर्विका सृष्टिः पदार्थानां स्व
भेनुपुनरीश्वरेच्छाधीनैवेति संबोध्य सृष्टिरित्याह इति स्तु तेषु योक्तरीत्या जीवगत ध्यानादिविषयस्य रूपतागोचर
त्वलक्षणस्य संकोचस्यैव वाच्यत्वेन ब्रह्मरूपत्वं स्वरूपधर्मत्यागाभावात् ॥ ध्यानमनोरथयोर्विषयसृष्टेर्जीवेम
यत्नसाध्यत्वमेवेति यदुक्तं तत्र ध्यानमनोरथयोः संभावितोऽपि यः कोऽपि जातीतिस्तु वादिसंकल्पमपि च
सामिरंतनाहिरण्यगर्भादिजीवप्रभवत्वोपपत्तेः ता इत्यात्मकल्पमपि च कृतित्वात्संकुचितस्यैव ताइशजी
वसंभवादित्यस्वाभाविकधर्मविरुद्धकंपकत्वेन ब्रह्मसाहृदयरूपधर्मत्यागेऽपि कारणत्वानुपादानापत्तिरूपप्र
कारत्वेन वाचनयापि जीवे संकुचितत्वरूपकारणत्वानुपाद रूपो ह्यपधर्मबाधस्यैव ब्रह्मसाहृदयरूपधर्मविपे
यगतजीवत्वरूपधर्मपरित्यागस्यैवोक्तरीत्या न्याय्यत्वाच्च ॥ इदमत्र तु पूर्वमीमांसायां जनुवाद्यगतधर्मस्यावि
धेयधर्मविरोधेन त्यागरूपो बाधः ॥ उक्तस्याविशेषोऽयमस्तु तदा त्यं स्यान्नसाक्षीहृसंख्यान्यतामित्याधिकरणे ॥

तत्राहि अग्निष्टोमे राजन्यस्य गृह्णीयादुक्थ्य इति वाक्ये राजन्यकर्तृकयोरुक्थ्याग्निष्टोमयोर्विधीयमानः
षोडशिग्रहः तदंगभूतस्तुतिशस्त्रसहितस्तद्रहितो वा विधीयत इति पूर्वोक्तरयुक्तिभ्यां संशये ॥ स्तुतिशस्त्र
रहित एव विधीयते तत्सहितस्य विधाने आगंतूनामंते निवेशा इति न्यायेन स्तुतिशस्त्राभ्यां समाप्ति
रूपसंस्थाया अवरम एव प्राप्तौ तयाग्निष्टोमादिसंस्थाया भंगप्रसंगेनाग्निष्टोमादेरुद्देश्यस्यैवासिद्धि
प्रसंगेन तदुद्देशेन षोडशिग्रहविध्ययोगादिति पूर्वपक्षे स्तुतिशस्त्राभ्यां समाप्तिरूपसंस्थापत्वेन निर्ज्ञा
तः षोडशिग्रहस्तथैव विधीयते ॥ न चाग्निष्टोमादिसंस्थाभंगेनोद्देश्यासिद्धिर्दोषः ॥ अग्निष्टोमादिसंस्थो
पमर्देन संस्थांतरविध्युपपत्तेरितिसिद्धांतितं ॥ एवं च विधीयमानषोडशिग्रहांगत्वेन प्राप्तयापि तत्संस्थ
याप्यदा तद्विरोधिनोरनुवाद्यधर्मयोरग्निष्टोमादिसंस्थयोर्बाधस्तदा किमु वक्तव्यं साक्षाद्विधीयमानेन प्र
बलरूढ्या प्रब्रह्मवाद्यार्थजीवत्वेन तद्विरुद्धस्यानुवाद्यधर्मजगत्कारणत्वस्योक्तसंकोचरूपो बाध इति ॥
यद्विश्वस्थितिभंगकर्तृ तदिह ब्रह्मेति सूत्रोदितं व्याचख्यौ खलु विस्तरेण भगवानाचार्यवर्यः स्फुटं ॥ त
न्नाक्षेपवशात्तं निवार्य कुधियामाक्षिप्य तत्कल्पितं यत्तच्छांकरपादभूषणमिदं पश्यंतु सत्सूरयः ॥ मीमांसा
न्यायपंचास्यराघवाचार्यसूरिणां ॥ शिष्यस्य शांकरे पादभूषणे परदूषणे ॥ कृतिर्वितनुतां मोदं जन्माधि
करणे सतां ॥ शांकरानंदतीर्थीयव्याख्ययोस्तत्वनिश्चयात् ॥ ७ ॥ इति जन्माधिकरणं समाप्तं ॥

श्रीगणेशाय नमः ॥ एकं ब्रह्म निरामयं हरिहरब्रह्माभिधानंदघनं सूर्याद्यौ क्वचिदीयते भ्रमजुषां नानाविधं
चेत्तदा ॥ सूर्यादिः प्रतिबिंबतोपि च मुनस्तैः किं न नानेष्यते तस्मादद्वयमंतरंगविलसत्सत्ताप्रकाशं नुमः ॥
१ ॥ योयं शास्त्रसमन्वयः स न हरिब्रह्मादिषु प्रोच्यते नापींदेवगणेषु किंतु परमानंदे जगद्व्यापके ॥ कस्मिं-
श्चित्परवस्तुनीति भगवत्पादाशयाज्ञायदिव्या वल्गंति परस्परं किमधुनाप्याकोविदा नः क्षुरः २ ननु समन्वयात्
॥ पूर्वाधिकरणे वेदांतरूपशास्त्रस्य ब्रह्मणि प्रामाण्यमभिहितं तदिहाक्षिप्य समर्थ्यत इति शास्त्राध्याया-
दिसंगतिः ॥ अत्र वेदांताः ब्रह्मणि प्रमाणं भवंति न वा तदर्थं वेदांताः प्राधान्येन ब्रह्म प्रतिपादयंति उतान्यशे-
षतयेति तदर्थं वेदांतानां स्वप्राधान्येन ब्रह्मप्रतिपादने फलमस्ति न वेति पूर्वोत्तरपक्षयुक्तिभ्यां संशये-
॥ वेदांतशास्त्रं नोक्तब्रह्मणि प्रमाणमनधिगताबाधितप्रयोजनवदर्थपराणामेव शब्दानां प्रामाण्यस्या-
म्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यत इति जैमिनिनोक्तत्वात् सिद्धवस्तुब्रह्म-
णः प्रवृत्तिनिवृत्त्यविषयत्वेन निष्फलत्वेन तत्र वेदांतानां तात्पर्याभावात् न तेषां ब्रह्मणि प्रामाण्यं किंच सि-
द्धवस्तुत्वावच्छेदेन प्रमाणांतरवेद्यत्वं दृष्टं ब्रह्म च सिद्धमिति तत्र प्रमाणांतरवेद्यत्वावश्यकत्वेन वेदांता-
नां स्वार्थपरत्वे सापेक्षत्वेनानधिगतार्थपरत्वाभावादपि न तेषां ब्रह्मणि प्रमाणत्वमिति वेदांतगतजीवप्र-
काशकानि वाक्यानि कर्तृपराणि परब्रह्मप्रकाशकानि वाक्यानि देवतापराणि सृष्ट्यादिप्रतिपादकानि-

वाक्यानि साधनपराणि इति रीत्या निरपेक्षक्रियापरत्वमेव वेदांतानां न परब्रम्हपरत्वं पदितु कर्मप्रतिपादकविधि
भ्यो दूरपठिततया न तत्समभिव्याहाराभावात् प्रकरणविच्छेदकानां भूयसामुपलंभाच्च न कर्मपरत्वं वेदां
तानामिति मन्यसे तदापि वेदांतपठितोपासनारूपकर्मविध्येकवाक्यतया तत्परत्वमेवास्तु अथैवं स
त्यन्यपरेभ्योपि वेदांतेभ्यो ब्रम्हसिध्दिर्देवताधिकरणन्यायेनैव वक्तव्या स च न्यायः प्रमाणांतरविरुध्दे र्थे
न प्रवर्तते इति तत्वमस्यादिवाक्यानां प्रत्यक्षादिप्रमाणविरुध्दजीवब्रम्हैक्यार्थकत्वेन कथं तत उपास्यब्र
म्हसिध्दिरिति चेद्वाचं धेनुमुपासीतेत्यादिवदारोपितार्थमादायाप्युपासनाविधिर्यथा सनांगोकारा
दिति पूर्वपक्षसिध्दांतः ॥ तत्तु समन्वयादिति ॥ यत्तु चंद्रिकायां अप्रपरैर्वेदांता ब्रम्हणि न प्रमाणं सिध्दव-
स्तुबोधने प्रवृत्त्यभावेन फलाभावात् सापेक्षत्वप्रसंगाच्चेति भासे इत्यनेनोक्तपूर्वपक्षमनूद्य पूर्वपक्षो
निर्दलः निष्प्रयोजनत्वशंकायास्त्वन्मते आद्यसूत्र एव जिज्ञासापदेन परिहृतत्वात् लौकिककार्यपरवाक्ये
पि सापेक्षत्वदर्शनेन पौरुषेयत्वस्यैव सापेक्षत्वप्रयोजकत्वाच्चेति दूषणमुक्तं तदापातरमणीयं प्रबलप्र
त्यक्षविरोधेन कर्तृत्वभोक्तृत्वविधुरप्रत्यगभिन्नब्रम्हरूपविषयप्रतिपादकत्वं न वेदांतानां संभवतीत्यादि
प्रथमसूत्रे दर्शितविवरणरीत्या नाप्यहमिति प्रत्यक्षसिध्दात्मप्रतिपादकत्वं वेदांतानां संभवति संशयप्र
योजनयोरभावात् ॥ न च वाच्यमहंप्रत्ययः स्थूलोहं दुःखीति गृण्हाति तद्विपरीतश्च वेदांतप्रतिपाद्यः स च सं

द्ध इति विषयादिसिद्धिः ॥ वेदांतानामध्ययनविध्यापादितप्रयोजनवदर्थपराणामपि प्रबलाहंप्रत्ययबाधि
तत्वेन जपमात्रोपयोगित्वेनाविवक्षितार्थत्वादुपचरितार्थत्वाद्वेत्यादिना दर्शितं वाचस्पतिभिरित्याद्यविषया
भावनिबंधनः फलाभावनिबंधनश्च शास्त्रानारंभपूर्वपक्षः प्रत्यक्षापेक्षया श्रुतिर्बलीयस्त्वादिरूपा-
र्थसूचकेन ब्रह्मजिज्ञासापदेन निरस्तस्तथा चोक्तं वाचस्पतिमिश्रैः ॥ न च क्रियासमभिव्याहारे गौणताद्
ग्रावप्लवनत्वमभिदधति तत्पराणि संति शास्त्रमुपचरितार्थानि कर्तुमिति प्रत्यक्षात् श्रुतेः प्राबल्ययुक्ति
श्चैतदधिकरणनिर्णेयश्रुतेरुक्तार्थपरत्वासिध्यधीनैव निर्णीततात्पर्यकायाः श्रुतेरेव स्वतात्पर्य-
विषयविरोधिप्रत्यक्षप्राबल्यस्यास्मत्स्वीकारात् अन्यथा सूर्यप्रादेशिकत्वादौ दृष्टविसंवाद
स्य तत्प्रत्यक्षस्यादित्यो यूप इत्यागमादपि दौर्बल्यापत्तेः ॥ एवं चैतदधिकरणे निर्णेष्य
माणस्यैव विषयप्रयोजनाद्यर्थस्य शिष्यहितैषिणा आचार्येण ॥ शास्त्रारंभोपयोगि
तया प्रथमसूत्रे जिज्ञासाशब्देन सूचनेपि एतदधिकरणवैयर्थ्यानवकाशात् त्वयापि ह्या
नंदमयाधिकरणे प्रादुर्भावो ह्येर्जनिरिति अनुव्याख्यानोक्तजन्यत्वस्य विशेषसाधकाभावोक्तेर
प्रत्यसिद्धांतसिद्धजन्यत्वाभिप्रायेति प्रतिपाद्यैव त्वदीयभाष्योक्तदुःखाधिकरणपूर्वपक्षसम
र्थनायुक्त्या स्वप्रीत्या पूर्वपक्षदूषणं स्वशिरसि पाषाणप्रक्षेपसमत्वात्तुल्यपरिहारमेव तथाहि

द्युभ्वाधिकरणोक्तरीत्या पूर्वपक्षः यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं सह प्राणैश्च सर्वैः तमेवैकं जान
थ आत्मानमित्यत्र द्युभ्वाद्यायतनत्वेन श्रुतो रुद्रादिरेव रुद्रो वा प्राणो वा लोकाधारः प्राणानां ग्रंथिरसि रुद्रो मा
विशांतकः प्राणेश्वरः कृत्तिवासाः पिनाकीति रुद्रसमाख्यानात् रुद्रस्यैव प्राणाद्याधारत्वप्रतीतेः स ए
षोंतश्चरति बहुधा जायमान इति जायमानत्वरूपजीवलिंगाच्चेति रुद्रादिसमाख्याजायमानत्वलिंग
योर्द्युभ्वाद्यायतनं रुद्रादिरेवेत्यस्मिन् पूर्वपक्षे हेतुत्वेन प्रदर्शनोत्तरचंद्रिकायामुक्तं ॥ ननु तथापि
द्वाविधेयेऽस्मिन्नंशे इति विष्णुप्रकरणे नामृतैष सेतुरिति मुक्तोपसृप्यत्वस्य तन्निष्ठस्य मोक्षोपदेशात्
अस्मिन्नस्य च तद्योगं शास्तीति सूत्रसिद्धविष्णुलिंगेन रुद्रसमाख्याया बाध एव समाख्यातो प्रकर
णलिंगयोर्बलवत्त्वात् रुद्रादिसमाख्याया अंतरधिकरणन्यायेन शास्त्रदृष्ट्येति न्यायेन पिनाकित्वा-
दिलिंगानां विष्णौ सावकाशत्वान्न तेषां निरवकाशत्वं ॥ न च स एषोंतश्चरति बहुधा जायमान इति जा
यमानत्वलिंगविरोधः गौणश्चेन्नात्मशब्दादिति सूत्रसिद्धविष्णुमात्रनिष्ठतात्केन तमेवैकं जानथ आ
त्मानमित्यात्मशब्देन तद्बाधात् जायमानत्वस्य च सावकाशत्वं क्रियाप्रवर्तकत्वेन प्रादुर्भावो हरेर्जनिरित्यनुव्या
ख्याने आनंदमयाधिकरण उक्तमिति पूर्वपक्षमाक्षिप्य समाहितं ॥ अनुव्याख्याने उक्तिरत्रासिध्यांतसिद्ध

जन्यत्वाभिमायानत्वेन [illegible]

चेतनजनेरन्याचेतन [illegible] अजादि [illegible]

इति ब्रह्मणोपि जनेः प्रमितत्वात् [illegible]

पचैतन्यसुखानित्यांस्व [illegible]

जायमानत्वं लिंगमेव गौ [illegible]

त्वं तु निरवकाशं भाष्य एवोक्तमिति ॥ [illegible]

मसूत्रस्थेन शास्त्रयोनित्व [illegible]

सूत्रद्वारं भोत्यर्थः स्याद [illegible]

तो यथार्थवंधस्य विनाविघ [illegible]

त्वक्षवत्प्रमा प्रत्यक्षवच्च [illegible]

बंधस्य मिथ्यात्वात्तन्निवृत्तेः [illegible] जिज्ञासा मुमुक्षुणा कर्तव्येत्याशंकानिर

साय प्रयोजनसाधकं जगत्सत्यत्वादिकं [illegible] विषयासिद्धिहेतु युक्तिष्वपि स्वप्रकाशप्रत्यग

र्थाभिन्नत्वान्न विषयत्वमिति [illegible] आरोपिताकारशंकानिरासकत्वं ब्रह्मपदसूचिता युक्तिः नदिति

रिक्ताशब्दस्य न प्रामाण्यं प्रामाण्यं विसिद्धं न प्रामाण्यमित्यादिकप्रमाणे आरोपिताकारशंकानिरासके
द्युक्तिरतः शब्देन सूचितेति ॥ तथा चाग्रे निर्णेष्य माणस्यैवार्थस्यातः शब्देन परामर्श इति त्वयाप्युक्तेश्च
धिकरणद्वयसार्थक्यं समर्थनीयं एवं लौकिकेत्याद्यपि एतदधिकरणपूर्वपक्षदूषणं न सत् ॥ नहि पूर्व
पक्षे कार्यपरवाक्यानां प्रमाणांतरासिद्धार्थपरत्वनियमः अस्माभिरुक्तः किंतु सिद्धवस्तुतावच्छेदेन
प्रमाणांतरवेद्यत्वनियम एवेति पूर्वपक्षो न निर्दलः ॥ तत्तु समन्वयादिति सूत्रे तच्छब्दः प्रकृतब्रह्मप
रामर्शकः शास्त्रयोनित्वादिति सूत्रात् विभक्तिविपरिणामेन शास्त्रयोनीति पदमध्याहार्यं तु शब्दः उक्तपू
र्वपक्षव्यावृत्त्यर्थः तथा च तत् ब्रह्म कर्मोपासनादिशेषतां विनैव शास्त्रयोनि शास्त्रप्रमाणकं प्राधान्येन वे
दांतेभ्यो अवगम्यत इति यावदिति प्रतिज्ञा लभ्यते ॥ तत्र हेतुः समन्वयादिति ॥ तत्र संशब्दस्तात्पर्यार्थ
कस्तात्पर्यं च संबंधविशेषरूपं द्विविधं अस्मात् शब्दादेतदर्थबोधो भवत्विति वक्तृविवक्षारूपं गुणप्रधा
नसाधारणं अपरं तु तत्प्रतीत्युद्देश्यकत्वरूपं प्रधानासाधारणं तत्राद्यस्यान्वयादित्यनेनैव लाभात् संश
ब्दो व्यर्थः स्यादिति द्वितीयमेव संशब्देन विवक्षितं सम्यक् तात्पर्येण अन्वयः समन्वयः स च द्वितीयतात्प
र्यनिरूपितः संबंधविशेषः तादृशतात्पर्यनिर्वाहको पक्रमोपसंहारापूर्वत्वफलवत्त्वादिलिंगरूप एव
तस्मादिति हेतुभागार्थः ॥ यद्वा अन्वयात्तात्पर्यविषयत्वादित्येव हेतुः तत्रासिद्धिवारणाय संशब्दः सु

चितं सम्यक्त्वं तात्पर्यनिर्वाहकोपक्रमोपसंहारापूर्वत्वफलवत्त्वरूपं पक्षविशेषणं तानि च लिंगानि उ
पक्रमोपसंहारावभ्यासोपूर्वताफलं अर्थवादोपपत्तीच लिंगं तात्पर्यनिर्णय इत्यभियुक्तोक्तानि षट् तथा
हि छांदोग्ये षष्ठे प्रपाठके सदेव सोम्येदमग्र आसीदित्युपक्रम्य ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वम-
सीत्युपसंहारः॥ ऐतदात्म्यमित्यादेस्तत्त्वमसीत्यंतस्य नवकृत्वो वचनमभ्यासः॥ आचार्यवान्पुरुषो वे
देत्यनेन मानांतराविषयत्वरूपमपूर्वत्वकथनं॥ तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति फ
लकथनं॥ उत तमादेशमप्राक्ष्यः येनाश्रुतं श्रुतं भवतीत्यर्थवादः॥ यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं वि
ज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्याद्युपपत्तिः यथावोक्त सद्विद्यागतोपक्रमो-
दरहैतब्रह्मात्मपरत्वमेव न भिन्नात्मपरत्वं तथोपपादितं युक्तिभिः जन्माधिकरणे एवं बृहदारण्यके आ-
त्मेत्येवोपासीत अत्र ह्येते सर्व एकीभवंतीत्युपक्रम्य एष नेति नेतीत्यादिना अभ्यस्य तंत्वौपनिषदं पृच्छामी
त्यपूर्वयित्वा अभयं वै जनक प्राप्तोसि ब्रह्मैव सन्ब्रह्माप्येतीति सफलीकृत्य तद्यो यो देवानां प्रत्यबुध्यत स
एव तदभवदित्यर्थवादमुक्त्वा यथा दुंदुभेर्हन्यमानस्य न बाह्यान्शब्दान्शक्नुयात् ग्रहणाय दुंदुभेस्तु ग्रहणे
न दुंदुभ्याघातस्य वा शब्दो गृहीत इत्यादिनोपपाद्य पूर्णमेवावशिष्यत इत्युपसंहृतं॥ यत्तु बृहदारण्यके
अंतर्यामिब्राह्मणे भेदप्रमापकाद्युक्तोपक्रमोपसंहारादितात्पर्यलिंगानि दृश्यंते तत्राहि वेत्यनुक्तं काण्वे

तमंतर्यामिणमित्युपक्रमः ॥ एष त आत्मा अंतर्यामीत्युपसंहारः ॥ एष त आत्मेत्येकविंशतिकृत्वोभ्यासः अं
तर्यामित्वस्याप्रसक्तस्य अपूर्वता स वै ब्रह्मविदित्यादिफलं ॥ तच्चेत्त्वं याज्ञवल्क्य सूत्रमविद्वांस्तं चांतर्यामिणं
ब्रह्मगवीरुदजसे मूर्धा ते विपतिष्यतीति निंदारूपोऽर्थवादः यस्य पृथिवी शरीरं यं पृथिवी न वेदेत्याद्युपप
त्तिः सर्वे सूत्रात्मांतर्यामिणोर्वेत्ता ब्रह्मगवीः ब्रह्मनिष्ठार्थस्थापिता गाः उदजसे गृह्णासीत्यर्थः तथाचोक्तलिंगैर्भे
दपरत्वे कथमद्वैतात्मपरत्वमिति परेणोक्तं तदसत् ॥ आत्मेत्येवोपासीतेति सूत्रितब्रह्मात्मविद्याविवरण
रूपायां तृतीयाध्यायादिचतुरध्याय्यामनेन ह्येतत्सर्वं वेदेत्यनेनात्मन एकस्य विज्ञानेन सर्वविज्ञानप्रतिज्ञा
पूर्वकं ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवदित्यनेनोपक्रम्य ॥ सर्वम
भवदिति अपरिच्छिन्नमभवदित्यर्थकं ॥ षष्ठाध्यायांते मैत्रेयीब्राह्मणे निगमनरूपे यत्र त्वस्य सर्वमात्मैवाभूत्त
त्केन कं पश्येदित्यादिनाऽभेदेनोपसंहारात् ॥ आध्यायचतुष्टयस्याप्यभेदपरत्वे स्थिते तदंतर्गतस्य कस्मिन्नु खलु
ब्रह्मलोका ओताश्च प्रोताश्चेति ब्रह्मांडारंभकभूतरूपब्रह्मलोकानामांतरस्य पृष्टत्वेन तादृशो यः सूत्रात्मा तस्याप्यंतरोंत
र्यामीत्येवं प्रतिपादनपरस्यांतर्यामिब्राह्मणस्योत्तरब्राह्मणप्रतिपाद्यनिरुपाधिकसर्वांतरब्रह्मप्रतिपत्त्यनुकूलस्योक्तलिंगैर
वधृताद्वैतात्मतात्पर्यवन्महाप्रकरणप्रतिपाद्याभेदविरोधेन तद्विरोधिभेदपरत्वाभावात् ॥ त्वदुपन्यस्तलिंगानां भेदपर
तानिर्णायकत्वेपि कल्पितभेदपरतया तात्त्विकाभेदाविरोधित्वात् अत एव न शारीरश्चोभयेपि हि भेदेनैनमधीयत इति सूत्रतद्भाष्य

योविरोधः नचाहंब्रह्मास्मीतीत्यस्यनामब्रह्मेत्युपासीत आदित्योब्रह्मेत्यादेशइत्यादिवदितिशङ्काशि
रस्कतयानब्रह्माभेदपरता अन्यथानामादावपिब्रह्माभेदसिद्ध्यापत्तेरितिवाच्यं ॥ नामब्रह्मेत्यादेरुपा
सनाप्रकरणस्थत्वेनाभेदपरत्वाभावेप्यात्मानमेवावेदहंब्रह्मास्मीतीत्यस्यानुपासनाप्रकरणस्थत्वेना
भेदविवक्षोपपत्तेः ॥ नचतथासतीतिपदवैय्यर्थ्यंशङ्क्यं आत्मेत्येवोपासीतेत्यादौशङ्काज्ञानयोः स्वाभा-
विकसकर्मकत्वेनात्मनः उपासिधातुरूपशङ्काकर्मत्वस्योपासनात्मकज्ञानकर्मत्वस्यचप्राप्तौशङ्काकर्म
त्वनिराकरणपरतयेतिशङ्कासार्थक्यस्यप्राप्येउक्तत्वात्तद्वदत्रापिसार्थक्यस्यवक्तुंशक्यत्वात् ॥ दृष्टांत
दार्ष्टांतिकयोरात्मस्वरूपमात्रस्यप्रतिपाद्यतालाभायेतिशङ्काइत्यस्यापिवक्तुंसुवचत्वात् ॥ नचतद्यो
योदेवानांप्रत्यबुध्यतसएवतदभवत्तथर्षीणांतथामनुष्याणामितिदेवर्षिमनुष्यादिरूपभेदपरदृष्टां
तवाक्यशेषस्यात्मस्वरूपमात्रप्रतिपादनपरत्वमसिद्धमितिवाच्यं ॥ तत्रापिदेवादिषुकल्पितभेदेषु
प्रबुद्धंपुरुषंनिर्धार्यसएवतदभवदितिब्रह्मात्मस्वरूपमात्रप्रतिपादनेनतस्यभेदपरत्वाभावात् ॥ न
चब्रह्मवाइदमग्रआसीदित्यादौब्रह्मणएवप्रकृतत्वान्नतस्यजीवब्रह्मैक्यपरत्वमितिवाच्यं ॥ योयोदे
वानामित्यादिजीवपरामर्शिवाक्यशेषानुसारेणब्रह्मपदस्यकार्यब्रह्मपरत्वात्शुद्धब्रह्मपरत्वेचबोध
निमित्तस्य तस्मात्सर्वमभवदितिसर्वात्मभावलक्षणफलकीर्तनस्यायुक्तत्वापत्तेः ॥ यच्चोक्तवाक्येअ-

इंद्राद्यो जीवांतर्यामिणि मुख्यः अहं मनुरभवं सूर्यश्चेत्यंतर्यामिण्यहंशब्दप्रयोगात् सर्वांतर्यामिकोऽपि विष्णुः स
र्वनाम्नाभिधीयते एषोऽहं त्वमसौ चेति न तु सर्वस्वरूपत इति वचनाच्चेति परेणोक्तं तदसत् ॥ शास्त्रदृष्ट्या तूप
देशो वामदेववदिति न्यायेन वामदेवजीवचैतन्यस्य वस्तुतोऽब्रह्माभेदेन सूर्यादिभावस्योक्तत्वांतर्यामि
परत्वाभावात् न यो यो देवानां प्रत्यबुध्यत स एव तदभवदिति पूर्ववाक्ये तत्त्वबोधनिमित्तकब्रह्मभाव-
स्य प्रकृतत्वात्पश्यन्नृ प्रतिपेदे इत्यादेरपि बोधनिमित्तकब्रह्मभावपरत्वांतर्यामिपरत्वाभावात् अहंश
ब्दस्यासाधारणत्वस्य दात्म्यनिराकेरावश्यकत्वात्साहचर्येणांतर्यामिणि एषोऽहमिति प्रयोगः ॥ ननु सर्व
स्वरूपत इति निषेधस्य नूपहितयोरभेदाभावनिबंधनत्वान्नोक्तस्मृतेरपि विरोध इति विस्तरेण स्मृत्यभिप्रा
यं तत्तद्धर्माधिकरणे प्रतिपादयिष्यामः ॥ अत एव विशिष्टचैतन्यरूपे वामदेवे विशिष्टचैतन्यरूपम
नुसूर्यादिभावो न संभवतीति निरस्तं तस्य शास्त्रदृष्ट्योक्तत्वात् ॥ नचैवं सति शुद्धचित्त्वमयमित्युत्तमपुरु
षप्रयोगायोगः शंक्यः ॥ तस्य बाधितानुवृत्त्याहंकारीभूतबोधस्याहंत्वप्रकारकस्याखंडाकारबोधपूर्वस्वरू
पभूतपूर्वगत्यापोक्तत्वात् ॥ नचाहमार्याय भूमिमददामित्यादिप्रयोगानुपपत्तिर्भिन्नाभस्य भूमिदातृ
त्वाभावादिति शंक्यमुपहितनचितो दातृत्वेन तदुपस्थितिद्वारा अखंडार्थत्वमादाय तेषामुपपत्तेर्नोक्तश्रु
तिरंतर्याम्यभेदपरा ॥ अंतर्यामिणि भेदाप्रसक्तेश्च नोक्तश्रुतेरंतर्याम्यभेदपरता ॥ नचाभिप्रायस्थानं त्यादि

...लब्धमाकि: ...कस्मिन्नपि जीवे अनेकावयवानि पाम कृत्स्नस्यैकस्मिन्नपि गतत्वाभ्युपगमेकदेशनिय... [illegible]
...दर्शनात् अयमथायं पुरुषे यश्चासावादित्ये स एक इत्यस्यापि नांतर्यामिविषयपरता ब्रह्मविद्या... [illegible]
...दिनाभ्युदयस्य ब्रह्मणः अकृतत्वात् तस्मिन्नुपाधिकृतभेदस्य तात्त्विकत्वप्रसक्तौ तन्निराकरणार्थत्वेनै-
क्यांशप्रदेशोपपत्तेः ॥ ननु एवं सति छांदोग्ये य एष आदित्ये पुरुषो दृश्यते सोऽहमस्मीत्यभिधानादि... [illegible]
...करणपरत्वस्य वक्तव्यतापत्तिरिति चेत् पौरुषोऽमानवः स एनान् ब्रह्म गमयति एष देवपथो ब्र-
ह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्त इत्युत्तरवाक्यविरोध इति ... [illegible]
पासनाप्रकरणस्थत्वेनाहं ब्रह्मोपासनापरतया भेदपरत्वाभावेन विरोधाभावात् ॥ ननु उपासनाप्रकरण-
स्थोक्तछांदोग्यवाक्यादैक्यासिद्धावपि बृहदारण्यकस्थानुपासनाप्रकरणस्थोक्ताहं ब्रह्मेति वाक्यात् ... [illegible]
त्वैक्यासिद्धिः शंक्या बृहदारण्यकस्थोक्तवाक्ये छांदोग्यस्थवाक्यवद् भेदप्रयोजकस्यान्यशेषत्वस्याभा-
वात् अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरित्युत्तरवाक्यस्य भे... [illegible]
दापरतया तद्विरोधेन बृहदारण्यकस्थस्याहं ब्रह्मास्मीति तत्पूर्ववाक्यस्योपासनापरत्वाभावात् ... [illegible]
हं ब्रह्मास्मीति बृहदारण्यकवाक्ये ब्रह्मशब्दो बृंहणार्थ इति न तेन ब्रह्मात्मैक्यसिद्धिः ॥ अन्यथा तत्पूर्व-
वाक्ये आत्मानमेवावेदित्यनेनैव ब्रह्मास्मीति ज्ञानस्य सिद्धत्वात् ब्रह्मास्मीत्यस्य वैयर्थ्यं स्यादिति परेणोक्तं तन्न

आत्मा वाहं न जीवश्च तन्व्यमभ्रूश्च सत्ताद्युपलक्षितः त्वं यैवं तन्व्याभेदविधिपरत्वेन तत्सार्थक्यात् तथा च
स्मृतिः अहं हरिः सर्वमिदं जनार्दन इत्यादिका ॥ यत्तु अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति वाक्ये अं-
तर्यामिभेदज्ञाननिंदनमिति परोक्तं ॥ तदभिप्रायस्तु तद्वाक्यस्यासौ मदन्यस्तांतर्यामी अन्यः मदंतर्यामी तु
तदन्य इत्यर्थस्तथा च नियम्यभेदेनांतर्यामिज्ञानं निंदनमसक्तौ तन्निषेधपरस्याहं ब्रह्मास्मीत्यस्य भेदनिंदो-
पकारकत्वान्न जीवेशाभेदपरत्वमिति तन्न ॥ तस्यांतर्यामिणोऽप्रकृतत्वात् ॥ यदपि तद्वाक्यस्यान्योजी-
वः अन्यां विलक्षणां देवतामुपास्ते अन्योऽसौ परमात्मा अहमन्यः अस्मीति न स वेद यथा पशुरित्यर्थ इति तत्तुच्छं ॥
व्यवहितान्वयदोषात् ॥ अहं वाऽहमस्मि हिताऽन्य इत्यस्य य इत्यत्र न यनात् ॥ ननु यस्य येनार्थसंबंध इ-
तिन्यायेन सन्निधानायोग्यताया बलवत्त्वेन नोक्तदोष इति वाच्यं ॥ यथास्थितार्थसंबंधे युक्तक्रमेण यो-
ग्यतासत्त्वात् ॥ नापीयं श्रुतिः स्वातंत्र्येणान्यसद्भावनिषेधिकेति परोक्तं साधु ॥ प्रतियोगिस्वातंत्र्योपस्था-
पकपदाभावात् ॥ यदपि योऽन्यां देवतामुपास्त इत्युपास्तिश्रवणात् प्रयत्नसाध्यज्ञानविजातीयपृथक्त्वेत-
द्रूपोपासनाया एव निषेधो न तु ज्ञानस्येति केश्चिदुक्तं ॥ तदपि न सत् तद्योयो देवानां प्रत्यबुध्यतेति पूर्व-
वाक्येन स वेदेति निंदावाक्येन च वेदनात्मकज्ञानस्यैव निर्देशात् ज्ञानबोधकपूर्वापरवाक्यैकवाक्यत्वानु-
रोधेनोपास्त इत्यत्रोपास्तेरुपासनाफलज्ञानलक्षकत्वमुपेयमन्यथा पूर्वापरवाक्यस्थबहुतरेषु ज्ञाना-

र्थकपदेषूपासनार्थलक्षणापत्तेः ॥ यत्तु ब्रह्म वा इदमग्र आसीदित्यत्र ब्रह्मपदस्य कार्यब्रह्मपरत्वे तदाहुर्यत् ब्रह्मविद्यया सर्वं भविष्यंतो मन्यंते किं तत् ब्रह्मेति पूर्ववाक्यासंगतिः कार्यब्रह्मविद्यया सार्वात्म्यप्राप्तिरूपफलासंभवात्तथाच तस्य कारणब्रह्मपरत्वमेव एवंच तत्सर्वमभवदिति न फलोक्तिः किंतु ब्रह्मणः पूर्णस्वरूपानुभवप्रयुक्तानंदोद्रेकात्सार्वात्म्योक्तिरिति परेणोक्तं ॥ नन्वेवमेव नहि कारणब्रह्मणः स्वरूपानुभवः आनंदोद्रेको वा कादाचित्कः येन तथोक्तिः संगच्छेतास्मन्मते तु ज्ञानेनाज्ञाननिवृत्त्या तत्प्रयुक्तपरिच्छेदनिवृत्तिरूपं सार्वात्म्यं हिरण्यगर्भरूपकार्यब्रह्मण एवेति युक्तं ॥ किमु तत् ब्रह्मेत्यादिकस्तु न विरोधः आत्मानमेवेत्यादिना आत्मस्वरूपब्रह्मज्ञानात् सार्वात्म्योक्तेरेव सदुत्तरत्वेन ब्रह्म वा इदमग्र आसीदित्यत्र ब्रह्मपदस्य कार्यब्रह्मपरत्वेपि क्षत्यभावात् ॥ नच ब्रह्मैव सन् ब्रह्माप्येतीत्यत्र प्रथमब्रह्मशब्दस्य जीवपरत्वमवश्यमेव वक्तव्यमन्यथा कर्तृकर्मभावविरोध इति वाच्यं ॥ ब्रह्मैव सन्नित्यादिना ब्रह्मतादात्म्यापन्नस्यैव कर्तृत्वप्रतीतेस्तस्य च कर्मीभूतशुद्धब्रह्मभिन्नत्वमौपाधिकमित्यौपाधिकं साक्षात्कारप्राक्कालीनभेदमादाय कर्तृकर्मभावनिर्देशोपपत्तेः ॥ एवमैतरेयोपनिषद्यपि आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किंचन मिषदित्यात्मैक्यमुपक्रम्यांभः प्रभृतीनां लोकानां लोकपालानां चाग्न्यादीनां सृष्टिं शिश्वाकरणानि करणायतनं च शरीरमुपदिश्य स एव स्रष्टा कथं न्विदं मदृते स्यादिति वीक्ष्येदं शरीरं प्रविवेशेति स्रष्टुरेव श

रीरे जीवभावेन प्रवेशं दर्शयति स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यतेति ॥ पुनश्च यदि वाचाभिव्याहृतं
यदि प्राणेनाभिप्राणितमित्यं च मादिना करणव्यापारविवेचनपूर्वकमथ कोऽहमिति वीक्ष्य स एतमेव पुरु-
षं ब्रह्म ततममपश्यदिति जीवस्यैव ब्रह्मात्मत्वमुपसंहारेऽवधारितं तथोपरिष्टादपि एष ब्रह्मैष इन्द्र इत्या-
दिना समस्तं भेदजातं महाभूतैरनुक्रम्य सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्मेति ब्र-
ह्मात्मैक्यमेवावधारितं ॥ ननु नेदं निर्विशेषप्रत्यगभिन्नपरमात्मप्रकरणं परमात्मनः स्रष्टुरिहात्मशब्दे-
न ग्रहणे महाभूतसृष्टिरेवादाववक्तव्या स्यात् लोकसृष्टिस्त्विहादावुच्यते स ईक्षत लोकान्नु सृजा इति स इ-
मान् लोकानसृजतांभो मरीचीर्मरमापोऽदोंऽभः परेण दिवं द्यौः प्रतिष्ठांतरिक्षं मरीचयः पृथिवी मरो या अधस्ता-
त्ता आप इति ॥ ईक्षत ऐक्षत ॥ अंभो मरीचीर्मरमाप इति लोकनामानि ॥ अंभःपदार्थं श्रुतिरेव व्याचष्टे ॥ अदोंऽभ
इति विप्रकृष्टा आपश्चांभ अस्यांभःपदार्थः ॥ ताः दिवं परेण द्युलोकात्परतः तासां द्यौः प्रतिष्ठाश्रयः मरीचि-
पदार्थमाह ॥ अंतरिक्षमिति ॥ अंतरिक्षलोकः सूर्यकिरणव्याप्तत्वान्मरीचिः ॥ पृथिवीलोको मरणयुक्तत-
या मरपदार्थ इत्याह ॥ पृथिवी मरः पातालानि अप्पदार्थमाह ॥ या अधस्तादिति ॥ लोकाश्च महाभूतसंनिवेश-
विशेषाः तांश्चांभःप्रभृतीन् लोकत्वेनैव गमयतीति श्रुतिः ॥ अदोंऽभः परेण दिवमित्यादिना लोकसृष्टिश्च परमे-
श्वराधिष्ठितेनापरेण केनचिदीश्वरेणाभिप्रेत इति श्रुतिस्मृत्योरुपलभ्यते ॥ तथाहि श्रुतिर्भवत्यात्मैवेद

मग्र आसीत्पुरुषविध इत्याद्या ॥ तत्र पुरुषविध इत्यस्य मनुष्याकार इत्यर्थः स्मृतिरपि सवैशरीरी प्रथमः स
वै पुरुष उच्यते आदिकर्ता सभूतानां ब्रह्माग्रे समवर्ततेति ऐतरेयिणोपि अथातो रेतसः सृष्टिः प्रजापते रेतो
देवा इत्यत्र पूर्वस्मिन्प्रकरणे प्रजापतिकर्तृकां विचित्रां सृष्टिमामनंति ॥ तत्र प्रजापते रेतो देवा इत्यनेन रे
तः शब्दार्थकथनं तथाच प्रजापतिजन्या देवाः रेतः शब्देन पूर्ववाक्ये निर्दिष्टाः आत्मशब्दोपि तस्मिन्प्रयुज्य
मानो दृश्यते आत्मैवेदमग्र आसीत्पुरुषविध इत्यत्र एकत्वावधारणमपि प्रागुत्पत्तेः स्वविकारापेक्षमुपप
द्यते ईक्षणमपि तस्य चेतनत्वादुपपन्नं अपि च ताभ्यो गामानयत्ताभ्योश्वमानयत्ताभ्यः पुरुषमा
नयत्ता अब्रवीदिति देवतासहितेष्विंद्रियेषु सृष्टेषु तेभ्य अस्माकं भोगसिध्यर्थमायतनं संपादयेति स्रष्टुः प्रार्थ
नायां कृतायां तेन च गवाश्वयोः शरीरे समानीते नेदमस्माकं भोगायालमिति तैः प्रत्याख्याते पुनस्तेन मनुष्यश
रीरे समानीते अलमिदमस्मद्भोगायेति तैरंगीकृतमित्येवं जातीयको भूयान्व्यापारविशेषो लौकिकेषु शरीरा
दिविशेषयुक्तविशेषवत्त्वात्सुप्रसिद्ध इहोपाख्यायते अशरीरस्य निर्विशेषस्य परमात्मनः इह स्रष्टृत्वे-
नोपक्रांतत्वेनायं व्यापारस्तस्य संभवतीति विशेषवानेवात्मा कश्चित्प्रतिपाद्यते न निर्विशेषः प्रत्यगभिन्नः प
रमात्मेति चेन्न ॥ यथा तस्माद्वा एतस्मादात्मनः आकाशः संभूत इत्येवमादिसृष्टिवाक्येषु निर्विशेषपरमात्म
न एव ग्रहणं तथेहापि तस्यैव ग्रहणं युक्तं ॥ यद्यपि आत्मा देहे धृतौ जीवे स्वभावे परमात्मनीति कोशानुसारेणा

त्मपदं प्रमात्रादिसाधारणं तथाप्यतसातत्यगमने इति धातोर्मनिन्प्रत्ययेन निष्पन्नस्यात्मशब्दस्य व्याप्तिवा-
चकतया योगरूढिभ्यामात्मपदं प्रत्यक्चैतन्यवाचकमेव न तु देहधृतिजीवस्वभावानां तेषु परिच्छिन्नेषु योगा-
संभवात् ॥ यत्तु आत्मैवेदमग्र आसीदित्येवमादौ पुरुषविध इत्येवमादिविशेषणांतरं श्रूयते भवेत्तत्र विशेष-
वदात्मनो ग्रहणं अत्र पुनः परमात्मग्रहणानुगुणमेव विशेषणं पृथुतरमुपलभ्यते स ईक्षत लोकान्नु सृजा इ-
ति स इमान् लोकानसृजत इत्येवमादीनि परमात्मन एव ग्रहणं न्याय्यं ॥ यद्युक्तं तत्र पुरुषविध इति शिरः
पाण्यादिमत्त्वं स यत्पूर्वस्मात्सर्वस्मात्सर्वान्पाप्मन औषत्तस्मात्पुरुष इति पुरुषपदनिर्वचनेन विद्य-
मानानां पापानां दाहप्रतिपादनेन पापसंबंधः सोबिभेदिति भयसंबंधः स वै नैव रेमे इति रत्यभावश्चेति जीव-
लिंगानां श्रवणादात्मपदस्येश्वरासाधारणस्यापि हिरण्यगर्भादिसविशेषजीवपरत्वशंका संभवति ॥ त-
थापि परमात्मग्रहणमेव न्याय्यं तथा सति प्राथुत्पत्तेरात्मैकत्वावधारणमांजस्येनोपपद्यते न जीवग्रहणे
लोकसृष्टिवचनं तु श्रुत्यंतरप्रसिद्धमहाभूतसृष्ट्यनंतरमिति संगमनीयं यथा तत्तेजोऽसृजतेत्येतत् श्रु-
त्यंतरप्रसिद्धवियद्वायुसृष्ट्यनंतरमित्ययुक्तं ॥ योप्ययं व्यापारविशेषानुगमस्ताभ्यो गामानयेत्येव-
मादिः सोपि विवक्षितार्थानुगुण्येनैव गृहीतव्यः न ह्ययं सकलः कथाप्रपंचो विवक्षित इति शक्यते वक्तुं त-
त्प्रतिपत्तौ पुरुषार्थाभावात् विवक्षितोत्वात्मायमर्थः उपक्रमे आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंच

नभिवदित्यहेन प्रतिपादनात् मध्ये च स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यतेति श्रुतेर्जीवरूपेण प्रवेशश्रवणात् स एतमेव पुरुषं ब्रह्मततमपश्यदिति च जीवस्य ब्रह्मत्वप्रतिपादनादन्तःकरणसाक्षिणं च प्रज्ञानशब्देनोपक्रम्य प्रज्ञानं ब्रह्मेति तस्य ब्रह्मत्वेनोपसंहाराच्च निर्विशेषं प्रत्यगभिन्नं ब्रह्मेति प्रकरणार्थः प्रतीयते तदानुगुण्यं चेन्द्रियादिसृष्टिप्रतिपादनस्य तदुपाधिकमेव जीवस्य द्रष्टृत्वादिकं न तु स्वाभाविकमिति तात्पर्यकत्वे उपपद्यते तथा चोत्तरत्र श्रुतिर्दर्शयति यदि वाचाभिव्याहृतमित्यादि अतो गवाद्यानयनादिव्यवहारप्रतिपादनस्य त्वंपदार्थशोधनोपयोगितया न ब्रह्मपरत्वविरोधिता ॥ किं वा सदर्थकतयापि न सकलः कथाप्रबन्धो विवक्षितार्थः तथाहि न हीन्द्रियादिप्रवेशात् प्राक् केवलमेव गवादिशरीरं सृष्ट्वा समानीतमिति संभवति इन्द्रियविशिष्टस्यैव शरीरस्योत्पत्तेः नापि गवाश्वयोः शरीरमिन्द्रियैरसंयुक्तमिति संभवति तथा सति गवादीनां भोग एव न स्यादतो यथाश्रुतार्थकत्वे असदर्थत्वनिष्प्रयोजनत्वे प्राप्तामिति देहेन्द्रियविलक्षणस्त्वंपदार्थ इति बोधयितुं कल्प्यते इयमाख्यायिका तत्र शरीरस्येन्द्रियायतनत्वप्रतिपादनेन शरीरविवेको दर्शितः यस्मिन् प्रतिष्ठिता अन्नमदामेति इन्द्रियवचोभङ्ग्या भोक्तृत्वं तेषां शिरसि निक्षिप्तं तत्सङ्गाच्च साधिष्ठातृकाणामिन्द्रियाणां विराडवयवेभ्यः सृष्टिः प्रतिपादिता श्रुत्या ह्यग्वाचोभिरित्यादिना कथन्विदं मदृते स्यादिति वाक्येन शरीरेन्द्रियादिकं स्वाधारं चेतनं विना-

नेन परेत्य येसर्वपृकौप्र यांतप्रयोहवैतन्तपरमंत्रमूदेर मुद्धेवमपनोत्यं कथं [illegible] पगमद्वाराऽपूर्वं कल्पय
त्रिफलायाउपनिषदः एतस्य परत्वेन व्याख्यानस्य [illegible] द्वारूपत्वमित्यादिना अस्यापि असंयुक्तप्रकरणादिति क
र्तव्यतार्थत्वादिति न्यायेनाभिक्रमणन्यायेन च तदनुकूलत्वे नैयजिज्ञासाधिकरणोक्तरीत्या व्याख्येयत्वा
त्स्यभेदोपक्रमत्वाभावात् ॥ असंयुक्तमित्यादिन्यायश्चोत्स्य दर्शपूर्णमासादिकं प्रकृत्य समिधो यजतीत्या
दिश्रूयते तस्य दर्शादौ समिदादंगत्वबोधकत्वमस्ति न वेति संशये साध्यसाधनाकांक्षयोः स्वर्गयागादावन्वये
नविच्छेदात्तत्र न तद्बोधकत्वमिति प्राप्ते ॥ तयोरितिकर्तव्यताकांक्षणात्समिधो यजतीत्यादेर्न दर्श
पूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिपूर्वमित्यमितिपदकल्पनया समिदादेरन्वयेनोक्तबोधकत्वमावश्य
कमितिकर्तव्यतात्वं चाख्यातपदात् सामान्यतो ज्ञातभावनाविशेषणत्वं तथा च यागसाधनव्यापारत्वनि
शेषजिज्ञासायाम दृष्टद्वारा समिदादीनां द्रव्यदेवतादिगम्यागद्वारा च यागादीनामुक्तप्रायेण साधनत्वबो
धनात्तन्निवृत्तिरिति केचित् ॥ यागादिरूपकारणनिष्ठापूर्वजनकशक्तिसाधनत्वमितिकर्तव्यतात्वं यागसा
धकः मनस्त्वनकद्वांतमीमांसकाः एवं च कारणतावच्छेदिकाशक्तिरूपमपूर्वापितज्जनकाकांक्षया समि
दादिजन्यशक्तिमत्त्वया दर्शपूर्णमासाभ्यां यजेतेत्युक्तशक्यार्थबोधः मीमांसकमते शक्तेरनित्यत्वाद खंडका

अकश्रुत्याद्यसंयुक्तमपि समिदादिप्रकरणादुभयाकांक्षारूपात् दर्शाद्यंगं इति कर्तव्यतार्थित्वादुक्तेति क
र्तव्यतात्वेन तदपेक्षितत्वादिति असंयुक्तमिति सूत्रार्थः॥ तथा दर्शपूर्णमासौ प्रकृत्य प्रयाजसमीपे श्रूयते अ
भिक्रामं जुहोतीति तत्राभिक्रमणमित्यस्य गुणसूत्रं तत्त्वेनाभिक्रम्येत्यर्थकत्वात् जुहोतिनामाकरणिकसर्वहोमा
नुवादात् तदुद्देशेनाभिक्रमणं विधीयते प्रयाजानां सन्निहितत्वेपि तदपेक्षया प्रकरणस्य बलवत्त्वादन्यथा
सन्निहितोक्तप्रयाजाद्यंगं स्यादिति प्राप्ते ॥ प्रयाजान् विधायत्रीन् प्रयाजानिष्ट्वा समानयन उपभृतद्‌त्यने
नोपभृत्स्थाज्यस्याधं जुह्वां स्थाप्यमित्येवं समानयनं विधायाभिक्रामं जुहोतीत्युक्त्वा यो वै प्रयाजानां मिथुनं
वेद समिधो बर्हीरिव यजति तनूनपातमेकमित्यादि प्रयाजानिष्वाह्यंत्याभिधारयन्नीत्यं तेन प्रयाजप्रप
मर्शात् तावत्संदर्भस्य [illegible] प्रयाजांगमभिक्रमणमिति [illegible] सं
दंशन्यायः तथा च सन्नि[illegible] उपकारकत्वं निर्णीतं [illegible]
तु प्रत्युपकारकत्वात्तन्म[illegible] उपकारकत्वमेव निर्णीयं ॥ ननु [illegible] योनिमि
ति प्रथममुंडके प्राणादिकारणत्वस्य द्वितीये [illegible] स्वंडस्य प्रतिपादनादभिक्रम
णादिवद्देवतनाध्य[illegible] मेवेति चेन्न ॥ प्रथममुंडके उक्तरीत्या एकवि-
ज्ञानेन सर्वविज्ञाना[illegible] परमं ब्रह्म वेद ब्रह्मैव भवतीत्युप

स्वकार्यसमर्थं न भवेदिति प्रतिपाद्य तदनुप्राह कतमानहि लक्षणस्य स्रष्टुस्तत्र प्रवेशः प्रतिपादितः स एत
मेव सीमानमिति वाक्येन एतं ब्रह्मरंध्रप्रदेशे विदार्यमानं द्वयोः कपालयोः सीमानं विदार्य एतया द्वारा प्रापद्यत
प्रासवान् सः जीवरूपेण प्रविष्टः परमात्मा एतमेव जीवाख्यं पुरुषं ततमं तमो लीतितः अन्योऽन्योपि दृश्यत इतिडः
व्याप्ततममित्यर्थः ब्रह्मापश्यत् प्रज्ञानेत्रं चक्षुः प्रकाशकं यस्य तत् प्रज्ञानेत्रमित्यर्थः एवमाथर्वणेपि स यो वै
तत् परमं ब्रह्म वेद ब्रह्मैव भवतीत्यादिवाक्यादप्यद्वैतब्रह्मात्मनि समन्वयः सिध्यति॥ अथाथर्वणे जीव-
ब्रह्मणोर्भेदे पि उपक्रमादिषड्विधतात्पर्यलिंगानां दर्शनात् कथमद्वैतब्रह्मात्मतत्त्वमेव तदुक्तवाक्यप्र-
तिपाद्यमिति निर्णयस्तथाहि परे वर्णयंति आथर्वणे द्वासुपर्णेत्युपक्रमः परं साम्यमुपैतीत्युपसंहारः तयो
रन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यः जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक इत्यभ्यासः शास्त्रै
क समधिगम्येश्वरप्रतियोगिकस्य कालत्रयाबाध्यभेदस्य शास्त्रं विनाऽप्राप्तेरपूर्वता पुण्यपापे विधूयेति फ
लं अस्य महिमानमिति स्तुतिरूपोऽर्थवादः अत्ति अनश्नन्नित्युपपत्तिः॥ नच भेदवाचकशब्दाभावात्कथमुपक्र
मो भेदविषयक इति वाच्यं॥ मायामात्रमिदं द्वैतमद्वैतं परमार्थत इति गौडपादीयोक्तश्रुतौ यथाद्वैतपदं भे
दमात्रार्थकं मायामात्रपदमीश्वरेच्छाधीनतया सत्यमित्यर्थकं तथाच सर्वोपि भेदः सत्यः अद्वैतं तु परमार्थतः
[illegible] स्वतंत्रश्रीयामादायाद्वैतमित्यर्थः॥ एक एव हि स्वतंत्र इति यावत् परमार्थः स्वतंत्रः स्यादिति स्मृ

नैष्फल्यमित्युक्तं श्रुतेरद्वैतार्थकत्वखंडनपरेणाद्वैतशब्दस्याभेदार्थकत्वमुक्तं न यथाद्वितशब्दस्याभेदार्थकत्वमभिव्य
भिमानेनोक्तोपक्रमस्याभेदविषयकत्वशंकासंभवात् विरोधाद्भिन्नसंख्याभेदाक्षेपाद्वानस्सम्भवान्नाद्व
न्नत्वविशेषितमेव तद्भूत बहुधर्मयोगित्वं तस्मात् सादृश्यं न तु विशिष्यमाणं नायं सः किं तु न तत्सदृशः नायं तत्सदृ-
शः किं तु स एवेति सादृश्ये ह्यनयोरेकतरविधानादन्यतरनिषेधात् ॥ गगनं गगनाकारमित्यादि तु तत्सदृश
वस्त्वंतरनिषेधपरं गगनाद्येकदेशस्य तदेकदेशसादृश्यपरं वेत्युपसंहारोऽपि भेदविषय एव ॥ अभ्यासत्वे
ध्यर्थत एवैक प्रकारत्वं तत्र न तु शब्दतः तथा सति ज्योतिरादिपदेन तत्समानार्थकपदांतरेण वा ज्योतिष्टोमा
दाभ्यासस्यानुपपत्तेः अन्यमीशमित्यत्रेशागतान्यत्वं प्रतियोग्याकांक्षायां पश्यतीन्यन्नेनोपस्थितो जीव एव-
संबध्यते स समं पदमध्वर्युरंजलिं नागृह्णातीत्यादौ श्रुतपदस्य संख्याकांक्षायामेक हायन्यासोमक्रीणा
ती त्यनेनोपस्थिता एक हायनीवेत्यन्यासोऽपि जीवब्रह्मभेदविषयः संभवतीति चेदनवदंति ॥ आथर्वणोप
थम मुंडके कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति शौनकप्रश्नानंतरं द्वे विद्ये वेदितव्ये इति तो ग-
द्याद्वय मवतार्य ऋग्वेदादिलक्षणामपरां मुक्त्वा अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यम
गोत्रमवर्णमित्यादिना परविद्याविषयमक्षरं प्रतिपादयता अभेदस्यैवोपक्रांतत्वात् अन्यथा तदुत्तरत्वा
नुपपत्तेः ॥ द्वितीयमुंडके पुरुष एवेदं विश्वं ब्रह्मैवेदं विश्वमित्यादि मध्यपतितस्यैव परामर्शात् तृतीयमुंडको

संहारस्य [illegible]

स्यादीनां न हि [illegible] परत्वं [illegible]

तिविशेषात् तृतीयमुंडकांते परेऽव्यये सर्व एकी भवंति स यो ह वै तत् परमं ब्रह्म वेद ब्रह्मैव भवतीत्यैक्यस्य लक्षणे-

न फलेनोपसंहाराच्च मध्यपतितैः परं साम्यमुपैतीत्यस्याऽपि पूर्वोक्तसंदंशन्यायेनाभेदरूपसादृश्यपरतया न-

भेदोपसंहारतापि ॥ अत एव परमिति साम्यविशेषणं संसारित्वावृत्तस्य निर्दुःखत्वादिसादृश्यस्यानिरंजन इति त-

त्पूर्वतनवाक्येनापि लब्धतया पुनः सादृश्यप्रतिपादनेऽनुपयोगात् ॥ परमत्वविशेषितं सादृश्यमभेदरूपमेव ॥

न च स यो ह वै तत् परमं ब्रह्म वेद ब्रह्मैव भवतीति वाक्ये द्वितीयब्रह्मशब्दः जीवपर एव तस्य जीवजातिकमलासन-

शब्दराशिरूपानेकार्थत्वस्य कोशप्रसिद्धत्वात् तथा च यः परमं ब्रह्म वेद स जीव एव भवति न परं ब्रह्मेत्यर्थः अत

एवाद्यो ब्रह्मशब्दः परमत्वेन विशेषितः एवं सायं गावः गोष्ठ एकी भवंति एकीभूता नृपाः सर्वे पर्युः पांडवं शरैः

कीटोऽपि भ्रमरेणैकीभूत इति स्थानेऽप्यमत्यैक्यसादृश्यनिबंधनैकीभावस्य गोनृपकीटभ्रमरादौ दर्शनादपि तद-

त्यन्तमनिमित्तेन गौण एकीभावव्यपदेशोपपत्तिरित्युपसंहारो भेदविषय एवात एव परेऽव्यय इति सप्तम्युपपत्ति-

रन्यथाऽभूततृतीयाकल्पनापत्तिरिति वाच्यं ॥ जीवे ब्रह्मपदप्रयोगसंभवेऽपि प्रकृते ब्रह्मोपादानमेवोचितमन्य-

था जीवभावस्य ब्रह्मभावस्य [illegible] सिद्धतया तस्य ब्रह्मज्ञानसाध्यत्वाभावात् परमं ब्रह्म वेद ब्रह्मैव भवतीति तस्य ब्रह्मज्ञान-

फलत्वोक्तेरसंगत्यापत्तेरेवं सत्यर्थाद्द्वितीयब्रह्मपदमपि परमात्मविशेषितमेव एवं चोपक्रमोपसंहारयोरैक्यविषयत्वे पूर्वोक्तन्यायेन मध्यस्थितस्य परेऽव्यये सर्व एकीभवंतीत्यस्य तदनुकूल्येन मुक्तस्य ब्रह्मणा तद्भेदाग्रहविषयत्वरूपैक्यप्रतिपादकत्वमेव युक्तमेवं सति परेऽव्यय इति सप्तम्यपि युज्यते भेदग्रहान्वितविषयतायास्तदर्थत्वात् ॥ सायं गावः गोष्ठ एकीभवंतीत्यत्र च भेदग्रहसत्वेनोक्तरूपेणैक्योपपादनायोगात् युक्तमेकस्थानस्थितत्वादिना तादृशव्यवहारोपपादनं ॥ न च विनिगमकाभावः उभयथापि व्यवहारसंभवादिति वाच्यं ॥ अस्मदुक्तरीतावुपक्रमोपसंहारैक्यानुगुण्यस्य विनिगमकत्वात् जीवपरयोः स्थानैक्यस्य नित्यसिद्धतयाभिमतत्वयास्वारस्यप्रसंगाच्च कर्मणां वैकुंठगमनासंभवेन कर्मणो विज्ञानमयश्चेत्याद्यसंगत्यापत्त्या एकस्थानस्थितत्वादिना प्रकृते तादृशव्यवहारस्य समर्थयितुमशक्यत्वात् अत एव मत्स्यैक्येन तादृशव्यवहारोपपादनमपि अयुक्तं कर्मणां मत्स्यैक्यासंभवेन कर्मणो विज्ञानमयश्चेत्यस्यासंगत्यापत्तेः ॥ क्षीरोम्मरेणैकीभूत इत्यादेरिव सादृश्यनिबंधन एव एकीभूतव्यवहारोऽस्त्विति शंका तु सादृश्यपरत्वे सप्तम्यनुपपत्त्या निरस्ता ॥ मन्मते तु ब्रह्मणि लीनस्य कर्मणः ततो भेदग्रहाभावेन जलेन लवणमेकीभूतमित्यादिवत् स्वीयरूपहानेन तद्धर्मिकभेदाग्रहविषयत्वरूपैकत्वस्यैवोक्तवाक्यार्थस्य संभवेनासंगत्यभावात् ॥ अनुरूपश्चात्र नदीसमुद्रदृष्टांतः यथा नद्यः स्यंदमानाः समु

द्रायणः समुद्रं प्राप्यास्तं गच्छंतीति पूर्वरूपहानोक्त्या अगृह्यमाणभेदत्वोक्तेः अयंतु विशेषः परस्परावय
वभेदेन परस्परमैक्यासंभवात्तत्र सत एव भेदस्याग्रहणमत्र तु भेदाभावादेवेति भेदाग्रहणांश एव दृष्टांत
संप्रतिपत्तेर्नहि दृष्टांते सर्वसाम्यापेक्षास्तीति ॥ यद्यपि मुक्तिकाले सतोपि भेदस्याग्रहणेनोक्तश्रुत्युपप-
त्तिस्तथापि नान्योतोस्ति द्रष्टा नान्योतोस्ति श्रोता नह्यस्ति द्वैतसिद्धिरात्मैवसिद्धः नैव कांचनाद्भिदास्ति-
स ह यो वै तत् परमं ब्रह्म वेद ब्रह्मैव भवति ॥ यावन्मोहं तु भेदः स्यात् जीवस्य च परस्य च ततः परं न भेदोस्ति
भेदहेतोरभावतः ॥ विभेदजनके ज्ञाने नाशमात्यंतिकं गते आत्मनो ब्रह्मणो भेदमसंतं कः करिष्यतीत्यादिश्रु-
तिस्मृतिपर्यालोचनया ॥ भेदाभावादेव न तथाग्रहणमित्येव कल्पयितुं युक्तं ॥ यथाच नान्योतोस्ति द्रष्टे-
त्यादिश्रुतं जीवेशाभेदनिषेधएव स्वारस्यं न पराभिमतार्थे तथानंदमयाधिकरणे विस्तरेण प्रतिपादयि
ष्यामः ॥ युक्तं च मुक्तिकाले भेदस्यैवासत्त्वकल्पनया तदग्रहणमन्यथा तदग्रहणकारणदोषकल्पनाप-
त्त्या मुक्तेरेवानुपपत्तेः निरस्तसमस्तदोषात्मलाभस्यैव मुक्तित्वश्रवणात् यत्तु ब्रह्मैव भवतीत्यस्य बृंहित
त्वरूपब्रह्मत्वाक्रांतो भवतीत्यर्थः संपूज्य ब्राह्मणं भक्त्या शूद्रोपि ब्राह्मणो भवेदितिवत् नहि शूद्रोपि पूजित
ब्राह्मणव्यक्तिर्भवति किंतु ब्राह्मणत्वजात्याक्रांतो भवतीति परेणोक्तं तदेतेनापास्तं मुक्तयुक्त्यादिना श्र
ुतेर्व्यवस्थभेदस्यैवसंभवेन दृष्टांतवैषम्यात् ॥ यत्तु भोक्त्रापत्त्यधिकरणे एकीभवंतीति श्रुत्या न मुक्तिकाले

जीवपरयोरभेदसिद्धिः लोके उदकांतरमिलितस्योदकस्यैक्याभावव्यवहारेप्यंतर्भेददर्शनेन व्यभिचारा
दैक्यव्यपदेशस्य स्थाने क्यादिनापि जलैक्यवदुपचरितार्थत्वात् श्रुतितदुपबृंहणोक्तथैव बोधितत्वाच्च
॥ तथाच श्रुतिः यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति एवं मुनेर्विजानत आत्मा भवति गौतमेति ॥ स्कां
दे च उदके तूदकं सिक्तं मिश्रमेव यथा भवेत् न चैतदेव भवति यतो वृद्धिः प्रदृश्यते ॥ एवमेव हि जीवोपि ता
दात्म्यं परमात्मना प्राप्तोपि नासौ भवति स्वातंत्र्यादिविवर्जनादिति आनंदतीर्थीयैरुक्तं तदयुक्तं युक्त्यादि
भिः परास्तं ॥ किंचोक्तश्रुतौ दृष्टांते शुद्धत्वेन सादृश्यमात्रं यदि विवक्षितं तदा आसिक्तस्यापि जलस्य शुद्धस्य शु
द्धत्वादिना सादृश्यानपायात् श्रुतिगतनाधिक्यांतभागस्य वैयर्थ्यमिति तद्भेदग्रहाविषयत्वादिना सादृश्यं
वाच्यं तथा सति जलद्वयस्येव तस्य भेदग्रहविरोधित्वेनोक्तसादृश्यप्रयोजकत्वलाभेन तद्भागस्यार्थवत्त्वं
एवं च तादृक्जलस्य दृष्टांतत्वं वदता मुक्तस्य ब्रह्मणापि तद्भेदग्रहाविषयत्वादिनैव सादृश्यं तदभिन्नत्व
पर्यवसितमत्र प्रतिपाद्यत इत्येव वक्तव्यं ॥ स्कांदवचनं तु उक्तश्रुतिस्मृतिवाक्याविरोधेनार्थांतरमुक्त्य
भिप्रायमत एव ब्रह्मलोकगतस्य परस्यांते कृतात्मानः प्रविशंति परं पदमिति तस्यैक्यरूपपरपदप्राप्ति
रुच्यते ॥ एतेन मांडूक्यगतं परात्परं पुरुषमुपैति दिव्यमिति वाक्यमपि व्याख्यातं तस्य परब्रह्मप्राप्तिरू
प सगुणोपासनाफलबोधकतया देशांतरप्राप्तिरूपब्रह्मविद्याफलत्वबोधकत्वाभावात् ॥ अनश्नन्नित्य

दिनान तात्विकभेदाध्यासः नापीशास्त्रवाक्यगम्यतयातत्रानियोगिकस्तद्धर्मिकोवाभेदोऽपूर्वः प्रत्यक्षेणान
समकक्षमानेनचतयोः मानत्वात् ॥ तदुक्तफलार्थवादयोरैक्यपक्षेपिसंभवेननभेदासाधारण्यंगता ॥
अनभ्यासित्यादेः कात्स्न्र्यानिकभेदेनोपपत्त्यातात्विकभेदोपपत्तिलाभाभावात् ॥ नचाद्वैतिमतेनित्यंब्रह्मभूतस्या
पूर्वब्रह्मभावोक्तिरयुक्तेतिवाच्यं ॥ कंठगतचामीकरादौअप्राप्तत्वभ्रांतिनिवृत्तिमात्रेणप्राप्तप्राप्तिरूपत-
याफलत्वदर्शनात् ॥ नचारोपनिवृत्तेरप्राप्तत्वंश्रुतार्थापत्तिगम्यतयाशाब्दत्वोपपत्तेः ॥ एतेनैक्यस्यप्रा
गेवसिद्धतयाएकीभवंतीत्य भूततद्भावार्थच्विप्रत्ययायोगइतिनिरस्तं ॥ गृहनिक्षिप्ताज्ञातनिधिव-
त्कंठचामीकरवद्वासतोप्याप्राप्तत्वेनाभूतसमतयातदुपपत्तेः ॥ यच्चसिद्धवस्तुनः प्रमाणांतरवेद्य-
त्वनियमेनसिद्धवस्तुब्रह्मबोधनेवेदांतानांज्ञानाधिगतार्थविषयकत्वरूपमप्रामाण्यंसंभवतीतिपूर्वपक्षि
णोक्तं ॥ तन्नसम्यक् ॥ भाष्यादुक्तरीत्यावेदांतानांक्रियोपासनादिशेषतांविनैवप्राधान्येनब्रह्मप्रतिपा
दकत्वसिद्धौतत्रप्रमाणांतराविषयत्वासिद्धौचौपनिषदब्रह्मणितादृशनियमव्यभिचारात् ॥ तादृशनि
यमेमानाभावाच्च ॥ लौकिककार्यप्रमाणांतरवेद्यतायाअपिसत्वेनसिद्धपराणामेवसापेक्षत्वंनकार्यप
राणामित्यस्याप्रयोजकत्वात् ॥ आम्नायस्येत्यादिजैमिन्यादिवचनंचभाष्योक्तरीत्यापुरुषार्थानुपयोगि-
निष्फलोपाख्यानपरमेव ॥ नापिसिद्धवस्तुप्रतिपादनेफलाभावः पूर्वपक्षोक्तः सम्यक् यतः ईप्सितंफलं

द्विविधं किंचिदप्राप्तं यथा ग्रामादि किंचित्प्राप्तमपि भ्रमवशादप्राप्तमित्यवगतं यथा कंठमण्यादिकं ॥ एवंजि
हासितमपि द्विविधं किंचिदहीनं जिहासितं यथा वलयितचरणं फणिनं किंचिच्च हीनमेव यथा चरणाभर-
णनूपुरे आरोपितं फणिनं ॥ तत्र वेदांतजन्यब्रह्मात्मैक्यज्ञानात् प्राप्तब्रह्मप्राप्तिः कल्पितत्वेन नित्यहीन
संसारहानिश्च संभवतीति सिद्धब्रह्मबोधनेपि फलवत्त्वमस्त्येव ॥ भाष्येप्युक्तं रज्जुरियं नायं सर्प इति सि
द्धवस्तुबोधनेपि फलवत्ता दृष्टेति ॥ यत्तु चंद्रिकायां सिद्धवस्तुप्रतिपादनस्य निरुक्तफलवत्तामनूद्य कंठ
मण्युपदेशस्य प्राप्तमणिप्राप्तिर्न फलं किंतु प्राप्तिज्ञानजन्यसुखस्य वस्तुतः प्रागप्राप्तस्य प्राप्तिः मण्यप्राप्ति
भ्रमादिजन्यदुःखस्य वस्तुतः प्रागनिवृत्तस्य निवृत्तिर्वा फलं ॥ एवं चरणाभरणमिदं न सर्प इत्युपदेशा-
स्यापि न निवृत्तसर्पनिवृत्तिः फलं किंत्वाभरणत्वज्ञानजन्यसुखस्य वस्तुतः प्रागप्राप्तस्य प्राप्तिः सर्पभ्रम
जन्यदुःखस्य वस्तुतः प्रागनिवृत्तस्य निवृत्तिर्वा ॥ न ह्युपदेशेन मणिः प्राप्तः सर्पो वा निवृत्तः इत्यनुभवः किंतु
प्राप्तिज्ञानाद्भ्रमो निवृत्त इति ॥ न च प्रकृते प्राप्तस्वरूपसुखात् अन्यत् प्राप्यसुखं नित्यनिवृत्ताविद्याभ्र
मदुःखादेरन्यत् निवर्त्यं वास्ति येन सप्रयोजनता स्यादिति दूषणमुक्तं तदसत् ॥ प्राप्तमणिप्राप्तिर्न फल-
मित्यत्र प्राप्तेर्मणिनिष्ठस्वत्वादिरूपत्वे इष्टापत्तिः ॥ तत्साक्षात्काररूपत्वे च कंठे मणिरस्तीत्युपदेशस्य सा
फल्यं न फलं स्वत्वादिवत्तद्विशिष्टसाक्षात्कारोपि प्राप्तिशब्दार्थः उपदेशानंतरं साक्षात्कृतमणीनां व्युत्पन्ना

नाभावप्रमाणः प्रास इति प्रयोगदर्शनात् ॥ आप्तिज्ञानजन्यसुखस्य वस्तुतः भागप्रासस्येत्यसदेव ॥ अस्म-
न्मते सुखमात्मैव चंदनादियोगजन्यवृत्तेस्तु अभिव्यंजकत्वमात्रमिति तस्य नित्यप्राप्तत्वेन वस्तुतः भागप्र-
सेरभावात् तथापि हि चंद्रिकायां जिज्ञासाधिकरणे नापीहामुत्रार्थभोगविरागः परमते संभवतीति विवरणे
विषयैरपि नित्यप्राप्तरूपमेव सुखमभिव्यज्यते न तु जन्यं सुखमस्तीत्युक्तत्वेन तद्विस्मरणेन आप्तिज्ञानज-
न्यसुखस्य वस्तुतः भागप्राप्तस्येत्यस्य वक्तुमशक्यत्वात् । एवं आप्तिभ्रमजन्यदुःखस्य वस्तुतः भागनिवृत्त-
स्य निवृत्तिर्वा फलमित्यपि न सत् ॥ तादृशदुःखनिवृत्तेः पूर्वसिद्धाधिष्ठानात्मरूपत्वेन तादृशदुःखस्य व-
स्तुतः भागनिवृत्तत्वासिद्धेः कथं तन्निवृत्तेः फलत्वं ॥ यदि च तन्निवृत्तित्वेन तस्य फलत्वं तर्हि ब्रह्माप्तिभ्र-
मजन्यदुःखनिवृत्तेरपि नित्यत्वेन वेदान्तज्ञानजन्यब्रह्मज्ञानफलता किं न स्यात् ॥ किंच नित्यनिवृत्तेत्यत्र निवृ-
त्तत्वमपारमार्थिकत्वमेव न विद्यमानध्वंसप्रतियोगित्वं आरोपिताविद्यारोगादिध्वंसस्यारोपदशायामस-
त्त्वात् ॥ अधिष्ठानस्यैव ध्वंसत्वेन कथं तदा सन्नास्तीति चेन्न तदापितध्वंसत्वोपहितस्याभासत्वेन तेन रूपेण
तस्योपदेशासाध्यताया इष्यमाणतायाश्चाबाधात् कथं न तस्य फलत्वं ॥ किंच प्रतियोगिनि द्वेषोपि न ध्वंसे-
च्छायां हेतुः एवं फले द्वेषोपि तत्साधनद्वेषहेतुः एवं च दुःखे द्वेषात् तत्साधनत्वेनावगते आरोपितानारोपितसाधा-
रणे फणिनि द्वेषात्तद्ध्वंसस्येष्यमाणत्वं निष्प्रत्यूहमिति तत्साधनगुरुसाक्षात्कारहेतोरुपदेशस्य कथम्

सोऽफलत्वं न स्यात् ॥ यद्यपीच्छांतराजन्येच्छाविषयत्वरूपं मुख्यमुपदेशफलत्वं न मणिसाक्षात्कारादौ सं
भवति तथापि गौणमुख्यसाधारणमिष्यमाणत्वलक्षणं तत्संभवत्येव तत्साध्यत्वे सति इष्यमाणत्वस्यैव
फलसामान्यलक्षणत्वात् इष्यते हि मण्यादिसाक्षात्कारः इष्यमाणसुखादिसाधनत्वात् उपदेशसाध्यश्चे
ति न तत्फलत्वमेव ॥ प्रकृते तु सिद्धत्वायद्दशायामिच्छांतराजन्येच्छाविषयत्वात् परमानंदरूपब्रह्मणः मु
ख्यपुरुषार्थत्वं नित्यसिद्धत्वयद्दशायां तद्दर्शनासंभाविद्यायां हि दृष्टतमदुःखहेतुत्वेनावगतायां द्वेषा
न्निवृत्तावि च्छानवसितदेतावात्मसाक्षात्कारे नेच्छा संभवतीत्यविद्यानिवृत्त्यात्मसाक्षात्कारादेश्च फलत्वं नि
र्विवादमेव ॥ एतावानेव विशेषः मण्याद्युपदेशस्य मण्यादिसाक्षात्कारो न मुख्यं फलं किंतु गौणं वेदांता
नां तु परमानंदस्वरूपब्रह्मसाक्षात्कारः स्वतो दुःखनिवर्तकतया मुख्यं फलं मुख्यफलहेतुश्चेति न किंचिद
प्यनुपपन्नं ॥ यदपि चंद्रिकायां पूर्ववादिना फलाभावादिना तात्पर्याक्षेपे सिद्धांतसूत्रे फलादिकं तात्पर्य
चानुपपाद्यप्रामाण्ये तात्पर्यहेतूकर्तुमयुक्तमिति दूषणमुक्तं तत्पूर्वोत्तरपक्षयोर्व्यामोहनिबंधनमेव ॥ पू
र्ववादिना हि वेदांतानब्रह्मणि प्रमाणमतत्परत्वात् तेन तत्परत्वे फलाभावात् इत्याक्षिप्ते तत्र ब्रह्मशास्त्रप्र-
माणकमन्वयात्तात्पर्यात् तदेवासिद्धमिति शंकायां संशयशंकासूचितं तात्पर्यनिर्णयहेतुफलवत्त्वापूर्वत्वादिरूप
लिंगादिरीत्या यद्वेति हेतुविवरणे फलस्य तात्पर्यस्य चोपपादनेन तादृशहेतूकरणस्य सुयुक्तत्वात् ॥

समन्वयात् सम्यक्तात्पर्यनिरूपितसंबंधविशेषात् स च तन्निर्वाहकोपक्रमादिलिंगवत्त्वमेवेति प्रथमहेतुप
रिष्कारे विशेषाभावात्॥ न तात्पर्यहेतूकृतमपि तु फलवत्त्वापूर्वत्वादिरूपतात्पर्यनिर्वाहकलिंगवत्त्वेन
न तात्पर्यस्याप्यर्थतो लाभात् अतत्परत्वशंकाया अपि निवृत्तेः॥ यदपि चंद्रिकायां लक्षणाया अमुख्यत्वेन
सौत्रसंशब्दार्थत्वायोगश्च॥ तदुक्तमनुव्याख्याने कथं च लक्षणावादी ब्रूयात् ब्रह्म समन्वयं यो सौ शब्दस्य
मुख्यार्थस्तत्रैव स्यात् समन्वय इति दूषणमुक्तं तदप्यसत्॥ न ह्यतीत्युद्देश्यकत्वरूपमुख्यतात्पर्यलाभार्थ
कतया संशब्दस्य प्रयोजनोक्तेर्यत्परः शब्दः स शब्दार्थ इति न्यायेन तात्पर्यविषयीभूतार्थस्यैव मुख्यार्थत्वेन वेदां
तानामुपक्रमादिलिंगैरुक्तरीत्याऽद्वैतचिन्मात्र एव तात्पर्यावगमात् तदेव तेषां मुख्योर्थ इति न किंचिदेतत्
॥ यदपि चंद्रिकायां स्वप्रमत्वादसंदिग्धेः वाच्यत्वात् श्रुत्यगोचरे निर्विशेषे चिन्मात्रे कथं श्रुतिसमन्वय इ-
त्युक्तं तदपि जिज्ञासासूत्रे विस्तरतः प्रत्युक्तमीक्षत्यधिकरणे च निरसिष्यामः॥ यदपि चंद्रिकायां अपि च आ
द्यसूत्रे ब्रह्मपदे हि प्रसिद्धिरुपपादिता जिज्ञासार्थं द्वितीये च जगज्जन्मादिहेतुता अविद्यमानाद्ब्रह्मपदे लक्षण
त्वेन कीर्तिता ईश्वरस्य तृतीये तु निर्विशेषे प्रमाणता शास्त्रस्योक्ता चतुर्थे तु तस्मिन्नेव समन्वयः प्रतिज्ञातो
तरित्यादौ सविशेषं तु कथ्यते ब्रह्मेति वादिनां पक्षस्तत्र किं केन संगतं तत्त्वविद्रूपमात्रेण श्रुतिसूत्रैकदर्शिते
इति विरोधोद्भावनं॥ तद्विरोधाभावेपि तस्यैवाद्वैतवादद्वेषमूलकं तथा हि श्रीमद्भगवत्पाद भाष्ये कथं पुनः

मत्यगात्मन्यविषये अध्यासो विषयतद्धर्माणामिति ब्रह्मणि निरुक्तलक्षणाध्यासो न संभवति तस्या
विषयतया अधिष्ठानत्वासंभवात् सामान्यविशेषरूपाभ्यां ज्ञानाज्ञानविषयत्वस्यैव तत्त्वादिति शंकायां तु
ष्यतु दुर्जन इति न्यायेन न तावदयमेकांतेनाविषयोऽस्मत्प्रत्ययविषयत्वादित्यनेनात्मनि देहेंद्रियाध्यासो
पयोग्यौपाधिकरूपेणास्मत्प्रत्ययविषयत्वरूपप्रसिद्ध्यभिधानेऽपि न ज्ञारोपे अधिष्ठानस्याविषयतयाभा
नमपेक्षितं गौरवात् किंतु भानमात्रं तच्च स्वप्रकाशस्यास्त एव जडस्य तु विषयतयेत्यन्यदेतदित्यभिप्राये
णापरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेरस्तितावत् ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावमित्युपक्रम्यात्मा समोक्तु
रित्यपरे इत्यंतं विप्रतिपत्तिप्रदर्शनेन जीवस्य पारमार्थिकं रूपं ब्रह्म तस्यैवानौपाधिकरूपेण जिज्ञासाया
उक्तत्वेन तस्य च प्रतीयमानजीवरूपव्यावृत्तत्वेन जिज्ञास्यत्वायाहू मर्यावृत्तिलक्षणस्यौपाधिकस्योपलक्ष
णतया व्यावर्तकस्याभिधाने नौपाधिकरूपेण जगत्कारणत्वाद्युपलक्षित एव शास्त्रप्रामाण्यं पूर्वाधिक
रणे प्रदर्शितमस्मिन्नधिकरणे समर्थ्यते ईक्षत्यधिकरणे चोक्तलक्षणातिव्याप्तिवारणायोक्तं गतिसामा
न्यमानंदमयाधिकरणमारभ्य स्फुटीक्रियते अंतस्तद्धर्माधिकरणादौ च प्रसंगात् प्रकृतब्रह्माश्रितोपास
नानि रूप्यंत इति क्वाप्यसंगत्यभावात्तदुद्भावनं चंद्रिकायामहंतात्मविद्वेषमात्रेणैवापभाष्यत इति सुधि
यांसश्चमेपेतिदिक् ॥समन्वयनयेभूपात्तरं पुनाथस्य सन्मुदे॥ कृतिरेषा भगवतः पादमूले समर्पिता॥१॥

अथ स॰न्व॰धि॰णं समाप्तं

श्रीगणेशाय नमः ॥ शास्त्रं योनिरमुष्य शास्त्रकृदिति व्याचख्युरार्या हि नो रुद्धे केचिदतिप्रसक्तमवदन्
पूर्वोक्तसल्लक्षणं ॥ आलोच्योभयमाहितार्थम वनाद्धैतिनां हैतिनां काव्ये रघुनाथपंडितकृतिर्मोदाय
स्त्वेदाय च ॥१॥ शास्त्रयोनित्वात् ॥ अस्मिन्नधिकरणे शास्त्रयोनित्वसमन्वयमुखेन ब्रह्मणः सार्वज्ञ्यं दृढीकृ
त्य पूर्वसूत्रोक्तजगज्जन्मादिकारणत्वलक्षणस्य ब्रह्मणि समर्थनात् शास्त्राध्यायपादसंगतयः ॥ जन्मादि
सूत्रोक्तं जगज्जन्मादिकारणत्वमुपादानत्वकर्तृत्वादिरूपमभिन्ननिमित्तोपादानत्वशब्दप्रतिपाद्यं लक्षणं
ब्रह्मणि संभवति वा न वेति ॥ तदर्थं ब्रह्मणः सर्वज्ञत्वं संभवति वा न वेति तदर्थं वेदप्रणेतृत्वं ब्रह्मणः अबुद्धि
पूर्वकमनुबुबोधयिषापूर्वकमिति संशये ॥ उक्तलक्षणं जगज्जन्मादिकारणत्वं ब्रह्मणो न संभवति तद्घ
टककर्तृत्वोपयोगिसर्वज्ञत्वस्य ब्रह्मण्यसंभवात् ॥ तथा हि ब्रह्मणस्तावन्मते स्वरूपात्मकज्ञानेनैवाध्यासि
कभास्यतादात्म्यलक्षणं सर्वावभासकत्वमेव सर्वज्ञत्वं संमतं यस्य सर्वावभासनक्षमं नित्यज्ञानमस्ति सोऽ
सर्वज्ञ इति विप्रतिपत्त्यामिति ईक्षत्यधिकरणीयभाष्यानुरोधात् ॥ न चैतत् सृष्टेः प्राक् संभवति प्रकाश
स्य विद्यमानत्वसंबन्धप्रकाशरूपमात्रप्रकाशकत्वनियमेनातीतानागतवस्तुप्रकाशकत्वस्य तदानीम
संभवात् ॥ न चानुमित्यादेरिवातीतादिविषयकत्वं स्वरूपज्ञाने स्यादिति शंक्यं ॥ तथा सति स्वरूपज्ञा
नस्य परोक्षतापत्तौ प्रत्यक्षाद परोक्षाद् ब्रह्मेति श्रुतिविरोधापत्तेः ॥ अनुमित्यादेरंतःकरणपरिणाम

विशेषरूपस्य साकारतया ब्रह्मणस्तथात्वे निराकारत्वभंगापत्तेस्तस्मात् प्रधानमेव जगदुपादानकार
णं तदैक्षत सोऽकामयतेत्यादिनोक्तमीक्षापूर्वकं जगत्कर्तृत्वं तु महत्तत्त्वोपाधिकस्य जीवविशेषस्यैव तदुक्तं
सांख्यप्रवचनभाष्ये ॥ प्रकृतिप्रवर्तकस्येश्वरस्यैश्वर्येण प्रकृतिपरिणामादिना संभवति अन्योन्याश्रयात्
॥ इच्छानंतरं प्रकृतिप्रवर्तनं ततश्चेच्छादिरिति ॥ यावत्तदैक्षतेत्यभिचेतनकारणता श्रुतिः सा सर्गादावु
त्पन्नस्य महत्तत्त्वोपाधिकस्य पुरुषस्य जन्यज्ञानपरेति ॥ ननु सांख्येनापि यो ब्रह्माणं विदधाति पूर्वं यो वै वे
दांश्च प्रहिणोति तस्मै इति श्रुतिप्रामाण्यात् वेदोच्चारणं तु योग्यधिपापूर्वकमेव ब्रह्मशब्दवाच्यहिरण्यगर्भ
चतुर्मुखस्य वाच्यं तथा सति तस्यापि अतीतानागतार्थपरोक्षस्यासंभवेन सर्वज्ञानाकराणां सर्वगुणानां वे
दानामुच्चारणमनुपपन्नमिति तेनाधिकस्य नित्यस्वरूपज्ञानेनैव सार्वज्ञ्यं वक्तव्यमिति तुल्यो नु योग इति चे
न ॥ तन्मते योगर्द्धिसंपादितसार्वज्ञ्येन विष्णुवाहिनैव वेदोपदेशाभ्युपगमात् ॥ ननु योगर्द्धेर्वेदोक्तधर्मा
नुष्ठानसाध्यत्वादन्योन्याश्रयः शांक्यः तस्यापि पूर्वजन्मसिद्धाधिगतवेदोदितार्थज्ञानत्वोपगमात् बीजां
कुरादीनामिव सिद्धानामप्यविश्रांतप्रागवधिकधाराभ्युपगमात् ॥ ननु यो ब्रह्माणमिति श्रुतिरपि बुद्धि
पूर्वतामाह अस्य महतो भूतस्य निश्वसितमेतत् ऋग्वेद इति निश्वसितश्रुत्यनुरोधात् तथाहि यथा स्वाप
काले निश्वासादिकं विनैव पुरुषबुद्धिं पुरुषात् प्रादुर्भवति तथा वेदा अपि विनैव पुरुषबुद्धिं स्वयंभुवः आ

दुर्घटत्वाभिधानात् अत एव च न वेदानां पौरुषेयत्वं बुद्धिपूर्वकं पुरुषप्रयत्नजन्यत्वं [illegible] तथा च [illegible]
यः स[illegible]काशात् अबुद्धिपूर्वकमेव वेदाविर्भावः महद्भूतादाविर्भूतेभ्यो वेदेभ्यो [illegible] तु नयनान्तर्यामं
करणादिनिरूपमेव वेदार्थज्ञानं न स्वरूपभूतं तेन च तत्पात्रीत्वापूर्वकसृष्टिकर्तृत्वासिद्धिरिति नन्वयं नु योगः ॥ ए
वं च तदभ्युपेतदर्शितरीत्या कर्तृत्वोपयोगि सर्वज्ञत्वस्य ब्रह्मण्यसंभवात् न जन्मादिसूत्रोक्तकारणत्वसंभव इत्यगो
लक्षणसंभवतीति पूर्वपक्षे सिद्धान्तः ॥ शास्त्रयोनित्वादिति ॥ शास्त्रस्य वेदस्य योनिः कारणत्वादिति वि
ग्रहः ॥ सर्वज्ञमिति च पदमध्याहार्यं ॥ ब्रह्मशब्दश्च जिज्ञासासूत्रादनुषंजनीयः ॥ तथा च ब्रह्म सर्वज्ञं शा
स्त्रयोनित्वात् यावद्वेदकर्तृत्वादिति सूत्रार्थः ॥ तथा च पूर्वपक्ष्यभिमतवेदकर्तृत्वेनैव ब्रह्मणः सर्वज्ञत्वसिद्धिः
॥ यदुक्तं योऽब्रह्माणमिति श्रुतौ प्रतिपाद्यमानो वेदोपदेष्टा योगार्धिसमासादितसार्वज्ञ्यो विरञ्चादिरेवेति तद
युक्तं ॥ महत्तत्त्वोपाधिकत्वेन तदभ्युपगतो यो ब्रह्मा हिरण्यगर्भनामा तस्य सृष्टत्वेनाभिहितस्य वेदोपदेष्टुः मह
त्तत्त्वात् प्रागवस्थितस्य तत्सर्जनानुकूलज्ञानेच्छादिमत्त्वस्यावश्यकतया तदानीं बुद्धिवृत्त्याद्यसंभवेन स्वरू
पात्मकज्ञानमादायैव तत्सर्जकत्वस्य त्वयाप्यवश्यं वाच्यतया वेदकर्तृत्वस्यापि तथैव वक्तव्यत्वादत एव ततः स्वदेव
मात्मबुद्धिप्रकाशमित्युत्तरत्र तत्रैव मंत्रे विशेषणं दर्शितं ॥ आत्मभूता स्वरूपभूता या बुद्धिः ज्ञानं सैव प्र-
काशो विषयावभासो यस्य ॥ यद्वा आत्मा स्वरूपं बुद्धेर्महत्तत्त्वस्य प्रकाशो यस्येति तदर्थः ॥ निश्वसितश्रुति

स्तुनवुत्त्पिपूर्वकत्वरूपस्य सर्जनाभिमायाः किंत्वमयाससाध्यत्वाभिमाया ॥ तथा च तद्देवब्रह्मपरमंकवी
नामितिश्रुतिसिद्धबुद्धिपूर्वकवेदकर्तृत्वान्यथानुपपत्त्यास्वरूपज्ञानेनैव सार्वज्ञ्यमवश्यंत्वयाप्यु
पपाद्यमेवेतितुल्योनुयोगः ॥ कथं तर्हि सिद्धान्ते स्वरूपज्ञानस्यातीतानागतादिविषयकत्वमिति चेत् ॥
विद्यमानसर्वविषयकत्वमादायैव स्वस्ववर्तमानतादशायां विषये याध्यासिकतादात्म्यसत्त्वात्तत्सुल
भं तावतानाच सर्वज्ञत्वात् ईश्वरज्ञानस्यापरोक्षत्वमात्रांगीकारिभिः दृशास्यैव सर्वज्ञत्वस्य वक्तव्यत्वात् अन्यस्य
दुर्वचत्वात् अन्यथापरोक्षत्वापत्तेश्च तस्मिन् वेदकर्तृत्वात् सर्वज्ञं ब्रह्मेति न जगज्जन्मादिकर्तृत्वलक्षणस्य
ब्रह्मण्यसंभवः ॥ यत्तु चन्द्रिकायां अत्र परेषां भाष्ये शास्त्रस्य योनिरिति विग्रहमाश्रित्य ऋगादिकारणत्वं
ब्रह्मणः उच्यते पूर्वसूत्रेर्थतो लब्धस्य सार्वज्ञ्यस्य स्फोरणार्थमित्युक्तमित्यस्मन्मतमनूद्य लक्षणानंतरं भव
स्यापेक्षितप्रमाणपरत्वसंभवेन्यपरत्वायोगात् त्वदभिमतमात्राधिष्ठानत्वमात्रेण सार्वज्ञ्यालाभाच्च पूर्वसू
त्रे अर्थतो लब्धस्य सर्वशक्त्यादित्यागेन सार्वज्ञ्यस्यैव स्फोरणे निमित्ताभावाच्च ॥ सांख्याभिमताचेतनकारण
तायाश्चेतनत्वमात्रेणानिषेधसंभवात् ॥ सांख्यानंगीकृतेन शास्त्रयोनित्वेन सार्वज्ञ्यसाधनायोगाच्च ॥
तुल्या शास्त्रयोनित्वं तेन च सार्वज्ञ्यं प्रसाध्य तेन प्रधानस्य कारणतानिषेधाद्वरं श्रुत्यैव तन्निषेधः ॥ जगन्नि
र्माणेनास्फुटीकृतस्य सार्वज्ञ्यस्य तदेकदेशशास्त्रनिर्माणेन स्फुटीकरणायोगाच्चेति तन्नेत्यादिना दूषितं तन्

दापातरमणीयं ॥ ब्रह्मणः सर्वज्ञत्वासंभवान्निरुक्तकारणत्वलक्षणमसंभवीति लक्षणासंभवशंकया असंभ
वदुक्तलक्षणे प्रमाणाभिधानस्यावसराभावात् ॥ जन्मादिसूत्रोदाहृतस्य यतो वेत्यादिश्रुतिरूपस्य प्रमा
णस्यावगतत्वेन प्रमाणाकांक्षाया अनुदयाच्च ॥ त्वयोनिप्रमाण जिज्ञासया सूत्रप्रवृत्तारितं किंतु शिवा
दावनिःश्वासितपारकत्वेनैव ॥ भ्रमाधिष्ठानत्वमात्रं न जन्मादिसूत्रे लक्षणतयाविवक्षितं किंतु कर्तृत्वादिकम
पि ॥ पूर्वसूत्र इत्यादिकमपि न युक्तं सर्वज्ञत्वासिद्धिपरिहाराय शास्त्रकर्तृत्वेन सर्वज्ञत्वसाधनाय शास्त्र
स्य प्रमहत्कार्यत्वबोधकेनास्य महतो भूतस्य निःश्वसितमेतदृग्वेद इत्युदाहरणेन सर्वशक्तित्वस्य सर्वक
र्तृतारूपस्य स्फुटीकरणात् ॥ तथाहि निरुक्तवैदिकप्रपंचोत्पत्त्यनंतरं अयं च लोकः परश्च लोकः सर्वाणि
च भूतान्यस्यैव निःश्वसितानीति लौकिकप्रपंचस्यापि निःश्वसितन्यायेन सृष्टिराम्नाता ततश्च सर्वशक्तित्वम
पि तेन सिद्धमायमेव तदपि शास्त्रयोनित्वसूत्रेण सूचितमेवाहत्य तु नोक्तं तस्य लक्षणासंभवनिरासकस
र्वज्ञत्वसाधकत्वाभावात् ॥ अथवा वेदनित्यत्वात् ब्रह्मणो विश्वयोनितानेति शंकां पराकर्तुं शास्त्रयोनित्व
मुच्यत इति कल्पतरूक्तरीत्या तदधिकरणयोजना या अपि सूत्राणां विश्वतोमुखत्वेन भाष्यसंमततया तस्यां
वेदांशे शंकाविशेषस्यैव शंकांशे निराकरणीयस्याभावाच्च ॥ वेदांशे शंकाविशेषेणाधिकरणयोजना चेत्संत
त्संभवता जन्मादिसूत्रोक्तनिखिलजगत्कारणत्वं न ब्रह्मणः संभवति वाचा विरूपनित्ययेति श्रुत्या जगदंतःपा

तिवेदस्यानित्यत्वप्रतिपादनात् इति पूर्वपक्षे ॥ अस्य महतो भूतस्य निश्वसितमेतत् ऋग्वेद इति श्रुतेर्वेदक-
र्तृत्वमप्यनेन सूत्रेणोच्यते न चापि वेदकर्तृत्वाज्जगत्कारणं ब्रह्मेति नोक्तलक्षणासंभवः ॥ वाचा विरूपनित्यये
ति श्रुतिर्निश्वसितश्रुत्यनुरोधात् तस्मान्नेपानान्तरो वेदा अजायन्त ऋचः सामानि जज्ञिरे इत्यादिश्रुत्यनुरोधा
त् प्रवाहनित्यत्वाभिप्राया ॥ न चानित्यत्वश्रुत्यनुरोधात् निश्वसितोत्पत्तिश्रुत्योराविर्भावार्थकत्वं किं न स्यात् श्रु
तित्वाविशेषादिति शंक्यं ॥ वाचा विरूपनित्ययेति श्रुत्या वेदानां स्वरूपतः नित्यत्वस्य प्रतिपादयितुमशक्यत्वा
त् वर्णानामुत्पत्तिविनाशयोः प्रत्यक्षसिद्धत्वेन वर्णरूपाणां वेदानां स्वरूपतः नित्यत्वासंभवात् वर्णानां नित्यत्वप
क्षेपि न वर्णा एव वेदः अतिप्रसंगात् किंतु क्रमविशेषेण स्वरविशेषेणाविशिष्टा वर्णा एव वेदः नित्यानां विभूनां
च वर्णानां न देशतः कालतो वा क्रमः संभवति स्वरोपि स्थानविशेषाभिव्यक्तिप्रयुक्तो न नित्येषु संभवति किंतु तद
भिव्यंजकध्वन्युपाधिक एव सोंगीकर्तव्यः तस्मात् क्रमविशेषणाक्रमादेस्तदुपाधिभूतध्वनेश्चानित्यत्वात् तथा स्वरूपे
ण वेदस्यानित्यत्वासंभवात् प्रवाहनित्यत्वमेवैतादृशश्रुत्याभिप्रेतमित्यकामेनाप्यंगीकर्तव्यत्वात् ॥ नन्वे
वं वेदस्य पौरुषेयत्वापत्तिरिष्टापत्तौ तन्मूलभूतकर्तृपुरुषज्ञानस्य प्रामाण्याप्रामाण्यसंशये वेदस्यापि संदि
ग्धप्रामाण्यकता स्यादिति तन्निराकरणाय सिद्धांते वेदस्यापौरुषेयत्वे तथैव प्रामाण्याभ्युपगमो विरुध्येतेति
वाच्यं ॥ सिद्धांते अपौरुषेयत्वं तथा वेदप्रामाण्याभ्युपगमेपि निश्वसितश्रुत्या सुप्तोत्थितातिनिपुणोपाध्या

मितिप्रावेनापिसुबोधं ॥ जगत्कर्तृत्वोपयोगिसर्वज्ञत्वासंभवान्नजगत्कर्तृत्वं ब्रह्मणः संभवतीति पूर्वपक्षे वेदक
र्तृत्वेन सर्वज्ञत्वमस्मिन्नधिकरणे सिद्धांत्यते न प्रधानस्य श्रुत्या जगत्कारणत्वनिषेधः श्रौतजगत्कारणत्वस्य
प्रधाने निषेधई क्षत्यधिकरणे सिद्धांत इति न किंचिदेतत् ॥ जगन्निर्माणेनेत्यादिनोक्तं दूषणमपि एतदधिकरणी
यप्रदर्शितपूर्वपक्षसिद्धांतरहस्यदुरवगाहत्वान्निमग्नं नोन्मज्जनमर्हति ॥ जगत्कारणत्वलक्षणेन सर्वज्ञत्वमु
पक्षिप्तं तदेव इदयन्नाह इति शास्त्रयोनित्वसूत्रावतारकभाष्येपि इदं यन्नित्यस्य कारणत्वलक्षणेनापेक्षितस्य सर्व
ज्ञत्वस्यासिद्धिशंकायां तत्सिद्धिमाहेत्येवार्थो विवक्षितः अन्यथा जगत्कारणत्वेन लब्धसर्वज्ञत्वे शास्त्रयोनित्वस्य हेत्वं
तरत्वे पूर्वाधिकरणगुणसूत्रत्वापत्तेरभिमताधिकरणांतरत्वव्याघातात् ॥ अथैवं निखिलवेदकर्तृत्वेन निखिलवेदार्थज्ञ
त्वस्य ब्रह्मणि सिद्धावपि वेदाप्रतिपाद्याधुनिकपुरुषविशेषप्राणिगतपराद्धकसंख्या गंगावालुकावायसादिदन्त
संख्यादिज्ञानासिद्धेः कथं ब्रह्मणः सर्वज्ञत्वसिद्धिरिति चेन्न ॥ अनेन हेतुना तदसिद्धावपि उक्तरीत्या स्वरूपज्ञानेनैवा
तीतानागतविषयज्ञानस्य साधनमात्रेणोपपन्नत्वसिद्धेः ॥ दर्शिताधुनिकपदार्थजातमाध्यासिकसंबंधेनैव —
सकलकार्योपादाने ब्रह्मस्वरूपज्ञाने संबध्यंते न स्वरूपज्ञानेन प्रकाश्यत इत्यत्र विवादाभावात् ॥ शास्त्रयोनित्व
हेतुनापि तत्सिद्धिप्रकारस्य श्रीमद्भाष्यकारैः प्रदर्शितत्वाच्च ॥ तथाहि भाष्यं महत ऋग्वेदादेः शास्त्रस्यानेकविद्यास्थ
नोपबृंहितस्य प्रदीपवत्सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म न हीदृशस्य शास्त्रस्य ऋग्वेदा

दिलक्षणस्य सर्वगुणान्वितस्य सर्वज्ञादन्यतः संभवोस्ति यद्यद्विस्तरार्थं शास्त्रं यस्मात् पुरुषविशेषात् संभव
ति यथा व्याकरणादि पाणिन्यादेर्ज्ञेयैकदेशार्थमपि स ततोप्यधिकतरविज्ञान इति प्रसिद्धं लोके किमु वक्तव्य
मनेकशाखाभेदभिन्नस्य देवतिर्यङ्मनुष्यवर्णाश्रमादिप्रविभागहेतोः ऋग्वेदाख्यस्य सर्वज्ञानाकरस्याप्र
यत्नेनैव लीलान्यायेन पुरुषनिश्वासवत् यस्मान्महतो भूताद्योनेः संभवः अस्य महतो भूतस्य निश्वसितमेतत्
ऋग्वेद इत्यादिश्रुतेस्तस्य महतो भूतस्य निरतिशयं सर्वज्ञत्वं सर्वशक्तित्वं चेति तत्र महत इत्यादि कारणमि
त्यंतं हेतुवाक्यं ॥ नहीदृशस्येत्यादि सर्वज्ञादन्यतः संभवोस्तीत्यंतं व्यतिरेकमुखेन सर्वज्ञत्वप्रतिज्ञा ॥ यद्यद्वि
स्तरार्थशास्त्रमित्यादि ततोप्यधिकतरविज्ञान इत्यंतं सामान्यव्याप्तिप्रदर्शकमुदाहरणं किमु वक्तव्यमित्या
दि संभव इत्यंतमुपनयः ॥ तस्येत्यादि सर्वज्ञत्वमित्यंतं निगमनं ॥ एवं च पंचावयववाक्यप्रदर्शनं सामान्य
व्याप्त्यधीनानुमानेन ॥ वेदार्थातिरिक्तस्यापि आधुनिकपुरुषविशेषपाणिगतवराटकगंगावालुकपायस
दशनसंख्यादिज्ञानसिध्यर्थे ॥ अनुमानप्रकारश्च विवरणाद्याकरग्रंथे दर्शितः ॥ स चेत्थं वेदाः स्वविषयाधि
कविषयकज्ञानवत्प्रणीताः शास्त्रप्रमाणत्वात् पाणिन्यादिशास्त्रवदिति ॥ यद्यपि सूत्राक्षरानुगुण्याय ब्रह्म
वेदविषयाधिकविषयज्ञं वेदप्रणेतृत्वात् इत्येव वाच्यं तथापि फलतो विशेषाभावमभिसंधाय तथोक्तं ॥ क
ल्पतरौ तु दर्शितब्रह्मपक्षकानुमानमेव दर्शितं ॥ ननु स्वविषयाधिकविषयज्ञानवत्त्वमात्रस्य साध्यत्वे स

यवत् अनायासेन मन्वादीन्प्रति स्मृतयथापूर्वकल्पीयानुपूर्वीकवेदाध्यापकत्वरूपवेदकर्तृत्वस्यैव प्रतिपा-
दनेनाधुनिककविवाक्यसंदर्भवत्प्रमाणांतरेणार्थमुपलभ्य तदर्थकापूर्वानुपूर्वीकवाक्यसंदर्भरचयितृत्व-
स्य वेदेऽनंगीकारेण वेदस्य कर्तृज्ञानप्रामाण्यसंशयाधीनाप्रामाण्यसंशयविषयतापादकसंदिग्धप्रामाण्यकत्वा-
पत्त्ययोगात् वेदस्येश्वरकर्तृकत्वेपि तार्किकमत इव प्रमायागुणजन्यत्वेन वेदप्रामाण्यस्येश्वरप्रमामूलक-
त्वमिति त्वनभ्युपगमात् वक्तृप्रमामूलकप्रामाण्यकत्वाभावरूपापौरुषेयत्वोक्तिः सिद्धांताभिप्रेता न विरुध्यते वे-
दस्यानादितात्पर्यवत्त्वोपगमात् योग्यवाक्यत्वेनासति बाधके प्रमाजनकत्वोपगमाच्च प्रामाण्यनिर्वाहः॥ नचैवं शास्त्र-
योनित्वे आधुनिकोपाध्यायादीश्वरस्याविशेषः शंक्यः॥ उपाध्यायांतरानपेक्षविवक्षापूर्वकयथापूर्वक-
ल्पीयानुपूर्वीकवेदकर्तृत्वरूपादिकवित्वात्मकाध्यापकत्वस्यैव निश्वसितवाक्येनाभिधानादाधुनिकसु-
शिक्षितोपाध्यायस्य यथापूर्वानुपूर्वीकस्मृतवेदाध्यापकत्वेपि तदीयवेदप्राप्तेरुपाध्यायांतराधीनत्वेन त-
स्यादिकवित्वाभावात्॥ अष्टादशानामेतासां विद्यानां भिन्नवर्त्मनां आदिकर्ता कविः साक्षात् शूलपाणि-
रिति श्रुतिरिति स्मृत्या ईश्वरस्योक्तरूपादिकवित्वबोधनात्॥ यथापूर्वानुपूर्वीतात्पर्यानुसंधानेनेश्व-
रस्य तादृशवेदकर्तृत्वाभ्युपगमेपि पूर्वकल्पीयानुपूर्वीक्रमादिसापेक्षतामात्रेण न तस्य वेदे स्वतंत्रक-
र्तृत्वहानिः॥ लोके पूर्वरचितकटाकारमनुसंधाय तथाकारं पुनः कटं कुर्वतः शिल्पिनः कटांशे स्वतंत्रक-

तृत्वव्यवहारव्याघातादर्शनात् ॥ एतेनोक्तकल्पतरूक्तसूत्रयोजनामनूद्य अस्य श्रुतीनां परस्परविरोध
परिहारेण पायपद्धिकारमित्यादिसूत्रोक्तैर्भिन्नत्वादिसाधारणहेतुभिर्ब्रह्मेतरसर्वानित्यत्वमितिमतनिपा
दकेयत्कव्यत्वात् ॥ किंच व्यापकेपि पूर्वपूर्वसदृशानुपूर्वीरचयितृत्वस्याभावात् अभिनवानुपूर्वीरचयि
तृत्वादेश्च ब्रह्मण्यभावाद् व्यापकादधिकस्य शास्त्रयोनित्वस्य ब्रह्मण्यसिद्धिरिति चन्द्रिकोक्तं दूषणमनव
काशं ॥ पूर्वाधिकरणोक्तलक्षणासंभवाक्षेपनिरासाय जगत्कारणत्वलक्षणोपक्षिप्तसर्वज्ञत्वासिद्ध्यानो
क्तलक्षणासंभव इति शंकानिरासाय चास्य शास्त्रयोनित्वप्रतिपादनाय वियत्पादीयप्रमेयस्यानिश्चितत्वश्रु
तेर्वेदनित्यत्वश्रुतेश्चाविरोधोपपादनेपि तस्यैतदधिकरणप्रमेयत्वाभावात् ॥ ईश्वरे आदिकवित्वादूपस्य
व्यापकाद्विशेषस्योक्तत्वाच्च ॥ सांख्येत्यादिकं त्वनुक्तोपालंभनं अस्मिन्नधिकरणे सांख्याभिमताचेतनकार
णतावादनिराकरणस्यास्पष्टत्वाद् व्याख्यातृभिरनुक्तत्वात् तस्येक्षत्यधिकरण एवोक्तत्वादिति भाष्यदर्शिनां स्पष्टमे
व ॥ सांख्यानंगीकृतेन शास्त्रयोनित्वेनेत्यादिकमपि न साधु वेदानित्यत्ववादिना सांख्येन पुरुषविशेषशा
स्त्रयोनित्वोपगमात् ॥ योब्रह्माणमिति श्रुतिसिद्धबुद्ध्यधियापूर्वकवेदोच्चारयितृत्वस्याप्यंगीकृतत्वाच्च
॥ परं केवलं देशोपि न जगत्कर्ता अपितु महत्तत्त्वोपाधिको ब्रह्मशब्दवाच्यो हिरण्यगर्भ एवेति तदभिप्रायः ॥
स्पष्टं चेदं सांख्यप्रवचनभाष्यादौ ॥ श्रुत्येत्यादिकमपि दर्शितेतदधिकरणीयपूर्वपक्षसिद्धांतयोरदूषण-

र्थावभासकवेदकर्तृत्वेन पक्षधर्मताबलात् सर्वज्ञत्वसिद्धिर्वेदविषयाधिकविषयकज्ञानवत्त्वमात्रसिद्धेरिति चे-
न्न ॥ वेदविषयाविषयकज्ञानं वेदविषयाधिकविषयकज्ञानोभयस्य साध्यत्वेन विनिगमकाभावाद्धानयतो राद्ध
वेदाप्रतिपाद्याधुनिकपुरुषविशेषपाणिगतवराटकागंगायस्तु कावायसदज्ञानसंख्यादिसाधारणज्ञानत्वस्यापि
सिद्धेः सर्वज्ञत्वसिद्धेर्निष्प्रत्यूहत्वात् ॥ न च सर्वज्ञमित्येव साध्यनिर्देशः कुतो न कृत इति वाच्यं ॥ यथाह्युक्तरार्थज्ञा-
त्वाभिनिमाय्योपदर्शितसामान्यव्याप्तेस्तत्र सामर्थ्याभावात् ॥ केचित्तु वेदकर्तृत्वेनानिश्वसितश्रुतिप्रतिपादित ईश्व-
रः वेदानधीनवेदार्थतदधिकार्थगोचरज्ञानवान् उपाध्यायांतरमनपेक्ष्य निखिलवेदकर्तृत्वात् ॥ मन्वादीनामपि वे-
दार्थतदधिकवर्णावलीविशेषादिज्ञानमस्तीति ईश्वरज्ञानस्य तद्व्यावर्तनाय वेदानधीनेति ॥ सिद्धं वेदं विना वेदा-
र्थतदधिकार्थज्ञानमुपायांतराभावात् स्वशक्तिमादायैव वक्तव्यं तत्रश्च परस्य शक्तिः वेदार्थतदधिकार्थगोचरज्ञा-
नक्षमात्स्याधुनिकपुरुषविशेषपाणिगतवराटकादिसंख्याज्ञानादिकमपि कैमुतिकन्यायेन सिध्यतीति सार्वज्ञ्य-
सिद्धिरिति वदंति ॥ विशेषणप्रयोजनान्याकरे द्रष्टव्यानि ॥ यत्तु चंद्रिकायां वेदाः स्वविषयादधिकविषयकज्ञानव-
त्प्रणीता इति प्रदर्शितविवरणोक्तमनुमानमत्र भामतीविवरणयोरित्यनेनानूद्य तन्न एकार्थमात्रज्ञेन प्रयुक्तस्यानेकार्थकशब्द-
स्याबाधितार्थबोधकत्वदर्शनात् न न्वन्योर्थोऽनतात्पर्यविषय इति चेत्तर्हि प्राशस्त्यपरार्थवादप्रतीतवायुक्षेपिष्ठत्वादि-
संसर्गज्ञं प्रत्यन स्यात् पदार्थज्ञानं विना पदप्रयोगेपि संसर्गज्ञानासिद्धेः ॥ मानांतरसिद्धसंसर्गे अर्थांतरतात्पर्यस्या

प्यभावात् ॥ किंच वेदस्यातत्त्वे तात्पर्ये प्रामाण्यायोगात् तत्त्वे चिन्मात्रे तात्पर्यात् ब्रह्मापि तन्मात्रं स्यात् ॥
किंच प्रत्यक्षादिसिद्धस्य घटादेः निष्प्रयोजनगंगावालुककाकदशानसंख्यादेश्च शास्त्राविषयत्वात् तज्ज्ञं ब्र-
ह्म न स्यात् ॥ अपि च न तावदर्थमुपलभ्य रचयितृत्वं वेदप्रणेतृत्वं पौरुषेयत्वापातात् ॥ नाप्यध्यापकवदुच्चारयितृत्वमात्रं
तेन सार्वज्ञ्यासिद्धेः ॥ किंच त्वव्यतिरिक्तो परदेवपुरुषगोचरस्य भ्रमस्याभ्रांतिसिद्धशरीरादेश्चाभावे उच्चारणा-
योगात् न स्वचासार्वज्ञ्यं विना संभवात् शास्त्रयोनित्वमसार्वज्ञ्य एव हेतुरिति दूषितं तदसत् ॥ यद्यद्धि स्तरार्थं
शास्त्रं यस्मात् पुरुषविशेषात् संभवति स ततोऽप्यधिकतरविज्ञान इति भाष्येण यो यत् शास्त्रकर्ता स तदर्थ-
तदधिकार्थज्ञानवानिति सामान्यव्याप्तेर्विवक्षिताया एकार्थमात्रज्ञप्रयुक्तानेकार्थबोधकाधुनिकलौकि-
कवाक्यांतर्भावेण व्यभिचारस्य कथमपि शंकितुमप्यशक्यत्वात् ॥ यो यद्वाक्यप्रमाणप्रणेता स तदर्थतदर्था-
धिकार्थज्ञानवानिति सामान्यव्याप्तिविवक्षातात्पर्यानुरोधेनाप्युक्तव्यभिचारोद्भावनं न सम्यक् ॥ तथा व्या-
प्तिविवक्षायामपि नाट्यशाल्यामौसाध्ये स्वविषयशाठ्येन स्वप्रयोजकबुबोधयिषाविषयार्थविवक्षापादर्शित-
लौकिकवाक्यांतर्भावेऽव्यभिचारस्यापरंगसंभवात् शास्त्रस्य परार्थत्वादित्याद्युक्तदूषणस्यानवकाशात्
॥ अर्थवादवाक्येऽपि न ह्यन्यवाच्यार्थज्ञानद्वारा शास्त्रस्य बोधो भवति लोकेच्छायाः प्रयोजकत्वात् तद्विषय-
ताया अन्यथानुक्तेऽपि वृत्त्यादिसंसर्गसाधारणत्वात् ॥ मानांतरप्राप्तार्थबोधके हि वाक्ये तदर्थप्रमित्युद्देश्य-

कर्तृत्वरूपमेवं तात्पर्यं नोपेयते न तु केनाप्यनिरूपितोक्तविधविषयत्वमपीति न मानांतरेत्याद्युक्तदूषणावि
चारसहं ॥ ब्रह्माभिन्ने वेदार्थे तात्त्विकप्रामाण्याभावेऽपि व्यावहारिकप्रामाण्याभ्युपगमेन किंच वेदस्याप्तत्वे
त्यादिनोक्तदूषणं बहुशोऽदत्तोत्तरत्वात् चर्वितचर्वणमेव ॥ वेदकर्तृत्वेन वेदार्थज्ञानसिद्धावपि वेदावि
षयाधुनिकपुरुषपाणिगतवराटकगंगावालुकादिसंख्याज्ञानासिद्धौ कथं ब्रह्मणः सर्वज्ञत्वमिति शंका
यां यद्विस्तरार्थशास्त्रमिति सामान्यव्याप्तिबलात् वेदाविषयज्ञानसिध्यर्थमप्रवृत्तानुमाने किंच प्रत्यक्षे-
त्यादिनोक्तदूषणं तूत्सन्नप्रवचनमेव ॥ अपि चेत्यादिकमपि न सत् ईश्वरस्यार्थमुपलभ्य वेदरचयितृत्वेऽपि
धाता यथापूर्वमकल्पयत् इत्यादिश्रुत्यनुरोधेन पूर्वकल्पीययथानुष्ठितवर्णानुपूर्वीतात्पर्यज्ञानाद्यनुसंधा
नपूर्वकतत्समानानुपूर्वीतात्पर्यकवेदोच्चारयितृत्वस्यैव स्वीकारेण भारतादिवत् सजातीयोच्चारणाद्यन
पेक्षोच्चारणकर्तृत्वरूपपौरुषेयत्वस्य वेदे आपादनासंभवात् भारतादेर्हि निरुक्तरूपपौरुषेयत्वं व्यासादि
नाप्रमाणांतरेणार्थमुपलभ्य तदनुसारेणापूर्वां वर्णावलीं मनस्यालोच्य भारतादिकं रचितमिति तादृशा-
र्थप्रतिपादकैर्भारतादिवचनैरेवावगम्यते ॥ चरमं किंच स्वव्यतिरिक्तेत्यादिकमपि न सत् ॥ भ्रांतिसिद्धस्य
शरीरादेः भ्रांतिसिद्धत्वेनावगाह्यमानस्य पारमार्थिकत्वेनानवगाह्यमानस्य भगवज्ज्ञानस्य भ्रमत्वायोगस्य
बहुशोऽद्वैतग्रंथेषु प्रदर्शितत्वेनोक्तदूषणतत्परिहारयोः पिष्टपेषणत्वात् ॥ तथाहि निरुक्तानुमाने वेदकर्तृ

त्वेन वेदार्थज्ञत्व स्य भगवन्नि स्वीकारे स्तेनं मनः शृणोत ग्रावाणः स प्रजापतिरात्मनो वपामुदखिदत् इत्या
दिवेदवाक्यप्रतिपाद्यासदर्थविषयभ्रांतिमत्वमपि ब्रह्मणि सिध्येदित्याशंक्योक्तं कल्पतरौ ईश्वरस्यासद-
र्थविषयकज्ञानवत्वेपि तज्ज्ञानस्य प्रमित्युपयोग्याहार्यज्ञानत्वात् न तेन भ्रांतिमत्वमीश्वरस्य न ह्यभावप्रमि
त्युपयोग्यधिकरणे प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यारोपवंतः पुरुषाः धर्मार्थप्रमित्युपयोगिक्वा
कहं साद्याख्यायिकारचनामूलारोपवंतो वाल्मिकिव्यासादयो वा बालारोग्यसाधनौषधपाने कर्तव्यताप्रमि-
त्युपयोगिबालप्ररोचनार्थं तदभिमतफलांतरोपन्यासमूलारोपवंतश्च पित्रादयश्च भ्रांता इति व्यपदिश्यंते
॥ किंच यत् सत्तानिश्चयरूपं न भवति तेनान्यत्रान्यवैशिष्ट्यावगाहिज्ञानं प्रमाणमिति तदीयभ्रांतिविष
यतया पुरोवर्तिनि रजतत्ववैशिष्ट्यं गृह्णन् भ्रांतिज्ञोऽभ्रांत उच्यत इति ॥ अधिकरणरत्नमालायां तु न कर्तृ ब्रह्म
वेदस्य किं वा कर्तृ न कर्तृ तत् ॥ कर्तृ निश्वसितात्युक्तेर्नित्यत्वं पूर्वसाम्यतः ॥ सर्वावभाति वेदस्य कर्तृत्वात् स
र्वविद्वेदित्यादिरीत्यैतदधिकरणरचनामाहुः साचेत्थं तत्संमता जन्माद्यस्येति सूत्रे अस्येत्यस्य जीवईशो
विशुद्धाचित्तविभागस्तु तयोर्द्वयोः अविद्यातच्चितोर्भेदः षडस्माकमनादय इत्यनेनोक्तानादिषट्कभिन्न
स्येत्यर्थः ॥ तथाच जन्मादिसूत्रे अनादिषट्कभिन्न कर्तृत्वं ब्रह्मलक्षणं विवक्षितं तन्न संभवति अनादिषट्क
भिन्नांतःपातिवेदस्य नित्यत्वात् वाचा विरूपनित्ययेति श्रुतिसिद्धत्वात् इत्याशंक्यास्मिन्नधिकरणे वेदका

रणात्वं श्रुत्यवच्छिन्नेनेतरसाक्षित्वं सर्वज्ञत्वमपि न तस्य चानुमानिकत्वान्न मुखसंगत्यपेक्षा अत एव वेदानि-
त्यत्वमपरस्यापनीयमतादृशैव संगताभिनिवेशकानवकाशः ॥ अथ तत्कथनस्यानुमानिकत्वात् इति तत्र चास्य
महतो भूतस्य निश्वसितमित्यादिवाक्यं ब्रह्मणः स्वतंत्रवेदकर्तृत्वेन सर्वज्ञत्वं प्रतिपादयतीति न वेदनित्यत्वा-
नित्यत्वयोः दर्शितश्रुतिसद्भावात् संशयं न तस्यैव नित्यत्वश्रुतेर्न प्रतिपादयतीति पूर्वपक्षमाह पूर्वार्धेन न कर्तृम-
हवेदस्य किंवा कर्तृन कर्तृनादिति ॥ श्रुतिद्वयसद्भावेऽपि नित्यत्वश्रुत्यैव पूर्वपक्षे पूर्वोपदर्शिता वेदस्य जन्य-
त्वे पौरुषेयत्वापत्त्या संदिग्धप्रामाण्यकत्वापत्तिरित्यादिका युक्तिरेवेहापि विवक्षिता एवं पूर्वपक्षे सिद्धांत-
माह ॥ कर्तृनिश्वसितायुक्तेरिति ॥ अयमत्र सिद्धांताभिप्रायः अस्य महतो भूतस्य निश्वसितमेतद् ऋग्वेद
इत्यादिना वेदस्य निश्वसितत्वमभिधाय वाक्यशेषे अयं च लोकः सर्वाणि च भूतान्यस्यैव निश्वसितानीत्यने-
न लौकिकप्रपंचस्य निश्वसितत्वोक्तेस्तस्यानायासेन जन्यत्वरूपस्यैव मुख्यार्थबाधेन लक्षणया तत्साध्या-
हृदस्यापि तादृशनिश्वसितत्वस्य प्रत्यक्त्वादेकस्मिन् वाक्ये एकपदस्याभिन्नार्थत्वकल्पनायोगात् पूर्वोपद-
र्शितपुनःश्रुत्यापेदे मुख्यनित्यत्वस्याप्यसंभवाच्च प्रवाहनित्यत्वाभिप्रायैव नित्यत्वश्रुतिः तदिदमुक्तं नित्यत्वं
पूर्वसाम्यतइति ॥ तथा च वेदस्य स्वतंत्रेश्वरकर्तृकत्वेऽपि पूर्ववदेवानुपूर्वीविषयापूर्वकं सजातीयोच्चारणापे-
क्षोच्चारणकत्वरूपापौरुषेयत्वोपपादनेन संदिग्धप्रामाण्यकत्वदोषनिरासः आदिकवित्वेन चाधुनिका

व्यापकादिदोषइति ॥ एतेनैवास्य महत इत्यादिवेदवाक्यं ब्रह्मणो वेदकर्तृत्वेन सर्वज्ञत्वं न साधयति वेदस्य सापेक्षत्वप्रसंगादिति पूर्वपक्षे ॥ साधयति अर्थमुपलभ्य रचयितृत्वस्याभावात् उच्चारयितृत्वमात्रस्य च सापेक्षत्वानापादकत्वादिति परेषामधिकरणमपास्तमिति चंद्रिकोक्तमपास्तं ॥ अव्यापकादिदोषस्य दर्शितत्वात् विपक्षापूर्वकं सजातीयानुपूर्वीकवेदोच्चारयितृत्वस्यास्मत्पूर्वाचार्यग्रंथेषु लिखितत्वादस्मत्सिद्धांतसेनार्थमुपलभ्य रचयितृत्वाभावादिति लेखनं प्रमादिकमेव ॥ नचैवं वेदकर्तृत्वे सिद्धेपि कथं जन्मादिसूत्रोक्तलक्षणाक्षिप्तं सर्वज्ञत्वं ब्रह्मणः सिध्यतीत्यत आह सर्वावभासीति वेदस्य कर्तृत्वात् सर्वविद्भवेदिति ॥ सर्वजगद्व्यवस्थावभासककार्यभूतवेदगताशक्तिरुपादानकारणीभूतब्रह्मगतसर्वावभासकशक्तिं दीपगतप्रकाशनशक्तिर्दीपकारणवह्निगतप्रकाशनशक्तिमिव कल्पयति कार्यकारणयोरेकशक्तित्वादिति वेदकर्तृत्वेन ब्रह्मणः सर्वज्ञत्वं सिध्यतीति सिद्धांताभिप्रायः सम्बन्धाधिकरणादौ ॥ यत्तु चंद्रिकायां विवरणे तु यथा दीपगताप्रकाशनशक्तिस्तदुपादाने वह्नौ तथा वेदगतसर्वप्रकाशनशक्तिस्तदुपादाने ब्रह्मणि कार्यकारणयोरेकशक्तित्वादिति निरुक्तमर्थमनूद्य तन्न कारणेअदृष्टस्यापि शक्तिविशेषस्य कार्ये दर्शनात ॥ किं च तन्मते अंधकारदहनादेरपि ब्रह्मोपादानकत्वात् तद्गतप्रकाशनसहादिशक्तिमत् ब्रह्म स्यात् अधिष्ठाधिशास्त्रोपादानमिति साधि सर्वज्ञास्यात् ॥ किंच परिणामिपरिणा

मयोरेकशक्तिमत्त्वेपि कथमधिष्ठानाध्यस्तयोरुक्तम् ॥ एतेनाधिष्ठानस्य ब्रह्मणोपि ज्ञानशक्तिविवर्तत्व
पंशात्ममिति निरस्तं ॥ अविद्याकाशादेरपि तद्विवर्ततया शास्त्रवत् सर्वप्रकाशकत्वापातात् रज्ज्वा अपि
सर्पकंपादिशक्तेर्ब्रह्मण्यध्यारोपणशक्तेः प्रसंगात् ॥ शास्त्रागमानामपि ब्रह्मविवर्ततया तदर्थज्ञत्वे ब्रह्मणो भ्रांत
त्वप्रसंगाच्च ॥ अपि च तथा कार्योपादानयोरेकशक्तित्वस्योक्तत्वात् वेदः स्वयमज्ञ एव ज्ञानात् प्रतिप्रका
शक इति प्रसाधितया स्यात् तथा च सार्वज्ञ्यार्थं यत्ने अत्यंतासार्वज्ञ्यमेवापन्नं ॥ किंच जन्मादिकारणत्वेन
योपलक्षणेनोपलक्ष्यस्वरूपसिद्धेः किं निर्विशेषत्वमतिकूलसार्वज्ञ्यस्वीकरणेनेति दूषणमुक्तं ॥ तत्रेदं व
क्तव्यं कार्यकारणयोरेकशक्तिमत्त्वमित्युत्सर्गः स च सति बाधकप्रमाणे न प्रवर्तते तदनवतारे च तत्प्रवृत्ति
र्निराबाधैव परगतोदकाहरणादिशक्तेर्मृत्पिंड इवाधिकारगतावरणशक्तेः स्वप्रकाशरूपत्वेन श्रुतिश
तसिद्धे ब्रह्मण्यापादनायोगः दृष्टांते प्रत्यक्षविरोधरूपबाधकस्येवात्रापि स्वप्रकाशत्वबोधकश्रुतिश
तविरोधरूपबाधकसत्त्वात् एवं च बाधकाभावादौत्सर्गिकनियमेन ब्रह्मणि वेदगतसर्वार्थप्रकाशनश-
क्तिः सिध्यंतीनापह्नोतुमुचिता ॥ यद्वा वेदगता प्रकाशनशक्तिः स्वाश्रयोपादाननिष्ठाप्रकाशनशक्तित्वा
त् या या प्रकाशनशक्तिः सा सा स्वाश्रयोपादाननिष्ठा दीपगतप्रकाशनशक्तिवदिति विशेषनियम एव का
र्यकारणयोरेकशक्तित्वादित्यनेन विवक्षितः नानोजलाहरणादिकमादाय व्यभिचारावकाशः कार्यकार

णयोरित्यस्योपादानोपादेययोरित्यर्थः उपादानत्वं च कार्याभिन्नत्वं एवं चावरणानुपपत्त्यानीहारेण प्रा
वृता इत्यादिश्रुतिप्रमाणानुभवादिना सिद्धेऽज्ञाने प्रकाशनशक्तेर्विधानत्वस्याः तदन्यथैवोपादाननिष्ठत्वसिध्या
फलतो ब्रह्मणः सार्वज्ञ्यसिद्धिर्निराबाधैव ॥ एतेनाविद्यापि शास्त्रोपादानभिन्ना सापि सर्वज्ञा स्यादिति दूषणं नि
रालंबनमेव तथा किंचेत्याद्यपि ॥ अधिष्ठानस्य ब्रह्मणो विज्ञानशक्तिविवर्तरूपं शास्त्रमित्येतदर्थकः तस्यै
वं विज्ञानशक्तिविवर्तत्वान्नामरूपप्रपंचस्येति पंचपादिकाग्रंथोप्युक्तविशेषनियमाभिप्रायः ननु यो योऽज्ञा
नशक्तिविवर्तः स तदीयप्रकाशनशक्तिमानिति नियमाभिप्रायस्तथैव विवरणे तदभिप्रायवर्णनादिति
एतेनेत्यादिनोक्तदूषणमपि निरालंबनमेव ॥ शास्त्रागमानामपीश्वरादिकं तु न विचारसहं तथाहि किं शास्त्रा
गमार्थोऽत्यंतमसंतः किं वा अनिर्वचनीयः किं वा शास्त्रागमजन्यं ज्ञानमन्यथाख्यातिरूपमिति वा तथानुमतं
येन ब्रह्मणो भ्रांतत्वमापाद्यतेऽस्य येष्टापादकं असदर्थप्रकाशनशक्तिमत्त्वमेवेति चेन्न प्रकाशनशक्तिप
देन तत्तदर्थव्यवहारे कारणतावच्छेदकमुद्राप्रयोजकं तत्तदर्थविषयकत्वं विवक्षितं कारणतावच्छेदक
धर्मस्यापि शास्त्रनिष्ठावच्छेदकतया शक्तिव्यपदेशयोग्यत्वात् तादृशविषयकत्वं शब्दस्य व्यापारानुबंधिविषयक
त्वस्वीकारात् ॥ वेदस्यानादेः शक्तिमत्त्वमक्षतमेव तस्य प्रकाशः शास्त्रनिरूपब्रह्मणोपि मायावृत्तिद्वारकमाकारा
ख्यविषयताऽऽदि विशेषनिरूपकत्वरूपं तत्तदर्थविषयकत्वं विद्यमानमात्मस्य सर्वार्थनिरूपिताध्यासिकतादात्म्या

परपर्यायमज्ञानमेव ॥ एतेनासदर्थनिष्ठाकारताख्यातिविषयतानिरोधाभिन्नप्रकृतस्य ब्रह्म-
गमार्थकथंचिद्विद्यमानस्यापि असत्त्वाद्बोधकप्रमाणज्ञानादिसंबन्धतदुपादानेऽब्रह्मवचनं नीकारात् ना-
सदर्थविषयकत्वमप्यसदर्थनिष्ठाज्ञानशक्तिमत्त्वमिति कथं तेन भ्रांतत्वापादनं ॥ अस्तु बाधकं चेदिदं सदर्थविष-
यकत्वं ब्रह्मणः न भाव्यस्तोऽप्यर्थान्तरत्वेनावगाहमानस्य मायावृत्तिरूपब्रह्मज्ञानस्य परमतायोगेन नेश्वर-
स्य भ्रांतत्वापत्तिः ॥ एतेनाद्वितीयपक्षोऽपि निरस्तः अनिर्वचनीयत्वेनज्ञानतो मायानो शुक्तिरजतमनिर्व-
चनीयमिति ज्ञानतामन्येषामपि भ्रांतत्वापादनायोगात् ॥ न तृतीयः ॥ वेदगतायाः शब्दविशिष्टार्थ-
प्रकाशकतायाः शक्तेः सा सर्वापि स्वाश्रयोपादाननिष्ठा विशिष्टार्थप्रकाशनशक्तित्वादिति नियमस्यैवो-
क्तभंग्याधिकरणात्वास्त्वागमजन्यप्रतीतिविषयो यादृशविशिष्टार्थस्तादृशविशिष्टार्थप्रकाशनशक्तिमति
ब्रह्मणि न भ्रांतत्वापत्तिरापादकाभावात् ॥ अपि चेत्यादिकमप्ययुक्तं कार्योपादानयोरेकशक्तिमत्त्वमित्यु-
क्तेऽपि कार्योपादानयोरेकधर्मत्वानुक्तेः कथं नेदस्याज्ञत्वं ब्रह्मणोऽज्ञत्वापत्तिः अज्ञत्वस्य शक्तिरूपत्वाभावात् ॥
कार्योपादानयोरेकशक्तिमत्त्वमिति कार्योपादानयोरेकधर्मत्वमिति वा उत्सर्ग एव न नियम इति पूर्वमेवापादि-
तत्वादुत्सर्गस्य च बाधकाभाव एव प्रवृत्तेः सर्वज्ञत्वबोधकश्रुतिविरोधादेव वेदगताज्ञत्वबलात् न ब्रह्मणि त-
त्प्रसंगः ॥ किं चेत्यादिकं तु जन्मादिसूत्रोक्तं कारणत्वलक्षणं न संभवति तदुपपादकसर्वज्ञत्वस्य ब्रह्मण्य

समन्वयादिति पूर्वपक्षनिरासाय कारणत्वोपयोगि सर्वज्ञत्वं वेदकर्तृत्वात् समर्थ्यत इति पूर्वापरदर्शितपूर्वप
क्षसिद्धांतरचनामसमंजसमित्याचख्युः केचन मुधेच्छामात्रमिति सुधियो विदांकुर्वंतु ॥ आनंदतीर्थीयास्
तु पूर्वसूत्रोक्तजगज्जन्मादिकारणत्वलक्षणस्यातिव्याप्तिनिरासकं विष्ण्वेकनिष्ठलक्षणप्रमाणप्रतिपाद
नपरं सूत्रमिति वदंति तथाहि चांद्रिकायामुक्तलक्षणस्यातिव्याप्तिनिरासाय प्रमाणमुच्यत इति संगतिमुक्त्वा
जगत्कारणत्वं किंचिज्ज्ञोरेवोतान्यस्यापीति चिंतां प्रदर्श्यानुमानेन रुद्रादीनामपि जगत्कारणत्वासिद्धेरति
व्याप्तिरिति पूर्वपक्षयित्वा चक्षुरादिवद्वाऽकंरसगंधादिवस्तुषु ॥ अनुमापितयाऽवाक्ता धर्मब्रह्मादिवस्तु
ष्वित्यादिना विष्ण्वेकनिष्ठजगत्कारणत्वे शास्त्रप्रमाणके अनुमानं न प्रमाणं कार्यत्वादिहेतूनामन्यथानिरा
सात् नावेदविदिति श्रुत्या जगत्कारणे अनुमानप्रामाण्यनिरासाच्चेति सिद्धांतः कृतः ॥ तत्रेदमुच्यते कथं रुद्रा
देः जगत्कारणत्वमनुमानेनाशंक्यते तत्राप्रवृत्तिकारणताग्राहकानुमानानुपलंभात् ॥ ननु कार्यं सकर्तृ
कं कार्यत्वात् घटवदित्यनुमानेन तत्सिद्धिः संभवतीति तेन सामान्यतः कर्तृसिद्धावपि विशिष्य रुद्रः कर्ता इ
त्यस्यासिद्धेः ॥ यत्तु नावेदविन्मनुते तं बृहंतमिति श्रुत्या विष्णोरनुमानगम्यत्वनिषेधान्निरुक्तानुमानं वि
ष्णुव्यतिरिक्ते रुद्रादावेव जगत्कर्तरि परिशेषात् पर्यवस्यतीति चंद्रिकायामुक्तं तदसत् ॥ एवं सति एको ह वै
नारायण आसीन्न ब्रह्मा नेशान इत्यादिमहोपनिषदस्थश्रुत्या नारायणात् ब्रह्मा जायते नारायणाद्रुद्रो जा

पत इत्यादिना तत्र गौणानिवर्तकस्य मुख्यत्वेन कारणत्वाद्यनुमानबाधोऽभिमुखत्वात्तदादेः ... पत्नी
त्वकार्यत्वाद्योनिरिति ... सर्वज्ञत्वसिद्धेरनुमानस्य ... वेदकर्तृत्वस्य ... सम्भवात् ॥ यद्यपि श्रुतिमनादृत्या
गमं सहायीकृत्यानुमानापष्टंभेन ... श्रुतिमितिरस्यापि जगत्कारणत्वस्यांगीकारेण ...
धर्मिकमताद्यनेनावगत पूर्वपक्षमपूर्वनिरासेन ... अनुमानिककारणत्वं तु न संभवति तस्य प्रा
माण्यबोधकश्रुतेरनुमानसहायत्वासंभवात् ॥ यद्वा यदा तमस्तन्नादिवा न रात्रिर्न सन्न चासच्छिव एव केव
लइति श्रुतिविरोधेन एको ह वै नारायण आसीदिति श्रुतेरर्थान्तरपरत्वं मर्थवादत्वं वांगीकृत्य पूर्वपक्षसंग-
तः उक्तं च चंद्रिकायां न च विष्णोरन्यस्य कारणत्वनिषेधकउदाहृतश्रुतिविरोधः तासामुक्तयुक्तिविरोधेन
विष्णोः कारणत्वादिविधिपरत्वादिति तदसत् ॥ शास्त्रानादरेण पूर्वपक्षे शास्त्राप्रामाण्यवादिनं पूर्वपक्षिणां
शास्त्रैकप्रमाणतामधिगम्य विशेषैकनिष्ठजगत्कारणत्वस्य शास्त्रयोनित्वेन तदसिद्धेन सिद्धांतकार
णायोगात् चंद्रिकाकर्तुस्तदनभिमतत्वाच्च पूर्वपक्षस्यनाभिमतेन हेतुनासिद्धांतकरणस्य तदनुमतत्वे अ
त्रपरेषां भाष्ये शास्त्रस्य योनिरिति विग्रहमाश्रित्य ऋग्वादिकारणत्वं ब्रह्मण उच्यते पूर्वसूत्रेर्थतो लब्धस्य सार्व-
ज्ञस्य स्फोरणार्थमित्युक्तमित्यस्मन्मतमनूद्य दूषणेषु सांख्यानंगीकृतेन शास्त्रयोनित्वेन सार्वज्ञ्यसाधनायोगा
त्तिदूषणस्य स्वशिरस्ताडनरूपतापत्त्योन्मत्तप्रलपितत्वापत्तेः ॥ यद्वा यदा तमस्तन्नादिवा न रात्रिरित्या

दिना पूर्वपक्षमप्रवृत्त्युपपादनमपि न संतत् ॥ तदीयोद्धोषरीत्या निरवकाशनारायणश्रुतेः योगादिना सावकाश-
शिवपदादिघटितश्रुत्या अर्थांतरपरत्वस्यत्वत्पूर्वपक्षिणा शंकितुमशक्यत्वात् नारायणपदस्य निरवकाश-
त्वं योगादिना नारायणशब्दस्यान्यपरत्वेनत्वानुपपत्तिरिति त्वदीयैरुद्धोषात्तव संमतं न विस्मरणार्हं नहि नारा-
यणशब्दस्य निरवकाशत्वमेतदधिकरणसिद्धांतयुक्तिर्वेनाभिमतं येन तदाच्छाद्य पूर्वपक्षमप्रवृत्तिः स्यात् ॥ य-
दानमइत्यादीनामपि शिवस्य कारणत्वविधिपरत्वेन शिव एव केवल इत्यादेरप्यर्थवादपरत्वस्य वक्तुं शक्य-
त्वेन विनिगमकाभावेन किमनुरोधेन कस्यार्थांतरत्वमित्यनिर्णयेन पूर्वपक्षाप्रवृत्तेर्दुर्धरत्वात् ॥ किंच श्रुत्यना-
दरेण पूर्वपक्षे नावेदविदित्यादिश्रुत्या विष्णोरनुमानगम्यत्वनिषेधाभिरुक्तानुमानं विपक्षव्यतिरिक्तेरुद्रादावेव ज-
गत्कर्तारि परिशेषात्पर्यवस्यतीति चंद्रिकायां पूर्वपक्षस्याशयवर्णनमत्यंतासंगतमेव स्यात् एको ह वै नारायण
इत्यादेः शिव एव केवल इति श्रुत्यनुरोधेनार्थांतरपरत्वाभिप्रायेण पूर्वपक्षेनेजसा सौम्ययुंगेन सन्मूलमन्विच्छ
पंडितो मेधावी गांधारानेवोपसंपद्यते एवमिहेत्यादिश्रुतिभिरीश्वरस्यानुमानगम्यत्वस्याप्युक्तेर्नावेदविदि-
त्यस्या अप्यर्थांतरत्वसंभावनायामुक्तानुमानेन रुद्रपरिशेषस्य पूर्वपक्षिणा वक्तुमशक्यत्वात् ॥ यदपि शिवो
जगत्कर्ता सर्वज्ञत्वादित्यादिना व्यतिरेकिणानुमानेन विशिष्य शिवादिर्जगत्कर्तेति सिध्यतीति चंद्रिकाया
मुक्तं तदपि न सत् ॥ सर्वज्ञः सुगतोऽस्त्वित्यादिना सर्वज्ञत्वमसिद्धं बुद्धसाधारण्यात् सर्वज्ञत्वहेतोर्जगत्कारणत्व

व्यभिचारित्वात् भ्रांतिज्ञानजीवनिष्ठस्य सर्वज्ञत्वस्य प्रत्यक्षादिविषयत्वेन न व्यभिचारः ॥ नन्वेवं योगिप्रत्यक्षमपि
ज्ञात्वादिकमेव सर्वविषयकमिव ज्ञानादिकं सर्वपदेनाभिमतं तु न स्मृतिर्न तदनुभवः सर्वविषयकं योगिनां तु स्यादेव
तेषां सर्वविषयकज्ञानस्य योगजधर्मनिमित्तकत्वेन जन्यत्वात् कथं नित्यत्वं प्रतिपादितं क्लृप्तादिकं च तस्यापि
द्धमिति आगमसहायेन पूर्वपक्ष इति चेन्न तथाप्यनित्यत्वस्य नित्यत्वे दोषप्रसंग इति चेत् नानित्यत्व
नवकाशादोषप्रसंगादिति द्वितीयाध्यायस्थसूत्रस्यापि कारणेनास्य योनित्वस्य प्रसंगः सर्वज्ञत्वं प्रतिपादितमागमे
न ॥ शिवस्यैव जगत्कर्तृत्वं न विष्णोरिति पूर्वपक्षयित्वा आगमप्रमाणादिभिर्जगत्कारणत्वं प्रतिपाद्य श्रुति
सद्भावेऽपि वेदोक्तजगत्कर्तृत्वं विष्णोरेवेति निर्णीतं भासितं च तत्करणात् ॥ वस्तुतस्तु भगवान् नानुपपन्नो वास्तवं संज्ञ
संज्ञिभावसंबंधमापकस्यानुपलम्भादेः सर्वज्ञत्वसाधकत्वं अन्यथा कोशेन वाजिकर्णादिरूपज्ञानादेरपि सिद्धेरिति
तिनोक्तसर्वज्ञत्वहेतोर्जगत्कर्तृत्व अभिचारित्वात् सर्वविषयकलौकिकज्ञानवत्त्वरूपसर्वज्ञत्वस्यैव हेतुत्वेन
योगिज्ञानेविषयताविशेषात्मकलौकिकत्वस्याभावेन न दोष इति हेतौ योगिषु सत्त्वेऽभावाभावाद्युक्तसर्व
ज्ञत्वहेतोरुक्तसाध्यव्यभिचारितापि तु तस्य सर्वविषयकज्ञानस्य योगजधर्मनिमित्तकत्वेन जन्यत्वस्य कथनं प्र
मादिकं विध्यवतारेण संभवात् प्रसिद्ध्यं वस्तुतः स्वनयमायतारत्वमिति तदसत् ॥ विष्णुर्नारायणः कृष्ण
इत्यादिसंज्ञासंज्ञिभावसंबंधबोधकेनापि कोशेन व्यापकतारूपस्य कृषिर्भूवाचकः शब्दोऽणश्च निर्वृतिवाच

कः आपो नारा इति प्रोक्ता इत्यादिनोक्तयोगार्थबोधस्य सकलाभियुक्तसंमतत्वेप सर्वज्ञः सुगत इति कोऽपि
नासति बाधके सर्वज्ञत्वबोधनस्य निरपवादनयात्ता इत्यकोऽपास्य बुद्धादेः सर्वज्ञत्वे प्रमाणत्वानपादात्
प्रत्यक्षबाधेन न वृक्षादीनां कोऽपि न शाखिकर्यादिसिद्धिः ॥ योगिनामतीतानागतसर्वपदार्थपरोक्षज्ञा-
नस्य योगशास्त्रसिद्धस्य तत्संतानरसिद्धस्य चापकपापा योगेन तदीयसर्वविषयकज्ञाने लौकिकत्वाभावोक्तिः-
प्रमादिकै तज्जगत्कारणत्वलक्षणाव्यवस्थेयुद्धादौ सर्वज्ञत्वहेतोर्व्यभिचारवारणाय विवक्षितसर्वविषय
कनित्यज्ञानवत्त्वहेतोर्बुद्धादावसिद्धिः कथनायैव बुद्धज्ञानस्य जन्यत्वोक्तेर्विषय यतोऽरेत्त संभवोपि नस्यो
क्तलक्षणलक्ष्यत्वेन तत्र जगत्कारणत्वसत्त्वेनव्यभिचाराभावकाशात् भ्रकृतानां गत्यभावेन न दुक्तेः भा-
मादिकलौकिकैव प्रमादिका ॥ यद्यपि सर्वज्ञत्वेन जगत्कारणत्वे कद्वे तु नीयमाने योगिनामपि पक्षकुक्षौ
निक्षेपेण पूर्वपक्षे कथं तत्र व्यभिचारोद्भावनं नाहि भिन्नत्वेन जगत्कारणत्वाभिति पूर्वपक्षः अपि तु शक्तिसू
र्यादीनामपि तदधिमंदं ॥ सर्वज्ञत्वादेकं कंदत्वागमसिद्धं किं त्वागमस्य ज्ञायेनाथ पूर्वपक्ष इति प्रकृत्त व
यौ वा धागमानामिप्रयाशक्षयाथागमाजासुपगमे मतेपि सर्वज्ञत्वहेतुनाशक्तिसूर्यादीनां पक्षकोटिनिवे
शेन नभाति व्याप्तिपूर्वपक्षस्य मद्दीयानां संमतत्वेपि योग्यताविभागात् जुपगमे न योगिनां पक्षकोटिनिवेश।
स्त सर्वीयासंमतत्वात् अन्यथाकारणत्वस्य शास्त्रयोनित्वे पि वेदेपि कृतिकर्त्तृकदालीनां जगत्कारण

त्वप्रतिपादनात्तज्ज्ञानकारणत्वस्य शास्त्रस्य कथमाघाति व्याप्तिरित्याशङ्क्य तेषां सम्यक्प्रवृत्त्यर्थं स्मात् उपक्रमादिनालर्यै
लिंगानुपात्तस्यान्यथावृत्तिव्युदासेनकर्तृत्वं यावेदप्रतिपादनस्य रुद्रादिरन्यथाप्रतिपत्तिः ज्ञानमूलेति सिद्धांतकरणार्थं
चां तु रुद्रादीनामिव योगिनां वेदज्ञानकारणत्वेनाप्रतीतेः शास्त्रप्रमाणकज्ञानकारणत्वं न कणास्य तथाति
व्याप्त्यप्रसक्तेः तथा हिरण्यगर्भादिकार्याकारणत्वस्य शास्त्रयोनित्वे व्याप्तिव्याप्तिः कार्यस्य व्याख्यानात्कालस्यैवपवेदव्या
ख्यानदृष्टत्वाद् शैवागमात् नानां तत्कारणत्वं तथा तु रुद्रादेः कारणत्वेऽपि दृष्टत्वं सर्वेभिःफलं नाशाशिवं ज्ञाति
मत्त्वं तमेतीत्यादिशास्त्रस्य मोक्षहेत्वादिना शिवपरत्वात् सर्वे वेदा यत्पदमामनंतीत्यादिश्रुतेः शिवेनात्सर्व-
मित्येवं परतया आगमैरेव व्याख्यातत्वाच्चेति सम्भवस्याधिकरणे पूर्वपक्षो दर्शितः ॥ तत्सम्प्रकाशिकायामपि
रुद्रादीनामपि कारणत्वेन शास्त्रयोनित्वं पाशुपतादिशास्त्रेषु रुद्रादिज्ञानकारणत्वेन वेदवेद्यहृतिनिग-
दितत्वात् ॥ न च तेषामप्रामाण्येन न साधकत्वं वेदपितेषां कारणतया प्रसिद्धप्रमाणत्वात्प्रतीतिसप्रीचीनस्य
च प्रामाण्योपपत्तेरिति पूर्वपक्षो दर्शितः ॥ तथा च योगिनां पक्षकुक्षौ निवेशेन पूर्वपक्षोपपादनं स्वकीयग्रंथा
नालोचननिबंधनमेवेति तद्विदां स्पष्टं ॥ यदप्युक्तं व्यभिचारः निर्दुष्टानुमानेनैव पूर्वपक्षप्रवृत्तिरिति नियमा
भावात् तथा सति सिद्धांतानुपपत्तेरिति तदपि न सत् ॥ निर्दुष्टचक्षुरादेरपि यथा रसगंधादिग्रहणेन शक्तिस्त
था व्यभिचारदोषरहितानुमानस्यापि नियतप्रामाण्यकश्रुतिसाहाय्याभावे यत्नेन साधितोऽप्यर्थः कुशाग्रैर

तुमानुमितिः॥ अतो सृष्टिमतान्येनान्यथैवोपपाद्यत इति रीत्या मतिपक्षसंभावनया अनियतप्रामाण्येन
अचिंत्याः खलु ये भावा न तांस्तर्केण योजयेदिति भारतोक्तेश्च तर्कागोचरचिंत्यपरब्रह्मणि कारणे-
शास्त्रिर्नास्तीत्यनेनैव सिद्धांतोपपत्तेश्चक्षुरादियथा शक्रं रसगंधादिवस्तुषु अनुमापितथा शाका धर्मब्रह्मादिव
स्तुषु इत्यनेन तथैवतत्त्वदीपैः सिद्धांतकरणाच्च व्याप्तिपक्षधर्मताद्यव्यभिचारदूषणानुमाने नास्ति व्याप्तिपूर्व
पक्षकरणस्यात्यंतमनुचितत्वात्॥ यत्तु आगमसिद्धसर्वविषयकनित्यज्ञानस्वरूपसर्वज्ञत्वहेतुके आ-
गमसहायेन रुद्रादेरन्यजगत्कारणत्वे नास्ति व्याप्तिपूर्वपक्षेपि नस्मृत्यधिकरणेनास्य पौनरुक्त्यं॥ अत्र कर्तृत्वं
विष्णोरन्यस्य वेति संदिह्य विष्णोरेवेति सिद्धांत्यते स्मृत्यधिकरणे तु विष्णोर्जगत्कर्तृत्वं युक्तमयुक्तं वेति संदि-
ह्य युक्तमिति सिद्धांत्यत इति विषयभेदादिति न तत्रापि द्विकायामेवं एकेनैव सिद्धांतेन श्रुत्यर्थाभ्यां युक्तसंदेह-
यमूलक पूर्वपक्षद्वयनिरास संभवे संदेहप्रकारभेदमात्रेणाधिकरणभेदानौचित्यादन्यथातिप्रसंगात् आ-
गमविरोधपरिहाराभावस्येव स्मृत्यनंतर्गतयुक्तिविरोधपरिहाराभावस्य तत्र सत्त्वेन द्वयोः सार्थक्याच्च एते-
न समयपदगानंतत्र संदेहबीजमत्र तु पूर्वन्यायप्रक्षिप्ताशेतिनिरस्तं निरस्तं चाथार्थात् आगमप्रामाण्यनि-
रासेपि कुंठकत्वानिरासात् पुनरुक्तिरिति कंठतो निषेधविरोधानुपलंभात् अन्यथा अनुमानस्यापि कुंठतः कारण

सामान्यनिषेधाधिकरणांतरारंभप्रसंगः प्रत्याशानुमानागमयोर्द्वयोर्निषेधस्तत्र [illegible] त्वेन

रुक्त्यामिति वाच्यं तथापि तेनास्यागमनिरासांशेऽपौनरुक्त्यापरिहारात् अनेन तस्य [illegible] परिहारेऽप्यस्या

दिना तत्र दूषणोक्तेः ॥ असंभवपर्यवसायिनः तदयुक्तत्वस्यैव प्रथमं निरासौचित्यात् अतिव्याप्तिपर्य सा-

यिनोऽन्यत्र तत्त्वस्यानंतरमेव निरसितुं युक्तत्वाच्च ॥ यत्तु असंभवनिरासस्य प्रथमं आप्तत्वेऽपि द्वितीयाध्या-

यादिनासंगत त्वात् तत्रोक्तेरसंभवस्य प्रथमं निराकरणमतिव्याप्तेरैव नियामकाभावाच्च प्रत्युत तल्लक्ष

णप्रयोजनेतरभेदानुमितिजनकव्याप्तिपक्षधर्मताविषयकपरामर्शे प्रथमोपस्थितव्याप्तिनिर्वाहकातिव्या

प्तेरादौ पक्षधर्मतानिर्वाहकासंभवपरिहारस्यानंतरमेव कर्तुमुचितत्वाच्चेति तदपि मंदं ॥ असंभवनिरासस्य

प्रथमं कर्तुं योग्यत्वे प्रथमाध्याये तदकरणेन तस्य द्वितीयाध्यायसंगतत्वकरणानौचित्यापरिहारात् लक्षण

दोषेषु वक्तव्येषु सति संभवे प्रथमं असंभवोद्भावनस्यैव न्यायवित्संप्रदायसिद्धत्वेन तस्यैवासंभवनिराकर

णप्राथम्ये गमकत्वात् व्याप्त्यादिलक्षणे असंभवाव्याप्तिदोषद्वयसंभावनायामसंभवोऽव्याप्तिश्चेति सामान्य-

निरुक्तिपंचलक्षणीचतुर्दशलक्षणांतर्गतद्वितीयस्वलक्षणप्रथमभिन्नलक्षणादिषु गदाधरेण स्वेनैतत्

द्गमकस्य तद्विदां स्पष्टत्वात् व्याप्तिपक्षधर्मताविषयकपरामर्शे व्याप्तेः प्रथममुपस्थितत्वेऽपि पक्षे हेतुज्ञाना

धीनव्याप्तिस्मृत्यात्मकव्याप्तिविशिष्टहेतुज्ञानाधीनविशिष्टवैशिष्ट्याहि परामर्शनिर्वाहकत्वेन हेतौ पक्षध

र्मतायाव्यासेः पूर्वमेवोपस्थित्यपेक्षणेन तन्निर्वाहकासंभवपरिहारस्यैवोक्तगमकेन कर्तुमौचित्याच्चेति न
किंचिदेतत् ॥ यत्तु चंद्रिकायामागमसिद्धसर्वज्ञत्वादिहेतुना रुद्रादेरेव जगत्कर्तेति पूर्वपक्षे स्मृत्यधिकरणे-
पौनरुक्त्यमाशंक्य स्मृत्यधिकरणे पाशुपतादिस्मृत्या पूर्वपक्षे पांचरात्रादिस्मृत्या सिद्धांतः इह तु स्मृत्यनु
मानाभ्यां पूर्वपक्षे श्रुत्यादिरूपशास्त्रेण सिद्धांतः अत एव तत्र सूत्रे नान्यस्मृतीति स्मृतिशब्दः अत्र तु शास्त्रमि
ति शब्द इति तदसत् ॥ श्रुतिविरोधादप्रामाण्यतया व्यवसितेनागमेन तत्र पुनः पूर्वपक्षानुत्थितेः ॥ ननु सर्व
ज्ञोक्तपाशुपतादिस्मृतिविरोधाद्गुणायाः पिपीलिकालिपिसन्निभायाः श्रुतेर्दुर्बलतया बाधेन तत्र पूर्वप
क्षोदय इति चंद्रिकायामुक्तमेवेति चेत्सत्यमुक्तमसदुक्तमेव तत् शास्त्रारंभस्य वेदप्रामाण्योपजीवकत्वात्
तद्विरोधेन पूर्वपक्षसिद्धांतयोः कथनरूपन्यायोत्थानस्यात्यंतमसंगतत्वात् ॥ वेदाध्ययनपूर्वकं प्रतिवाक्य
मस्य वाक्यस्यायमर्थ इति यावच्छक्ति गुरुमुखाद्दार्थग्रहणरूपश्रवणानंतरं तस्य दार्ढ्याय युक्त्यनुसंधा
नात्मकमननरूपशास्त्रविचारे प्रवृत्तः शिष्यः ब्रह्ममीमांसायांगत्वेनापेक्ष्यप्रामाण्यतर्केण गुरुमुखात् स-
र्वापेक्षया वेदप्रामाण्यमवधार्य तत्त्यागेन ब्रह्मतर्कसिद्धप्रामाण्यकवेदविरुद्धार्थवेदापेक्षया ब्रह्मनकविग
तदौर्बल्यवत्या पाशुपतादिस्मृत्या रुद्रस्य जगत्कारणत्वं कथं पूर्वपक्षयेत् योग्याशंका हि पूर्वपक्षो नाम ॥ ब्रह्म
तर्कस्य ब्रह्ममीमांसांगत्वं च प्रमाणन्यायमीमांसाक्रियते तर्कशास्त्रतः मानन्यायैस्तु तत्सिद्धैर्मीमांसा मेयशो॥

धनमित्यनुव्याख्यानोक्तरीत्यालयमतसिद्धमित्यादिकं सविस्तरं निरूपितं दीक्षितचरणैर्मध्वमुखमर्दनादौ
जिज्ञासाधिकरणे चंद्रिकायुक्तानंदतीर्थीयाधिकरणयोजनादूषणावसरे संगृहीतमस्माभिर्विस्तरतइति ने
हलिख्यते ॥ यत्तु ब्रम्हतर्के वेदशैवागमयोः प्रामाण्याप्रामाण्यव्यवस्थायाः कृतत्वेपि कलिमलायग्रुंठितानाम-
ल्पायुः प्रज्ञानां रुक्ष्मं ब्रम्हतर्कमधीत्य ब्रम्हमीमांसाध्ययने सामर्थ्यानामुपकृत्यै प्रवृत्तः कृपालुर्भगवान्बादरायणो
ब्रम्हसूत्रेष्वेव प्रमेयविशेषे दुरागमालंबमास पूर्वपक्षमुत्प्रेक्ष्य तन्निराकरणाय दुरागमाप्रामाण्यं सूचयामासेत्यं
गीकारेणादोषात् अवश्यं चैतद्वक्तव्यं परेणापि अन्यथाविधिवदधीतवेदवेदांग त्वेनापाततोधिगताखिलवे-
दार्थोस्मिन्जन्मनि जन्मांतरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्ग
ताखिलकल्मषतया नितांतस्वांतो ब्रम्हैव नित्यमनित्यमन्यदिति विवेकवानिहामुत्रफलभोगविरक्तः शांतोदां
तः सन्यासी तितिक्षुः समाहितो गुरुवेदांतवाक्यादिषु श्रद्धावान् प्रमाता ब्रह्ममीमांसायामधिकारीति त्वदीयैरुक्त
तया एतादृशस्य सकलपापशून्यस्याधिगताखिलवेदार्थस्य ब्रम्हैव नित्यमिति जानतः परिव्राजकस्य विर
क्तस्योक्तश्रद्धावतः शिष्यस्य सांख्ययौगविवसनादितंत्रबोधितार्थेषु श्रवणमात्रेण दुरत्ययकिल्बिषसाधनेषु-
शंकाया अप्यनुन्मेषेण तन्निरासाय तदधिकरणानामनारंभ एव प्रसज्येतेति स्वकीयाचार्याणां रुतमनुरौति नत
स्वकीयचंद्रिकाग्रंथपूर्वापरानुसंधानविधुरतया तदीयभावानवबोधनिबंधनमस्मदीयग्रंथसिद्धांततात्पर्यानव

साधनत्वं च तथाहि प्रथमपादे षष्ठसूत्रे वेदांतानामप्रामाण्याभिधानद्वारेण शास्त्रानारंभं पूर्वपक्षयित्वा तत्प्रामा
ण्योपजीवकस्य शास्त्रारंभस्य जिज्ञासाधिकरण एव चंद्रिकायां समर्थितत्वेन तद्धि स्मृत्यशास्त्रारंभोपजीव्य
वेदप्रामाण्यमनादृत्याप्रवृत्तेः पूर्वपक्षः प्रवृत्तेस्तदनभिप्रेतत्वस्यातिस्पष्टत्वात् उक्तं च चंद्रिकायां जिज्ञासाधिकरणे
पूर्वपक्षोपपादनावसरे सिद्धचैतन्यबोधने श्रुतेरनुवादकत्वलक्षणमप्रामाण्यं वायुर्वै क्षेपिष्ठादिवाक्यवत् सद्वे
दांताध्ययनं तु जपार्थं भविष्यतीति ब्रह्मतर्केण वेदप्रामाण्यव्यवस्थापनेपि कृत्स्नं ब्रह्मतर्कमधीत्य ब्रह्ममीमांसाध्य
यने समर्थानां ब्रह्मसूत्रेष्वेव प्रमेयविशेषे दुरागमत्वं च भासपूर्वपक्षमुल्लेख्य तन्निराकरणाय दुरागमाप्रामाण्य
सूचनार्थं चेदं तदधिकरणीयपूर्वपक्षसिद्धांतग्रंथनमूपन्यासप्रवृत्तिस्तदनुमता तदा वेदांतानां बहुसुखत-
यापरतंत्रप्रज्ञानां पुंसां तैः स्वतोर्थनिश्चयायोगेन स्मृत्या तदर्थनिश्चितव्ये सति मन्वादिस्मृतीनामनुष्ठेयार्थ
परत्वेन सावकाशत्वात् कापिलस्मृतेस्तु सिद्धार्थनिष्ठाया मोक्षसाधनसम्यग्दर्शनमधिकृत्य प्रवृत्ताया अ
न्यपरत्वायोगात् निरवकाशत्वरूपदोषप्रसंगात् तदनुसारेण वेदांता अचेतनकारणपरतया नेया इति
प्राप्ते मन्वादिस्मृतिपुराणादिषु च ब्रह्मकारणत्ववाक्यानां सत्त्वात् तेषामनवकाशत्वरूपदोषप्रसंगात् त
दनुरोधेन चेतनकारणत्वपरतया वेदांता व्याख्येया इति स्मृत्याधिकरणीयास्याशयं संमतपूर्वपक्षसिद्धां
तावनूद्य तन्न सर्वान् श्रुतिविरोधेन सर्वथेष्टनादिस्मृत्यप्रामाण्यस्य पूर्वसंभवे पूर्वोक्तत्वेनेह स्मृतिविरोधेन

मुत्पन्नस्यास्य शंकानुदयादिति चंद्रिकायामस्मदीयोक्तपूर्वपक्षदूषणस्यान्धकारसिपाषाणनिक्षेपरूपता
पत्तोन्मत्तप्रलपितत्वापत्तेः ॥ एतदुपदर्शितमार्गेणैव सकलपूर्वतंत्राध्ययनासमर्थस्य पूर्वपक्षिदर्शितयुक्त्या
स्मृतिप्राबल्यमालंब्योक्तपूर्वपक्षप्रवृत्तौ बाधकाभावस्यातिस्पष्टत्वात् ॥ मन्यते वेदांतानामप्रामाण्यमनादृ-
त्यैवाधीतसांगस्वाध्यायस्य प्रमादिमतोऽथ ब्रह्मजिज्ञासाधिकारिणः आपाततो गृहीतपदपदार्थसंबंधस्यापि
कस्यचित् अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीति ध्वंसत्वमेव माद्दिवाक्यं पश्यतः तथा परस्परविरु
द्धसगुणनिर्गुणवाक्यानि तथा सदेव सौम्येदमग्र आसीत् असदेवेदमग्र आसीदित्यादिवाक्यानि तथा त-
त्त्वमसि द्वा सुपर्णा सयुजा सखायावित्यादीनि भेदाभेदवाक्यानि आत्मानेकत्वैकत्ववाक्यानि च पश्यतः ब्र
ह्मैव सदसत्यमन्यदित्यादिरूपो जातोऽपि विवेकोऽशंकाकलंकित एव भवति तादृशशंकानिवृत्तेः कस्यचित्
ईश्वरानुग्रहवशाद्विरुद्धवाक्यान्यन्यथाव्याख्येयानीति दृढनिश्चयात्संभवेन तं प्रति विचारवैयर्थ्येऽपि क-
स्यचित्प्रथमसूत्राध्ययनेन साशंकापोदिता भवतीत्याप्तोपदेशपूर्वकप्रथमसूत्राध्ययनेन कस्यचित् अवशि
ष्टः शंका उत्तरत्र निराकरिष्यंत इत्यध्यापकवचनविश्वासपूर्वकतत्तदधिकरणाध्ययनेनैव तादृशशंकानि
वृत्तेस्तान्प्रति निर्विवेकदार्ढ्यायोक्ताधिकरणसार्थक्यस्यास्मदीयपूर्वाचार्यैर्वर्णितत्वाच्च स्वकीयाधिकरणयो
जनासाम्येनास्मदीयाधिकरणयोजनायां दूषणापादनमस्मदीयग्रंथाज्ञानमूलमद्वैतवादद्वेषनिबंधनमे

व ॥ एवं निष्ठं तु तावत् श्रुतयः विष्ण्वादिप्रत्यक्षमूलाभिः पाञ्चरात्रादिस्मृतिभिस्तत्र त्वमसि ध्यातोपवनेनोदीरितं
द्विकोक्तमपि प्रत्यक्षतर्कसिद्धप्रामाण्यकवेदोपजीवित्वात् ब्राह्मारम्भस्य न हि हायन्यायानुत्थानस्यानुचित
त्वान् हेयं ॥ अथ श्रुतेरप्रामाण्यमनर्थकत्वं वा न ब्रूमो किंतु पाशुपतस्मृत्यनुरोधि रुद्रादेर्जगत्कारणत्वं श्रु
तेरर्थ इति तत्र पूर्वपक्षव्याख्याय इति चेन्नैवं वक्तुं शक्यं स्मृतेः श्रुतितो दुर्बलत्वात् प्रबलेन दुर्बलानुसरणस्य वक्तुम
शक्यत्वात् ॥ यत्तु स्मृत्यधिकरणीयतत्त्वप्रकाशिकायां पाशुपतादिस्मृतेः श्रुतितः प्राबल्यप्रबलं ध्येय पूर्वपक्षो
क्तेनुक्तपूर्वपक्षव्याख्यायवर्णनं सम्यगेकाथाहि तत्र पूर्वपक्षग्रंथः न विष्णोर्जगत्कारणत्वं युक्तं तत्र प्रमाणाभावा
त् न च यतो वा इमानि भूतानि जायंते इत्यादिश्रुतिः प्रमाणं श्रुतेर्विष्णोर्जगत्कारणत्वप्रतिपादकत्वे पाशुपतसां
ख्ययोगादिस्मृतिविरोधेनाप्रामाण्यापातात् अन्यार्थतोपपत्तेः पाशुपतादिस्मृतीनां रुद्रादेर्जगत्कारणत्वप्र-
तिपादकत्वात् न च विरोधेप्यप्रामाण्याभावः वस्तुनि विकल्पप्रसंगात् न च देशकालादिभेदेन श्रुतिस्मृत्योरविरो
धः स्मृतिषु रुद्रादेः सकलजगत्कर्तृत्वाभिधानात् न च वाच्यं श्रुतिविरोधे स्मृतीनामेवान्यार्थत्वमप्रामाण्यं वा किं
न स्यात् विरोधे त्वनपेक्षं स्यादिति न्यायादिति प्रबलविरोधेन दुर्बलस्यान्यार्थतादेः कल्पनीयत्वात् न हि स्मृति
भ्यः श्रुतेः प्राबल्यमस्ति स्मृतीनां रुद्रकमलासनादिभिराप्तैर्विरचितानां दोषाभावगुणयुक्तत्वात् रुद्रादीनां स
र्वज्ञत्वस्य जगत्स्थितोपदेष्टृत्वस्य च सुप्रसिद्धत्वात् श्रुतेश्चापि पौरुषेयापिनिभाषायाः कर्तृगुणशून्यत्वात् प्रामि

त्श्रुतिविरोधेन स्मृतेरर्थान्तरपरिकल्पनादिति तु श्रुतिमूलत्व एव भवति मूलमूलिनोः मूलस्य प्रबलत्वा-
त् न च पाशुपतादिस्मृतीनां श्रुतिमूलं रुद्रादिप्रत्यक्षस्यैव मूलत्वात् एवं च दुर्बलस्य प्रमाणस्य बलवत्तरानाम्ना-
योपादितदापि विपरीतत्वं शाक्यपौरुषेयपौदितमिति तदेतत् पूर्वापरानुसंधानराहित्योम्भितं ॥ तथाहि स्मृत्य-
धिकरणतत्त्वप्रकाशिकायां पूर्वपक्षोपपादने पाशुपतादिस्मृतेः श्रुतितः प्राबल्योक्तावपि रुद्रो जगत्कर्ता सर्वज्ञ-
त्वात् न च हेत्वसिद्धिः तस्य सर्वज्ञतायाः आगमसिद्धत्वादिति आगमसहायेन शास्त्रयोनित्वाधिकरणपूर्वप-
क्षे स्मृत्यधिकरणेनास्य पौनरुक्त्यदोषपरिहाराय स्मृत्यधिकरणे पाशुपतादिस्मृत्या पूर्वपक्षे यन्त्वत्र स्मृ-
त्यासिद्धान्तः इह तु स्मृत्यनुमानाभ्यां पूर्वपक्षे श्रुत्यादिरूपशास्त्रेणासिद्धान्त इति चन्द्रिकोक्तं न सम्यक् अप्रहतत-
र्कसित्याधिकबलश्रुतिविरोधेनाप्रमाणतयाध्यवसितेनागमेन तत्र पुनः पूर्वपक्षानुत्थितेरिति तदीयोक्त-
दूषणं यं तं प्रति समीचीनयुक्त्यादिकमप्रदर्श्य तत्त्वदीपतत्त्वप्रकाशिकोक्तिप्रदर्शनमात्रेण निरसितुमशक्य-
त्वात् बाधे इदैन्यसाम्यात् किं इदैन्यदपि बाध्यतामिति खंडनोक्तरीत्या तस्या अपि दूष्यत्वात् तत्पूर्वपक्षि-
णाश्रुतेः अप्रहततर्कसिद्धस्य पाशुपतादिस्मृत्यपेक्षया अधिकबलवत्त्वस्य त्यागेन पूर्वपक्षयितुमशक्यत्वादित्य-
स्यासकृदावेदितत्वात् ॥ अथोपबृंहणानुसारेण श्रुतेरर्थवर्णनौचित्यात् पाशुपतादिस्मृतीनामुपबृंहणरू-
पत्वात्तदनुरोधेन श्रुत्यर्थवर्णनमेव युक्तमिति पूर्वपक्ष्याशय इति चेदत्र तर्हि स्मरणेनासिद्धान्तकरणायो-

गात् अथ समीचीनपांचरात्रादिस्मृत्यात्मकोपबृंहणैर्विष्णुवैकनिष्ठकारणत्वनिर्णयात् तद्विरोधेन पाशुप
तादिस्मृत्यप्रामाण्यमुक्तमासिध्दांतत इति चेन्न तर्हि स्मृत्यपुनः स्मृत्यधिकरणे पाशुपतादिस्मृत्यवष्टंभेन रुद्रा
देर्जगत्कारणत्वपूर्वपक्षोत्थानस्यानुचितत्वात् ॥ यत्तु अस्मिन्नधिकरणे स्मृत्यधिकरणे च पूर्वपक्षिणः उपबृं-
हणानुसारेण श्रुतेरर्थवर्णनस्यासित्थांतेपि पांचरात्रादिस्मृत्युपबृंहणेन निर्णयस्य चास्मदीयानभिमतेन तवा
तदाक्षेपदूषणादिकं छलनिगृहीतमिति तदसत् अस्मिन्नधिकरणे आगमसहकृतसर्वज्ञत्वहेतुकानुमाने
न रुद्रादेर्जगत्कर्तृत्वाल्लक्षणातिव्याप्तिपूर्वपक्षे अस्य स्मृत्यधिकरणेन पौनरुक्त्यदोषपरिहाराय पूर्वोक्तचं
द्रिकोक्तौ स्मृतेः श्रुतितो दुर्बलत्वात् प्रबलानुसारेण दुर्बलस्य नेयतायाः सर्वसिध्दत्वादिह्युक्तदूषणपरिहारायोक्त
तट्स्थाक्षेपतद्दूषणाभ्यामुक्तदूषणास्वीकरणे छलनिग्रहाभसक्तेरुक्ताक्षेपे चंद्रिकायामुक्तमित्यनुक्तेश्च
॥ किंचागमोक्तसर्वज्ञत्वहेतुकानुमानेन रुद्रादेर्जगत्कारणत्वपूर्वपक्षोऽसंगत एवागमेनैव रुद्रादेर्जगत्का
रणत्वस्य पूर्वपक्षयितुं शक्यत्वे नानुमानस्यागमजसनीयत्वापत्तेः कथंचित् तत्समर्थनेपि नारायणादेव
सर्वाणि भूतानि समुत्पद्यंत इति नारायणपदघटितसावधारणप्रत्यक्षश्रुतिवाक्येनो दुंबरी सर्वा वेष्टयितव्ये
ति सर्ववेष्टनबोधकस्मृत्यनुमितश्रुत्युक्तसर्ववेष्टनानुमानस्यौदुंबरीस्पृष्ट्वोद्गायेदिति प्रत्यक्षश्रुत्या बाध-
स्येव निरुक्तानुमानस्य बाधौचित्यात्सोक्तश्रुतिविरोधे रुद्रादेर्जगत्कर्तृत्वविषयेनुमानाप्रवृत्तेर्न तदवष्टंभेनो-

कः पूर्वपक्षोदयः ॥ ननु त्वन्मते नेह नानास्ति किंचनेति श्रुतिसिद्धे जगन्मिथ्यात्वे प्रमाणान्तराणि कथं दृश्यत्वादि
रूपानुमानानामिव प्रत्यक्षदृष्टस्य इदं रजतमिति प्रतीतिसिद्धस्य आत्मनः स्वप्रकाशत्वे अनुभूतिः स्वप्रकाशा अनुभू
तित्वादित्याद्यनुमानानामिव रागप्रमाणान्तरसिद्धे विज्ञानकारणत्वेन कानुमानप्रवृत्तिर्निराबाधेन प्रत्यक्ष
सिद्धमप्यर्थं बुभुत्सन्ते तर्करसिका इति वाच्यम् सत्स्वेव प्रमाणान्तरप्रतिपन्नेऽर्थेऽनुमानं न प्रवर्तत इति त्वयाऽनङ्गीकर्तुम-
शक्यत्वात् तथापि प्रमाणान्तरप्रतिपन्नेऽर्थेऽनुमानं निष्प्रयोजनं द्रढिम्ने प्रयोजनसत्त्वादिति ॥ तदसदीयासिद्धां-
ताद्यापरिनयनिबंधनं ॥ यतः प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतमिति मनुस्मृतौ प्रत्यक्षानुमानागमेष्वा
गमस्यागमत्वेनैव प्राबल्योक्तेः प्रबलप्रमाणनिश्चितेऽर्थेऽनुमानं न प्रवर्तते आगमार्थनिश्चयेन सिद्धिरूपेण तत्प्र-
तिबंधात् अनुपयोगाच्च ॥ न चैवं प्रत्यक्षकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिका इति वाच्यस्यापि दृष्टावि
रोधः शंक्यः तत्र यत् दृश्यते ध्रोत्र च श्रोता दृष्टवादि च न तदेव विधत्ते व्योमिन तयोर्ताहु तावता नः तस्मात् प्रत्यक्ष-
दृष्टेऽपि बुभुक्तमर्थं परीक्षितुं परीक्ष्य ज्ञापयन् धर्मान् धर्मान् परिहीयत इति साक्षिप्रकरणे नारदस्मृतौ प्रत्यक्षस्य प्र
प्रमाणसाधारणतया अपरीक्षितप्रामाण्यकत्वेन प्रत्यक्षदृष्टस्यापि प्रत्यक्षमपि तस्य प्रमाणोपदेशादिभिः परी
क्षणीयत्वप्रतिपादने नानिश्चितप्रामाण्यकप्रत्यक्षदृष्ट एवार्थे परीक्षार्थसिषाधयिषयाऽनुमानप्रवृत्तेरपि संप्रदुक्तत्वात् ॥
ननु तर्हि नेह नानास्तीत्यादिश्रुतिसिद्धे जगन्मिथ्यात्वे कथं तव मतेऽनुमानानां प्रवृत्तिरिति शंक्यं जगाद हृष्टे-

ब्रह्मणि जगत्कारणतावच्छिन्नवृत्तिकाभावप्रतियोगित्वरूपे प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं वामि-
थ्यात्वमित्यस्मदीयैरुक्तमिथ्यात्वांशके नेह नानास्ति किंचनेति श्रुत्यर्थे ब्रह्मणि नानात्वं अवतारावतारिकृतभे
दादिकं नास्तीत्यर्थं परिकल्प्य विवदमानं प्रति तादृशश्रुतेरुक्तरूपमिथ्यात्वमेवार्थ इत्यनुमानसंवादेन ग्राहयि-
तुं मिथ्यात्वानुमानानां ॥ अत्रायं पुरुषः स्वयंज्योतिरिति श्रुतेरर्थान्तरं परिकल्प्यात्मनः स्वप्रकाशत्वरूपे तदर्थे
विवदमानं प्रत्यात्मनः स्वप्रकाशत्वरूपं तदर्थमनुमानेन ग्राहयितुं स्वप्रकाशत्वानुमानानां प्रवृत्तिरिति ब्रह्मा-
नंदाद्यैरद्वैतसिद्धिव्याख्यायामुक्तत्वेन श्रुतिप्रमितेऽर्थेऽनुमानप्रवृत्तेरस्मदनुमतत्वाभावात् ॥ तर्करसिकानां
तथाविधेऽर्थे सिषाधयिषाधीनानुमानप्रवृत्तावपि रुद्रप्रबलागमप्रमितजगत्कारणत्वातिव्याप्तिपूर्वपक्षेणै-
वजन्मादिसूत्रोक्तब्रह्मलक्षणाक्षेपासिद्धेरनुमानव्यसनितया सिषाधयिषाधीनानुमानस्याहार्यज्ञानस्येव विषय
दार्ढ्याप्रयोजकतया चाजागरूकत्वनीयतायादुर्धरत्वात् ॥ अत एव नहि करिणि दृष्टे चित्कारेण तमनुमिम-
ते अनुमा[illegible]तर इति वाचस्पतिनैवोक्तं ॥ यदपि अस्मिन्नधिकरणे अनुमानेनान्येषामपि कारणत्वमिति पूर्वप-
क्षव्यानुमानस्य श्रुतिबाधकादिकमुद्भाव्यानुमानागम्यत्वं जगत्कारणस्येति सिद्धांत्यते तदुक्तं चंद्रिकायां-
सिद्धांतेऽनुमानेषु श्रुतिबाधादेः शास्त्रादीनां चाविषाणित्वादेश्च कर्तुं शक्यत्वादिति तथाच सिद्धांतदोषमुद्भा
व्य पूर्वपक्षासंभववर्णनमज्ञानमूलमन्यथाभवन्मते सर्वाधिकरणेषु सिद्धांतदोषमुद्भाव्य पूर्वपक्षनिरासेन

मीमांसोच्छेदापत्तिरिति तदप्यसदाग्रहमूलमेव ॥ शास्त्रस्य योनिः कारणं तत्त्वात् शास्त्रं योनिः प्रमाणमस्य
तत् शास्त्रयोनित्वं तत्त्वादिति वा सूत्रार्थे अनुमानस्य श्रुतिबाधादेः कथमप्यप्रतीतेस्तस्यासिद्धांतयुक्तित्वासिद्धेश्चं
द्रिकाद्युक्तं तुच्छमित्यापूर्वपक्षासंभवं वदंतं प्रतिनोपन्यासार्हं चक्षुरादिग्राह्यकं रसगंधादिवस्तुषु अनुमा
पितग्राह्यकाधर्मब्रह्मादिवस्तुषु इति त्वदीयचंद्रिकादिषु जगत्कारणस्य शास्त्रैकसमधिगम्यत्वस्यैव सिद्धां
तयुक्तित्वोक्तेश्च श्रुतिबाधादेरित्यस्योपनिषदत्वश्रुतिबाधादेरित्येवार्थ इति वक्तव्यत्वात् चंद्रिकायामेव म-
हाकल्पत्वमित्याद्यनुमानेषु श्रुतिबाधादेरित्युक्तत्वेन च नारदशाकर्तृभेदानुमानेष्वेव श्रुतिबाधोद्भावनस्य तद
भिप्रेतत्वेन सर्वज्ञत्वहेतुके रुद्रादेः कर्तृत्वानुमाने श्रुतिबाधस्यासिद्धांतयुक्तित्वानभिप्रेतत्वाच्च ॥ युक्तं चैतत् ना
रायणादेव सर्वाणि भूतानि समुत्पद्यंत इति प्रत्यक्षनारायणपदघटितसावधारणश्रुतेर्यथा कथंचित् स्वाभि
मतार्थवर्णनमंतरा तद्बाधेनानुमानेन रुद्रादेः कारणत्वपूर्वपक्षस्य मीमांसासंप्रदायविरुद्धत्वस्य तद्धृदा-
स्पष्टत्वात् तादृशश्रुतेर्णत्वानुपपत्त्या त्वत्पूर्वपक्षिणा योगादिनान्यार्थत्वस्य वक्तुमशक्यत्वादित्यस्य पूर्व
मेवावेदितत्वात् ॥ नानाकर्तृकानुमानेष्वपि श्रुतिबाधादेः सिद्धांतयुक्तित्वं यथा न संभवति तथा तदनुमाना
वष्टंभेन पूर्वपक्षनिराकरणप्रसंगे अग्रे वक्ष्यामः ॥ प्रपन्नमते इत्यादिकं चात्यंतमसदेव न हि मन्मते सिद्धांतयु
क्तिबोधकश्रुत्यादेः पूर्वपक्षसमये पूर्वपक्ष्यभिमतार्थकत्ववर्णनमंतराप्यधिकरणे पूर्वपक्षप्रवृत्तिरस्ती-

त्यस्मदीयग्रंथदर्शिनां स्पष्टमेवोदाहरणार्थं किंचिदुच्यते आकाशस्तल्लिंगादित्यधिकरणनिर्णयवाक्यभू
ताकाशपूर्वपक्षेऽभ्यस्तपूर्वपठिताकाशश्रुत्यनुरोधात् सर्वाणि ह वा भूतानीत्यत्र सर्वशब्दस्य वाय्वादिसर्व
भूतपरत्वं पूर्वपक्षिणा वर्णितं अंतस्तद्धर्मोपदेशादित्यधिकरणे जीवपूर्वपक्षे निर्णयवाक्योक्तसर्वपाप्मो
दितत्वस्य न ह वै देवान् पापं गच्छतीति श्रुत्यंतरानुसारेण जीवगतत्वं पूर्वपक्षिणोपपादितं एवं सर्वत्र द्रष्ट
व्यं ॥ किंचात्र पूर्वसूत्रोक्तकृत्स्नजगज्जन्मादिकारणत्वरूपब्रह्मलक्षणस्य रुद्रादावतिव्याप्तिशंका किंवा
कारणत्वमात्रस्य वा नाद्यः कारणवाक्यांतर्गतनारायणमहोपनिषदादिवाक्यबोधितविधिरुद्रपुरःसरस
कलजगत्कारणत्वस्य विधिरुद्रादिगतत्वशंकानुदयात् ॥ न द्वितीयः तस्य योग्यकिंचित्कारणत्वस्यास्म-
दादिसाधारणस्य रुद्रादिनिष्ठत्वेपि पूर्वसूत्रोक्तविधिरुद्रपुरःसरसकलजगत्कारणत्वलक्षणस्यातिव्या
प्त्यभावात् ॥ एतेन कालभेदेन विधीशयोः रुद्रादेश्च कारणत्वविरोधाभावमाश्रित्य शिवादेर्विष्णोश्च नारायण
त्वमिति पूर्वपक्षोपि निरस्तः ॥ अत एव हि जिज्ञासासूत्रे ब्रह्मेति जिज्ञासाभिधायकवाक्यस्थब्रह्मपदस्य विष्णुपरत्वं साध
कतयोपन्यस्तस्य यतो वा इमानि भूतानि जायंत इति वाक्यशेषस्य स्वारस्यानुरोधेनेमानि भूतानीति निर्दिष्ट
मित्थं सकलभूतकारणत्वमपि लक्षणमभिमतं एवमात्मनः आकाशः संभूत आकाशाद्वायुरिति श्रुतिम
मितमप्याकाशांतभूतकारणत्वमपि तच्च रुद्रादावतिव्याप्तमिति सम्यगेव एतेन नारायणोपनिषदा

दिप्रतिपन्नाविधिरुद्रपुरःसरसकलजगत्कारणत्वलक्षणस्यातिव्याप्त्यभावात्कथमेतदितिनिरस्तं॥ता
दृशलक्षणस्यातिव्याप्त्यकथनात् एतदभिप्रायेणैव सर्वजगज्जन्मादिकर्तृत्वलक्षणं चेदसंभवः कतिपयक
र्तृत्वं चेदतिव्याप्तिरितिचंद्रिकायामुक्तमिति तदपि पूर्वापरस्वकीयाचार्यग्रंथाविचारमूलं तथाहि प्रसिद्ध
सकलभूतकारणत्वं लक्षणमित्यस्य कोर्थः वर्तमानप्रत्यक्षमात्रसिद्धघटांकुरादिकारणत्वमिति वा प्रत्य
क्षानुमानागमादिसिद्धातीतानागतसकलभूतकारणत्वमिति वा नाद्यः तादृशलक्षणस्य जन्माधिकरणाभि
मतत्वे तेन गुणपूर्त्यलाभात् जिज्ञासाकारणीभूतगुणपूर्तिप्रसिद्ध्यै जीवादिभेदकं किंचिज्जगत्कर्तृत्वमु
च्यते इति तदीयप्रतिज्ञाविरोधापत्तेः स्वयोग्यप्रसिद्धकतिपयभूतकर्तृत्वस्य जीवेनुपपत्त्यभावेन तदनु
पपत्त्या जन्माधिकरणे जीवे ब्रह्मशब्दरूढिबाधेनाविष्णुरेव जिज्ञास्यं ब्रह्मेति सिद्धांतकरणानुपपत्तेश्च जि
ज्ञास्ये विष्णौ गुणपूर्तिलाभाय जीवे ब्रह्मशब्दरूढिबाधेन सिद्धांतकरणाय च जन्मादिसूत्रे सकलकारणवाक्य
प्रतिपन्नातीतानागतविधिरुद्रपुरःसरसकलजगत्कर्तृत्वलक्षणस्यैव जन्मादिसूत्रेभिप्रेततया तस्य यावत्क
र्तव्यतया तस्य च रुद्रेऽसंभवात् तत्रातिव्याप्तिपूर्वपक्षासंभवस्य दुर्वारत्वात्॥ उक्तं च चंद्रिकायां जन्माधिकरण
सिद्धांते इमानीति सर्वनाम्नश्च संकोचकाभावादिति विचारविधायकनानावाक्यपरामर्शेन स्कांदे सूत्रकृ
तैव जन्माद्यष्टकर्तृत्वस्य लक्षणत्वेनोक्तत्वात् अप्रापितस्यैवोक्तत्वादिति च॥ तथा च विचारविधायकनानावा

क्यपर्यालोचनयाजन्माद्युपक्रकर्तृत्वस्यैव तथाविधवाक्यपर्यालोचनयाविधिरूढपुरःसरसकलातीतानाग
तजगत्कर्तृत्वस्यैव लक्षणत्वौचित्यादर्धजरतीयस्यान्याय्यत्वात् अन्यथा गुणपूर्त्यसिध्यापत्तेः ॥ प्रसिद्धसक
लभूतकर्तृत्वलक्षणमपि जन्माधिकरणाभिप्रेतमित्युक्तिरसंगतैव ॥ किंच इदं सर्वमसृजत यदिदं किंचेति
प्रत्यक्षादिसिद्धातीतानागतसकलजगत्कारणत्वस्यैव श्रुतिषु प्रतिपादनात् तदनुसारेण श्रुतिसमानार्थ
कसूत्रेणास्येत्यनेन प्रत्यक्षादिसिद्धातीतानागतसकलजगत्परामर्शस्यैव युक्तत्वात् सूत्रेण प्रसिद्धप्रकृति
पयभूतकारणत्वमपि लक्षणत्वेन विवक्षितमित्यस्य सर्वथानुचितत्वात् ॥ किंच यतो वेत्यादिवाक्ये पञ्चम्या
पनिबंधादनुवादत्वं तावत्सातीयमेव तत्र पुरोवादापेक्षायां विनिगमकाभावात् कारणवाक्यसामान्यमेव पुरो
वाद इति वक्तव्यं तथा च तदनुरोधेनेमानीत्यनेन सकलकारणवाक्यबोधितविधिरूढपुरःसरसकलभूताना
मेव ग्रहणौचित्यात् इमानीति सर्वनाम्नश्च संकोचकाभावादिति चंद्रिकायां तथैवोक्तत्वाच्च विधिरूढपुरःसर
सकलजगत्कारणत्वस्यैव लक्षणत्वेन जन्मादिसूत्राभिमततया न तस्य लक्षणस्य रुद्रे कृत्स्नमप्यतिव्याप्तिः
संभवति ॥ यतो वेत्यादिवाक्यस्यात्मन आकाशः संभूत इति श्रुतिप्रतिपादिताकाशादिपंचभूतसृष्ट्यनुवादक
त्वेपि तद्वाक्यस्याद्वैतरीत्या सत्यं ज्ञानमनंतं ब्रह्मेति श्लोकांतर्गतानंतपदोपात्तत्रिविधपरिच्छेदशून्यत्वप्रति
पादकतया तत्प्रतीत्यानंतपदोपात्तगुणपूर्तिप्रतिपादकतया चातीतानागतसकलवियदादिकारणब्रह्म

प्रतिपादकत्वावश्यकतया पत्यौ वेत्यादिवाक्यस्यापि हिरण्यगर्भो वा रुद्रो वा सर्वेषां साधारण्येन सर्वजगत्कारण
प्रतिपादनपरत्वस्यैव वाच्यत्वात् त्वत्सूत्रजगत्कारणत्वोपयोगि ज्ञानशक्तिप्रभृतियोगप्रयोजकभूत कार्पेक्षारुद्रा
दिदेहोपादानभूतभूतकारणत्वस्य रुद्रादावभावान्न तल्लक्षणस्य रुद्रादिष्वतिव्याप्तिः संभवति ॥ एतेनात्मन आका
शः संभूत आकाशाद्वायुरिति श्रुतिप्रतिपन्नाकाशादिभूतकारणत्वरूपविलक्षणं पूर्वसूत्रोक्तं तन्न रुद्रादावति
व्याप्तमित्यपि निरस्तं तदभिप्रायेणैवेत्यादिकं स्वर्वादिचन्द्रिकोक्तसर्वपूर्वकमिति विदितं प्रतिभाति ... ॥ य
दपि स्मृत्यधिकरणे नास्त्यौक्त्यपौनरुक्त्यपरिहाराय महद्विष्णोरन्येषां च कारणत्वमिति समुच्चयेन लक्षणाति
व्याप्त्या पूर्वपक्षे विष्णोरेवेत्यवधारणेन सिद्धान्तः स्मृत्यधिकरणे तु विष्णोः कारणत्वं नेत्यसंभवेन पूर्वपक्षे अस्तो
ति सिद्धान्तः ॥ अत एव टीकायामत्र विष्णोरेवान्यस्याप्यस्ति न वेति संदेहः तत्र तु युक्तं न वेत्येव संदेहः यद्यप्या
गमप्रामाण्यवादिनाऽऽहाप्यसंभवोपपत्तिरुक्ता तथापि ... आपातत्वं विष्णुपरत्वे सम्भवन्तीं
चोपेत्यकालादिभेदेनाविरुद्धं द्वयोरपि कर्तृत्वं श्रुत्यादौ त्विदं सर्वमसृजतेति कारणत्वोक्तिस्तत्तत्कालसृष्ट्य
भिप्राया सर्वस्रष्टृत्वयोग्यत्वाभिप्रायेति चन्द्रिकोक्तं न दृष्यसत् ॥ नारायणमहोपनिषदादिप्रतिपन्नस्य विधि
रुद्रपुरःसरजगत्कारणत्वलक्षणस्य रुद्रादिसाधारण्येनातिव्याप्तिपूर्वपक्षानुदयात् श्रुत्याश्रुतिसंकोचेपि
स्मृत्या श्रुतिसंकोचायोगात् तत्तदुत्तरकालोत्पत्तिकत्वमात्राभिप्रायेण वर्तमानसामीप्येत्यनेनागामिन्यपि

द्द ९ सर्वमसृजतेतिनिर्देशाविरोधात् ॥ असंभवपूर्वपक्षस्य प्रथममेव निरसितुमुक्तत्वात् संदेहप्रकारभेद
मात्रेणाधिकरणभेदानौचित्यस्योक्तत्वादेकमेवाद्वितीयं एको ह वै नारायण आसीन्न ब्रह्मा नेशान इत्येकत्वा
वधारणादिविरोधान्नेति पूर्वभेदोक्तत्वात् यत्तु एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा साधारणे समानेऽल्पे संख्या
यां च प्रयुज्यत इति कोशात् एकमेवेत्यत्रैकशब्दस्य साधारणसमानार्थकत्वस्य पूर्वपक्षिणोऽभिमतत्वेन नत
द्विरोध इति तन्मंदं तथापि न ब्रह्मा नेशान इत्यस्याविरोधापरिहारात् ॥ किंच श्रुत्यागमयोस्तुल्यबलतायां
सर्वज्ञपशुपतिप्रणीतत्वादन्यन्नप्रयोजकं तथा च तस्य सार्वज्ञ्ये श्रुतिप्रणीततया तुल्यबलत्वसिद्धिः
तुल्यबलत्वे सति तस्य सर्वज्ञत्वसिद्धिरन्यथा विष्णुसर्वज्ञताबोधकश्रुत्याबाधादन्योन्याश्रयः ॥ यत्तु पशु
पतेः सर्वज्ञत्वस्यागमं विना महाजनपरिगृहीतत्वेनैतिह्येनैव वा यः सर्वज्ञः स सर्ववित् इति श्रुत्या वा तादृक्पू
र्वपक्षिणांगीकृतत्वान्नान्योन्याश्रयः उक्तं च तत्त्वप्रकाशिकायां रुद्रादीनां सर्वज्ञत्वस्य जगत्पितोपदेष्टृत्व
स्य च सुप्रसिद्धत्वादिति ॥ कृशानुरेताः सर्वज्ञ इति कोशाच्च सर्वज्ञशब्दस्य तन्नूढत्वादन्यथा सर्वविदित्यने
न पौनरुक्त्यापत्तेश्चेति तदसत् उक्तप्रसिध्यादेरप्यागममूलत्वान्नहि मूलसंभवेऽमूलप्रसिध्यादिकल्प
नं युक्तं यः सर्वज्ञः स सर्ववित् यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नामरूपमन्नं च जायत इति श्रुतेः कार्यब्रह्म
हिरण्यगर्भादिविषयकत्वनामरूपात्मकजगत्कारणप्रतिपादकतया तत्कारणं रुद्र इति विशिष्याप्रतिपादना

त्तथा रुद्रस्य सर्वज्ञत्वासिद्धेः रुद्रो जगत्कर्त्ता सर्वज्ञत्वादित्यनुमानेषु स्वव्यभिचारं धारयतात्वयैव नामावि-
गानुशासननूपको शस्य संज्ञासंज्ञिभावसंबंधप्रमापकस्य नवत्वादेः सर्वज्ञत्वसाधकत्वं अन्यथा कोशेन पाञ्जि
क र्णादिकं वृक्षोपि सिध्येदित्युक्तत्वात् तर्हि सूत्रस्य कोशानुरोधात् सर्वज्ञ इति कोशेन रुद्रे सर्वज्ञशब्दस्य रूढत्वेपि
तेन श्रुत्यागमयोस्तुल्यबलताप्रयोजक सर्वज्ञतायाः पूर्वपक्षाभिमतत्वोपपादनस्य वक्तुमशक्यत्वात् यः सर्वज्ञः
स सर्वविदित्यत्र द्वाभ्यां पदाभ्यां सामान्याकारेण विशेषाकारेण च ज्ञानयोरभिधानेन पौनरुक्त्यापादना यो गाद्
॥ तुल्यबलताया प्रयोजकमस्तु वा आवेत्यत्रौदासीनेन रुद्रस्य चिंतान्यायेन पूर्वपक्षप्रवृत्तिरित्यपि अस्मद्रीत्याप्र
कारांतरेण पूर्वपक्षोपपादनसंभवात् सत्यां गतावनुचितं अपि च कारणवाक्यानामत्र कार्त्स्न्येन पुरोवादत्वात्
तत्र च रुद्रादेः कार्यत्वकर्मवशित्वश्रवणात् तत एव कारणत्वाभावप्रतिपत्तौ तस्य कथं रुद्रादिसाधारण्यशंका
॥ यत्तु पत्युरसामंजस्यादित्यधिकरणासिद्ध्यर्थोपन्यासेन दुरागमापेक्षत्वप्रतिपादनप्रधानकैतदधिकरणो
क्तपूर्वपक्षानौचित्यकथनमनुचितमन्यथाभवन्मतेपीक्षत्यधिकरणपूर्वपक्षस्यानुमानिकमप्येकेषांज्योति
रुपक्रमात् न संख्योपसंग्रहादित्याद्यधिकरणासिद्ध्यांत सिद्ध्यर्थोपन्यासेनानौचित्यस्य वक्तुं शक्यत्वेन तदधि
करणानुत्थानप्रसंग इति तदस्मदीयग्रंथाज्ञानमूलकस्वमतिपरिपाकमात्रं तथाह्यस्मद्ग्रंथेषु ईक्षत्यधिकर
णे जन्मादिसूत्रोक्तं ब्रह्मलक्षणत्वेनाभिमतं जगज्जन्मादिकारणत्वादिकं प्रधानेपि संघटयितुं शक्यमतोनु

मानसिद्धसावयवप्रधानपरत्वमेव वेदांतानामस्तु न तु लौकिकनिरवयवब्रह्मपरत्वमिति सद्विद्यामालंब्य
लक्षणासंभवशंकायामशब्दत्वेन प्रधाने श्रुतिसारस्यनिराकरणेन सा शंका परिहृता तदुपोद्बलनाय च स
र्वासां श्रुतीनां ब्रह्मणि गतिसामान्यं प्रतिज्ञायानंदमयोभ्यासादित्यारभ्य पत्यादिशब्देभ्य इत्यंतैः सूत्रैस्तत्श्रु-
तिपर्यालोचनया गतिसामान्यमेव शंकाविशेषनिराकरणपूर्वकं व्यवस्थापितं तथाशाकरैरुक्तं अस्मिंश्चा-
धिकरणे सांख्यपक्षः सद्विद्यामालंब्य प्रवृत्तो निराक्रियते अन्येषां तु पक्षाणां तदुपन्यस्तवाक्ययुक्त्योराभासता
प्रतिपादनपूर्वकं निराकरणं एतेन सर्वे व्याख्याता इत्यादिसु[illegible]धिष्यति सांख्यस्यापि श्रुत्यंतरावष्टंभेन युक्त्यंत
रावष्टंभेन च निराकरणमुत्तरत्र भविष्यतीति ॥ आनुमानिकमप्येकेषां ज्योतिरुपक्रमात् न संख्योपसंग्रहादि
त्याद्यधिकरणेषु प्रधानस्याशब्दत्वं क्वचिदपि वेदे कारणत्वेन तन्न प्रतिपाद्यत इत्युक्तं तदसिद्धं कठके
महतः परमव्यक्तमित्यव्यक्तशब्देन अजामेकां लोहितशुक्लकृष्णामिति मंत्रे अजाशब्देन च कारणत्वेन प्रधान
स्य प्रतिपादनात् तथा यस्मिन् पंच पंचजना आकाशश्च प्रतिष्ठितः इति मंत्रे पंच पंचजना इति पंचसंख्याविषया-
अपरा पंचसंख्या श्रूयते पंचशब्दद्वयदर्शनात् एते पंच पंचकाः पंचविंशतिः संपद्यंते तथा पंचविंशतिसंख्यया यावंतः सं
ख्येया आकांक्ष्यंते तावंत्येव तत्त्वानि सांख्यैः संख्यायंते अनया श्रुतिप्रसिद्धया पंचविंशतिसंख्यया तेषां स्मृतिप्रसिद्धानां
पंचविंशतितत्त्वानामुपसंग्रहात् श्रुतिप्रतिपाद्यत्वमेव प्रधानादीनामित्याक्षिप्य समाधीयते तथा चानुमानिकम

ध्येकेषामित्याद्यधिकरणसिद्धस्य प्रधानेऽप्यजाणंचपंचजनादिशब्दप्रतिपाद्यत्वस्योपन्यासेनेक्षत्यधिकरणी-
यस्य सद्विद्यागतजगत्कारणवाचकसदादिशब्दवाच्यत्वेन प्रधानस्यैव जगत्कारणत्वं न ब्रह्मणेति पूर्वपक्षस्य निरसा-
योगात् तन्निरासाय तदधिकरणोत्थानस्यावश्यकत्वात् प्रत्युत सांख्यस्यादित्यधिकरणसिद्धार्थस्य रुद्रादेः-
कार्यत्वादेः दुरागमाद्येव यत्प्रतिपादनप्रधानकाधिकरणप्रमेयत्वाभावेन तेनास्य पौनरुक्त्याभावेऽपि कारण-
वाक्यप्रतिपन्नकार्यत्वोपन्यासेन सकलकारणवाक्यप्रतिपन्नाविधिरुद्रपुरःसरजगत्कारणत्वलक्षणस्य
रुद्रेतिव्याप्तिपूर्वपक्षानौचित्योद्घाटनस्य युक्तत्वात् यत्तु पुरोवादवाक्येषु रुद्रादेः कार्यत्वश्रवणं न हि निंदा-
न्यायेन विष्णोः कारणत्वविधिपरमिति यदुत्यादिनोक्तस्य सम्प्रत्ययेन लक्षणस्यातिव्याप्तिरिति पूर्वपक्षस्या-
शयः तथा चोक्तं चंद्रिकायां श्रुतौ शिवस्यागमे च विष्णोः कारणतानिषेधस्तु यथोदितहोमनिंदानुदितहोमादिस्तु-
तिपरा तथा विष्ण्वादेः कारणत्वाविधिपर इति भासे प्रमाणत्वेनांगीकृतश्रुतिपरिगृहीतयाजुष्यश्रुतिरित्यादि-
भाष्योदाहृतया स्मृत्या दुरागमाप्रामाण्यमिति सिद्धांत इति तत्र कारणतानिषेध इत्युपलक्षणं श्रुतौ एक एव
नारायण आसीत् न ब्रह्मा नेशान इति रुद्रादेः कारणत्वनिषेधस्येव नारायणाद्रुद्रो जायत इति कार्यत्वस्यापि प्र-
तिपादनात् तस्याप्युक्तन्यायेन विष्णोः कारणत्वविधिपरत्वस्यैव वक्तव्यत्वादिति चंद्रिकाशयवर्णनमप्यसत्॥
तथा सति वाक्यांतरस्थादेरपि कार्यत्वश्रवणस्य तथात्वप्रसंगेनोक्तभूतादिकारणत्वलक्षणस्यासंभवप्रसंगा-

त्कल्पकानुपलंभस्य तुल्यत्वात् कारणत्वादिश्रवणं तत्कल्पकमिति चेन्न वायुश्चांतरिक्षं चैतदमृतमित्यमृत
त्वश्रवणस्य तत्रापि कल्पकस्य सत्त्वात् अमृतत्वं वा यंतरिक्षादेश्चिरकालावस्थायित्वाभिप्रायं चेत्कारणत्व
श्रवणमप्यवांतरं किंचित्कारणत्वविषयं किं नान्यथासिद्धं अत्र प्रत्यक्षविरोधस्यैवं तत्र श्रुत्यागमविरोध-
स्य सत्त्वाच्च ॥ उक्तपूर्वपक्षे ऋग्यजुः सामाथर्वाश्च भारतं पांचरात्रकं मूलरामायणं चैव शास्त्रमित्यभिधीय
त इति भाष्योदाहृतश्रुतिपरिगृहीतस्मृत्यादुरागमाप्रामाण्येनात्र सिद्धांत इत्यपि चंद्रिकोक्तं न साधु ॥ प्र
त्यक्षवचनेन सिद्धांतन्यायेन पूर्वपक्षोत्थानासंभवात् न हि प्रत्यक्षवचनविरोधे युक्तयः संभवंति यत्तु भवन्म
ते अनुकृतेस्तस्य चेत्यधिकरणेन तद्भासयते सूर्यो यदादित्यगतं तेज इति प्रत्यक्षवचनविरुद्धस्यानंत
न सूर्यो भाति न चंद्रतारकमित्यादिश्रुतेस्तेजोधातुपरत्वपूर्वपक्षस्यैव तथात्वे नोवै सहस्राणि बहूनि भ
रतर्षभ गोनां कुर्यात् फलं प्राप्य तैश्च सर्वैर्महीं चरेदिति प्रत्यक्षवचनाविरुद्धस्य देवताधिकरणे बहुधा
गे युगपदेकस्य स्वरूपसंनिधानानुपपत्तिपूर्वपक्षस्यैव च प्रत्यक्षवचनविरुद्धस्याप्यज्ञानेनाप्रत्यपूर्वप
क्षस्य संभव इति तदप्यस्मदीयग्रंथतात्पर्यानवबोधनिबंधनं स्वबुद्धिपरिपाकमात्रमेव न ह्यस्माभिरनुकृते
स्तस्य चेत्यधिकरणेन तद्भासयते यदादित्यगतं तेज इति प्रत्यक्षवचनाज्ञानेन न तत्र सूर्यो भातीत्यादिश्रु
तेस्तेजोधातुपरत्वमिति पूर्वपक्षः किंतु न तत् भासयत इति स्वार्तरिजार्यस्य भातीति प्रबलश्रुतिबलाद्बाध

मंगीकृत्यैव तथाहि ज्ञाधातूक्तार्थद्वयमाधातूक्तार्थविषयानपेक्षणान्नतत्र भातीत्यत्र तत्रेति नविषयसप्तमीतथा
सति विषयापेक्षाजननाय भातीत्यस्याणिजर्थगर्भताश्रयणीयतापत्तेस्तद्दुरंभावलक्षणेऽध्यपदस मन्यैवेय
मितितथाच तस्मिन्सति सूर्यादिकंनभातीत्यर्थोऽभ्युपेतेनचैवं तस्मिन्सति सूर्यादिकंनभातितंभांतमनुभा
तीति परस्परविरुध्यवाक्यार्थद्वयमापद्येत इति दांक्यं तस्मिन्सति नभातीत्यनेन तत्प्रयुक्तस्पष्टभाननिषे
धबोधाभ्युपगमात् ततश्च तमनुभातीत्यनेनार्थात् तमनुसृत्यास्पष्टंभातीति लाभात् सर्वाभासः सतिसंभ
वेभकृतपरामर्शितायान्याय्यत्वात् अनुभाति सर्वमित्यत्र सर्वशब्दः भकृतसूर्यचंद्रतारकाग्न्यादिपरएवतेन
चाक्षुषेष्वेवार्थेषु भानार्थं तेजोपेक्षानसर्वत्रेति तेजोधातोः अनुभाति सर्वमित्यनेनावगतसर्वावभासकत्ववि
रहेपिनक्षतिः तथाच सूर्याद्यस्पष्टभानहेतुत्वे सति तत्स्पष्टभानविरोधित्वं पादत्रयेणलब्धंतेजोधातुपदवा-
च्यज्योतिष्ट्वएवलिंगंज्योतिषामेव सौरादीनां चंद्रतारकादि ज्योतिःस्पष्टभानविरोधित्वे सति तदस्पष्टभा
नहेतुत्वं मायोदृष्टमतस्तेजोधातुरेवमंत्रप्रतिपाद्यः सच सृष्ट्याद्युत्पन्नापंचीकृततेजसासूर्यादिरिव समुत्
पद्यतेतस्यच सूर्याद्युदयानुविधाय्युदयस्य सूर्यचंद्रादितेजोमंडलमात्रनिष्ठत्वाभ्युपगमात् चंद्रसूर्यादयः स्पष्टंभां
तीत्यस्य सूर्यादीनांप्रकृतज्योतिर्बिंबेकाग्रहात् भ्रममात्रत्वाभिप्रायाभ्युपगमाच्छ्वेतादृशातेजोधातुस्वीकारे सूर्यचंद्राद्य
भावेपि पदार्थभानं स्यात् सूर्यादिषु स्पष्टभासमानेषु कथंतेषां स्पष्टभाननिषेध इति शंकानामनवकाशः ॥

न चैवं सति तस्य भासा सर्वमिदं विभातीत्यनुपपन्नं आदित्यादिभाने तेजसोऽनपेक्षणात्तेजोभिन्नचाक्षुष एव
तेजसः कारणत्वादिति वाच्यं ॥ उपक्रमानुसारेण मंत्रस्य ज्योतिःपरत्वानिर्णये तदनुसारेण तस्य भासेति तृ-
तीया न करणतृतीया अपितु साहित्यार्थका उपपदविभक्तिरेव बाधकाभावात् तथा च तस्य भासा सह सर्वं
सूर्यादिकं भातीति मंत्रार्थः अस्तु वा करणतृतीया चाक्षुषप्रत्यक्ष एव तेजोपेक्षा कल्प्यते तेजसः चाक्षुषेपि सर्व-
प्रविषये तेजः संयोगस्य सुलभत्वेन तेजोऽर्थांतरेण तेजोऽवयवांतरसंयोगस्यापि तेजश्चाक्षुषे व्यतिरेका-
दर्शनान्न तेजोभिन्नेति निवेशनीयं गौरवात् न तत्र सूर्यो भातीति मंत्रस्य कठवल्ल्यां मुंडके च ब्रह्मप्रकरणे पाठे-
प्युक्तरीत्या मंत्रबोध्यतेजोधातुगतोक्तलिंगेन प्रकरणबाधात् स्वरसतो मंत्रेण तेजोधातुरेवोपासनार्थं प्र-
तिपाद्यते अधिक आकारादौ द्रष्टव्यं तथा च प्रबलश्रुतिबलात् लिंगजार्थबोधेन पूर्वपक्षे न तद्भासयत इत्यस्य न तत्र सूर्यो
भातीति तेजोधातुप्रतिपादकश्रुतिसमानार्थकतया विरोधाभावेन तद्वचनाज्ञानेनानुकृतेस्तस्य चेत्यत्र पूर्व-
पक्षः ॥ यदादित्यगतं तेज इति स्मृत्या जगदवभासिका आदित्यादिप्रभा परमात्मसंबंधिनीत्येतादृशार्थप्रति-
पादनात् तस्य च पूर्वपक्षिसंमतेन तत्र सूर्यो भातीत्यादिपादद्वयोक्तोक्तलिंगावगततेजोधातुविशेषरूपार्थे
तद्वचनविरोधशंकैव नास्तीत्यस्मदीयग्रंथदर्शिनां विदुषां स्पष्टमेवेति तद्वचनाज्ञानेन तद्वचनाविरुद्धस्ते-
जोधातुरेव न तत्र सूर्यो भातीति वाक्यप्रतिपाद्य इत्यनुकृतेस्तस्य चेत्यधिकरणे त्वदीयः पूर्वपक्ष इति व्यामोहमा

अमेन्यायदेवताधिकरणे आद्युमंत्रैवमू [illegible] [illegible] तदेव बोधो कुर्वीत् [illegible] सर्वैर्महीत्व
देहादिभत्वलक्षणाद्युपाधिकस्य बहुषु [illegible] [illegible] सर्वाणः पूर्वपक्षे [illegible] तसित्व
तद्दूषनाज्ञानेनैवमप्रमाणत्व [illegible] [illegible] देवताधिकर
णेब्रह्मविद्याधिकारप्रयोजकत्वं [illegible] [illegible] ब्रह्मविद्याधिकार इति मंत्रार्थवादा
नामपि [illegible] वाक्यवदेव प्रामाण्यं [illegible] इति [illegible] देवानां ब्रह्मविद्याधिकार
प्रयोजकशरीरित्वाभ्युपगमे कर्मणि भूतानां देवानां ऋत्विगादिवत् [illegible] युगपदनेकेषु या
गेषु संभवति एकस्मिन्नप्युपजयोरिति [illegible] पूर्वपक्षिणा मंत्रार्थवादानां देवानां शरीरित्वानियतयोगि
त्वानंगीकारादुक्तवचनविरोधाभावेन तदोषोक्तपूर्वपक्षे तदुपन्यासानकल्पनानावश्यकत्वात् ॥ अथ पञ्च
सामेति प्रत्यक्षवचनाज्ञाने [illegible] पूर्वपक्षे स्मृत्यधिकरणे नास्य पौनरुक्त्यमिति पूर्वोक्तदोषपरिहारस्तद
वस्थ एव ॥ यत्तु चंद्रिकायां स्वप्रयोजकगुणप्रयुक्तपरतः प्रामाण्यस्य मुख्यत्वेनाप्रामाण्यप्रयोजकदोषाभा
वप्रयुक्तस्वतःप्रामाण्यस्य जघन्यत्वात् आगमविरोधेषु नेतद्गृहीतस्मृतेश्च न स्वार्थपरत्वं किंतु विरुद्धागमानु
सारेणास्पष्टश्रुत्यादिनेयमिति पूर्वपक्षे प्रामाण्यस्य स्वतस्त्वेन स्मृत्यधिकरणासिद्धांत इति नोक्तपौनरुक्त्य-
मिति तदप्यसत् इहैव दुरागमादिप्रामाण्यप्रतिष्ठापविषयास्वतःप्रामाण्ये वक्तव्ये परतःप्रामाण्ये चांकानुत्था

नात्पौरुषेयाणामपौरुषेयवेदमूलकतया प्रामाण्यस्य वक्तव्यं तथा दोषाभावप्रयुक्तस्यापि तत्प्रामाण्योप
जीव्यतया जघन्यत्वेपि नस्यैवादरणीयत्वात् भ्रमादिमूलकत्वसंभावनया गुणप्रयुक्तत्वस्य दुरवधारणत
यातत्रापि दोषाभावप्रयुक्तप्रामाण्यस्यैव युक्तत्वाच्च ॥ यत्तु श्रुतेः स्वतःप्रामाण्यं दुरागमानां समबलतां चां
गीकृत्यैव पूर्वपक्षिणांगीकृतस्वतःप्रामाण्यश्रुतिपरिगृहीतस्मृत्यैव तदप्रामाण्येन सिद्धांते कृते इहैव स्व-
तःप्रामाण्यव्यवस्थापनप्रयासोनावश्यकः न चैवं परतःप्रामाण्ये शंकानुत्थितिस्तत्प्रकारस्योक्तत्वात् पौरु
षेयस्याप्याप्तिमूलत्वेन संवादेन वा प्रामाण्यसंभवेन तस्यापौरुषेयवेदमूलतयैव प्रामाण्यमिति नियमस्या
सिद्धेः भ्रमादिमूलकत्वसंभावनयेत्यादिकं तु सिद्धांतयुक्तिरेवेति नेदानीमुद्भावनार्हमिति तदसत् ॥ पूर्वप
क्षिणः श्रुतेः स्वतःप्रामाण्यपरिग्रहस्य तद्व्यवस्थापकोक्तयुक्त्यनुसंधानमूलकत्वेनैव वक्तव्यतया तद्धि स्मर
णेन तद्बाध्ययुक्त्या परतःप्रामाण्ये शंकानौचित्यस्य बालेनापि सुबोधत्वात् ॥ आप्तिसंवादयोरप्यमूलयोरसं-
भवेनापौरुषेयवेदस्यैव तन्मूलत्वकल्पनाया न्याय्यत्वेन पौरुषेयाणामपौरुषेयवेदमूलतयैव प्रामाण्यमि
ति नियमावश्यकत्वाच्च ॥ यदपि चंद्रिकायामस्य समन्वयप्रस्तावायोक्तलक्षणे ब्रह्मणि ऋगादिशास्त्रं प्रमा
णमिति प्रतिज्ञारूपत्वेन स्वपक्षे साधकोपन्यासपरत्वात् तस्य च समन्वयोपपादकाविरोधव्युत्पादनाय बाध
कोद्धारपरत्वात् तद्द्वयमर्थवदित्येतदधिकरणस्मृत्यधिकरणयोः पुनरुक्तिवारणं तदपि न सत् ॥ समन्वय

प्रस्तावायोक्तमनादिकृत्साधकोपन्यासेऽ[illegible] प्रयोजनं मत्वाह मानादेर्गोचरत्वं ज्ञानपर्यवसायिनैतत्स्य
खैनदविषयत्वादिति तन्निकृपत्वान्नैमित्यान्[illegible]शास्त्रे प्रमाणान्तरनिषेधे [illegible] ऋग्वादिभिस्तस्य बाल्य
स्यविष्णुपरत्वाभिधानस्य सूत्रेऽनिरूपितत्वे [illegible] कांक्षायां नाभिधानेन सर्वत्र तुल्यत्वादनावश्यको व्यापः
यदि ऋग्वादिशास्त्रस्य ब्रह्मणि प्रामाण्यं [illegible] तदा तत्र [illegible] रूढेः तद्ब्रह्मणि विद्यासिद्धानां सर्वं तस्य तत्
पसमन्वयप्रतिपादकाध्यायानुत्थानं [illegible] न्यायादिकिंप्रयोजनं [illegible] कार्यैः स्थितेन समन्वयेऽसुज्ञातत्वं प्रयो
जकमित्यादि किं केन संगतमित्याद्याशंकायां [illegible] न त्याज्य यदि समन्वयप्रस्तावा
योक्तशुद्धयोग्यक्षणिक ऋग्वादिशास्त्र [illegible] प्रतिज्ञात् प्रभिद [illegible] रणं न दोक प्रमाणप्रतिज्ञायां प्रमा
णान्तरज्ञातत्वस्वेय प्रयोजकत्वात् [illegible] मूलकसूत्रे ब्रह्मभिधाद पतिज्ञगज्जन्मादिकारणत्वस्या-
नुमानेनैव सिद्धत्वात् [illegible] लेनेत्यर्थं व्रत्वसर्वज्ञ किंत्यादिसिद्धाङ्गुणपूर्त्यादेरपि सिद्धत्वात् प्र
माणान्तरगम्ये चार्थे वेदस्य तात्पर्यकल्पनायोगात् [illegible] विचारो न कर्तव्यः इति ऋग्वादिशास्त्रं यथाकथंचिन्नेय
मिति पूर्वपक्षयोक्तलक्षणं ब्रह्म नानुमानादिगम्यं किंतु शास्त्रप्रमाणकमेवेति निमित्तांतकरणमेवोचितं न तु ज्ञ
गत्कारणत्वस्यानुमानेनान्यसाधारण्येनासिद्ध्याशंकायां अन्यस्यैनदविषयत्वप्रतिपादनेनेति समन्वयप्र
स्तावायोक्तप्रमाणप्रतिज्ञासाधकोपन्यासेऽज्ञातत्वं प्रयोजकमित्यादेः सुसंगतत्वस्य विदुषां स्पष्टत्वात् ॥

किंचात्र साधकोपन्यासस्यैवाभिमतत्वं त्वदीयभाष्येत्र दुरागमताबोधकस्मृतिवचनोदाहरणमनुपयुक्तमेव
स्यात् शास्त्रप्रमाणकत्वोक्त्यावर्यसिद्धस्य जगत्कारणताया मनुमानाप्रामाण्ये दृष्टांतीकृतागमाप्रामाण्यस्य
स्मृत्यधिकरणप्रमेयस्यात्रानुवाद एव तादृशस्मृतिवचनोदाहरणेनक्रियते दुरागमाप्रामाण्यमुपपादयितुमि
तितु चंद्रिकाद्युक्तं न सत् तथासति स्मृत्यनुमानयोरशास्त्रत्वाविशेषात् स्मृत्यधिकरणे जगत्कारणतायां स्मृ
त्यप्रामाण्ये दृष्टांतार्थमनुमानाप्रामाण्यस्यापि तत्र तदधिकरणप्रमेयस्यानुमानाप्रामाण्यमुपपादयितुमनु
वादौचित्येन तदकरणेन न्यूनतापा दुर्वारत्वात् अनुमानस्यातिदुर्बलत्वात्तदनुक्तिरिति चंद्रिकोक्तं तु न सत्
उद्वेजयति सूक्ष्मोपि चरणे कंटकांकुर इति न्यायेन मंदविषयन्यायेनच तदप्रामाण्योपपादनेन पृथक्तन्निरा
सस्यौचित्यात् ॥ एतेनात्रानुमानेन पूर्वपक्षे जगत्कारणत्वस्य तदयोग्यत्वेन सिद्धांतः स्मृत्यधिकरणे तु दोषाग
मेन पूर्वपक्षे तदप्रामाण्येन सिद्धांत इति भेद इति चंद्रिकोक्तं निरस्तं तथा सत्यभाष्ये दुरागमताबोधकस्मृतिवचनो
दाहरणस्याप्रकृतत्वापातात् किंच शास्त्रप्रमाणकत्वोक्तिमात्रेण कथमन्येषामार्थिकमप्रामाण्यं चक्षुःप्रमाण
केपि घटादौ त्वक्प्रमाणकत्वदर्शनात् प्रत्यक्षप्रमाणकेपि वह्न्यादावनुमानप्रमाणकत्वदर्शनाच्च नच सर्वं वा
क्यं सावधारणमिति न्यायेन शास्त्रमेव योनिः प्रमाणमिति विग्रहेण शास्त्रप्रमाणकपदेन शास्त्रैकप्रमाणकमि-
ति चानावेदविदिति औपनिषदमिति श्रुतेश्च सिद्धांतकरणादर्थादन्येषामप्रामाण्यमिति वाच्यं तथासति ना

वेदानिर्दिष्ट [illegible] साक्षात्कारस्य मोक्षसाधनत्व-

सिद्ध्यर्थं [illegible] गुणस्य साधारण्यं

तेन [illegible] निरासाय सूत्रं प्रयोक्तुं

लक्षणां [illegible] प्रदर्शितद्वितीयवर्ण-

करीत्यादिक [illegible] ज्ञानफलत्वम् [illegible] स्थान

स्याद्वि [illegible] प्रवृत्तस्य शिष्यस्य त

तन्मुमुक्षोर्ज्ञानेन [illegible] स्यात् ॥ किंचादिकोऽप्येवं जिज्ञासालाभप्रयोजकस्य योगवृद्ध-

त्वेन नृपाधिकरणनिर्णीतिः ब्रह्मशब्दार्थस्य तत्त्वाभ्युपगमे गुणपूर्णत्वादेः सिद्धिप्रयोजकत्वेन तल्लक्षणत्वोक्तेः

कारणत्वस्य तत्त्वाभिन्नत्वेन निर्णयात् [illegible] रसाधारण्यशंकोन्मेषाति जिज्ञासाविधायकवाक्ये कार-

णत्वमनूद्य न स्यात् [illegible] कारणत्वस्य अन्यगतत्वे सोऽपि ब्रह्मशब्दार्थः स्यादिति शंका-

यां किं बाधकमिति चेत् तदेव ब्रह्मपरत्वं केवलानां ॥ नास्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तो महामुने तन्नैव मुख्यवृत्तो

यमन्यत्र ह्युपचारत इति श्रुतिस्मृत्युपगताविवेकनिष्ठन्दिज्ञानस्यैव बाधकत्वात् कारणत्ववचनादेवन्त्रि

त्याग आकाशपदद्वेति नेत्वाकाशाधिकरणोऽहि परोपरीयस्त्वाद्यसाधारणनिरवकाशलिंगेनाकाशपद

रूढित्यागेपि साधारणतया शंक्यमानकारणत्वबलात् रूढित्यागायोगात् किंच रुद्रादीनां जीवकोटित्वं तन्मापे
णकारणत्वस्य साधारण्यशंका ब्रह्मकोटित्वं तन्मापेणवानाद्यः कारणत्वपूर्णत्वाभ्यां जिज्ञास्ये जीवभेदे निश्चि
ते जीवभेदकस्य कारणत्वस्य कर्पजीग साधारण्यशंका यत्तु गंधवत्त्वलक्षणेन पृथिव्या इतरभेदे निश्चितेपि
कालिकेन तस्य कालसाधारण्येन कालेति व्याप्तिशंकेव जिज्ञासे कारणत्वेन रुद्रादिजीवभिन्नत्वनिश्चयेपि
अनुमानेन कारणत्वस्य जीवविशेषगतत्वमास्यातादृशानिश्चयविघटनेन पूर्वपक्षप्रवृत्तिरिति तदसत् सं
बंधौदासीन्येन सामान्यतो गंधवत्त्वस्य कालसाधारण्येन तस्यासाधारणधर्मत्वरूपव्यावर्तकलक्षणत्वस्याभा
वेन तेनेतरभेदनिश्चयासंभवेन समवायेन गंधवत्त्वस्यैव लक्षणत्वेन तेनेतरभेदे निश्चिते तस्येतरकालादि-
साधारण्येनातिव्याप्तिशंकाया असंभवात् केषांचिन्ने व्याधिकादिनाम दर्शितत्वाच्च स्वमतिपरिपाक एव तथोक्ति
रिति विदुषां स्पष्टत्वात् किंचानुमानेन कारणत्वस्य साधारण्यसिद्धावपि किं तेन स्यात् शास्त्रानारंभ इति चेत्
कुतः कारणत्वस्य साधारण्ये सिद्धे शास्त्रानारंभः कारणत्वस्य साधारण्ये जिज्ञास्ये श्रुतस्य ब्रह्मशब्दस्य जीव
विशेषपरत्वसंभवात् जीवान्यधर्मिकगुणपूर्णत्वप्रकारकजिज्ञासाया असंभवेन शास्त्रानारंभ इति तु योगरूढब्र
ह्मशब्दस्यान्यपरत्वासंभवस्य पूर्वमेवावेदितत्वात् उक्तमेव अनुमानादिनैव कारणत्वसिद्धेः शास्त्रानारंभ इति
चेत् रुद्रादीनां हि तत्सिद्धिरनुमानादितः स्यात् विष्णोस्तु तत्सिद्धये शास्त्रमारभ्यतैव अनुमानादेव तत्सिद्धिस्तु

नतरामप्यभिमतानपासति लाघवतर्कसहकृतेन कर्त्रनेकत्वे वक्ष्यमाणप्रतिकूलतर्कपराहत्यात्ततैक्यस्यैव सि
द्ध्यात् कथं कारणत्वस्य साधारण्यशंका लोके गजगवयगर्दभादीनां पटपटादीनां च निर्मातारो विज्ञाता या एव दृश्य
न्ते इति सुधायामुक्तत्वाल्लोकदर्शनानुसारेण कर्तारं कल्पयतो गौरवाश्रयणमेवोचितमिति न लाघवतर्कसहका
रेण कर्त्रैक्यसिद्धिरिति जल्पनं तु न स्वकीयाभीष्टसाधकं तथा सति लोके कर्तॄणां स्वोचितकर्तिपथकर्तृत्वस्यास
र्वज्ञत्वस्यैव च दर्शनात् जगत्कर्तॄणामपि तथात्वसिद्ध्यापत्त्या यावज्जगत्कारणत्वस्य ब्रह्मलक्षणस्य साधारण्य
शंकयातिव्याप्तिपूर्वपक्षोत्थानासंभवात् नापि रुद्रस्येश्वरकोट्यंतर्भावेणेति द्वितीयः पक्षः साधुः एकमेवेत्यादिश्रुति
विरोधात् तत्रत्यैकमिति शब्दस्य साधारण्याद्यर्थकत्वमालंब्य पूर्वपक्षप्रवृत्तिरिति परोक्तमसत् तथापि न ब्रह्मा
नेशान इत्यस्याविरोधापरिहारात् क्वचित् प्रकरणादिवशात्साधारण्याद्यर्थकत्वेप्येकमेवेत्यादिश्रुतिस्थैकश
ब्दस्य सर्वतांत्रिकसिद्धस्वसजातीयद्वितीयरहितत्वस्य स्वरसतः प्रतीतस्य त्यागेन साधारण्याद्यर्थकत्वकल्प
नायां पूर्वपक्षिणः प्रमाणानुपलंभाच्च न ब्रह्मा नेशान इत्यनेन तादृशस्वरससिद्धैकपदार्थस्य विवरणाच्च नैवे
ह किंचनाग्र आसीत् आमूलमनाधारमिमाः प्रजाः जायंते दिव्यो देव एको नारायण इति सुबालोपनिषदि नैवेह किं
चनेत्युपक्रमानुरोधेन मूलकारणैक्यावधारणेन एकशब्दस्य साधारण्यार्थकत्वशंकानुदयाच्च किंच मोक्षकत्वेन
विष्णुर्जिज्ञास्यश्चेद्बंधकत्वेनाजिज्ञास्योपि स्यात् न चायमबंधकः जीवस्याबद्धत्वस्य बद्धत्वयोरयोगेनान्यबध

त्वेनान्येन्मस्य नेनन स्यानेनन स्यवेशाधीनत्वेनपुनरीशस्य बंधकत्वेनाजिज्ञास्यता अनधीनत्वेस्वानधीनकृताहूं धान्यो
चकत्वंनेश्वरस्येतिनाजिज्ञास्यत्वमितिमासेप्रसन्नस्य बंधकत्वं प्रसादहेतौ ज्ञानेजिज्ञासायाः कर्तव्य त्वानुकूलमे
वनप्रतिकूलं सूत्रे सृष्ट्यादिहेतुत्वोक्तिस्तु मोचकत्व संभावनार्थेतिसिद्धांत इतितत्त्वदीपचंद्रिकायां ॥ मोक्षदत्वात् ब्रह्मजि
ज्ञास्यमित्युक्तं प्रथमसूत्रेतत्कथमितिशंकायामनेन सूत्रेणतदुपपाद्यत इत्यनुव्याख्यानस्यभाववर्णनेन नहि जिज्ञा
सत्वं तद्ब्रह्मेति वाक्यस्थं ब्रह्म किं जीव उत विष्णुरिति चिंतनेति ग्रंथनेचजीवभिन्नजिज्ञास्येश्वरस्यैवजगत्कारणलक्षण
लक्ष्यत्वोक्तेरुद्रस्येश्वरत्वेतस्यानुमानेन सृष्टिहेतुत्वेनविष्णोरिवमोचकत्वं संभावनात्तज्ज्ञानात् शिवंशांतिमत्यंतमेति
यदा चर्मवदाकाशं वेष्टयिष्यंति मानवाः तदा शिवमविज्ञाय दुःखस्यांतो भविष्यतीत्यादिश्रुतिभिश्च तस्य मोक्षदत्वस्याप्युक्तेश्च
लक्ष्यत्वस्यैव संभवान्नातिव्याप्तिशंकासंभवोपि यत्तु रुद्रस्येश्वरत्वेपि जगत्कर्तृत्वलक्षणलक्ष्यविष्णुभिन्नत्वेनातिव्या
प्तिरत एव तद्ब्रह्मेति वाक्यस्थं ब्रह्म किं जीव उत विष्णुरिति चिंतायां विष्णुरिति शाङ्क इति तन्तुच्छं रुद्रस्येश्वरत्वे जगत्कारण-
त्वे चान्नमयप्राणमयादीनामिव जगत्कारणे श्रुत्यनुरोधेन तस्य विष्णुना समं सविशेषाभिन्नत्वस्यैव वक्तव्यतया
लक्ष्यत्वानपायात् अन्नमयादिषु ब्रह्मशब्दश्रवणात्तथात्वमिति चेत् ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलमित्यादिश्रुत
रुद्रेपि ब्रह्मशब्दश्रवणाविशेषात् यत्तु ऋतमित्यादिमंत्रे पूर्वार्धोक्तविशेषणव्यपरब्रह्मप्रतिरूर्ध्वरेतं प्रतिष्ठितमपरं ब्रह्म
नीलपिंगलार्थरूपविरूपाक्षशब्देनोच्यते अन्यथा कृष्णपिंगलं नीललोहितमित्यनयोरेकतरस्य पौनरुक्त्यापत्तेः न

देवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनामिति श्रुत्या तदेकवाक्यतापन्नेभ्यः संभूतो हिरण्यगर्भ इत्युक्तसंयुक्तेभ्यः
के श्रुतेनन्दीश्वरोऽपि च लक्ष्मीपत्याधिपतित्व लक्ष्मीपतित्वलिंगेन क्रतादिशब्दानां विष्णुपरत्वनिर्णयात् किंच ब्रह्माधिपतिर्ब्र
ह्मणोऽधिपतिरित्युत्तरवाक्ये ब्रह्माधिपतिरित्यस्य बहुव्रीहिरूपता अवश्यमनुसरणीया अन्यथा तन्त्रत्व ब्रह्मशब्द
स्य स्वरितांतत्वानुपपत्तेः समासांतरत्वेऽपि अनंतोदात्तत्वेनानुदात्तं पदमेकवर्जमित्यस्य प्रसंगेन समासस्य स्वरि
तपूर्वपदांतत्वानिर्वाह इति तदसत् ॥ पिंगललोहितपदयोः नमस्ताम्राय चारुणाय चेत्यत्र ताम्रारुणशब्दयोरिव
भिन्नार्थतया पौनरुक्त्याभावात् पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमित्यादावात्मेश्वरमित्यनेनानन्येश्वरत्व
मिव ब्रह्म परमात्मरूपमेवाधिपतिर्यस्येति बहुव्रीहिणानन्याधिपतित्वस्यैव बोधनात् अन्यथा ब्रह्मणोऽधिपति
रित्युत्तरवाक्यासंगतेः न च रुद्रो ब्रह्माणं प्रत्याधिपतिरिति त्वयेष्यते नापि ब्रह्मशब्दो यजीनवाचीत्यपि च कुंठावर्ं
ईश्वरः सर्वभूतानामित्यनेन पौनरुक्त्यापत्तेः अनन्याधिपतित्वद्योतनार्थे वजीयोऽन्यं हिरण्यगर्भं प्रत्याधिपतिरित्यु
क्तिरर्थवती भवति नान्यथा किंच सदाशिव इति दोषगंधराहित्यं ओमिति प्रणववाच्यत्वं चोच्यमानं रुद्रस्य पर
ब्रह्मरूपतां गमयति यो देवानां प्रथमं पुरस्तात् विश्वाधिको रुद्रो महर्षिः ॥ हिरण्यगर्भं पश्यत जायमानं
सनो देवः शुभया स्मृत्या संयुनक्तु ॥ यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चिदित्युपक्र
म्य यो वेदादौ स्वरः प्रोक्त इत्यादिना तस्यैव रुद्रस्योंकारवाच्यत्वमुक्त्वा यः परः स महेश्वर इति तस्यैव

परब्रह्मशब्दवाच्यमहेश्वरत्वनिर्णयात् स एष चाम्भत ९ सत्याभिति मंत्याभिज्ञायते न च तत्र लक्ष्मीपति
त्वलिंगासंभवः शंकापदमारोहति तत्र माहेश्वरी लक्ष्मीर्मूर्तिर्मूर्तिमतः प्रभोरित्यारभ्य तस्यां क्रमध्यमारू
ढशक्तिर्माहेश्वरी परा महालक्ष्मीरिति व्याख्यास्यामासर्वमनोहरेति वायुसंहितादिपुराणवाक्यैर्महादेव्या
मुमायामपि लक्ष्मीशब्दवाच्यत्वस्य प्रसिद्धत्वात् नापि श्रीश्च ते लक्ष्मीश्च पत्न्याविति यत्रोक्त श्रीपतित्वलिंगासं
भवः समानप्रकरणे शाखांतरे ह्रीश्च ते लक्ष्मीश्च पत्न्याविति मंत्रे ह्रीरवाच्योमापतित्वलिंगस्यापि
श्रवणेन वाजसनेयकशाखास्थोक्तमंत्रगतश्रीशब्दस्योमायामेव पर्यवसानात् ॥ न च वैपरीत्यं शांक्यं-
श्रियं लक्ष्मीमौपलामंबिकां गां षष्ठीं जयामिंद्रसेनेत्युदाहुरित्याथुण्यसूत्रे श्रीशब्दस्य गौर्यादिष्टत्वा
नद्दलेखायाः कमलायां प्रयोगानुपलंभात् उपलंभे वा तल्लिंगस्य शिवविष्णुसाधारण्यान्न तेन ब्रह्मशब्दस्य वि
ष्णुमात्रपरत्वनिर्णयः अत एव शाखाभेदभिन्नपाठाभिप्रायेण लैंगे ब्रह्मनारायणकृतशिवस्तोत्रे नमोऽस्तु लक्ष्मी
पते श्रीपते ह्रीपते नमइत्युपबृंहणं संगच्छते नापि रुद्रसमुद्रांतस्थत्वलिंगासंभवः प्रजापतिश्चरति गर्भेऽन्त-
रित्यष्टावित्यादौ समुद्रांतस्थत्वस्याष्टमूर्तौ रुद्रेऽपि प्रसिद्धेः नारायणेऽपि समुद्रांतस्थत्वं प्रसिद्धमिति चेद्बाढम
स्तु प्रसिद्धं नैतावता रुद्रस्य पक्षच्छेदः तस्माद्विष्णुरुद्रयोरुभयोरपि परब्रह्मश्रुतिलिंगादीनामुपलंभात्तयोरभेद
स्यैव श्रुतितात्पर्यविषयत्वात् रुद्रस्यापि जिज्ञास्यब्रह्मलक्षणलक्ष्यत्वमेव रुद्रस्येश्वरत्वपक्षोऽङ्गीकरणीयम-

न्यथाश्रुतीनामनिर्णायकत्वप्रसंगात् यत्तु रुद्रस्य विश्वाधिकत्वेपि विष्णोरेव ब्रह्मत्वं सिद्ध्यमिति विष्णुरेव जिज्ञा-
स्यं जगत्कारणत्वलक्षणलक्ष्यं ब्रह्मेति तद्विष्णोरुद्रात्मकत्वे रुद्रस्यैव ब्रह्मत्वं सिद्ध्यमिति न त्वस्योक्तलक्षणालक्ष्यत्व-
मित्यनेनोत्तरितं एतेन एको ह वै नारायण आसीदिति श्रुतौ परमकारणे नारायणपदश्रवणात् तस्य रुद्रपरत्वेण
त्वानुपपत्तेस्तदनुरोधेन सावकाशश्रुत्यंतराणि नेयानीति न रुद्रस्योक्तलक्षणलक्ष्यजिज्ञास्यपरब्रह्मत्वमिति वा
चोयुक्तिरपि निरस्ता वाक्यांतरेष्वादिरुद्रे अत्यंतप्रसिद्धानां शिवहरेश्वरेशानादिशब्दानां श्रवणेन वक्ष्यमाणाप्य-
प्यदीक्षितोक्तिरीत्या तत्र मते सृष्टिवाक्यानामनेकप्रभुपरत्वस्याप्यविरोधसंभवेन प्रसिद्ध्यतिक्रमानौचित्यात् वि-
रोधपरिहाराय तदैक्याभ्युपगमस्यैव युक्तत्वात् अन्यथा नारायणशब्दस्यापि योगवृत्त्या शिवपरत्वसंभवेनानि-
र्णयप्रसंगस्य दुर्वारत्वात् न च णत्वायोगः नारायणस्येयं नारायणीत्यादिवत् नरायणस्यायं नारायण इति-
व्युत्पत्तौ बाधकाभावात् अत एव हरिवंशे नामानि तव गोविंद यानि लोके भवंति हि तान्येव मम नामानि नात्र का-
र्या विचारणेति कृष्णं प्रति शिववचनं संगच्छते यानि च विष्ण्वपेक्षया रुद्रापकर्षव्यंजकानि वचनानि तानि
विश्वाधिको रुद्रो महर्षिः जनितो ततो विष्णोः ब्रह्मविष्णुरुद्राः संप्रसूयंते इत्यादिवचनानीव कार्यभूतावताररुद्रप-
रतया नेतव्यानि तेषु हि रुद्रस्य विश्वशब्दाभिधेयाद्विष्णोराधिक्यस्य सोमशब्दवाच्याद्रुद्रात् विष्णोरुत्पत्तेश्च श्र-
वणात् अत एव क्वचित् ब्रह्मा क्वचिद्विष्णुः क्वचिद्रुद्रः प्रशस्यते नानेन तेषामाधिक्यं न्यूनत्वं वा कथंचन तत्तु कल्पीयत्

तांतमधिकृत्य महर्षिभिः पुराणानि प्रणीतानि विद्वांस्तत्त्वेन मुह्यतीति व्यवस्था कार्युपबृंहणं संगच्छते एतेन यदीय
पुराणानां तामसत्वं विष्णुपुराणानां सात्त्विकत्वमिति कल्पनं मतिदरिद्राणां निरस्तं शिवस्य विष्णोराधिक्यप्र-
तिपादकश्रुतीनां दर्शितत्वात् सांख्यं योगः पांचरात्रं वेदाः पाशुपतं तथा आत्मप्रमाणान्येतानि न हन्तव्यानि सूरिभि
रिति भारते शिवपुराणसमानार्थकपाशुपतागमस्याप्यात्मशास्त्रत्वेन प्रामाण्योक्तेः शंकरसंहितायां च विष्णु
पुराणानां तामसत्वं शिवपुराणानामेव सात्त्विकत्वमित्युक्तत्वेनानिर्णयापत्तावुक्तव्यवस्थाया एव शरणीक
रणीयत्वादधिकमानंदमयाधिकरणे वक्ष्यमाणत्वान्नेह प्रपंच्यते तस्माद्ब्रह्मजीवयोरीश्वरत्वे योभयथापि नात्याति व्याप्तिपूर्वप
क्षसंभवः यत्तेषां विकल्प्यास्मदीत्या पूर्वपक्षदूषणं तदभिमतेष्वत्याद्यधिकरणस्थपूर्वपक्षसमानयोगक्षेमं त
थाहि प्रधानादेः कारणत्वं किं ब्रह्मेतरांतर्भावेण ब्रह्मांत र्भावेण वा नाद्यः जगन्निव्याप्तसूत्रकेन भिविधपरि
च्छेदरहितत्वार्थकब्रह्मशब्देन तस्य मिथ्यात्वेव धृते कारणत्वशंकानुदयात् न द्वितीयः एकमेवेत्यादिश्रुति-
विरोधादित्युक्तौ नं अज्ञानतापापरेण चंद्रिकामण्डयाणवं जल्पितं बहुलं मोपयशाल्योदाहृतं कां कयादितित
दस्मदीयेष्वत्याधिकरणपूर्वपक्षरहस्याज्ञाननिबंधनमस्मदनभिमतोपालंभनं नत्वस्मन्मते जिज्ञास्यत्वा
भिमतब्रह्मलक्षणस्य प्रधानेतिव्याप्तिरिति पूर्वपक्षः येनोक्तविकल्पावसरः किं तु जिज्ञासासूत्रे मोक्षात्मनोप
सारमार्थिकं ब्रह्मपंचशेतिवेदांतप्रसिद्धं ताद्विचार्यमित्युक्तानि मायि सूत्याता हशामेव ब्रह्मजगत्कारणत्वादिनां

सकलवेदांतप्रतिपाद्याखिलसमर्थत्वं न संभवति स्वप्रकाशाद्वितीयानंदपरमपुरुषार्थरूपब्रह्मणोऽन्यस्य जडस्य प्रधानस्यैव जगत्कारणत्वाद्विना वेदांतप्रतिपाद्यत्वायोगादिति सिद्धांतमालंब्य सांख्यरीत्या पूर्वपक्षप्रवृत्तेरज्ञानतत्त्वादिकमज्ञानतापापरिहाराक्ये रेकिंतु धार्ष्यं संद्धिकाकूपयोर्वैषम्यं दूरादेतं कृतमित्यनेन समानयोगक्षेमत्वान्न खेदावहं ॥ यद्यपि संद्धिकायां महीमहीधरादि नानाकर्तृकं विभिन्नकार्यत्वात्प्रासादादिवदित्यनुमानेन जगतो नानाकर्तृकत्वसिद्धौ सर्वजगत्कर्तृत्वलक्षणं चेदसंभवः स्वभिन्नकृतिसाध्यजगत्कर्तृत्वस्य स्वस्मिन्नसंभवात् स्वयोग्यसकलजगत्कर्तृत्वलक्षणं चेदतिव्याप्तिरिति पूर्वपक्षाशयवर्णनं तदसत् एको ह वै नारायण आसीत् एकमेवाद्वितीयमित्यादिजगत्कारणैकत्वबोधकश्रुतिविरोधेन नानाकर्तृकत्वानुमानस्याशुचित्वबोधकश्रुतिविरोधेन नरशिरःकपालं शुचि प्राण्यंगत्वादित्याद्यनुमानस्येव कालात्ययापदिष्टत्वेन जगद्यदि अनेकस्वतंत्रकर्तृकं स्यात् तर्हि कस्यचित्सिसृक्षायां कस्यचित्संहारेच्छायां कस्यचित्पालनेच्छायां युगपत्सृष्टिस्थितिसंहारासंभवेन परस्परवैमत्येन जगतः सृष्ट्यादिकं न स्यात् जायमानं वा अनियतमक्रमिकं वा स्यादिति प्रतिकूलतर्कपराहतत्वेन च तदुपष्टंभेन पूर्वपक्षानुदयात् यत्तु अनेककर्तृकानुमानानां निरवकाशत्वेनैकादिशब्दानामनेकार्थकतया साधकाभावात्तेन नोक्तश्रुतिविरोधः अत एव न नरशिरःकपालशुचित्वानुमानतुल्यत्वं तत्रेवात्रोपजीव्यश्रुतिविरोधाभावात् मत्सरादिदोषशून्यनानाकर्तृकत्वानुमाने उक्तमति-

कूलतर्कपराहतेरसंभवान्निर्दुष्टानुमानेनैव पूर्वपक्षप्रवृत्तिरितिनियमाभावस्यासकृदावेदितत्वाच्च किंचप
रमतेजगद्व्यापारवर्जमित्यधिकरणेनानाकर्तृकत्वं जगतः पूर्वपक्षिणोऽभिप्रेतं सगुणब्रह्मोपासकानांनिरं
कुशमैश्वर्यमित्यादिभाष्यात् ईश्वरनानात्वं पूर्वपक्षफलमितिटीकाग्रंथाच्च तत्र जगत्कारणैकत्वबोधकोक्त
श्रुतिविरोधात्परस्परवैमत्येन सृष्ट्याद्यनुपपत्तेस्तदुक्तासमद्रीत्यैतदधिकरणीयपूर्वपक्षदूषणेनैवजग
द्व्यापारवर्जमित्यधिकरणीयोक्तपूर्वपक्षानुदयस्यान्यमतेपीत्यादितदप्यसत् एकादिपदानामनेकार्थतया
सावकाशत्वेपि नब्रह्मानेशान इत्यादेः सऐक्षत तदैक्षत इत्याद्येकवचनावधृतैकत्वस्याविरोधापरिहारस्या
सकृ दावेदितत्वात् सावकाशानिरवकाशान्यायस्यागृहीतप्रमाणाभावोभयविषयत्वमेवान्यथाऽयंगौर-
श्व इत्यादेरपि सगौर्नाश्व इत्यादिसंकोचकत्वं प्राबल्यं वा स्यादित्यस्याद्वैतसिद्धिस्थितदीयटीकादर्शिनां स्पष्टत्वा
त् निश्चितप्रमाणाभावश्रुतिविरोधेन प्रतिकूलतर्कपराहतत्वबाधादिदोषदुष्टानुमानविषयगवेषणायोग्य
त्वात्स्वर्यलिंगैरुपक्रमादिभिः कर्त्रैक्यपरत्वेनावधृतेश्रुतेरपिनिरवकाशत्वात्कर्त्रैक्यबोधकोक्तप्रबलश्रुत्या-
सविशेषणेविधिनिषेधौविशेषणमुपसंक्रामतः सतिविशेष्येबाधे इतिन्यायेन नानाकर्तृकानुमानस्यज्ञाने-
च्छाकृतिनिरूपकर्तृत्वनानात्वविषयतया सावकाशत्वकल्पनासंभवाच्च निर्णीततात्पर्यकत्वमेवोक्तश्रुतीनांप्र
बलत्वं अतएवेत्यादिकमपि न विचारसहं प्राबल्यमागमस्यैवजात्या तेषु त्रिषु स्मृतमितिस्मृत्याश्रुतीनामाग

मत्वेनैव प्राबल्योक्तेर्नरशुचित्वानुमानस्याशुचित्वबोधकागमत्वेनैवागमबाध्यता यथाः सर्वसंमतत्वात् किंचाशु
चित्वबोधकागमस्य शुचित्वानुमानोपजीव्यत्वं तेन च प्राबल्यं बाधकत्वलक्षणमपि न संभवति तथाहि अनुमाना
पेक्षितसाध्यादिग्राहकत्वरूपमेवान्यस्यासंभवात् नत्वशुचित्वागमः शुचित्वानुमानापेक्षितशुचित्वरूपसा
ध्यादिग्राहकः येन तदुपजीव्यः स्यात् अथ शुचित्वबोधकागमस्य सजातीयत्वेन तस्योपजीव्यता तर्हि साजात्य
स्यागमत्वरूपतया आगमत्वेनैव तस्य बाधकता भासतां नोपजीव्यत्वेन किंचापेक्षितार्थग्राहित्वादिमात्रेण चे
दुपजीव्यता तथा च बाधकत्वं तदा अपेक्षितप्रतियोगिग्राहकत्वेनेदं रजतमिति भ्रमस्य बाधोपजीव्यत्वात्
नेदं रजतमिति बाधबुद्धेरनुदयप्रसंगात् अत एव मत्सरादिदोषशून्यनानाकर्तृकानुमाने नोक्तप्रतिकूलदो
षपराहतिरिति भूशूकत्वं तस्यापि कर्तैक्यश्रुतिबाधितत्वात् दृष्टांतभूते प्रासादादौ समत्सरनानाकर्तृकत्व
स्यैव दृष्टत्वेन साध्याप्रसिद्ध्या तादृशानुमानस्य दृष्टांतापेक्षत्वेनासाधकत्वात् घटादावेककर्तृके उक्त
साध्यहेत्वोर्व्यतिरेकयोर्व्याप्तिग्रहस्यापि न संभवति समनस्कानां जीवानां मत्सरादिदोषवैश्यत्वेन ईश्व
रनानात्वस्यानुमानात्प्रागसिद्धेर्मत्सरादिदोषशून्यनानाकर्तृकत्वरूपप्रतियोग्यप्रसिद्ध्या तद्व्यतिरेका
प्रसिद्धेः मत्सरादिदोषशून्यनानाकर्तृकत्वाभावस्य घटवृत्त्यां तद्व्यर्थविशेषणघटितत्वेन घटादावुक्तसाध्य
हेतुव्यतिरेकयोर्व्याप्तिग्रहासंभवाच्च तथाहि क्षित्यादिकं कर्तृजन्यं कार्यत्वादित्यनुमाने शरीरजन्यत्वस्यो

पाधित्वमाशङ्क्य यद्व्यतिरेकस्य यदभावव्याप्यत्वं तस्यैव तद्व्यापकत्वमित्यंशो नुकूलतर्काप्रसरादिति नि
षेधमात्रं व्याप्तिस्तादिकं न कर्तृजन्यं शरीराजन्यत्वादिति तादृशोपाध्यभावेन साध्याभावानुमाने व्यभिचार
शङ्कायां शरीरजन्यत्वं यदि कर्तृजन्यत्वव्यापकं न स्यात्तदा कर्तृजन्यत्वाभावव्याप्याभावप्रतियोगिनस्या
दिति तन्निवर्तकतर्कोनावतरति लाघवेनजन्यत्वाभाववत्त्वेनैव व्याप्यत्वसंभवात् शरीरविशेषणवैयर्थ्या
दिष्टापत्तित्वान्न शरीरजन्यत्वं कर्तृजन्यत्वव्यापकं नोपाधिरितीश्वरवादादौ मण्यादावुक्तदिशा मत्सरादिदो
षशून्यनानाकर्तृकत्वं यदि विचित्रकार्यत्वव्यापकं न स्यात्तदा विचित्रकार्यत्वाभावव्याप्याभावप्रतियोगि
न स्यादिति तर्कोनावतरति शून्यांतविशेषणवैयर्थ्येन नानाकर्तृकत्वाभाववत्त्वेनैव व्याप्यत्वसंभवेनेष्टापत्ति-
त्वान्मत्सरादिदोषशून्यनानाकर्तृकत्वरूपप्रकृतसाध्ये विचित्रकार्यत्वरूपप्रकृतहेतुव्यापकत्वासंभवेनप्रकृ
तहेत्वभावो यदि प्रकृतसाध्यव्यापको न स्यात्तदा प्रकृतसाध्यात्मकप्रकृतसाध्याभावाभाववन्निष्ठव्यापकतानि
रूपितव्याप्यताकाभावप्रतियोगि न स्यादिति तर्कस्यापि प्रकृतसाध्ये प्रकृतहेतुव्यापकत्वस्योक्तरीत्याभावेने
ष्टापत्त्यसंभवेन प्रकृतसाध्याभावप्रकृतहेत्वभावयोर्व्याप्यव्यापकभावाग्रहात्तन्न च स्वसमानाधिकरणव्याप्यता
वच्छेदकधर्मांतरघटितत्वरूपव्यर्थविशेषणत्वस्यैव व्याप्यतानवच्छेदकत्वनियमात् प्रकृते च नानाकर्तृकत्वत
पर्याप्तावच्छेदकताकप्रतियोगिताकाभावत्वसामानाधिकरण्यस्य मत्सरादिदोषशून्यत्वघटिततादृशधर्मपर्याप्ता

वच्छेदकताकप्रतियोगिताकाभावस्य तादृशाभावयोर्भेदे [illegible] तदंशनिवेश [illegible] स्य-
व्याप्यतानवच्छेदकत्वप्रयोजकोक्तव्यर्थविशेषणत्वाभि [illegible] साध्या-
भावयोर्भेदेऽपि मणिकारेणाशरीरजन्यत्वाभावे व्यर्थविशेष [illegible]
यव्याप्यतावच्छेदकत्वाभिधानियमेनोक्तनियमस्य निर्मूलत्वा [illegible] अभिधेय-
कव्यभिचारशंकानिवर्तकविपक्षबाधकतर्कप्रसरनिरूपणं [illegible] वादे
मणौ धूमविशेषादौ चंदनवन्ह्यादेः कारणत्वाद्विपक्षबाधकेन विशिष्टस्य व्यापकत्वा [illegible] हेतु-
भावव्याप्यत्वं यत्तु विपक्षबाधकं नास्ति तत्र विशिष्टव्यापकत्वाभावो [illegible] प्रतिपादितं येन [illegible] नियम-
तं स्यैव मणिकारेणाप्राणां पार्थिवं तूपादिषु पंचसु मध्ये गंधस्यैव [illegible]
भयारकस्यापि न वैयर्थ्येन योक्तविशेषणघटितस्य हेतुताव [illegible] नाविधाभ्यास-
महादिरुक्तं दीधितिव्याख्यायां गदाधरादिभिरपि साध्यवद्भिन्ना [illegible] वृत्तित्वमिति लक्षणघटकसा-
ध्यवद्भिन्नश्चासौ साध्याभाववांश्चेति कर्मधारयसमासाश्रयणे साध्यवद्भिन्नावृत्तित्वस्यैव [illegible] साध्याभा-
वांशवैयर्थ्यमित्युक्तं च संगच्छते तदुक्तनियमांगीकारे तु [illegible] स्यात् एतच्च गदाधरीव्याख्यायां न्याय-
रत्नाभिधायां विस्तरेण प्रतिपादितमस्माभिः॥ किंच परमते योत्यादिकं प्रभाकरमेव सगुणब्रह्मोपासकानां नि

[illegible] मिति फलश्रुतेरिति पूर्वपक्षेन एकमेवाद्वितीयमिति श्रुतिविरोधस्तस्याः निर्गु
[illegible] हद्वैश्वर्यस्य निरतिशयत्वादीश्वरभेदादनेकमत्येन जगदुत्पत्त्यादिव्यवस्था
[illegible] त्परमेश्वराधीनतया जगदुत्पत्त्यादिव्यवस्थोपपत्तिरिति आनंदगिरायां स्पष्ट
[illegible] लमिति टीकाग्रंथे तन्नानात्वे किमनिष्टमित्याकांक्षायामुक्तानिष्टमिति शेषपू
[illegible] रणीयस्तीयपूर्वपक्षोत्थिति दूषणेन जगद्व्यापारवर्जमित्यधिकरणीयासदी
[illegible] नयबोधविजृंभितेवेति विदुषां स्पष्टमेव अथवा विदुषां निरंकुशैश्वर्याणां किं तेषां स
[illegible] धेसमप्रधानानां नियमेनानेकमत्यदर्शनेनैकस्य सिसृक्षायामपरस्य संजिहीर्षा
[illegible] तापरयोरपि नेश्वरत्वं कार्यविघातादितिसमनस्कानां च तेषामित्यनेना
[illegible] र्तिनां तेषामागंतुकैश्वर्याणामगृह्यमाणविशेषतया कस्यचित् प्राधान्यायो
[illegible] ववक्तव्यमिति ॥ एतेनेत्यादिना द्वितीयपक्षस्य भाष्यकारेण सिद्धांतभाष्ये
[illegible] तेः सिद्धांतयुक्तित्वेन न तयोक्तपूर्वपक्षानुपपत्तिः ॥ अथैवं तर्हि मन्मतेपि
[illegible] भाने सिद्धांतयुक्तित्वान्न तेन पूर्वपक्षानुदयकथनं तत्प्रयुक्तमुक्तं हि चंद्रिका
[illegible] माने पुश्रुतिबाधादेरित्यादीति चेत्कथं सिद्धांते श्रुतिविरोधान्नानाकर्तृकत्वा

मानबाधः श्रुतिश्चापि विष्णुरुद्रादिनानाकर्तृप्रतिपादनस्य दृष्टत्वात् न्यायांतरे श्रुतेरेकविषयकत्वं निश्चितुमइति
चेत् कथं तर्हि शास्त्रयोनित्वसिध्यांतेन नानाकर्तृकत्वपूर्वपक्षनिरासः एकमेवेति शास्त्रादेव तन्निषेध इति चेत् किं
तदेकमित्यनिश्चयवतो जगत्कारणत्वस्याविच्छेदकनिष्ठत्वासिद्धेः कारणे ब्रह्मशब्दश्रवणात्तस्य च विच्छेदकनि-
ष्ठत्वात्तन्निश्चय इति तु रुद्रेपि ब्रह्मशब्दश्रवणदर्शनेन प्रागेव निरस्तं ॥ अप्पैय्यदीक्षितास्तु नानाकर्तृकानुमा
नाय स्थैर्येनोक्तपूर्वपक्षस्य प्रकारांतरेणानुत्थितिमाहुः तथाहि उक्तानुमानेन नानाकर्तृसिध्यावपि तस्य जगत्का
रणैकत्वबोधकश्रुत्यनुरोधेनान्नमयप्राणमयमनोमयविज्ञानमयानंदमयात्मकसविशेषाभिन्नरूपाणामिव नाने
श्वरसिद्धौ पर्यवसानस्यागत्या वाच्यत्वेन तेषां सर्वेषामेवान्नमयादिरूपाणामिव एतन्नानावतारणां निदानं-
बीजमव्ययमिति पुराणोक्तमूलभूतसच्चिदानंदरूपेण सर्वजगत्कर्तृत्वसंभवेनातिव्याप्त्यसंभवयोरनवकाशा
त् आनंदमयाधिकरणेऽन्नमयादीनां पंचानामपि ब्रह्मत्वंवदतः न संख्योपसंग्रहादपि नानाभावादतिरेका
च्चेत्यधिकरणे स्वगतभेदशून्यस्यापि विष्णोर्बहुरूपत्वेन बहुत्वसंख्याश्रयत्वमुपपाद्य पंचजनशब्दवाच्यत्वं
समर्थयतस्तव मते अनेकेश्वरतात्पर्यनिर्णायकोपपत्तिरूपलिंगत्वेनोक्तानुमानस्य तदनुग्राहकतयासित्वां
तेपि मत्याख्यातुमशक्यत्वेनोक्तरीत्यैव तत्पर्यवसानस्यावश्यं वाच्यत्वेनोक्तपूर्वपक्षस्यासिध्यांताधिरूढत्वा
च्च ॥ न संख्योपसंग्रहाधिकरणे हि यस्मिन् पंच पंचजना आकाशश्च प्रतिष्ठित इति वाक्ये पंचजनशब्दवाच्या

नविष्णुः तच्छब्दस्य बहुसंख्याविशिष्टवस्तुवाचित्वात् बहुत्वस्य चैकमेवाद्वितीयमितिश्रुतेरीश्वरत्वविरुद्ध
त्वात् यस्मिन्निति यच्छब्दवाच्यस्य प्रकरणाद्विष्णुवाचित्वेन तदाधेयानां न विष्णुत्वमेकस्याधाराधेयभावविरो
धादिति न समन्वयसिद्धिरिति पूर्वपक्षे पंचजनशब्दवाच्यो विष्णुरेव स्वगतभेदशून्यस्यापि नाना रूपत्वेन बहुत्व
संख्योपसंग्रहाविरोधात् न च प्रतिशरीरे परमात्मनो बहु रूपत्वमप्रामाणिकं शरीरांतर्गताकाशप्राणादिनियाम
कत्वेन ते पुभगवद्रूपेषु नानाभावस्यान्यायप्राप्तत्वात् आकाशादिरूपेभ्योतिरिक्तस्य शरीरनियामकस्याश्रोक्तेर्य
स्मिन्नित्यस्य विष्णुवाचित्वेपि न क्षतिः शरीरनियामकेश्वराकाशादिषु भगवतोवस्थानमात्रेणाधाराधेयभावोपपत्ते
रिति तत्त्वापासिद्धांतितं ॥ ननु नानेश्वरसिद्धौ तेषां स्वतंत्राणां परस्परमीर्ष्यादिनावैमत्येन सृष्ट्याद्यनुपपत्तिरू
पप्रतिकूलतर्कपराहतिरुक्तानुमानस्येति कथं तेन नानेश्वरसिद्धिः सिद्धांतविरुद्धैवोच्यत इति शंक्यं ॥ तन्म
तेमुक्तानामिव तेषां निर्दोषाणामेव कल्प्यतया ईर्ष्यानुदयात् वैमत्याभावोपपत्तेः इत्यं हि तव मतं सायुज्यमुक्तिमा
जो हि देवाः स्वोत्तमदेवतामवेशानुक्रमेण भगवद्देहमनुप्रविश्य महावैशम्पायेन भगवद्देहेंद्रियैस्तद्भुक्तानेव भो
गान् कदाचित् बहिर्निर्गत्यात्मस्वरूपाभिन्नैश्चिन्मात्रदेहेंद्रियैः स्वसंकल्पोपनीतांश्च भोगान् भुंजाना आनंदवस्तु
कक्रमेण स्वरूपानंदज्ञानैश्वर्यभोगेषु चोत्तरोत्तरं ज्ञानगुणोत्कर्षा पूर्वपदेवमुक्तावपि यथास्वं ब्रह्मेंद्रवरुणनं
द्रसूर्यादितत्तदधिकारिकदेवतापदं तदनुसारिणमुत्तमाधमभावं पूज्यपूजकभावं चानुभवंतो विहरंति देवव्यति

रिक्तास्तु सालोक्यादिमुक्तिभाजो यथाधिकारं भूरादिसप्तलोकेषु भगवल्लोके तु वासिनः। निभृतनरूपज्ञानानि माध्य
स्वेच्छागृहीतबाह्यदेहेष्वभिमानदेहे वा संकल्पोपनतान् भोगान् भुंजानाः पूर्ववत्तत्तद्योग्यादिभेदेन तत्तत्सारूप्यमूल
कभावादिव्यवस्थां ज्ञानानंदादिकैश्वर्यतारतम्यं च प्राप्ता विहरंति ॥ ननु चैवं मुक्तानामप्यन्योन्यं तद्दर्शनकृतद्वेषदुःखे
र्ष्यादिभिर्मुक्तावपुरुषार्थत्वप्रसंगः निर्दोषाणां तेषां गुरुशिष्यवत्तदप्रसक्तेरिति ॥ तथा च यदा स्वाधिकज्ञानानंदा
दैश्वर्यवतः पश्यतां स्वयं तत्सेवकत्वादिना ततो निकर्षमनुभवतामपि द्वेषदुःखेर्ष्याद्यभावस्तदा किमु वक्तव्यं नित्यनिर्दो
षसकलकल्याणगुणपरिपूर्णब्रह्मरूपाणामवाप्तसकलकामानां स्वाधिकानंदादिकं कंचिदप्यपश्यतां कुतोऽपि निक
र्षमननुभवतामीश्वराणां वैमत्यादिकं न भवतीति ॥ यदि चेर्ष्यादीनामंतःकरणधर्मत्वान्मुक्तानामंतःकरणाभावात्तद-
भावः समर्थ्यते तदेश्वराणामपि तथाभूतमंतःकरणमनंगीकृत्यैव तदभावः समर्थनीयः ॥ ननु महीमहीधरादिपरस्परसंतत
विभिन्नकर्तृकमित्यनुमानस्य सविशेषाभिन्ननानाकर्तृसिद्धौ पर्यवसानस्यादावुक्तत्वात् ईदृशानुमानायत्ते नानात्वे वा
स्यादिपूर्वपक्षप्रवृत्तिसंभवः ॥ एतेनानेकेश्वरतात्पर्यनिर्णायकोपपत्तिरूपतोक्तिर्निरस्ता ॥ उक्तानुमानेऽपपत्तिरूप-
त्वस्यानुग्राहकत्वस्य चासंभवात् अस्तु न सर्वस्य ब्रह्मत्वं यदत्र तवैव महेश्वरप्रधानपरमाण्वादीनां ब्रह्मत्वेन जगत्का
रणत्वावश्यकतया तेषां च जगत्कारणत्वपूर्वपक्षा ईक्षत्याद्यधिकरणोक्ताः सिद्धान्ताविरोधिन इत्युक्तं श्रीराघवेंद्र
विजयींद्रयतीश्वराभ्यां संदूषितानि नितरामधरीकृतानि यूयूकृतानि नितरां च नमालभिश्चैरप्पय्यदीक्षितवचां

सिगुहांगतानि तानीदानीं समालंब्यानि बद्धानि स्वपाश्यतः तेषां निराकृतिर्व्यर्थानस्युर्यौ मृतमारणाद्वन्युपसंहृतं
वाकूपारुध्यैकसा स्ववृत्तेणतत्स्वस्य स्वीयाचार्याणांच स्वकीयपरकीयग्रंथार्थानवबोधप्रकटीकरणायैवेति
स्पष्टं दर्शयितुं तत्रोच्यते ॥ रामचंद्रविजयींद्रयतिभ्यां न्यायदुर्गगमनेऽनिपुणाभ्यां न्यायकेसरिवचस्सु यदुक्तं त-
त्सुधीभिरनादरणीयं ॥ तदादाय मूलभायं चंद्रिकाभूषणोद्यतः वाकूपारुध्यात्स्वचित्तभ्रमतो ब्रह्मास्त्रं जेतुमिच्छति॥
तथाहि महीमहीधरादि॥ परस्परमत्यंतविभिन्नकर्तृकमित्यनुमानं तावत् मत्सरादिदोषरहितनानाकर्तृकानु-
माननिराकरणायोक्तदोषैरेव यूथूकृतं लज्जांबुधिनिमग्नं नोन्मज्जनमर्हतीति तदालंब्य पूर्वपक्षप्रवृत्तसंभ-
वः स्पष्ट एव ॥ केवलनानाकर्तृकानुमानस्य दीक्षितोक्तरीत्या तत्संमतसाधिरोपाभिन्नानेकेश्वरतात्पर्यनिर्णा-
यकोपपत्तिरूपलिंगत्वेन सिद्धांतेपि प्रत्याख्यानासंभवः स्पष्ट एव ॥ प्रत्युतेत्यादिकं तु स्वमतसिद्धांताज्ञानमूलं
कं स्वकीयचंद्रिकाग्रंथाध्ययनाभावनिबंधनमेव ॥ नहि स्वमते अनृतस्य जडदुःखात्मकस्य जगतः सर्वस्य ब्रह्मत्वं-
किंतु ब्रह्मस्वरूपसत्तातिरिक्तत्वात्त्विकसत्ताशून्यत्वान्मिथ्यात्वमेव अन्यथाद्वैतब्रह्मात्मैक्यासिद्धिप्रसंगात् तथाह्या
रंभणाधिकरणे तदनन्यत्वमिति जगतो नाभेदं ब्रूमः किंतु भेदं व्यासेधाम इति वाचस्पतिभामतिग्रंथेन अभेदं ऐक्यं
भेदं तदन्यतात्त्विकरूपवत्त्वमित्यर्थः आरंभणाधिकरणीयास्मत्रीत्याधिकरणयोजनादूषणे त्वदीयचंद्रिका
कारोपि न तावत् ब्रह्माभेदः तदनन्यत्वं अनृतस्य विश्वस्य ब्रह्माभेदायोगात् अनंगीकाराच्चेत्याह ॥ तथाचाद्वितीय

रुध्याः ॥ नानाकर्तृकानुमानापष्टंभेनैतदधिकरणीयपूर्वपक्षस्य सर्वथानुत्थान दर्शनाय तदुपपादकसंभावि
टस्थलांशंकामुत्थाप्य तन्निराकरणेन तद्रीत्या तस्यासिद्धांताधिरूढत्वं बहु प्रकारैर्दीक्षितैर्वर्णितं तदपि परोक्तदूषणनिरा
णेन परकीयाधिकरणयोजनायाश्चिद्दूदयात्तात्पर्यं लिख्यते ॥ ननु परब्रह्मस्वरूपा जगत्कर्तारो बहवस्सन्तु तेषांप
शक्तिर्विविधैव श्रूयते इत्यादिश्रुतिबलात्प्रत्येकं तेषामचिंत्याद्भुतापरिमितशक्तिमत्त्वमेवांगीकरणीयं तथाच
न्यानपेक्षयानिखिलजगत्सृष्ट्यादिकर्तुंशक्तानां तेषां संभूय सृष्ट्यादिकर्तृत्वमयुक्तं लोकेपि विचित्रगोपुरप्रासादादि
नैकेषां शिल्पिनां संभूय कारित्वस्य प्रत्येकैकशक्तिनिबंधनत्वात् अतोनुमानस्य तत्सहकृत सृष्टिवाक्यानां चैकस्मि
न्कर्तरि पर्यवसानाभावे विशेषवचनबलान्नारायण एव पर्यवसानं स्यादिति कथं पूर्वपक्षः सिद्धांताधिरूढ इति चेन्मै
॥ एकएव नारायण आसीदित्यादेर्यदा तमस्तन्न दिवा न रात्रिर्न सन्नचासच्छिव एव केवलः एक एव रुद्रो न द्वि
तीयाय तस्थ इत्यादीनां विशेषवचनानां श्रुतिषु दर्शनात्सृष्टिवाक्यानां नारायण एव कर्तरि पर्यवसानस्यासंभव
त् तत्सहकृत नानाकर्तृकानुमानेन नानाकर्तृणां सिद्धावपि प्रत्येकमखिलजगत्सर्जनादिकं कर्तुंशक्तानां प्र
त्याद्भुतशक्तिमतां प्रत्येकमपि तेषां तन्मते आरंभणाधिकरणन्यायेन केवलं लीलया संभूय कर्तृत्वस्यैव वक्तुं शक्य

त्वात् ॥ आरंभणाधिकरणे परेश्वरस्य जगत्सृष्टौ नियमेन प्रकृत्यादिकमपेक्षमाणस्य तत्रापि प्रकृतिमुपादानं
तेनैव कालादिकं निमित्तत्वेनापेक्ष्य प्रकृत्यैव महांतं महतैवाहंकारमित्यादिक्रमनियमं चापेक्ष्य सृजतः किं नाम स्वा
तंत्र्यं स्यात् तंत्र्ये सति कदाचित् प्रकृत्यादिकमनपेक्ष्यैव निमित्तोपादानकार्यक्रमादिकं बाध्यत्य:अ सृष्टिप्रसंगादित्याशं
क्य साधनांतरतद्वयस्थाक्रमनियमापेक्षणोपि युक्त एव तत्स्वस्वातंत्र्यं तद्भावस्य वा स्वभावनिबंधनत्वाभावात्
लोके स्वयमेव गंतुं शक्तस्यापि गमनसमये लीलया दंडावष्टंभवत् तदपेक्षणस्य स्वेच्छामात्रनिबंधनत्वादिति सि
द्धांतितं ॥ यत्तु त्वया कल्पिता अनेके परमेश्वराः केवलं लीलया संभूय सृजंतीति निश्चीयंते संभाव्यंते वा नाद्यः निश्चा
यकाभावात् अनुमानानां चाप्रमाणत्वात् नहि क्वचिद्दृष्टांतमात्रेणार्थनिश्चयः अतिप्रसंगात् न द्वितीयः असाधक
त्वात् अल्पज्ञो नहि किं किं न संभाव्यते प्रत्युत त्वन्मत एवेदं दूषणं जगद्व्यापारवर्जमित्यधिकरणे अनेकेषां ज्ञानिनां निरंकु
शमैश्वर्यमाशंक्य सैव यथेत्यादिना सर्जनाद्यैश्वर्यासंभवप्रतिपादनात् तेषां च मायाया इव अघटितघटनाशक्तिमंगी
कृत्य निर्गुणब्रह्मचैतन्यवत् वैभवत्यादि किंचित् धर्माभावं प्रकल्प्य सर्जनाद्युपपादनसंभवेन तादृशाधिकरणासंगत्या
पत्तेः ॥ यदि च सृष्टिवाक्येषु नानेकेषां प्रतिपादनं किं त्वेकस्यैवेत्येक एव स्रष्टेत्युच्यते तर्हि मयापि वक्तुं शक्यमिति स्व
यमेवोन्मत्तवदुत्कोटस्वशंकादूषणे स्वयमेवोन्मत्तविक्षिप्तवदुत्सेदस्य दूषितमित्युक्तं ॥ तद्वाक्यपारुष्यं त्वत्ताराम्
स्वभावनिबंधनत्वान्न खेदाय इह तत्रोच्यते ॥ यदुक्तं त्वया कल्पिता इत्यादि तत्तुच्छं स्वोचितकतिपयजगत्कर्तृत्वं

क्षणान्तं यदिति व्याप्तिः निखिलजगत्कर्तृत्वलक्षणं चैदं संभवः इतिरीत्यैतदधिकरणीयपूर्वपक्षप्रवृत्तये तत्पूर्वपा
तैयानुमानेन नानाकर्तृणां साधनात् तस्य च विष्णुरुद्राद्यनेककर्तृप्रतिपादकश्रुतिसंवादेन निश्चितप्रामाण्यक
त्वार्थनिश्चायकत्वात् तत्सिद्धांते उक्तरीत्यानवसरा स्त्वानायोगेसिद्धेरुक्ततदस्छाशंकानिराकरणायोक्तर्
त्वा सर्वतो बलीयस्या अन्यथानुपपत्त्या अनेके कर्तारः शीलयासंभूय सृजंतीति तत्त्वज्ञीत्यैव निश्चये बाधकाभावा
क्त पूर्वपक्षस्यासिद्धांताविरुद्धत्वोपपादनं विडम्बनातिरमणीयमेव ॥ मत्त्वे तेत्यादिकमसदेव मायायामघटितघ
टनाशक्तिमत्त्वांगीकारे ब्रह्मणः निर्गुणत्वाद्यंगीकारे जीवेशाद्याभासं न करोति मायावाविद्यानस्त्वयमेव प्रभवतीत्या
दीनामघटितकार्यान्यथानुपपत्त्यादीनां निर्गुणत्वादिबोधकश्रुतीनां भिन्नसमनस्कानां सगुणब्रह्मविदां वैमत्या
भावकत्वनायां मानानुपलंभात् शिवविष्ण्वादीनामभेदं स्वीकुर्वतामयेशान्मयादीनामनेकेषां ब्रह्मत्वं वदतां शि
वविष्ण्वादीनां भेदं च वदतां त्वया सृष्टिवाक्येष्वेकस्यैव स्रष्टुः प्रतिपादनमिति वक्तुमशक्यमित्यस्य बाधेनापि सुबो
धत्वात् ॥ नन्वेवमपि द्यावाभूमी जनयन्देव एकः एकमेवाद्वितीयमित्यादिकमैक्यश्रुतिविरुद्धं कथं जगत्कर्तृनाना
त्वमते सिध्येदिति चेन्न ॥ तन्मते जगत्कर्तृनानात्वे प्रयुक्तश्रुतिविरोधः तन्मते नेह नानास्ति किंचन एकधैवानुद्रष्टव्य
मित्यादिश्रुतीनां विष्णोरनन्तयादिस्वरूपाणि शिरः पुच्छाद्यवयवाः ज्ञानानंदादिगुणाः सृष्टिसंहारादिक्रियाः सर्वगत
त्वादयो भावधर्मा अदृश्यत्वादयः अभावधर्माः विष्णोः सकाशात् परस्परस्माच्च न भिद्यंते इत्यर्थकत्वमिव कर्तैक्यबो

धकोक्तश्रुतीनां ब्रह्मविष्णुरुद्राणां मध्ये एकैकस्यैव कर्तुः तदैक्षत बहु स्यां प्रजायेयेत्यादिश्रुतिषु श्रुतेर्बहुभवनसु
स्यैरवमार्थ्यंयतारस्य तद्रूपैर्योऽप्रसिद्धितभेदनिषेधपरत्वस्य वक्तुं शक्यत्वेन न तद्विरोधाभावात्॥ यत्तु नेह नानेत्यादेः सर्व
निषेधपरत्वे इहेत्युक्तधर्मिणः निषेधस्य च निषेधापत्त्या व्याघातेन प्रकरणवशाच्च एकधेत्यस्यापि एकप्रकारत्वात्प-
यैकधाभत्स्य यबलात् तथार्थवर्णनेपि एकशब्देन समभिव्याहृतपदार्थसंसर्गिनिष्ठभेदप्रतियोगित्वस्य स्वरसतः
प्रतीतस्य सर्वतांत्रिकसिद्धस्य परित्यक्तुमशक्यतया कथं नाद्वैतश्रुतिविरोधः जगत्कर्तॄणां नानात्वं सिध्येत्॥ प्र
स्तुत एकमेवाद्वितीयमित्यत्रैकशब्दस्य वृक्षस्य स्वगतोऽभेदः पत्रमूलफलादिभिरित्यादिना स्वगतभेदशून्यार्थकत्व
वर्णनात् तन्न्यायेन नानेश्वरांगीकारे द्यावाभूमी जनयन्देव एक इत्यादौ एकशब्दस्य स्वगतभेदशून्यार्थकत्वेनाविरो
धाभावे सति नानेश्वरपक्षस्य तथापि कुतस्त्यज्यते एकपदविरोधाभावेऽप्यद्वितीयपदबलेनेति चेत्॥ संभ्रममापि-
न्यायवादित्यपि समं॥ तथान्नमयादिनानेश्वरांगीकारान्न साम्यमिति चेन्न तथापि ब्रह्मविष्णुशिवत्रिपुरसुंदरी
शक्तिसुराभियसूर्यादिनानेश्वरांगीकारात् साम्यं भेदस्य कल्पितत्वमिति चेदभेदस्यैव कुतो न कल्पितत्वमिति त
दतितुच्छं॥ प्रदीयानभिमतोपालंभनं च॥ सदेव सोम्येदमग्र आसीदित्यादिकेषु जगत्कर्तृबोधकेषु वाक्येषु एकप
देन समभिव्याहृतपदार्थसंसर्गिनिष्ठभेदप्रतियोगित्वस्य स्वरसतः प्रतीतस्यापि अन्नमयादिपंचस्वेव शिवविष्णवा
धनेककर्तृबोधकश्रुतिसंवादप्राप्तप्रमाणभावनानाकर्तृकानुमानसिद्धेषु समभिव्याहृतपदार्थप्रलयकालसंबंधि

ष्टुपरस्परातिसूक्ष्मभेदभ्रांतियोगितयाबाधनमत्वापाधितुमशक्यत्वेतयाचरीत्या एकैकस्यैनकर्तुः बहुभवनसुखैः आत
स्वगतभेदनिषेधपरत्वस्यैवैकपदेनकथनतयात्वद्रीत्यानानाकर्तृसिद्धेरपरिहार्यत्वात्॥ मत्सुतेत्यादिकमस्यत्
सिध्यांताज्ञानमूलं स्वमतिपरिपाकमात्रं वृक्षस्य स्वगतोभेदइत्यस्य यथावृक्षे सजातीयात् वृक्षांतराद्विजातीया
त् शिलादितः पत्रपुष्पादिभिश्च सजातीयविजातीयस्वगतं भेदत्रयं भासंतथास्य सजातीयविजातीयस्वगतभेदत्र
यं परमात्मनिजगत्कारणेचेतनाचेतनधर्मधर्मिभावरूपं भासं एकपदावधारण॥ द्वितीयपदैः क्रमेणनिषिध्यते
इतिप्रतिपादनायोक्तं भेदत्रयं दृष्टांतत्वार्थत्वेनैकपदस्य सजातीयभेदनिषेधार्थकत्वेन स्वगतभेदनिषेधार्थ
कत्वाभावात् तथायोक्तमद्वैतसिद्धौ विजातीयंकिंचिदपेक्ष्य द्वितीयत्वावच्छिन्ननिषेधस्याद्वितीयशब्दार्थत्वा
त् अयंचात्र संकोचः बलीवर्दपदसन्निधानात् गोपदइव सजातीयस्वगतभेदनिषेधकैकपदावधारणपदसंनि
धिप्रयुक्त एवतदुक्तं वृक्षस्येतिजगद्व्यापारवर्जमित्यधिकरणेनानेश्वरपूर्वपक्षेनास्मदीयाभिमतइत्यस्यपूर्व
मेवावेदितत्वात् तत्स्वांगीकारेमतिकूलतर्कस्योक्तत्वात् चतुर्विधाभावाप्रतियोगित्वरूपापरिच्छिन्नत्वरूपब्र
ह्मत्वस्यजगत्कारणेबाधाच्च नतत्स्वांगीकारोस्मत्सिध्यांताविरुद्धः त्वत्सिध्यांताविरुद्ध इतितुप्रतिपादितमेवदी
क्षितैः॥ त्वयापीत्यादिकमपिस्वमतिपरिपाकमात्रमेवमन्यते ब्रह्मविष्णुशिवानामभेदस्यैवस्वीकारेणतेषांनाना
त्वस्यास्मदनभिमतत्वात् एकस्यैवपरब्रह्मणः तत्तद्गुणसंबंधोपाधिकसंज्ञाभेदमात्रत्वस्यैवतार्किकमतइ

पत्तीकारानुउक्ततार्किकसिध्धांतः ॐ नमःसर्वभूतानिविष्टभ्य परितिष्ठते अखंडानंदबोधाय पूर्णाय परमात्मने इ
ति दीपिकाकारोक्तमंगलश्लोकव्याख्याने अनुभूतिनिग्रंथे गदाधरभट्टाचार्यैः स्फुटीकृतः ॥ विष्णुसहस्त्रनामभा
ष्येपि श्रीमत्शंकराचार्यैः किमेकं दैवतं लोके इति युधिष्ठिरप्रश्नोत्तरे पवित्राणां पवित्रं यो मंगलानां च मंगलं दै
वतं देवतानां च भूतानां योऽव्ययः पितेति श्लोके भूतानां अव्ययः परः हितः पिता जनको यो देवः स एकं दैवतं इति वाक्या
र्थमभिधायक एवमेको देव इत्याशंक्य सृष्टिस्थित्यंतकारिणीं ब्रह्मविष्णुशिवात्मिकां स संज्ञां याति भगवानेक एव
जनार्दन इति भगवानहं च विश्वात्मन् एक एव हि कारणं जगतोस्य जगत्यर्थे भेदेनावां व्यवस्थितौ त्वया यदभयं द
त्तं तद्दत्तमखिलं मया मत्तोविभिन्नं नात्मानं द्रष्टुमर्हसि शंकर योहं स त्वं जगच्चेदं सदेवासुरमानुषं अविद्यामो-
हितात्मानः पुरुषाभिन्नदर्शिनाः इति विष्णुपुराणवाक्यैः तथापि विष्णोरन्यं तु पश्यंति ये मां ब्रह्माणमेव च कुतर्क
मतयो मूढाः पच्यंते नरकेष्वधः ॥ ये च मूढा दुरात्मानो भिन्नं पश्यंति मां हरेः ब्रह्माणं च तथा तेषां भ्रूणहत्यासमं त्व
घमिति भविष्यपुराणवाक्यैर्विष्णुशिववचनाभ्यां हरिहरब्रह्मणां संज्ञाभेदमात्रं न स्वरूपभेद इति प्रतिपादि
तं ॥ अज्ञानकृतावरणेनाज्ञैर्भेदं मकल्प्य तथा व्यवहारेपि अभेदस्याकल्पनात् तथा ज्ञव्यवहाराभावाच्च भेद ए
व काल्पनिको नाभेद इत्यस्य बालेनापि सुगमत्वात् ॥ अथ योक्तरीत्या नानाजगत्कर्तृसिध्धौ तेषां मध्ये यदुपासने
यस्य पुरुषस्यानादियोग्यता तस्य पुरुषस्य स एव जगत्कर्ता नान्य इति तस्य स्फुरति तत्तदधिकारिबुध्धिविषयं

तं तमेवार्थं तस्य तस्याधिकारिणः श्रवणकर्तुः बुद्धिभेदेन भिन्नं भिन्नं कर्तारं कर्मैश्वर्यं श्रुतिर्बोधयतीति कर्मैश्वर्यश्रुतिर्नि-
र्वाहोस्तु ॥ ननु श्रुतीनामनेकार्थप्रतिपादकत्वमदृष्टचरं वक्तुमशक्यमिति त्वया यदुक्तं सायसं ज्योतिरुक्तमानु-
तथाह्यधीयत एक इत्यधिकरणे कृत्स्नकर्मकांडस्य कर्मब्रह्मोभयपरत्वं वर्णयता त्वयं श्रुतीनामनेकार्थभेदेन ना-
नार्थबोधकत्वस्य संमतत्वात् स्थालीपुलाकन्यायेन कर्मकांडस्थेषु केषुचिद्मंत्रेषु ब्रह्मपरत्वं स्योपपादितं
किंचिदुदाहरणार्थं लिख्यते ॥ वसंते वसंते ब्राह्मणो यजेतेत्यत्र वसतीति वसः पचाद्यच् तनोतीति तिः औणादि-
कोडिप्रत्ययः पूर्वपदस्य नकारागमः वसंश्चासौ तिश्चेति वसंतिः सर्वत्र व्यासो वर्तमानो जगत्कर्तेत्यर्थः तस्मिन्संबु-
द्धौ हे वसंते ॥ द्विरुक्तिरादरार्था जिज्ञासां पूर्ववत् जनेर्डि प्रत्ययः ओतीति ओतं अवतेः क्तिः ओतं जगत् ओतं मयिदं
यस्मिन् स ज्योतिः यः प्राणः चेष्टकत्वात् यकारः प्राण आत्मेति श्रुतिः ज्योतिश्चासौ यश्चेति ज्योतिषः तस्य संबुद्धौ
ज्योतिषेति आयजेतेत्यपि संबुद्धिः आसमंतात् यजे ऋत्विग्भिः इतमासेत्यर्थः यजेर्डअर्थेक विधानमिति ड-
प्रत्ययः संप्रसारणाभावः छांदसः इंद्रागच्छेत्यत्र इंद्रेति अद्रेति गच्छेति संबोधनानि निगमः छंदश्च इडप्रत्ययेस

रणपान्ते द्रष्टव्यते ॥ एवमुपनिषत्स्वपि॥ अभ्रष्टपायि ब्राह्मणानां ब्रह्मशास्त्रार्थोभयार्थकत्वं लक्षणेन व्याख्या
तं॥ दिङ्मात्रेणोदाह्रियते इंद्रियदेवतातदुत्कर्षप्रकरणे प्राणो वा आशाया भूयानिति वाक्यस्थप्राणशब्दः भूमाधि
करणे परब्रह्मपरतया व्यतिहाराधिकरणे च मुख्यप्राणपरतया व्याख्यायते व्याख्यानं तत्र याहि भूमा संप्रसादादध्युप
देशादित्यधिकरणे यो वै भूमा तत्सुखमित्यत्रोक्तो भूमा मुख्यप्राण एव न विष्णुः प्राणो वा आशाया भूयानिति वाक्ये
नामवागादिनारतम्यमाख्यांतमुक्ता प्राणस्यात्रोत्तमत्वमभिधाय तदुत्तरं कस्यचिदुत्तमत्वमनभिधाय भूम्नए
वाम्नानादिति पूर्वपक्षयित्वा विष्णुरेवार्थं भूमा यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति निरुपपदसुखपदेन भूम्नः
परिपूर्णसुखत्वोक्तेरिति भाष्यानुयायी सिद्धांतः कृतः॥ अस्तु वायं प्राणो वायुरेव तथापि न तस्य भूमत्वमाप्तिः
अस्ति भगवः प्राणाद्भूय इति प्राणाद्वाव भूयोस्तीति तन्मे भगवान्ब्रवीत्विति सत्यं वाव प्राणाद्भूय इति प्रकरणांत
रवत्प्रश्नप्रतिवचनाव्याहारेण एष तु वा अतिवदति यः सत्येनातिवदतीति प्राणाद्धि ब्योर्भूयस्त्वमुक्तानस्य
भूम्न आम्नानात्॥ न चैतत् अर्वाक्षूयं विरुद्धं अंतर्यामिविवक्षया प्राणशब्देन विष्णूक्तेरिति अर्वाक्षूयपरामिदं प्रक
रणमिति टीकायां जयतीर्थैरोक्तं॥ व्यतिहाराधिकरणे भगवदुपासकाः प्रकृतास्त एवच्छांदोग्ये नामादिप्राणप-
र्यंतानारतम्येनोक्ताः प्राणादुत्तमो नोक्तः न चाधिकारिणः प्राणावसानान्न भवंति प्राणः स्वोत्तमाधिकारिषु क्तः अधि

कारत्वाज्ज्ञानादिवत् तद्वत्वनुमानेन प्राणादुत्तमाधिकारित्वे हिरण्यगर्भस्य सर्वेषु प्राणिषु तद्धेतुकम्
मिति पूर्वपक्षे उपासकानामधिकारिणां प्राणादुत्तमत्वमेव प्राणादुत्तमाधिकारित्वे अन्यथा प्राणोपासनायां सर्वेषां
यानीति छांदोग्यश्रुत्या उक्तत्वादिति प्राणशब्दिताद्धिरण्यगर्भादन्यस्यैव प्राणोपासकत्वात् प्राणः सर्वेषां प्राणाना
धिकारीति त्वयापि स्थितत्वात्॥ एवमिंद्रियेभ्यः परा ह्यर्था इत्यादौ नामेंद्रियशब्दाभ्यामिति निमित्तस्येंद्रियत्वं
स्य ब्रह्माधीनत्वात्प्रवृत्तिनिमित्ततादधीन्यन्यायेन ब्रह्मपर इंद्रियशब्दः इतींद्रियशब्दस्य समन्वयः ब्रह्मणः
कः इंद्रियगतपरत्वावधित्वस्य पंचम्यर्थस्य ब्रह्माधीनत्वात् पंचम्यापि ब्रह्मपरेति प्रकारेणेंद्रियपदेपलातहुकर्मक्ष
प्रतिपादकत्वं च तेषां संगच्छते एवं वाङ्मनसि दर्शनाच्छब्दाच्चेत्यधिकरणे वाङ्मनसि संपद्यते मनः प्राणे प्रा
णस्तेजसीत्यादिवाक्ये वाङ्मनःप्राणशब्दा वा मुत्तरोत्तरस्मिन्लीयमानो मारुद्धः हिरण्यगर्भपरतादेहोत्क्रां त्यु
त्तरमुत्तरोत्तरस्मिन्लीयमानवागिंद्रियादिपरता नेत्यनेकार्थपरतोक्ता॥ तथाहि देहोत्क्रमणानंतरं ज्ञानिनामं-
तर्गता वाक् मनसि लीयते वाक्पूर्वरूपं मन उत्तररूपं मनः पूर्वरूपं प्राण उत्तररूपमिति वाङ्मनसयोर्व्याप्तिप्रश्नोक्ते
वर्गी मनोनियम्यत्वादनिश्चयात् तत्र च मोक्षाभावादनियम इति पूर्वपक्षे व्याप्तिप्रश्नोक्तेः वाङ्मनसयोः पूर्वोत्तरवर्णि
देवताद्वे गुणप्रधानभावे च विरोधादर्शनात् साम्यविषयकत्वात् मनसा वाचं संकल्पयति अथ वाचा वदतीति यु-
क्त्या वाचः मनःपूर्वकत्वविशेषश्रवणात् मनोधीनत्वं अचेतनस्यान्योन्यवशत्वस्य चेतनदेवतानिमित्तत्वाद्देव

रभ्यासेन दूषयिष्यते ॥ एवमुपनिषत्स्वपि ॥ अत्र ब्रह्मपदिशब्दानां ब्रह्मशब्दार्थाभिधायकत्वं स्वस्य नेत्याख्या
तं ॥ दिङ्मात्रेणोदाहृतं चेदं द्विपदेवतावदुत्कर्षप्रकरणे प्राणो वा आशाया भूयानिति वाक्यस्थप्राणशब्दः भूमाधि
करणे परब्रह्मपरतया व्यतिहाराधिकरणे च मुख्यप्राणपरतयाऽन्यथा व्याख्यातस्तथाहि भूमा संप्रसादादध्युप
देशादित्यधिकरणे यो वै भूमा तत्सुखमित्यत्रोक्तो भूमा मुख्यप्राण एव न विष्णुः प्राणो वा आशाया भूयानिति वाक्ये
नामवागादितारतम्यमार्यान्तमुक्त्वा प्राणस्याशोत्तमत्वमभिधाय तदुत्तरं कस्यचिदुत्तमत्वमनभिधाय भूम्न एव
आम्नानादिति पूर्वपक्षयित्वा विष्णुरेवायं भूमा यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति निरुपपदसुखपदेन भूम्नः
परिपूर्णसुखत्वोक्तेरिति भाष्यानुसारेण सिद्धान्तः कृतः ॥ अस्तु वायं प्राणो वायुरेव तथापि न तस्य भूमत्वप्राप्तिः
अस्ति भगवः प्राणाद्भूय इति प्राणाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति सत्यं वाव प्राणाद्भूय इति प्रकरणात
एव भूम्नः प्रतिवचनाध्याहारेण एष तु वा अतिवदति यः सत्येनातिवदतीति भाष्याद्विष्णोर्भूयस्त्वमुक्त्वा तस्य
भूम्न आम्नानात् ॥ ननैतत् अर्धहृदयं विरुद्धं यन्तर्यामिविवक्षया प्राणशब्देन विष्णूक्तेरिति अर्धहृदयपरमिदं प्रक
रणमिति टीकायां जयतीर्थैरुक्तं ॥ व्यतिहाराधिकरणे भगवदुपासकाः प्रकृतास्त एव च्छान्दोग्ये नामादिप्राणप-
र्यन्तं तारतम्येनोक्ताः प्राणाद्युत्तमोऽनोक्तः तत्राधिकारिणः प्राणादयः सानानन्तर्भवन्ति प्राणः स्तोत्रमाधिकारियुक्तः अधि

[illegible]
मिति [illegible]
यानि ति [illegible]
धिकारो नित्यत्वाभिव्यक्तिलक्षणा ॥ एवमिन्द्रियेभ्यः [illegible] इत्यादौ नाविद्भिरपि [illegible] सेन्द्रियत्व
स्वभक्त्याधीनत्वात् [illegible] इतिविभिन्नत्वादेव [illegible] इन्द्रियवाक्यः इतिइन्द्रियशब्दस्य समन्वयः प्रसूयस्तु
कः इन्द्रियगतपरत्वासंभवेऽपि स्वपरमात्माधीनत्वात् [illegible] इति कारणेन्द्रियदेवताश्च हृत्कर्म
भगवत्पादकल्पं [illegible] नासिदर्शनात् [illegible] तस्याधिकरणे वाङ्मनसि संपद्यते मनः प्राणे प्रा
णस्तेजसीत्यादिवाक्ये वाङ्मनः प्राणशब्दानामुत्तरोत्तरस्मिन् लयश्रवणात् [illegible] हिरण्यगर्भपरत्वादेहोत्क्रान्त्यु
त्तरसुत्तरोत्तराश्रितत्वात् [illegible] इत्यादिपरत्वान्नेत्यनेकार्थपरलोका ॥ तथाहि देहोत्क्रमणान्तरं ज्ञानिनां सं-
तर्गता वाक् मनसि लीयते वा पूर्वरूपं मन उत्तररूपं मनः पूर्वरूपं वा गुणरूपमिति वाङ्मनसयोर्व्याभिचारे
वाणीमनोनियम्यत्वादनिश्चयात् [illegible] इति पूर्वपक्षे व्याभिचारे तेः वाङ्मनसयोः पूर्वोत्तरवर्णी
देवतात्वे गुणप्रधानभावेन विशेषादर्शनात् साम्याविषयकत्वात् मनसा वाचं संकल्पयति अथ वाचा वदतीति यु-
क्त्या वाचः मनःपूर्वकत्वविशेषश्रवणात् मनोधीनत्वं अचेतनस्यान्योन्यपरत्वस्य चेतनदेवतानियमित्वाच्च देव

तयोरपि नियम्यनियामकभाव इत्यस्यैव वाचो मनसि लयः वाङ्मनःशब्दाभ्यामुमारुद्रयोर्विवक्षितत्वात् रुद्रे उमा-
लयः एवं प्राणशब्दिते हिरण्यगर्भे च मनोलयो भवत्येवेति न ज्ञानिनां मोक्षाक्रियम इति त्वयापि स्थापितत्वात् एवमं-
गावबद्धाधिकरणे वक्ष्यादिदेवताप्रतिपादकमंत्रास्तमद्युनयसकलदेवताविषयकत्वेन त्वाभिमतार्थपरतयात्व-
याव्याख्याताः तथाहि तदधिकरणे ब्रह्मोपासनमंगभूतदेवतोपासनसहितमेव कार्यमिति सिद्धांतमुक्त्वा उपसं-
हारे विरोधोऽस्ति सर्वदेवतानां सर्वशाखासूक्तं यत् ब्रह्मांगदेवतासंबंधिगुणजातं तत्सर्वं रुद्रादिषु नोपसंहार्यमि-
तुचोनयरोचोपास्यो सर्वदेवतानां सांख्याभावात् केषांचित् स्वप्रधानत्वात् केषांचिदुत्तमत्वात् अथयोपसंहारमभ्युपग-
यसंज्ञादिवद्धेति सूत्रमथवा तार्थस्य पारन्याद्यधनदेवताविषयसंबंधसूक्तादिकं ब्रह्मोद्युतमदेवताविषयकत्वेनाधी-
नेऽस्येतृभिः उत्तमान्तेन प्रतिपाद्यत्वात् एवमन्यधमस्रुणानामुत्तमेषु उपसंहारेण कश्चिद्विरोध इति प्रतिपाद-
त्॥ यत्त्वेवं श्रुतीनामनेकार्थत्वाप्रकल्पं संप्रतिपन्नाः वृषिभ्यात् भेदेन भिन्नार्थकत्वं न संप्रतिपन्नं तथासति कर्तृ-
नात्वस्यमप्राजातितान्वेककर्मैवस्तुतेस्तवदत्र सिद्धं प्रतिनितत्तत्कर्तृत्वैकत्वासिद्धौ तत्त्वांचासिद्धौ विरोधा-
येन नानाकर्तृसिद्धिरित्यन्योन्याश्रयादिमिति तदसत्॥ स्तुतयेऽनुमतिर्वेत्यधिकरणोक्तेन स्यात् येन स्यात्तेनेदृशा-
तिवाक्यस्य श्रोतृभेदेनार्थद्वयपरतायास्त्वदीयैककर्तृकत्वात् तथाहि ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासे-

रण्यकथास्यं तन्त्रायमर्थः योऽसद्भाति योग्यः असौ आगमजन्यं ज्ञानं लब्ध्वा मुक्तिजं ज्ञानं संपादयेत् तदुभयपक्षाभा-
नंतरं आलीभवेत् तेन वापरो सज्ज्ञानं प्राप्नोति कथं जीवन्मुक्त उच्यते सः सता वा असता वा केनापि प्रकारेण वर्तेत स
शुक्तियोग्य एवेति एतद्ब्रह्मायं हिरण्यगर्भानूपज्ञानिनो विषये विहितनिषिद्धसाधारण्येन निर्यन्त्रणं यथेष्टाचारवि-
धिपरं तदितरदेवतानूपज्ञानिविषये विहितस्य ध्यानस्य केषांचित् आचरणं केषांचित् परित्याग इत्येतदनुज्ञापरं-
मनुष्यात्मकज्ञानिविषये सर्वमपि विहितमेव कर्मविधिवद्बंधं विना स्वेच्छया कार्यमिति तदीयं व्याख्यानं एवमा-
त्मेत्येवोपासीतेति विधिवाक्येपि कर्तृभेदाभिन्नार्थकत्वं तवाभिमतं इत्थं हि तव मतं ब्रह्मोपासनायामधिकारिणस्त-
वत्तदुपास्यगुणभेदेन त्रिविधाः सत्यज्ञानादिभिरल्पैर्गुणैर्वर्त्याः संभृतिशुव्याप्त्यादिभिः सहितैर्भूयोगुणैरिंद्रादि
देवताः अखिलैर्गुणैश्चतुर्मुखादयः देवेषु मर्त्येषु चोपासनीयगुणविशेषोपसंहारानुपसंहाराभ्यां गुणाभूयस्त्वा
त्वतादयोंतरभेदैः संति बहवोऽधिकारिणः सर्वान्प्रति तत्र योग्यगुणविशिष्टब्रह्मोपासनाभेदविधायकमात्मे-
त्येवोपासीतेति वाक्यं तत्र देवेषु मर्त्येषु च यस्य यावद्गुणोपासने योग्यता तं प्रति तावद्गुणविशिष्टं ब्रह्मात्मश-
ब्दोऽभिधत्ते एवकारः तदयोग्यगुणव्यवच्छेदकः चतुर्मुखादीन्प्रति सकलगुणविशिष्टं ब्रह्म आत्मशब्दोऽभिधत्ते एव-
कारस्तु अयोग्यगुणव्यवच्छेदक इति ॥ अन्योन्याश्रयोक्तिरप्यसंभविनी सा किमुत्पत्त्यन्योन्याश्रयो वा ज्ञप्त्यन्यो-
न्याश्रयो वा स्थित्य न्योन्याश्रयो वा नाद्यः पूर्वपक्षिणा ब्रह्मविष्णुशिवात्मकनानाकर्तॄणां प्रत्येकं तत्तत्पापा

कानंतरं तदधिकारिणं प्रति तत्कर्तृबोधकवाक्यानादित्वस्य प्रतिज्ञातत्वात् मासिहोत्रविधेरनधिगतार्थबो-
धकत्वं न स्यात् भाष्यकारैः उत्पत्तिवाक्यार्थबोधकत्वं पूर्वोत्पत्तिविधित्वमिव बीजांकुरन्यायेन वक्तव्य-
त्वात् अन्यथा स्वर्गे भेदं पुराणोक्तं प्रवक्तॄणां भेदश्रवणं लौकिकैः प्रागृहीतस्य भेदस्यानुवादकमिति
सर्वथा तत्र एवैतस्याधिकरणोऽसिद्धः तद्वक्तॄणां प्रमाणकत्वम् अन्यथा प्रवक्तॄणां प्रमाणासिद्धेः ऐक्ये भेदश्रवणस्योक्ता-
नुवादत्वासिद्धिः तत्सिद्धौ च भरतवाक्यादिसहकृतपुराणादिविरोधपरिहारेणैक्यसिद्धिरिति तदुक्तरीत्यैवान्यो-
न्याश्रयस्य दुर्वारत्वात् ॥ एवमात्मैक्ये वोपासीतेत्यादावपि सिद्धे अधिकारिभेदे आज्ञाशब्दस्य तत्तदधिकारिणं
प्रति तत्तद्योग्यगुणविशिष्टब्रह्मात्मबोधकत्वसिद्धिः तत्सिद्धौ चावधारणाविरोधपरिहारे गौणत्वसत्ता भेदासिद्ध्या-
धिकारिभेदासिद्धिरित्यन्योन्याश्रयोऽपि दुर्वारः ॥ न द्वितीयः कर्तृनानात्वबोधस्यौत्कर्षप्रमाणान्तरसत्त्वात् श्रवणकर्तृ-
भेदनिश्चयानन्तरं कर्तृभेदस्य तत्तद्गुरुश्रवणादितत्तदुपासनयोग्यतासहकृतकर्तृभेदश्रुतिजन्यत्वेनोभयाधि-
करणानैक्यं परस्परापेक्षाभावात् ॥ अत एव न तृतीयोऽपि ॥ यदपि अनेकेश्वरेषु तत्तदुपासकस्य तत्पृथक्तार्थ इत्येतत्
प्रमाणं कुर्वन्न किञ्चित् इह प्रमाणं प्रामाणिकानेकार्थस्यैव प्रमाणबलेन ग्राह्यत्वात् तत्सिद्धौ तेषूपासनापादं बहु-
प्रमाणानुरोधेन तत्र तत्र लयानुपपत्तेः पार्थक्यम् ॥ न च तत्र बाधकं नहि जगत्कर्तारः प्रामाणिकाः दुराग्रहमात्रं यत्नादौ
नां चाप्रमाणत्वादित्यादि रोदनमपि न सत् ॥ नानाकर्तृश्रुतिविधिवाक्यादिना नानाकर्तृबोधकश्रुतिसहकृतोऽनुमा

नादीनांप्रमाणानांदर्शितत्वात्सिद्धांते आत्मेत्येवोपासीतेति श्रुतिबलान्तथाकल्पनमिव कर्त्रैक्यश्रुतिबलात्तथाकल्पना यांबाधकाभावात् यदि चोक्तप्रमाणानांसिद्धांतरीत्या आभासत्वमिति नकर्तृनानात्वसिद्धिः तर्हि उपासनापादोक्तप्रमाणा नामपि अद्वैतरीत्या आभासत्वमिति वक्तुंशक्यत्वात्॥ यत्तु पुरुषभेदेनानुष्ठानभेदादुपासनाविधिवाक्यस्य नवस्तुरूपप्र तिनन्तद्योग्यगुणविशिष्टं ब्रह्मोपासनीयंनायोग्यगुणविशिष्टमिति पुरुषभेदेनाविरुद्धमानार्थबोधकत्वेपि प्रामाण्यंनहि यते सदेव सौम्येदमग्रआसीदेकमेवाद्वितीयमिति जगत्कारणवस्तुबोधकस्यवाक्यस्य तत्तुरूपं नतिशिवएवजगत्का रणंनान्यः विष्णुरेवजगत्कारणंनान्यइति विरुद्धनानार्थबोधकत्वे प्रामाण्यंहीयेत उपासनावत्वस्तुस्वरूपस्यभेदाभा वादिति तदपिनसत्॥ त्वन्मते पुराणादिषु रामकृष्णाद्यवतारस्वरूपाणांभेदश्रवणंलौकिकैर्ग्राह्यागृहीतस्यभेदस्या नुवादकमिति सर्वथा तु न एवोभयलिंगाद्यधिकरणेनुव्याख्यानन्यायसुधयोरुक्तत्वेन तथैव कर्त्रैक्यश्रुतेरनुवादक त्वोपपत्तेः॥ यत्तु अवतारेषु तत्कालवर्तिनांलौकिकानांकेषांचित्भेददृष्टिः संभवति अन्येषांतु बहुत्वलिंगकानुमानाभा सेनेति युक्तस्तत्रानुवादः जगत्कर्त्रैक्यस्यतु श्रुतिंविनाप्रत्येतुमशक्यतयानानुवादः संभवतीति तदपिनसत्॥ त्व न्मते पुरुषाणांयोग्यतातारतम्यज्ञानपूर्वकस्नेहरूपाभक्तिरप्यनादिरिति स्थानविशेषात्मकाशादि नदनुबंधा दिन्यइत्यधिकरणयोरुक्तत्वेन शिवादिभक्तांतर्गतस्यशिवएवजगत्कर्तानान्यः विष्णुभक्तांतर्गतस्यविष्णुरेवजग त्कर्तानान्यइत्येवंरूपेण तत्तन्माहात्म्यज्ञानस्याप्यनादित्वसंभवात् त्वन्मते सर्वेषांमतानामनादित्वस्योक्तत्वेनत

चात्मानं यो ब्रह्माणमिति श्रीमद्वदंति अस्यार्थः योगिभिर्योगानुशिवपरत्वाय सीयते यो ब्रह्मा मां विदधे पुनः ज्ञानं
चमं हिणोति मे यत्न आदात् यथा या मां मत्तापत्यामिदं परं ब्रह्माणं पुनः पूर्वं सृष्टवान स्वैमहेश्वरः दत्तवान्
स्विलान् वेदान् पिमाआस्यानि संस्थितान् इति शिवपुराणे उपबृंहणाच्च स्याशिवपरत्वमेवासिध्यतीति ब्रह्मा
दिगुरुत्वं शिवस्य ॥ एवं विश्वाधिको रुद्रो महर्षिरिति श्रुतिरपि विश्वशब्दवाच्याद्विष्णोरपि आधिक्यं शिवस्य बोधय
ति विष्णोर्विश्वशब्दवाच्यत्वं च विश्वं विष्णुर्वषट्कार इति स्मृतिसिद्धं तस्याधिक्यं तु रुत्यादिकमेव ॥ एवमं
तर्यामिब्राह्मणोक्तं सर्वांतर्यामित्वं परब्रह्मत्वाभिनाभूतं शिवस्यैव ॥ तथाच श्रुतिः अंतरिच्छंति तं जने रुद्रं परो
मनीषया गृभ्णांति जिह्वया ससमिति अस्यार्थः जनेषु अंतर्यामिभावेनावस्थितं परः परमुत्कृष्टं रुद्रं ये मनीषयां
तर्ध्यायंति ते संसारस्याधिकारभूतमन्नं जिह्वया गृह्णंतीति वाच्योर्थः येतिकुतर्कव्यसनिनः पाखंडास्तु अंत
र्यामिणं नेच्छंति ते जिह्वया पुरीषमेव गृह्णंति धन्याः खलु ये नराः ये परयंति ममाज्ञामिति दशरथायुक्तादि
वाम स्तु तमहं सागरस्येषु कराक्षः तथा श्रुयंगुहितं पराशरेण अंतरिच्छंति यो रुद्रं सदा वंशं मनीषया गृह्णाति जि
ह्वया सोयं रसं पूर्णामृतोपमं अंतर्नेच्छंति ये रुद्रं भवानीसहितं भवं पुरीषमेव गृह्णंति जिह्वया तेन संशयः अत्र
दृश्लोके मंत्रवाच्योर्थः द्वितीये गम्योर्थो दर्शितः स च स्वयमिह पापिनत्वाद् शिवद्वेषिणामतिगर्हितवृत्तित्वं स्प
ष्टयति तथाचोक्तं भारते धिक्तेषांधिक्तेषांधिक्तेषां जन्म धिग् स्तुते यां ये षां न वसति हृदये कुमतिपपापि

वं कौ रुद्रः ॥ अयमेवार्थो श्रीमद्भागवते शिवप्रस्तुत्याभिहितः इसंति च शास्त्राचारान्हि दुर्भगाद्यतनत्र दुर्भगाद्यति
ष्टभगोत्पन्नाः संकीर्णभगोत्पन्ना इति यावत् ते पाच गार्हितवृत्तित्वमभिमन्यवाधिर्णदूषिणामुक्तगार्हितवृत्तित्वमाभि
शायैवोक्तं नागरखंडे मामून्नभकुलेजन्म यत्र शंभुर्न दैवतमिति शिवद्वेषिणामुक्तगार्हितवृत्तित्वमेव केवलं न अ
नुसन्धिः वहिष्कार्यत्वमपि तथा च स्कांदे शंकरसंहितायां शिवपूजाविधौ नेक्षेत पूजावेलायां नरं वस्त्रवहिष्कृत-
त्युक्ता को सौ वहिष्कृत इत्याकांक्षायामुक्तं दधीचिना गौतमेन येऽत्र शापात् ब्राह्मणाधमाः कल्पावतारिष्यंति निंदकाः
वहिष्कृता इति दधीचिशापः कौर्मे दर्शितः एवमुक्त्वा तु विप्रर्षिः शशापेश्वरविद्विषः समागतान् ब्राह्मणांस्ता
न्दक्षसाहाय्यकारिणः यस्माद्बहिष्कृतो देवः शंकरो लोकवंदितः भविष्यध्वं त्रयीबाह्याः सर्वेपीश्वरविद्विषः निंदंतो
ह्यैश्वरं मार्गं कुशास्त्रासक्तमानसाः मिथ्याधीतसमाचाराः मिथ्याज्ञानप्रलोभिनः प्राप्य घोरं कलियुगं कलिजैः परि
पीडिताः त्यक्त्वा तपोबलं कृत्स्नं गच्छध्वं नरकान् पुनः भविष्यति हृषीकेशः स्वाश्रितोपि पराङ्मुख इति ॥ तत्रैव कलिदो
षप्रकरणे कुर्वंति चावताराणि ब्राह्मणानां कुलेषु वै दधीचिशापनिर्दग्धाः पुरा दक्षाध्वरे द्विजाः निंदंति च महादेवं सम
मः विस्नेत सांद्यनितानेवाभिप्रेत्य सौरपुराणे पुरुषोत्तममाश्रित्य शिवनिंदापरा द्विजाः कलौ युगे भविष्यंति भ्रातालै
ष्णं माधवइति एवं च कलौ रुद्रो महादेवो देवानामीश्वरः प्रभुः न देवता भवेन्नृणां देवतानां च दैवतमिति कलिदोष-
प्रदर्शकवचनं दधीच्यादिशापविषयमेव शिवनिंदकस्य वहिष्कार्यत्वं श्रीमद्भागवतवचनेनाप्यवगम्यते त-

यादि कर्णौ पिधाय निरयान्नरकं [illegible] धर्मानिवर्तते शिवद्विषस्त्यागे ॥ [illegible]
स नाम शुश्रूषोपजीव्य महत्पातकैः [illegible] पर्वदामि ॥ इत्याद्ि ॥ एवं च सप्तदशाविंशे रौरवे शैवे-
शिवनमस्कारैर्वर्दूषणश्रोतुकस्यापि दूषकस्य च वक्ष्यमाणनिषेधात् तथा कर्णौ पिधाय सत्वरं निर्ग-
च्छेदित्यादिनिषिद्धश्रोतकः ॥ शक्तश्चेत्तेषां दूषणानि रंतानामसतां रसनां छेदयेदेव संशयः ॥ तुच्छ-
त्व ॥ बुद्धिपूर्वं शिवदूषणश्रवणात्तीव्रत्सु प्राणानपि त्यजेत् ॥ सप्राणत्यागः सुरापानादिदोषनिमि-
त्तकप्रायश्चित्तवत् प्राणत्यागवत्कर्मैव ॥ एवं च शिवदूषणश्रोतृणां मरणांतं प्रायश्चित्तमभिलिख्य
ते स्वयं शिवदूषणरतानां केषुचित्कल्पेषु न प्रायश्चित्तं नैव सन्तीति ते स्मृतिः शाङ्कराणामेते सुकं भवति ॥
तथाचोक्तं कौर्मे ब्रह्महत्यादिसकलपापानां प्रायश्चित्तविधानप्रकरणे देवतानरनिंदकानां प्रायश्चित्त
विधानानंतरं शिवनिंदायां प्रायश्चित्ताभावः ॥ यः सर्वभूताधिपतिं विश्वेशानं विनिंदति ॥ न तस्य निष्कृ-
तिः शक्या कर्तुं वर्षशतैरपीति ॥ यद्यप्यनेन शिवदूषणे मरणांतमेव प्रायश्चित्तं कामतोऽभ्यासवधेनि
ष्कृति नास्ति धीपवदित्यादौ स्मृतिकाराणां मरणांत प्रायश्चित्तमेव निष्कृत्यभावव्यवहारात् तथापि शिवदूषणश्रवणे
मरणांतं प्रायश्चित्तं चेत्तद्दूषणकर्तॄणां ततोऽधिकं न्याय्यमिति तेषां प्रायश्चित्ताभाव एव पर्यवस्यतीत्युक्तं शिवस्य

विष्णवादिद्वारण्यस्यं च विष्णवादीनां भक्तिजन्यप्रसादद्वारा सकलवांछितार्थप्रदातृत्वात् विष्णवादिप्राप्यत्वाच्च वि-
ष्णोः शिवभक्तिश्च कौर्मे प्रतिपादिता नार्जुनेन समः शंभोर्भक्त्या भूतो भविष्यतीत्युक्त्वा सत्यवतीसूनुं कृष्णं वा दे-
वकीसुतमिति भक्तिजन्यप्रसादश्च सौप्तिके भारते श्रूयते शिववचनेन अहं यथावदाराध्यः कृष्णेनाक्लिष्ट-
कारिणा तस्मादिष्टतमः कृष्णादन्यो मम न विद्यते इति द्रोणपर्वणि च देवदेवस्त्वचिंत्यात्मा अजय्यो विष्णुरव्ययः
सर्वरूपं भवं ज्ञात्वा लिंगेऽर्चयति तं प्रभुं तस्मिन्नभ्यधिकां प्रीतिं करोति वृषभध्वजः इति व्यासवचनात् अवतारिवि-
ष्णोरपि शिवप्रसादः श्रूयते आरण्यपर्वणि तीर्थयात्रायां विधौततो गच्छेत् सुपर्णाख्यं त्रिषु लोकेषु विश्रुतं यत्र विष्णुः
प्रसादार्थं रुद्रमाराधयत् पुरा वरांश्च सुबहून् लेभे देवतैरपि दुर्लभान् उक्तं च त्रिपुरघ्नेन परितुष्टेन भारत अपि चा-
स्मैः प्रियतमो लोके कृष्ण भविष्यसि त्वन्मुखं च जगत्सर्वं भविष्यति न संशयः इति द्रोणपर्वणि च तपोध्याये मैनाके
षष्टिवर्षसहस्राणि तपश्चर्यया लब्धप्रसादाय नारायणाय भगवता शिवेन लोकोत्तरशौर्यादिकं दत्तमिति वि-
स्तरेण प्रपंचितं हरिवंशे च पारिजात संहितायां इति संस्तूयमानस्तु भगवान्वृषभध्वजः प्रसार्य दक्षिणं हस्तं ना-
रायणमथाब्रवीत् मनीषितानामर्थानां प्राप्तिस्ते सुसुरोत्तम पारिजातस्य हर्तासि मा भूत्ते मनसो व्यथा पुरा मैना-
कमाश्रित्य तपस्त्वमकरोर्यदा तदा मम वचः कृष्ण संस्मृत्य स्थैर्यमाप्नुहि अवध्यस्त्वमजय्यश्च मत्तः शूरतरस्तथा प्र-
पिता सीत्ययो वं यत्तत्तथा न तदन्यथेति शिवप्रसादः विष्णोरुक्तः शिवस्यापि विष्णुप्राप्यत्वं च तदाश्रियेमरुतोम-

ऽर्थं तं रुद्रयत्ने ज्ञानिप्रत्यारुचिन्नभिन्नि शिवाभिव्यक्तिस्थानं लिंगं प्रकृत्य तद्विशेषयन् पदं यद्विष्णोरुपमं निधायी
ति मंत्रवर्णो दर्शयति तन्मंत्रार्थस्तु पुराणे पराशरेण दर्शितः रौद्रं लिंगं महाविष्णुर्भक्त्या लिंगं शिलामयं चारु
चित्रं समभ्यर्च्य लब्धवान् परमं पदमिति परमं पदं च शिव एव प्राप्यते गम्यत इति पदमिति व्युत्पत्तेः प्राप्यर्थकस्य
ज्ञानार्थकत्वात् शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा विज्ञेय इति श्रुत्या शिवस्यैव मुमुक्षुज्ञेयब्रह्मतोक्तेः अत एव ज्ञा
नसाध्यमोक्षार्थिनं प्रति ज्ञेयं चोक्तं सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं संग्रहेण ब्रवीमीति ज्ञेयं शिवाख्यं ब्रह्म प्रकृत्य सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति कठवल्लीषु
श्रूयते तत्र विष्णोरपि पदं प्राप्यं शिवाख्यं ज्ञेयं ब्रह्मेत्यर्थः न तु विष्णोः पदं स्थानं वैकुण्ठादिकमित्यर्थः महतः परमव्य
क्तमव्यक्तात्पुरुषः परः पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिरिति निर्दिष्टस्य पुरुषस्यैव स्थानप्रमाणतोप
दबाह्यनिर्दिश्यत्वावगमात् स्थानप्रमाणस्य विष्णोरिति समाख्यातो बलवत्त्वात् पुरुषश्चात्र न विष्णुः तस्यैव तत्प्रा
प्यत्वाभावात् शिवो रुद्रो महादेवः शंकरो ब्रह्म सत्यं एवमादीनि नामानि विशिष्टानि शिवस्य तु इति स्कन्दपुराणव
चनाच्च पदशब्दः शिवाभिधायी एव एवं च सर्वे वेदा यत्पदमामनन्तीत्युपक्रम्योक्तः सर्ववेदतात्पर्यविषयज्ञेयं ब्रह्म
शिव एवेति सिध्यति प्रतिपादयति च इमा रुद्राय स्थिरधन्वने गिर इति मंत्रः शिवस्य सर्ववेदतात्पर्यविषयत्वं
पराशरोऽप्येवमेवाह स्मृतयश्च पुराणानि भारतादीनि सत्तम। शिवमेव सदा सांबं हृदि कृत्वा ब्रुवंति हीति अयमेवा

[illegible] निचित् वेदवाक्यानि ब्राह्मणा वेदवित्तमाः रुद्रमूर्तिं समाश्रित्य शिवे परमकारणे पर्य
[illegible] क्यानि कानिचित् विष्णुमूर्तिं समाश्रित्य ब्रह्ममूर्तिं च कानिचित् आग्नेयीं मूर्तिमाश्रित्य मु
[illegible] सूर्यमूर्तिं मुनिश्रेष्ठास्तथैवान्यानि कानिचित् एवं मूर्त्यभिधानेन द्वारेणैव मुनीश्वराः प्र
[illegible] तः सर्वासु मूर्तिष्वपि अधिकमानंदमयाधिकरणोपरोक्तानां विष्णोर्ब्रह्मत्वसाधकानां श्रौ
[illegible] णयेन न विष्णोर्ब्रह्मत्वनिर्णायकत्वमिति न विष्णोपरोक्तश्रुतिसमन्वयसिद्धिरिति
[illegible] यः ॥ तदेवं श्रौयोक्तरीत्योक्तार्थसिद्धौ शिवस्य जगत्कर्तृत्वादिमाहात्म्यज्ञानं तमोयो
[illegible] त्स्वदुर्भास्य स्वयंसौवोन्नमस्य विष्णुरेव तामसत्वेनोपालंभमनूपतयातदुपालंभफल-
[illegible] यैसदुपालंभानिवारयामइत्युक्तत्वदीयानुभूतयाकृपारुष्येयद्दुष्टांप्रमातापित
[illegible] चीं रूपं तं भयमतो वेदानमुष्मैस्वतो निर्मायोपादिदेशाचांतरगतः साक्षीति योगीयते
[illegible] ग्रमातिषु भासोपि जीवाभिधां यस्तुत्वे निरुपाधिकः सभगवान्मूयाच्छ्रियं भूतये ॥७॥

(॥ इति शास्त्रयोनित्वाधिकरणं समाप्तं ॥)

श्रीगणेशाय नमः ॥ सांख्योक्तं जगतो न हेतुरिति तु ब्रह्मैव गिरिसितांतिनं संवादिन्या समर्थितं श्रुतिभिः भाष्यानुस्मृत
खंडनैः ॥ अखिलतद्रूपसाक्षिणं नलमतः पंके रुहाधीनहारं दंकं तारेशं सदैव परमानंदं ब्रह्मवंदे नाहं ॥ १ ॥ अखि
लीक्षणसंज्ञकेऽधिकरणे सद्दीपिकेऽयोजि नेयादृष्याह ॥ दोषभूषणपुरस्कारं जातहृदयैः ॥ एतद्धै रघुनाथसूरि
रचितं विहृत्य न लोपदं श्रीमत्शंकरपादभूषणमिदं लीशास्त्रज्ञत्वांचितं ॥ २ ॥ ईक्षतेर्नाशब्दं ॥ अथातो ब्रह्मजि
ज्ञासेत्यत्र मोक्षानुनीयत्वारमाधिकं तु ब्रह्मेति निश्चित्य तद्ब्रह्म सितं नाद्विषाद्यभिमुखं ॥ तदेव च स्वरू
पतटस्थलक्षणाभ्यां जन्माद्यस्य यत इति सूत्रेण प्रतिपादितं ॥ तत्रैव च तृतीयसूत्रेण शास्त्रैकसमधिगम्यत्व
मुक्तं ॥ ननु समन्वयादित्यत्र शास्त्रतात्पर्यगोचरत्वरूपं शास्त्रैकसमधिगम्यत्वं सिध्यति तस्य प्रमाणां
तरगोचरत्वानिष्फलत्वनैष्फल्यत्वान्न संभवतीत्याक्षिप्य समाहितमिदानीं स एव प्रागुक्तः समन्वयः परपक्षप्रति
क्षेपपूर्वकमनेनाधिकरणेन दृढीक्रियते ॥ अत एवाध्यायसंगतिः ॥ सद्ब्रह्मलिंगानां सद्विद्यादीनां प्रधानादिप
रत्वं व्युदस्य ब्रह्मपरत्वव्यवस्थापनात्पादसंगतिश्च ॥ अनंतरातु ॥ जिज्ञास्यं सर्वज्ञं परमप्रयोजनं रूपं ब्रह्मज
गत्कारणत्वादिना वेदांतप्रतिपाद्यमिति यदुक्तं तन्न संभवति स्वप्रकाशानंदरूपपरमपुरुषार्थरूपब्रह्मणो
भिन्नस्य जडस्य प्रधानस्यैव जगत्कारणत्वादिना वेदांतप्रतिपाद्यत्वावगमादिति सद्विद्यामालंब्य सांख्यरीत्या
प्रागुक्तसमन्वयाक्षेपेण पूर्वपक्षप्रवृत्तेराक्षेपिकी ॥ अत्र च सदेव सौम्येदमग्र आसीदित्यादिवेदांतवाक्यानि

जगत्कारणत्वेन प्रधानमेव प्रतिपादयंतु तत्र ब्रह्मेति तदर्थं चोक्तविधं जगत्कारणत्वं प्रधानादावेव संभवत्यपि ब्रह्म-
ण्यवेति संशयः ॥ नहीजं चचादिविप्रतिपत्तिः ॥ पूर्वपक्षस्तु कारणत्वेन वेदांतप्रतिपाद्यं प्रधानमेव तत्रैव कारण-
त्वोपपत्तेः ॥ न ब्रह्म तस्य कर्तृत्वोपयोगिज्ञानाश्रयत्वाभावात् ॥ तथाहि न तावदुपलब्धिमात्रस्य ब्रह्मणः कर्तृ-
त्वोपयोगिज्ञानाश्रयत्वं ॥ यतो ज्ञानं यद्ब्रह्मण्यभ्युपगम्यते तन्नित्यमनित्यं वा स्यात् ॥ नाद्यः ॥ त्वया ब्रह्माति-
रिक्तनित्यज्ञानानभ्युपगमादत्यंताभेदे आश्रयाश्रयिभावानुपपत्तेश्च ॥ न द्वितीयः ॥ सत्वगुणपरिणामविशे-
षस्य तस्य निर्गुणे निर्विकारे च परमात्मन्यसंभवात् ॥ गुणाभिमानिषु च जीवेषु तादृशज्ञानप्रतिबिंबाश्रयत्वात्
ज्ञानसत्वं निरतिशयसर्वोत्कर्षेण तादृशसर्वविषयकसत्वगुणपरिणामात्मकज्ञानप्रतिबिंबवत्त्वेन योगिनां स-
र्वज्ञत्वं न संभवेत् ॥ प्रतिबिंबश्च यस्यां बुद्धिव्यक्तौ यस्य पुरुषस्य विजातीयसंयोगादिर्विलक्षणः पुरुषांतरव्यावृ-
त्तः संबंधविशेषः तद्बुद्धिपरिणामेष्वज्ञानसुखदुःखादीनां तत्पुरुषे प्रतिबिंबोऽन्यथा मुक्तस्यापि संसरद्बुद्धिध-
र्मदुःखादिप्रतिबिंबवत्त्वप्रसंगेनानिर्मोक्षप्रसंगात् ॥ स एवाऽस्यार्थः सांख्यप्रवचनभाष्ये ॥ तथा च नित्यमुक्ते प-
रमात्मनि तादृशप्रतिबिंबसत्ता दूरनिरस्तैव ॥ यद्यपि प्रधानेऽपि न तादृशं तथापि सर्वविषयकज्ञानाश्रयत्वं दुर्घ-
टं ॥ तथापि ज्ञानाकारेण परिणामशीलसत्वगुणात्मकत्वादुपपद्यते ॥ तत्र सर्वज्ञत्वव्यवहारः ॥ परमात्मनि तु
तादृशज्ञानानुकूलशक्तिमद्गुणाभेदशून्यत्वान्न कथमपि सर्वज्ञत्वं दुरुपपादं ॥ यदाप्यनिर्वचनीयमायावृ-

नित्यं ज्ञानं ब्रह्मणि संभवतीति तदाश्रयब्रह्मण्यपि सर्वज्ञत्वव्यवहार इति त्वगौण्यं तारितु व्यासि ॥ तदापि प्रधान
स्य त्वाविकारभूतसत्वपरिणामाश्रयत्वं ॥ यर्हि ज्ञानाश्रयं ब्रह्मापि तु तदाश्रयमिति सर्वज्ञवादे न मुख्यज्ञानाश्रयप्र
हणं संभवे औपचारिकतदाश्रयपरिग्रहोऽयुक्त एव ॥ नह्यारोपितसर्पत्वसंसर्गवती रज्जुः सं रसनः सर्पशब्देन व्य
पदिश्यते ॥ किंचानित्यज्ञानस्य शरीरेंद्रियानिबाधतया प्राक्कारणे ब्रह्मणि कथं तत्संभवः प्रधानेपि कथमिति चे
न्न ॥ कथंचिदौपचारिकत्वाविशेषे प्रधानपक्षपातेन युक्त इति चेत् ॥ सत्यं प्रधानस्य मुख्यकर्तृत्वासंभवेप्यौ
पचारिकं तदुपपद्यते ॥ उपादानत्वं च मुख्यमेव सांशत्वान्मृदादिवदपरार्थत्वाच्च संघातस्य ब्रह्मवन्निरंशामस्तु
पगम्यते भवता ॥ तस्मात्प्रधानमेव कारणवाक्यप्रतिपाद्यं ॥ यदि च प्रधानस्य जगत्कारणता सुस्थापाद्यकार्यं सु-
खदुःखमोहात्मकत्वसदृशाजडप्रकृतिकं स्वसदृशप्रकृतिकं वा कार्यत्वात् संमतवदित्याद्यनुमानसमधिगम्यं
प्रमाणांतराधिगते च नागमतात्पर्यं ॥ तदागमास्तु तत्र वेदांततात्पर्यं ॥ तथापि प्रमाणांतरप्राप्तप्रधानानुवादस्य
जीवे तदैक्यसंपत्तिविधानार्थेति निरर्थकानुवादत्वप्रसंगः एतदभिसंधायैवोक्तं कल्पतरौ प्रयोजनं तु तत्त्वमसी
ति चेतनेन तच्छब्दवाच्यप्रधानैक्यसंपत्तिः पूर्वपक्षे ॥ सिद्धांते तु तस्य ब्रह्मैक्यप्रमितिरिति ॥ तस्मादुक्ते ब्रह्मणि न
वेदांतसमन्वय इति ॥ सिद्धांतस्तु जगत्कारणं तया वेदांतप्रतिपाद्यं ॥ नाशब्दत्वादिति तं प्रधानं ईक्षतेः ईक्षणान्न
चेक्षणं ब्रह्मण्यनुपपन्नमिति वाच्यं ॥ मायापरिणामवृत्तिविशेषस्य तस्य ब्रह्मण्यपि संभवात् ॥ ननु सत्वगुण

परिणामविशेषरूपमीक्षणं प्रधानेपि संभावितं मुख्यं चेत्युक्तमितिचेन्न ॥ संकल्पादीनां त्वसमानविषयकज्ञा
नपूर्वकत्वनियमदर्शनेन चेतनानधिष्ठितप्रधाने तदभ्युपगमायोगात् ॥ मन्मतेच परमात्मनः स्वरूपभूतज्ञाने
नसर्वज्ञतया संकल्पाद्युपपत्तिः ॥ नच स्वरूपभूतज्ञानस्येच्छाश्रितत्वानुपपत्तिरभेदे आश्रयाश्रयिताभावायोगादि
तिवाच्यं ॥ आविद्यकभेदोपगमेन तदुपपत्तेः ॥ यथोक्तं पंचपादिकायामानंदो विषयानुभवो नित्यत्वं चेति संति
तद्धर्माः अपृथक्त्वेपि चैतन्यात्पृथगिवावभासंत इति ॥ अभिमतश्चायमर्थो भाष्यकृतामपि यदाहुः ॥ यस्यस
र्वविषयावभासनक्षमं ज्ञानं नित्यमस्ति सोसर्वज्ञ इति विप्रतिषिद्धमिति ॥ नन्वेवमप्यास्तां नित्यः सर्वज्ञस्तद
धीनसंकल्पादिकं तु प्रधानस्यास्त्विति चेन्न ॥ संकल्पादेरीक्षणनिर्वाहकज्ञानसामानाधिकरण्यसंभवे तद्वैयधिकरण्य
कल्पनाया अयुक्तत्वात् अत एव च श्रुतत्वादिति सूत्रमपि स्वरसतः संगच्छते ॥ अत्र सूत्रे संकल्पात्मकेक्षणाश्रयज्ञा
नेन प्रधानव्युदास उक्ते तत्र कंठोक्त्यैव तेनेति विशेषात् ॥ उक्तं च तत्र सूत्रभाष्ये श्रुत्याहुर्नैव सर्वज्ञ ईश्वरो जगतः
कारणमिति श्रूयत इति ॥ ईक्षणं ज्ञानमेवेत्युक्तौ तु तादृशसूत्रप्रयोजनं वक्ष्यते ॥ ननु तत्तेज ऐक्षतेत्यादावीक्षति-
र्गौण इत्यवश्यं वाच्यं ॥ तेजःप्रभृतीनामीक्षितृत्वस्य सिद्धांतिनाप्यनुपगमात्तथा च तत्सामान्यपाठात्तदैक्षतेत्या
दावपि ईक्षतिर्गौण इति युक्तमिति शंकामभ्याह ॥ गौणश्चेन्नात्मशब्दात् ॥ ईक्षतिर्गौण इति चेन्न ॥ अनेन जीवेना
त्मनानुप्रविश्य स आत्मा तत्त्वमसीत्यादावात्मशब्दस्यात्मनात्म्यबोधकतृतीयायाश्च सत्वात् ॥ अयं भावः आत्म

शब्दः स्वरूपपरश्चेतनपरश्च हि सः तत्र जीवेनात्मनेत्यत्र स्वरूपपर एव ग्राह्यः ॥ अन्यथा जीवशब्देनैव चेतनलाभे-
न आत्मपदवैयर्थ्यापत्तेः ॥ स्वरूपस्य च ससंबंधिकत्वात् संबंध्याकांक्षायां से यं देवतैक्षतेति समभिव्याहृतापरदे-
वतैव संबंधितयान्वेति ॥ तथा च यदि यं देवता जीवादत्यंतभिन्ना तदा जीवस्य तत्स्वरूपत्वमनुपपन्नं स्यात्सआ
त्मेत्यत्र चेतनपरो ह्यात्मशब्दः परदेवतापरामर्शितच्छब्दसमानाधिकरणो दृश्यत इति न प्रधानस्य तेजः प्रभृति स्र
ष्टृदेवतात्मकत्वमिति ॥ नन्वयमात्मशब्दोपि प्रधाने गौण एव आत्मनः सर्वार्थकारित्वात् ॥ यथा राज्ञः सर्वार्थकारिणि
भृत्ये भवत्यात्मशब्दो ममात्मा भद्रसेन इति शंकां करोति ॥ यद्वा स आत्मेत्यादावात्मशब्दः स्वरूपबोधकः जीवेना
त्मनेत्यत्रापि ममात्मामित्रमित्यादाविवात्मशब्दो गौण इति शंकां निराकरोति ॥ तन्निष्ठस्य मोक्षोपदेशात् ॥
अनेन जीवेनात्मनेत्यत्र यद्यपि नैतादृशार्थसंभवः प्रधानस्य जीवभोगापवर्गसाधकत्वेपि जीवस्य प्रधानार्थत्वा
भावात् ॥ तथापि चेतनपरत्वमभिप्रेत्येयं शंका ॥ इयं च संभवदुक्तिकतामात्रेण भाष्ये उपदर्शिता ॥ अस्यात्मश
ब्दस्य चेतनपरत्वे वैयर्थ्यस्य दर्शितत्वात् ॥ अत एव भाष्ये एतत्सूत्रस्य स्वतंत्रहेतुपरतायामेव निर्भरो दर्शितः ॥
अत एव मिश्रैरप्युक्तं ॥ तन्निष्ठशब्दस्य मोक्षोपदेशादिति शंकोत्तरत्वेन वा स्वातंत्र्येण वा प्रधाननिराकरणार्थं
सूत्रमिति ॥ आचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति ॥ तस्मिन्जगत्कारणे
सदात्मनि निष्ठा स्वैक्यधीर्यस्य तादृशस्य पुरुषस्य स्वरूपाच्छादकाविद्यानिवृत्तिरूपमोक्षोपदेशादिति च सूत्रा

स्याभावात्॥ आपच प्रधानस्यानेकात्मकस्य परिणामसंभवात् कारणत्वोपपत्तिर्मृदादिवन्नासंहतस्यैकात्मकस्य
ब्रह्मण इति च पूर्वपक्षभाष्ये कर्तृत्वोपयोगिज्ञानवत्तायाः परिणामित्वोपयोगि सांशतायाश्च ब्रह्मण्यसंभवप्रद
र्शनेन तस्य कर्तृत्वमुपादानत्वं चेत्युभयमपि न संभवति प्रधाने तु नद्वयमप्युपपद्यत इति व्युत्पाद्य तदिति व्युत्पाद्य
कारणतया वेदान्तप्रतिपाद्यं प्रधानमिति पूर्वपक्षपर्यवसाने कृते प्रधानं न कारणतया वेदान्तप्रतिपाद्यमशब्द
त्वादिति सिद्धान्तः श्रीमद्भाष्यटीकादौ प्रदर्शितः॥ कथमनयोर्भावत्वविकल्पानां स्वबुद्धिकल्पितानामवकाशः॥
न च कारणतया वेदान्तप्रतिपाद्यमुपहितं शुद्धं वा तवाभिमतमिति विकल्पो नायुक्त इति वाच्यं॥ उपहितशुद्ध
योस्तादात्म्येनोपहिते शुद्धधर्मसत्ताद्युपपत्त्यात्वदोषदूषणानवकाशात्॥ न चोपहितमात्रं मन्मते मिथ्येति प्र
मितत्वं वा व्याप्यव्याधिकरणकल्पनयानुपहितसत्यता वा विस्पष्टमुपपादनात्॥ तथाहि॥ एवं परमात्मनः शु
द्धस्वभावाज्जीवानामात्यन्तिकाभेदेप्यनिर्वचनीयानाद्यविद्योपाधिभेदात् काल्पनिको जीवानां भेद इति टीकावि
वरणावसरे उपहितस्य जीवत्वापत्ते॥ यद्युपाधिविशिष्टस्य संसारो नाशितात्मनः तल्लक्षितस्य चेद्ब्रह्मामुक्त्यात
द्रूपमुच्यतामिति केशवोक्तं दूषणमनूद्य समाहितं॥ यतो न विशेषणमविद्यानाद्युपलक्षणं किंतूपाधिः॥ कः पु
नरेषां भेदः॥ उच्यते कार्यान्वयित्वेन भेदकं विशेषणं नैल्यमिवोत्पलस्य॥ कार्यानन्वयित्वे न भेदकानामुपाधि
तोपलक्षणता च सिद्धा॥ तत्र चायं विशेषः॥ यावत्कार्यमवस्थायि भेदहेतोरुपाधिता॥ कादाचित्कतया भेद

धीर्हि [illegible] ॥ [illegible] श्रुतिस्मृ[illegible] उपलक्षणं [illegible]
[illegible] कार्यौ [illegible] नाभ्युपेते ॥ [illegible] पादस्कन्दिका [illegible] ॥ का कल्पु
न चैत्र [illegible] पादद्वदन्ते ॥ नादिहासियानविशेषणामिति न तन्नाशो जीवनाशः ॥ न चोपलक्षणमिति ब्रह्म
णि न संसारः ॥ यावत्संसारं तदनुवर्तिष्यते तन्निवृत्तौ जीवः संब्रह्मभावमेष्यतानि ॥ अत्र यद्युपहितः उपाधिमनु
कोब्रह्मणोन्योपि थ्यैव विशिष्टचैतन्यस्याविद्यानाशे नाश एव स्यादित्यविद्याया विशेषणत्वाः अतस्तूपाधित्व
मंगीकृतमप्यकिंचित्करं स्यात्तत्तौ नोपहितस्याभिव्याप्तत्वं भेदमात्रं तु न कल्पितमित्येवासत्त्वानः ॥ एवं चोपहित-
स्य जगत्कारणत्वावलंबनेनासिद्धान्तेन कोपि दोषः ॥ पूर्वसूत्रेपि जगत्कारणत्वाद्युपलक्षिते अविद्याद्युपाधिविशि
ष्टजैव पारमार्थिकरूपे ब्रह्माद्युख्यावेदान्तसमन्वय उपपादितः ॥ उक्तेजीवस्य पारमार्थिकरूपे किंचिदुपहि
तेपि न जगत्कारणता संभवति किंतु प्रधान एव ॥ तथा चोक्तसमन्वयो न संभवतीत्याशंकानिरासाय सोपाधिके
तस्मिन्जगत्कारणतां जनिर्णीयते ॥ तथा च सति जगत्कारणत्वोपलक्षिते उक्तजीवरूपे पूर्वसूत्रोक्तः समन्वयः
स्थितो भवति ॥ इत्थमेव चोपहिते जगत्कारणतानिर्वाहकत्वात् अन्तराणामपि प्रकृतोपयोग इति न किंचिदनुपप
न्नं ॥ एतेनेक्षणादिरूपहेतुसिद्धिः शंकापि चन्द्रिकोक्ता निरस्ता ॥ शुद्धाभिन्ने कल्पित तद्भेदवत्युपहिते न त्वं
भवात् ॥ नन्वेवं भाषान्तरेण शुद्धे ब्रह्मण्येवोपाध्यवच्छेदेन जगत्कारणता स्वीकृता परं स्यान्न व्याप्यवृत्तिरित्ये

तावदेव पर्यवसितमिति चेत्किंचातः शुद्धं ब्रह्म न जगत्कारणमिति भावत्कमपवादार्थवैरोध इति चेत् ॥ न ब्रह्मणि
जगत्कारणतानानवच्छिन्नवृत्तिकेति तदर्थात् ॥ न च तात्पर्यविषयत्वमीक्षणस्य चंद्रिकोक्तं साधु तत्त्वावांतर-
तात्पर्योपगमात् ॥ न चात्र सदेवेत्यादिवाक्यसमन्वयोक्तिश्चेदानंदमयोऽभ्यासादितिवत्सदीक्षतेरिति सूत्रं स्यात्
॥ प्रधानस्य शब्दत्वनिरासमात्रं चेदिदमधिकरणं तन्निरासकं चतुर्थपादे स्यादिति चंद्रिकोक्तं दूषणमपि न साधु
॥ अशब्दशब्दितं प्रधानं न जगत्कारणतया वेदांतप्रतिपाद्यमशब्दत्वात् कारणत्वज्ञानाबाध्यत्वरूपसत्त्वस्यानंत्यादिधर्मिनि
ष्ठस्य वैदिकसद्विद्यादिगतसदादिशब्दप्रतिपाद्यत्वाभाववत्त्वादित्येकानुमानेनाभिहिते तदसिद्धं सद्विद्यायामे
व जगत्कारणतया प्रतिपाद्यं प्रधानमित्यवगमादिति शंकानिरासाय सद्विद्यायां जगत्कारणतया प्रतिपाद्यमा
नं न प्रधानमीक्षतेरिति ॥ पूर्वानुमानोक्तसामान्याभावसाधकविशेषाभावरूपहेतुसाधकमनुमानमित्येतादृ
शानुमानद्वयस्याविवक्षितस्य सदीक्षतेरिति विन्यासेनालाभात् ॥ न च सद्विद्यागततदादिशब्दाप्रतिपाद्यत्व
स्य यत्किंचिद्विशेषाभावहेतुना कथं कारणतया वेदांतप्रतिपाद्यत्वाभावरूपसामान्याभावसिद्धिः प्रधान
स्य सद्विद्यागततदादिशब्दाप्रतिपाद्यत्वेऽपि शास्त्रांतरे कारणबोधकशब्दप्रतिपाद्यत्वस्य प्रधाने संभवादिति
शंक्यं ॥ उक्तशंकानिराकरणार्थैव गतिसामान्यादित्यनेन पूर्वनिरुक्तार्थकेण सामान्याभावसाधकविशेषा
भावरूढपर्यवसानस्यावेदितत्वात् ॥ ननु प्रधानं जगत्कारणतया वेदांतप्रतिपाद्यमशब्दत्वादित्यस्य प्रथमा

नुमानस्यापि प्रसक्ताप्रामाण्यनिवृत्तिः ॥ सदेवेत्यादिवाक्यप्रतिपाद्यं न प्रधानमिति प्रत्येकं समर्थनेनापि सम
न्वयविरोधिबाधशंकानिराकरणेन समन्वयसिद्धेरिति चेन्न ॥ एतो लक्षणस्य त्रयो दोषाः ॥ अव्याप्तिरसंभ-
वोतिव्याप्तिश्च ॥ न च वन्निरासं विना लक्षणपरिशुद्धिरित्यतिव्याप्तिनिरासाय क्वापि वेदान्ते प्रधानस्य न जगत्का
रणतया प्रतिपाद्यत्वमित्ययमर्थो वर्णनीयः स च सदीक्षतेरिति विन्यासमात्रेण न निर्वहतीत्युक्तविन्यासादरः ॥
तत्र न सद्विद्यादीनां जगत्कारणतया प्रधानप्रतिपादकत्वसंभवादुक्तसाध्यस्य बाध इति शंका सद्विद्यायां ज
गत्कारणत्वप्रतिपाद्यं न प्रधानमीक्षतेरित्यादिना निरस्यते सद्विद्यादिना तत्प्रतिपादनेपि शाखांतरे तथा
प्रतिपादनस्यादिति शंकानुगतिसामान्यादिति सूत्रेण ॥ नन्वेवं सद्विद्यादिना प्रधानं न जगत्कारणतया प्रति
पाद्यमिति शंकानिरासेनैवातिव्याप्तिनिरासः संभवति शाखांतरे तत्प्रतिपादनस्यापि गतिसामान्यादित्य
नेन निरासादिति प्रधानं न तथा प्रतिपाद्यमशब्दत्वादिति सामान्यप्रतिज्ञादिकं नानुसरणीयमिति चेन्न ॥ अ
त्रैवातिव्याप्तिशंकापि निरस्तेति द्योतनाय तदावश्यकत्वादन्यथाऽसंभवशंकैवात्र निरस्यत इति भ्रमाप
त्तेः ॥ यथात्रातिव्याप्तिनिरासेपि सा अस्यं तयोपरिष्टाद्वक्ष्यामः ॥ अतिव्याप्तिनिरासकयुक्तिभिरेव फलतो
ऽसंभवनिरासान्न तत्र पृथक्प्रयत्नांतरेण भाव्यमिति यत्किंचिदेतत् ॥ यद्यपीक्षतेरित्यनेन बाधनिरासवद
सिद्धिनिरासोपि भवति तथापि समन्वयविरोधिनो बाधस्येदानीमवश्यनिरसनीयतया तन्निरसनहेतुतया

साक्षात्पादत्रयीसङ्गतेति तयाच सङ्गत्याधिकारोऽत्रैव युक्तः प्रधानस्य क्वचित् वैदिकशब्दप्रतिपाद्यत्वेऽपि समन्वया
विरोधात् साक्षात्पादत्रयाः सङ्गत्यभावाच्चानुमानिकाद्यधिकरणत्रयस्य तुरीये निवेशः ॥ अस्मिन्नधिकरणेऽनु
मानसिद्धस्य सावयवप्रधानपरत्वमेव वेदान्तानां न निरवयवब्रह्मपरत्वमिति सद्विद्यामालम्ब्य समन्वयविरोधिजन्मा
दिसूत्रोक्तजगत्कारणत्वबाधशङ्का वेदान्तानां प्रधाने सद्विद्यास्वारस्यं निरस्य ब्रह्मणि तद्व्यवस्थाप्य निराकृतान-
दुपोद्धृत तयाच गतिसामान्यं प्रतिज्ञातं तदेवानन्दमयोऽभ्यासादित्यादिभिः पत्न्यादिशब्देभ्यः इत्यन्तैः सूत्रैः तत्तच्छं
कानिराकरणेनाभिप्रायाव्यवस्थापितं पुनरपि दर्शितसामान्याभावसाधकमशब्दत्वलिङ्गमाक्षिप्य व्यवस्थाप्य
ते चतुर्थपादे तेन च प्रधानस्यापि क्वचित्कारणत्वप्रतिपादने जन्मादिसूत्रोक्तलक्षणातिव्याप्तिशङ्कापि निराकृता
भवतीति नास्मिन्नधिकरणे प्रधानस्याशब्दत्वानिराससमाप्तमभिमतमिति नैतस्य चतुर्थपादे निवेशापत्तिरिति दूष
णावकाशः ॥ अथ यद्युक्ते नाशब्दमिति सूत्रविन्यासेन कथमुक्तानुमान दूषणलाभ इति चेदित्थं ॥ तत्तु समन्वया
दिति सूत्रेणेक्षतेर्नाशब्दमित्यादिसूत्रैर्याद्रूपं ब्रह्म निरूपितं तादृशब्रह्मपरत्वस्य जगत्कारणप्रतिपादकोऽपि प्रवृत्ति
तावत्यामार्थतयेहानुषज्यते ॥ यद्वा तत्रैव साध्यसमर्पकतयाविभक्तिविपरिणामेनानुषक्तस्य शास्त्रयोनिपद
स्येहानुषङ्गः ॥ प्रधानमिति च पदमध्याहार्यं ॥ यद्वा अशब्दमिति पदमेव पक्षसमर्पकं सत् आवृत्त्या विपरिणामे
न हेतुसमर्पकं अशब्दमिति सांख्यपरिकल्पितानुमानगम्यमित्यर्थकं प्रधानस्यैव बोधकं ॥ तथा च प्रधानं न कारणं

[illegible] शास्त्रयोनित्वादिति प्रथमानुमानं ॥ [illegible]

नो ऽनेकार्थत्वात् [illegible] प्रमाणान्तरायोग्यत्वाद्धि [illegible] लक्षणादिवदनुमानत्वात् ॥ [illegible] परिणामादि

योनि पदार्थविभक्तिविपरिणामेन आद्यादि [illegible] ॥ द्वितीयानुमाने शास्त्र

नबोधकत्वाद्भूतत्वं [illegible] कारणस्येक्षणात्मकत्वेन तत्त्वबोधकेक्षणानुसमाप्तिव्यवहारविरोधादिति द्वितीयानुमा

न लाभः ॥ यद्वा जगद्धेतुः शास्त्रयोनित्वाद्ब्रह्म [illegible] इति प्रथमानुमानेन धर्मकारिणि रासायोपकरीत्या शास्त्रयोनि

॥ कारणत्वेन सद्विधा भाति पाद्यं ॥ नाशाहं । नप्रधानमीक्षतेरीक्षणादिति द्वितीयानुमानमाश्रयणीयं ॥ एतेनास्य

मनेआनंदमयोऽभ्यासादित्यादावाजन्मादिराय तत्र [illegible] इत्यादिरूपेणाविधेयस्य यर्पणानुषंजनीयस्य तदा द

स्येह ॥ तदशाहं नेक्षतेरित्यदेशसमर्पकतया ऽन्वयः हेतुसाध्ययोः सामानाधिकरण्यं च न च तु अशाहं प्रधानं का

रणस्येक्षितृत्वादिति वदतः हेतुविभक्त्यभावेन साध्यत्वयोग्यत्वशास्त्रत्वरूपसाध्यत्यागेन साध्यकस्यनार्थेय

ध्यात् तत्कारणस्यविभक्तिविपरिणामेनावृत्तिर्वैयधिकरण्यं च ॥ कारणमशाहं प्रधानं नेति कारणस्यो हेत्व

त्वेनाशाहंद्वितदिति हेतूकृतस्याशाहत्वस्य कारणो ऽसिद्धिरिति चेद्वियोक्तं दूषणं निरस्तं ॥ तन्मते उद्देश्यस

मर्पकतया ऽनुषंजनीयस्य तत्पदस्यान्वयवृत्तमन्मनेपि तत्तु समन्वयादित्यत्र साध्यसमर्पकतया अनुषक्तस्य

शास्त्रयोनित्वदस्यैवात्रानुषंगेणाशाहं न शास्त्रयोनित्वमशाहत्वादिति योजनायामस्वारस्याभावात् ॥ अत्रानुमा

नैयायशंकानिरासायाश्रयणीये शास्त्रयोनित्वाद्धीक्षतेरिति योजनांतरेप्येवं ॥ अत एव न वैयधिकरण्य
मपि शंकास्पदं ॥ परंतु पूर्वपक्षानुरोधेन द्वितीययोजनायां सामान्यवाचि शास्त्रपदं संहितादिरूपशास्त्रविशे
षपरमादर्तव्यमिति विशेषः ॥ श्रीमद्भाष्यमप्यत्रार्थे सरसं ॥ तथाहि ॥ सांख्यपरिकल्पितं सांख्योन्नीतानुमान
गम्यमित्यशब्दपदलक्ष्यार्थकथनं जगत्कारणं शक्यं वेदांतैर्व्याश्रयितुमिति ॥ शास्त्रयोनिपदार्थकथनं ॥ अत्र
हि तदित्यावृत्त्या वैदिकशब्दप्रतिपाद्यत्वरूपहेतुकथनं ॥ कथमशब्दत्वमिति च हेतुसाध्ययोर्द्वयोरप्या
क्षेपः संहितायां प्रधानस्य कारणत्वेन प्रतिपाद्यमानत्वादिति हेतुरभिप्रायकः तत्रोत्तरमीक्षितृत्वस्य चपातका
रणस्येति ॥ प्रमाधिकारणस्येत्यस्य संहितया कारणत्वेन प्रतिपाद्यस्येत्यर्थः ॥ एवं च शास्त्रयोनिपदमेवात्रोद्देश्य
समर्पकं भवतीति न शब्दांतराध्याहारगौरवं सप्रयोजनात्वाच्च न योजनांतरानुसरणं दोषाय ॥ सूत्राणां हि वि
श्वतोमुखत्वं गुण इति सूत्रलक्षणविदः ॥ पठंति च सारवद्विश्वतोमुखमिति ॥ यदपि चंद्रिकायां हेतुकृतम
सान्यत्वं चाशब्दश्रुतिप्रमाविषयत्वं वा वेदासिद्धत्वं वा कारणत्वेन वेदासिद्धत्वं वा चतुष्टयमपि [illegible]
॥ तन्न ते शास्त्रप्रतिपाद्यस्य प्रधानस्याव्याप्यत्वात् अवाच्येच वृत्त्यंतरायोगात् ॥ ननु प्रधानस्य सांख्यमते न-
स्य वाच्यत्वात् कारणत्वेन नैयायिकानामिति श्रुतिसिद्धत्वाच्च ॥ त्वयापि त्रिगुणस्योपादानत्वाभावांतु प्रकृतिं वि
द्यादिति श्रुतिसिद्धत्वांगीकाराच्च ॥ त्रिगुणस्य पारमार्थिकत्वादावेव नव परं विवादः सांख्यानुमानगम्यत्व

पर्यवसितमशब्दत्वं च न वेदान्तवेद्यत्वाभावसाधकं ॥ तथा सति तार्किकोत्प्रेक्षितानुमानगम्यत्वादीशस्यापि
तथात्वापातात् ॥ किंच तयाभीनस्य प्रधानाशब्दत्वस्यैव साधनार्थं वैतद्व्यायस्य तुरीये पादे अव्यक्तादिशब्दानां
प्रधानपरत्वनिषेधेन सूक्ष्मशरीरादिपरत्वकथनपरमाद्याधिकरणप्रयमित्युक्त्या तेनानुगम्यते प्रधानस्य स
र्वथा वेदाप्रतिपाद्यत्वं तवानुमतमिति ॥ एतेन स्वप्रधानतया वेदाप्रतिपाद्यत्वमशब्दत्वमिति निरस्तं ॥ एतदभिप्रेत्यै
व भाष्ये नवाशब्दत्वमितरसित्वमित्युक्तं ॥ अनुव्याख्याने च नह्यशब्दत्वं प्रधाने अंगीकरोत्यसाविति ॥ किंचात्म
न ईक्षारूपस्य न स्वरूपेणेक्षितृत्वं अव्यक्तादिजडविशिष्टस्य तस्य तत्संभवे अव्यक्तस्याप्यात्मानिवेके नात्मवि-
शिष्टस्य तत्स्यात् ॥ तन्निष्ठस्येत्याद्युत्तरसूत्रविरोधश्चेति दूषणमुक्तं न दृश्यसत् ॥ ईशपरतंत्रस्याव्याकृत
स्य तत्वज्ञाननाश्यस्य वैदिकशब्दवाच्यता पाप्यमतसिद्धत्वे पिसातंत्र्यतत्वज्ञाननिवर्त्यत्वादिधर्मविशिष्ट-
स्य तदुपलक्षितस्य वा त्रिगुणात्मकतत्वस्य वैदिकशब्दवाच्यत्वासिध्यात्वापीत्युक्तदोषानवकाशात् ॥ परेणता
दृशस्य वाच्यत्वं प्रधाने नांगीक्रियत इति परमत्यसिद्धो हेतुरिति चेदत एवांगीकारयिष्यते प्रसाध्यांगकेनापिहे
तुनान्यायप्रयोगस्य बहुधा दर्शनात् ॥ ईक्षारूपस्याप्यात्मन ईक्षणाश्रयकल्पिताविधकभेदवदुपहिताभिन्नत्वे
नेक्षितृत्वमुक्तं प्राक् न विस्मर्तव्यं ॥ अविद्याविषयत्वोपहितस्यापि सत्यतायाश्रुत्यन्ने व्यस्यच भागुक्तत्वात् न तन्नि
ष्ठस्य मोक्षोपदेशानुपपत्तिः ॥ वाच्यवृत्त्या वैदिकशब्दप्रतिपाद्यतायाः पर्याप्त्यनधिकरणत्वरूपावाच्यताशब्दि

नोऽपि ब्रह्मणो लक्षणया वैदिकशब्दप्रतिपाद्यत्वमुपहितरूपेण वाच्यवृत्त्या तत्प्रतिपाद्यत्वं च संभवत्येवेति
ननोक्तमशब्दत्वं ॥ अवाच्यस्य शुद्धत्वं न संभवतीत्यपि यद्वाच्यत्वं वाच्यवृत्तिविषयान्योन्याभाववत्त्वं तदा
ब्रह्मण्यसिद्धिः तादृशोपहितान्योन्याभावशून्यत्वात् ॥ यथाकथंचिद्वाच्यत्वोपहितभेदस्योपहितशुद्धयोर्भेदाभेदम
तेऽनैकांतिकः तत्त्वकारा अभिमते घटत्वोपहिते वाच्यत्वोपहितभेदस्य तन्मतेऽभ्युपगमादप्रयोजकश्चापि पक्षे-
साधकाभावात् ॥ ब्रह्मण्यवाच्यतासिद्ध्यांतस्य तन्मात्रविषयकज्ञाने वाच्यवृत्तेः साक्षादपेक्षाराहित्यमात्रेण ॥ य
द्वा शुद्धस्यावाच्यत्वमनौपाधिकवाच्यताराहित्यमेव ॥ न च तदौपाधिकवाच्यत्वाभ्युपगमे विरुध्यते इति नाश
ब्दत्वं ब्रह्मण इति ॥ चतुष्टयमपि ब्रह्मण एवेति यदुक्तं तदसदेव ॥ एतेन गौणश्चेन्नात्मशब्दादित्यत्रात्मशब्दवा
च्यत्वं हेतुर्भेदसिद्धिः तद्वाच्यत्वतत्प्रतिपाद्यत्वादिकं च प्रधानस्यापि ॥ किं च किमसावात्मशब्दश्चेतनपरः स्वरू
पपरो वा नाद्यश्चेतनत्वस्य ज्ञातृतारूपत्वेप्युक्तेर्ब्रह्मणि तदभावात् विशिष्टे तत्संभवे तु प्रधानस्यापि तत्संभवा-
त् ज्ञानत्वरूपत्वे त्वात्मशब्दस्येक्षितृत्वं गौणमित्यत्रैव हेतुत्वेन गौणत्वाभावे हेत्वयोगात् ॥ नांत्यः ॥ सर्वज्ञ
त्वासर्वज्ञत्वादिरूपविरुद्धांशत्यागेन चिद्रूपेण जीवैक्यवत् जडत्वादिविरुद्धांशत्यागेन सद्रूपेण प्रधानैक्य
स्यापि संभवात् ॥ तन्निष्ठेति सूत्रेऽपि तच्छब्दार्थः शुद्धो विशिष्टो वा ॥ नाद्यः ॥ तस्येक्षितृत्वायोगात् ॥ न द्वितीयः
॥ विशिष्टनिष्ठस्य साक्षान्मोक्षायोगात् पारंपर्यं तस्य प्रधाननिष्ठस्य बाधादित्यादिकं चंद्रिकोक्तं दूषणं निर-

ति ॥ मुख्यब्रह्मणोप्युपहितात्मना वाच्यत्वांगीकाराद्वाच्यत्वसिद्धांतोपपत्तेरुक्तत्वात्प्रधानस्यात्मशब्द
स्य स्वप्रतिपाद्यत्वे प्रजीवैक्याभावात् आत्मशब्दादित्यनेनात्मशब्दात्मतादात्म्ययोर्द्वयोरेव प्रधानव्यावर्तक
ताया अभिप्रेतत्वात् ॥ तथाचोक्तमधिकरणमालायां ॥ आत्मशब्दात्मतादात्म्ये प्रधानस्य विरोधिनीति ॥ उपहि
तब्रह्मणोक्षितृत्वाद्युपपत्तेरुक्तत्वात् तन्निष्ठत्वस्याप्युपहितस्यैव तच्छब्देन परामर्शः तन्निष्ठा च तदीयकेवल
रूपसाक्षात्कारवत्त्वमिति न कोपि दोषः ॥ नहि स्वतंत्रप्रधानीयशुद्धरूपसाक्षात्कारस्य साक्षान्मोक्षान्वयित्वं ना-
न्यः पंथा विद्यतेऽयनायेत्यादिश्रुतिविरोधात् ॥ प्रधानत्वविशिष्टेन तदुपलक्षितेन वा न जीवैक्यं संभवति जडस्व-
भावस्य प्रधानस्य जाड्यहानायोगात् तद्धाने वा चेतनस्वभावतैव स्यात् चेतन्यहाने चासत्त्वं तस्य मोक्षस्या
पुरुषार्थत्वापत्तिः परमार्थतः प्रधानस्य ज्ञानानंदादिरूपत्वे भाषांतरेण परंब्रह्मैव सद्विद्यादिनिखिलवेदांतवेद्यमित्या
पतितमिति दिक् ॥ यत्तु पूर्वपक्षे गौणोक्षणमाय पाठात् आद्यमीक्षणं गौणमिति शंका नोपपन्ना तेजोबन्नाम-
भिदेवतात्वेन चेतनत्वादिति परोक्तदूषणं ॥ तदप्यसत् पूर्वतंत्रे शब्दस्यापि देवतात्वाभ्युपगमेन देवताशब्द
स्य न चेतनैकवाचित्वमिति तदभिप्रायात् ॥ यदप्यात्मानात्मविवेकस्य मोक्षहेतुत्वादनात्मज्ञानमपि मोक्ष
हेतुरिति जयतीर्थोक्तं ॥ तदप्यसत् ॥ तमेवेति श्रुत्या तदन्याविषयकसाक्षात्कारस्यैव मोक्षसाधनत्वोक्तेः ॥
तमेवैकं जानथ आत्मानमन्या वाचो विमुंचथेत्यादिकाः श्रुतयोप्यत्र द्रष्टव्याः ॥ एतेन हेयत्वावचनाच्चेत्यस्य सं

गतेः सांख्यैर्नाद्वैतज्ञानार्थं प्रधानोपदेशाभ्युपगमात् हेयत्वावचनमन्नमयादावनैकान्तिकं च उक्तरोत्तरब्र-
ह्मवचनं गमज्ञापकमिति चेन्न अप्रापितयाविधज्ञापकसौलभ्यात् प्रतिज्ञाविरोधस्तु ब्रह्मवाद एव प्रधानस्य
महदादिविशेषांतसर्वकार्यात्मकत्वात् भोक्तृवर्गेण प्रधानात्मक इति चेन्न ब्रह्मणो जडात्मत्वसंसर्गात्मत्व
योर्द्वयोरप्यभावात् ॥ स्वाप्ययोपि ब्रह्मण्यसिद्धः स्वापकाले जीवानां ब्रह्मैक्याभावात् परिष्वंगस्य प्रधानाव्याप
र्त्तकत्वात् ॥ ब्रह्मविषयं गतिसामान्यं परम्यासिद्धमेव ॥ ईक्षणादिना तद्व्यापनं प्रथमसूत्रेणैव गतार्थता ॥ अत
एव श्रुतत्वादित्यसिद्धं गतार्थं च गतिसामान्येनेति न दुक्तं निरभिप्रायमेव श्रुत्यात्मप्रतिपत्तये स्थूलारुंधतीन्या
येन प्रधानोपदेशादिति पराभ्युपगमांके तत्ता हेयत्वावचनं तन्निरासायोपन्यस्य न इत्युक्तो संदर्भविरोधाभावा
त् ॥ अन्यथा अद्वैतिभिर्गौणस्यात्मनो मोक्षहेतुज्ञानविषयत्वानभ्युपगमेन गौणश्चेदिति शंकायास्तन्निरा
सस्य च तथाप्यसंगतेः ॥ अगृह्यचित्वात् वाक्यान्वयादित्यधिकरणयोर्यत्नेन जीवस्य मोक्षहेतुज्ञानविषयता
याः तैर्निराकृतत्वात् जैवं तात्विकं रूपं तु ब्रह्मैवेति अप्रापितयैव ज्ञापकसौलभ्यादिति तु स्वाशिष्यान् प्रत्येव व
क्तुमुचितं परं प्रतिवादाद्य ज्ञापकमप्रदर्श्य वक्तुमनौचित्यस्य स्पष्टत्वात् ॥ यत्तु अप्रापि चरमदृष्टांते भाहेते न
तु स्वप्रविजिताधितिव्रसज्ञानवचनमेव पूर्वोक्तस्य ब्रह्मत्वज्ञापकं सुलभमिति जयतीर्थाभिप्रायवर्णनं तदयुक्तं ॥
चरमदृष्टांतेपि स्वात्मात्मत्वमसीति पूर्वोक्तस्यैवाभिधानेन तद्धानासूचनात् प्रतिज्ञाविरोधस्तु न ब्रह्मवादे ब्रह्म

णापद्मामीति लक्षणतात्ति ... पञ्चपाद ... स्य यो विज्ञातव्यस्य विज्ञानस्यापलापित्वं स्पष्ट
मिति तस्य निरन्तरसम्पन्नस्य द्वयमेव तत्त्वं तथा आरम्भणादिकरणोऽपि उपादेयस्य ॥ स्वातन्त्र्येऽपि मानुपपन्नः स्थूल
वस्त्वाग्रहात्तेन सूक्ष्मवस्त्वग्रहणाद्वि ... स्य तत्पदस्य ... तेऽपि तस्य जीवस्यापि ... दृश्यांशस्य ... रूपे गर्भ
रिणानमनोरूपोपाधिवशात् ... स्थितस्य ... तत्पदस्य ... भूतेऽत्र प्रकृति ... रूपेणावस्था
नं गतिसामान्यादिरस्य ... ॥ प्रसिद्धशास्त्रस्य कारणवादिनामा आदिभूतिप्रमाणादिभिरेतद
ध्यायेऽपि ... अचेतनप्रधानपरत्वस्य ... प्रसिद्धशास्त्रानुकूले ... वेदान्तानां युक्तश्रुतीनां स्मृत्या-
नामचेतनप्रधानादिस्मृतिलिंगदर्शनासंभावितत्वेन ततः प्रधानस्यापि कारणतासिद्धिः कुतोऽनन्यादिति शङ्का
पाने दसुपपद्यते कथं वेदान्तेषु ... कारणतां क्वचित् ... प्रधानकारणतां चाभिदधतः शास्त्रस्य वि
प्रतिषेधेनाप्रामाण्यापातात् ॥ न चाप्रसिद्धसंभावनामात्रेणाप्रसिद्धस्यान्यथानयनं युक्तमिति प्रयोजनस्यातिसु
स्त्वात् ॥ भाष्यमप्येतमेवार्थमनुगृह्णाति ॥ भगवता भाष्यकारेण ॥ यद्वितार्किकं सम्प्रदायद्वयेऽपि वेदान्तेष्वपि विभि
न्नकारणतापर्याप्तिरभावेऽप्यादिन्यादेः प्रसिद्धशास्त्रानुसन्धानाभावेऽपि प्रधानकारणतोक्तिरित्युपपाद्य महत्त्व
प्रामाण्यकारणमेव न हि दान्तवाक्यानामित्यादिना प्रसिद्धानुसन्धाने प्रधानकारणतोक्तिसंभावनानिरस्ता ॥ ग
तिसामान्यस्य प्रामाण्यव्यापकत्वात् विप्रतिषेधेऽप्रामाण्यप्रसक्तेरितिनिर्मूलतां पुनर्हि गतिसामान्यस्य प्रामा-

ण्यव्यापकतारूपं प्रामाण्यकारणत्वमुक्तमिति नापि श्रुतत्वाञ्चेत्यस्यापि वैयर्थ्यं ॥ संभाव्येताप्यसाधारणश्रुत्या धभावात् संहितायाः प्रधानादिपरत्वं श्वेताश्वेतरनारायणाद्युपनिषत्सु ईशाननारायणादिशब्दानामुपहिते ब्रह्मणि रूढानामात्मादिश्रुतिपदानां व्याख्यापरताकानां तथाविधानां कालकालत्वादिलिंगानां च सत्त्वे न स्वर्णभातस्यापि किंतु प्रशस्यत्वादिति कैमुतिकन्यायेनानेतन कारणतानिरासार्थत्वात् ॥ नमीशानं वरदं देवमीड्यं निचाय्येमं शांतिमत्यंतमेति क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एक इति मंत्रोपात्तस्यैव परब्रह्मणः स कारणमिति मंत्रे प्रतिपादनात् ॥ एको ह वै नारायण आसीदित्यत्र हि नारायणशब्दः संज्ञायां निष्पन्नः श्रूयते॥ किंच जगत्कारणं परिणामि प्रकृत्यात्मकं मूलकारणस्य श्रुत्यंतरेचेतनेशितव्यत्वश्रवणादपि न स्वतंत्रप्रधानस्य-जगत्कारणत्वमित्यप्यत्राभिप्रेतं ॥ अत एव भाष्ये स शब्देनैव सर्वज्ञ ईश्वरो जगत्कारणमित्यत्रेश्वरशब्दः संकोचकाभावेन निखिलचिदचिदीश्वरत्वबोधक उपात्तः ॥ एवं प्रधानकारणतानिरासवत् जन्मादिसूत्रे सामान्यतो निरस्तं जीवस्य जगत्कारणत्वमपि प्रधानकारणतानिरासप्रसंगे लक्षणदोषता साम्यान्निरसनीयमित्येतदर्थप्रत्येतत्सूत्रं ॥ अत एव भगवता भाष्यकारेण स कारणं करणाधिपाधिपो न चास्य कश्चित् जनिता न चाधिप इति मंत्रांशः नमीशानं जः कालकालः क्षराक्षरावीशत इत्यादिकं सर्वज्ञेश्वरप्रकृत्येत्यनेनाभिधायोदाहृतमिति न किंचिदेतत् ॥ आनंदतीर्थीयास्तु ॥ अस्मिन्नधिकरणे पूर्वसूत्रसंग्राह्यार्थस्य वचनवृत्त्या कृत्स्नवैदिकशब्दप्रतिप

शून्यस्य सुकर्मभावनात्रेण पूर्णाभि[illegible] संभवति ॥ [illegible] शब्द[illegible]
[illegible]
[illegible]
[illegible]
किं तु सर्वं ईक्षणकर्तृत्वादीति सूत्रार्थः ॥ उक्तसूत्राणाम् [illegible]
[illegible] ॥ [illegible] जीवा[illegible] [illegible] इत्यर्थः ॥ [illegible]
ति परंब्रह्म [illegible] ईक्षणकर्तृत्वं [illegible] इत्यर्थः ॥ ननु गौण आ
त्मा जीव एवोक्तश्रुतौ ईक्षणीयत्वेनोक्त इति [illegible] निर्गुणत्वात् शब्दस्यास्य [illegible] आनन्दमयो [illegible] ईक्षणी
येऽश्रवणात् ॥ आत्मशब्दस्य निर्गुण[illegible] [illegible] आत्मा [illegible] आत्मा [illegible]
त्पः [illegible] निर्गुणत्व [illegible] इति तथाक्तार आत्मनिर्णासि[illegible] ॥ नापि गौणात्मनिष्ठस्य मोक्षोप
देशो युक्तः तस्यानुचितः अनित्यत्व आत्मा अस्मिन् संदोधे [illegible] सर्वस्य कर्तृत्वस्य
लोकः [illegible] इति श्रुत्या निर्गुणात्मज्ञानादेव मोक्षोक्तेः ॥ निर्गुणत्वं च [illegible] सत्त्वादिगुणशून्यत्वं ॥ सर्व
कर्तृत्वात् सत्यसंकल्पः कर्ता सर्वज्ञोऽस्मिन् देहगुहास्थाने प्रविष्ट आत्मा येनोपासकेन ज्ञातो भवति तस्योपासकस्य सर्ण

त विष्णुलोकौ भवतोत्युक्तश्रुतेरर्थः ॥ तथा चोक्तं श्रुतिबोधितगुणानि वृत्तिरूपबोधस्य गुणपरत्वेन गौणत्वमविद्यानादु
पदेशो न युक्त इति भावः ॥ तमेवैकं जानथात्मानमिति श्रुतावस्यात्मनो हेयत्ववचनान्नात्मशब्दः गौणात्म
परस्तथा सति तस्य हेयत्वप्रसंगात् अन्या वाचो विमुंचथेति गौणात्मनः हेयत्वोक्तेः ॥ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्य
ते पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत इति श्रुत्या निर्गुणस्य पूर्णस्यैवात्मनः स्वात्मनि लयप्रतिपादनान्नि
र्गुणस्यैवात्मशब्दवाच्यत्वं ॥ अदो मूलरूपं पूर्णमिदमवताररूपं च पूर्णं सृष्टिकाले पूर्णात् मूलरूपात् उद्रिच्यते प्र
लये च पूर्णस्य तस्य पूर्णमवताररूपं स्वीकृत्यैकीभूय मूलरूपमन्यत्र आलीनं स्वयमवशिष्यत इत्युक्तश्रुतेरर्थः
नन्वस्त्वेवं निर्गुणस्य वाच्यत्वोपपत्त्या युक्तं तस्य कारणत्वेन शास्त्रयोनित्वं तच्चाप्रसिद्धशाखासूपक्रमादिवि
चारैः अस्तु ब्रह्मणः कारणत्वेन प्रतिपाद्यत्वं अप्रसिद्धशाखासु पुनरन्योपि कारणतयोच्यतां तासामानंत्या
दिति शंक्यं ॥ सर्वे वेदा युक्तार्थः सप्रमाणाः ब्रह्मज्ञानं परमं त्वेकमेव प्रकाशयंति तेन विरोधः कुतश्चित् इत्यादि
श्रुतावेव गतिसामान्योक्तेः ॥ एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा ॥ कर्माध्यक्षः सर्वभूता
धिवासः साक्षी चेता केवलो निर्गुणश्चेति श्रुतौ निर्गुणस्य श्रुतत्वाच्च ब्रह्म नावाच्यं किंतु वाच्यं ॥ एकः प्रधानः स
र्वभूतेषु गुप्ततया स्थितः न केवलं भूतेषु सर्वव्यापी च न सर्वेषु भूतेषु स्थितिमात्रं सर्वभूतान्तर्यामी च अध्यक्षो
ऽधिपतिः सर्वभूतानामाश्रयः सर्वसाक्षादीक्षत इति सर्वसाक्षी चेता ज्ञानरूपः केवलः जडामिश्रः निर्गुणः सत्वादि

गुणहीनः इति श्रुतेरर्थ इति रीत्याधिकरणयोजनामाहुः ॥ तत्रेदं चिंत्यते ॥ यतो जातिगुणादिप्रवृत्तिनि-
मित्तशून्यत्वात्केवल आत्मा शब्दावाच्य इति हि अद्वैतिभिर्ब्रह्मवादिभिरुच्यते न तु गुणवत्तोपितया त्वं ॥ तथा चो-
क्तं ॥ इष्टा गुणक्रियाजातिसंबंधाः शब्दहेतवः ॥ नात्मन्यन्यतमो ह्येषां तेनात्मा नाभिधीयत इति ॥ त्वया तु जिज्ञास्यत्वेन
प्रतिज्ञातं गुणपूर्णं ब्रह्म गुणपूर्तिश्च जन्मादिसूत्रेण व्यवस्थापिता तत्र शास्त्रयोनित्वसूत्रेण शास्त्रं प्रमाणमुक्तं
शिवादावतिव्याप्तिश्च निराकृतानि धर्मकस्यात्मनो वार्तापि न त्वया प्रस्तुता प्रत्युत तस्याद्यसूत्र एव जिज्ञास्यत्वा
संभवो वर्णितः ॥ तदिदं सर्वं चंद्रिकायामनुदितमस्मिन्नेवाधिकरणे प्रथमतः आद्यसूत्रे ब्रह्मशब्देन जीवादिव्या
वर्तकगुणपूर्तिं सूचयित्वा द्वितीये तस्य गुणपूर्तिसिध्यै जीवपरतानिरासाय कारणतां जिज्ञास्यब्रह्मलक्षण
त्वेनोक्त्वा तृतीये गुणपूर्तिकारणतयोरतिव्याप्तिपरिहाराय तत्र शास्त्रं प्रमाणीकृत्य तयोश्चतुर्थे विष्णुमात्रनि
ष्ठत्वाय शास्त्रस्यान्यपरतां निषिध्य सर्वशास्त्रस्य सर्वशब्दप्रवृत्तिनिमित्तगुणपूर्तिसिध्यै पचनत्वात्सर्व
शास्त्रतात्पर्यविषयतां च संशब्दार्थस्य वाच्यत्वस्य कार्त्स्न्यस्य चेहाक्षिप्य समाधानादनंतरसंगतिरिति ॥ एवं स
तिकथमकस्मात्सिद्धांत्यनभिमतार्थे अवाच्यत्वशंकया समन्वय आक्षिप्यत इति उक्तं सर्वमयुक्तमिति ॥ ननु जि
ज्ञास्यस्यावाच्यत्वात् न हि सविशेषत्वे अशब्दमित्यादिका श्रुतिरुपपद्यत इत्याक्षेपसंगतिरिति चेन्न ॥ तथा सति
निर्विशेषत्वनिषेध एव ब्रह्मणि व्यवस्थापनीयः न तु तद्रूपजीवकावाच्यत्वादिनिषेधः ॥ संतिचाशब्दमस्पर्शंय

तो वाचो निवर्तन्त इति अवाच्यत्वप्रतिपादकानां वस्तुतः साक्षी चेता केवलो निर्गुणश्चेत्यादिकाः श्रुतयः निर्विशेषत्व
बोधकतया सामञ्जस्यभाजः तुल्यश्च निर्विशेषविचाराक्षेपः तत्र ज्ञानाज्ञातरूपद्वयाभावात् ॥ किञ्च तत्र पूर्वपक्षी
शास्त्रजगत्कारणत्वेन किञ्चित्प्रतिपादयतीति मन्यते न वा आद्येपि यतो वाचो निवर्तन्त इत्यादिश्रुतयस्तत्प
रा इति मन्यते आहोस्विदन्यपरा इति मन्यते तत्र नाद्य आद्यः ॥ परस्परविरोधेन श्रुत्योरन्यतराप्रामाण्यप्रसंगा
त् प्रवृत्तिनिमित्तसद्भावे अवाच्यत्वशंकाया अनुदयात् ॥ नाद्यो द्वितीयः ॥ कारणादन्यस्यावाच्यत्वेपि कारण
जिज्ञासासमन्वयादेराक्षेपायोगात् ॥ न द्वितीयः ॥ यतो वेत्यादिमन्त्रस्य श्रुतिविरोधात् ॥ यदि च शास्त्रप्रामा
ण्यमपि पूर्वपक्षिणो नानुमतं ॥ किंतु अशब्दत्वश्रुत्यादेः कारणत्वानुपपत्तिः कारणत्वश्रुत्यादेरशब्दत्वानु-
पपत्तिरिति कथंचित्सिद्धान्ताक्षेप एव पूर्वपक्षशरीरमभिमतमित्युच्यते ॥ तदापि शास्त्रारंभस्य शास्त्रप्रामा
ण्योपजीव्यत्वान्नद्विरोधेन पूर्वपक्षानौचित्यं दुर्वारमभिहितं चैतत् शास्त्रयोनित्वाधिकरणे तदीयतदधिकरणी
यपूर्वपक्षानौचित्यप्रतिपादनप्रसंगे विस्तरेणास्माभिः ॥ तथोक्तापरीक्षणीयत्वेन तादृशपूर्वपक्षनिरासासं
भवश्च दुर्वारः ईक्षणीयत्वश्रुत्यादेरादरे अशब्दत्वानुपपत्तितादवस्थ्यात् ॥ ईक्षणीयत्वं प्रबलपत् बलवत्तान्न दुर्बल
मशब्दत्वमन्यथानेयमित्यभिप्राय इति चेत् ॥ बलवत्ता अशब्दत्वेन दुर्बलमीक्षणीयत्वं लक्षणादिनान्यथानेय-
मित्यस्यापि वक्तुं शक्यत्वात् ॥ किंचेक्षणीयत्वमेव बलवदिति वदता किं न द्रष्टमिति वक्तव्यं वाच्यत्वाविनाभा-

धइतिचेत्‌ उक्तप्रकारेणेक्षणीयत्वादेरन्यथाप्युपपत्तेस्तत्रावाच्यत्वाविनाभावानिर्णयात्‌ ॥ कारणत्वादेरपि
वाच्यत्वाविनाभावेन यतो वेत्यादिश्रुतिप्रमाणकेनावश्यमुपन्यस्येन बलवतास्योत्थानसमय एवावाच्यत्वशं
कानिरासेन क्षाशाद्रुमित्यवाच्यत्वशंकया कारणत्वप्रतिक्षेपायकाशः ॥ नहि कारणमप्यवाच्यमिति शंकितुं
शक्यं न यासति अवाच्यत्वेन कारणत्वाक्षेपायोगात्‌ ॥ उक्तं च तत्त्वप्रकाशिकायां पूर्वपक्षावसरे ब्रह्मणः शास्त्र
मुख्यार्थत्वमुपपद्यते यतस्तत् यतो वाचेति श्रुतेः शब्दावाच्यं नत्ववाच्यस्य शास्त्रमुख्यार्थता संभवति अतो न का
रणत्वं शास्त्रोक्तं तस्येति भाव इति ॥ कारणत्वस्योक्तरीत्या वाच्यत्वाविनाभावे स्थिते शास्त्रमुख्यार्थस्यैव कारण
ताभिधानात्‌ ॥ अथोच्येतामुख्यार्थस्यापि कारणत्वमस्तु व्यभिचारशंकायामविनाभावानिर्णयात्‌ न कारणत्वेना
वाच्यत्वशंकानिरासः ईक्षणीयत्वस्यावाच्यत्वव्यभिचारित्वशंका न संभवति विपक्षे हेतूच्छित्तिप्रसंगरूपप्र
तिकूलतर्कसंभवादिति शास्त्रमुख्यार्थस्य न कारणतासंभव इति समन्वयाद्याक्षेपो निराबाध इति तदपि न ॥
यद्यदीक्षणीयं तत्तद्वाच्यमिति सहचारदर्शनवत्‌ यद्यत्‌ कारणं तत्तद्वाच्यमिति अदृष्टव्यभिचारे सहचारदर्शने
सति ईक्षणीयत्वे वाच्यत्वाविनाभावो निर्णीयते न तु कारणत्वे इत्यस्य वक्तुमशक्यत्वात्‌ ॥ ननूक्तस्तर्कः सद्भा
वः सत्यमुक्तः किंतु व्यनुनीतः अवाच्यत्वोपगमे ईक्षणीयत्वोच्छेद हेत्वभावात्‌ व्याप्यव्यापकभावस्याप्यसि
द्धेः ॥ नचौपनिषदस्य ब्रह्मणः ईक्षणीयत्वं न प्रत्यक्षादिमानान्तरगम्यं शब्दस्य शक्त्यभावान्न प्रत्यायनक्षमस्त

धावाच्यत्वोपगमे सामर्थ्यमात्रपर्यवसानात्तेन तत्कार्यमीक्षणश्रुतिर्घटत इत्याशंकितं न तथा कारणत्वप
क्ष इति चेन्न अवाच्यत्वस्य परैः प्रवृत्तिनिमित्ताभावप्रयुक्तस्यैवाभ्युपगमात् प्रतिकारणत्वे अवाच्यत्वाभ्युप
गमायोगात् द्विपक्षे कारणत्वोल्लिङ्गितरूपतर्कस्य तत्रापि साम्यात् ॥ नहि कारणमवाच्यमिति कश्चिदभ्युपैति
तस्मात् कारणतयाभिमते पक्षे ब्रह्मण्यवाच्यत्वमशक्यमवाच्यतांकं परमुक्तश्रुतेर्गतिरेव वाच्येत्यवशिष्यते साच
सूत्रकृता नैव सूचितेति यदवश्यं सूत्रणीयं तन्नासूत्रितं यस्मात् सूत्रणोपि प्रकृतनिर्वाहस्तत्सूत्रितमितिस्प
ष्टीकृतं परेण तस्यापूर्वमीमांसकत्वं ॥ भगवतो ब्रह्मण अनंतगुणत्वेन साकल्येनागोचरत्वरूपाभिप्रा
यत्वपरतयोक्तश्रुतेर्गतिरिति परोक्तं चिंत्यमेव ॥ अशब्दमित्यत्र समवायेन वाच्यत्वसंबंधेन वा शब्दशू
न्यम शब्दपदार्थस्तथाच श्रूयमाणशब्दवाच्यत्वरूपपर्यवसितार्थबाधकाभावेन तं परित्यज्योक्ताश्रुता
र्थपरत्वकल्पनाया अन्याय्यत्वात् ॥ नचास्पर्शमरूपमित्यादौ समवायेन स्पर्शरूपाद्यभावस्यैव प्रतीते
स्तत्समभिव्याहारादशब्दमित्यस्यापि समवायेन शब्दशून्यमेवाशब्दशब्दार्थः ननु वाच्यतासंबंधेन शब्दशून्यं
शब्दावाच्यत्वपर्यवसितमिति शंक्यं ॥ अस्पर्शमित्यादौ वाच्यत्वसंबंधेन स्पर्शवत्त्वाद्यभावस्य समवा
येनैव वाच्यतासंबंधेन स्पर्शाद्यभावनिषेधेपि येन येन संबंधेन यद्यद्ब्रह्मसक्तं तेन तेन संबंधेन तत्तत्त
न्निषेधस्याकांक्षितत्वेनोपहितरूपेण श्रुत्या ब्रह्मणि समवायेनैव वाच्यतयापि शब्दवत्त्वप्रसक्त्या तेन

संबंधेन शब्दाभावस्यापि विनिगमकाभावेनाशब्दशब्दार्थतायाःसुवचत्वात् ॥ न चाशब्दमिति शब्दबोध्ये
ब्रह्मणि शब्दनिषेधे व्याघात इति वाच्यं शक्त्या शब्दनिषेधेपि लक्षणया अवाच्यशब्दबोध्यत्वपदशब्दश-
ब्दबोध्यत्वांगीकारेण व्याघाताभावात् ॥ नन्ववाच्यशब्देनोच्यते चेत् वाच्यत्वप्रसंगः लक्ष्यते चेदवाच्य-
पदस्य समासत्तया अवयवशक्त्यतिरिक्तशक्तेरभावेन तन्मुख्यार्थाभावान्न लक्षणासंभवतीति चेन्न
॥ वाच्यभेदरूपतन्मुख्यार्थाभावेपि नञ्समभिव्याहृतवाच्यशब्देन वाच्यभेदोपहितब्रह्मोपस्थित्या तद्द्वा-
रा अवाच्यशब्दस्य मुख्यस्वरूपे लक्षणयैव पर्यवसानात् ॥ नहि स्वशक्यसंबंध एव लक्षणा अर्थवादवाक्येषु
तदसंभवात् किंतु स्वबोध्यसंबंध एव तथा सति अवाच्यपदबोध्यब्रह्मस्वरूपवाच्यभेदोपहितसंबंधस्य मुख्य
ब्रह्मण्यपि सत्वात्तल्लक्ष्यत्वोपपत्तिः ॥ न च वाच्यभेदोपहितं नावाच्यशब्दप्रतिपाद्यं तस्य तदादिपदवाच्य-
त्वादिति वाच्यं ॥ तदादिशब्दस्य बुद्धिविषयतावच्छेदकत्वोपलक्षितघटत्वादिविशिष्ट एव शक्तत्वात् वा-
च्यभेदस्वरूपस्यापि ब्रह्मणो वाच्यभेदत्वविशिष्टरूपेणावाच्यत्वोपपत्तेः ॥ एवं निर्विशेषपदेपि बोध्यं यत्त
काखंडे गंगादिपदेष्वेव मुख्यार्थस्मृतेरेव तु स्यार्थस्मारकत्वानेव च लक्षणायां मुख्यार्थावश्यंभावो न समासा
दिपदेष्वपीत्यादिकमाकरे स्पष्टं ॥ यत्तु चंद्रिकायां अशब्दमिति श्रुतौ अशब्दमिति शब्दवाच्यतापि निषिध्य
ते तेन गंगाशब्दावाच्यस्य गंगात्वाभाववत् अशब्दशब्दावाच्यस्याशब्दत्वाभावः स्यात् न निषेध्यते चेदशब्द

मिति शब्दवाच्यं स्यादिति अशब्दमिति श्रुतेरवाच्यत्वरूपश्रूयमाणार्थपरत्वे बाधकमुक्तं ॥ तदसत् ॥ गंगात्वरूपप्रवृत्तिनिमित्ताभाववति तीरादौ गंगाशब्दवाच्ये बाधकाभावेनागंगात्वेपि शब्दवाच्यत्वावच्छिन्नप्रतियोगिताकशब्दवाच्यत्वसामान्याभावप्रवृत्तिनिमित्तकस्य स्ववाच्यत्वाभावमपि निमित्ततयोपजीव्य प्रवर्तमानस्याशब्दमिति शब्दस्यावाच्येउपजीव्यविरोधरूपबाधकसत्त्वादवाच्यत्वरूपाशब्दत्वाभावापादनासंभवात् ॥ यटपदावाच्यस्याच्छिद्रंतरघटस्य घटत्वाभावादर्शनेन छत्रिणो गच्छंतीत्यादावेकसार्थगंतृत्वावच्छिन्नस्य छत्रिपदावाच्यस्य छत्रित्वाभावादर्शनेन व्यभिचाराच्च ॥ तत्पदावाच्यस्य तत्पदप्रवृत्तिनिमित्ताभाववत्त्वमिति नियमस्यासिद्धेश्च ॥ नापि साकल्येनागोचरत्वपरतयोक्तश्रुत्युपपत्तिः सुवचा ब्रह्मण अनंतगुणवत्त्वेपि सकलगुणपदनंतगुणपदेतिवाग्विषयत्वानपायात् ॥ विशिष्य सकलगुणवत्त्वेन वागविषयत्वमेव साकल्येनागोचरत्वमित्यपि विशिष्येत्यस्यार्थविचारेणाशोधितमेव ॥ यतो विशिष्येति स्ववृत्तिगुणनिष्ठसकलविशेषधर्मगुणवत्त्वेनेत्यर्थकं चेत्तथा सति तेनैव शब्देन बोधनादुक्तानुपपत्तिर्दुर्वारैव ॥ स्ववृत्तिगुणनिष्ठयावद्विशेषनिष्ठावच्छिन्नप्रकारताशालिबोधाविषयत्वरूपमिपन्नापरिच्छेदकवागविषयत्वमेव तादृत्त्वमपि न सुवचं ॥ न स्वजीवादिसाधारण्यात् नहि जीवगतः सकला गुणा अपि स्वेतरतद्गुणव्यावृत्तिस्वरूपाः विशिष्य केनापि वाचा प्रतिपादयितुं शक्याः तथापि संकुचितार्थत्वं दुर्वारं निर्वर्तत इति पक्षस्तारस्यं च परमते यतो भ्रममंगं तु प्रवृत्तो हि कति

पयमध्यानं कतिचित्पदानि गत्वा चाभिवृत्तो गमनाभिवृत्त इति व्यपदिश्यते न तु सर्वथैवाप्रवृत्तः ॥ न हीयत्ता
परिच्छेदकवाचां प्रवृत्तिस्तव मते कथमपि वक्तुं शक्यते ॥ मन्मते तु लक्षणया प्रवृत्तानां सकलवाचां शक्तिप्र-
योजकप्रवृत्तिनिमित्तधर्माद्यभावेन शक्त्या निवृत्तिरुच्यते ॥ यद्वा उपहितरूपेण ब्रह्मबोधने शक्त्या प्रवृत्तानां स-
कलवाचां शुद्धस्वरूपेण शक्त्या निवृत्तिरुच्यत इति निवर्तन्त इति स्वरसं ॥ ननु तर्हि शुद्धबोधो न स्यादिति वाच्यं
॥ लक्षणयैव तद्बोधोपपत्तेः ॥ न चानेकपदामुख्यार्थत्वस्यानौचित्येन निवर्तन्त इत्येकपदामुख्यार्थत्वमेव युक्तं
॥ ब्रह्मणो निर्धर्मकतया तत्र शक्त्यभावेन लक्षणयैव शुद्धबोधस्य वक्तव्यत्वे नन्यायप्राप्तार्थानौचित्याभावेन ब-
हुत्वस्याप्रयोजकत्वात् ॥ अत एव विधिवाक्यस्थयागादिशब्दा त्यार्थं ततोधिक न रार्थवाक्यानां लक्षणाम
भ्युपगच्छन्ति न्यायविदः ॥ एतेनैव ब्रह्मण अवाच्यत्वे सर्वे वेदा यत्पदमामनन्ति अथ कस्मादुच्यते ब्रह्मेति तस्म
त्यमित्याचक्षते तस्मादुच्यते परं ब्रह्मेति ॥ यच सांयाच्यमुत्तमं ॥ ब्रह्मेति परमात्मेति भगवानिति शब्द्यत इति
॥ श्रुतिस्मृतिविरोधोपि परोक्तो निरस्तः ॥ तादृशश्रुतिस्मृतिषु तत्तद्बोध्यत्वमात्रेणोपहितरूपेण वा शुद्धस्य ब्रह्मणो वाच्य-
त्वाभिधानेपि न शक्यत्वाभिप्राये णेति विरोधाभावात् ॥ ननु ब्रह्मणो निर्धर्मकत्वे ब्रह्मादिपदलक्ष्यत्वं तस्मिंश्च सति निर्धर्मक-
त्वमित्यन्योन्याश्रयः चन्द्रिकायुक्तः साधुः ॥ निर्विशेषवाक्येन नेति नेत्यनेनैव प्रवृत्तिनिमित्ताभावस्य सिद्धत्वात् ॥ यत्तु निर्वि-
शेषवाक्यं न निर्धर्मकब्रह्मपरं निर्विशेषत्वरूपधर्मबोधकत्वात् ॥ यदि च निर्विशेषत्वरूपधर्मनिषेधोप्यनेनैवेत्युच्यते तर्हि

[illegible] मितीयंच [illegible]

[illegible] सत्॥ निर्वि [illegible] भावात्मा धारणाविशेषत्वरूपमामान्यधर्मेणा

[illegible] रूपविशेषे [illegible] संभवान्न दूषणलक्षितानखंडब्रह्मणैव पतात्पर्यं॥ पूर्वोक्त

[illegible] शून्यं बोध्यते [illegible] कृत्वा भावो बोध्यतेन यावित्त

[illegible] भयनिषेधान [illegible] ध्यते प्रतीयकृत्वा भावोपलक्षितस्वरूपे तात्पर्य कल्प्य

[illegible] पादनस्याच्यु [illegible]न्॥ किंच मालौचैतावत्कौनिर्गुणश्चेतिश्रुत्याश्रुत्यात्मनो

[illegible] अनंतगुण नमाकल्येन वागाविषयत्वेनोक्तश्रुतेर्गौ [illegible]

[illegible] श्रुतिविरोधाद्गुणात्वश्रुतिः प्राकृतगुणशून्यत्वपरेति वक्तुं युक्तं॥ प्राकृतगुणा

[illegible] त्मसगुण [illegible] प्रकरणस्थायाः सगुणश्रुतेरुपासनाविधिविषय [illegible]

[illegible] हेतु [illegible] प्रतिपत्त्यनुकूलनिषेधापेक्षितप्रतियोगिरूप [illegible]

[illegible] पब्रह्मप्रतिपत्त्यनुकूलनिषेधापेक्षित [illegible]

[illegible] ावेन दुर्बलतया अद्वितीयब्रह्मप्रतिपादकविषयाम [illegible] निर्गुणश्रुतेर्गुणानि [illegible]

[illegible] सगुणश्रुतेरुपहितब्रह्मविषयत्वस्यैवाश्रयत्वं वक्तव्यत्वादधिकरणं [illegible]

[illegible] स्यैवास्मिन् सूत्रे अभिप्रेतत्वे वाच्यमीमांसेति सूत्रविन्यास [illegible]

ब्दमिति गुरुतरसूत्रविन्यासः परमतेनिरभिप्राय एव ॥ यत्तु विमृश्यपक्षप्रतिपक्षाभ्यामर्थावधारणमित्युक्तेः
प्रतिपक्षनिराकरणस्यापि कर्तव्यत्वेनोक्तविन्यासादर इति तदसत् ॥ वाच्यत्वस्योपपादनेऽपि प्रतिपक्षावा
च्यत्वस्य प्रतिक्षेपलाभात् स्वपक्षसाधनमुखेन परपक्षप्रतिक्षेपसंभवे तद्विपरीतरीत्यनुसरणस्यायुक्तत्वा
च्च ॥ किंचावाच्यत्वव्यवच्छेद एव विवक्षितश्चेत्तर्हि असंदेहाय यतो वाचो निवर्तन्त इति श्रुत्यैकार्थ्याय वचना
वाच्यमित्येव सूत्रकारो ब्रूयात् ॥ नन्वतथा सूत्रणे अशब्दमिति श्रुत्यैकार्थ्यलाभ इत्येकतरानुगमे कर्तव्ये वि
निगमकाभावान्नाशब्दमिति विन्यासः शिंशपाचोद्यन्यायान्न दुष्यतीति वाच्यं ॥ अशब्दमस्पर्शमरूपमव्य
यमित्यादिश्रुतौ स्पर्शादिगुणप्रायपाठात् अशब्दमित्यस्य शब्दरूपगुणनिषेधपरताया एव स्वरसतः प्रतीते
रवाच्यत्वरूपविपक्षबोधकत्वाभावात्तदनुगमानावश्यकत्वात् ॥ नास्ति शब्दो वाच्यतया यस्मिन्निति व्यु
त्पत्त्या शब्दावाच्यत्वस्यापि फलतस्तदर्थता संभवतीति चेत्तथापि श्रुतिसूत्रयोरशब्दमित्यनेन शब्दगुणशू
न्यं शब्दावाच्यं वोक्तमिति संशयान्नाशब्दमिति सूत्रणेऽपि न ततो वाच्यत्वनिर्णय इत्यसंदेहाय नावाच्य-

एव ॥ तथा सतीक्षणीयत्वेन सिद्धांतानुपपत्तेर्लिंगस्य श्रुतितो दुर्बलत्वात् ॥ अथ कस्मादुच्यते ब्रह्मेति तस्मादु च्यते ब्रह्मेत्यादिश्रुत्युपष्टंभेन न लिंगस्य दुर्बलता किंतु केवलश्रुत्यपेक्षया श्रुत्युपष्टंभाल्लिंगस्यैव प्रबलत्वे येन तन् तेन सिद्धांतानुपपत्तिरिति चेन्नाहि श्रुतेरित्येवं वक्तुं युक्तत्वात् ॥ यदि चावाच्यार्थकश्रुतिविप्रतिषेधाद्वाच्यत्वार्थ कश्रुत्या न निर्णय इति चेन्न ईक्षणीयत्वस्यापि यत्तदद्रेश्यमित्यादिश्रुत्या निर्णीतत्वेन विप्रतिषेधान्निर्णय स्तुल्यः ॥ यत्तु चंद्रिकायां न तावच्छ्रुत्या स्याद्वाच्यत्वो [illegible] श्रुत्यस्याप्यनेनोक्तैवमनोपपादनात् तथापि श्रुत्या [illegible] धायेनेक्षणीयत्वस्याप्येवंत्वेन प्रतिषेधाभावा [illegible] त्रिनिमित्तजातिगुणक्रियाद्यभावादवाच्यत्व [illegible] वाच्यत्वासिद्ध्यांतासिद्धिः ॥ यदपि चंद्रिकायां निरु [illegible] सिद्धिरित्युक्तं ॥ तदपि श्रुत्यात्मनि जातिगुणक्रि [illegible] तिधायाश्च वाच्यत्वासंभवादुपक्रमादिभिर्लिंगै [illegible] रुद्रस्य तस्यैव श्रुत्यात्मनि स्वीकारस्यावश्यकत्वा [illegible] ॥ [illegible] णः श्रूयते ईक्षणं च प्रमाणेन प्रसक्तप्रमाणं प्रसक्तप्रमा [illegible]

वचनेनेक्षणं चावाच्ये वृत्त्यंतरायोगात्सारिदोषेण वाच्यत्वमेव साधयतीति जयतीर्थोक्तं निरस्तं ॥ अवाच्यस्य शुद्धब्रह्मणः लक्षणयेक्षणीयत्वस्य ज्ञेयत्वस्य चोक्तत्वात् ॥ यदपि चंद्रिकायां ब्रह्मणो लक्षणया ज्ञेयत्वांगीकारसिद्धांते सत्यादिपदानां किंलक्ष्यमिति प्रश्ने वाचकब्रह्मादिपदेनैव तत्प्रतिवक्तव्यं प्रतिवचनेपि तस्य किंलक्ष्यमिति लक्षकब्रह्मादिपदोपादानेऽनवस्थेति तथा ब्रह्मण अवाच्यत्वे लक्ष्यत्वानुपपत्तिः वाच्यार्थसंबंधित्वेन ज्ञातस्यैव लक्ष्यत्वात् तज्ज्ञानं च न शब्दभिन्नेन प्रमाणेन ब्रह्मण उपनिषन्मात्रगम्यत्वात् नापि स्वप्रकाशात् तथात्वे नित्यसिद्धे शास्त्रवैयर्थ्यात् अवाच्यशब्दस्य लक्षकस्यैव वक्तव्यत्वात् तत्रापि वाच्यसंबंधित्वेन ज्ञेयत्वे अनवस्थेति दूषणमुक्तं तदपि न सत् ॥ ब्रह्मादिपदेनैव ब्रह्मत्वादेरुपलक्षणत्वविवक्षया सत्यादिपदानां किंलक्ष्यमिति प्रश्नप्रतिवचनोपपत्तेः प्रथमानवस्थाया अयोगात् ॥ नापि द्वितीयानवस्था वाच्यसंबंधित्वेन ज्ञानं हि शक्यज्ञानाधीनलक्ष्योपस्थितावेवोपयोगि तदभावेपि सत्यत्वादिविशिष्टशक्तसत्यादिपदेभ्य एव शुद्धोपस्थितेरखंडवाक्यार्थबोधहेतुभूतायाः संभवेन तदपेक्षाया अभावेन नोक्तानवस्था ॥ तथाहि अद्वितीयशुद्धब्रह्मविजिज्ञापयिषया तत्समार्थप्रवृत्तानां सत्यादिपदानां सत्यत्वादिविशिष्टे शक्तत्वेन तेभ्यः प्रथमतः विशिष्टस्यैवानुभूतत्वेन

टिप्पणी * वाच्यसंबंधिबोधकशब्दस्य

विशिष्टस्यैव संस्कारसत्त्वेपि सत्त्वादिपदज्ञानसहकृतस्य तस्य संस्कारस्य तात्पर्यानुरोधेन मुख्यस्मृतिहेतुत्वं
कल्प्यते ॥ न चैवं कल्पनामात्रसंभवेति वाच्यं शक्तिवादे आकाशदशरथादिपदस्थलीयशाब्दबोधे एवंविधक
ल्पनायास्तार्किकसंमतत्वात् ॥ शक्तिवादे हि मणानुक्तं आकाशादिपदस्य शब्दाश्रयत्वादिविशिष्टेन शक्तिः क
दाचिददृष्टद्रव्यान्यद्रव्यत्वादिनापि आकाशपदात् शाब्दबोधोत्पत्तेस्तद्विशेषेपि शक्त्यापत्तेरेकस्यामाकाशव्यक्तौ
केवलायामपि शक्तिसंभवात् शक्यानुगमार्थमेव किंचिद्धर्मविशिष्टे शक्तिस्वीकारात् ॥ न च मुख्ये शक्तिज्ञा-
नात् स्मृतौ सत्त्यां मुख्यस्यैव शाब्दबोधः स्यात् न तु शब्दाश्रयत्वादिविशिष्टस्येति वाच्यं ॥ यद्यपि शब्दाश्रयत्वाद्यं
शेन शक्तिर्गृह्यते तथापि शब्दाश्रयत्वादिनोपस्थिताकाशव्यक्तावेव शब्दाश्रयत्वादिविशिष्टविषयकस्मृतिहेतु
त्वसंभवेन विशिष्टविषयकस्मृतिशाब्दबोधसंभवात् ॥ अथवा आकाशादिपदात् निर्विकल्पकमेव स्मरणमास्तां
ततः मुख्याकाशस्यैव मुख्यर्थोपरागेण शाब्दबोधे भानं निर्धर्मितावच्छेदकशाब्दबोधास्वीकारेपि आकाशमस्ती
ति वाक्यादेकमस्तीत्याकारकशाब्दबोधे बाधकाभावादिति ॥ तदत्र कल्पद्वये मणिकारोक्ते आद्ये शब्दाश्रयत्वांशे
शक्त्यग्रहात् न हि विशिष्टस्य स्मृतिशाब्दबोधयोः संभवः यदंशे वृत्तिः पूर्वं ज्ञायते तत्स्मृतेरेव शाब्दबोधप्रयोजकत्वा
त् ॥ द्वितीये मुख्यस्य शक्त्या पूर्वमननुभूतत्वेन तत्स्मृत्यसंभवस्तथापि तात्पर्यनिर्वाहाय सर्वपदानां लक्ष्यतावच्छे
दके लक्षणाया '' इव शक्यतावच्छेदकेपि शक्तिग्रहानुपयोग इति नवीनमतरीत्या लाघवेन प्रथमकल्परीत्या

तत्कल्पनेप्रमेयपदानुभवजन्यसंस्कारस्यशुद्धद्वारत्वादिजातिविशिष्टांशेएवोद्बोधकंप्रकल्प्यस्मृतेस्तस्मिन्द्वा
रथादिपदशक्तिग्रहः अन्यथाशुद्धद्वारत्वादिजातेर्द्वारथादिपदेनानुपस्थित्यातात्पर्यविषयशाब्दबोधेन
द्विशिष्टमानासंभवादितिशक्तिवादाद्युक्तप्रकारेणद्वितीयकल्परीत्यातात्पर्यानुरोधेनविशिष्टविषयकशाब्दा
नुभवजन्यसंस्कारस्यपदज्ञानसहकृतस्यशुद्धविषयकस्मृतिहेतुत्वकल्पनेनअस्मन्मतेपिपूर्वोक्तकल्पनस्यनि
रपवादत्वात्॥ नचैवंसतिलक्षणयाशुद्धब्रह्मबोधइतिसिद्धांतविरोधइतिवाच्यंविशिष्टशक्तेर्विशिष्टशाब्दबो
धप्रयोजकत्वस्यौत्सर्गिकस्यत्यागेनविशेष्यमात्रशाब्दबोधप्रयोजकत्वाल्लक्षणाशब्देनगौण्यावृत्त्याशास्त्रेव्यवहा
रात्॥ अथवाप्राचीनतार्किकमीमांसकमतयोरिवास्मन्मतेशक्यसंबंधरूपलक्षणाज्ञानस्यशाब्दबोधहेतुत्वेन
शक्योपस्थितिजन्यसंबंध्युपस्थितेर्लक्षणात्वेनस्वरूपसत्याएवतस्याःशाब्दबोधहेतुत्वेन नोक्तविरोधइतिदिक्
॥ किंचज्ञानकर्मत्वेनैवत्वन्मतेवाच्यत्वसिद्धिसंभवेनापरोक्षज्ञानात्मकवृत्तिविशेषकर्मत्वस्यहेतुत्वाभिधानंवै
यर्थ्यं॥ सप्राणोपासकोजीवोत्तमहिरण्यगर्भोपदेशेनपरंपुरुषंपश्यतिपरोक्षतयाब्रह्मविज्ञायापरोक्षतयाजानी
यादितितत्त्वप्रकाशिकायांस्पष्टत्वाज्जीवघनात्परात्परंपुरिशयंपुरुषमीक्षतइतिश्रुतिव्याख्यानेनतवमतेशाब्दा
परोक्षानंगीकारसिद्धेः शाब्दापरोक्षज्ञानात्मकेक्षणकर्मत्वस्यपरमात्मन्यसिद्ध्यातस्यहेतूकरणायोगेनसामान्यतः
अपरोक्षज्ञानविषयतामात्रस्यतस्यवाच्यावाच्यसाधारणस्यवाच्यत्वाव्याप्यतयातस्यावाच्यनिषेधेनवाच्यत्व

साधकत्वासंभवश्च ॥ नचेक्षणीयत्वमित्यनेन ज्ञानकर्मत्वमेव विवक्षणीयं तच्चौपनिषदस्य शाब्दप्रमाणजन्य-
ज्ञाने नैवेति परिशेषाद्वाच्यत्वं साधयेदिति वक्तुं युक्तं ॥ तथासति लक्षणाप्रसंगेनेक्षतिपदास्वारस्यात् ॥ औपनि
षदस्यापि लक्षणया शाब्दबोध्यत्वप्रतिपादनेन ज्ञानकर्मत्वस्य वाच्यतासाधकत्वाच्च ॥ अस्मन्मते समन्वेतव्यस
द्विषयानुगतेक्षतिधात्वनुकरणानुपपत्तेन स्वारस्यात् ॥ एवं तावदाद्यसूत्रे पूर्वभागो न स्वरसः तथाऽशाब्दमित्युत्त
रभागोपि नहि प्रमाणाशाब्दमित्युक्तेः येन नाशाब्दमित्युक्तिर्युक्ता स्यात् ॥ नहि वेदांतप्रमाणकं ब्रह्मेति ब्रुवाणः पूर्वपक्षी
तथाभूते किंतु ब्रह्म न वाच्यमिति वितं प्रति नावाच्यमित्येव वक्तुं युक्तमित्यपि पूर्वप्रतिपादितमेवेत्यपि वदंति ॥ किंच
ब्रह्मण अवाच्यत्वे ईक्षणीयत्वं प्रत्युक्तमनुपपन्नमिति तेन वाच्यत्वासिद्धिरिति वदन् प्रष्टव्यः कथमवाच्ये ईक्षणी
यत्वमनुपपन्नं ॥ पूर्वपक्षिणा ब्रह्मवादिना हि शुद्धस्य ब्रह्मण एवावाच्यत्वमुच्यते नोपहितस्यापि बृहते र्धातो र-
र्थानुगमादित्याद्यसूत्रे भाष्ये ब्रह्मणि ब्रह्मशब्दव्युत्पादनात् उपहितस्य च शुद्धाभेदेन शुद्धेप्युपाध्यवच्छेदेन वा
च्यत्वानपायात् ॥ न चैवमवाच्यताभ्युपगमविरोधः शंक्यः यतः शुद्धस्यावाच्यत्वमनौपाधिकवाच्यताराहित्यं न
च तदौपाधिकवाच्यताभ्युपगमेन विरुध्यते ॥ यथाह्यज्ञेयत्वमविद्यानिवर्तकज्ञानविषयस्याप्यंगीक्रियते ॥ न
चैवंव्यवस्था तदीयप्राचीनाचार्याननुमतेति वाच्यं ॥ आद्यसूत्रे ब्रह्मणो मनोवृत्तिविषयत्वे स्वप्रकाशत्वानुप
पत्तिमाशंक्योक्तं भामत्यां ॥ नचैतावता ब्रह्मणः पराधीनप्रकाशता नहि शाब्दज्ञानप्रकाश्यं ब्रह्म स्वप्रकाशं न प्र

वति सर्वोपाधिविहीनं हि ब्रम्ह स्वप्रकाशानंदात्मनाऽभिधत्ते तद्भूतं हि तदभिप्रायमाह भगवान्भाष्यकारः न तावदयमात्मा
एकांतेनाऽविषय इति ॥ नचांतःकरणवृत्त्यवच्छिन्नस्य साक्षात्कारे सर्वोपाधिविनिर्मोकः तस्यैव तदुपाधेर्विनश्यदव
स्थस्य स्वपरविरोधिनो विद्यमानत्वादिति ॥ तथाच ब्रम्हणः स्वप्रकाशता स्वाभाविकी ज्ञेयता चौपाधिकेत्यर्थपर्यव
सानेन न निरुपाधिकज्ञेयताशून्यत्वमेव स्वप्रकाशत्वमदृश्यत्वरूपं पर्यवसितमुक्तं भवति स चायं न्यायः अवाच्य
त्वनिर्विशेषत्वादावपि तुल्यः ॥ सर्वोपाधिविनिर्मोके सत्येव जातिगुणादिप्रवृत्तिनिमित्तशून्यतयाऽवाच्यत्वसं
भवात् लक्ष्यता चास्योपाधिसापेक्षा या औपाधिकत्वात् ॥ नचोपहितमिथ्यात्वपरतया भामतीग्रंथो योजयितुं श
क्य इति वाच्यं ॥ उपहितमात्रमिथ्यात्वस्य वाक्यार्थान्वयाधिकरणस्थकल्पतरुग्रंथविरोधेन वक्तुमशक्यत्वात् तद्ग्रंथे
पपादनं च कृतं भाक्तचंद्रिकोक्तदूषणानिराकरणे ॥ अस्तु वा कथंचिदुपहितस्यानन्यगत्या मिथ्यात्वं ॥ तथापि न प्र
कृतभामतीग्रंथस्य तदभिप्रायकता युक्ता यतो न नचायमेकांतेनाविषय इति भाष्यं स्वोक्तार्थोपष्टंभकत्वेनोदा
हृतं तत्र चायमित्यविषय आत्मा परामृष्टः कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयतद्धर्माणामिति युष्म
त्प्रत्ययापेतस्य प्रत्यगात्मनोऽविषयत्वं प्रतीयेतिचाविषयात्मन एव ततः प्राक्तनभाष्ये प्रस्तुतत्वात् ॥ यदि वे
देशाद्धेनोपहितस्यैव परामर्शस्तदा नचायमेकांतेनेत्यत्रैकांतपदोपादानमनर्थकमेव स्यात् ॥ नन्वेवमपि तैत्ति
रीयभाष्ये महता प्रबंधेन ब्रम्हणः वाङ्मनसावाच्यत्वं समर्थितं तद्दुष्करीनो न हि रुध्येत ॥ तथाहि तत्र सत्यं ज्ञानमनंत

[illegible] रकापेक्षत्वे च नित्यत्वपारतंत्र्ययो
[illegible] सर्वत्वेपि स्वरूपतो नित्यत्वमनपपा
[illegible] त्वमप्युपपाद्योपसंहृतं अतः सिद्धं
[illegible] नीवोत्वादिवद्वाक्यार्थत्वं च ब्रह्म
[illegible] रहितत्वात्तथा सत्यज्ञाद्वेनापि सर्ववि
[illegible] पर्यवसानेनानौपाधिकवाच्यतारा
[illegible] नवारोपितगुणाश्रयतया वाच्यता
[illegible] षयश्च सर्वोपाधिविनिर्मुक्तं ब्रह्मैव
[illegible] धर्मीक्षणीयत्वमनुपपन्नमिति ॥
[illegible] हे यदुक्तं मीक्षणीत्वाद्वाच्यं ब्रह्मेति
[illegible] वाक्यानां तद्वाच्यं भवेत् किं वा सृष्टिम
[illegible] त्मतिविंषमेव चित्तगमुपास्यमि
[illegible] वाच्यं न भवतीत्यपरयमंगीकरणी

यत्तद्ब्रह्मत्वांगीकारे कथं तदनुपास्यमिति शंकाया अनिराकरणात् ॥ नहि संभवदुपासनाविधिमुपास्यस
मर्पकैः पदैर्ब्रह्मोपास्यतया विधीयते उपास्यं च न भवतीति वक्तुं शक्यं एतच्छंकानिराकरणायैव च यन्मनसा
न मनुत इति ब्रह्मण उपास्यत्वनिषेधकमंत्रसन्निधावाम्नायमानं यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्र
ह्मत्वं विद्धि नेदं यदिदमुपासते इति मंत्रांतरं ब्रह्मणो वाच्यत्वं निषेधति तेन नहि सर्ववागविषयं ब्रह्मोपासनाप्र
करणपठितानां सर्वं खल्विदं ब्रह्मेत्यादिवाक्यस्थब्रह्मादिपदानामपि वाच्यं न भवतीति प्रतिपाद्यते तेन चोक्तशं
कानिरासलाभः ॥ तथाहि तदव्यक्तमाह हीत्यधिकरणे ब्रह्मण अव्यक्तत्वं प्रसाध्याव्यक्तत्वेन ब्रह्मण अनुपा-
स्यत्वं तत्प्रतिबिंबस्य चोपास्यत्वं समर्थितं ॥ तथान्यत्प्रतिषेधादित्यधिकरणे ॥ तथाहि तदीयं भाष्यं परमा
त्मापरोक्ष्यं च तत्प्रसादादेव न जीवशक्तेरिति वक्तुमुच्यते तदव्यक्तमाह हीति ॥ अव्यक्तमेव हि तद्ब्रह्म स्वतः अ
रूपमक्षरं सदाव्यक्तं चानिष्कलं यत्प्राप्त्या मुच्यते जंतुरानंदश्चास्य यो भवेदिति कौठरव्यश्रुतेः ॥ तत्प्रकाशिका
यामपि भगवत्स्वामिसाधनभक्त्यर्थं तस्योपलब्ध्ययोग्यत्वसमर्थनात् शास्त्रसंगतिमुक्त्वा भगवद्भक्तिर्न कर्तव्या
प्रयोजनाभावात् ॥ ननु तदापरोक्ष्यं प्रयोजनं स्तंभादिवत्पुरुषप्रयत्नेनैव तत्संभवात् तस्याव्यक्तत्वं चेत्तथैव
च भक्तिरव्यक्तस्वभावस्य साधनशतैरपि दर्शनायोगाद्भक्तेर्व्यर्थत्वे प्रयुक्तं तन्माहात्म्यवर्णनमिति पूर्वपक्षमुक्त्वा
कर्तव्यैव भगवद्भक्तिः तस्याव्यक्तस्वभावत्वेन पुरुषप्रयत्नेन द्रष्टुमशक्यत्वात् ॥ अव्यक्तत्वं च तस्य श्रुतिराह तत्

इदास्यापि भक्तिजन्यप्रसादादापरोक्ष्यमिति सिद्धान्तितं ॥ ध्यानकालेऽपि चित्ते [illegible]
यमव्यक्तत्वं तस्येत्यत आह तथेति भाष्ये सूक्ष्मधयतार्यं पथागीयानं द्वादेरव्यक्तम् [illegible] पारदिपय
मानसानमनुते येनाहुर्मनो मतं तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इति तत्र [illegible] ब्रह्म
चित्ते यत् प्रतिबिंबितं ब्रह्मैव प्रतिबिंबं यदन्तस्तेषां फलं प्रदं तदुपासनं च भवति [illegible] ने
परोक्षेण ज्ञानेनैव परं पदमिति च ब्रह्मतर्कै इति तथान्यत् प्रतिषेधादित्यधिकरणं [illegible] ॥ [illegible]
भगवत्प्राप्तिसाधनप्रकारं पुनस्तस्याव्यक्तत्वसमर्थनेन शास्त्रसंगतिमुक्त्वा प्र[illegible] ध्यान-
कालेऽपि चित्ते प्रतीयमानत्वात् ध्यानकाले तस्य प्रतीतत्वे ध्यातृबाहुल्येन तस्य बहुत्वापत्तिरि[illegible]
त्यपि ब्रह्मरूपाणां नानात्वेन तदुपपत्तेरिति पूर्वपक्षयित्वा न ध्यानकाले प्रतीतत्वे [illegible] ध्यान
प्रतीतस्याब्रह्मत्वात् सन्तु तः यथा रत्नदीपानं दादीनां अल्प आदिकारणेन प्रद्यानं [illegible]
साकृतस्य व्यक्तत्वादिना कारणेन ब्रह्मणस्तत्वैकत्वात् [illegible] विणो ब्रह्मोपासा [illegible] ध्यानुपपत्तेरपि हि
यन्मनसेत्यादिका श्रुतिस्तस्य ब्रह्मत्वं निषेधति ध्यानकाले प्रतीतस्याब्रह्मत्वे कथं फलं [illegible]
॥ स्थितिमात्रेण कथं फलमदमनुपादितत्वादत आह तादृशि ब्रह्मैव तत्कृतोनेत्यत [illegible]
हिं निषध्यतां किमुपासनमेत्यत उक्तं उपासनोनि ध्याने प्रतीतं न ब्रह्मेति सिद्धान्तितं [illegible] गत ब्र

ह्मादिष्विह द्वाभ्यां मतादित्वर्थो विरुध्येत पञ्चपदस्य परपदद्वाभ्यां उपास्यत्वापत्तेः ॥ नापि सृष्टि प्रकरणस्य श्रुति
गतत्वाद्वाभ्यां हं निहितीयः पक्षः संभवति सर्वस्यैव सृष्ट्यादि वाक्यगत कारणत्वादि गुण वर्णनस्योपासना
र्थत्वाभ्यां ध्यानार्थत्वाधिकरणे वर्णयिष्यमाणत्वात् अनुपास्यस्य ब्रह्मणः सृष्टि वाक्यस्य नारायणादि पदवाच्यत्वा
संभवात् ॥ आध्यानाय प्रयोजनांतराभावादित्यधिकरणे हि तदीयमाध्येऽपसंहारानुपसंहारे प्रमाणमाह
तिसूत्रभवतार्योक्तं ॥ आध्यानार्थं हि सर्वे गुणा उच्यंते प्रयोजनांतराभावात् ज्ञानार्थमपि ध्यानार्थं गुणानां स
मुदीरणा ज्ञातव्याश्चैव ध्यातव्या गुणाः सर्वे एव तो हरेः नान्यत् प्रयोजनं ज्ञानात् ध्यानात् कर्मकृतेरपि भवति चापि
पाठाद्वा विद्याभिः किंचिदिष्यते इति ॥ परमसंहितायां गुणाः सर्वेपि वेत्तव्या ध्यातव्याश्च न संशयः नान्यत् प्रयो
जनं सुखं गुणानां कथनेभवेत् ज्ञान ध्यान समायोगात् गुणानां सर्वशः फलं मुख्यं भवेन्न चान्येन फलं मुख्यं भवे
त् क्वचित् इति बृहत्तंत्रे इति तत्वप्रकाशिकायां परमात्मज्ञान साधनोपासने गुणोपसंहार समर्थनात् ॥ ...सं
गतिमभिधाय गुणोपसंहारो न कर्तव्यः प्रमाणाभावात् ॥ नच सर्वगुणोपसंहारे विधिरस्तीत्युक्तमिति शंक्यं
अनुपसंहारेपि मोक्ष भासे रुक्तत्वात् व्यर्थविधेरनपेक्षत्वात् ॥ नच सहिद्याभूमविद्यादहरविद्यादिषु तत्तद्
गुणवर्णनमेव सर्वविद्योक्तगुणोपसंहारेणोपासना कर्तव्येत्यत्र प्रमाणमन्यथा तद्वैयर्थ्यादिति साधुतासुत
नद्गुणवर्णनस्य तत्तद्गुणकब्रह्मणा हारा जनकादिफल विशेषार्थत्वोपपत्तेस्तस्योपासनायां तेषामुपसं

[illegible] मकरणभेदादोगइति पूर्वपक्षयित्वा कर्तव्यसत्वादुपसंहारः सर्वविद्यानां
[illegible] त् गुणाभिधानस्य चाशेषगुणोपसंहारपूर्वकध्यानार्थत्वान्नोपसंहारे
[illegible] इत्युपासकस्य सुखावानंदातिशयलक्षणफलसद्भावात् यावत्सेवापरे तत्वे
[illegible] अत एव विशेषफलदौर्लभ्याय नानास्थाने सूक्तिरुपपन्ना श्रवणादर्जनबोध
[illegible] पे महाफलज्ञानसाधनत्वेन विहितस्य न तत्फलत्वमिति सिद्धांतितं ॥ त
[illegible] श्रुतिपुराणेतिहासागमादीनां सर्वेषामपि उपास्यत्वेन तदभिमतब्रह्मति
[illegible] स्य शेषादिभिरूपारूपनीयन्यायेन ग्राह्यत्वमस्ति कानां ब्रह्मनारायणादि
[illegible] ना वाच्यत्वसिद्धिः ॥ एवं चोक्तरीत्या ब्रह्मनारायणादिशब्दानां प्रतिबिंबावि
[illegible] दमुपासनगइत्यादौ ब्रह्मादिशब्दानां लक्षणयैव बिंबभूतब्रह्मविषयत्वं त
[illegible] गाद्वैतमेव तत्पारगो कृतार्थमिति सुधियां सप्रसंग ॥ न च बिंबविषयाणि श
[illegible] देषयाणि शास्त्रगिकानीति वै परीत्यं वक्तुं युक्तं ॥ प्रायः सर्वेषां श्रुतिपुराणा-
दीनामुपास्यत्व [illegible] त्वसंहर्तृत्वांतसर्वज्ञत्वौदार्याद्यनेककल्याणगुणवर्णनपरत्वयोपास्य
प्रतिबिंबाविशेषत्वापदेश [illegible] षांमुपसां लक्षकत्वकल्पनापेक्षया मुख्यमनसा नमनुते यतो वाचो निवर्तंते

एतस्मात् जीव [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

स्तुत्यादि योजनं [illegible]

निराकरणं तदपि न [illegible] ॥ [illegible]

भात् ईक्षणीये तस्मिन् [illegible] जीवघनात् परात्परं [illegible]

[illegible] संगतेः ॥ एतेन [illegible]

जीवघनात् परात् परस्या संभवस्य [illegible] मुक्तोपसृप्य [illegible]

रत्नं ॥ [illegible]

[illegible] परतया सूत्रार्थवर्णनस्य [illegible] प्रश्नोपदेशात् [illegible] तृतीयसूत्रम्

पिनिर्दिष्टिं तत्प्रयोजनं ॥ यदपि गौणात्मन्यात्मशब्दमुख्यत्वव्यवच्छेदार्थमिदं सूत्रद्वयं पूर्वमाहेति व्याख्यायते
नोक्तः सत्त्वादिगुणको जीव एव न निर्गुणः तस्य परब्रह्मस्य मिति इत्यप्रत्यनिषेधात् अतश्चके व्याख्यायत्व हेतुर
सिद्ध इति शंका या मात्मशब्दो हेतुत्वेनोक्तः सत्त्वयोगुणैः सर्वतो हीनो यश्च दोषविवर्जितः हेयोपादेयरहितः
स आत्मेत्यभिधीयत इति श्रवणपरत्वात् ब्रह्मणो रूपे आत्मा चैवात्मा चेति तस्य आत्मा स नित्यः केवलो
निर्गुणश्च अपयोनीइन्द्रः सोनात्मेति तत्प्रकारं ब्रह्मणा आत्मशब्दस्य निर्गुणवाचकत्वावधारणादीक्षणी
यत्व हेतोर्नासिद्धिरित्युक्ते गौणात्मन्यात्मशब्दो मुख्यः किं न स्यात् वाचकत्वेन आत्मशब्दस्य गौणे चमुख्यत्वा
युक्तेः तत्पुरस्कारश्रुतिस्मृत्यानात्मशब्दयोश्चेतनाचेतनविषयत्वादित्याशंक्य तन्निष्ठस्य मोक्षोपदेशादित्युच्यते
[illegible] नः प्रतिमुख्य आत्मेत्युपक्रम्य तस्य लोकः स उ लोक एवेत्यादिना आत्मनिष्ठस्य मोक्ष उपदिश्यते न-
[illegible] सत्त्वादिगुणपदात्मज्ञानातन्निवृत्तिरूपमुक्त्यसंभवात् चेतनस्तु हि यो मोक्षः कोऽपि जीव आत्मेति च
[illegible] शब्दः मोक्षा आत्मैकस्तु जनार्दनः इतरे आत्मशब्दस्तु सोपचारेणैव भीयते तस्यात्मनो निर्गुणस्य ज्ञा-
[illegible] तः सगुणात्मपरे मोक्षा सज्ज्ञानान्नैव मुच्यते परो हि पुरुषः मोक्षस्त्वस्यान्यो मस्तत्त्व तदिति
[illegible] सगुणनिष्ठस्यापि परं परया मोक्षः स्यादिति शंकापां तन्निरासाय हेयत्वावचनाच्चेति सूत्रांतरं गौ
णात्मपर आत्मशब्दः तमेवैकं जानथ आत्मानमन्या वाचो विमुंचथेत्यात्मशब्दस्य साधारणमुमुक्षूपादेयत्वरू-

पाहेयत्ववचनात् गौणात्मनस्त्वन्यायाचोऽधिसुं नयेति हेयत्ववचनाच्चेति जयतीर्थीयसूत्रयोजनं तदसत् ॥ मुख्ये
ज्ञानाविषयत्वस्यावाच्यत्ववादिभिरद्वैतिभिरपि स्वीकारेणासिद्धिशंकाया असंभवदुक्तिकत्वात् अत एव चंद्रि
कायां सिद्धांतोपक्रमे न तावदमुख्यस्यात्मनो ज्ञेयत्वमेव नेत्युपक्रम्य तत्रापि मुख्यात्मज्ञानेन मोक्षस्य स्वीकृतत्वा
च्चेत्यनेन मुख्यात्मनि ज्ञेयत्वस्याद्वैताभिमतत्वं स्फुटीकृतं कथमन्यथा यतो वाचो निवर्तंत इति प्रमाणमुखेनावाच्य-
त्वं पूर्वपक्षी साधयेत् मुख्यात्मनो वृत्तिव्याप्यत्वेऽपि नेक्षणकर्मत्वमिति शंकायां वृत्तिव्याप्यत्वेनैव वाच्यत्वसिद्धि
रिति चंद्रिकोक्तेस्त्वया असिद्धिशंकायाः कर्तुमशक्यत्वाच्च ॥ गौणशब्दस्य वृत्तिविशेषयुक्तशब्दपरत्वे सतः
प्रयोगादर्शनरूपत्वे सारस्य हानाच्च ॥ अस्मन्मतरीत्या पूर्वसूत्रस्थपंचम्यंतेक्षतिपदस्य विभक्तिविपरिणाम
मात्रेणेक्षतिर्गौण इति प्रतिज्ञयोपपत्तावीक्षणीयत्वेनोक्तो गौण इति प्रतिज्ञायामध्याहारस्यायुक्तत्वाच्च अतः पू
र्वभागस्तावदनुपपन्नः नाप्युत्तरभागः उपपद्यते अप्रयोजकत्वादुक्तहेतुद्वयस्य ॥ तथाहि मोक्षहेतुभूतनिष्ठा
विषयत्वोपादेयत्वयोर्निर्गुणात्मविषयत्वाभ्युपगमेऽपि तस्मिन्नात्मशब्दस्य मुख्यत्वासिद्धेः नहि मुख्यार्थगोचरादेवो
पायात् फलसिद्धिरित्यस्ति नियमः दर्शपूर्णमासपदयोः कर्मण्यमुख्यत्वेऽपि तदनुष्ठानात् फलसिद्धिदर्शना
त् प्रस्तुताभावात् तयोरीक्षणोपादेयत्वयोः शब्दमुख्यत्वतदभावाप्रयोजकत्वाच्च तथाचात्मशब्दस्य गौणेऽपि वृ
त्तिसंभवात् मुख्यत्वाभावेन परिहारस्यावाच्यत्ववादिनं प्रत्यसिद्धेः अथोदाहृतप्रमाणबलेन निर्गुणस्यैवात्म

ब्रह्ममुख्यत्वनिश्चय इति चेत् कथमुक्तयोर्हेत्वोरस्त्वेतुत्वं नन्वीक्षणीयत्वाद्वाच्यत्वमुच्यते तन्न नोपेक्षणीयस्य नापि हेयस्य किंतूपादेयस्यैवेति तस्यैव वाच्यत्वसिद्धेः सगुणस्य वाच्यत्वाभावादात्मशब्दोपि न तद्वाचक इति रीत्या मसाध्यांगक एव हेतुरयमिति चेन्नहि साक्षान्तस्य धर्म्यत्वएव हेतुत्वसंभवेन पूर्वसूत्रवैयर्थ्यात् अस्मन्मते तीक्षतेर्गौणताभावे आत्मशब्दो हेतुर्न प्रधानपरत्वनिरास इति न वैयर्थ्यं ॥ किंच परात्परं पुरिशयं पुरुषमीक्षत इत्युक्तस्य पुरुषस्येक्षणीयत्वेउक्ते तस्य गौणात्मविषयकत्वशंकायां पुरुषशब्दस्य हेतूकर्तव्यत्वे आत्मशब्दस्य तत्राश्रुतस्य हेतूकरणं चायुक्तं स चात्मशब्दः गौणविषयः किं न स्यादिति शंकानिरासार्थं यस्यानुवित्त इति वाक्यांतरगतात्मनिष्ठमोक्षोपदेशाः न मेने कं जानथेति वाक्यांतरगतं हेयत्वावचनं हेतुरित्यभिधानं व्यधिकरणं ॥ यच्च चंद्रिकायामुक्तं वैय्यधिकरण्यशंकां व्येक्षतेरित्यनेन ब्रह्ममात्रस्यासाधकतयाज्ञानकर्मत्वस्यैव विवक्षणीयत्वात् तस्य च सएतस्मादिति वाक्य इवात्मन्येवात्मानं पश्येदित्यादिवाक्येष्वपि सत्वेन तेषामपि भाष्यकृता ईक्षति सूत्रे उदाहृतत्वात् तेषां च वाक्यानामेकार्थत्वादात्मशब्दादिमत एकस्य वाक्यस्य निर्गुणपरत्वे अन्यस्यापि तत्परताया अपरिहार्यत्वात् एकस्य निर्गुणपरत्वमात्रेण तस्य वाच्यत्वसिद्धेश्च न वैय्याधिकरण्यमिति समाहितं ॥ तन्मंदमेव ॥ उक्तहेतुबलादात्मशब्दस्य गौणविषयकत्वनिरासेपि पुरुषशब्दस्य गौणविषयकत्वानिरासेन तद्वाक्यगतेक्षणीयस्य गौणविषयकत्वानिरासात् ॥ न च गुणवदीक्षणा द्गुणनिर्गुणनिरूपमो

क्षासंभवात्तत्रैक्षणीयत्वस्य निर्गुणमात्रनिष्ठत्वनिर्णयेऽप्यावित्तन्निश्चयः सुकर इति वाच्यं ॥ तर्हि मोक्षोपदेशा
स्यै वैक्षणीयत्वस्य गौणव्यावृत्तिसाधकत्वेन तत्र मोक्षोपदेशावैयर्थ्यात् ॥ नाप्योदाहृतश्रुतिस्मृतिभिरात्मशब्द
मात्रस्य निर्गुणासाधारण्यनिर्णयेऽपि पुरुषशब्दस्य तदनिर्णयेन तदुभयपरैकविषयकत्वनिर्णयासंभवाच्च ॥ किंचेक्ष
णीयत्वात्मशब्दतन्निष्ठमोक्षोपदेशहेयत्वावचनानां तमेवैकमिति वाक्यस्थत्वया तद्वाक्यस्यैवोदाहर्तव्यत्वे पुरु
षमीक्षत इति वाक्योदाहरणमनुचितं सूत्रोपात्तेक्षत्यनुगमाय तदुदाहरणमिति चंद्रिकोक्तं तु न सम्यक् ॥ बह्व
नुगमाय तमेवैकमिति वाक्यस्यैवोदाहरणौचित्यात् अर्थपरतामंगीकुर्वता त्वया शब्दानुगमाय स्थूलकलायावक्तु
मशक्यत्वाच्च ॥ यदपि चंद्रिकायां सोत्रात्मशब्दस्य पुरुषश्रुतिपरात्परत्वादिलिंगोपलक्षकत्वमुक्तं तदसत् ॥ ई
क्षतिवाक्यावृत्त्यात्मशब्दस्य तद्वाक्यगतश्रुतिलिंगोपलक्षकत्वायोगात् हेयत्वावचनाच्चेत्यपि न सूत्रणीयं ॥ य
द्यात्मशब्दो गौणात्मपरस्तर्हि तमेवैकं जानथ आत्मानमिति श्रुत्युक्तात्मापि गौणः स्यात् न चास्त्विति वाच्यं ॥ तथा
सति तस्यैव हेयत्वप्रसंगात् न चास्य हेयत्वमुच्यते प्रत्युत जानथेत्यस्याहेयत्ववचनात् ॥ न च गौणस्याप्यहेयता
अन्या वाचो विमुंचथेति गौणात्मनो हेयत्ववचनादिति तत्त्वप्रकाशिकायां दर्शितशंकानिराकरणस्याहेयत्वाच्चेत्य
नेनैव निर्वाहात् अस्मन्मतरीत्या स्थूलारुंधतीन्यायेनाहेयत्वावचनवत् तत्त्वमसीत्यत्र हेयत्ववचनाभावादित्यर्थस्याहेय
त्वादित्यनेन सिद्धेः पर्यायविन्यासः सप्रयोजनः निरुक्तस्याप्यात्मशब्दोदितपरमात्मनः निर्गुणस्य स्वात्मनि लयोऽप्यु
क्त एव सर्वेषामेव पारमेश्वररूपाणां लयासंभवात् न हि नाशो वा रूपांतरहानेन स्वरूपावस्थानं अनभिव्यक्तिर्वा

तत्र संभवति ॥ ननु महासरसि मत्स्यानामिव भूतरूपे ॥ ॥ कल्पांतराणामनुभवेन ज्ञापयाद्भयोर्विवक्षित इति चे-
न्न ॥ पूर्णमेवावशिष्यत इत्यस्य विरोधात् न त्वंतर्लीनतामात्रेण मूलरूपमात्रपरिशेषो वक्तुं शक्यते सफलक-
ल्याणगुणार्णवानां भागवतरूपाणामपि सत्वात् स आत्मा स्वात्मानमनुभूत्वा अन्येवमविलापयत्यतोऽसंभवति
देवो बहुधा भूत्वा निर्गुणः पुरुषोत्तमः एकीभूय पुनः शेते निर्दोषो हरिरादिकृदिति श्रुतिस्मृत्योरपि पारमेश्वररू-
पाणां कथमपि निरुक्तलयासंभवात् स ज्ञानी आत्मनः देहाद्युपाधिकमात्मानमनुभूत्य मुंजादीषिकामिव पृथक्कृ-
त्यात्मनि परमात्मन्येव प्रविलापयति आरोपितरूपभूत्यं करोति अथ आत्माशुद्धं ब्रह्मैव भवति स देवो बहुधा
भूत्वा अनेककार्यार्थिना भूत्वा पश्चादेकीभूय तादृशाकार्यशून्यः सन् पुनः शेते इत्यर्थपरतया पूर्णमद इत्यस्य
र्थस्य भाष्य एव दर्शितत्वात् न कयाचिदपि श्रुत्या स्मृत्या वा परमात्मनः पारमेश्वररूपेण स्थितिमूलयो दर्शितः
गतिसामान्यादिति सूत्रं तु प्रक्रांतवाच्यत्वसमर्थनपरिसमाप्त्यनंतरमध्ये निवेशायितुमुचितमिति सष्टमेव श्रुत-
त्वाच्चेति सूत्रं ईक्षणीयत्वेन गतार्थमिति सम्यगेवेत्यलं ॥ मीमांसान्यायपंचास्यराघवार्यप्रसादजा ॥ श्रीमच्छं-
करपादाब्जभूषणे परदूषणे ॥ कृतिः स्याद्दीक्षितिनयेरघुनाथस्य सन्मुदे ॥ अनया मीतिमायातु श्रीपतिर्दीप-
तिः स्वराट् ॥ शुभमस्तु ॥

इति ईक्षत्यधिकरणं समाप्तं.

श्रीगणेशाय नमः ॥ उमारमालिंगितदिव्यविग्रहौ सत्तेजसा नित्यनिरस्तविग्रहौ । श्रीलाञ्छनौ विक्रमशालिलाञ्छनौ
पातां कृपातः स्मरकंसवैरिणौ ॥१॥ ब्रह्मानंदमयं भवेदुपहितं मुख्यं तद्व्यक्तिति व्याख्यातं गुरुभिः परैस्त्वाभिहि-
तं पंचापि कोशा इमे ॥ ब्रह्माणीतिनपुंसकमेव तदिति व्याधूय दोषान् बहून् भूयो गुरुपादयोर्विरचितं दोषज्ञतो-
षाय तत् ॥२॥ आनंदमयोभ्यासात् सर्वेषां वेदांतानां जिज्ञास्यचेतनब्रह्मकारणतावादित्वरूपं प्रतिपादितं गति-
सामान्यमेव चेतनब्रह्मकारणतावादिषु वेदांतेषु वाक्यानि किमाम्नातगुणाविवक्षापूर्वकमुपास्यसगुणसवि-
शेषब्रह्मपराणि गुणाद्यविवक्षया ज्ञेयनिर्गुणनिर्विशेषब्रह्मपराणि वेति संशये तद्व्यवस्थायै एतदधिकरण-
मारभ्योत्तरं प्रथमाध्यायशेषेण प्रपंच्यते तेन प्रकारेण श्रीमद्भाष्यतदीयटीकादौ विशेषेण प्रपंचितः ॥ नन्व-
स्मिन् शास्त्रे सगुणब्रह्मतदुपासनादिवाक्यविचारः किमर्थः न च शास्त्रस्य वेदांतविचारात्मकत्वात् तत्स्था-
पवेदांतर्गततया विचार्यत्वमिति वाच्यं ॥ नहि वेदांतत्वादस्मिन् शास्त्रे विचार्यते किंतु जिज्ञास्यनिर्विशेषब्रह्म-
प्रमाणत्वात् तत्र निर्विशेषवाक्यविचार एव शास्त्रीति चेत् ॥ सत्यं सगुणोपासनानां चित्तैकाग्र्यसंपादन-
द्वारा निर्विशेषब्रह्मात्मप्रतिपत्त्युपयोगित्वात्तद्वाक्यविचारोप्यपवादसंगत्या सफलः ॥ विशेषतस्तु इदं अंत-
स्तद्धर्माधिकरणे चंद्रिकोक्तदूषणनिराकरणप्रसंगे प्रतिपादयिष्यामः ॥ एवं सविशेषवाक्यमुदाहृत्य प्र-
तिपादितो न्यायो निर्विशेषवाक्येष्वपि प्रयोक्ष्यत इत्यादिसंगतिभिः सोपि विचारोस्मिन् शास्त्रे युक्त ए-

व ॥ तथाच ब्रह्मणि पूर्वोक्तसंशयनिरासकोपक्रमादिलिंगप्रमाणकः वेदांततात्पर्यलक्षणसंबंधरूपसमन्वयप
रः प्रथमाध्याये स्पष्टब्रह्मलिंगानां वाक्यानां प्रथमे पादे समन्वयः ॥ द्वितीयतृतीययोस्तु अस्पष्टब्रह्मलिंगानां वाक्या
नां समन्वयः ॥ तत्रापि प्रायः सविशेषवाक्यानां द्वितीये ॥ प्रायः निर्विशेषवाक्यानां तृतीय इति विशेषः ॥ चतुर्थे त्रि
गाद्युक्तसमन्वयहेतुगतिसामान्यसमर्थनद्वारोक्तसमन्वयस्यैव प्रतिपादनं स्पष्टं चेदमग्रे करिष्याम इति पा
दोपाधिभेद इति श्रीमद्भाष्यनदीयटीकादौ स्पष्टं ॥ यत्तु चंद्रिकायां अत्रोक्तित्यादिना आहुरित्यंते नोक्तपादोपा
धिभेदानूद्य ॥ तत्र यथा प्रथमे अंतस्तद्धर्मोपदेशादित्यादौ सेयं कृत्स्नामतद्दुक्थं तद्यजुरिति सर्वात्म
त्वसर्वेभ्यः पाप्मभ्य उदित इति सर्वपापराहित्यस्य च ब्रह्मलिंगस्य स्पष्टता न तथा द्वितीये सर्वत्र प्रसिद्धोपदेशा
दित्यत्र सर्वं खल्विदं ब्रह्मेति जीवेप्ययुक्तस्य सार्वात्म्यादेः ॥ अत्ता चराचरेत्यत्र अन्यत्र धर्मादन्यत्राधर्मादिति पुण्य
पापराहित्यादेः ॥ अंतरित्यत्र एतदमृतमभयमेतद्ब्रह्मेत्यमृतत्वादेः ॥ अंतर्यामीत्यत्र एषत आत्मांतर्याम्यमृ
त इत्यमृतत्वादेः ॥ अदृश्यत्वादिगुणक इत्यादौ यः सर्वज्ञ इति सार्वज्ञ्यादेः ॥ ब्रह्मलिंगस्यास्पष्टत्वात् ॥ एवं तृती
ये द्युभ्वादीत्यत्रामृतस्यैष सेतुः यः सर्वज्ञ इत्यमृतसेतुत्वसार्वज्ञ्यादेः ॥ भूमेत्यत्र यत्र नान्यत्पश्यतीत्यद्वि-
तीयत्वादेः ॥ अक्षरमंबरेत्यत्र अदृष्टं द्रष्टृ अश्रुतं श्रोतृ अस्थूलमनण्वित्यदृश्यत्वास्थूलत्वानणुत्वादेः ॥ ईक्षति
कर्मेत्यादौ परात्परमिति परामरत्वादेः ब्रह्मलिंगस्यास्पष्टत्वात् ॥ वाक्यांतरे ब्रह्मधर्मतया निर्णीतत्वं वा जीवादौ स्वारस्येन

पप यमानत्वं वास्पष्टत्वं न त्वस्तारस्येनापि जीवादावनुपपद्यमानत्वं विषयवाक्ये ब्रह्मधर्मत्वानिर्णीतत्वं वाजीवा
दमापकलिंगराहित्यं वा पूर्वपक्षानुदयापातात् तत्र सर्वं खल्विदमित्यादावस्ति ॥ न च सर्वत्र प्रसिद्धेत्यादेः म
नमयः प्राणशरीरो भारूप इत्यादिकमुदाहरणं तत्र च न ब्रह्मलिंगं स्पष्टं किंतु सर्वं खल्विदमित्युपक्रम इति वाच्यं
ग्रपमेपि अंतरित्यस्योदाहरणे य एषोंतरित्यत्र सार्वात्म्यस्य ज्योतिश्चरणेत्यस्योदाहरणे य इतः परो दिवो ज्यो
तिरित्यत्रामृतत्वादेः प्राणस्तथेत्यस्योदाहरणे प्राणोस्मि प्रज्ञात्मेत्यत्र हिततमत्वादेः ब्रह्मलिंगस्यापातात् ॥ द्वि
त्यादावपि य एषोंतरक्षिणि पुरुषो दृश्यत एतदमृतमभयमेतद्ब्रह्म एष त आत्मांतर्याम्यमृत इत्याद्युदाहृ
तवाक्य एवामृतत्वादेः स्पष्टत्वाच्च ॥ यथा च द्वितीये तृतीये समन्वेतव्यं मनोमयत्वादिकं न ब्रह्मणि स्पष्टं तथा
प्रथमे समन्वेतव्यमादित्यस्थत्वमाकाशप्राणशब्दादिकं न ब्रह्मणि स्पष्टमिति दूषणमुक्तं ॥ तत्र श्रीमद्भाष्यकारा
नभिमतत्वकपोलमात्रकल्पितस्पष्टत्वास्पष्टत्वनिरुक्तिमात्रनिबंधनमित्युपेक्षणीयं ॥ यतो लिंगानां स्पष्ट
संभाव्यमानत्वारस्यजीवलिंगानभिभूतत्वं तादृशाजीवलिंगाभिभूतत्वं चास्पष्टत्वं ॥ संभाव्यमानत्वारस्यत्वं
निर्णीततात्पर्यकवाक्योपक्रमगतब्रह्मलिंगासमभिव्याहृतत्वं ॥ ब्रह्मलिंगमित्यस्य जीवाद्युपस्थितिद्वारा
द्योपस्थापकमित्यर्थः ॥ जीवलिंगमित्यपि ब्रह्मोपस्थितिद्वारा जीवोपस्थापकमित्यर्थकं ॥ तथा सत्येव सत्य
मत्वसत्यसंकल्पत्वादिब्रह्मलिंगसमभिव्याहृतेष्वपि मनोमयत्वादिजीवलिंगेषु असंजातविरोधित्वादिना

स्यारस्यासिद्धिः नयावन चांद्रिकोक्तानिमसंगाद्यप्रकाशस्तथाहि सर्वत्रप्रसिद्धोपदेशादित्यत्र ॥ मनोमयः [illegible]
शरीरो भारूप इत्यादौ निर्णेयतात्पर्यके विषयवाक्ये श्रूयमाणस्य मनोमयत्वादेर्जीवलिंगस्य नोप [illegible]
ह्मलिंगसमभिव्याहारः ॥ यद्यपि ततः पूर्वतने सर्वं खल्विदमित्यादौ सार्वात्म्यं ब्रह्मलिंगं श्रूयते तथापि [illegible]
वाक्यस्य पूर्वोत्तरपक्षयोः संप्रतिपन्नार्थकतया निर्णेयतात्पर्यकत्वाभावादुक्तरूपसंभाव्यमानस्यारस्येन म
नोमयत्वादिना सत्यसंकल्पत्वादेर्ब्रह्मलिंगस्याभिभूतत्वात्तस्यास्पष्टब्रह्मलिंगत्वमव्याहतं ॥ तथाचोक्तं भाष्ये
अत्र सत्यसंकल्पत्वसत्यकामत्वादीनां ज्यायस्त्वस्य चोपक्रमगतमनोमयत्वाणीयस्त्वाभ्यामभिभूत [illegible]
स्पष्टतेति ॥ अंतस्तद्धर्माधिकरणे यद्यपि जीवलिंगं तथाहि रण्यश्मश्रुरित्यादिर्दृष्टं ... [illegible]
माशंकितं तथापि तस्य जीवेश्वरसाधारणतया मनोमयत्वादिवज्जीव एवं स्वारस्याभावेन जीवोपस्थि[illegible]
रसाक्षात्ब्रह्मोपस्थापकतया निर्णेयतात्पर्यकवाक्योपक्रमगतब्रह्मलिंगतया च न संभाव्यमानस्वार[illegible]
जीवलिंगत्वं तन्नेत्यपहृतपाप्मत्वादेस्तादृशाजीवलिंगानभिभूतत्वात् स्पष्टब्रह्मलिंगत्वमव्याहतं । [illegible]
त्वस्य ... श्वरसाधारण्यं स्यादीश्वरस्यापि साधकानुग्रहार्थं मायामयं रूपं मायया ह्येषा मया सृष्टा यन्मां [illegible]
नारदेति भाष्ये ॥ अपि च श्रुतिस्मृतिपुराणादिषु परमेश्वरप्रकरण एव विग्रहाः समाम्नाताः न च ते [illegible]
रिकाणां संभवेयुरभेदे तु तादात्म्यपदत्वं तास्त्वं न ह्यादिति श्रुतिमेकामपवंत्यव कुंठाक्यमतीनसरा [illegible]

नमीश्वरत्वविरोधि किंतु स्वीयधर्माधर्मनिमित्तकसशरीरमेवेति अंतस्तद्धर्माधिकरणे भाष्यटीकायां स्पष्टं ॥ न
नु यदि हिरण्यश्मश्रुरित्यादिना प्रतीतमायिकदिव्यरूपसंबंधो जीवेश्वरसाधारणस्तर्हि मनोमय इत्यादिना प्र
तीतमनआदिसंबंधरूपमनोमयत्वादेरपि सर्वकारणे ईश्वरे मायिकस्य वक्तुं शक्यत्वान्मनोमयत्वमपि जीवे
श्वरसाधारणमेवेत्यविशेष इति चेन्नैवं ॥ यथाहि धनवान्भिन्नगुरित्यादौ धनगोपदोपस्थापितस्यार्थस्य-
स्वत्वेनातिप्रसिद्धत्वात् स्वस्वामिभावसंबंध एव शीघ्रमुपस्थितो भवतीति तादृशसंबंध एव तादृशपदात्स्व
रसतः शीघ्रः तथा मनः प्राणयोर्भोगोपकरणयोस्तत्त्वेनातिप्रसिद्धत्वात् उपकरणोपकरणीभावरूपसंबंध-
एव मनोमय इत्यादौ शीघ्रमुपस्थितो भवतीति मनोमय इत्यादेर्जीव एव स्वारस्यमिति मनोमयत्वं जीवासाधा
रणं भवत्यत एव जीवोपस्थापकं जीवलिंगं अत एव वाचस्पतिग्रंथे पूर्वपक्षे मनोमयत्वादि च कार्यकारणसंघा
तात्मनो जीवात्मनो निरूढमित्युक्तं सिद्धांतेपि च न चैष जीवसमवेतार्थो न ब्रह्मणि तस्याप्राणोह्यमना इत्यादिना
तद्विरह प्रतिपादनात् इत्याक्षिप्य तस्यापि सर्वविकारकारणतया विकाराणां च स्वकारणाभेदात् तेषां च मनो
मयत्वं ब्रह्मणस्तत्कारणस्य मनोमयत्वोपपत्तेरिति जीवद्वारैव ब्रह्मणः मनोमयत्वं न साक्षादित्युक्तं ॥ अयमेव
पुनः सिद्धांताक्षेपे स्यादेतत् जीवस्य साक्षात् मनोमयत्वाद् यो ब्रह्मणस्तद्द्वारा तन्मयमयं द्वारस्य बुद्धिस्थ-
त्वात्तदेवोपास्यमस्तु न पुनर्जघन्यं ब्रह्मलिंगानि जीवस्य ब्रह्माभेदादुपपत्स्यंत इति मनोमयत्वं ब्रह्मणि जघन्य

मित्युक्तं ॥ परिमलेऽपि मनोमयत्वं ब्रह्मण्यापातत इत्युक्तं ॥ यत्तु समासः सर्वनामार्थः सन्निकृष्टमपेक्षते तति
तार्थोऽपि सामान्यं नापेक्षापानिवर्तकः तस्मादपेक्षितं ब्रह्म ग्राह्यमन्यपरादपि एवं च सत्यसंकल्पप्रभृतीनां यथार्थ
तेति वाचस्पति स्वसिद्धांतकारिकायां नास्थितार्थोऽपि सामान्यमित्यनेन मनोमयत्वस्य जीवेश्वरसाधारण्योक्तिस्त
स्य साक्षाज्जीवलिंगत्वेऽविरुद्धेति तन्न ॥ सक्रतुं कुर्वीतेति वाक्येन विहितां क्रतुभावनामनूद्य सर्वं खल्विदमि
ति वाक्यं शमगुणो विधिः तथा च सर्वं खल्विदमिति वाक्यं प्रथमं पठितमपि अर्थालोचनया परमेव तदुपजीवि
त्वात् एवं च संकल्पविधिः अयमो निर्विषयः सन्नपर्यवस्यन् विषयापेक्षः स्वयमनिर्वृत्तो न विध्यंतरेणोपजीवितुं श
क्यः अनुपपादकत्वात् तस्मात् शांततागुणविधानात् पूर्वमेव मनोमयः प्राणशरीर इत्यादिभिः विषयोपपादकैः
संबध्यते मनोमयत्वादिना कार्यकारणसंघातात्मनो जीवस्य निरूढमिति जीवात्मनोपास्येनोपरक्तोपासनान पृथ
तु ब्रह्मणा संबद्धुमर्हतीत्युत्पत्तिशिष्टगुणविरोधात् मनोमयत्वानां जीव एवोपास्यो न ब्रह्मेति पूर्वपक्षे समासः
सर्वनामार्थ इति सिद्धांतः मनोमयत्वादिना ब्रह्मैवोपास्यं न जीवः तथाहि प्राणशरीर इत्यादीनि बहुव्रीहिरूपाणि
प्राणः शरीरमस्येति सर्वनामार्थे बहुव्रीहिः विग्रहवाक्यानुसारेण सर्वनामार्थकः सर्वनाम्नां च प्रकृतपरामर्श
कतावक्तव्या तत्रान्यार्थं सन्निहितमपि मप्रकृतं ब्रह्म सर्वनामसमानार्थकैः प्राणशरीरादिपदैः परामृश्यत इति
संकल्पविधिः तेनैव सविषयः निराकांक्षः ॥ ननु स्ववाक्यस्थमनोमय इति मयडंतार्थजीवपरामर्शसंभवात्तेनै

थाकांक्षाशांतिरस्थित्यतउक्तंतास्थितार्थोपि सामान्यमिति सोपि विकारप्राचुर्यप्राधान्यसाधारणत्वेन सामान्य
मतोनोक्ताकांक्षाशामकः संदिग्धत्वात्॥ नयानुमनोमयशब्दार्थस्यजीवस्य भावनायांमनःप्रचुरत्वेनमनःप्रधान
त्वेनमनोविकारत्वेनवाविषयत्वमिति संदिग्धत्वात्नमनोमयपदोपात्तोजीवः सर्वनामार्थः इत्येव तास्थितार्थोपि
सामान्यमित्यस्यार्थः ननुमनोमयत्वंजीवेश्वरसाधारणमिति व्याख्यातंचतथैववाचस्पतिनापिचेदेतदेवंयदि
प्राणशरीरइत्यादेर्नासाक्षात्जीववाचकत्वंमयेत्नत्वेसत्त्वस्तितथाहि प्राणः शरीरमस्येति सर्वनामार्थे बहु
व्रीहिः सन्निहितंचसर्वनामार्थंसंप्राप्यतदभिधानंपर्यवस्येत् तन्नमनोमयपदंयदिपर्यवसिताभिधानंतदा-
तदभिधानपर्यवसानायालंतदेवतुनमनोविकारोवा मनःप्रचुरंवाकिमर्थंतदध्यापिनविज्ञायतइति॥ तत्रसा
क्षादित्यस्यसमुदायशक्त्यादिनेत्यर्थः ननुजीवान्यब्रह्मोपस्थितिद्वाराजीवस्यसाक्षात्मनोमयत्वादयोब्रह्म
णस्तद्वारातत्रब्रह्मणस्यप्रथमंबुध्धिस्थत्वादिति पूर्वंलिखितवाचस्पतिग्रंथानुरोधात्॥ आकाशस्तल्लिंगादित्य
धिकरणेअतएवप्राणइत्यधिकरणेचाकाशइतिहोवाचप्राणइतिहोवाचेतिनिर्णयतात्पर्यकवाक्यगताका
शप्राणश्रुतिभ्यामेवपूर्वपक्षापादितब्रह्मविषयकलिंगानामन्यविषयकश्रुत्याभिभूतत्वेपिनिरुक्तसंभाव्यमानत्वात्स्वजी
वलिंगानभिभूतत्वादस्पष्टब्रह्मलिंगत्वंसुगमं॥ एवंज्योतिश्चरणाभिधानादित्यधिकरणे प्राणस्तथानुगमादित्यधिकरणेच
अथयदतःपरोदिवोज्योतिर्दीप्यते सहोवाचप्राणोस्मिप्रज्ञात्मातंमामायुरमृतमित्युपास्वेति विषयवाक्ययोःश्रु

स्याब्रह्मलिंगस्योपक्रमस्थब्रह्मश्रुत्यादिसमभिव्याहृतत्वेपिनतादृशब्रह्मलिंगसमभिव्याहृतत्वमिति ॥ एवंतृती
यपादेद्युभ्वाद्यायतनंस्वशब्दादित्यधिकरणेपियस्मिन्द्यौःपृथिवीचांतरिक्षमोतंसहप्राणैश्चसर्वैरितिनिर्णय
विषयवाक्येयच्छब्दबलादनुवादप्रतीतौतस्यपुरोवादापेक्षायांश्रुतिसिद्धब्रह्मानुमानसिद्धप्रधानयोरन्यतर
स्यपुरोवादत्वेवक्तव्येश्रुत्यर्थस्यशक्तिग्रहार्थप्रत्यक्षानुमानापेक्षत्वेनविलंबितोपस्थितिकतयाअनुमानसिद्ध
प्रधानस्यैवपुरोवादत्वसिद्धौयच्छब्दावगतानुमानगम्यत्वरूपेणाब्रह्मलिंगेनचरमश्रुतपारवत्वरूपाब्रह्मलिं
गोपोद्बलितेनपूर्वपक्षोत्थितेस्तस्यचप्रथमश्रुतब्रह्मलिंगसमभिव्याहारोनास्त्येवेतिसंभाव्यमानस्तारस्यत्वम
क्षतंतेनब्रह्मलिंगस्यामृतसेतुत्वसार्वज्ञ्यादेरभिभूततयातस्यासपष्टत्वंस्पष्टंसर्वज्ञत्वादेरुपक्रमगतत्वेपिकृत्स्न
चिंतयैतदधिकरणप्रवृत्त्यानदोषः ॥ तथाचोक्तंभाष्येतस्मात्परमेवब्रह्मद्युभ्वाद्यायतनंतदेतद इत्यत्वादिगु
णकोधर्मैर्भिरित्यनेनैवसिद्धांतस्यैवहिभूतयोनिवाक्यस्यमध्यइदंपठितंयस्मिन्द्यौःपृथिवीचांतरिक्षमिति-
प्रपंचार्थंपुन रुपन्यस्तमिति ॥ भूमासंप्रसादादध्युपदेशादित्यधिकरणेपिनामाद्याशांतेषुभूयःप्रश्नप्रतिवचन
परंपरयाभूयसःप्रतिपादनवत्प्राणात्तथाभूयसःअप्रतिपादनरूपस्याब्रह्मलिंगस्यप्राणेभूमतागमकस्यप्रा-
णश्रुतिप्रकरणाद्युपबृंहितस्यनोपक्रमगतब्रह्मलिंगसमभिव्याहारः ॥ नचोपक्रमश्रुतंतरतिशोकमात्मविदि
तिशोकतरणहेतुज्ञानविषयत्वंब्रह्मलिंगमस्तीतिशंक्यं ॥ महाप्रकरणंब्रह्मणएवप्राणस्यत्ववांतरप्रकरण

मिति पूर्वपक्षेउपक्रमस्यानिर्णेयतात्पर्यकत्वाभावात् ॥ अक्षरमंबरांतधृतेरित्यधिकरणेपि सहोवाचैतद्वै तद
क्षरं गार्गि ब्राह्मणा अभिवदंत्यस्थूलमनण्वित्यादिनिर्णेयविषयवाक्ये सहोवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्-
पृथिव्याः यदंतरा द्यावापृथिवी यद्भूतं च भव्यच्चेत्याचक्षते कस्मिंस्तदोतं च प्रोतं चेति गार्गिप्रश्नस्य पूर्वपक्षे प्रत्यग्वि-
षयतया तदाधारत्वेन वर्ण्यमानस्याक्षरस्य ततोऽन्यतायामेव स्वारस्यात् परब्रह्मासत्वरूपाब्रह्मलिंगस्याक्षरत्रा
द्धरूढ्युपोद्बलितस्य न तद्वाक्योपक्रमगतब्रह्मलिंगसमभिव्याहारः ईक्षतिकर्मव्यपदेशात्स इत्यधिकरणेपि परि
च्छिन्नफलकोपासनाविषयत्वं तत्प्रकरणस्थेन परापरब्रह्मविदोः नियतपरापरब्रह्मप्राप्तिरूपफलप्रतिपाद
कवाक्योपोद्बलितमब्रह्मलिंगं एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारस्तस्माद्विद्वानेतेनैवायतनेनैकतर
मन्वेतीति प्रकृत्य श्रुतेः पुनरेतं त्रिमात्रेणोमित्यनेनैवाक्षरेण परं पुरुषमभिध्यायीतेति तदीयविषयवाक्ये तद्वा
क्योपक्रमगतब्रह्मलिंगासमभिव्याहृतमिति ॥ दहर उत्तरेभ्य इत्यधिकरणेपि जीवपूर्वपक्षे ब्रह्मपुरशब्दावगत
शरीरसाध्यभोगवत्त्वरूपाब्रह्मलिंगं अथ यदिदं ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोऽस्मिन्नंतराकाशस्तस्मिन् यदंतस्त
दन्वेष्टव्यमिति निर्णेयवाक्योपक्रमगतब्रह्मलिंगासमभिव्याहृतमेव ॥ अनुकृतेस्तस्य चेत्यधिकरणेपि न तत्र सूर्यो
भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोऽयमग्निः तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति तदीय-
विषयवाक्यगतं सजातीयतेजोभिभावकत्वरूपं तेजोलिंगं न निर्णेयवाक्योपक्रमगतब्रह्मलिंगसमभिव्याहृतं

[illegible] ध्य आत्मनि तिष्ठति अंगुष्ठमात्रः पुरुषो ज्योतिरिवा व धूमकः
[illegible] न ताद्दशवाक्योपक्रमगतब्रह्मलिंगसमभिव्याहृतं कंपन
[illegible] ति निःसृतं महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवंती
[illegible] अंगमध्ये ताद्दशमेव ज्योतिर्दर्शनादित्यधिकरणेपि एष संप्र
[illegible] न रूपेणाभिनिष्पद्यत इति तदीयविषयवाक्ये आदित्य पु
[illegible] ति बोधक समुत्थान श्रुति ज्योतिः श्रुत्योपोद्बलितस्य नताद्द
[illegible] आदित्यधिकरणेपि आकाशो ह वै नाम नामरूपयोर्निर्वहिते
[illegible] रूपा ब्रह्मलिंगस्याकाशश्रुत्युपोद्बलितस्यापि बलताद्दश
[illegible] पे यो यं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुष इत्यादि वा-
[illegible] य तात्पर्यकवाक्योपक्रमगतब्रह्मलिंगसमभिव्याहृतमिति-
[illegible] रूपत्वादस्पष्टत्वेन न तेषामाद्यपादीयोपाधेरतिप्रसंगः द्विती
यतृतीयपादेपांज्योरप्रसंगो वा ॥ अस्य [illegible] लिंगक मन्यपपर्ययोरपि द्वितीयतृतीयपादयोः प्रायः सविशेष वा-
क्यानां द्वितीये पादे प्रायः निर्विशेषवाक्यानां तृतीये पादे समन्वयं इत्यवांतरभेदः इति पूर्वोक्तौ द्वितीयपादे मनोम

योत्तापायपितात्रिपुरुषौं तर्यामी वैश्वानर इत्येषां सविशेषत्वेपि अक्षरं निर्विशेषं ॥ एवं तृतीयपादे द्युभ्वाद्यायत
नभूमाक्षरेक्षतिकर्मादीनां निर्विशेषत्वेपि दहरः सविशेष इति उभयत्रापि भाव इत्युक्तं ॥ यत्तु चंद्रिकायां यस्माद्धि
तीये सविशेषं तृतीये निर्विशेषमिति निरुक्तपादोपाधिभेदमनूद्य तदपि न हि द्वितीयेपि सर्वत्रेत्यत्र सर्वं खल्विदं ब्र
ह्मेति अविद्यादिसर्वज्ञाधिष्ठानत्वरूपसार्वात्म्यादेः अत्तेत्यत्र अन्यभूताञ्च व्याप्य महतो महीयानिति काश्य
पानीत्यादेः अन्तरित्यत्र कं ब्रह्म खं ब्रह्मेति पूर्णसुखत्वादेः अन्तर्यामीत्यत्र एष त आत्मेति जीवतादात्म्यादेः अदृश्य
त्वादीत्यादौ यत्तदद्रेश्यमित्यदृश्यत्वादेः सविशेषत्वानुपपत्तेः तृतीयेपि द्युभ्वादीत्यत्र तमेवैकं जानथ यदा पश्यः पश्य
ते रुक्मवर्णमिति दृश्यत्वादेः रूपित्वादेश्च भूमेत्यत्र एवं पश्यन्निति सप्रकारकज्ञानविषयत्वादेः अक्षरमित्यत्राह
र्द्रष्टृश्रुतं श्रोत्रिमिति द्रष्टृत्वादेः ईक्षतिकर्मेत्यत्र पुरुषमीक्षत इति दृश्यत्वादेः दहर इत्यादौ सत्यकामः सत्यसंकल्प
इति कामादेः निर्विशेषेचानुपपत्तेश्चेति दूषणमुक्तं तदविचाररमणीयं ॥ यतो स्वार्थविशेषणतया विवक्षितवि
शेषसमर्पकवाक्यत्वमेव सविशेषवाक्यत्वं स्वार्थविशेषणतया अविवक्षितविशेषसमर्पकनिर्णयतात्पर्यक
वाक्यत्वं निर्विशेषवाक्यत्वमिह विवक्षितं अयं विशेषः वाक्यार्थविशेषणतया विवक्षितः अयं नेति तात्पर्यग्रा
ह्यगतबोधकतारूपशक्तिपर्यालोचनयावगम्यते तादृशशक्तिनिर्णयस्तु श्रुतिलिंगादिभिरुपक्रमादिभिश्चे-
त्यन्यत्र विस्तरेणोक्तं ॥ तथा च नोक्तानुपपत्तिः तथाहि सर्वत्र प्रसिद्धोपदेशादित्यत्र सक्रतुं कुर्वीत मनोमयः प्राण

धिदैवादिषु तद्धर्मव्यपदेशादित्यत्रापि अंतर्यामिब्राह्मणवाक्यस्यापि नियंतृत्वपृथिवीशरीरकत्वादिनोपास्यब्रह्म
परतायाअकरदोस्य उक्तत्वात् तद्विशेषणतया सर्वनियंतृत्वपृथिव्यादिशरीरकत्वादेर्विवक्षितत्वात् सविशे
षवाक्यत्वं सुगमं तद्यैव आत्मेत्यादेः शास्त्रदृष्ट्या मम आत्मा भद्रसेन इति वदुपकारकत्वादिनोपपत्तेः॥ एवमदृ
श्यत्वादिगुणको धर्मोक्तेरित्यत्र यत्तदद्रेश्यमित्यादेर्निर्विशेषाक्षरपरत्वात् निर्विशेषवाक्यत्वमेवेति सविशेषे अदृ-
श्यत्वादेरनुपपत्तेरिति चंद्रिकोक्तदूषणानवकाशः प्रतिपादितं चैतन्मायः पदव्यावृत्तिकथनावसरे॥ एवं तृतीयेपि
द्युभ्वाद्यायतनं स्वशब्दादित्यत्र यस्मिन् द्यौः पृथिवी चांतरिक्षमोतं सह प्राणैश्च सर्वैः तमेवैकं जानथ आत्मानमन्या वाचो
विमुंचथेति विषयवाक्ये यस्मिन्नित्यादि तमेवैकं जानथात्मानमित्यंत निर्णयतात्पर्यके वाक्ये ज्ञानकर्मतयान्वयिन्या
स्वरूपे वाक्यार्थे यस्मिन् द्यौरित्यादि सह प्राणैश्च सर्वैरित्यंत प्रतिपाद्यस्य द्युभ्वाद्यायतनत्वस्य नविशेषणतया अ
पितूपलक्षणतया परिचायकतामात्रमेव॥ अतएव तमेवैकं जानथेति सावधारणश्रुतिः॥ तथाचोक्तं द्युभ्वादीत्य
धिकरणभाष्ये तमेवैकं जानथात्मानमिति प्रतीकमादाय एतदुक्तं भवति न कार्यप्रपंचविशिष्ट आत्मा विज्ञेयः किंत
र्ह्यविद्याकृतं कार्यप्रपंचं विद्यया प्रविलापयन्त तमेवैकमायतनभूतमात्मानं जानथैकरसमिति॥ यथा यस्मिन्ना
स्ते देवदत्तस्तदानयेत्युक्ते आसनमेवानयति न देवदत्तं तद्वदायतनभूतस्यैवैकरसस्यात्मनो विज्ञेयत्वमुपदिश्य
त इति तादृशवाक्यस्य निर्विशेषवाक्यत्वमक्षतमेव जानथेति ज्ञानविषयत्वस्य तत्र श्रवणेपि अविद्याकल्पित

स्यैकरसात्माकारवृत्तिविषयत्वस्यानभ्युपगमात् तस्य च वास्तवनिर्विशेषत्वानुपपत्तिरोधात् कश्चि[illegible]

वृत्तिरूपज्ञानस्य च शुद्धायांश्च ह्रोनास्तीति ग्राहकत्वकतकरेणुवच्च स्वपरनिषेधकत्वाभ्युपगमात् निर्वि[illegible]

र्विशेषेऽनुपपत्तिः ॥ एतेन भूमाधिकरणे एवं पश्यन् इति सप्रकारकज्ञानविषयत्वादेः अक्षरमित्यत्राऽ[illegible]

ईक्षतिकर्मत्वश्च पुरुषमीक्षत इति दृश्यत्वादेर्निर्विशेषेऽनुपपत्तिः चन्द्रिकोक्ता निरस्ता ॥ एवमित्यत्र एवम[illegible]

ते पश्यन्तीति धर्मस्योपलक्षणतया ज्ञानविषयत्वादेश्च निरुक्तरीत्या निर्विशेषेऽप्युपपत्तेः ज्ञेयास्वरूप[illegible]

[illegible]

[illegible] त्यर्थोपदेश[illegible]

[illegible] भेदसांक-

[illegible] ॥ [illegible] धनेकनाम

सम्बन्धार्थः ॥ तथा लिंगसम्बन्ध [illegible] नेकलिंगसम्बन्धार्थः इति टीका

त्मभेदव्यपदेशादित्युक्तं तदसत् टीकायां पक्षस्य तद्धन्यस्मादेव पादोपाधिसांकर्यनिराकरणात्॥ आनंदतीर्थीयरीत्यापा

दोपाधिभेदवर्णनं यथा न संगच्छते किंतु तथाग्रे सविस्तरं प्रतिपादयिष्यामः॥ चतुर्थपादे त्रिपाद्युक्तसमन्वयहेतुग

तिसामान्यसमर्थनद्वारोक्तसमन्वयस्यैव प्रतिपादनमित्युक्तं॥ तदित्थं श्रुत्युक्तं जगत्कारणत्वं ब्रह्मलक्षणं प्रधा

न एव योजयितुं शक्यं न ब्रह्मणीति लक्षणसंभवशंकायामीक्षत्यधिकरणेन प्रधाने श्रुतितात्पर्यं निरस्य तदुपो

द्बलनाय च सर्वासां श्रुतीनां ब्रह्मण्येव गतिसामान्यं प्रतिज्ञायानंदमयोऽभ्यासादित्यारभ्य पत्यादिशब्देभ्य इत्यंतसू

त्रैः त्रिपाद्यां तत्तच्छ्रुतिपर्यालोचनया गतिसामान्यमेव शंकाविशेषनिराकरणेन प्रतिपादितं॥ चतुर्थपादे तल्लक्ष

णस्य प्रधानादावतिव्याप्त्या गतिसामान्यमाक्षिप्य निराक्रियते॥ तत्प्रकारश्च भाष्यतदीयटीकादौ प्रपंचितः॥ यत्तु चं

द्रिकायामुक्तं परैः प्रधानाद्येव कारणतया सर्ववेदांतार्थ इति लक्षणासंभवशंकायास्त्रिपाद्यां निरासः चतुर्थपा

दे तु प्रधानमपि कारणतया वेदांतैकदेशार्थ इत्यतिव्याप्तिशंकाया निरास इत्युक्तार्थमनूद्य तन्न आनुमानिकमित्या

दौ पूर्वपक्षिणा पदस्य महतः परमव्यक्तं अजामेकामित्यादेः प्रधानपरत्वं शंकितं तत्स्यैकदेशस्यासिद्धांतेपि अविद्या

दिपरत्वेन ब्रह्मपरत्वाभावात् अविद्यापरत्वे च ब्रह्मलक्षणस्य प्रधाने नातिव्याप्तावप्यविद्यायामतिव्याप्त्यपरिहारा

त् तस्मात् परमते पादोपाधिभेदो न युक्तः नापि तत्क्रमः सुबोधस्य प्राथम्ये आनंदमयादौ निर्विशेषविचारायोगात्

दुर्बोधस्य प्राथम्ये तु स्पष्टब्रह्मलिंगानां प्राथम्यायोगात् निर्विशेषस्य तृतीये निरूपणायोगाच्च ईक्षत्यधिकरणोक्ता

शाब्दत्वस्यापि क्षिप्य चतुर्थपादे व्युत्पादने हेत्वभावाच्चेति दूषणमुक्तं तदसत् ॥ महतः परमव्यक्तमित्यत्र शास्यास्मन्म
तेनिर्विकारस्वरूपस्य परमात्मनो जगत्कर्तृत्वे सति जगदुपादानत्वरूपाभिन्ननिमित्तोपादानत्वनिर्वाहककामायिक
दादिरूपोपाधिकानृतविकारनिर्वाहायापरयेश्च मायाऽनिर्वचनीयेश्वरापन्नकल्पितजगत्प्रागवस्थाश्रयाविद्यामा
यः शक्त्यादिशब्दवाच्यार्थपरत्वेन ॥ सांख्यमतसिध्यस्य तंत्रप्रधानपरत्वाभावात् ॥ संकल्पपूर्वककामयि
तृत्वः नियतकर्तृत्वघटितलक्षणस्य तादृशार्थेति व्याप्तिप्रसक्त्यभावात् ॥ प्रथमपादे जन्माद्यस्य यत इत्याका
शादेः समस्तस्य जगतो जन्मादिकारणं ब्रह्मेत्युक्तं तस्य समस्तजगत्कारणस्य ब्रह्मणो व्यापित्वं नित्यत्वं सर्वज्ञत्वं
सर्वशक्तित्वं सर्वात्मत्वमित्येवमादिजातीयका धर्मा उक्ता एवेति भाष्यं तत्रोक्ता एवेत्यस्योक्ता इवेत्यर्थः तथा च कंठत
अनुक्ता अपि अधिकरणसिद्धांतन्यायेनोपक्षिप्ता एवेति फलितोऽर्थः यत्सिद्धावन्यसिद्धिः सोऽधिकरणसिद्धांत
न्यायः जगत्कर्तृत्वसिद्धौ सार्वज्ञ्यादिसिद्धिः तार्किकाणामपि संमतैव ॥ तथा च प्रथमपादप्रतिपाद्यैः जगत्कारण
त्वसर्वज्ञत्वादिभिर्द्वितीयतृतीयपादयोस्तेषां सिद्धवदुपन्यासेन सिद्धांतकरणात् द्वितीयतृतीयपादार्थयोः प्र
थमपादस्योपजीव्यतया तयोश्च पूर्वापरीभावः संगतिश्च उपजीव्यस्य प्राथम्यमुपजीवकस्यानंतर्यं च तंत्रांतरेषु
प्रसिद्धमेवेत्यस्मन्मतानुयायिभाष्यतदीयटीकाकारादिसंमतं सर्वज्ञत्वादिधर्मैः प्रथमपादप्रतिपाद्यैः वाक्या
नां ब्रह्मपरत्वनिर्णयस्य द्वितीयतृतीयपादार्थत्वे आकाशाद्यधिकरणस्य तत्रैव कर्तव्यत्वेऽपि तन्निर्णयवाक्यानां

[illegible] दिनारद्

[illegible] ॥ अन्यथाकारणत्वे सिद्धे [illegible] प्रधानस्याशब्दत्व

[illegible] प्रधानस्याशब्दत्वं [illegible] निराका-

[illegible] ब्रह्मणएवोपादानत्वेनाभिधेयत्वस्थापने

न प्रधानस्याशब्दत्वं [illegible] इत्यपि करणे [illegible] ऽशब्दत्वस्थेरत्वादिदूषणानवकाश इति दिक् ॥ उक्ते

ब्रह्मणि प्रमाणांतरविरोधपरिहारः [illegible] उपनिषदर्थस्य ब्रह्मणः प्रमाणांतरायोग्यतया दोष

[illegible] परिहारार्थं विचारो नापेक्षितः तथापि तत्वंपदार्थशोधकवाक्यैः प्रपंच [illegible] नानिपादनपूर्वकं पदा

र्थः शोध्यते तत्र च प्रपंचसत्यत्वाभिप्रायकसांख्यस्मृतिविरोधः प्रत्यक्षादिप्रमाणांतरविरोधश्च प्रसज्यते तत्प

रिहाराय [illegible] तृतीयचतुर्थौ [illegible] श्रीमद्भाष्यादौ

स्पष्टः ॥ आनंदतीर्थीयास्तु [illegible] लिंगरूपः समन्वयः ननु समन्वयादि

[illegible] स्थापितं समन्वयाध्यायस्य विरोधाद्

[illegible] पूर्वपक्षोत्तरपक्षयोः [illegible] अन्यथा [illegible] समन्वयादिरे

व सिध्यत् [illegible] कारणत्वेन शास्त्रगम्यत्वं प्रसाधयेयुः ॥ अतः समन्वयविभागेन न तस्य पंच-

नार्थमानंदमयोऽभ्यासादित्यारभ्याध्यायशेषआरभ्यंतइति पंचाधिकरणानंतरमध्यायशेषम [illegible]
तरेणपादोपाधिभेदनाहुः ॥ तथाह्यानंदमयाधिकरणेतत्त्वप्रकाशिकायांअथब्रह्मस्वरूपनि [illegible]
क्रिमध्यायशेषेणेत्यत्र तत्कृत्यमाहेत्यनेनतमेवेति भाष्यमवतार्य कृत्यंतरामावेपितत्तु [illegible]
मेवोपक्रमाद्यन्वयात्संस्थकृनिरूपणंशास्त्रीयशाह्वानांप्रतिवाक्यग्रहणेनप्रकटयत्यनेना [illegible]
अन्यथाप्रतिज्ञामात्रस्यासाधकत्वेनान्यदेवसमन्वयादित्यपिवक्तुंवाक्यत्वादिति ॥ तथावै [illegible]
त्चतुर्विधाः अन्यत्रैवप्रसिद्धाः उभयत्रप्रसिद्धाः अन्यत्रप्रसिद्धाः तत्रप्रसिद्धाइतिसर्वे [illegible]
तयाप्रत्येकंद्विविधाः तत्रनामात्मकानामन्यत्रप्रसिद्धानांशाह्वानांप्रथमेपादेसमन्वयः लिंग [illegible]
प्रसिद्धानांशाह्वानांद्वितीयपादेसमन्वयः उभयत्रप्रसिद्धानांशाह्वानांतृतीयपादेसमन्वयः [illegible]
नांशाह्वानांचतुर्थपादेसमन्वयः ॥ उक्तेषुनामलिंगात्मकेषुद्विविधेष्वपिशाह्वेषुनतत्रप्रसिद्धान [illegible]
मेषांतत्रैवप्रसिद्धत्वात्तेष्वन्यत्रैवप्रसिद्धस्यप्रथमंमुख्यनारोहात्चतुर्थेतदुक्तिः ॥ उभयत्र [illegible]
प्रसिद्धिनिराकरणमात्रस्यान्यत्रप्रसिद्धानांतत्प्रसिद्धिनिराकरणपूर्वकंभगवत्परत्वस्य [illegible]
त्वेनप्राथम्यायोगात्तृतीयेतदुक्तिः ॥ अन्यपराणांमध्येपिलिंगात्मकानांधर्मवाचकत्वात्ना [illegible]
मिभ्योऽमुख्यत्वेनाप्राधान्यात्तेषांद्वितीयेसमन्वयोक्तिः ॥ ततोलोकतोऽन्यत्रप्रसिद्धानां [illegible]

...दृश्यते ॥ ...

... ॥ किं च ... आनंदमय ... श्रुति ...

नंदमयाधिकरणप्रारंभप्रयोजनाभावप्रसंगः तन्न तदधिकरणेषु क्वचित्तदधिकरणविषयश्रुतिवाक्येषु विष्णुनाम

निर्दिष्टत्वेन याप्यसिद्धत्वविद्युत्त्वादिना सिद्ध्याभावः ... तेन या ... आनंदमयो ... अधिकरणे

... कर्तृत्वादिना प्रतिपादितो न भयादिना ... विष्णुरेवेति साध्ये ब्रह्म ... पुच्छस्य ब्रह्मणः

... तदपि तस्यापि श्रौत देवब्रह्मपरत्वं कथं नाम विष्णुत्वोपदर्शिनाविद्युत्त्वादेः ...

सैव निर्णयहेतु ... इति तत्त्वप्रदीपोक्तं ॥ तथाहि तत्र आनंदमयाधिकरणे विष्णुरेवानंदमयः ... ब्रह्म ... स्वन देवब्रह्मत्वादि श्रुति

स्मृतिप्रविषये कनिष्ठतो ... इति ॥ आपस्तत्तदधिकरणेषु तत्तदधिकरणविषयश्रुतिवाक्येषु साधारणेन ब्रह्मलिं

गादिना विष्णुपरत्वनिर्णयः पूर्वपक्षाभिमततत्तद्देवताविषयश्रुतौ नाविद्युत्त्वा महायोगेन ...

दर्शन्यादिना विरोधो सावकाश ... परममुख्य ... सार्थ ... महायोगे ...

स्यमुपपाद्य निराकरणं च ॥ तथा क्वचिदधिकरणे तद्विषयश्रुतिवाक्ये साधारणेनैव ब्रह्मलिंगादिना विष्णुपर

त्वनिर्णयः देवतान्तरविषयश्रुतिलिंगादेरन्यथाभिविषयत्वया सावकाशत्वेन निराकरणं च कृतं दृश्यते ॥ तथाहि तत्र

ध्यर्मोपदेशादित्यधिकरणे अंतः प्रविष्टं कर्तारमेतमंतश्चंद्रमसि मनसा चरंतं सहैव संतं न विजानंति देवा इत्यस्मिन्वि
षयवाक्ये अंतः प्रविष्टशब्दस्य विष्णुपरत्वे अंतः समुद्रे मनसा चरंतं ब्रह्मान्वविंददशहोतारमर्णवस्यांडकोशांव्युप
माहुरिति समुद्रशायित्वब्रह्मांडवीर्यत्वरूपं लिंगमभिधाय यद्येवं समुद्रस्थायित्वलिंगादंतस्थो विष्णुस्तर्हि
तेनांतस्थेन विष्णुना इंद्रादीनामभेदोऽस्तु विपाक्षितत्त्वसापि कायाइंद्रो राजा जगतो य ईशे स सप्तयुंजंति रथमे
कचक्रमिति पूर्वपक्षोक्तश्रुतेः सद्भावात् ॥ न च श्रुत्यादिना लिंगबाधेनान्यतरनिर्णयः लिंगस्य निरवकाशत्वात्तन्ना
पि लिंगेन श्रुतिबाधस्तस्याबलवत्त्वात् एवं च पक्षद्वये अन्योन्यं बाध्यबाधकभावशून्ये तदन्यथानुपपत्त्या अंतस्थे
न विष्णुना इंद्रादीनामभेदः प्राप्त इत्याशंक्याभेदव्यपदेशाच्चेति सूत्रमवतार्यैंद्राद्यंतर्यामिपरतया तदभेदव्यपदे
शो नांतस्थेनाभेदासंभवमुक्त्वा लिंगेन श्रुतिबाधं चोक्तं कंतत्त्वप्रकाशिकायां शंकासमाधानाभ्यां न चेंद्रादिषु योग
रूढिभ्यां प्रवृत्तत्वात् शब्दानां द्वयमुख्यतेति वाच्यं ॥ परमैश्वर्यादेर्भगवति निरवधिकत्वेन महायोगसंभवात्
अज्ञरूढितोऽपि विद्वद्रूढेरेव बलवत्त्वात् अन्यगतप्रवृत्तिनिमित्तस्यापि भगवदधीनत्वेन च तत्रैव मुख्यत्वोपप
त्तेश्चेति ॥ एवमाकाशस्तल्लिंगादित्यधिकरणे अस्य लोकस्य का गतिरित्याकाश इति होवाचेति वाक्यस्य स एष परो
वरीयानुद्गीथः स एषोऽनंतः इति वाक्यशेषश्रुतपरोवरीयस्त्वानंतत्वादिसाधारणलिंगेनैव निरवकाशत्वात्प्रब
लेन विष्णुपरत्वनिर्णयः आकाशश्रुतेर्विद्वद्रूढिमहायोगप्रवृत्तिनिमित्ततादधीन्यैर्विष्णुपरत्वसंभवेन सावका

ञातयातन्निराकरणंच ॥ तथाहि तत्त्वप्रकाशिकायां अत्सुलिंगेन श्रुतेर्बाधस्तथापि विष्णौ श्रुतिरमुख्यैवान्यत्र
रूढत्वान्नहि विष्णौ यौगिकत्वात् तद्वति चेन्नाकाशस्य भगवदधीनत्वेन तत्रैव मुख्यत्वात् महायोगविरुद्धत्वयोर्माम
श्चेति ॥ एवमत एव प्राणाद्यधिकरणेत द्वैतं शैकोमयः महान् भोगः प्रजापते र्भुजः करिष्य प्राणः यद्धयान् आयश्यौ
नवेति प्राश्येप्राणशब्दस्यश्रीश्यतेत्वद्वीश्यपञ्चायहोरामे पार्श्वे इति तद्वत् पादुवाक श्रुतेन साधारणेनैवश्रीलस्यी
पतित्वलिंगेनविष्णुपरत्वनिर्णयः प्राणश्रुतेर्विरुद्धत्वरूढ्यादिनाविष्णुपरत्वसंभवेन सावकाशा तथादुर्बलत्वेनत
न्निराकरणं ॥ तथाच तत्त्वप्रकाशिकायां कथं श्रुत्या पूर्वपक्षिते लिंगबलनिर्णयः इति चेत् लिंगस्यानिरवकाशत्वा
त् प्राणश्रुतेर्विष्णावपि सावकाशत्वान्निरवकाशेन सावकाशस्य बाधोपपत्तेः रूढियोगयोरभावात् ॥ कथं विष्णौ
प्राणश्रुतेरवकाश इति चेन्न ॥ ईशानः प्राणदः प्राण इति विरुद्धे महायोगस्य च सत्त्वादिति ॥ एवं ज्योतिश्चरणा
भिधानादित्यधिकरणेऽपि भेकर्णाप तत्परतोविचक्षुर्विशेषैर्लिरुद्दयमाहितं यत् ॥ विषेभनश्च रति दूरआर्यः कं
स्वितत्वस्यामि किमु नू मनिष्य इति वाक्ये ज्योतिः शब्दस्य साधारणेनैव कर्णादिविरुद्धचरणेन कर्णादिवि दूरत्व
रूपेण कर्णाद्यपरिच्छेद्यत्वरूपेण वा लिंगेन विष्णुपरत्वनिर्णयः ज्योतिःश्रुतेर्विरुद्धत्वादिनाविष्णुपरत्वसंभवे
न सावकाशात्तथा दुर्बलत्वेन निराकरणं ॥ तथाच तत्त्वप्रकाशिकायां नच श्रुतिविरोधः श्रुतेर्विष्णावपि सावकाशत्वा
त् महायोगविरुद्धरूढिसद्भावेन मुख्यत्वाच्च निरवकाशलिंगेन सावकाशश्रुतेर्बाधोपपत्तेरिति ॥ एवं छंदोभिधा

नान्नेति चेन्न तथा चेतोर्पणनिगमादित्यधिकरणे गायत्री वा इदं सर्वं भूतमिति वाक्ये गायत्रीशब्दस्य साधारणे
नैव गानत्राणकर्तृत्वेन लिंगेन विष्णुपरत्वनिर्णयः गायत्रीश्रुतेः पूर्वपदे पादोऽस्य इत्यादिना विष्णौ सावकाशतया
निराकरणं च ॥ तथाहि तत्त्वप्रकाशिकायां ननु गायत्रीश्रुतेरन्यत्र रूढत्वात् कथं लिंगमात्रेण विष्णुपरत्वनिर्णय
इत्याशंक्य यास्सर्वच्छंदोभिधेयाश्रयः सर्वदेवाभिधोऽसौ सर्वलोकाभिधोऽस्यैष तस्ते पातं तदुपचारत इति वामन इति भा-
ष्यमवतार्योक्तं गायत्रीश्रुतेः पौराणिकरूढ्या श्रुत्युक्तयोगेन गायत्र्या भगवदर्थत्वेन च विष्णावेव मुख्यतया वृत्त्या
सावकाशत्वात् लिंगस्य च मुख्यया वृत्त्या अन्यत्रानवकाशत्वात् सावकाशश्रुतेर्लिंगेन बाधोपपत्ते युक्तो लिंगमात्रे
णार्थनिर्णय इति ॥ एवं प्राणस्तथानुगमादित्यधिकरणेऽपि ता वा एताः शीर्षञ्छ्रियः श्रिताः चक्षुः श्रोत्रं मनो वाक् प्राण इति
वाक्ये प्राणशब्दस्य तं देवाः प्राणयन्त स एषोऽसुः स एष भूतिश्चाभूतिश्च तं भूतिरिति देवा उपासांचक्रिरे इत्यादि वाक्य
श्रुतदेवोपास्यत्वादिना साधारणेनैव लिंगेन विष्णुपरत्वनिर्णयः तत्र यन्मुख्यप्राणलिंगं तात्र्य अहं हि सत्यं अहमुक्थ
महमुक्थमस्मीति प्राण उदक्रामदित्यादि श्रुतमिन्द्रियैः सह कलह उत्क्रमणप्रवेशा इत्यादि त्वामेव विजानीयामि
त्यादि दृष्टं यं तं विश्वामित्रं प्रति प्राणो वा अहमस्मीति वचनं जीवलिंगं च ॥ तत्सर्वमंतर्यामिविषयतया सावका-
शत्वेन दुर्बलमिति तन्निराकरणं ॥ तथा च तत्त्वप्रकाशिकायां विष्णुरेवायं प्राणो न जीवादि लिंगानां तदंतर्यामि
भगवद्विषयतयोपपत्तेरिति ॥ एवं द्वितीयपादीयाद्यधिकरणेऽपि तत्तद्विषयवाक्यानां साधारणब्रह्मलिंगः

[illegible] ... नि ... [illegible] ... कैव ... [illegible]

[illegible] ... रत्यसाम्योक्तौ हेतुः ... [illegible] ... श्रुतिदुपर्वतोपि ... [illegible]

नैरश्रुत्वाद्विष्णुपराणामनन्तराणां रुद्रस्यापि विष्णुपरत्वनिर्णयः कृतो द्रष्टव्यः ॥ यथा ... [illegible]

गुणमात्रः पुरुषो मध्य आत्मनि तिष्ठति ईशानो भूतभव्यस्य ... [illegible] ... इति मंत्रश्रुतौ ... [illegible] ... रुद्रस्यापि विष्णु

परत्वे ... [illegible] ... नमामि ... [illegible] ... उपासते इति मंत्रश्रुतावपि नास्ति र

स्तीति ॥ तत्र साधारणब्रह्मविषयश्रुतिलिङ्गानां रुद्रैकविषयत्वं अन्यविषयश्रुतौ लिङ्गानां च रुद्ररूढिमश्रुतीनां

भिन्नतात्पर्यात्मादिश्रिविष्णावेव वाचकशब्दाभिरस्येतत्पावनत्वाद्रुद्रस्यापि शुद्धस्य पूर्णेन त्वं ... पायन्न

मीमांस्यते तावत्पर्यालोचिते त्वीरिवादिविषयत्वमपि संभवतीति शंकायास्तत्वात्तन्निराकरणायैव तदारभ्या

धिकरणस्यारब्धत्वात् ॥ तथा च सामान्यविशेषन्यायात् विस्मरणेन तस्यैव संदेहे तु करणमत्र वायुकं मीमांसासंभ

दायिकत्वं चेति द्रष्टव्यमिति स्पष्टमेव ॥ अथापि यदि केचित् रुद्रत्वेनाभ्यासदर्शितानां श्रुतिलिङ्गानां कथं साधारण्यं

तत्त्वैवोपपादनीयं यथा तु तत्तदधिकरणेषु साधारण्यस्योक्तत्वादिति चेत् सत्यमुक्तं अस्तु दुष्कं तु तदर्शिता

दिविषयकत्वेन श्रुतिलिङ्गानां शंकायुक्तत्वेन तदसाधारण्याभिरस्ये ॥ तथाहि यदुक्तमानन्दमयाधिकरणे तद्र

यब्रह्मपरमं कवीनामित्यादिश्रुत्युपदर्शितलिङ्गाद्ब्रह्मशब्दस्य विष्णुपरत्वमिति तत्र वक्तव्यं तदेवेति श्रुतौ

ब्रह्मशब्दस्य विष्णावेव वृत्तिरिति कुतोऽस्य व्यवस्थितिः येनाशंकायां दत्तरुद्रव्याख्यानमिति विष्णुरेव जगत्क-
र्तृपरं ब्रह्मेति निश्चयाधीनत्वात्तद्व्यवस्थितेः तस्य चाद्याप्यसिद्धेः ॥ ननु यमंतः समुद्रे कवयो वयंतीति जगत्कारणे श्रुतंस-
मुद्रांतःस्थत्वं नृपभासित्वलिंगात्तदेवेति श्रुतिस्थब्रह्मशब्दो विष्णुपर एवेति वक्तुं युक्तं ॥ प्रजापतिश्चरति गर्भे
ऽन्तरिति प्रजापतिश्चरति गर्भे इत्युपक्रम्य धाता यथापूर्वमकल्पयदित्युपसंहारादुपक्रमोपसंहारगतप्रजापतिधा-
तृश्रुतिभ्यां ॥ तथा एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः ॥ भोगिशय्यागतः शेते त्रैलोक्यग्रासबृंहितः इतिवि-
ष्णुपुराणवचनेन च प्रथमस्थतल्लिंगस्य प्रजापतिर्वै हिरण्यगर्भ इति हिरण्यगर्भः समवर्तताग्र इति जगत्कारण-
त्वेनावगतहिरण्यगर्भपदवाच्यप्रजापतिसाधारण्यशंकया तेन ब्रह्मशब्दस्य विष्णुत्वानिर्णयाच्च ॥ नारायणात्मक
इति जठरनिवासो नारायणसंज्ञां प्राप्त इत्यर्थः ॥ सर्वलोकस्य निर्माता ब्रह्मा विश्वसृजां पतिः ॥ स चाप्सु शयनाद्देव-
शिवात्मा स्वेच्छयाचरन् ॥ नारायणाख्यामभजत्तत्त्वाक्तिरूपः प्रजापतिरिति आश्वलायनस्मृतेः ॥ एतेन संज्ञाया-
अनन्यसाधारणनारायणशब्दो ब्रह्मशब्दस्य विष्णुत्वनिर्णायकः आपो नारा इति प्रोक्ता इत्यादि तेन नारायणस्मृ-
त इत्यंतश्रौतनिर्वचनस्येतरसाधारण्ये संज्ञायां विहितणत्वानुपपत्तेरिति समाहितं ॥ ब्रह्मणो नारायणसंज्ञा
या उक्तस्मृतिप्रमाणसिद्धत्वात् ॥ एवं हिरण्यगर्भादिक्रमध्ये य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा
विधेम इति एतावंतो वै पशवो द्विपादश्चतुष्पादश्चेति श्रुत्यंतरसिद्धं पशुपतित्वं शिवलिंगं अत एव श्वेताश्वतरो

[illegible] महर्षिः हिरण्यगर्भं पश्यत जायमानं स नो बुद्ध्या शुभया-
[illegible] आधिश्रिता इति मंत्रस्य पद्योऽयस्योह्युपदश्च तु पद दश्येती
[illegible] यहे सहस्राक्षस्य महादेवस्य धीमहि तन्नो रुद्रः प्रचोदयात्
[illegible] त् इत्युपसंहारात् औपसंहारिक रुद्रमहादेवश्रुत्योः ए
[illegible] औपसंहिपरात्परं महतो महान्तं यदेकमव्यक्तमनंतरूपं वि
[illegible] तिमंडलात्परस्तादथ गच्छत्येतदंडवर्तिनो हिरण्यगर्भस्य
[illegible] वतीत्युपक्रांतजगत्प्रसूतिहेतोः ज्ञानादमृतत्वं मुक्तिरपि
[illegible] वतित्यदा चर्मवदाकाशं वेष्टयिष्यंति मानवाः तदा शिवमवि-
[illegible] नेतरोऽनुपपत्तेरिति सूत्रेण चान्यज्ञानाभावोऽस्ति इतित्वं दीयम
[illegible] यंते स आत्मा विज्ञेयः इति श्रुत्यंतरे शिवस्यैव मुमुक्षुज्ञेय
[illegible] प्रजापति धातृश्रुत्यपेक्षया बलवत्त्वेन प्रजापतिश्रुतेर्म

+( ) अंभस्य पार इत्यंते

१ अस्य च पूर्वोक्तरुद्रमहादेवश्रुत्योरित्यनेनान्वयो बोध्यः

ब्रह्मतद्रूपतदंसर्यामिविषयतया पाति यस्मात् प्रजाः सर्वाः प्रजापतिरिति स्मृतः देवेषु च महादेवो मद्देवस्ततः
स्मृत इति लैंगे दर्शितयोगेश्वरशिवविषयत्वसंभवात् लिंगमूर्तिर्महाज्वालामालासंवृतमध्ये पलिंगस्य मध्ये रुचिरं
चंद्रखरविग्रहं व्योममार्गे तथा लिंगे ब्रह्माणं हंसरूपिणं विष्णुं वराहरूपेण लिंगस्याधस्तथोर्ध्वं ब्रह्माणं दक्षिणेत
स्य कृतांजलिपुटं स्थितं वामे विष्णुं महाबाहुं कृतांजलिपुटं तथा मध्ये लिंगं महाघोरं महाभैरवमासिस्थितं ध्यात्वा प्र
दोषकाले तु शिवसायुज्यमाप्नुयात् एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः भोगिशय्यागतः शेते त्रैलोक्यग्रासबृं
हितः जनस्थैर्योगिभिर्देवैश्चिंत्यमानोब्जसंभवः ततो वत्तीर्य विश्वात्मा देहमाविश्य चक्रिणः सुष्वाप योगशयनमेवं
भूयापि विष्णुना ब्रह्मा कमलवर्णाभो रुद्रः कालाग्निसन्निभः पुरुषः पुंडरीकाभो रूपं तत्परमात्मनः तत्सहेमानिकाया
मांशांतिकं ठंभित्रलोचनं प्रसादसुमुखं वीक्ष्य प्रणेमुर्जातकौतुका इत्यादित्पुराणोक्तः समुद्रांतस्थत्वालिंगस्याशि
वसाधारण्याच्च ॥ तदेव ब्रह्मेति श्रुतौ ब्रह्मशब्दस्याशिवविषयत्वप्रतीतेश्च न चास्य सूक्तस्यार्थः संभूतो हिरण्यगर्भ
इत्यस्यापि त्वुत्तरनारायणैकवाक्यत्वावगमात् तत्र ह्रीश्च ते लक्ष्मीश्च पत्न्याविति श्रुतलक्ष्मीपतित्वालिंगात् संभवः
शिवेशंक्यः ह्रीश्च ते लक्ष्मीश्च पत्न्याविति समाह्लेखावान्नो मापतित्वलिंगस्यापि प्रतीत्या लक्ष्मीपतित्वलिंगेन वि-
ष्णुमात्रपरत्वासिद्धेः लक्ष्मीशब्दस्यतत्र माहेश्वरी लक्ष्मीमूर्तिर्मूर्तिमतः शंभोरित्यारभ्य तस्यां कमध्यमा रूढा शक्ति
र्माहेश्वरी परा महालक्ष्मीरिति ख्याता श्यामा सर्वमनोहरेति वायुसंहितायां माहेश्वरीशक्तिरूपायां महालक्ष्म्यां वृत्तु

सुपर्णैः [illegible] संवादात् ॥ [illegible] एकैकमेवेति
[illegible] ॥ [illegible]
[illegible] नारायणः [illegible]
प्रयोगात् [illegible] विष्णुसाधारण्यात् [illegible] नारायणात् [illegible] नमो-
[illegible] पृच्छामि [illegible] पार्थ इत्यत्र सर्वा
शीलमहं हि नमित्युपासमहे स्वरसंवादो केवलं नारायणस्वरूप एव स्वारस्यावगमात् ॥ अथ ब्रह्मविदाप्नोति परमि
ति श्रुत्या ब्रह्मज्ञानात् परप्राप्तिरुक्ता यो वेदेः ब्रह्मज्ञानस्यैवोपनिषदं पुरुषं पृच्छामीति श्रुते रुपदिष्टं वेदैकसमा
धिगम्यत्वावगमात् उपनिषद्भागानां श्रुत्यन्तराय स्य प्रतिपादकस्य एव ब्रह्मत्वात् नहि श्रुत्यन्तरेण
स्य प्रतिपादकत्वं [illegible] अस्ति नापि वेदैकलक्षणकारणत्वादि लक्षणं शिवसाधारणं येन ब्रह्मशब्दस्य
शिवविषयत्वं शंक्यात् [illegible] विष्णुत्वनिर्णयो न स्यात् ॥ सर्वे वेदा यत्पदमामनन्ति ॥ तपांसि सर्वाणि च
यद्वदन्ति ॥ यदिच्छन्तो ब्रह्मचर्यं चरन्ति ॥ तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् [illegible] सोऽध्वनः पारमाप्नो-
ति तद्विष्णोः परमं पदमिति कठवल्लीश्रुत्या ॥ येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यामिति मांडूक्य
श्रुत्या च विष्णुपुरुषादिशब्दाभिधेयस्य नारायणस्यैवोपनिषत्प्रतिपाद्यत्वावगमात् अत एव नामानि सर्वाणि यम्

विद्वांसितं वैयेविष्णुं परममुदाहरंतीति श्रूयते ॥ एको ह वै नारायण आसीत् न ब्रह्मा नेशानो नापो नाग्नीषोमौ नेमे द्यावापृ
थिवी इत्यादि महोपनिषज्ज्ञातेन पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति नारायणात् ब्रह्मा जायते नारा
यणाद्रुद्रो जायते इत्यादि नारायणोपनिषज्ज्ञातेन नैवेह किंचनाग्र आसीत् अमूलमनाधारमिमाः प्रजाः जायंते दिव्यो
देव एको नारायण इत्यादि सुबालोपनिषज्ज्ञातेन च जगत्कारणत्वलक्षणस्यानितरसाधारण्यावगमात् तदनु
रोधात् ॥ सदेव सोम्येदमग्र आसीत् ॥ ब्रह्म वा इदमग्र आसीत् ॥ आत्मा वा इदमेक एवाग्र आसीत् ॥ इत्यादिश्रुत्यंत
र्गतकारणवाक्येषु श्रुतस्यापि कारणस्य सत्ब्रह्मात्मादिसामान्यशब्दस्य यदग्नीषोमीयं पशुमालभेतेति विधि
वाक्यपठितस्य गवाश्वादिसाधारणपशुशब्दस्य छागस्य वपाया मेदसः इति मंत्रप्रतिपन्नछागइव छागो वा मंत्र
वर्णादिति न्यायेन नारायण एव पर्यवसानाच्चेति चेदत्र वदंति ॥ अहमेकः प्रथममासमित्याथर्वशिरसि देवान् प्र
ति शिववचनेन यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासत् शिव एव केवलः ॥ तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मा
त् प्रसृता पुराणीति श्वेताश्वतरोपनिषन्मंत्रेण च शिवस्य सर्गाद्यसमये तमोमात्रावशिष्टे कारणभावेनावस्थानो
पवर्णनात् ॥ यो देवानां प्रथमं पुरस्तात् ॥ विश्वाधिको रुद्रो महर्षिः ॥ हिरण्यगर्भं पश्यत जायमानं ॥ स नो देवः शु
भया स्मृत्या संयुनक्तु ॥ इति तैत्तिरीयमंत्रेण सर्वादिभूतहिरण्यगर्भजनयितृत्वप्रतिपादकेन सर्वकारणत्वप्रत्य
यनात् ॥ अथर्वशिखायां ब्रह्मविष्णुरुद्रेंद्रास्ते सर्वे संप्रसूयंते इति ब्रह्मादीनां कार्यत्वमुक्त्वा कारणं तु ध्येयः सर्वैश्वर्य

[illegible] स्य साक्षात्कारगत्वोक्तेर्जग [illegible]
[illegible] वाक्यपर्यवसानासिद्धेः ॥ [illegible]
[illegible] नसावकाशत्वानिरवकाश [illegible]
[illegible] तद्वाक्यं पञ्चं पुरुषनारायण [illegible]
[illegible] पुरुषशब्दस्य तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो
[illegible] शब्दस्यापि हिरण्यगर्भादौ रुद्रे पुरुषोक्तावदर्शितत्वात्
[illegible] पकसद्भावादन्तर्यामिविषयत्व [illegible]
[illegible] सावकाशत्वमिति तदुक्तरीत्यैव स्मृतयश्च पुराणानि भारतादीनि
[illegible] इति पराशरोक्तेः कानिचित्वेदवाक्यानि [illegible]
[illegible] तथा वाक्यानि कानिचित् विष्णुमूर्तिं समाश्रित्य ब्रह्ममूर्तिं च
[illegible] सूर्यमूर्तिं मुनिश्रेष्ठास्तथैवान्यानि कानिचित् एवं मूर्ती
[illegible] सर्वासु मूर्तिषु इति स्कान्दवचनात् [illegible] पस्थिर
[illegible] श्रुतीनां तदन्तर्यामिविषयतया सावकाशत्वमिति-

वैकुंठाधस्त्वाभावात् शिवस्य सर्वांतर्यामित्वे प्रमाणमग्रे वक्ष्यामः ॥ एतेन विष्णोरेव ब्रह्मशब्दार्थत्वे ब्रह्म [illegible]
ष्णौ नान्यत्र क्वचिदि ष्यत इति परेषां प्रमाणोपन्यास आभास एव निरुक्तप्रमाणैर्ब्रह्मलक्षणस्य जग [illegible]
स्य शिवसाधारण्येन तस्यापि ब्रह्मत्वप्रतीतौ विष्णुशब्दस्य तदंतर्यामिविषयतया सावकाशत्वेन ब्रह्म [illegible]
ष्णुमात्रवाचितायां तद्व्याप्त्यावाक्ये रति स्फुटत्वात् शिवमद्वैतं चतुर्थं मन्यंते स आत्मा स विज्ञेयः यदा चर्मव [illegible]
यिष्यंति मानवाः तदा शिवमविज्ञाय दुःखस्यांतो भविष्यतीत्यादिश्रुतिभिः शिवज्ञानं विना मुक्तेर्गगनवे [illegible]
चितत्वोक्तेर्मुक्तिसाधनज्ञानविषयौपनिषदब्रह्मणः शिवत्वावगतो यदिच्छंतो ब्रह्मचर्यं चरंतीत्युपक्रम्य [illegible]
तद्विष्णोः परमं पदमिति श्रुतौ विष्णुशब्दस्य तदंतर्यामिविषयतया सावकाशत्वान्न तद्बलात्सर्ववेदांत [illegible]
विष्णोरेवेति निर्णेतुं शक्यं ॥ एवं आत्मानं रथिनं विद्धि शरीरं रथमेव तु बुद्धिं तु सारथिं विद्धि मनः [illegible]
इंद्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् ॥ सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमित्यत्र प [illegible]
स्थानवाची किंतु ॥ इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः ॥ मनसस्तु परा बुद्धिर्बुद्धेरात्मा म [illegible] ॥
॥ महतः परमव्यक्तमव्यक्तात्पुरुषः पर इति पूर्वमंत्रनिर्दिष्टपुरुषस्यैवात्र स्थानप्रमाणेन पदशब्द [illegible]
गमात् एवं च पद्यते प्राप्यत इति पदमिति व्युत्पत्त्या पदशब्दनिर्दिष्टः प्राप्यः पुरुषः इति स्थिते प्राप्यः पुरुषो [illegible]
ष्णोः पद मित्यनेन प्रतिपादितस्य विष्णुव्यधिकोत्कर्षस्य तत्राभावात् ॥ किंतु शिव एवेति सर्ववेदाय [illegible]

स्तुपक्रमो भिन्नविषय एव ॥ यद्वा पदशब्द एव शिववाची शिवो रुद्रो महादेवः शंकरो ब्रह्म सत्सदं एवमादीनि नामा
नि विशिष्टानि परस्यात्मेति स्कांदोक्तेः तस्मान विष्णोरिति पंचम्यंतं परमशब्दार्थोत्कर्षप्रतियोगि समर्पकं परशब्द
योगे पंचम्या एव मुख्यत्वात् एवं च नाक्षरं पुरुषं वेद सत्यं यो वा चेत्यत्रापि अक्षरपुरुषशब्दाभ्यां शिव एवोच्यते क्षरः
प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः इत्यत्राक्षरशब्दस्य शिवे दृष्टत्वात् पुरुषशब्दस्य तत्पुरुषाय विद्म
हे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयादित्यत्र शिवे प्रसिद्धत्वाच्चेति शैवोक्तरीत्या वाक्यार्थस्य वक्तुं शक्यत्वात् इमा
रुद्राय स्थिरधन्वने गिरइक्षिप्रेषु त्यादि शिवं प्रस्तुत्य सर्वाणि ह वा एतस्यैव नामधेयानीत्याश्वलायनसूत्याच्च शिव
स्यापि सर्ववेदप्रतिपाद्यत्वावगमाच्च न सर्ववेदांतशास्त्रप्रतिपाद्यो विष्णुरेव ब्रह्मशब्दार्थ इति निर्णेतुं शक्यं ॥ किं
च ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलं ॥ ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नम इति मंत्रे रुद्रेऽपि परं ब्रह्मेति ब्र
ह्मशब्दप्रयोगाद्विष्णुरेव ब्रह्मशब्दार्थो मुख्य इति न निर्णेतुं शक्यं ॥ यत्तु पूर्वार्धोक्तं विष्णवाख्यमूर्ध्वरेतं परब्रह्म प्रतिस्थितमपरं ब्रह्म
नीललोहितकृष्णपिंगलान्यतरापरपर्यायविरूपाक्षशब्देन निर्दिश्यते इत्येवं तन्मंत्रार्थो वर्णनीयोऽन्यथा कृष्णपिंग-
लं नीललोहितमित्यनयोरेकतरस्य पौनरुक्त्यापत्तेः ॥ किंच ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिरित्युत्तरवाक्ये ब्रह्माधि
पतिरित्यस्य बहुव्रीहिरूपताऽवश्यमनुसरणीया ॥ अन्यथा तत्रत्यब्रह्मशब्दस्य स्वरितांतत्वानुपपत्तेः ॥ सामासांतर
त्वे वा अनंतोदात्तत्वेनानुदात्तं पदमेकवर्ज्यमित्यस्य प्रसंगेन समासस्य स्वरितपूर्वपदांतत्वानिर्वाहः स्पष्ट इति परो

क्तं ॥ तदसत् ॥ पिंगललोहितपदयोर्विभिन्नार्थकतया पौनरुक्त्याभावात् ॥ नमः सोमाय च रुद्राय च नमस्ताम्रा
य चारुणाय चेति श्रुताविवोपपत्तेश्च ॥ ब्रह्माधिपतिरित्यनेन च पतिं शिवस्यासेश्वर॰ ब्रह्मणश्च॰ शिवमच्युतमि
त्यादाविवानन्याधिपतित्वमेवोच्यते ब्रह्मपरत्वात्तत्पूर्वत्वस्य चैवाधिपतिर्यस्येति बहुव्रीह्याश्रयणात् ॥ अन्यथा ब्रह्मणो
धिपतिरित्युत्तरवाक्यासंगतेः ॥ न च रुद्रो ब्रह्मणामत्याधिपतिरिति तत्पापीष्यते नाधिपब्रह्माह्यो यं जीवपानीत्य-
पिवक्तुमुक्तं ॥ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानामित्यनेन पौनरुक्त्यापत्तेः ॥ ब्रह्मशब्दस्य प्रधानवाचित्वेपि
नासौ ब्रह्मेति श्रुत्यमप्युपगंतुं प्रधानवस्यतापायवतभत्वेपगमात् ॥ अनन्याधिपतित्वद्योतनायैव जीवोक्त
मं हिरण्यगर्भमत्याधिपतिरित्युक्तिरर्थवतीभवति ॥ किंच सदाशिवइति दोषगंधराहित्यं ओमिति प्रणववाच्यत्वं
चोच्यमानं रुद्रस्य परब्रह्मतामनुगमयति ॥ यो देवानां प्रथमं पुरस्तात् विश्वाधिको रुद्रो महर्षिः ॥ हिरण्यगर्भं पश्यत
जायमानं स नो देवः शुभया स्मृत्या संयुनक्तु ॥ यस्मात्परं नापरमस्ति किंचित् यस्मान्नाणीयो न ज्यायानित्युपक्र
म्य यो वेदादौ स्वरः प्रोक्त इत्यादिना तस्यैव रुद्रस्योंकारवाच्यतामुक्त्वा तस्यैव परमेश्वरतापाद्यः परः स महेश्वर इत्य
नेनाभिधानात् स एवात्र मंत्रे यत्नाभिज्ञापयते ॥ अपि च तदुक्तं येतो भवति ब्रह्मा ब्याहृतः विरूपाक्षादिशब्दानां नपुंस
कतानिर्वाहाय ब्रह्मशब्दोऽध्याहार्य इत्यादि तदसमंजसं ॥ यदपि तद्देवर्तं तदसत्यमाहुस्तदेव ब्रह्म परमं कवीना
मिति श्रुतौ समुद्रशापिवल्लिंगात् विष्णुरेव ब्रह्मादिशब्दवाच्य इत्यवगम्यत इति ॥ तदपि न समुद्रान्तस्थलस्याप्य-

[illegible] नारायणात् ॥
[illegible] ॥ किंच यो [illegible]
[illegible] हिरण्यगर्भं जनयामास पूर्वं [illegible] हिरण्यग-
र्भं [illegible] योऽस्ति [illegible] मंत्रेण [illegible]
[illegible] हिरण्यगर्भं [illegible] परत्वेनाशीर्वाद
[illegible] ॥ न चैवं ततः परं ब्रह्मेति मंत्र
त् पूर्वं पठितेनैव देवानामिति [illegible] हिरण्यगर्भं जनयितृत्वेनोक्तो यो रुद्रस्ततः परं किंवा स्वयं रुद्र एव ततः परं ब्रह्मे
ति मंत्रेऽभिधीयते न द्वितीयः [illegible] परं [illegible] मंत्रो विश्वाधिको रुद्रो महर्षिरिति पर्यवसितार्थः ॥ यो देवाना-
मिति मंत्रे हिरण्यगर्भं जनयितृत्वेन [illegible] विश्वाधिक इत्युक्त्या [illegible] आदिदेवादिभ्योऽपि [illegible] स्वादिकानामपि
मत्वात् विश्वाधिको [illegible] विष्णुर्ब्रह्म [illegible] नाम [illegible] शिवस्य ॥ अत एव ततः परं ब्रह्मे-
ति मंत्रस्य यो देवानामिति मंत्रप्रतिपादितहिरण्यगर्भजनयितृरुद्रादपि परत्वेन विश्वाधिको ब्रह्मरूपत्वं प्र-
मो माभूदिति तदनंतरं ॥ सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः ॥ सर्वव्यापी स भगवांस्तस्मात्सर्वगतः शिव इ-
ति ॥ सर्वव्यापित्वसर्वगुहाशयत्वादिना यस्मात् [illegible] परमिति ततः परं ब्रह्मेति मंत्रगतः शिवस्य ब्रह्मरूपेण निगमनं

संगच्छते ॥ यदातमस्तन्न दिवा न रात्रिर्न सन्न चासत् शिव एव केवल इति पूर्वतनमंत्रेण तमोमात्रावशिष्टे सर्गादि
समये कारणभावेनावस्थानोपवर्णनेन जगत्कारणत्वनियतस्य महत्त्वस्य शिव एवावगतेस्तयोर्मंत्रयोर्शैकपर
त्वावगमाच्च ॥ सकलसदसदात्मकवस्तुकालाधिककालवृत्तिः शिव एव यदातम इत्यादिमंत्रबोध्यः यस्मात्परं नाप
रमिति मंत्रस्यारस्यावगमाच्च ॥ यत्तु यदातम इति मंत्रेण कारणप्रापकः यदेति कालविशेषप्राप्तस्तमसोऽनुवादा
त् अनुवादस्य प्राप्तिपूर्वकत्वात् प्राप्तिबोधकपुरोवादाकांक्षायां अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते तमः प
रे देवे एकीभवंतीति सुबालोपनिषदेव पुरोवादः तस्यां चाव्यक्ताक्षरक्रमेण यस्य शरीरमित्युपक्रम्य एष आत्मा
[illegible] मसः प्रतिपादनात् तदनुरोधेनानुवाद
[illegible] वितुर्वरेण्यं प्रज्ञा च तस्मात् प्रसृता पुराणी
[illegible] न तत्त्वविदोऽनुमन्यंते ॥ तथा हि सत्यं यद
[illegible] यगतं अन्येषामनूद्यमानार्थप्रापकानां त
[illegible] तेर्वा इदमेक आसीन्नाहरासीन्न रात्रि
[illegible] दिवा न रात्रिरित्यादिना गोपिकात्सर्वेना
[illegible] न दिवानिशाविभागाभावः सदसदात्म

कमपंचानामेवोपादानं पुरोवादश्च नजातादेवतयोः प्राप्तेः नहि किंचिदनूद्य किंचिद्विधातुं प्रवृत्तं वाक्यं अनुप-
दानादस्यानेकिसानुपुरोवादत्वप्राप्ते र्थेपर्यवस्यत् साफल्यमश्नुवीत अतस्तत्त्वाग्निरित्यादिरनुवादः ॥ ...
शिवश्चाक्षोपियथा ... कार्यपरतां हित्वा पुरोवादविशेषप्राप्ते नारायण एव पर्यवस्येत्तदा यदा तमेत
दिनिवाक्यं किंचिदनूद्य किंचिद्विधातुमुद्यच्छति विधेयमासाद्य ... पुनर्हि शिवपदस्थनारायणवृत्तितोपुरोवादादंश
संकिंचिदर्थं ... इति परमनेवावाक्यवैय्यर्थ्यमेव तावत्प्रासंगस्मात् सर्गाद्यसमये तमः प्रापके पुरोवाक्ये प्रकृ-
तिदधिष्ठाता नारायणशब्दे नोच्यते कुचित्प्रजापतिशब्देनोच्यते कुचित्साधारणशब्देनोच्यते इति विरुद्धानेक-
श्रवणादनिर्णीतविशेषपर्यवसाने तेषामेकविषयत्वं दर्शयितुमयं मंत्रः तेभ्योऽप्रासंसर्गाद्यकालीनतमोरूप-
तदधिष्ठातुः शिवसंविद्धातीति तस्यार्थकत्वस्यैव कथ्यते यातद्वस्याप्यपुरोवादस्थितनारायणादिशब्दस्यैव प-
शिवे वृत्तिवर्णके ... वाक्यवैयर्थ्यापेक्षयापदलक्षणायाएवोचितत्वात् ॥ एवं चोक्तप्रकारेण यदा तमइति
पूर्वार्धेन मोपाद इदमेव प्रासे त्यादीनां केषांचित्कारणवाक्यानां यथाशिव एव पर्यवसानपरं तथोत्तरार्धेन दर्श-
नितात्ययथा सुदीप्तात्पावकात्विस्फुलिंगाः सहस्रशः प्रभवंते स्वरूपाः तथाक्षराद्विविधाः सौम्य भावाः प्रजा-

ज्ञानवतस्मान्न सृजाम्यपुराणीति भागः ॥ तदैक्षत बहु स्यां प्रजायेयेति ॥ स ई क्षत लोकान्नु सृजा इति ॥ सोऽकाम यत बहु स्यां प्रजायेयेति ॥ तपसा चीयते ब्रह्म ततोऽन्नमभिजायत इति च स्रष्टुरादिसर्गकालीनं स्रष्टव्यवस्तुजातानां वीक्षणादिशब्दैः प्रतिपादयतां छांदोग्यादिश्रुतकारणवाक्यानां शिव एव पर्यवसानं बोधयतीति युक्तं ॥ हिरण्यगर्भादिसर्वकारणत्वेन सर्वोपनिषत्संमतस्य शिवस्यैव सकलकार्येभ्यः परस्मात् हिरण्यगर्भात्परत्वं यस्मात्परं नापरमस्तीति मंत्रो बोधयतीति ॥ किंच शिवनामतेन लोकप्रसिद्धैः हरशिवेशरुद्रेशानमहेश्वरशब्दैः अथ कस्मादुच्यते सर्वव्यापी ॥ विश्वे देवाश्च यत्तस्मिन् विश्वरूपः ततः स्मृतः ॥ हंसो नाम सदाशिवः इति अथर्वशिरसि महाभारतादावगमितशिवनामभावैः सर्वव्यापिविश्वरूपहंसादिशब्दैरन्यदेवतावाचिशब्दानां रख्यातिकरैरहितैः क्षरः प्रधानममृताक्षरं हरः भावाभावकरं शिवं भूयः सृष्ट्वा पतयस्तथेशाः एको हि रुद्रो न द्वितीयाय तस्थुरीशानो ज्योतिरव्ययः मायिनं तु महेश्वरं स सर्वव्यापी स भगवान् तं विश्वरूपं भवभूतमीड्यं एको हंसो भुवनस्यास्य मध्ये इत्यादिमंत्रावयवैः अस्या उपनिषदः कार्त्स्न्येन शिवपरत्वावगमात् तदंतर्गतस्य यस्मात्परं नापरमिति मंत्रस्य ततः परं ब्रह्मपरं महांतमिति मंत्रस्य शिवपरत्वमेव युक्तं ॥ स्फुटीकृतं चास्याः कार्त्स्न्येन शिवपरत्वं कूर्मपुराणे सुशीलोपाख्याने अथास्मिन्नंतरे प्राप्तं तं समायांतं महामुनिं ॥ श्वेताश्वतरनामानं महापाशुपतोत्तमं ॥ इत्यादिना सुशीलस्य राज्ञः श्वेताश्वतरस्य महर्षेर्दर्शनं तद्वंदनादिकं शिष्यभावेन तत्परिग्रहप्रार्थनं चोपन्यस्य सोऽनुगृह्याथ राजानमित्यादिना महर्षिः तत्प्रार्थनस्यांगीका

ारिकं चोक्तम्॥ ईदृशं तदैश्वरं ज्ञानं स्वशाखोक्तं हितप्रदं॥ अथोपवेदसिद्धं तत्पशुपाशविमोचकमिति पाशुपत
ज्ञानस्याथर्वणाभ्यन्तरशाखोक्तत्वकीर्तनेन॥ उवाच शिष्यान् संप्रेक्ष्य एतदाश्रमवासिनः॥ ब्राह्मणान्क्षत्रियान्वैश्या
न्ब्रह्मचर्यपरायणान्॥ मया मत्प्राशितां शाखामधीत्यैवेह योगिनः॥ समासते महादेवं ध्यायन्तो निष्कलं शिवं॥
इह देवो महादेवो रममाणः सहोमया॥ अध्यास्ते भगवानीशो भक्तानामनुकंपयेति॥ तच्छाखोक्तमार्गेण तेषां
शिवध्यानोपवर्णनाच्चेति॥ वायुसंहितायां च चतुर्थपशुपतिविनिर्णयाध्याये शिवपरत्वमस्याः प्रतिपत्तिर्द्रष्टव्यं॥ य
द्यप्यस्या उपनिषदः शिवपरत्वमसहमानैः परैरुक्तं अस्यामेव तृतीयाध्याये वेदाहमेतं पुरुषं महान्तमित्यादिपु
रुषसूक्तमन्त्राम्नानात् तत्प्रतिपाद्यमानस्य नारायणस्यैव प्रत्यभिज्ञानेन तस्यैवैतत्प्रतिपाद्यतावसीयते उभ
योरपि प्रतिपाद्यभेदे उभयत्र नान्यः पन्था विद्यतेऽयनायेत्यनेन द्वयोरितरेतरव्यवच्छेदेन मुमुक्षूपास्यत्वावधार
णासंभवात् तदुपनिषत्प्रत्यभिज्ञानात् पुरुषसूक्तमेव शिवपरं किं न स्यादिति चेन्न॥ सहस्रशीर्षा पुरुष इति
उपक्रम एव॥ पुरुसंज्ञे शरीरेऽस्मिन्शयनात्पुरुषो हरिः॥ शकारस्य षकारोऽयं व्यत्ययेन प्रयुज्यते॥ भगवानि-
ति शब्दोऽयं तथा पुरुष इत्यपि॥ निरुपाधी च वर्तेते वासुदेवे सनातने इत्यादिपुराणवचनावगमितनारायणैकान्त्य
स्य पुरुषशब्दस्याम्नानेन मध्ये वेदाहमेतं पुरुषं महान्तमिति महादेवं वा महापुरुषं वार्चयेदिति कल्पसूत्रावगमितनारायणना
मभावस्य महापुरुषशब्दस्याम्नानेनापवर्गो अश्वदशान्तिप्रकरणे तत्तदैवत्याश्वशान्तिषु तत्तद्दैवत्यमन्त्रविनि

॥ योजनावसरे वैखान्यां पुरुषसूक्तमिति वैखान्यांशांतौ पुरुषसूक्तस्य विनियोजनेन शौनकबौधायनादिस्मृतिषु बहु-
धा नारायणसमाराधनेन स्य विनियोजनेन विष्णुपुराणादिषु पुरुषसूक्तार्थप्रक्रियया नारायणस्तुतिदर्शनेन पुरु-
षेण नारायणेन यजमानेन उपतिष्ठेत अथ नारायणाभ्यामुपस्थानमिति कल्पसूत्रेषु नारायणसमाख्यया व्यवहा-
रेण च पुरुषसूक्तस्य नारायणपरत्वावगमात् अनेकप्रमाणव्याकुलीकरणायोगेन तन्मंत्रप्रत्यभिज्ञानादस्याप्यु-
पनिषदो नारायणपरत्वमाभाति॥ नन्वास्यामेवोपनिषदि वेदाहमेतं पुरुषं महांतं यस्मात्परं नापरमस्ति किंचिदि-
ति मंत्रद्वयाम्नानानंतरं ततो यदुत्तरतरं तदरूपमनामयं य एवंविदुरमृतास्ते भवंति अथापरे दुःखमेवापियंति स-
र्वाननशिरोग्रीवः सर्वभूतगुहाशयः सर्वव्यापी च भगवान् तस्मात् सर्वगतः शिव इति मंत्राम्नानेन पुरुषसूक्तप्रतिपा-
द्यान्नारायणादुत्तरत्वेन शिवस्य प्रतिपादन एवास्यास्तात्पर्यमवसीयत इति चेन्न॥ प्रथममेव वेदाहमेतमित्य-
नेन मंत्रेण नारायणवेदनस्यैव मोक्षहेतुत्वस्य यस्मात्परं नापरमिति मंत्रेण तस्मात्परभावस्य च प्रतिपादनेन
तदनंतरश्रुतमंत्रसंदर्भस्य तदधिकस्यार्थे तात्पर्यकल्पनायोगात् उपक्रमोपसंहारयोर्विरोधे असंजातविरोधित्वे-
नोपक्रमप्राबल्यस्य पूर्वतंत्रे स्थितत्वेन चरमश्रुतस्य ततो यदुत्तरमित्यादेः प्रथमावगतार्थानुरोधेनैव नेयत्वात् त-
स्मात्तदुत्तरसंदर्भोपि नारायणपर एव॥ तस्मात् सर्वगतः शिव इत्येतदनंतरमपि सहस्रशीर्षा पुरुषः पुरुष एवे-
दं सर्वमिति पुरुषसूक्तमंत्राम्नानात् सत्त्वस्यैष प्रवर्तक इति सत्त्वगुणोपाधिलिंगाम्नानाच्च ततःशब्देन तेनेदं पूर्णं पु-

ऽपरमेश्वरमिति श्रुतिसंज्ञे तथा [illegible] दिशति [illegible] तदुक्तं [illegible] नारायणस्यैवात्र प्रतिपाद्यते ॥ अथ यातनः
ग्राह्यो दैवो यन्नाम्ना [illegible] रक्षितिसंदर्शनं केः ॥ एवं च तत्र मन्त्रे स्थितानां रुद्रादिशब्दानामपि शिववा-
कुत्वाद्येन नारायण एवेष्ट ॥ एवं नारायणानुपत्तिरहिते [illegible] सकारणं कारणाधिपाधिप इति
[illegible] शिवस्य कारणत्वं कथं प्रतीति ॥ [illegible] ॥ यदुक्तं पुरुषसूक्तमन्त्रप्रत्यभिज्ञानात
तन्प्रतिपाद्यस्य नारायणस्यैवैतद् [illegible] प्रतिपाद्यता [illegible] मन्त्रप्रत्यभिज्ञानात्स्फुटं
[illegible] पर्यायनामानेकशः अभ्यस्यमानशि
वरुद्राद्यनेकाभिधानश्रुतिभिः [illegible] प्रत्यभिज्ञा [illegible] न प्रत्यभिधानं शक्नोति ॥ न च
नान्यः पन्था विद्यतेऽयनायेति पुरुषसूक्तमन्त्रप्रत्यभिज्ञानमनन्यगतिकत्वादभिधानश्रुतिभ्यः प्रबलमित्युक्तं युक्तं प
सोपनिषत्सु तावदुपनिषत्सु [illegible] परमेश्वरं [illegible] नीलकण्ठं प्रशान्तमिति मृत्युप्रत्यभिज्ञानात्तं मृत्युमत्येति
नान्यः पन्था विद्यत इति श्रवणेन तस्य [illegible] पुरुषसूक्तप्रतिपाद्येन नारायण एव पर्यवसिते तत्त्वासिद्ध
तस्यानन्यथासिद्धत्वासिद्धेः ॥ किं चास्यामुपनिषदि तृतीयाध्याये चतुर्थाध्याये च यानि रुद्रशिवादिशब्दवन्ति
शिवान्तमस्तेमानस्तोके तनये मा न आयुषि इत्यादयो रुद्रमन्त्रा बहव आम्नाता इति रुद्रमन्त्राणामप्यस्ति प्रत्यभिज्ञानं
यावतोभयमन्त्रप्रत्यभिज्ञायामेकस्य नारायणस्य पक्षपातेन प्रयुक्तः ॥ किं च प्रत्यभिज्ञयोर्बलाबलविवेके शब्दमन्त्रा

स्तृतीयेऽध्याये चतुर्थेऽध्याये चाम्नाताः पुंसूक्तमंत्राश्च रुद्रमंत्रमंत्रदशपठिताः न प्रथमसमाम्नाताः न च देवताविशेषासा
धारणपदघटिताः पुरुषशब्दस्य नारायणासाधारणस्य निरभिमिध्यमाणत्वात् ॥ तथा च संदेहान्यार्थेनासाधारण
रुद्रशिवादिपदघटितत्वेन च रुद्रमंत्रमन्त्याभिज्ञानस्यैव प्राबल्यमवधार्यते च नन्वेतत्तु पुरुषसूक्तमपि न नारायणप
रं उतामृतत्वस्येशान इत्यभिधानश्रुतिवशान्नस्य शिवपरत्वावगमात् ॥ नन्वमृतत्वस्येतीशितव्योपादानादैश्वर्य
रूपयौगिकार्थविधित्सया प्रयुक्तमीशानपदं सर्वस्य वशी सर्वस्येशान इत्यत्रेव केवलयौगिकत्वान्न रूढ्या शिवप्रति
पादकमिति चेन्न ॥ ईशितव्यानुपादान इव तदुपादानेऽप्यवयवशक्त्या यौगिकार्थप्रतिपादयत एव तस्येशानः शर्व ईशानः ई
शानः शशिशेखर इति शिवाभिधानकोशस्मृतिसिद्धसमुदायशक्त्या शिवप्रतिपादकत्वस्यौत्सर्गिकस्य दुरपह्न
वत्वात् केवलयोगात् शक्तिर्बलीयसीति न्यायेन योगरूढेर्बलवत्त्वान्न नन्ववयवार्थप्रतियोग्यनुपादान एव समुदा
यशक्त्युन्मेष इति कश्चित्तत्तु तत्तिरीश्वरोऽनियमः येनेहेशानशब्दो केवलयौगिक एवेत्यवधार्येत ॥ शब्दादेव
प्रमित इत्यधिकरणेऽङ्गुष्ठमात्रः पुरुषोज्योतिरिवाधूमकः ईशानो भूतभव्यस्येति कठवल्लीमंत्रस्याङ्गुष्ठमात्र इति
परिच्छिन्नप्रमाणलिंगाज्जीवपरत्वप्राप्तौ तन्मंत्रप्रतिपाद्यस्य पुरुषस्येशानो भूतभव्यस्येतीशितव्योपादानेऽपि सौ
त्रशब्दपदस्वारस्यादीशान इत्यभिधानश्रुत्यैव परब्रह्मपरत्व निर्णयस्य श्रीमद्भाष्यकारैः कृतत्वात्तस्य केवलयौ
गिकत्वे तदसाधारणशब्दाभावात् भूतभव्येशितृत्वलिंगादेव निर्णीतत्वमिति शब्दादेवेति सूत्रस्वारस्यभंगा

त् ॥ नन्वीशानः प्राणदः प्राणद इति विष्णुसहस्रनाममध्ये परिगणनादीशानशब्दो विष्णौ रूढ इति चेन्न ॥ स्तुप-
नामसहस्रे गैरसुपञ्चमात्रसारेण सर्वधर्मेतया स्तोतुं प्रवृत्तो विश्वं विष्णुरित्यादौ सर्वस्याभिप्रायेण देवतांतरनाम्ना-
मपि बहूनां परिगणनदर्शनेन वतस्तेषां तन्नशक्त्यसिद्धेः ॥ अन्यथा भारतसेंगादित्यपुराणपठितशिवनामसु त-
र्गतस्य विष्णुनाम्नोऽभावेन हरिवंशे कैलासयात्रायां नामानि तव गोविंद यानि लोके महांति च तान्येव मम नामानि
भ कार्यविचारणेति कृष्णं प्रति शिववचनेन च विष्णुनाम्नां शिवनामत्वप्रसिद्ध्याऽभिधानस्तुत्या क्वचिदपि विष्णुपर
त्वनिर्णयो न स्यात् तस्मात् स्तुत्यर्थगंधरहितलोकवेदसाधारणनामगणने स्वपर्यायमध्ये चाभिधानकोशस्मृतिर
पनामत्वे प्रमाणमितीशानशब्दस्य शिवनामत्वमेवेतीशानशब्दात्पुंसूक्तस्य शिवपरत्वनिर्णयो युक्त एव ॥ य-
दपि पुरुषसूक्तत्याद्यनेकप्रमाणैः पुंसूक्तस्य नारायणपरत्वमुक्तं तदसत् पुरुषशब्दस्य शक्त्या नारायणे कांस्यासि-
द्धेः यद्यपि पुरुषो ह वै नारायणोऽकामयत इत्यादौ नारायणे पुरुषशब्दप्रयोगो दृश्यते तथापि पुरुषो वा आत्मा नःप्रवृत्ति
त्वाभिधानकोशस्मृते लौकिकवैदिकप्रयोगमात्रपर्याप्तत्वात् सामान्येन तस्य शक्तेरावश्यकत्वेन न तदेकदेशवृत्तेर्दि
ष्णौ तस्य नाविशिष्यापि शक्तिः कल्पयितुं युक्ता बर्हिराज्याधिकरणाविरोधात् तत्र हि स्वेच्छे स्तृणपूर्णादिजातिमा
त्रे आर्यैः संस्कृततृणादावेव प्रयुज्यमानानां बर्हिराज्यादिशब्दानां शास्त्रप्रसिद्धेर्बलवत्त्वात् संस्कारनिमित्तत्वमा
शंक्य शास्त्रस्थप्रयोगस्य जातौ व्यभिचारात् जातिमात्रव्यवहारस्य संस्कारव्यभिचारात् अव्यभिचारिजातिश

क्तिमादाय सर्वप्रयोगोपपादनसंभवेन विरोधाभावात् जातिवाचित्वैव तिसिध्यांतितं ॥ उक्तं च तंत्रवार्त्तिके एकदे-
शोपि येन दृष्टः शब्दो जातिनिबंधनः तदत्यागान्न तस्यास्ति निमित्तांतरकल्पनेति ॥ नन्वस्तु प्रयोगमात्रस्यान्यथासि-
द्धिः तथापि पुरुषसंज्ञे शरीरेस्मिन् शयनात् पुरुषो हरिरित्यादि पौराणिकानां निर्वचनं ॥ तथा पुरुषशब्दो यथा सु-
देवे पतित्वं ते ॥ तं विना पुंडरीकाक्षं कोन्यः पुरुषशब्दभाक् ॥ भगवानिति शब्दोयं तथा पुरुष इत्यपि ॥ निरुपाधीच व-
र्तेते वासुदेवे सनातने ॥ इति पौराणिकासाधारण्यवचनं चानन्यथासिद्धं पुरुषशब्दस्य विष्णोभिधायित्वापि
किंफलाविभ्यतातिरेन ॥ सामान्यश्च नयत्स्यापि पुरुषशब्दस्य श्रुत्यादौ क्वचित् प्रकरणादिसामर्थ्यात् नारायणोप-
स्थापकस्य स्तोत्रे तथा पनेन चरितार्थत्वमर्थवादप्रभावपौराणिकनिर्वचनस्याधिकरणे याहं इत्स्तोत्राविरो-
धनामलेन प्रसिद्धस्य पुरुषशब्दस्य क्वचित् पुंस्त्वे * वर्तते इत्यादौ स्तोत्रसाधने रथंतरादौ लक्षणया प्रसिद्धिः स्तोत्रे-
लक्षणया चेन्नरितार्थस्य पुरुषशब्दस्य रथंतरादौ प्रवृत्तिनिमित्तप्रतिपादनपरस्य अपौरुषेयत्वप्रमाणत्वात् [illegible] वायुः
पुरुषपर्वतेत्यादि श्रौतार्थकादि निर्वचनस्य [illegible] अभिधानकोशस्मृ-
त्यादिवदनन्यथासिद्धप्रयोगविषयविशिष्यशक्तिकल्पकत्वायोगात् पुरुषशब्दस्य नारायणासाधारण्यवचन-
स्यापि अपवादो वा अन्यो गोजा[illegible]: पशवो गोअश्वा इति पशुजातेः गवाश्वासाधारण्यनिर्वचनस्योपकाराधि

स्यात् प्रशंसापरत्वमिव स्वातंत्र्यादिपुरुषलक्षणाधिक्यात् नारायणप्रशंसापरत्वेनोपपन्नत्वेन तद्बलादपि पुरुषशब्द
स्य नारायणे विशिष्यशक्तिः सिध्यति ॥ अन्यथा गोअश्वेष्वपि पशुशब्दस्य विशिष्यशक्तिसिद्ध्यापत्त्या पशुत्वस्य गवा
श्वासाधारण्यापत्तेः ॥ स एव वासुदेवोयं पुरुषः प्रोच्यते बुधैः ॥ प्रकृतिसर्वाराहित्यात् स्वातंत्र्याद्वैभवादपि ॥ स एव वा
सुदेवोयं साक्षात् पुरुष उच्यते ॥ स्त्रीप्रायमितरत्सर्वं जगद्ब्रह्मपुरःसरमितिनारसिंहपुराणवचनेन पुरुषश
ब्दस्य नारायणासाधारण्यवचनानां प्रशंसापरत्वस्य स्फुटीकरणाच्च ॥ यद्येवमपि पुरुषशब्दस्य विष्णौ प्रयोग निर्व
चनासाधारण्यवचनैर्वैशिष्ट्यशक्तिः स्यात् तदा पुरुषस्य विद्महे सहस्राक्षस्य महादेवस्य धीमहि पुरुषं कृष्णपिंगलं
तमीशानं वरदं देवमीड्यमित्यादिश्रुतिषु प्रयोगात् ॥ यस्मात् पुर्यनुशेते नं तस्मात् पुरुष उच्यते इति लैंगे शिवनाम
प्रस्तावे निर्वचनात् ॥ पुरुषो नाम संपूर्णः शिवः सत्यादिलक्षणः ॥ सांबमूर्तिधरो नान्यो रुद्राद्विष्णुरजोपि वेति स्कां
दे ब्रह्मगीतासु असाधारण्यप्रतिपादनाच्च शिवेपि शक्तिः स्यात् तस्मादेकपाथा अनेकपाथासाधारणत्वान्न पुरुष
श्रुत्या विष्णुपरत्वनिर्णयो युक्तः ॥ महापुरुषशब्दोपि न तत्परत्वनिर्णायकः उक्तरीत्या सामान्यशब्दैरेव प्रयोगोपप
त्तेः ॥ न चात्र महापुरुषश्रवणमपि महान्तं पुरुषमिति भिन्नपदयोरेव श्रवणात् तत्र च पदद्वयस्य कश्चिदेकार्थः दृश्यते
नारायणसमाख्यापि पुरुषसूक्तस्य तदृषिकत्वनिबंधना नारायणदृष्टेन पुरुषसूक्तेनोपचितान्चितिमुपतिष्ठमा
न इह जन्मनि पुरुषो भवेदिति चा पूर्वसूत्रे ऋषिदेवतयोः नारायणपुरुषशब्दाभ्यां भेदेनोपादानात् तयैवाभ्यां शांतो

नारायणसमाराधने च विनियोगोऽपि नामाभिधानश्रुतिं आं संधिरूपरत्वमस्य बाधते ॥ उदु त्यं सु अग्निर्मूर्धा दिवः ककु
दित्यादिमंत्राणां गृह्ययज्ञे तत्तद्देवताराधने तत्तद्देवतामंत्रविनियोगावसरेषु धर्मोमादिपूजासु विहितानामपि
बहुशास्तदाराधनजपहोमादिषु विनियुज्यमानानामपि विरुद्धविनियोगमात्रेण श्रुतितदनुकूलविनियोगान्त
रमास्तामेयत्ताबाधात् ॥ अन्यथा यज्ञेत पुरुषसूक्तेन धनदं विश्वरूपिणमित्यादिशातातपस्मृत्यविनियोगान्तरेणा
न्यपरत्वस्याप्यापत्तेः ॥ अस्ति चास्य सूक्तस्याभिधानश्रुत्या रुद्रगुणोऽपि विनियोगः यथा बौधायनसूत्रे श्रीरुद्रन्या
सादिषु शिवसंकल्पादिषु विनियोगः ॥ नमकं चमकं चैव पुरुषसूक्तं च नित्यशः ॥ जपन्नोति महादेवं गृहं गृहपतिर्य
थेति पुराणे वा स्तुशान्तौ ॥ आवाह्य कुंभे देवेशं रुद्रं भुवननायकमित्युपक्रम्य नमकं चमकं चैव पौरुषं सूक्तमेव चेत्या
दिना जपे विनियोगः ॥ तथा लिंगपुराणे शिवपूजाविधौ ॥ सकूर्चेण सपुष्पेण स्नापयेन्मंत्रपूर्वकं ॥ मंत्रांश्चैतान्प्र
वक्ष्यामीत्युपक्रम्य ज्येष्ठसाम्ना त्र्यंबकेन तथा देवव्रतैरपि ॥ रथंतरेण पुण्येन सूक्तेन पुरुषेण चेति शिवाभिषेके च
विनियोगः उपबृंहणमपि विनियुक्तमंत्रार्थविवरणरूपत्वाच्छ्रुतविनियोगनिर्वाहार्थकत्वात् अन्यथासिद्धं
श्रुतिप्राप्तमस्य शिवपरत्वमपवादितुमीष्टे ॥ तथा हि अस्त्यन्यदेवत्यानां मंत्राणां विधिवशाद्देवतान्तरयजने वि
नियोगः सत्वेतेषां मंत्राणां यजनीयदेवताप्रदर्शनेन निर्वाह्यः ॥ मंत्राधिकरणे मंत्रविनियोगस्य वाक्यार्थप्रतिपाद
कत्वास्थितेः तदर्थं च मंत्रस्थस्य देवतापरस्य पदस्य यजनीयदेवतायां मुख्यवृत्त्यसंभवाच्चनात्तु यथार्थमैन्द्रीस्व

दत्यैन्द्र्यधिकरणन्यायेन लक्षणावृत्तिर्वाच्या तत्समभिव्याहृतविशेषणांतु दर्भैस्तृणीत हरितैरिति मंत्रे हरितत्व
त्संभवदर्थानां तद्विशेषणप्रकाशनद्वारा तत्रपर्यवसानं वाच्यं सोमः पवते जनिता मतीनामिति मंत्रे सोमलतायामप्य
दजनयितृत्ववत्तत्रासंभवदर्थकानां तु अभ्युदयायासमवेतगुणप्रकाशनद्वारा तत्रपर्यवसानं वाच्यं ॥ असमवे
तस्यापि गुणस्याभिधानं मंत्रश्रुतविशेषणविशिष्टप्रकाशनमभ्युदयकारीति नियमादृष्टार्थमित्यस्यार्थस्य वच
नात्तेषामितरार्थं प्रयुज्यत इति नावमिकाधिकरणस्थितेः ॥ एवं च पुरुषसूक्तस्याभिधानश्रुतितदनुगुणलिंगा-
दिनियमितशिवैकांत्यस्यापि श्रुतविनियोगांतरनिर्वाहाय धनदादिप्रकाशकत्वप्रकारवन्नारायणप्रकाशक
त्वप्रकारोपि पुराणादेरभावे पुरुषसूक्त्याकल्पनीय इति स एव तत्समारोपननदंगफलादिप्रपंचप्रधानेषु पुराणा-
गमादिषु निबध्यत इत्यन्यथासिद्धान्येवोपबृंहणानि दृश्यंते तेष्वसमवेतार्थविशेषणानामपि मंत्राणां पुराणेषूप
बृंहणानि ॥ सोमं स सर्जयज्ञार्थं सोमात्द्यौः समजायत ॥ धरा च वन्हिः सूर्यश्च वज्रपाणिः शचीपतिः ॥ विष्णुर्नारायणः-
श्रीमान् सर्वं सोममयं जगत् इत्यादीनि ॥ एवं पुरुषसूक्तस्याशिवपरत्वप्रतिपादकान्यपि उपबृंहणानि दृश्यंते य
था लिंगपुराणे ॥ द्यौर्मूर्धा हि विभोस्तस्य खं नाभिः परमेष्ठिनः ॥ सोमसूर्याग्नयो नेत्रं दिशः श्रोत्रं महात्मनः ॥ वक्त्राद्वै
ब्राम्हणा जाता ब्रम्हा च भगवान् विभुः ॥ इंद्राविष्णू भुजाभ्यां तु क्षत्रियाश्च महात्मनः ॥ वैश्याश्चोरुप्रदेशात्तु शूद्राः पाद
त्पिनाकिनः इत्यादीनि तस्मादुक्तरीत्या अन्यथासिद्धप्रयोगोपबृंहणाद्यैरभिधानश्रुतितदनुगुणलिंगादिनि-

योगोऽप्रवृद्धयोः पुरुषसूक्तस्याशिवपरत्वसिद्धेः न च मंत्रमस्याभिज्ञाने नापि मंत्रोपनिषदः नारायणपरत्वं कापि॥
एवं चास्याहरहन्महेश्वराद्यने काभिधानश्रुतिभिः शिवपरत्वे सकारणमित्यादि मंत्राणामपि शिवपरत्वमेव प्रति
पादितं शैवमूर्धन्यैः॥ अथैवं ब्रह्मश्रुतिलिंगादीनां शिवविष्णुसाधारण्ये कथं निर्णय इति चेदमत्सरत्वेऽभियुक्तोक्तरी
त्याशिवविष्ण्वोरभेदांगीकारादिति ब्रूमः॥ तथाह्यभियुक्ताः व्यावहारिकप्रक्रियायां पदार्थो द्विविधः दृग्दृश्यं च दृग्रूप
दार्थ आत्मा परमार्थत एकोऽपि उपाधिभेदेन जीवेशसाक्षिभेदात् त्रिविधः कारणीभूताज्ञानमायापरपर्यायोपाधिरीश्वरः
अंतःकरणतत्संस्कारावच्छिन्नाज्ञानोपहितो जीवः अविद्याप्रतिबिंब ईश्वर इति पक्षे बिंबचैतन्यं साक्षी बिंबेश्वरपक्षे
बिंबप्रतिबिंबानुगतमुखवत् जीवेश्वरानुगतसर्वानुसंधातृचैतन्यं साक्षीत्युच्यते चिद्विशेषकेवलयोर्भेदाभेदांगीकारा
त्तद्बिंबप्रतिबिंबाभ्यां तस्याभिन्नत्वं तदनुस्यूतत्वं च तद्वयमप्यविरुद्धं ईश्वरोऽपि स्वोपाधिभूतत्रिगुणात्मकमायाया
गुणत्रयभेदेन ब्रह्मविष्णुरुद्रभेदेन त्रिविधः कारणीभूतरजउपाधिको ब्रह्मा स्रष्टा कारणीभूतसत्वगुणोपाधिर्विष्णुः पा
लयिता कारणीभूततमउपाधिः रुद्रः संहर्ता हिरण्यगर्भस्तु महाभूतकारणाभावान्न ब्रह्मा तथाभूतोऽपि स्थूलभूतस्रष्टृ-
त्वात् क्वचित् स वै शरीरी प्रथम इत्यत्र ब्रह्मेत्युपचर्यते तथा च चतुर्भुजादिकार्यशरीरपालनादेर्विष्ण्वादिकर्तृकत्वे ए
कस्येश्वरस्य चतुर्भुजचतुर्मुखपंचमुखाद्याः पुमाकाराः श्रीभारतीभवान्याद्याश्च स्त्र्याकाराः अन्ये च मत्स्यकूर्मादयोऽनं
तावताराः लीलयैवाविर्भवंति भक्तानुग्रहार्थं न तु चतुर्भुजाकारो विष्णोरवताराः चतुर्मुखाकारो ब्रह्मणः पंचमुखाकारो

रुद्रस्य लक्ष्म्याकारो विष्णोः भारत्याकारो ब्रह्मणः भवान्याकारो रुद्रस्येति तथा सति चतुर्भुजशरीरिणः पालनकर्तृता
प्रयोजकं विष्णुत्वमिति वक्तव्यं स्यात् तच्च संभवति तस्य दैत्यसंहारादिरूपरुद्रकार्यकर्तृत्वस्यापि दर्शनात् तस्य
देवरक्षणफलकत्वेपि तमःकार्यत्वेन रुद्रकार्यत्वात् एवं पंचवक्त्रशरीरावच्छिन्नस्य त्रिपुरादिसंहर्तृत्वेपि न तस्य
रुद्रत्वनिर्णयः संहारस्य जगत्पालनफलकत्वेन विष्णुकार्यत्वात् शिव एको ध्येयः शिवं करः मज्ञाचतस्मात्मसु
तापुराणीत्यादिश्रुत्या मुक्तिज्ञानादिविष्णुकार्यप्रतीतेश्च एवं भवान्यादेर्दैत्यसंहारकर्तृत्वेपि पालनरूपविष्णुका
र्यदर्शनात् सैषा भवस्य नाथवरदा नृणां भवति मुक्तये इति मुक्तिरूपविष्णुकार्यप्रतीतेश्च न रुद्ररूपत्वनिर्णयः एवं पुरा
णतं भादौ सरस्वत्यादेरपि पालनादिरूपविष्णुकार्यप्रतीतेश्च न ब्रह्मरूपत्वनिर्णयः तस्मात् सर्वाणि शरीराणि स
र्वेषामपि चतुर्भुजादिशरीरावच्छिन्नेष्वपि सकार्यस्य रुद्रादावपि प्रतीतेः एतदभिप्रायेणैव हरिरूपी महादेवो लिंग
रूपी जनार्दनः ईषदप्यंतरं नास्ति भेदकृन्नरकं व्रजेत् इत्यादीनि नारदीयस्थानि वाक्यानि अहं त्वं सर्वगो देवः त्वमेवा
हं जनार्दन त्वत्तः परतरो नास्ति शाङ्कर्य्यैर्जगत्पते नामानि तव गोविंद यानि लोके महांति च तान्येव मम नामानि नात्र का
र्या विचारणा त्वदुपासा जगन्नाथ सैवास्ति मम गोपते यश्च त्वां द्वेषते लोकः स मां द्वेष्टि न संशयः त्वहिस्तारोपतो ब्रह्मा
अहं भूतपतिस्ततः न तदस्ति विना देव यज्ञोविरहितं क्वचित् यदासीत् यच्च वर्तेत यच्च भावि जगत्पते सर्वमेतास्थिरं वे
शाविना किंचित् यानादिरुक्तादीनि कैलासयात्रायां हरिवंशस्थानि महेश्वरोक्तानि तथा भवानहं च विश्वात्मा एकरूप एव हि

[illegible] तोलयापदमयंदत्तं दत्तं नदमपंमया मत्तो न भिन्न मात्मानं द्रष्टुमर्हसि ॥
[illegible] मोहितात्मानः पुरुषा भिन्नदर्शिनः इत्यादि विष्णुपुराणवाक्यानि विष्णौ
[illegible] मूढाः पश्यंति तेन रके व्रजन्ति ये च मूढा दुरात्मानो भिन्नं पश्यंति मां हरेः ब्रह्मा
[illegible] पुराणस्थानि च समंजसानि स ब्रह्मा स शिवः स हरिः एको देवः सर्वभूतेषु गूढः
[illegible] नारायणो पूर्वं रुद्रः कल्पांतरे सृजत् कल्पांतरे पुनर्ब्रह्मा रुद्र विष्णु
[illegible] पुनः नारायणं पुनर्ब्रह्मा ब्रह्माणं च पुनर्भवः ॥ एवं कल्पेषु कल्पेषु ब्रह्म
[illegible] योगिनः तत्तत्कल्पीयवृत्तांतमधिकृत्य महर्षिभिः प्रभावः कथ्यते ते
[illegible] ब्रह्मा क्वचिद्विष्णुः क्वचिद्रुद्रः प्रशस्यते नानेन तेषामाधिक्यं न्यूनत्वं वा
[illegible] भिः पुराणानि प्रणीतानि विद्वांसस्तत्र न मुह्यंति इति कूर्मपुराणोक्तेः अ
[illegible] भवि ष्यंति पिशाचाश्च न संशयः इति वायूक्तौ तेषां न्यूनाधिकभावं वा
[illegible] आसीदिति श्रुतौ परमकारणे नारायणपदश्रवणात् न खलु रुद्र परत्वे
[illegible] संत्यागिनो पानि इति वाचो युक्तिरपि निरस्ता वाक्यांतरे व्यादिरुद्र
[illegible] अन्यथैव न विरोधपरिहाराय न यौरैक्याभ्युपगमस्यैव युक्तत्वात् ॥

॥ अन्यथा नारायणशब्दस्यापि योगवृत्त्या शिवपरत्वसंभवेन अनिर्णयस्य दुर्वारत्वात् ॥ न च णत्वायोगः नाराय
णस्यायं नारायण इति विष्णुसंबन्धी नारायणस्तेषां नारायणानामिति वा बाधकाभावात् ॥ अनिलोऽथ विष्णोरिति सोमं प्रकृत्य
श्रवणात् शब्दादीन्यन्यथा यानि रुद्रापकर्षव्यंजकानि वाक्यानि दृश्यन्ते तानि कार्यरुद्रपरतया नेयानि ब्रह्मा विष्णू रु
द्रः संप्रसूयन्त इति दर्शनात् ॥ यत्तु रुद्रस्याविद्यात्मकत्वे विष्णोरेव ब्रह्मत्वं सिद्ध्यतीति तद्विष्णो रुद्रात्मकत्वे रुद्रस्यैव
ब्रह्मत्वं सिद्ध्यतीत्यनेनोत्तारितं दुराग्रहत्वे यथेष्टं वक्तॄणां त्वमेव विचारय तत्र नास्माकं निर्बन्धः परं तु विष्णुरेव जगत्कर्तृ
ब्रह्मशब्दवाच्य इति वदतां विष्णुशिवादिविषयत्वेन संदिह्यमानानां दर्शितश्रुतिलिंगादीनां तत्तद्वाक्यमुदाहृत्य पूर्वो
त्तरपक्षरचनया तत्परत्वं न्यायैरुपपादनीयं न त्वसिद्धवदिदमित्यादिभिस्तेषां विष्णुपरत्वं निर्णेयं मीमांसायाश्च
र्व्यापातात्स्वेनोपपादितं सूत्रकृता ॥ अनुपपत्तेस्तु न शारीरः नेचस्मार्तमतद्धर्माभिलापादिति चान्यशिवोऽनुपपन्ने-
रिति सहेतयेति दूषणमपरिशिष्यत एव । अतस्तद्धर्माधिकरणादिप्रथमपादीयाधिकरणादिषु तदीयविषयवा
क्यश्रुतिलिंगादीनां शिवसाधारण्योपपादनेन न यथा विष्णुमात्रनिर्णायकत्वं तथा तत्तदधिकरणेषु तत्तद्वात्याधिक
रणयोजनायां दूषणावसरे निरूपणतरं भवति यद्दर्शयिष्यामः ॥ यदपि राद्धान्तिकास्तावच्चतुर्विधाः अन्यत्रैव प्रसि
द्धाः उभयत्र प्रसिद्धाः अन्यत्र प्रसिद्धाः तत्र प्रसिद्धा इति सर्वोऽपि नामलिंगात्मकत्वात्प्रत्येकं द्विविधाः तत्र नामात्म
कानामन्यत्र प्रसिद्धानां ब्रह्मणां प्रथमपादे समन्वयः लिंगात्मकानामन्यत्र प्रसिद्धानां ब्रह्मणां द्वितीयपादे समन्व

यः उभयत्र प्रसिद्धानां शब्दानां तृतीयपादे समन्वयः अन्यत्रैव प्रसिद्धानां चतुर्थपादे समन्वय इति वैदिकशब्दा
तुर्विध्योक्तिपुरःसरमुक्तरीत्या आनंदतीर्थीयानां पादभेदोपाधिभेदवर्णनं ॥ तदप्यसत् अन्यत्रैव प्रसिद्धवत् त
त्रैव प्रसिद्धानां पृथग्वक्तव्यतया चातुर्विध्योक्त्ययोगात् ॥ न च तत्रैवेत्यनेन तत्रैवेति विवक्षितमन्यथा तत्रापीति विव
क्षायामुभयत्र प्रसिद्धेष्वंतर्भावः स्यादत एव तत्र प्रसिद्धाः ब्रह्मण्येव प्रसिद्धा इति सुधायामुक्तमिति वाच्यं ॥ तथा
सत्युक्तयुक्त्यैवान्यत्रैव प्रसिद्धानां पार्थक्यायोगेन त्रैविध्यस्यैवापत्तेः ॥ किं चान्यत्र प्रसिद्धा इत्यस्य पादभेदोपाधे
रवधारणागर्भत्वे चतुर्थपादोपाध्यंतर्भावः आनंदमयशब्दे अन्यत्रैव प्रसिद्धिर्दुरुपपादा आनंदमयोऽधिकारे इव प्राचु
र्येऽपि प्रयोगाविशेषात् प्रसिद्धिर्हि प्रयोगप्राचुर्यं तच्चाविशिष्टं ॥ तदगर्भत्वे तृतीयपादोपाध्यंतर्भावः इति कथं पादो
पाधिवैजात्यं ॥ किं चैवं आकाशप्राणादिशब्दानां प्रथमपादीयानामव्यक्तजीवादिशब्दानां चतुर्थपादीयानां चान्यत्रै
व प्रसिद्ध्यविशेषे कुतो वैजात्यं कथंचित्कल्पनेऽपि वा तत्र प्रसिद्धेऽपि तथा वैजात्यस्य कल्पनया द्वैविध्यसंभवात्त्रै
विध्यं वक्तव्यं चातुर्विध्योक्तिरयुक्ता ॥ यत्तु चतुर्थपादीयटीकायां लोकप्रसिद्धान्यप्रतिरूढानां श्रुतिलिंगबलाद्ब्रो
समन्वयः प्राक् प्रतिपादितः ॥ इदानीं तु श्रुतिलिंगादिभिरेवान्यत्र प्रसिद्धानां समन्वयः प्रतिपाद्यत इत्युक्तत्वात्
श्रुतिलिंगादिभिरन्यत्रैव प्रसिद्धानां सामस्त्येन विशेषहेतुभिर्विभागेनैव प्रवृत्तिं दर्शयत्यस्मिन्पाद इति चतुर्थपा
दे भाष्योक्तेश्च लोकतोऽन्यत्रैव प्रसिद्धा अन्यत्र प्रसिद्धाः श्रुत्यादिभिरन्यत्रैव प्रसिद्धास्त्वन्यत्रैव प्रसिद्धा इति वैजात्या

लोकपादोपाधिसांकर्यं तत्र प्रसिद्धानां तत्रैव प्रसिद्धानां चाप्युपास्यसमन्वयत्वेनाभेदविवक्षया च ॥ न पांचविध्यं वै
रिकब्राह्मणाभिमितिं तदप्यसत् ॥ आनंदमयादिनाम्नां सर्वगतत्वादिलिंगानां चानंदमयोऽभ्यासात् अंतस्तद्धर्मोपदे
शादित्याद्यधिकरणेषु प्रथमपादीयेषु समन्वितत्वानामिंद्राकाशादिब्रह्मनाम्नामिंद्राकाशादावेवान्यत्रार्थविशेषे अन्य
आदित्यादौ लोकतोऽन्यत्र प्रसिद्ध्यभावादन्यत्रप्रसिद्धत्वाभावापातात् ॥ यत्त्वादित्यादिश्रुतिसमभिव्याहारात् सर्व
गतत्वादिलिंगानामन्यत्र प्रसिद्धिरस्तीति कल्पनं तन्न ॥ तथा सत्यपरत्वादिलिंगसमभिव्याहारेणाव्यक्तादिपदानां च
तुर्थपादे समन्वितत्वानामन्यत्रैव प्रसिद्धत्वेन तदभिमतानामप्यन्यत्र प्रसिद्धत्वापातात् ॥ यथा हि सर्वगतत्वादेः
न्यत्र प्रसिद्धिसाधिका आदित्यश्रुतिरंतर्यामित्वादेरन्यत्र प्रसिद्धिसाधकं शारीरत्वादिकं लिंगं च लोकतोन्यत्र प्रसिद्धं
तथा अव्यक्तादिशब्दस्यान्यत्र प्रसिद्धिसाधकमपरत्वादिलिंगमपि लोकतोन्यत्र प्रसिद्धं किं चान्यत्रैव प्रसिद्धेष्वा
कप्रकृत्यादिशब्देष्वपि लोकतोऽप्यन्यत्र प्रसिद्धेः सत्वात् अन्यत्र प्रसिद्धेंद्राकाशादिशब्देष्वपि श्रुत्यादिनाप्यन्यत्र प्रसि
सत्वादुपाधिसांकर्यं दुर्वारं ॥ न च प्रबलश्रुतिलिंगादिभिरन्यत्र प्रसिद्धाः अन्यत्रैव प्रसिद्धाः श्रुत्यादिमात्रेणान्यत्र
त्वास्त्वन्यत्र प्रसिद्धा इति श्रुतिलिंगादिगतप्राबल्याप्राबल्याभ्यां भेद इति वाच्यं ॥ अव्यक्तादिशब्दानामन्यत्र प्रसि
साधकापरत्वादीनामिव सर्वगतत्वादिसाधकादित्यादिश्रुतीनामंतर्यामित्वसाधकशारीरत्वादीनां गुहाप्रविष्टत्वादि

दिभिरन्यत्रैव प्रसिद्धिसाधने समन्वयासिद्धिप्रसंगाच्च तत्र प्रसिद्धानां तत्रैव प्रसिद्धानां चाप्युसाद्य समन्वयत्वेनाभेदाभि-
धानमप्ययुक्तमेव तथा सत्यन्यत्र प्रसिद्धानामन्यत्रैव प्रसिद्धानां च सुसाद्य समन्वयत्वेनैक्यापत्त्या त्रैविध्यापत्तेश्चा-
तुर्विध्योक्तेरयुक्ततापातात् ॥ किंच द्युभ्वाद्यायतनत्वादीनामुभयत्र प्रसिद्धत्वं किं लोकादुत श्रुत्यादिना ॥ नाद्यः अप्रसिद्धेः ॥
नान्त्यः इंद्राद्यव्यक्तादिन्यायेष्वपि तौल्यात् पूर्वोत्तरपक्षसाधकश्रुत्यादिभिः तेष्वपि तथात्वस्य वक्तुं शक्यत्वात् उभयत्र-
प्रसिद्धानामपि नान्यत्र प्रसिद्धादिभ्यो भेदः ॥ किंचाकाशज्योतिरादयः शब्दाः प्रथमतृतीयचतुर्थेषु समन्वीयंत इत्यय-
दुक्तं तदयुक्तं ॥ तेषां त्रिः प्रकारप्रसिद्धेरनुपपादयितुमशक्यत्वात् एकस्यैव प्रसिद्धित्रैविध्यायोगात् ॥ आकाशस्त-
ल्लिंगात् आकाशोऽर्थान्तरत्वादिव्यपदेशात् कारणत्वेन चाकाशादिष्विति अधिकरणेषुक्रमात् प्रथमतृतीयचतुर्थपा-
दीयेषु समन्वेतव्यानामाकाशादिशब्दानामन्यत्रोभयत्रान्यत्रैव प्रसिद्धता स्यात् ॥ यच्च नामलिंगभेदात् शब्दानां द्वैवि-
ध्यवर्णनं तदपि न युक्तं तद्वैलक्षण्यस्य दुरुपपादत्वात् यच्च रूढत्वं नामत्वं यौगिकत्वं लिंगत्वमिति सुधायामुक्तं ॥
यच्च केवलधर्मिवाचित्वं नामत्वं धर्मविशिष्टधर्मिवाचित्वं लिंगत्वमिति टीकायामभिप्रेतं तदुभयमपि न चतुरस्रं ब्र-
ह्मणि सर्वशब्दानां महायोगाविद्वद्रूढयोः स्वीकारात् किंच पादोपाधितावच्छेदकं यदि नामत्वं लिंगत्वं च तदा द्वैपाद्यमे-
व स्यात् अन्यत्र प्रसिद्ध्याद्युपपादनं च निरर्थकमेव स्यात् ॥ यद्यन्यत्र प्रसिद्ध्यादिकमेव पादोपाधितावच्छेदकं तदा
त्रैपाद्यमेव स्यात् ॥ यदि चान्यत्र प्रसिद्धिसहितं नामत्वं तथाविधं लिंगत्वं चेत्युच्यते तदोभयत्र प्रसिद्ध्यादिष्वपि तथा-

यथ्यंभाग्येन पादवाक्यैव्यवस्थित्वमतेदुर्भरत्वात् ॥ नह्यन्यत्र प्रसिद्धेर्यथान्तरभेदः पादभेदव्यवस्थापको नान्य
त्रोभयत्र प्रसिद्धेश्चेत्यत्र किंचित्गमकमस्ति तस्मात्पादोपाधिभेदो नानंदतीर्थीयोक्तोऽयुक्तः ॥ पादक्रमोक्तिरप्य
युक्ता महान्मसंगत्याये भानिभयत्र साध्यस्य भावस्येऽन्यत्रैव प्रसिद्धानां भावस्यावश्यंभावात् सोपानारोहणन्या
येनाल्पप्रयत्नसाध्यस्य भावस्यैवतूभयत्र प्रसिद्धानामेव भावस्यौचित्यात् ॥ यत्तु चंद्रिकायामुक्तरीत्या पादोपाधिभेद
वर्णनं शंकासमाधानाभ्यामासिध्युपन्यत्तेऽत्युत्तरादिभिस्तुल्यात्तुभयस्मिन् प्रसिद्धतासुत्यादितो ऽवकतोचापीत
रत्रुप्रसिद्धतायत्र यत्श्रुतिलिंगादेरन्येष्वेव प्रसिद्धताउभयत्र प्रसिद्धादेः क्रमात्तु क्षण मुच्यते यद्वा येषां प्रसिद्धिर
न्यत्र केवलैव विरोधिनी समन्वयस्योभयत्र प्रसिद्धास्तेऽद्वितीर्तिताः येषां ब्रह्मण्य प्रसिद्धिः प्रसिद्धिश्चान्यवस्तुप्रवि
रोधिन्यो द्वितीयेऽन्यत्र प्रसिद्धाः कथिताइह येषामुक्तहृदयं ब्रह्मपरत्व स्यात्संशक्तताइतिति सोविरोधिन्यस्तेऽन्यत्रैव प्रसि
द्धकाः येषां यत्स्वतरेलौकप्रसिद्धादेः सत्वात्तद्विरोधेनक्कापि ब्रह्मणि वृत्यादिकं पूर्वपक्षिणो न संमतं ॥ अतएव येषां
विषयवाक्ये आपाततोऽन्यमात्रोपस्थापकत्वं ॥ अतएव येषां समन्वयस्यान्योपस्थिति ब्रह्मानुपस्थितिभ्यामेवाति प
निबंधस्ते अन्यत्र प्रसिद्धाः येषां पुनर्वस्त्वंतरेलौकप्रसिद्धिः तत्परत्वे भवत्श्रुत्यादिकमप्यस्ति ॥ अतएव येषां विषय
वाक्ये आपाततोध्यत्यंतमन्यमात्रोपस्थापकत्वं ॥ अतएव येषां समन्वयस्यान्योपस्थितिब्रह्मानुपस्थितिभ्यां ब्रह्मपरत्व

विशेषनिर्णयायश्रुत्यंतरान्वेषणेश्रुत्यंतरेअन्यत्र वब्रह्मण्यपिप्रयोगः श्रुत्यंतरसाधारण्यंप्रवृत्तिनिमित्तादिसाधार
ण्यंवापूर्वपक्षिणोपिसंमतं ॥ अतएवयेषांविषयवाक्येआपाततोऽन्योपस्थापनसमयेतत्तुल्यतयाब्रह्मोपस्थापक
त्वं ॥ अतएवयेषांब्रह्मणिसमन्वयस्यान्योपस्थितिमात्रेणप्रतिबंधस्तेउभयत्रप्रसिध्धाः अत्रचसर्वत्रप्रत्येकंहेतुस्व
रूपफलमुखेनलक्षणत्रयंविवक्षितंतत्रचाद्येनयेषामित्यादिनाअतएवेत्यतः पूर्वेणहेतुमुखलक्षणमुक्तं द्वितीयेन
येषामित्यादिनाअतएवेत्यतः पूर्वेणस्वरूपमुखलक्षणमुक्तं अवशिष्टेनफलमुखलक्षणमुक्तमितिविवेकइति ॥
उक्तंहियस्तानिप्राधिभक्तानिहेतुरूपफलैः पृथगिति अन्यत्रप्रसिध्धानामिंद्रादिशब्दानांलोकतः सर्वगतत्वादिलिंगा
नांचलोकतोन्यत्रप्रसिध्धादित्यादिश्रुतिसाहचर्येणान्यत्रप्रसिध्धिः नतूभयत्रप्रसिध्धानामिवब्रह्मसाधारणश्रुत्या
दिनेतितत्तोवैलक्षण्यंउभयत्रप्रसिध्धानांहिद्युभ्वाद्यायतनत्वादीनांरुद्रोवायलोकाधारः विष्णोर्नाभ्यपोताम्भेत्या
दिश्रुत्यंतरसाधारण्येनाक्षरादिशब्दानांप्रवृत्तिनिमित्तसाधारण्येनसदादिशब्दानांविषयवाक्यस्थकारणत्वादिधर्मसा
धारण्येनआकाशोर्थांतरत्वादिव्यपदेशादितिसूत्रविषयेआकाशोहवैनामनामरूपयोर्निर्वहितेतिवाक्येआका
शशब्दे आकाशस्तल्लिंगादित्यत्रब्रह्मण्यपिप्रयोगस्योक्तत्वात्प्रयोगसाधारण्येनोभयत्रप्रसिध्धिः नतुपूर्वपक्ष-
सिध्धांतन्यायेनेतिनसांकर्यंवकाशइत्यादिकमन्यत्रप्रसिध्धादीनांप्रत्येकंहेतुस्वरूपफलमुखेनलक्षणत्रयपरिष्क
रणेनोक्तपादोपाधिसांकर्यनिवारणंतदपिमंदमेव ॥ एवमपिप्रथमचतुर्थपादयोरुपाधिसांकर्यस्यमागुक्तस्याप

रिङ्गात् तदुद्दं अव्यक्तादिशब्दानां भयपरचतुर्थपादीयानां लोकप्रसिद्ध्यादिविरोधेन ब्रह्मणि वृत्त्यादेः पूर्वपक्षस्यानभिमत
त्वादिदोषात् ॥ न च भगवत्पादीये लोकप्रसिद्धपुरुषभकस्तुत्वस्य त्वं चतुर्थपादीये तदापि स्याभिलिधैजात्यं शांकितुं वाक्यं
वशादिभिर्लोकप्रसिद्ध्यादिरोधप्रयुक्तावैलक्षण्येन सांकर्यपरिहारात् ॥ नन्वेवं प्राद्विवाद्दृ इंद्रादिस्वरूपे लोकप्रसिद्धिः अव्यक्तादिशब्द
अव्यक्तादिस्वरूपे लोकप्रसिद्धिः ... परत्वादिलिंगाद्दृश्यत्वनो वैलक्षण्यं शंक्यं ॥ इंद्रादिशब्दे द्यावृ व्यक्तज्योतिर्मा
नृणादिशब्देष्वपि अव्यक्तादिस्वरूपे लोकप्रसिद्धेः सत्वात् सर्वगतत्वादिलिंगे लोकप्रसिद्ध्युपष्टंभकादित्यादिशब्दग
तादित्यस्वरूपे लोकप्रसिद्धेः ... रत्वादिलिंगगत लोकप्रसिद्धेरपि अव्यक्तादिशब्दानां तत्स्वरूपे लोकप्रसिद्धि
... कत्वस्य वक्तुं शक्यत्वात् इंद्रादिशब्देष्वपि लोकप्रसिद्ध्युपष्टंभकत्वाविशेषात् ॥ अथास्तु भूतुपष्टंभकत्वौ
त्यं न तथापि श्रुतिगतशाब्दस्य अधिकमव्यक्तादिशब्दे नेंद्रादिशब्दे तत्स्वलक्षणे विवक्षितं ॥ तथाचोक्तं चंद्रिकायां तत्र श्रु
त्यादिकं चतुर्थपादीयश्रुत्यादि ... श्रुत्यादेः प्राबल्यं हि प्रवृत्तिनिमित्तस्य तदधीनत्वादिना ब्रह्मणि शब्दस्य पर
ममुख्यत्वापितस्य शब्दस्य तद्युक्तवाक्यस्य वा अपरममुख्यवृत्त्या अन्यपरत्वं विना अनुपपद्यमानत्वं भत्वापातनो
ब्रह्मण्यसंभवमात्रं नापि सर्वथा असंभवः येनासिद्धतानुदयः स्यात् तत्रास्त्यव्यक्तादिशब्दे तद्युक्तवाक्ये च अन्यपराव
रत्वादिलिंगाविरोधात् इंद्रादिशब्देषु तन्नास्तीति न सांकर्यमिति ॥ तदप्यसत् अव्यक्तादिशब्देष्वपरत्वादिलिंगाना

इंभकश्रुत्यादिप्राबल्यस्य दुर्वारत्वात् ॥ ननु तत्रलिंगानामन्यथासिद्ध्या तद्बाधकतायां स्याअधरत्वादीनामप्यन्यथा
सिद्धिसद्भावात् ॥ किंचेंद्राव्यक्तादिपदानां लोकतोन्यत्रप्रसिद्ध्यविशेषेपि यद्युपष्टंभकश्रुत्यादिवशात् पैंगास्यं तदा द्यु
भ्वाद्यायतनत्वादीनामपि जायमानत्वादिरूपान्यत्रप्रसिद्धलिंगसाहचर्यवशादन्यत्रप्रसिद्धत्वापत्त्या तत्रोभयत्रप्र
सिद्धिर्नसिध्येत् लोकतोन्यत्रप्रसिद्धादित्यादिश्रुतिवशात् सर्वगतत्वस्याप्यन्यत्रप्रसिद्ध्युपपादकत्वात् अथ लोक-
तोन्यत्रप्रसिद्धजायमानत्वादिलिंगसाचिव्येन द्युभ्वाद्यायतनत्वादेरन्यत्रप्रसिद्धत्वेपि तद्व्यतिरेकस्य स्वतोन्यत्रप्र
सिद्धिवत् ब्रह्मण्यपि संभवादुभयत्रप्रसिद्धिरविकलेति तृतीये तन्निवेशइत्युच्यते तर्हींद्राव्यक्तादिपदेष्वुपष्टंभकवैक
ल्येन लोकतोन्यत्रप्रसिद्धिविशेषात् सांकर्यं दुर्वारमेव ॥ किंचांतर्यामित्वादिकं यथान्यसाचिव्येनान्यत्रप्रसिद्धमु-
च्यते तद्वत् द्युभ्वाद्यायतनत्वमप्यन्यसाहित्येनान्यत्रप्रसिद्धमंतर्यामित्वं चेतरसाहित्येनोभयत्रप्रसिद्धमस्तु ॥ यत्तु
समाख्याश्रुतितौल्याभावोप्यन्यत्रप्रसिद्धिलक्षणांतर्गतः स च न द्युभ्वाद्यायतनत्वादावस्ति रुद्रो वायलोकाधारः लोका-
श्च लोकिनश्च विष्णावोताश्च प्रोताश्चेति तत्रोभयत्र समाख्याश्रुतितौल्येन न द्युभ्वाद्यायतनत्वादावन्यत्रप्रसिद्धतेति
कल्पनं ॥ तदप्यसत् इंद्रादिशब्देपि प्रक्षैंद्रमग्निं यमिंद्रमाहुरित्यादिसमाख्याश्रुतितौल्येनान्यत्रप्रसिद्ध्यभावापत्ते.॥
यदपि द्युभ्वाद्यायतनत्वस्योभयत्रप्रसिद्धत्ववत् अन्यत्रप्रसिद्धत्वस्य सत्वेपीतरानपेक्षस्वतउभयत्रप्रसिद्धत्वमादा
य तृतीये संगतिरस्तु अन्यथाक्षेपिरूपहृदयवतो विचारो न स्यादिति द्युभ्वाद्यधिकरणे चंद्रिकायामुक्तं ॥ तदपि नस

त्तनाद्दिंतद्धदंतर्यामित्वमपितृतीयेस्यादुभयत्रसंगतस्यपत्रकाणिविचार्यत्वेसमानेचकृतंपादोपाधिवैजात्यकल्प
नेन ॥ किंचैवंस्वतउभयत्रप्रसिध्धानांतृतीयेनिवेशोस्वतोन्यत्रप्रसिध्धानामेवद्वितीयेनिवेशोयुक्तः स्यात्तथाच
दिस्यादिश्रुतिसाहचर्येणान्यत्रप्रसिध्धसर्वगतत्वादीनांद्वितीयेनिवेशोनस्यात् ॥ यत्तुसर्वगतत्वादेः स्वतःप्रसिं
ध्युपपादनंतत्टीकाग्रंथादिविरोधात्बहुप्रमाणविरोधाच्चासमंजसं ॥ वस्तुतस्तुयथानंदमयशब्दस्यनामलिंगोन
भयात्मकतयोभयत्रसंगतत्वेप्रतिग्रंथमतिक्रमेकारणाभावात्प्रथमतोनिरूपणं ॥ एवंद्युभ्वाद्यायतनत्वस्योभ
यरूपत्वेनोभयसंगतत्वेप्रथमानतिक्रमादादावेवतन्निरूपणंयुक्तमिति ॥ अपिचोक्तपरिष्कारेपिकथमाकाशज्यो
तिरादिपदानांपादत्रयविषयताएकस्यत्रैविध्यायोगस्यप्रागुक्तस्यापरिहारात्नहिलोकतःश्रुतिलिंगादिभिश्चा
न्यत्रैवप्रसिध्धतयाब्रह्मणिवृत्तिशून्यतयापूर्वपक्ष्यभिमतानांपुनर्ब्रह्मणिअन्यत्रचवृत्तिमत्तयापूर्वपक्ष्यभिमतत्व
संभवः ॥ नन्वाकाशस्तल्लिंगादित्यत्रब्रह्मण्याकाशपदस्यप्रयोगसाधारण्यादुभयत्रप्रयोगः सिध्यतिइतिचेन्न
॥ तथापिपूर्वपक्षिणोन्यत्रैवब्रह्मणिवृत्तेरभिमतत्वात् ॥ आकाशोहवैनामनामरूपयोर्निर्वहितेत्यत्राकाशपदस्या
न्यपरत्वेसर्वाणिहवाइमानीत्यत्राप्यन्यपरत्वावश्यंभावेब्रह्मपरत्वासिध्धेश्च ॥ अतएवाकाशादेवसर्वाणिभूतानी
तिछांदोग्यस्थाकाशस्याब्रह्मत्वेयदेषआकाशआनंदोनस्यादितितैत्तिरीयस्थाकाशोपिविष्णुर्नस्यादित्युच्यतेमा

स्युच्यते ॥ तथाज्योतिर्दर्शनादित्यत्र वाजसनेयवाक्यस्थज्योतिषो ब्रह्मत्वे अग्निसूक्तस्थज्योतिरपि तथास्या-
दित्युच्यते न तस्मादाकाशशब्दस्य प्रयोगसाधारण्यदुभयत्रप्रसिद्धेरित्युक्तिरयुक्ता यदि च योगेन ब्रह्मवृत्तिता तस्यापीष्टे-
त्युच्यते तर्हि रूढेर्योगापहारकत्वं वदतः पूर्वपक्षिणस्तदपि न संमतमिति प्रत्युच्यते इंद्रादिशब्दानामपि तथैवोभय-
त्रप्रसिद्धतान्यप्रसज्येत ॥ एतेनाकाशोऽर्थान्तरत्वादिव्यपदेशादित्यनेन द्युभ्वाद्यधिकरणस्यैव सन्निहितत्वादाक्षेपा-
दाकाशस्तल्लिंगादित्यस्येत्युभयत्रप्रसिद्धतानंद्रिकोक्तानिरस्ता ॥ प्राणस्तथानुगमादित्यत्रैव पदांतरस्थस्याप्या-
क्षेपसंभवादन्यथाज्योतिर्दर्शनादित्यत्र टीकाविरोधाच्च ॥ अत एव ज्योतिश्चरणाभिधानादित्यत्र वह्निरिति पूर्वप-
क्षः ज्योतिर्दर्शनादित्यत्र तु जीव इत्यतो न तदाक्षेप इति चंद्रिकोक्तिरपि टीकाविरोधान्निरस्ता ॥ ब्रह्मान्यविषयक-
त्वस्यैवाक्षेपप्रयोजकत्वाच्च ज्योतिःशब्दस्याग्निपर्यायेष्वपाठेन प्रकाशकत्वस्य च साधारण्येन चान्यत्र प्रसिद्ध्यदुरूपपा-
दत्वाच्च कथंचित्तदुपपादनेन प्रथमचतुर्थपादीयं न स्यात् ॥ यत्त्वाकाशस्तल्लिंगादित्यतः प्राक्ब्रह्मपरत्वाद्युक्तैरन्य-
त्रप्रसिद्धेस्तदुपपादनं तन्न तर्हि चतुर्थपादे अन्यत्रप्रसिद्धिर्न स्यात् प्राक्ब्रह्मपरत्वस्योक्तत्वात् ॥ न च तत्र ब्रह्म-
लिंगाभावेन लौकिकतोऽन्यत्रप्रसिद्धेरबाधादन्यत्रप्रसिद्धतेति कल्पनायुक्ता तथापि प्रयोगासाधारण्यमयुक्तायां
उभयत्रप्रसिद्धतायाद्दुर्वारत्वात् ॥ अन्यथा आकाशो ह वै नाम नामरूपयोर्निर्वहिता इत्यत्रापि तदभावप्रसंगात् यदि च
संभूतत्वरूपान्यलिंगबलादन्यत्रप्रसिद्धेत्युच्यते तर्हि येनाभेति प्रसिद्ध्युपपादकनिपातबलात् लोकप्रसिद्धेरे-

प्रयाणाद्युक्तनिश्चयेन नामरूपनिर्वोढृत्वस्येदानीमपि ब्रह्मलिंगत्वानिश्चयेन तथात्वे पूर्वपक्षानुत्थितिप्रसंगेन च तत्राप्यन्य
प्रसिद्धिनिश्चयसंभवात् ॥ किंचैवं ज्योतिर्दर्शनादित्यत्रापि ज्योतिःशब्दस्योभयत्रप्रसिद्धत्वान् स्यात् प्राणेषु हृदयं त
ज्योतिरिति प्राणसंबंधादिलिंगेन जीवपरत्वनिश्चयात् प्रयोगसाधारण्यमात्रादुभयत्रप्रसिद्धिनिश्चयेन ज्योतिरुप
क्रमात्तु तथात्वेऽपि तथात्वं स्यात् लोकप्रसिद्ध्यापातात् तदनंगीकारे चाकाशशब्देऽपि तथात्वं स्यात् ॥ किंचा
त्र न आकाशः संभूत इत्यत्र ब्रह्मलिंगाभावविपरीतलिंगाभ्यां लोकप्रसिद्ध्यनंगीकारे अंगुष्ठमात्रः पुरुष इति वाक्य
स्थे ज्ञानशब्दस्यान्यत्र प्रसिद्ध्यभावः स्यात् ब्रह्मलिंगाश्रवणात् मत्युतोर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यतीति भा
गोत्वेतृत्वादिविपरीतलिंगश्रवणात् ॥ न च तत्र सर्वदेवोपास्यत्वानन्यथात्वादित्यादिरेकत्वसाधारण्यादुभयत्र
प्रसिद्धता टीकोक्ता युक्ता तथा सति नित्यमहिमवत्त्वविरोधेनाज्ञब्राह्मणशब्दयोर्मोक्षजनकज्ञानविषयत्वेन पुरुषश
ब्दस्य नामरूपनिर्वोढृत्वादिना आकाशशब्दस्य च तदित्यादिनैवोभयत्रप्रसिद्धता स्यात् अस्तु वा यथाकथंचिदुभयत्र
प्रसिद्धतैवास्मादिष्टा अक्षरशब्दे द्रष्टृत्वादिविरोधेन तदिभंगेनापि नाशित्वायोगेनोभयत्रप्रसिद्धता यामस्मादिष्ट
त्वादिति चेत् सत्यं तर्हि पारिभाषिकमेवोभयत्रप्रसिद्धत्वं स्यात् न चेंद्रादिशब्देष्वव्यक्तादिशब्देष्वपि तु स्वंइदं तत्पर्यानुसारे
ण साधारण्याविघातात् तद्रूपयोगापहारकत्वात् तदनंगीकारश्चेत् तुल्यमीशानादिशब्देष्वपीति दिक् ॥ इदं चात्र बोध्यं-
अन्यत्र तत्रे लोकप्रसिद्ध्याश्रितिः सा हि तथा तथा समन्वानां शब्दानां तद्विरोधात् ब्रह्मणि वृत्तेः पूर्वपक्षानभिमतत्वमाद

यद्धादिशब्दानामव्यक्तादिशब्दानां चान्यत्र प्रसिद्धत्वमन्यत्रैव प्रसिद्धत्वमित्यस्य कथंचित् संभवेपि अक्षरे ज्ञानवज्ज्ञा
म्हणाकाराव्यक्तादिपदानामन्यत्र प्रसिद्धत्वं कथं तदुक्तलक्षणेन सिध्यति ब्रह्मणः इतरविषयलौकिकप्रयोगाभावा
प्रयोज्यव्यक्तिविशेषनिर्णयोपयुक्तश्रुतिसाधारण्यादेः पूर्वपक्ष्यनभिमतत्वं तथा प्रत्यभिज्ञाप्रसिद्धताग्रहकत्वमुक्तं तस्या
अक्षरे ज्ञानवज्ज्ञादिपदेषु नास्ति तेषामन्यत्र लोके प्रयोगसत्त्वेन तदभावघटितलक्षणाभावात् ॥ ननु पूर्वपक्ष्यभिमत
वस्तुविषयकलौकिकप्रयोगाभावोस्मदभिमतः सचास्त्येवप्रतीतत्वात्तु चतुर्मुखादावक्षरे ज्ञानब्राह्मणादिपदानां पू
र्वपक्ष्यभिमतत्वात्तत्र च लौकिकप्रयोगाभावादिति चेन्न यज्ञपदे इंद्राद्युपपरत्वेन पूर्वपक्ष्यभिमते तथापि तदसिद्धेः
सर्वगतत्वादावतिव्याप्तेश्च तत्रापि लौकिकप्रयोगाभावात् श्रुतिसाधारण्याच्च तद्युपष्टंभकादित्यादिपदेषु लौकिकप्रयो
गासाधारण्यं च तत्र ब्राह्मणाद्युपष्टंभकाजादिशब्देष्वपीति ॥ एवं स्वरूपलक्षणान्यपि न चतुरस्राणि अन्यमाभोपष्टं
भकत्वसंभवादित्याव्यक्तादिपदेषु सम्मतत्वेन सांकर्यानपायात् ॥ न चासंदिग्धत्वेनास्तीति कत्वाभ्यां वैलक्षण्यं शंक्यं ॥ अन्य
माभोपष्टंभकत्वघटकाभावांशयोरासंदिग्धत्वानिरूपणात् ॥ तथाहि तत्किं न्यायानुगुणत्वं न्यायांतराप्रतिबद्धत्वं
वा आद्ये पूर्वपक्ष्यभिमतन्यायानुगुण्यमुभयत्राप्यस्तीति तदेव सांकर्यं द्वितीये सिद्धांतन्यायप्रतिबद्धत्वादसंभवो दुर्वा
॥ अतएवश्रुत्यनुगुण्यं श्रुत्यंतराप्रतिबद्धत्वं वा न तत् इंद्रादिपदेष्वपि श्रुत्यनुगुण्योपपादनात् सिद्धांताभिमतश्रुति
बलवत्त्वस्योभयोः सत्त्वेनासंभवात् ॥ अथ प्रबलश्रुत्यनुगुण्यं तदभावत्वं चापरप्रबलव्युत्पत्त्यादिनान्यपरत्वमंतरे

तु न दर्शपूर्णमासत्वं विनियोगेन ॥ इत्यादिपदेष्वादिनप्रसंगस्य प्रागुक्तरीत्या परिहारात् । न चैवं ह्यत्र तत्र तत्तदसाधारणलिंगा
नामवपदत्वादीनामेव पक्षस्तुत्युदीरितानामप्यपरत्वं विनानुपपद्यमानत्वे सत्याद्दङ्कालातिरिक्तापातमतो
तत्त्वतो दर्शपूर्णमासविशेषाङ्गत्वं सर्वेषां नैयायिकानुगुणत्वरूपापादनमतिप्रसक्तत्वं च दृष्टगुणत्वरूपालौकिकाभावरूपत्वा
त् ॥ एतेन फलमुखत्वलक्षणमपि निरस्तं ॥ किंच सर्वेषामङ्गानां समन्वयो नामत्र हि फलविषयकत्वाभिप्रायः तत्रान्यब्रह्म
त्वाविषयकत्वज्ञानं प्रतिबंधकं न तु ब्रह्मानुपस्थित्यादिकमपि गौरवात् तत्र हि एवं प्रतिबंधकं न त्वन्यद् दुर्भयत्वमपि स्वेष्ट-
भावात् अतो न तत्प्रयुक्तमपि पैनात्यं प्रयुक्तं कार्यानुमानिरूपमतिबंधेन नात्यंतिकत्वं तत्रापरत्वं प्राप्यभावरूपेण तद्योगा
त् कथं विधेयोऽपि पाआत्यंतिकप्रतिबंधैकफलकयोरपि नानालिंगयोः पादभेददर्शनेन तस्य पादभेदोपापित्वायोगा
त् आत्यंतिकप्रतिबंधफलकत्वाविशिष्टं नामलिंगत्वं च भवेत्स्वकर्तुपाधिश्चेत्तथैव द्वितीयतृतीययोरपीति प्राक्ति ध्वंसा
दित्युक्तमेव ॥ यत्तु सर्वेषां वाक्यानां समन्वयस्य पादद्वयस्तु ह्येकत्वेन प्राधान्यं तत्पूर्वमीमांसायां तृतीयस्य दशमाध्याये-
ष्वदर्शनादयुक्तमिति विद्वांसस्त्वेवमेव ॥ यद्यप्यापातप्रसिद्ध्या भेदमाश्रित्य प्रथमं पादभेदः इदानीं तु तत्त्यागेन पादैक्यं
कृतमिति तद्युपहास्यमेव पादैक्ये सति प्रसिद्धापातप्रसिद्धभेदाश्रयणां कृतेन तदनाश्रयणमित्यर्थविनिगमकानुप
न्यासात् इच्छाया एव नियामकत्वे पादोपाधिनिरूपणस्य क्लेशैकफलकत्वापत्तेः महायोगविद्भूदिव्यामेलीकरणं तन्न
द्व्योरक्ति तद्द्वयोरित्यत्र शपथमंतरेणानाश्वासः ॥ यदपि क्रमोपपादनं चतुर्थपादीय समन्वयस्य सर्वाधिकारित्वात्तत्रि

प्रागुक्तश्रुतिलिंगादिसापेक्षाया अन्यपरत्वशंकायास्तदनंतरभावित्वात्तत्कृतप्रवृत्तिनिमित्तगुणमात्रसिध्यफलक
त्वकारणत्वादिसिध्यफलकत्वाच्चांत्यत्वादितरयोस्तु महामल्लभंगन्यायेनान्यत्रप्रसिद्धसमन्वयस्य प्राथम्यं यथोक्तमनु
व्याख्याने ॥ तत्र प्रथमतोऽन्यत्रप्रसिद्धानां समन्वयः शब्दानां वाच्य एवात्र महामल्लेशभंगवदितिन्यायाद्वा अन्यत्रप्रसिद्धे
अन्यपरत्वस्य प्रसिद्धिमात्रमूलकत्वेन स्थूलत्वादुभयत्रप्रसिद्धे श्रुत्यादिमूलकत्वेन सूक्ष्मत्वादन्यत्रैव प्रसिद्धे अभि
हितोभयमूलकत्वात् पादक्रम इति तदपि न असार्वाधिकारिकत्वेपि प्रयत्नाधिक्यसापेक्षत्वे महामल्लभंगन्यायाविष
त्वानपायात् ॥ किं प्रागुक्तश्रुतिलिंगादिसापेक्षत्वं चायुक्तं सिद्धांते तेषामनुपयोगात् श्रुतिलिंगादिस्वरूपत्वं न्यायत एव
च कल्प्यत इति न तदर्थमपि तदपेक्षा गुणमात्रसिद्धिफलकत्वं चासिद्धं द्वितीयसूत्रोक्तलक्षणातिव्याप्तिनिरासफलक-
ताया कारणत्वेन चाकाशादिश्चेत्यादिना सूत्रकारेणैव सूचितत्वात् तथैव प्रागुपपादितत्वाच्च उत्तमाधिकारिकत्वे नन्वतु
र्यपादीयसमन्वयस्यैव प्राथम्यमौचित्याच्च प्रवृत्तिनिमित्तत्वादधीन्योपपादकतया तस्य सर्वोपजीव्यत्वाच्च इतरयोरपि स
मन्वेतव्यब्रह्मोपस्थितितदनुपस्थित्योः पौर्वापर्यं स्वसुलभतया अन्यत्रप्रसिद्धस्य ब्रह्मणि समन्वयस्य समन्वेतव्यब्रह्मो
पस्थितिसापेक्षतदुपजीव्यतयोभयत्रप्रसिद्धानामेव प्राथम्याच्च ॥ अत एव महामल्लभंगन्यायाविषयत्वस्यापि संभवाच्च त
दाश्रयणेपि प्रागुक्तरीत्या अन्यत्रैव प्रसिद्धप्राथम्यौचित्यात् उभयमूलकादन्यतरमूलकस्यैव सूक्ष्मतयान्यायस्यापि विपरी
तत्वाच्च लोकस्तु सन्निमूलकस्यार्थमनिपक्षिकश्रुतिमूलकस्य तोपि स्थूलत्वाच्च ॥ यदपि उभयत्रप्रसिद्धैरन्यत्रप्रसिद्धानि नू

प्यत्वात् अन्यत्रैव प्रसिद्ध्येत्येवकारार्थभूतव्यवच्छेदविषयतदुभयनिरूप्यत्वात् पादक्रम इति ॥ तदपि न उक्तनिष्कर्षस्य
परस्परानिरूपणानपेक्षत्वात् अन्यत्र प्रसिद्धेरपि तात्पर्यतोऽन्यत्रैव प्रसिद्धिनिरूपकयोरुभयत्र प्रसिद्धानामेव निरूपण
स्याथाप्यप्रसंगाच्च अन्यत्र प्रसिद्धेषु नाम्नां प्रथमं निरूपणे पिनास्ति विनिगमकं। यत्तु रूढानां धर्मिधीजनकत्वात् प्रा
थम्यं योगस्य तु धर्ममात्रगोचरत्वात् अप्राथम्यं योगस्याप्यवयववृद्धिसापेक्षत्वाच्चारमत्रूढेश्च योगानपेक्षत्वोपर्य
कल्पनं ॥ तन्न ॥ रूढेरपि प्रवृत्तिनिमित्तभूतधर्मसापेक्षत्वात् योगरूढनाम्नां योगसापेक्षत्वेनोक्तविनिगमकस्याप्य
व्यापकत्वाच्च इंद्रादिनामसमन्वयस्यांतस्त्वलिंगसापेक्षत्वमंगीकुर्वतां मतेऽनुक्रमानुपपत्तेश्च सर्वस्यापि नाम
समन्वयस्य लिंगाधीनत्वेनोपजीव्यत्वेन तत्प्राथम्यौचित्याच्च प्राच्यत्वाधीननामसमन्वयस्य तत्साधकेक्षणीयत्वादि
लिंगाधीनतया तस्य चात्मशब्दादीनां नामाधीनतया अन्योन्याधीनत्वाच्च द्युभ्वाद्यायतनत्वादिसमन्वयस्य हेतूक्तात्म
नामसमन्वयाधीनत्वाच्च ॥ एतेन लिंगैर्नामसमन्वये उक्ते तेषु वा तज्जातीयेष्वन्येषु प्राक्लिंगेषु ब्रह्मपरत्वासिद्धिशं
कायां तन्निरास इति लिंगानामानंतर्यं लिंगसमन्वयस्तु लिंगांतराधीनो न नामाधीन इति निरस्तं ॥ सर्वगतत्वा
दिलिंगानां नामाधीनसमन्वयत्वात् ॥ किंचान्यत्रैव प्रसिद्धानां प्रबलश्रुतिलिंगादिभिः ब्रह्मपरत्वे सति कैमुतिकन्या
येनान्यत्र प्रसिद्धानामुभयत्र प्रसिद्धानां ब्रह्मपरत्वसिद्धिसंभवादितरवैयर्थ्यं चतुर्थपादस्य प्राक्पादानुपजीव
कत्वस्योक्तत्वेन तत्पूर्वपक्षेष्वप्येतन्न्यायोपस्थित्यविघातात ॥ न चाकाशस्यासंभूतत्वादिवत् सर्वलोकगतित्वादि

प्रसंगो दोषः बाधाबाधाभ्यां विरोधात् ॥ केचित्तु उक्तान्यत्र प्रसिद्ध्यलक्षणमव्यक्तादिपदानि व्याप्तं लोकप्रसिद्ध्यतद्वाक्यगत
परत्वादिलिंगसान्निध्यप्रतिपत्त्यभ्रम्हवाक्यस्य पूर्वपक्षत्वेन पूर्वपक्षस्याभिमतत्वात् ॥ नच माषत्वविशेषणात्तन्निस्तारः तथापि लोकप्रसिद्धि
साध्यस्युक्तप्रतिबंधापरिहारात्तदा रात्रित्वसाहचर्येणांतर्यामित्वस्य चजायमानत्वसाहचर्येण द्युभ्वाद्यायतनत्वस्याप्यन्यत्र प्रसिद्ध्य
सभावनयातिव्याप्तेश्च ॥ यत्तु समाख्याश्रुतितौल्याभावोपि लक्षणे विवक्षितः सच द्युभ्वाद्यायतनत्वादौ नास्तीति नातिव्याप्ति
रिति तन्न ॥ इंद्रादिशब्देषु प्रम्हेंद्रमग्निमित्यत्र प्रसिद्धिसंपादिकायाः यमिंद्रमग्निमाहुरिति विष्णुप्रसिद्धिसंपादिकाया
श्च श्रुतेरंतरस्तद्धर्माधिकरणोक्तवैयोदाहृतत्वेन तेष्वव्याप्तेः ॥ यत्तु द्युभ्वाद्यायतनत्वस्य यद्यप्यन्यसापेक्षा अन्यत्र प्रसिद्धि
रस्ति तथापि तन्निरपेक्षो भयप्रसिद्धिमादाय तृतीयेधिकरण इति कल्पनं ॥ तन्न यस्मिन् द्यौरित्यारभ्य स एषोंतरश्चरते
बहुधा जायमान इति श्रवणेन स्वं वाक्यगतजायमानत्वसापेक्षायाः अन्यत्र प्रसिद्धेः श्रुत्यंतरसापेक्षो भयत्र प्रसिद्ध्यपे-
क्ष्यांतरंगत्वात् प्रथमपाद एव तन्निरूपणौचित्यात् अन्यथेंद्रादिशब्दानामपि तृतीयपादसंगत्यापत्तेश्च ॥ सुब्रुसुक्तांत्यो
भेदेनेति तृतीयपादस्थद्युाद्यधिकरणविषये यत्तत्सत्प्रपरयत्यन्यासंतइत्यादिवाक्यगते लोकप्रसिद्धिप्रतिबंधभ्रम्हत्व
निरूक्तत्वेन पूर्वपक्षाभिमते श्रुतितौल्याभाववति स्वप्रद्रष्टृत्वादावतिव्याप्तेश्च ॥ यत्यादिशब्दस्य इत्यस्याविषये स आए
षमहानज आत्मेति लोकप्रसिद्ध्याज शब्दसमभिव्याहारादिगतचक्षुर्मुखप्रसिद्धिप्रतिबंधभ्रम्हवृत्तिकेसमाख्याश्रुतितौ
ल्याभाववत्येव नित्योमहिमा ब्राम्हणस्येति वाक्यगते ब्राम्हणशब्दे कंपनादिति सूत्रविषये तथा विधे पद्मशब्दे चातिव्या

थेभ्य ॥ यत्तु वज्रादिनाम्नां स्वप्नद्रष्टृत्वादिलिंगानां च लोकप्रसिद्धिपूर्वपादहृदयन्यायाभ्यां संपन्नप्रसिद्धानामुभयप
रत्वमेव पूर्वपक्षस्याभिमतमिति तन्न नातिव्याप्तिरिति फलादिसूत्रस्थवृत्तिकारायुक्तं ॥ तदपि न सत् तथा सति व
ज्रश्रुतशुद्धत्वाद्युपपत्तिगेन कंपनादिलिंगब्रह्मलिंगान्यथानयत्र पूर्वकं वज्रादिशब्दानां मुख्यादिपराण्येवेति पूर्वपक्ष
वर्णनस्यानुपपत्तिप्रसंगात् पूर्वपादोक्तन्यायेनैव वज्रादिशब्दानां भगवत्परत्वसिद्धौ तदधिकरणवैयर्थ्यापत्तेश्च ॥
वज्रादिशब्दानामाकाशादिशब्दानामिव लौकिकप्रसिद्धिसत्त्वेपि भगवत्परत्वसिद्धौ तत्साधकलिंगानां लोकप्रसि-
द्ध्यपेक्षया बलवत्त्वाभावेऽनुपपत्तेः बलवत्त्वेन ब्रह्मभावपरत्वस्यापि सिद्धेश्च ॥ अन्यथा आकाशादिशब्दानामप्युभय
परत्वशंकानिरासाय पुनर्विचारापत्तेः तन्न्यायेन परत्वस्थापकन्यायेन तत्परत्वस्थापकपूर्वपादस्य गतार्थत्वाच्च ॥ किंचैवं
नामपादन्यायेनादित्यादिनाम्नामपि ब्रह्मणि प्रयोगस्योक्तप्रयोगत्वात् तत्साहित्येन सर्वगतत्वादिलिंगानामपि हैती
यानां ब्रह्मपरत्वसिद्ध्या तदधिकरणवैयर्थ्यापत्तिः ॥ ननु पूर्वलिंगसमन्वयानुन्नयास्यपुरुषा पिप्रुस्त्यादिरूपादि-
त्यादिप्रसिद्धलिंगैस्तत्प्रसिद्ध्युपजीवनात् न साहचर्येण सर्वगतत्वादेर्ब्रह्मपरत्वासिद्धिरिति वाच्यं ॥ तदर्थं न त्वा
दित्यव्यक्तनयगतगुणसूत्रोक्तन्यायेनान्यश्रुतीनामन्यलिंगानां च ब्रह्मणि मुख्यत्वसिद्ध्या लिंगविशेषेणाप्यादित्यस्य
प्युपजीवनायोगात् वक्ष्यमाणसिद्धांतन्यायाच्छादनेन पूर्वपक्षकरणे न्यायेनैव तत्सिद्धांतसिद्ध्या एतस्य वैयर्थ्या
त् वज्रादिशब्दानामपि पूर्वन्यायाच्छादनेनान्यमात्रपरत्वपूर्वपक्षसंभवाच्च ॥ यदित्वादित्यशब्दस्य पूर्वपादीयाधिकर-

णाविषयवाक्येष्वश्रुतत्वान्निरवकाशादित्यादिलिंगानामव्यधिकरणान्तरविषयवाक्येष्वश्रुतत्वान्न कथंचित्तत्तद
धिकरणाविषयत्वाभ्युपगमेनान्यत्र प्रसिद्धत्वात् तदा वज्रादिशब्देष्वपि तुल्यमिति तत्रातिव्याप्तिः धज्र ले पाइ ताअथ
वज्रादिशब्दाः प्रसिद्धा एव न चैवं तृतीयपादासंगतिः यथा पदशाकपालो भवतीत्यादेरवांतरसंगतिलोभादर्थवादस्व
स्वस्थानातिक्रमः तथा वज्रादिपदानामप्यवांतरसंगतिवशात् स्वस्थानातिक्रम इति मनं तदा अनुगतानतिप्रसक्त
सत्वादौ पाधिनिर्वचनप्रयासवैफल्यात्॥ एतेन हेतुमुखलक्षणरूपैतत्त्वनूपमुखलक्षणद्वयमपि निरस्तं द्युभ्वाद्या
यतनत्वस्वप्रद्रष्टृत्वबोधकलिंगयोर्वज्रब्राह्मणनामधेययोश्च तार्तीययोरतिव्याप्तेः॥ तत्र त्वया सर्वगतत्वबाधक
शब्दवदिंद्रादिनामवज्ञ प्रागुक्तविधया आपाततोऽस्य साहचर्येण स्वत एवान्यमात्रोपस्थापकत्वसत्वाभ्युपगमान्नहि
तीयलक्षणस्याव्यक्तादिशब्दे अव्याप्तेश्च उभयत्र प्रसिद्धत्वं यदि लोकतः तदा द्युभ्वाद्यायतनत्वे ज्योतिरादिनाम्नि चाव्या
प्तिः श्रुत्यादिना वेदानंदमयेंद्राव्यक्तादिशब्देष्वपि पूर्वोत्तरपक्षोदाहृतश्रुत्यवगतोभयोपस्थापकताकेष्वतिव्याप्तिः-
आकाशज्योतिरादिपदानामुभयत्र प्रसिद्धत्वांगीकारे प्रथमचतुर्थपादीयत्वानुपपत्तेः तदनंगीकारे तार्तीयत्वानुपप
त्तेः॥ एवं द्वितीयतृतीयपादीयेऽक्षरशब्दस्य व्याप्तिर्दृष्ट्या चांद्रिकोक्तहेतुत्वनूपफलमुखलक्षणत्रयमपि न युक्तं॥ इंद्रादि
शब्दे द्युभ्वाद्यायतनत्ववत् श्रुत्यवगतसाधारण्येनाकाशशब्दवत् प्रयोगसाधारण्यवति चातिव्याप्तेः चतुर्थपादीयज्यो
तिःशब्दे चातिव्याप्तेश्च ज्योतिर्दर्शनादित्यत्र ज्योतिःशब्दस्य विष्णुपरत्वस्थापनेन तस्येहाक्षेपेणाविष्णौ प्रयोगाभ्य

ब्रह्मत्वाभिधानत्वात् आकाशशब्दस्य धातयात्वस्वीकारात् ॥ यद्यपि च संज्ञादिवाक्ये ब्रह्मलिंगाभावेन बाधकाभावात् क-
र्मकोशाधिप्रसंग तद्रूपनवद्बाधक तद्भावेन नान्यत्रैव प्रसिद्धता तातथापि प्रयोगसाधारण्यमयुक्तं साधारण्याभि-
तेनाव्याप्तिर्दुर्वारा अन्यथाकाशोऽहमस्मीति नभपर्यायोनिर्धारिते इति वाक्यस्थाकाशशब्दाव्याप्तेः यज्ञ ब्राह्मणस्य प्रद्युत्वा-
दिशब्देष्वव्याप्तेश्च ॥ अत एव स्वरूपमुखं फलमुखमपि लक्षणद्वयं मयुक्तं इंद्रादिशब्दानामपि श्रुतिसाधारण्यप्रयोग
साधारण्याप्रायुक्तयोगस्थापकत्वात् ॥ अत एवान्योपस्थितिमात्रप्रतिबंधसमन्वयकत्वाच्च तत्रातिव्याप्तेः अन्यथा आ-
काशशब्दस्यापि तदभावप्रसंगात् चतुर्थपादीये ज्योतिः शब्देऽपि विघ्नोपस्थापकत्वसंभवेनातिव्याप्त्यापत्तेश्च वज्रादिशब्दा
नाम्नापुपनिषेधमात्रोपस्थापकत्वेन तत्राव्याप्तेश्च चतुर्थपादीयोपाधिरन्यत्रैव प्रसिद्धत्वं यथाश्रुतमिंद्रादिशब्देष्व-
तिव्याप्तं श्रुत्यादिभिरन्यत्र प्रसिद्धत्वं न चेंद्रादित्वश्रुतिसंपादितान्यत्र प्रसिद्धिके सर्वगतत्वादावतिव्याप्तं ब्रह्मैव द्वग-
भिमिति श्रुतिसाधिताग्निप्रसिद्धिके इंद्रशब्दे सर्वाणि ह वा इमानि भूतानीति सर्वभूतोत्पादनत्वावगमितकाशप्रसिद्धिका
काशशब्दे प्रथमपादीयेऽतिव्याप्तं श्रुत्यादेः प्राबल्येन विशेषणेऽपि ब्रह्मासंभवबहुत्वैकवल्ल्यादिसंपादितान्यत्रप्रसि-
द्धिकेषु ब्राह्मणत्वादिलिंगकेऽतिव्याप्तं चतुर्थपादीये आकाशपदेऽव्याप्तं प्रथमतृतीयपादीयेतस्मिन्नतिव्याप्तं च चं-
द्रिकोक्तहेतुस्वरूपफलमुखलक्षणानि च लक्षणानि च संतरवाक्यगतज्योतिः शब्दे कर्मणि लोकप्रसिद्ध्यभावेनाव्याप्तेः आ-
त्मन आकाशः संभूत इति वाक्यगतप्रकाशशब्दे आकाशविशिष्टपरमात्मपरे अव्याप्तेश्च ॥ न च तस्यापि विशेषणतया आ

काशवाचित्वमस्तीति वाच्यं ॥ तथा सति तमिंद्र उवाच ऋषे प्रियं वै मे धामोपागा वरं ते ददामीति स होवाच त्वामेव जानीयामिति
तमिंद्र उवाच ब्रह्म वा अहमस्मि ऋषे इति श्रुतिगतस्येंद्रशब्दस्यांतर्यामिपरत्वेपींद्रपरत्वस्याप्यस्तीति तत्रातिव्याप्तेः
किं बहुना वैदिकशब्दानां सर्वेषां परममुख्यया वृत्त्या भगवत्परत्वेप्यपरममुख्यवृत्त्या अन्यपरत्वमप्यस्तीति पूर्वपादीयेषु
सर्वेष्वतिव्याप्तेश्च हेतुमुखस्य दुष्टत्वात् इंद्राकाशप्राणवज्रब्राह्मणादिशब्दानामप्यन्यमात्रोपस्थापकतया अतिव्याप्तेः
स्वरूपमुखस्यापि दुष्टत्वात् अत्यंतामित्यस्य सर्वदेत्यर्थकत्वे सर्वदा अन्यमात्रोपस्थापकत्वस्य सिद्धांतन्यायप्रतिसंधा
नकालीनाविष्णूपस्थापकेष्वव्यक्तादिशब्देष्वप्यभावात् ॥ अत एव सिद्धांतन्यायानिरस्यत्वस्यापि तदर्थत्वासंभवात् प्र
थमुखलक्षणस्यापींद्रप्राणाकाशादिशब्देषु प्रथमपादीयेषु वज्रादिशब्देषु द्वितीयपादीयेषु चातिव्याप्तेः पूर्वपक्षन्यायैः ब्रह्मपर
त्वस्याशक्यकल्पनत्वस्य सर्वत्राभावात् सिद्धांतन्याये तथात्वस्य क्वाप्यभावाच्च ब्रह्मतात्पर्यकत्वस्याशक्यकल्पनत्वशंक
याप्रतिबंधस्य तस्य दुर्निरूपत्वात् अन्योपस्थितिब्रह्मानुपस्थितिभ्यां प्रतिबंधस्य तेषु सुलभत्वात् ॥ एतेन ब्रह्मपरत्वे बहु
विप्रुपपत्तिरूपतर्कानुगृहीतत्वं बलवत्त्वमित्यपि निरस्तं ॥ ननु सिद्धांतिनाप्यवश्यं स्वीकार्यान्यपरताकतया ब्रह्मपर
त्वस्याशक्यकल्पनत्वशंकया प्रतिबध्यसमन्वयत्वोक्तौ न दोष इति चेन्नहि तावतैवोपपत्तौ शेषवैयर्थ्यात् विशेषस्य लक्षणां
तरत्वे अन्यत्र प्रसिद्धत्वेऽप्यतिव्याप्तेरिति दिक् ॥ अन्यत्र प्रसिद्धत्वविशेषेण नामरूपावांतरभेदमुपादाय पादभेदवर्णनम
प्यसंगतं तदभिमतनामलिंगविभागस्यासंगतत्वात् ॥ तथाहि न तावत् धर्मिवाचित्वं नामत्वं धर्मवाचित्वं लिंगत्वमिति

युक्तं धर्मवाचिनामंतर्यामीत्यादिपदानांनामत्वस्य धर्मवाचिनामानंदादिपदानांलिंगत्वस्य चापत्तेः नापि रूढत्वयौगिकत्वाभ्यां-
नामलिंगभेदः ब्रह्मणिमहायोगविद्रूढ्योरंगीकारात् ॥ अतएव रूढियोगयुक्तानि नामानि केवलयौगिकानि लिंगानीति
निरस्तं ॥ नन्वापाततोरूढत्वेन नामानि तद्विपरीतानि लिंगानि ब्रह्मणि सर्वशब्दानां योगवृत्त्यंगीकारेणासंभवचारणाया
पाततइति वैश्वानरपदस्यानुव्याख्याने लिंगत्वोक्तेस्तद्वारणार्थं वक्तव्यमिति चेन्न ॥ इंद्रादिशब्दानां केवलनामतानापत्तेः
तद्विपरीतानीत्यत्राप्यापाततो यौगिकाः योगरूढाइति विवक्षितं न वा अंत्ये वाक्यप्रकरणादेरपि लिंगतापत्तिः आद्ये द्यौ
श्चलेइत्यादिवाक्योपात्तलिंगस्यालिंगतानापत्तिः ॥ एतेनापाततो रूढानि तानि नामानि यान्यापाततो यौगिकानि तानि
लिंगानीत्यपि निरस्तं ॥ अथ मतं यान्यापाततो रूढिरहितानि तान्यंतर्यामीत्यादीनि एकमात्रपादिकमात्राणि वा सर्वेषु
भूतेष्वंतं यस्मिन् द्यौरित्येकपदसमभिव्याहाररूपाणि धर्मद्वारा धर्म्युपस्थापकानि तानि लिंगानि यानि तु तद्विपरीता
न्यापाततो रूढानि योगरूढानि वा तानि नामानि ॥ अतएव पूर्वपक्षदशायां देवतासंयोगरूढियुक्तानामिंद्रादिपदानां
नामता अतएव द्यौश्चलेइत्यादिवाक्योपात्तस्यालिंगत्वं प्रकरणादौ च नातिव्याप्तिः तस्य धर्मद्वारा धर्म्युपस्थापकत्वाभावा
दिति ॥ तदपि म[illegible]दिरहितत्वे सति धर्मद्वारा धर्म्युपस्थापकत्वस्य विशिष्टलिंगलक्षणत्वे विष्णुरूढिमदनंतशब्दादाव-
व्याप्तेः तल्लिंग[illegible]रीयभाष्यटीकादौ स्पष्टत्वात् तदुक्तिनाम्न्यतिव्याप्तेश्च वाक्यप्रकरणयोरपि यत्किंचिद्धर्मद्वारा धर्म्यु
पापाच्च ॥ ननु साक्षाद्व्याप्यधर्मोपस्थितिद्वारा व्यापकधर्मावच्छिन्नधी जनकत्वं विवक्षितमि

तिनातिव्याप्तिः तयोः साक्षाद्व्याप्यधर्मोपस्थापकत्वाभावस्यशाह्वादेवप्रमितइत्यनस्फुटत्वादितिवाच्यंनूद्विरादि वा... त्वस्यवैय्यर्थ्यापत्तेः ॥ ननुलक्षणद्वयेतात्पर्यंकल्प्यं पूर्वलक्षणस्योक्तदूषणग्रस्तत्वात्‌द्वितीयस्यत्रिविधपरिच्छेदरहि त्वलक्षणव्याप्यधर्मस्यविभुत्वलक्षणव्याप्यधर्मस्यनयुगपदुपस्थापकेऽनंतपदेऽतिव्याप्तेःयोगरूढस्यानंतपदस्यरूपंविव्याप्यधर्मद्वारा तदुपस्थापकत्वेचेंद्रादिशब्देऽतिव्याप्तेः ॥ एवंतर्हिपरीतानिआपाततोरूढानियोगरूढानिचानामानीत्यत्रापिधर्मद्वाराधर्म्यु पस्थापकत्वरहितत्वमात्रस्यलक्षणत्वेचाक्यप्रकरणादावतिव्याप्तेः साक्षात्धर्म्युपस्थापकत्वविवक्षायांचांतर्यामिलिं गेऽतिव्याप्तिः आपाततोरूढत्वस्यापिलक्षणघटकत्वेऽनंतादिलिंगेऽतिव्याप्तिः गौणेषुश्येनादिषुकर्मनामसुयौगिके घूद्भिदादिष्वव्याप्तेश्चतेषामलक्ष्यत्वेज्योतिर्गौरायुरित्यादिकर्मनामस्वतिव्याप्तेः तेषामपिसमन्वयस्यचतुर्थपादे वादित्वेनालक्ष्यत्वोक्त्ययोगाच्च ॥ अस्तुवायथाकथंचिन्नामलिंगभेदः तथापिनतेनपादस्योपस्थापकव्यापारप्रथमेपादेआ नंदमयाधिकरणेलिंगविचारादितितत्तत्प्रदीपोक्तरीत्याआनंदमयत्वलिंगसमन्वयस्यांतस्तद्धर्मोपदेशादित्यत्रांत स्थत्वलिंगसमन्वयस्यद्वितीयेवैश्वानरनामसमन्वयस्यचाविरोधात्‌ ॥ नन्वानंदमयत्वांतस्थत्वलिंगसमन्वयस्यानंदेंद्रा दिनामसमन्वयफलकतयाप्रथमेपादेसंगतिः वैश्वानरनामसमन्वयस्यपाचकत्वादिलिंगसमन्वयफलकतयाच द्वितीयेसंगतिरितिवाच्यं ॥ तथासतिसर्वगतत्वलिंगसमन्वयस्यादित्यादिना समन्वयफलकतयाप्रथमपादत्व त्वापत्तेः ॥ अंतः प्रविष्टंकर्तारमेतमित्येकवाक्यतापन्नेंद्रादिनामसमन्वयस्यापितत्प्रकरणगतलोकमासाद्यिरहित

लिंगसमन्वयफलकत्वसंभवेन द्वितीयपादे निवेशोपपत्तेः ॥ एवंतदुक्तपादक्रमोऽप्यनुपपन्नः महामहत्त्वभंगन्यायेनातिप्रय
त्नसाध्यस्य प्राथम्येऽप्यथप्रसिद्धानां प्राथम्यं स्यात् अथचतुर्थपादीयसमन्वयस्य महासमन्वयेतस्मिन्नाधिकारोऽखिल
स्यहीत्यनुव्याख्यानोक्तरीत्या असार्वाधिकारकत्वात् पादत्रयोक्तश्रुतिलिंगादिप्रयुक्तान्यपरत्वाशंकायाः तदनंतर्यनियमा
न तच्छब्दप्रवृत्तिनिमित्तगुणासिद्धिमात्रफलकस्य कारणविषयकत्वाच्चोत्यता इतरपक्षेषु महामहत्त्वभंगन्यायेनान्यत्रात्रप्र
सिद्धस्यप्राथम्यमितिचेन्न ॥ अन्यत्रैवप्रसिद्धानामत्यन्तायामसार्वाधिकारिकत्वस्याप्रयोजकत्वात् गृहस्थमात्राधिकारि
कयागनिरूपणानंतरं सर्वाधिकारिकप्राङ्मुखत्वादिनिरूपणस्य षष्ठे दर्शनाच्च ॥ किंच महासमन्वयत्वाद सर्वाधिकारकत्वं त
त्र यदि महत्त्वमितराभ्यर्हितत्वं तदा प्रमेयात् प्राक् प्रमाणनिरूपणस्येव प्राथम्यं दुर्वारं यदि चातिप्रयत्नसाध्यत्वं न त
दा महामहत्त्वभंगन्यायेन प्राथम्यं दुर्वारं नापिपादत्रयोक्तश्रुत्याद्युपजीव्यत्वेनांत्यता अदृश्यत्वादिपदानामेवाक्षरत्वादिलिंग
बलेनान्यपरत्वशंकायाः प्रथमं कर्तुं शक्यत्वात् ॥ नच श्रुतिलिंगादिस्वरूपाज्ञानात् प्राक् तदनिरूपणं तर्हि शब्दादेव प्रमि
तत्वत्र निरूप्यमाणश्रुतिलिंगादिस्वरूपस्य ततः प्रागज्ञानेन श्रुतिलिंगादिभिरिद्धमाणाकाशादिशब्द समन्वयासिद्धि
प्रसंगात् कारणत्वसिद्धिफलकत्वाभावस्त्वसिद्धः कारणत्वेन चाकाशादिष्वित्यत्रावांतरकारणत्वनिरूपणात् ॥ किंच
नाम्नां लिंगानां चान्यत्र प्रसिद्धत्वाविशेषेऽपि कथं पादभेदः अवांतरभेदस्योभयत्र प्रसिद्ध्यादावपि साम्यात् पादचतुष्ट्वनिय
मत्यागश्चान्यत्रैवेत्यत्र विनिगमकानुपलंभात् ॥ यत्तु प्राधान्यात् नाम्नामनंतरं लिंगानां च समन्वये बुद्धिस्थत्वसं

पादनाथेन प्रथमसूत्रभयोरेकीकरणमिति तदयुक्तं नाम समन्वयहेतुत्वेनालिंगानामपि श्रुत्यसिद्धत्वेन प्राधान्यश्रुत्यसिद्ध
त्वयोरविशेषात् यद्व्यापातसिद्धनामभेदाश्रयेणेन प्रथमपादभेदः ततस्तत्त्यागेन महायोगविरुद्धादिभ्यामेकीकर
णेन तदभेद इति कल्पनं तदपि नत्वनामत्वलिंगत्वान्यत्र प्रसिद्ध्यादीनां सर्वेषामापातप्रतिपन्नान्यथादिति तावदता
तृतीयचतुर्थयोरापातप्रतीतिस्त्यागायोगेन तेषामपि भिन्नपादनिवेशस्यावश्यंभावादित्यास्तां तावदिति वदंति ॥ स
एवम् प्रपंच आरभ्यते आनंदमयोऽभ्यासादिति ॥ अत्र ब्रह्मविदाप्नोति परमिति तैत्तिरीयश्रुतेः स्पष्टब्रह्मलिंगायाज्ञेयब्रह्म
णि समन्वयप्रतिपादनात् शास्त्राध्यायपादसंगतिः ॥ पूर्वाधिकरणविषयसाहित्या या मीक्षणश्रुत्याः प्रायपाठस्य बाधो
युक्तः इह तु अन्यशेषाधयपपाठात् ब्रह्मवाक्यमुख्यार्थस्य ब्रह्मणोऽन्यशेषत्वेनैव प्रतिपाद्यतानस्वप्राधान्येनेति प्रत्यवस्था
नादनंतरसंगतिः ॥ तत्र प्रथमांतानंदमयपदोपलक्षितं तस्माद्वा एतस्माद्विज्ञानमयादन्योंतर आत्मानंदमय इत्युपक्र
म्याम्नातं ब्रह्म पुच्छं प्रतिष्ठेत्यंतं वाक्यजातं विषयः तत्किमन्यशेषतया ब्रह्मप्रतिपादयत्युत स्वप्राधान्येनेति संशयः अस
न्नेव स भवतीत्यादिश्लोकस्थानन्यस्य मानब्रह्मण आनंदमयविषयत्वपुच्छविषयत्वानिर्णयश्च तद्बीजं ॥ न च तस्याप्यानंद
मयविषयत्वं प्रायपाठान्निर्णीतमेवेति वाच्यं ॥ मनोमयपर्याये अतद्विषयस्यापि यतो वाचो निवर्तंत इत्यादिश्लोकस्यो
दाहरणेन प्रायपाठान्निगमनश्लोकस्यानंदमयविषयत्वासिद्धेः कथंचित्तद्विषयत्वं च न प्राधान्यनिर्वाहकं ॥ फलं च
पूर्वपक्षे आनंदमयावयवत्वेन ब्रह्मोपास्तिः सिद्धांते च ज्ञेयब्रह्मप्रमितिः ॥ तत्र पूर्वपक्षः आनंदमयपदोदितं मुख्यब्रह्मि

त्युपलभ्यमानं मोकारं ज्योतिः प्रतिज्ञातत्वेनैव ब्रह्म प्रतिपाद्यते न प्राधान्येन पूर्वपूर्वपर्यायेषु पुच्छतया निर्दिष्टानामन्यशेष-
त्वदर्शनात् ॥ ननु ब्रह्मविदाप्नोति परमिति ब्रह्मज्ञानस्य फलवत्त्वश्रवणात् तस्य चात्र ब्रह्मपदेन सत्याभिज्ञानात् ब्रह्मण
स्य प्रधानत्वमेवोचितमिति वाच्यं ॥ विदेरुपास्तिपरतया आपि बहुशो दर्शनेन तत् ब्रह्मोपासनाया एव फलसंबंधप्रति-
पादनात् अवगतेऽन्न ब्रह्मपुच्छकत्वेनानंदमयोपासनाया अपि ब्रह्मोपासनात्वं ॥ ननु परमाप्नोतीति परब्रह्मप्राप्तेः फलत्
कीर्तनात् अन्यशेषत्वेन ब्रह्मोपासनायाश्च तमेव विदित्वाति मृत्युमेति नान्यः पंथा विद्यतेऽयनायेति श्रुतिविरोधात् तत्फ
लकत्वासंभवेन तत् ज्ञानमेव विदिनाभिवक्षणीयमिति वाच्यं ॥ ब्रह्मविदाप्नोति परमिति संक्षिप्य कथितस्यैवार्थस्य तदे
वाभ्युक्ता सत्यं ज्ञानमनंतं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सहेति विवृतत्वेन सर्वकामावा
प्तेस्तत्फलत्वलाभेऽपि परब्रह्मप्राप्तेः फलत्वालाभात् सत्यत्वज्ञानत्वानंतत्वजगत्कारणत्वादिगुणकीर्तनं चानंदमय
पुच्छे तादृशगुणविशिष्टब्रह्मदृष्टिविधानार्थं यथा प्रतीथे अनंतत्वसर्वमूलकारणत्वपरोवरीयस्त्वादिगुणविशिष्ट
ब्रह्मदृष्टिविधानायाकाशशब्दिते ब्रह्मणि तत्कीर्तनं ॥ ननु यो वेद निहितं गुहायामिति ब्रह्मणो गुहानिहितत्वं प्रतिज्ञातं त
स्य चानंदमय एव पर्यवसानं दृश्यते न पुच्छतया निर्दिष्टे ब्रह्मणीत्यानंदमयस्यैवोपक्रमावगतसर्वकामावाप्तिफलकवेदनाविष
[illegible] तत्कारणत्वादि सिध्यतीति तस्यैव परब्रह्मत्वे स्थिते न तस्य ब्रह्मपुच्छकत्वेनोपासनीयत्वेऽपि ब्रह्मणः स्वप्राधान्यमनप
[illegible] शेषपुच्छपुच्छवद्भावानुपपत्तिरिति तु न अन्नमयादावपि स्वानतिरिक्तैरेव शिरःपक्षादिभिरुपासत्वावगमादिति या

ञ्च आनंदमयस्य विज्ञानमयादांतरत्वे कथिते तत्पुच्छत्वेन निरूपितस्य ब्रह्मणोपि विज्ञानमयादांतरत्वलाभात्॥ नहि पुच्छपदमात्रेण पुच्छमिति निर्णेतुं शक्यते अग्रिमः सोकामयतेत्यादिरपि पुच्छब्रह्मविषय एव तस्योपक्रमे आत्मशब्देनापि निर्देशात् स इति पुल्लिंगेन निर्देशोपपत्तेः तस्यैष एव शारीर आत्मा यः पूर्वस्येत्यानंदमयपर्यायेप्यात्मशब्देन ब्रह्मनिर्देशाच्च तस्मात्-नात्र स्वप्राधान्येन ब्रह्म प्रतिपाद्यं॥ एवं ब्रह्मणः सप्रधानत्वे पुच्छपदमनर्थकं प्रतिष्ठापदेनैवाधारत्वलाभात्॥ नच कांतिमान्मुखचंद्र इत्यादौ मुखशब्देनैव कांतिमत्त्वलाभेपि मुखे गौणं चंद्रपदमपि प्रयुज्यते तथा प्रकृते प्रतिष्ठापदेनाधारत्वे लब्धेपि तद्वत्प्रकृते पुच्छशब्दोपि स्यादिति वाच्यं॥ यतस्तत्र चंद्रस्य यादृशी यावती च कांतिः तादृशी तावती वा सा मुखेस्तीति मुखस्तुत्यर्थं चंद्रपदमर्थवत्॥ नच कांतिमत्पदमात्रेण तादृशार्थलाभः संभवति तस्य मानांतरविषयविद्यमानतावन्मात्रकांतिविषयत्वेन चारितार्थ्यात् अतश्चंद्रतुल्यकांतिमत्त्वलाभाय चंद्रपदोपादानं ब्रह्मणि तु प्रतिष्ठात्वसंकोचकमानांतराभावात् तस्य निरपेक्षसर्वप्रतिष्ठात्वबोधकश्रुत्यंतराच्च निरतिशयमेवाधारत्वं प्रतिष्ठापदेन लभ्यत इति न पुच्छपदमर्थवत् प्रत्युत पुच्छतुल्याधारत्वविवक्षायां पुच्छस्याधारत्वं भूतलास्तीर्णतृणराशौ संनिरतः पुरुषान्प्रति तृणराशेरिवाधारांतरसापेक्षं स्यादिति ब्रह्मणस्तथाविधमाधारत्वं लक्षयत् पुच्छपदमनिष्टार्थकमेव स्यात् तस्मात् पक्षिरूपेणोपासनीयमानंदमयं प्रति परब्रह्मणः कल्पनीयं पुच्छत्वं पुच्छपदेनोच्यते प्रतिष्ठापदं च कल्पनानिमित्तमाधारत्वलक्षणं सारूप्यं बोधयदर्थवद्भवति पक्षिणो हि पुच्छमागमाधारीकृत्य निषीदंतीति॥ पक्षिणां पुच्छं प्रतिष्ठा॥ अत एव तैत्तिरीयोपनिषदि श्रूयते

वस्मात् सर्वाणि यथा शिरःपुच्छेन मानीति इति पुच्छे नैवमतिष्ठतीत्यवलंबिमानिष्ठा हि पुच्छमिति ब्रह्मानंदोऽप्येतस्यैवानंदस्या-
न्यानि भूतानि मात्रामुपजीवंतीति श्रुत्यनुसारेण कुसुमस्य लौकिकानंदशीकरजातस्य समुद्रस्थानीयइति प्रियमोदा
द्यवयवयुक्तस्यानंदमयस्य मौलत्वात् अतः लाङ्गूलात्मकं पुच्छस्य कल्पनायुक्ता अन्यत्रापि च तादृशकल्पनानिमित्तं
सारूप्यमानंदमयेऽपि यातस्य भूरिति शिरः एकं हि शिरः एकमेतदक्षरमिति अत्र भूरित्यक्षरे प्रजापतिशिरस्त्वकल्प
नानिमित्तमेकत्वं सारूप्यमुक्तं ॥ न च पुच्छवाक्योपात्ते ब्रह्मणि निगमनश्लोकस्य ब्रह्मशब्दाभ्यासरूपतात्पर्यलिंगदर्शना
त्तस्यैव स्वप्रधानतायुक्तेति वाच्यं ॥ पूर्वपूर्वनिगमनश्लोकानामन्नमयादिप्रधानविषयतादर्शनेनात्रत्यनिगमनश्लो
कस्याप्यानंदमयविषयताया एव युक्तत्वात् पुच्छो हि जीवोऽपि ब्रह्मशब्दो बृंहणादिगुणयोगादन्यथा पुच्छादिपदवैयर्थ्य
स्योक्तत्वात् तस्मादानंदमयो जीव एव न स्वप्राधान्येनोपास्यतया विवक्षित इति ॥ एवं पूर्वपक्षे प्राप्ते अभिधीयते आनंद
मयोऽभ्यासादिति ॥ अत्रानंदमयपदं तदुपलक्षितवाक्यविशेषपरं यथा प्रकरणं पौर्णमास्यां रूपावच्चनादिति सूत्रे पौ
र्णमासीपदस्य तद्धितविहितवाक्यपरत्ववत् स्वप्रधानब्रह्मपरमिति च साध्यमध्याहार्यं अभ्यासरूपशब्दधर्मस्य ता
त्पर्यलिंगस्य हेतूकरणानुरोधात् तादृशतात्पर्यलिंगं च वाक्यरूपपक्षे स्वप्रधानब्रह्मपरत्वसाधन एव स्वरसं ॥ आ
नंदमयस्य ब्रह्मत्वसाधनपरतया सूत्रव्याख्यातॄणां परेषां मते चाभ्यासादिति हेतोः शब्दवृत्तेः पक्षाशृन्नितया स्वारस्या
भावात् जैवानंदविलक्षणजगत्कारणानादिहेतुत्वस्यापि ब्रह्मलिंगत्वेनाकाशस्तल्लिंगादितिवदानंदमयस्तल्लिंगादिति-

निर्देशो नैव तस्याधनोपपत्तेः ॥ एवं चाभ्यासरूपतात्पर्यलिंगस्य हेतूकरणसारस्यात् प्राधान्येन तत्परत्वरूपसा
ध्य एव तात्पर्यविगतौ तस्यानंदमये । नन्वयादानंदमयपदेन तदुपलक्षितब्रह्मपुच्छेति वाक्यविशेषलक्षणायाम
पिनक्षतिः तात्पर्याधीनत्वात् शाब्दवृत्तेः ॥ आनंदमयस्य ब्रह्मत्वं साधयद्भिः परैरपि आनंदमयोऽभ्यासादिति सूत्रे आनं
दमयपदस्य तदर्थत्वाविशिष्टेन तात्पर्यविषयत्वविशिष्टेवा धर्मिणि लक्षणा स्वयं वाच्यैव ॥ अन्यथा प्रचुरानंदस्य पक्षत्वे
नायमानंदमयो विष्णुः किंतु प्रागुक्तप्रकृत्यादय एव विकाराभिधायकमयट्प्रयोगादिति विकारशब्दान्नेति चेन्नेतित्वं
कायां अनुत्थानप्रसंगात् आनंदविकारस्य तथात्वेन वाधासिध्यादिप्रसंगात् ॥ तथा चानंदमयपदघटितवाक्यविशे
षः स्वप्रधानब्रह्मपरः अभ्यासात् अभ्यस्यमानब्रह्मपदघटितवाक्यैकवाक्यतापन्नत्वादिति सूत्रार्थः ॥ परमतेऽपि आ
नंदमयो विष्णुरेव असन्नेव स भवति असत् ब्रह्मेति वेद चेत् अस्ति ब्रह्मेति चेद्वेदेत्यानंदमये ब्रह्मशब्दाभ्यासादिति जय-
तीर्थाद्युक्तेः शब्दादिनिष्ठस्य पौनःपुन्येनोच्चारणरूपस्याभ्यासस्य साध्यवैयधिकरण्यपरिहाराय अभ्यस्यमानब्रह्मशब्दघटितनि
गमनस्यैकविषयत्वरूपार्थे अभ्यासादिति हेतुपर्यवसानस्य वक्तव्यतया निगमनस्य तद्विषयत्वादीनां यथास्थितानामपि
प्रसंजकत्वात् अनेकपदार्थघटितस्य तस्यास्वरूपहेतुतोऽनलाघवत्वांकाधि ॥ यद्वा आनंदमयपदं तत्तात्पर्यविषयपरं
पूर्वसूत्रादनुषक्तं तत्पदं साध्यसमर्पकं वा भ्यस्य पदसमुदायरूपत्वात् तस्य यत्परत्वं तद्घटकपदानामपि तत्परत्वमपि
तस्याभिति आनंदमयपदं परमतात्पर्यविषयत्वादिति प्रतिज्ञायां न सूत्राक्षरानुगुण्यमभ्यासादिति हेतूपपादनमन्य-

[illegible] ॥ आनंदमयशब्दार्थस्य जीवस्यैव निगमनश्लोकाविषयत्वात् ब्रह्मशब्दस्यापि जीवपरतासंभवात्-
न पुच्छं ब्रह्म[illegible]दित वाक्यप्रतिपाद्यमिति शंकायां नेतरोऽनुपपत्तेरिति निर्लोठयिष्यते तथा च निगमनश्लो-
क[illegible]णः स्वप्रधानत्वावगमात् तस्यैव च ब्रह्म पुच्छं प्रतिष्ठेत्यत्र प्रत्यभिज्ञानात् पुच्छत्वेन निर्दिष्टस्य
ब्रह्मणः स्वप्र[illegible]प्रकरणप्रतिपाद्यत्वमप्रत्यूहमित्युक्तरीत्या सूत्रार्थो निराबाध एव ॥ अथैवं ब्रह्मपुच्छमभ्या-
सादि[illegible]त्येवं [illegible]नेन सूत्रे लाक्षणिकानंदमयपदप्रयोगो निरभिप्राय इति चेत् शंकाविशेषनिराकरणार्थः सद्भिरु
[illegible] ब्रह्म पुच्छं प्रतिष्ठेत्यनेन प्राधान्येन ब्रह्म प्रतिपाद्यते नानंदमयशेषत्वेन असन्नेव स भवतीति मंत्रे अभ्यासा
नुसा[illegible] ब्रह्मणः प्राधान्यावगमादिहापि तस्यैव प्रत्यभिज्ञानात् स्वप्रधानमेव ब्रह्म भविष्यतीत्युक्ते प्रायपाठसहकृ
तोपक्रमस्थपुच्छशब्दस्यारस्यानुसारेण असन्नेव स भवतीति मंत्रे ब्रह्मपदमानंदमयस्य लक्षकमस्तु तत्श्च बाधासि
ध्यादिकमिति शंकायां आनंदमयपदाभ्यासपदयोरावृत्त्या न निगमनश्लोकप्रतिपाद्य इति साध्याध्याहारेण सूत्रयो-
जनया आनंदमयः न निगमनश्लोकप्रतिपाद्यः अभ्यासात् तत्रैव स इति एनमिति पदेनानंदमयस्य ब्रह्मपदार्थ[illegible]
रसर[illegible]ज्ञानात् [illegible] सत्त्वासत्त्वाश्रयतया अभ्यासात् ॥ तथा च प्रियादिविशिष्टस्य सुखद्वमिति प्रतीयमानस्यानं
दमयस्यासत्त्वशंकानास्पदतया तन्निवारणाय प्रवृत्तमंत्रस्य नानंदमयविषयत्वमिति न बाधासिध्यादिः सूत्राणामानु
त्वाप्यनेकार्थत्वमलंकार एवेति सारवद्विश्वतोमुखमिति तल्लक्षणानुरोधात् ॥ ननु ब्रह्मपुच्छं प्रतिष्ठेति वाक्यस्य ब्र

प्रधानंब्रह्मपरत्वे पुच्छपदस्याप्यस्यामानब्रह्मशब्दानुरोधेन प्रतिष्ठापदलक्ष्याधारादिलक्षकत्वे आनर्थक्यापत्तिः प्रति-
ष्ठापदेनैवाधारत्वाभानात् न तस्यानर्थक्यं प्रतिष्ठानामधिपरीतं प्रत्यायकमिति न्यायेनास्य स्वब्रह्मशब्दादपि पुच्छशब्दस्य
बलीयानिति तदनुरोधेन तादृशवाक्यस्यानंदमयशेषत्वेन ब्रह्मपरत्वमेवयुक्तं तथासति पक्षिरूपेणोपासनीयस्यानंद
मयं प्रति परब्रह्मणः कल्पनीयं पुच्छत्वं पुच्छशब्देनोच्यते प्रतिष्ठापदं तु कल्पनानिमित्तमाधारत्वलक्षणं सारूप्यं बोधय
दर्थवद्भवतीति शंकामनूद्य पुच्छपदस्य गतिं वक्ति ॥ विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥ अत्र विकारशब्दोऽवयवपरस्तथा
चावयवपरपुच्छशब्दसत्त्वान्न ब्रह्म पुच्छं प्रतिष्ठेति वाक्यं प्राधान्येन ब्रह्मप्रतिपादकमिति चेन्न प्राचुर्यात् अवयववाच
वचनात् पुच्छशब्दोपपत्तेरिति तदर्थः ॥ आनंदमयपर्यायस्यान्नमयादिपर्यायसाम्याय पक्षित्वेन निरूपणीयस्यानंदम
यस्य शिर आदिष्ववयवेषूक्तेषु पुच्छे चावश्यं निर्देष्टव्ये ब्रह्मण एव पुच्छत्वेन निर्देश इति भावः ॥ ननु पूर्वत्रावयवपरः पु
च्छशब्दः इह त्वाधारपर इति कथमर्थभेदे साम्यमवगम्यत इति चेन्नार्थभेदेऽपि शब्दसाम्यमात्रेण प्रायपाठनिर्वाहस्य दृ
ष्टत्वात् ॥ तथाहि इंद्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः इत्यादौ इंद्रियादीनामव्यक्तांतानां पूर्वपूर्वमपेक्ष्यान्यदेव पर
त्वं अव्यक्तात्पुरुषः पर इत्यत्र पुरुषस्य परत्वं सा काष्ठा सा परा गतिरिति वाक्यशेषानुसारेण परमपुरुषार्थत्वरूपम
न्यदेवेति अर्थभेदेऽपि सोपानोदाहरणन्यायेन पूर्वस्मात्पूर्वस्मादुत्तरोत्तरस्य परत्वबोधनपूर्वकं सर्वतः परं ब्रह्मेति बोधयितुं प्रवृ
त्ते तस्मिन्प्रकरणे शब्दसाम्यमात्रेण प्रायपाठस्य निर्वहणीयत्वात् अन्यान्यप्युदाहरणान्याकरे द्रष्टव्यानि ॥ किंच

न चैवमुक्तं तत्र गुहापदं पर्यायसाम्यार्थमुक्तं किंतु शंकाविशेषनिराकरणायापि ॥ तथाहि यो वेद निहितं गुहायां परमे
व्योमन्निति मंत्रे सत्यं ज्ञानमनंतमिति प्रतिज्ञातमानंत्यमसंकुचितं वस्तुपरिच्छेदराहित्यगर्भं तत्सति परमार्थतो जी
वब्रह्मणोः स्वाभाविकभेदे जडवर्गस्य ताद्वर्तितया वस्तुपरिच्छेदासंभवस्य सृष्टिवाक्यादवगमेपि जीवस्य तादृग्वर्ते-
त्वाभावान्नोपपद्यत इति शंकायां तस्योपपादनाय जीवेनातिरिक्तः येन वस्तुपरिच्छेदः स्यात् किंत्वविद्योपाधिकं बुद्ध्यु
पाधिकं वा ब्रह्मैवेति दर्शयितुं ब्रह्मण एव जीवरूपेण परमव्योमशब्दितायामव्याकृताख्यायां तादृशहार्दाकाशलक्षणव्यो
म्निस्थितायां बुद्धिलक्षणायां वा गुहायां निहितत्वमुक्तं तत्रापि ब्रह्मणो गुहानिहितत्वोक्त्या जीवब्रह्मणोः स्वरूपैक्यं कथं
निर्धार्यते उपक्रमे भाष्यभाष्यभावेन निर्दिष्टयोर्जीवब्रह्मणोः भेदावश्यंभावात् अशनायाद्यूर्मियुक्तस्य जीवस्य ब्रह्मणा
स्वरूपैक्यासंभवाच्चेति शंका ह्येवं मन्यते तत्रोपक्रमे प्राप्तिर्नगरादेः प्राप्तस्यैव ब्रह्मणोऽभ्यासस्याविवक्षिता ॥ अपितु क
ण्ठचामीकरन्यायेन प्राप्तस्यैवाप्राप्तत्वभ्रमापोहेनेति द्योतयितुं परमे व्योमन्निति जीवाधारतया गुहायामेव सन्निधानमु
क्तं ॥ अशनायापिपासादय ऊर्मयः न जीवस्य स्वाभाविकाः अपि त्वन्नमयादिविज्ञानमयान्तकोशोपाधिका इति दर्श
यितुं विज्ञानमयान्तान् कोशान्निरूप्य तच्छिरस्यैव विज्ञानं यज्ञं तनुते इति विज्ञानमयशब्दितायां बुद्धावेव कर्तृत्वं नि
क्षिप्तं ॥ एवमपि जीवस्य न ब्रह्मता संभवति अविद्योपाधिकस्य बुद्ध्युपाधिकस्य वा उपाधिमिथ्यात्वेन मिथ्यात्वात् ब्रह्म
णश्च सत्यत्वात् इति शंकायां तन्निरासाय नोपाधिविशिष्टस्य ब्रह्मतोच्यते किंतु ततो निष्कृष्टस्य चिदंशस्यैवेति द्यो

न नापाप [illegible]

यनोरत्वं [illegible]

धनपवसं पालका नां [illegible] नित्रुच्छै [illegible] शब्दि

पुच्छमि निषुके: ॥ [illegible]

[illegible] ॥ [illegible]

[illegible] ॥ [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible] ॥ [illegible] निषुनवे: ॥ अकर्तरि

च कारके संज्ञायां [illegible] कार्यपावित्वात् [illegible] प्रति [illegible] मति [illegible] नामि

तु कन्धः [illegible] आगमस्य [illegible] इति समाधान आ

गस्य भक्तत्वेऽलामात् पूर्वोक्तदोषानिरासाय यथा पक्षिणां पुच्छं नदं न गर्तनेबाधान् स्तथानंदमयस्यापि नंदं न गर्तं ब्रह्माधार
इति ब्रह्मणि पुच्छतुल्याधारताया वाच्यत्वात् ॥ किंचानंदमयस्य पक्षित्वेनानिरूपणात् यस्य पुच्छत्वेन कस्मिंश्चिन्निर्देष्टव्ये ब्र
ह्मैपनिर्दिश्यमिति पूर्वोक्तं न युक्तं पुच्छपदप्रयोगेपि तेन पुच्छसादृश्यमात्रबोधनेन पुच्छत्वेन निर्देशाभावादिति शंकायां
[illegible] करणार्थतिरलक्षक तया स्वार्थमनभिदधानस्यापि शब्दस्य स्वार्थाभिधानफलकं तादर्थ्यं भाक्तुर्यादित्यप्यवश्यं
वाच्यं ॥ [illegible] शिन्मासस्तृणात् तथाहि विकारशब्दात् अवयवात्मकविकारशब्दमानस्येवात्र सम्बन्धा
दान्नपुच्छ[illegible]त्वेन नतन्निर्देशाभावइति [illegible] सिद्धिर्नेति चेन्न ॥ भाक्तुर्यदुक्तजातीयदृष्टांतभाक्तुर्यात् तद्यथा
उत्तरं बर्हिषः प्रस्तरमासादयति प्रजा वै बर्हिर्यजमानः प्रस्तरो यजमानमेवायजमानादुत्तरं करोतीति तस्माद्यजमानोऽय
जमानादुत्तर इति श्रुतौ प्रस्तरस्य [illegible] यजमानशब्दस्य प्रस्तरे यज्ञनिर्वर्तकत्वादियजमानगुणसुखेन वृत्ति
स्तासिद्धिपेरिकायामुक्ता अथापि प्रस्तरे मुख्ययजमानत्वबोधनेन यत्फलं यजमानमेवायजमानादुत्तरं करोतीत्यादिवाक्य
शेषार्थोपपादनं तादर्थ्यमपि दृश्यते ॥ यथाना अग्निर्वै ब्राह्मण इति श्रुतावग्निशब्दस्य संभवतरूपाग्निगुणसुखेन ब्राह्मणे
वृत्तिस्तत्र समर्थितानतुल्यन्यायेनाग्निर्वै दीक्षित इत्यत्राप्यग्निशब्दस्य दीक्षिते वृत्तिः किंचिदग्निगुणसुखेनासिद्ध्यतित
थापि दीक्षितेऽग्निताद्रात्म्यबोधनस्य यत्फलं यदंतीभिर्मार्जयंतीतिविधिशेषस्य नद्याभिः शीतेन वायतीत्यर्थवादस्योप
पादनं तादर्थ्यमपि दृश्यते ॥ एवं यजमानो वाहवनीयो यजमानं वा एतद्विकर्षंति यदाहवनीयात् पशुश्रपणं हरंतीत्ये

तदादीनि प्रचुरप्रयोगाण्युदाहरणानि बोध्यानीति स्थितं ॥ आनंदमयस्य ब्रह्मत्वे तु ब्रह्म पुच्छमिति न समंजसं न हि तद्देवा-
वयव्यवयवभावोऽस्तीति आनंदमयपदे विकारार्थमयटः प्रायपाठपरित्यागः उपेक्ष्योऽपि प्रायपाठं कथंचित्प्रचुरानंदवाचिवा-
आनंदमयपदमिति कल्पनायामपि प्राचुर्यस्य प्रतियोग्यल्पत्वापेक्षत्वात् ब्रह्मणि स्तोकदुःखानुवृत्त्यापत्तेस्तल्लक्षणाश्रि-
त्य वृत्त्या गौणत्वेनैव व्याख्येयं एकस्यावयवावयवित्वयोरनुपपत्त्या पुच्छवाक्यगतब्रह्मशब्दस्य गौणार्थत्वं सैषानंदस्य
मीमांसा भवतीत्यत्र एष आकाश आनंदो न स्यादित्यादौ अंशस्य मानानंदमात्रपरत्वे [illegible] लक्षणीय इति बहुदो-
षाः पुच्छवाक्यस्य ब्रह्मप्रधानत्वे तु अवयवप्रायपाठबाधमात्रं पुच्छपदस्य मुख्यार्थत्यागश्चानंदमयस्य ब्रह्मत्वपक्षेऽपि स-
मः अंगुलेशत्वस्य तस्यानंदमयावयवत्वेऽपि गौणत्वात् अपि च प्रतिष्ठेत्युपपदसामर्थ्यात् पुच्छपदेनाधारलक्षणाश्रु-
तेः तु अतानावयवलक्षणापि ॥ तथा चोक्तं वाचस्पतिमिश्रैः प्रायपाठपरित्यागो मुख्यार्थतया लंघनं पूर्वस्मिन्नुत्तरेप-
क्षे तु ब्रह्मत्वेऽभिधायावयवत्वेन सविशेषं ब्रह्माप्युपगंतव्यं स्यात् निर्विशेषं तु ब्रह्म वाक्यशेषे भूयते यतो वाचो निवर्तंते अप्राप्य मनसा सह
[illegible] आनंदमयनिषेधाभिधानात् यतो वाचो निवर्तंते अप्राप्य मनसा सह आनंदं ब्रह्मणो विद्वानिति भेदनिर्देशाच्च नेति प्रतिभा
[illegible] दिभेदादानंदमयस्यापि भिन्नत्वं ब्रह्मतुल्यतां शरीरं भिद्यते एको देवः सर्वभूतेषु गूढः इति श्रुतेरतोऽपि
आनंदमयो ब्रह्म ॥ अपि च सुषुप्तिस्थान एकीभूतः प्रज्ञानघन एवानंदमयो ह्यानंदभुगिति सुषुप्तिलिंगात्

जीव एवानंदमयः न ब्रह्म ॥ अत एवान्नमयप्राणमयमनोमयविज्ञानमयानंदमयाभ्यस्तु अंधंतामिति श्रूयते श्रुतिरिह-
भागस्तु ध्वंसस्य सर्वोपगम्यत्वं अतो ह्यस्तु ध्वंतामिति श्रुतिः यथार्थेन याज्ञवल्क्ये जीवधर्मभूताया योनिनाम्न ब्रह्मानंदमयः अप्रस्तु
पंचापि कोशा एव ॥ यत्तु चंद्रिकायां अन्येत्वित्यादिनोक्तं मतमन्नमयमूर्धत्वेन तु ह्योक्तं एकस्यापि न मुख्यार्थत्वं यत्र भाम
केमते सर्वस्यापि न मुख्यार्थत्वं यत्र तावत्के मते तथाहि आनंदमयपुच्छयोर्द्वयोरपि पूर्णत्वेन ब्रह्मशब्दस्तावन्मुख्यः पूर्ण
त्वं हि ब्रह्मशब्दस्य मुख्योर्थः यथा धर्मांतरेष्वदृष्टमपि जातिसमवायादौ धर्मिताधिकदेशाधृतित्वं यथा वा परिच्छिन्नेन
ध्रियमाणसंबंधिना आवृतत्वं दृष्टमपि परिच्छिन्ना ज्ञानावृते नित्यचैतन्ये अपरिच्छिन्नत्वं यथा वा आनंदांतरेष्वदृ
ष्टमपि ब्रह्मानंदस्य पूर्णत्वादिकं ॥ तथा अन्यत्रादृष्टमपि अवयवस्य पूर्णत्वं विचित्रशक्तियुक्तब्रह्मावयवेऽस्तु ॥ उक्तं
च विश्वतश्चक्षुः पूर्णमदः पूर्णमिदमित्यादिश्रुत्या सर्वतः पाणिपादं तदिति स्मृत्या चावयवस्य पूर्णत्वं तथा कृष्णकेशा
त्मनः कृष्णस्य व्याप्तत्वं तथैकेन दशभ्यः सर्वादिति पूर्णत्वोक्ता तदुक्तमनुव्याख्याने ब्रह्मतावयवेऽपि स्यात् तथा पर्यायेन स्वतः
यथैव कृष्णकेशस्य कृष्णस्य ब्रह्मताखिला दर्शिता चैव पार्थाय निःसीमाः शक्तयोऽस्य हीति युक्तं ज्ञानपक्षस्यापरिहाराय
कचित् संबंध्यादेरेव संबंधत्ववत् अस्मिन्नेव प्रकरणे आनंदं ब्रह्मण इति श्रुतेः आनंदात्मकस्यैव ब्रह्मणः आनंदित्वप्रत्य
विशेषबलात् शक्तिभावात् स शिरः स दक्षिणः पक्ष इति श्रुत्या अवयव विन एवावयवत्वं तदुक्तं न्यायविवरणे न चावयव-
त्वविरोधः नेह नानास्ति किंचनेत्यादिश्रुतेरवयवावयविभेदादिति ॥ अन्नमयादावपि भासुर्धर्मत्वस्य भाष्य एवोक्तत्वा

त्वभाष्यपाठपरित्यागः प्राचुर्यस्यप्रतियोग्यल्पत्वापेक्षत्वेपिनप्रतियोगिनः सामानाधिकरण्यनियमः यतः प्राचुर्यस्यविजा
तीयसमानाधिकरणत्वंयथानिरूपकंतथासजातीयविभिन्नाधिकरणत्वंनिरूपकंदृश्यतेहिब्राह्मणप्रचुरोग्रामइत्यादौस
मानाधिकरणस्यविजातीयशूद्रादेरल्पत्वेनैवप्रचुरप्रकाशः सवितेत्यादौव्यधिकरणस्यसजातीयस्यनक्षत्रादिप्रकाशस्याल्प
त्वेनापिप्राचुर्यप्रकृतेचसैषानंदस्येत्यादिश्रुतौव्यधिकरणस्यसजातीयस्यजीवानंदस्यैवाल्पत्वमुक्त्वाब्रह्मानंदस्ययतोवा
नइतिमहत्त्वमुक्तमितितदविचाररमणीयमित्युपेक्ष्यमेवतथाहियदवादिअवयवावयविनोर्द्वयोरपिपूर्णत्वेनब्रह्मणाहस्त
ध्नुख्यइतिनैतद्युक्तंविभुत्वेहयोरवयवावयविभावानुपपत्तेः श्रूयतेचब्रह्मणः नित्यंविभुंसर्वगतंआकाशवत्सर्वगतश्चनित्या
दिषुश्रुतिषुविभुत्वं॥ नचतुल्यपरिमाणयोर्द्वयोरवयवावयविभावोदृष्टोयुक्तोवा॥ यत्तुधर्मांतरेप्यदृष्टमित्यादितदस
त्भूतवादिगतेत्यंताभावेअन्योन्याभावेचधर्मिताधिकदेशवृत्तितायादृष्टत्वात्भेदोमन्मतेधिकरणात्मकएवेतिचे
न्नजातेरपितथात्वात्पदार्थविन्यतानुसरणाच्चभेदादेरपितथात्वात्समवायादेस्तन्मतएवसत्वान्नतदभिप्रायेणै
यदृष्टांतोन्यथामात्रवस्त्रादिकर्तृकमावरणंआवरकापेक्षयाआश्रीयमाणस्यन्यूनपरिमाणापेक्षमितियुक्तंसंपूर्णा
वरणस्योपरितनसर्वावयवसंयोगसाध्यतयाआवरकस्यन्यूनपरिमाणत्वेतदयोगात्॥ आविद्यकमावरणंचत
दीयविषयताविशेषरूपंनाश्रीयमाणगतंपरिच्छिन्नत्वमपेक्ष्यतेअस्तिभातीत्यादिव्यवहाराभावप्रयोजकताभावे
नैवतत्रावरणव्यपदेशइतिविषमोदृष्टांतइतिपाठेनापिसुबोधंआनंददृष्टांतोपिविषमएवअन्यत्रादृष्टस्यापिपरम

महत्परिमाणपरमाणुपरिमाणगततारतम्यविश्रामस्य तत्र दर्शनमात्रेणान्यत्र पङ्कजशब्दवत्तात्पर्यप्रमाणाधीनत्वा-
त्व्यवस्थायाः ॥ ननूक्तं यापि प्रमाणमिति चेत् सत्यमुक्तमसदुक्तं तत् ॥ तथाहि पुच्छपदं तावदवयवविशेषे शक्तमि-
त्यावयोः समानं तत्र शक्यतावच्छेदकं पुच्छत्वं संस्थानविशेषाभिव्यंग्यो जातिविशेषः न च व्यापके वस्तुनि संस्थानविशे-
षः संभवदुक्तिकः न च नभस्त्वादिवत् संस्थानविशेषव्यंग्यताशून्यमेव तदिति शक्यं वक्तुं लोकावगतपुच्छत्वविपर्ययोप-
पत्तौ तादृशादृष्टचरकल्पनायां लोकावगतप्रवृत्तिनिमित्तत्यागादमुख्यार्थत्वस्यापरिहारात् अन्यथा अयं मुख्य अयम-
मुख्य इति व्यवस्थैव दुर्वचा त्वदुक्तरीत्या भूरादौ लोकावगतशिरस्त्वादित्यत्वाकाशत्वादिजातेः कल्पनापत्तेः तत्रापि भूरि-
ति शिरः आदित्यो रूपः सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त इति प्रमाणसौलभ्यात् विश्वतश्चक्षुरित्यादि
कमपि न तत्र प्रमाणं विश्वतो विश्वानि चक्षूंषि यस्येति व्युत्पत्त्या प्रमाणान्तरसिद्धाखिलचक्षुष्मत्तायाः एव तत्रावबोधनात् ॥
एवं सर्वतः पाणिपादं तदिति स्मृतिरपि न तत्र प्रमाणं ॥ न च विश्वतश्चक्षुरित्यादावुक्तव्युत्पत्तौ अन्यपदार्थेन तोयमानः
संबंधः उपकरणोपकरणीभावलक्षण एव वान्योन्यस्यातिप्रसंजकत्वात् स्वरसतः प्रतीतेश्चेति वाच्यं ॥ भगवतोऽव्या-
पकचक्षुः स्वीकारेऽपि जीवप्रदुपकार्यत्वाभावेन स्वारस्यभंगतादवस्थ्यात् न हि भागवतचक्षुषो ज्ञानजननद्वारा भगवदुप-
करणत्वं युज्यते अतः त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुख इ-
तिवत् सर्वात्मनावबोधनाय विश्वतश्चक्षुरित्याद्युक्तिरित्येव कल्पयितुं युक्तं ॥ यत्तु कृष्णकेशाः कृष्णा इति भागवतेऽभिनि-

पादनात्तस्य च गीतायां पूर्णतायाउक्तत्वात् अवयवस्यापि पूर्णत्वमिति ॥ नद्सत्तत्त्वतायत् केशत्वांशिकमंशास्य
वकेशत्वाभिप्रायेण किंतु यस्य निश्वसितं वेद इत्यत्रेव तदवयवकार्यत्वमत्यनायाससाध्यमिति द्योतनायान्यथा तत्रासि
तकृष्णकेशयोर्विमुखे ॥ एवं संस्तूयमानस्तु भगवान्पुरुषोत्तमः ॥ उज्जहारात्मनः केशौ सितकृष्णौ महामुने ॥ उक्त
च च सुरानेतौ मत्केशौ वसुधातले ॥ अवतीर्य भुवो भारक्लेशहानिं करिष्यत इति विष्णुपुराणे तयोरुक्त्वाद् नाभिधाना
च्छांगीकारेऽपि पुच्छस्यावयवांतरकल्पकप्रमाणाभावेनानवस्थाप्रसंगस्यैवाभावेन तुच्छपुच्छिनोर भेदकल्पनाया
भनवस्थानिमित्तकत्वायोगाच्च ॥ ननु पुच्छत्वादेव सावयवत्वमनुमानसिद्धमिति वाच्यं ॥ सावयवकत्वस्या-
धितेनानुमातुं शक्यत्वात् दर्शनानुरोधात् दर्शनादेः सावयवत्वस्यापि कदाचित्कत्वाभावात् ॥ यदपि विशेषबलाद् यद्य-
विनएवावयवत्वं यथास्मिन्नेव प्रकरणे आनंदं ब्रह्मणो विद्वानिति श्रुतेरानंदात्मकस्यैव ब्रह्मण आनंदित्वमिति तदपि न
विशेषबलादित्यस्याविचारासहत्वात् तथाहि धर्म्यैव धर्मः धर्मितन्मात्रमिति यावत् उत धर्मो धर्मी चेति व्यक्तिद्वयं तयोर्
दः परं नांगीक्रियते किंतु विशेष इति नाद्यः ॥ अपसिद्धांतापातात् ज्ञानानंदादिवाक्यानां पर्यायताप्रसंगात् तुल्यन्यायेन
ज्ञानत्वानंदत्वादेरपि धर्मितन्मात्रत्वात् ॥ न द्वितीयः भेदाद्विशेषस्याविशेषात् भेदस्य विशेषसंज्ञाकृतेत्येव पर्यवसा
नात् भेदं निषिध्याविशेषं व्यवस्थापयंत्याः श्रुतेः फलादर्शनात् ॥ ननु नेह नानास्ति किंचनेति श्रुत्या एवं धर्मान्पृथक्प

स्य नेहेति श्रुत्या नानात्वनिषेधे आनन्दं ब्रह्मणो विद्वान् यः सर्वज्ञः स सर्ववित् सोकामयत तन्मनोऽकुरुत सत्यकामः सत्य-
संकल्प इत्याद्यनेकश्रुतिभिरत्यन्ताभेदविरोधिधर्मधर्मिभावभस्थापनाच्च भेदमतिनिषेधविशेषः अंगीक्रियते तथा चाधिष्ठा-
षयत्वाच्छेदाभावेऽपि भेदनियत धर्मिधर्मभावाद्युपपत्तिः नहि स्वतन्त्रा श्रुतिः पर्यनुयोगमर्हतीति चेन्नैवं नेह नानास्तीति श्रुतेः
संकोचकाभावेन निखिलद्वैतनिषेधपरत्वावगमात् तथा सत्यपि अविद्यावशात् सर्वव्यवहारोपपत्तेः ॥ प्रपंचितं चैतत्
जिज्ञासाधिकरणे तद्भाष्ये च किंच नेति किमपीत्यर्थकं श्रुत्यन्तं भेदमात्रनिषेधस्य नेह नाना इत्यनेन चासिद्धेः संकोचे प्रमा-
णाभावाच्च किंच नानात्वनिषेधो विशेषसत्तामपि न सहते तस्य सविशेषभिन्नसाधारणत्वात् न संख्योपसंग्रहादपि
नानाभावादतिरेकाच्चेति सूत्रे तन्मते प्राणादिआत्मरूपेषु नानात्वाभिधानात् भेदाभेदमात्रेण श्रुतिद्वयोपपत्तौ विशे-
षकल्पने बीजाभावाच्च नेह नानास्तीति श्रुतेरात्यन्तिकभेदनिषेधपरता संभवात् परमात्मनि तत्स्वधर्मभूतपदेशाद्वित्वा-
दिभेदस्य तन्मतेऽपि सत्वेन स्वधर्मभेदसामान्यनिषेधायोगात् अपवादप्रविचारादिकृत भेदनिषेधरूपसंकोचोऽपि निगम-
कदोषः स्यात् अस्तु तद्विशेषकल्पना प्रयुक्तं तथैव गौरवमधिकं ॥ भेदोपगमे तद्भेदादिधारामादायानवस्था स्यादिति चे-
द्विशेषकल्पनेऽपि सा कुतो न स्यात् धर्मिग्राहकमानस्य स्वानिर्वाहकतारूपधर्मविशिष्टविशेषावगाहित्वेन नानवस्थे-
ति चेद्भेदे जागरूके धर्मिग्राहकमानस्यैवानुत्थानात् तत्र धर्मधर्म्युभयकल्पनातो धर्ममात्रकल्पनायां लघुत्वेन भे-
दस्यैव स्वनिर्वाहकतास्तु भेदाभेदव्याख्यानवस्थापरिहारार्थाधिकरणस्वरूपतायाः पक्षान्तरप्रयुक्तत्वाच्च ॥ ननु निषा

दस्थपत्यधिकरणन्यायेन नेह नानास्ति किंचनेति वाक्यात् यथाश्रुतात् धर्मयोर्निषेधावगतौ तन्निर्वाहाय स्वनिष्ठ-
ताविशिष्टविशेषकल्पनं न दोषायेति चेन्न ॥ वैषम्यात् निषादस्थपत्यधिकरणे हि बहुव्रीह्यपेक्षया कर्मधारयाश्रयणे
लाघवं प्रमाणान्तरावगतमिति कर्मधारयसमासे निश्चिते तदनुरोधेन तदुत्तरकालीनविध्यादिकल्पनं न दोषायेत्युक्तं
इह तु नेह नानेति वाक्ये भेदमात्रनिषेधासंभवेन नानाशब्दे संकोचनीये सति किमसौ यावद्द्रव्यमात्रधर्मप्रतियोगिकभेद-
परो वा अत्यन्तभेदपरो वेति जिज्ञासायां लाघवेन द्वितीयपक्षस्यैवोन्नेयत्वात् ॥ नन्वस्तु भेदाभेदस्तथापि ब्रह्मणः पुच्छपुच्छि-
भावानिराकरणात् नास्मद्रीतौ कश्चिद्दोष इति चेन्नापसिद्धान्तापातस्यैव दोषत्वात् ॥ किंचेदं ब्रह्मण अवयवित्वं ना
वदवयवारब्धत्वं ब्रह्मण आनन्दमयस्यानारब्धत्वात् अत एव न स्वावयवविशिष्टत्वं ॥ अन्यावयववैशिष्ट्यं तु पंनादि-
चेदवयवब्रह्मणः आनन्दमयादन्यत्वेन तदेकत्वानुपपत्तेः आनन्दित्वमानन्दत्वं ब्रह्मणि श्रूयमाणमपि न विशेषं गमय-
ति धर्म्यानन्दधर्मानन्दयोर्भेदोपगमादित्यपि केचित् ॥ यदप्युक्तं अन्नमयादावपि प्राचुर्यार्थत्वस्य भाष्य एवोक्तत्वान्न म-
यथाठपरित्याग इति तदपि त्वद्रीत्या विकारशब्दादिति सूत्रयोजनादूषणावसरे अन्नमयादौ मयटः प्राचुर्यार्थकत्वदू-
षणे दूषयिष्यामः ॥ यदपि प्राचुर्यस्य प्रतियोग्यल्पत्वापेक्षत्वेपि न प्रतियोगिनः सामानाधिकरण्यनियमः इत्यादि तत्रो-
क्तं कल्पतरौ प्राचुर्यस्य विशेषणत्वे प्रतियोगिन ईषदनुवृत्तिप्रतीतिनियमाभावेपि तस्य विशेष्यत्वे तन्नियमोऽस्त्येव ब्रा-
ह्मणप्रचुरो ग्राम इति प्रयोगे तद्दर्शनात् आनन्दमय इत्यत्र प्रत्ययार्थप्राधान्यानुरोधेन प्राचुर्यस्य विशेष्यत्वात् ॥ यत्तु चोद्य

कापायात्स्यादितोकाक्रत्वन्न रूक्षिप्रभूर्घतन्नप्रकाशप्रभुरः कश्चित्तेत्तु केपितस्मिन्नंधकारत्वेज्ञप्रतीतेरितिदूषणमुक्तं ॥ तन्नंदमेवसवितरितमसोबाधितत्वेपितत्रापितुहिनघनसैहिकेयाछादनारोपिततमोत्वत्प्रतीतेः घनाद्यपगम एवस्तुप्रज्ञानांतथाप्रयोगेणसर्वसंभवत्वात् ॥ यदप्युक्तं सैषानंदस्यमीमांसाभवतियदेषआकाशआनंदोनस्यादित्या दिवाक्येष्वानंदपदान्यानंदपराण्येवनप्राचुर्यलक्ष्यकानीतितत्स्वसित्थांतविरुद्धंतद्धेतुव्यपदेशादितिसूत्रेयदेष आकाशआनंदोनस्यादितिवाक्यस्थानंदपदस्यप्राचुर्यघटितार्थकतायास्त्वदीयैर्दर्शितत्वात् ॥ तथाहितत्प्रकाशि कायांएवंप्रचुरानंदत्वेनानंदमयपदवाच्योविष्णुरेवब्रह्मशब्दाभ्यासादित्युक्तंतदेवहेत्वंतरेणप्रतिपादयत्सूत्रमुपन्य स्यतदुपात्तश्रुतिमुदाहरतितस्यैत्विति आसमंतात्काशमानोविष्णुर्यदिपूर्णानंदोनस्यात्तदासौलोकंनप्रवर्तयेत् आनंदोद्रेकमंतरेणतत्प्रवृत्तौकारणाभावादितियदेषआकाशइतिवाक्यस्थानंदपदस्यपूर्णानंदार्थकत्वमुक्तंतदा नंदपदस्यानंदसामान्येशक्तस्यलक्षणांविनाननिर्वहतीतिस्पष्टमेव ॥ यच्चोक्तंयतोवाचोनिवर्तंतइतिश्रुतिर्ननिर्विशे षत्वमाहकिंतुब्रह्मानंदस्यावाङ्मनसगोचरानेकविशेषवत्त्वमिति ॥ तन्नित्यमेवअनंतविशेषवानानंदइतिज्ञान जनकवाङ्मनसगोचरस्यब्रह्मानंदस्यतदगोचरत्वबाधेनतादृशश्रुत्यौक्तार्थबोधायोगात्विशिष्यतज्ज्ञानजनक- वाङ्मनसागोचरत्वंतदर्थइतिचेन्न ॥ विशिष्येत्यनेनैवविशिष्यबोधात्तदानंदगतोभयावृत्तिधर्मानिष्ठनिरवच्छिन्न प्रकारताशालिबोधाविषयत्वंतदर्थइतिचेन्निवर्ततइत्यस्यैतादृशार्थबोधेस्वारस्याभावात्अस्मदीत्यापच्छरूपराभू

हृ सर्वोपाधिविनिर्मुक्तात्मनत्वाद्रागादिनिवृत्तिरूपयथाश्रुतार्थकत्वपरनयोपपन्नत्वेनावतिगुर्वर्थलक्षणाश्रयमानाश्रा
श्रावृत्तिवर्तनमित्याशयात्मनस्यते यथाश्रुतार्थकत्वस्यास्यादिकं प्रपंचितमीक्षत्याधिकरणेविस्तरेण ॥ न चानेकस गुण-
वाक्यानुरोधेन यतो वा च इत्यस्यैकस्यैव यथा कथंचिन्नयनमिति शंक्यं तात्पर्यग्राहकलिंगवसैकैनैव प्रबलेनानेकवा
धोपपत्तेः इदं हि वाक्यमस्मिन्प्रकरणे हिरण्यस्य तं मनोमयपर्यायमन्वयस्यं तेन नयानैकरूपेणाहिरण्यस्यमानस्य
वाक्यस्यान्यथानयनं न युक्तं ॥ किंचोपक्रमे सत्यं ज्ञानमनंतमित्यानंत्यमसंकुचितं चतुर्विधासाधारणीपाति योगित्वरूपं प्र
तिज्ञातं जन्माधिकरणोक्तरीत्या तदुपपादकतयैव सृष्टिवाक्यस्य प्रवृत्तिः तत्र सृष्टिवदुपयोगिगुणमात्रप्रतिपादनेव
स्तुपरिच्छेदस्य प्रसक्तेरानंत्यमप्रतिपादितमेव प्रसज्येदित्यस्मिन्प्रकरणे सृष्टिवाक्यजातमपवादमपेक्ष्यमाणमिव प्र
तीतिप्रनो वा च इति तद्गुणमेवव्याख्येयं तदुद्देश्यासिद्ध्युपयोगित्वान्न विपरीतं यतो वा च इत्यस्य मध्ये अपवादोपि दृश्यते ॥ एत
स्मिन्नदृश्ये ऽनात्म्ये ऽनिरुक्ते ऽनिलयने ऽभयं प्रतिष्ठां विंदते अथ सोभयं गतो भवतीति ॥ इदं हि वाक्यं सच्च त्यच्चाभवत् निरुक्तं
चानिरुक्तं च निलयनं चानिलयनं च विज्ञानं चाविज्ञानं च सत्यं चानृतं च सत्यमभवत् इति पूर्वतन वाक्येषु अध्यारोपितप्रपंचजा
तस्यानिषेधार्थं तत्र यद्यपि अदृश्ये इत्यनेनैव सर्वारोपितनिषेधः सिध्यति तथापि पूर्ववाक्योपात्तानामेवारोपितानामयं निषे-
धः इति विधिनिषेधयोः समानविषयत्वद्योतनाय आरोपितांतर्गतप्रतियोगिसमर्पकपदप्रत्यभिज्ञा पूर्वकं गोवलीवर्दन्या
येन पुनर्निषेधः केचिदत्र आपमर्षः आत्म्यं शरीरमात्मीयमिति प्राचतृत इहि ते ऽनिरुक्तमित्यभिलापानर्हत्वं नयोर्णलहू

हि तेनि [illegible] निरवयं [illegible] ज्ञानं ब्रह्म निर्दीयते [illegible] इति [illegible] साक्षात्स्वरूपं त
ज्ञानं आनंदं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति उ [illegible] ज्ञानस्य [illegible] अभयहेतुत्वेनाभ्यधिक
मानुतं दुःखं बिभाशाद्य इति निर्णयः यदेव आकाश आनंदो न स्यात् आनंदो ह्येवैष [illegible] अज्ञानात् [illegible] इत्यादिश्रुत्यंतरादानंदं ब्रह्म
णाहानि अभेदे पष्ठी [illegible] एषः ह्येवैष एतस्मिन्नुदरमंतरं कुरुते अथ तस्य भयं भवतीत्यनभयहेतुत्वेन श्रुत्यैवानम
भयहेतुविरुद्धमित्यवगते निर्दिष्टोपायज्ञानस्याभयहेतुत्वोपपादनात् सर्वदोषज्ञानमभयहेतुरित्यवगम्यते ॥ अत एव
भूयते हि तीयाद्वै भयं भवतीति तत्र वाक्ये अंतरज्ञाद्वा भेदं कुरुत इति क्रिया [illegible] स्य धातोस्तादृशे पज्ञाने
वृत्तिराश्रीयते उदरमित्यत्र उत् अरमिति पदच्छेदः अरमित्यल्पार्थः इदित्यर्थेन धाराऽमपि धर्मधर्मिभावलक्षणम
पि अंतरं भेदं कुरुते जानातीत्यर्थः एवं चाभ्यासवत् उपक्रमोपसंहारैक्यरूपमपि फलो वाचकत्वस्य भवत्येवलिंगमिति
ध्येयं ॥ यच्चोक्तं चंद्रिकायामियादि [illegible] यत्प्रतिशरीरं भिन्नं नासौ भगवदवयवः यथा वायवः नासौ प्रतिशरीरं भिन्नः विस्तृतं
चैतत्तैत्तिरीयभाष्ये भगवत्पादैरिति तन्न चिंत्यं ॥ आनंदमयस्य ब्रह्मत्वासिद्ध्यापेचैतत् कल्पनाभसत्वदीयते तिरीय
भाष्योक्तिर्विप्रतिपन्नं प्रतिप्रमाणत्वेनोपन्यासानर्हेति स्पष्टमेवेति यच्चोक्तं चंद्रिकायां सोऽकामयतेति पुल्लिंगेन सन्नि
हितपरामर्शिनातच्छब्देन नपुंसकलिंगब्रह्मपुच्छब्राह्मनिर्दिष्टस्य तस्मादात्मन इति व्यवहितात्मब्रह्मनिर्दिष्टस्य च परा
मर्शायोगात् सन्निहितस्यानंदमयस्यैव परामर्शव्यत्वात् ॥ सोऽकामयतेत्यस्य च कारणवाक्यस्य तथापि ब्रह्मपरत्वेनांगीकृ

तत्वाच्च कथमानंदमयस्य ब्रह्मता अपि चानुवाकांते उदाहृतो यतो वाच इति श्लोकः एवं मनोमयेपि श्रुत्योदाहृतस्तस्य च ब्रह्म
विषयतात्वयापि स्वीकृतेति कथं मनोमयस्य ब्रह्मता किंचान्नमयादीनामब्रह्मत्वे ब्रह्मजिज्ञासोस्तदुपदेशायोगः द्वारत्व
पि द्वारत्वेनोपदेश इत्यं नात्मतया लोके हि चंद्रारुंधत्यादौ शाखास्थूलतारादिकं द्वारत्वेनैवोपदिश्यते ॥ न चान्नं ब्रह्मेत्यु
क्ता आनंदो ब्रह्मेति वक्तुमशक्यं येन द्वारत्वं स्यात् ॥ न च सत्यं ज्ञानमिति स्वरूपलक्षणेन ब्रह्मोपदिश्य पुनस्तस्य देहादि
रूपताभ्रांतिमुत्पाद्य पुनरपि पुच्छवाक्येन तदुपदेशोऽर्थवान् ॥ न च द्वारोपदेशश्चिन्त्यस्य भक्त्यभावण्यार्थः कोशानां परा
कृत्वात् परासूपदेशो न च भक्त्यभावण्ये ऽतिप्रसंगात् भक्त्यकृत्वेनारोपस्याप्यानंदमयेऽनुवाके कान्नादौ चाभावा
त्तत्वात्तानामन्नादीनामन्नमयादित्वे च तन्नत्यस्तस्याब्रह्मत्वेन स्वीकृत आनंदोऽप्यानंदमयः स्यात् स्थानप्रामाण्यात् ॥
न चाज्ञानधर्मत्वं चैत्यवंदनादिधर्म इति मन्यानं प्रति चैत्यवंदनादिधर्म इति उपदिश्य ज्योतिष्टोमादिधर्म इत्युपदिश्य
ते ॥ न च त्वन्मते अपरिच्छिन्नस्यात्मनः शरीराद्यंतरत्वमहत्त्वरूपं भक्त्यकृत्वं वास्ति ॥ न च घटाकाशादिज्ञानोपयोगि
घटादिर्महाकाशज्ञानोपायः इह च सत्यं ज्ञानमनंतमिति प्रकृतापरिच्छिन्न एवात्मा जिज्ञासापयिषितः इति तेपि मतं
॥ किंच निरवयवेचिन्त्यावण्यार्थं निरवयवांतरमेवोपदेष्टव्यं न त्ववयवं दक्षिणः पक्षः इति सावयवः अपि च न तावदन्न
मयादीनां ॥ अन्नादीनां वा प्राणादीन् प्राणमयादीन् वा प्रति द्वारत्वं अन्नादिज्ञानं विनापि प्राणादिज्ञानात् ब्रह्म
णि द्वारत्वे तु अन्नादिपूर्वकं प्राणाद्युपदेशो न युक्तः अनेकद्वारवैयर्थ्यं च ॥ न च द्वारा[illegible]नुवाके अन्नं ब्रह्मेति व्याख्या

नान्नमयो ब्रह्मेति अज्ञानात् मनो ब्रह्मेति व्यजानात् इत्यादिः अन्नप्राणादिद्वारसमुच्चयोक्तेः ॥ अपि च यतो वेत्यादि पूर्व
वाक्योक्तकारणत्वस्यानियन्तत्वेन ब्रह्मणि द्वारत्वात् कोशानां च कारणत्वे द्वारत्वाभावात् कोशोपदेशवैयर्थ्यं ॥ किं च भृगुः
वरुणोपदिष्टानां द्वारत्वं न चेत् तेन विचारेण न स एव पुनः पृष्टस्य योगः येन तेन अन्नं ब्रह्मेति व्यजानात् अन्नात्स्येषो नि भूयेत
तस्मादन्नमयादयो ब्रह्म न कोशा इति ॥ अत्रेदं वक्तव्यं सोऽकामयतेत्यादिकमपुच्छमेव आनंदमयपर्यायपठितेन तस्यैष
एव शारीर आत्मा यः पूर्वस्येति श्लोकेनानंदमयं प्रत्यात्मत्वेन ब्रह्मणः प्रस्तुतत्वात् सर्वनाम्ना परामर्शलिंगेन सद्भावेनाति सन्नि
हितस्य तस्य परामर्शोपपत्तेः अपि नेत्यादिकमपि न सत् ॥ मनोमयपर्यायेऽपि यतो वाच इत्यस्य मनःस्तुतिपरत्वेन मनोमय-
स्य ब्रह्मत्वासाधकत्वात् किं चान्नमयादीनामब्रह्मत्वेऽपि त्वाद्यतिसल्लभ्यथापि द्वारोपदेशस्य लोके दृष्टत्वात् ॥ न चान्नं ब्र
ह्मेत्युक्त्वा आनंदो ब्रह्मेति भृगुप्रश्ने येन द्वारत्वं स्यादित्युक्तिरस्य सुतरां सिद्धान्तरहस्यानभिज्ञमतारणपरैव यतो आ
नंदो ब्रह्मेत्युपदेशेन ब्रह्मानंदयोरभेदावगमेऽप्यन्नस्योपदेशस्य स्वयमल्पत्वेन ब्रह्मैक्यस्यानपगमात् द्वारोपदेशोऽस्तु तत्सौलभ्यं
॥ तथा हि उपक्रमे तावत् ब्रह्मविदाप्नोति परमिति ब्रह्मज्ञानेन परमाप्तिरूपं फलमुक्तं तत्र कीदृशं ब्रह्म कीदृशं च तज्ज्ञानं परमाप्तिश्च की
दृशीत्याकांक्षायां सत्यं ज्ञानमनंतमिति तत्स्वरूपमुपदर्शितं यो वेद निहितं गुहायामिति तद्वेदनं च दर्शितं अत्र गुहास्थितिप
रो गुहाशब्दः परमव्योमशब्दश्चेश्वरपरः अव्याकृताकाशशब्दितपरमेश्वरोपाधिभूताया विद्यामायायाः तत्त्वेन तया चा
विद्यारोपवत्कार्यतया वर्तमानायाः बुद्धेश्च तत्र निहितमित्यनेन जीवलाभः ॥ यद्यपि परब्रह्मणः परमेश्वररूपेण जीवरूपेण

चगुहाप्रविष्टत्वमस्ति तथापि यो वेद निहितमित्यत्रास्थितं वित्तं वेत्याद्यनभिधाय निहितमित्युक्त्या पारलौक्याचगमात्तज्जै
वमेव रूपं ब्रह्म इति मतीयतं निहितमिति कर्मभत्यये समभिव्याहृतात् धातोः प्रतीतायां क्रियायां केनेति कर्त्राकांक्षायां तेनैव यथा
गृहे स्थापितो मणिर्धरण्यां निहितं धनमित्यादौ तथैवानुभवात् कर्तुश्चोत्सर्गतः कर्मणोऽन्यः तथा च कर्म ण्यन्यकर्तृकक्रि
याकर्मत्वावगमादस्मात् तंत्वं ण्यम्यते पारमेश्वररूपं च नान्येन निहितं स्यात् तं ज्यात् जीवस्तु परमेश्वरेण निहितः अस्मात् ज्यात्
॥ नहि परमेश्वरसंकल्पं विना यत्किंचिदपि केनापि कर्तुं शक्यं ॥ स्फुटा च जैवरूपेण प्रवेशोऽपीश्वरसंकल्पाधीनता सेयं देव
तैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतमेकैकं
रवाणीति सेयं देवतेमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत् तासां त्रिवृतं त्रिवृतमेकैकामकरो
दित्यादिश्रुतेः ॥ एवं च ब्रह्मपदानुषंगेन एवंविधगुहानिहितं जीवं ब्रह्मेति यो वेद स ज्ञानाकारोदर्शितो भवति ॥ यद्वा एवंभू
तं ब्रह्मगुहानिहितं जीवं वेदेति यथाश्रुत एवान्वयः श्रुतिप्रसिद्धं ब्रह्मरूपमनूद्य जीवाभेदस्यापि विधानसंभवात् यद्यपि
बोधस्य जीवब्रह्मैक्यविषयत्वानपायात् तमेव प्रकृताभेदं प्रपंचयितुमात्मनः प्रकृतिभूताव्यतिरेकेण सत्तां चेयदादेरु
सांस्थितिरपि निहिता ब्रह्मपदसमानार्थकानंतपदबोधितचतुर्विधाभावाप्रतियोगिन्यरूपासंकुचितानंत्यस्य बोधनाय प्रति
पादितं नैतत्तज्जन्याधिकरणे ॥ ननु जीवब्रह्माभेदोऽनुपपन्नः जीवस्य कर्तुः भोक्तुः सतोऽभेदस्याहं मनुष्य इति प्रत्यक्षासिद्ध
त्वात् इत्यादिशंकाव्युदासेन स्थूलशरीरमारभ्य सोऽन्नजीवपर्यंतेभ्यः कोशेभ्यो विविक्तं यज्जीवस्य पारमार्थिकं रूपं तत्

ब्रह्मेत्यवगमयितुं कोशोपदेशोद्धारस्तथा प्रक्रान्तः नत्वानायासेन विनेयबुद्ध्यवताराय पामरैरप्यात्मतया गृहीतमन्न
मयकोशं सृष्टिप्रसंगादन्नविकारत्वेनाभिधाय तत एव हेतोः नासौ जीवस्य पारमार्थिकं रूपमित्यादिक्रमेणात्मानं कोशा
दिभ्यो विविच्य दर्शयितुं शरीरादात्मान्य इति विवेचयद्भिरन्यैरात्मत्वेन निर्धारितं प्राणमयकोशमन्नमयादन्यत्वे
नानूद्य सोऽपि न जीव इति विवेचयद्भिः प्राणमयादन्यत्वेनानूद्य तैरप्यात्मतया निर्णीतं मनोमयं सूक्ष्मदर्शिभिरधि
कविवेकशालिभिरात्मत्वेनावधारितं विज्ञानमयकोशं मनोमयादन्यत्वेनानूद्य ततोऽधिकतरविज्ञानैरात्मत्वेना
वधारितमविद्योपहितं सुषुप्तिप्राप्तमनोपहितं वा जीवस्योपाधिकलुषितं रूपं विज्ञानमयकोशादन्यत्वेनाभिधाय त
तोऽपि निष्कृष्टं शुद्धमात्मस्वरूपं ब्रह्मेति ब्रह्मपुच्छं प्रतिष्ठेत्यनेन श्रुत्या निर्णीयते अयमेवार्थः उपसंहारे दर्शितः स
यश्चायं पुरुषे यश्चासावादित्ये स एक इति पुरुषादित्यशब्दयोः शारीरिपरत्वात् लोके हि परमसूक्ष्मामरुंधतीं दर्शि
यितुं तन्निकटवर्तिन्यतिस्थूलतारामरुंधतीत्वेनोपदिश्य तस्यां बुद्धिस्थैर्ये सति तत्त्वोपदिदर्शयिषुणा तन्निकट
वर्तिनी सूक्ष्मतारा ततः सूक्ष्मतरा ततः सूक्ष्मतमा नन्तरं च मुख्यारुंधती प्रदर्श्यत इति प्रसिद्धं सच्चायमुपदेशक्रमः प्रकृते
समाहृतः ॥ एतेन सत्यं ज्ञानमनंतमिति स्वरूपलक्षणेन ब्रह्मोपदिश्य पुनस्तस्य देहादिरूपताभ्रांतिसुप्त्याद्यपुन
रपि पुच्छवाक्ये तदुपदेशोऽसंगतः प्रयोजनाभावात् प्रकृतत्वाच्चेति चंद्रिकोक्तमपास्तं ॥ सत्यमित्यादिना श्रुत्य-
ब्रह्मावगतावपि तस्य जीवतात्त्विकरूपाभेदस्यानवधारणादेतादृशमनाद्याश्रयणेन मनः संस्कारोपहितसौषु

तात्मनो पक्षिरादीरणां मुक्तिप्रियेनक संस्कारोपादितन्द्रियं तमूर्त माधारतयोपचय [illegible]

कौ जीवस्य च्छायोदेलम्यत इति म्लिष्टनरं म संगात्स्व हारनु वस्तोपासनानां विधा [illegible]

न शरण्यार्थं म द विद्या विरोधि दुरितनिरासार्थं नेति न किंचिदनर्थं ॥ एतस्यै [illegible]

स्य वस्तुं फलं मागमनवविज्ञानमयोपासनयोरुपदर्शितं चिरकाल साध्य म न्ह म [illegible]

थस्य करणं शक्तिमयांतस्यां वृत्तिनामायस्य चावश्यमपेक्षितत्वात् ॥ न च ह्यरोप [illegible]

ज्ञानां परत्वात् परगुरुपदेशेन च मत्य कृमावत्ये । निम संगादृतिश्चंद्रिकोक्ति [illegible]

देवोविषयादिभ्यः भातिलोम्येनां न नं परांचि विषयानं च ति भाति लोम्येन वर्तन [illegible]

हं स्तु धितोहं पिपासुरहं मह संदेह्यि कल्पयामिनिश्चिनोमि करोमि सुखमहमिति स्फुरत [illegible]

कथिरक्षितमत्यकृत्वान पायात् चोन त्यादि निवृत्तिलक्षणस्य भावपण्यस्य [illegible]

सत्यन्याविसंभवान्न नरानुपाकोकान्यादिकमपि स्वानं मभायादन्नमया [illegible] ॥ [illegible]

अन्नसेन सोह तोभ्यानंदमानंदमयः स्यात् स्थानं प्रमाण्यादिति चंद्रिकोक्तिस्तु न सभ्यक् ॥ तम्बै [illegible]

विराप्र मेयोमन्यतितिष्ठिते त्यादिलिंगैर्न तद्वैर स्थानमा माण्यस्य बाधारिवर्यं [illegible] स्थानप्रमाणम [illegible]

दन्नमद्दर्शाभिप्रायेणैवोपायत्वांतरस्याप्यारस्यैव श्रुतिकल्पनेन ब्रह्मस्वरूपतानिराकरणसंभवाच्च ॥ एतेनाज्ञात
धर्मतत्त्वमित्यादिचंद्रिकोक्तदूषणं निरस्तं ॥ धर्मस्य ब्रह्मणश्चातिगहनत्वाभावात् अपि च ज्ञातादित्यपि चंद्रिकोक्तं
नसत् ॥ विनेयबुभुत्सावपामरादिभिरप्यात्मत्वेन गृहीताद्देहादतिस्थूलादाआनंदाद्विविच्य सूक्ष्मसूक्ष्मतरसूक्ष्म
तमेभ्योऽन्नमयादात्मनो विविच्य प्रदर्शनायान्नादिपूर्वकं द्वारसमुच्चयोपदेश इत्यभ्युपगमात् ॥ अपि च यतो
वेत्यादिकमपि चंद्रिकोक्तमसत्कारणत्वोपलक्षितेन ब्रह्मणा कोशान्निष्कृष्य साक्षिचैतन्यस्याभेदोपपादनाय का-
रणत्वोपदेशकोशोपदेशयोर्द्वयोरप्यावश्यकत्वात् ॥ किंच भृगुरित्यादिकमपि चंद्रिकोक्तमसत् आसुरमकृतोविरो
चनस्यानेकजन्मार्जितदुरितशालमपि संचिततपालतास्फुरणोपितपः समुचितभागधेयस्यानुत्पन्नस्य भृगोस्त
त्त्वमसिपदोक्तवाक्यभावात्पुनः पुनरुपसत्त्युपपत्तेः पुनः पुनरुपसत्त्याच नान्नं ब्रह्मेत्यंशस्य स्फुटीकरणाच्च नकदंतस्त
दुक्तिरिति न किंचिदपि चंद्रिकोक्तं दूषणमिति विभावनीयममलतरैः सुधीभिरिति यच्चान्नमयादिपर्याये पुच्छस्या
प्राधान्यं पुच्छत्वेन प्राधान्यमवगतमानंदमयपर्याये परित्यक्तमिति प्रायपाठविरोधः स तावन्निगमश्लोकस्थेनब्रह्मशब्दानु
त्यभ्यासेन निरस्तोऽपि हेत्वंतरेण पुनर्निरस्यते तद्धेतुव्यपदेशाच्चेति ॥ तस्यानंदमयपर्याये स्वप्रधानतया प्रतिपाद्यस्य
हेतुत्वव्यपदेशात् अग्रिमसंदर्भेण सोऽकामयत इदं सर्वमसृजत ॥ यदिदं किंचेत्यादिनाऽऽनंदमयसर्वाधिकारणरूपजग
त्कर्तृत्वव्यपदेशादिति सूत्रार्थः ॥ अयंभावः यदि ह्यानंदमयपर्यायस्य ततः प्राचीनपर्यायवैरूप्यापादनंदमयप्राधान्यत्व

योच्यते ॥ तथापि पूर्वपूर्वपर्यायेष्वेवैरूप्यमानंदमयपर्याये तु त्यजमेव यतोऽन्नमयपर्यायेषु निगमनश्लोकोऽनंत
तोऽन्यस्यैवात्मनः प्रदर्शनमेव कृतं न तु तदनुबंधितयान्नगताः केऽपि न गुणा आम्नाताः अन्नमयकृतपर्यायप्रधानगताः क
एवत्वादयो निगमनश्लोकोत्तरमपि वर्ण्यंत इति मन्यते सूपक्रांतं तु हानिर्हि तत्पर्यवसानभूमितया ब्रह्म प्रतिपत्तये
अन्नमयादिकोशांतरात्मतयोपदिश्यमान आत्मा आपि पर्याये आनंदमयादांतरत्वेनानिर्दिष्टत्वाच्चाविशेषरसोदमु
कायांजडेऽप्यभेदप्रयुक्तायां वस्तुपरिच्छेदगर्भानंत्यासंभवशंकायां निरस्तायामपि जगदुपादानत्वनियंतृभेदप्रयुक्तायुक्तशंकांनिरसि
तुं सोऽकामयतेत्याद्यग्रिमोक्तिरिति केचिद्व्याचक्षते ॥ वस्तुतस्तु ननु कृत्स्नेनाप्यानंदमयवाक्येन ब्रह्मपुच्छं प्रतिष्ठेत्यं
तेनावयव्यानंदमयः पूर्वपर्यायेष्वन्नमयादिवत्तच्छिरःप्रभृतिपुच्छांतसकलावयवापेक्षया प्राधान्येन प्रतिपाद्यः प्र
तीयते अतः प्रथमश्रुतानेकावांतरवाक्यघटितमहावाक्याविरोधादभ्यस्तस्यापि ब्रह्मशब्दस्यानंदमये जघन्यवृत्तिक-
ल्पनं पुच्छमित्याशंकां निरस्यति ॥ तद्धेतुव्यपदेशाच्चेति ॥ तस्य ब्रह्मणः सानंदमयनिखिलविकारहेतुत्वव्यपदेशान्ने
तितदर्थः अयं भावः असन्नेव स भवति असद्ब्रह्मेति वेद चेदित्युक्त्यापक्षे प्रासामस्त्याशंकां निरसितुं सोऽकामयतेत्या
दिना परस्य ब्रह्मणोऽभिन्ननिमित्तोपादनतामग्रिमः संदर्भः प्रतिपादयतीत्ययमर्थः ॥ तैत्तिरीयभाष्ये भगवता भाष्यकारे
णाप्यभिहितः स एव भगवतः परमर्षेः सूत्रकारस्याभिप्रेतः ॥ तथा च यद्यानंदमय एव निगमनश्लोकविषयः तदाप्रिया
दिविशिष्टस्य तस्य सुखमहमिति सर्वानुभवसिद्धतयाऽसत्त्वशंकायास्तस्मिन्ननुदयात् तन्निरासाय सोऽकामयतेत्या

दिना संदर्भेण न स्यादिति तज्जगत्स्थेतुत्वव्यपदेशो ऽसंगत एव स्यादिति ॥ नन्वेवमसत्त्वशंकायोगाच्चेति सूत्रविन्या
स स्यादिति वाच्यं जीवस्यापि नित्यत्वविभुत्वादिना पूर्वेणाभ्यस्यत्वतया तेनानूपेणासत्त्वशंकायाः संभवात् संकल्पपूर्वक
जगत्स्रष्टृत्वकथनेन तादृशाशंकानिरासासंभवाद् यथोक्तविन्यासस्यैवावश्यकत्वात् ॥ यद्वाहेतुनानेन संदर्भेण वक्ष्यमाणाना-
मसत्त्वशंकानिरासकहेतूनां तराणां समुच्चयः तादृशाहेतवश्च तैत्तिरीयभाष्ये स्पष्टमुपपादिताः ॥ ननु अन्नमयादिपर्याये
षु पुच्छशब्दस्यावयवपरत्ववदिहापि पुच्छशब्देन ब्रह्मण अवयवत्वं कस्मान्न पूर्वसाम्यायेति यदुक्तं तत्राह तत्स्थेतुव्यपदेशाच्चेति
॥ अयं भावः पूर्वपर्यायेषु इदं पुच्छमिति तत्तत्कोशैकदेशोपि पुच्छत्वं निबध्यं ब्रह्मणश्च नानंदमयैकदेशत्वं तत्प्रत्यपिका
रणत्वात् तत्र ब्रह्म पुच्छमित्यत्रानेकदेशोऽपि पुच्छत्वाभ्युपगमे वैषम्यं प्राप्तमेव न त आधारलक्षणामयुक्तं कुतो नं सह्यमिति
इदं पुच्छं प्रतिष्ठेत्यन्नमयपर्याये आकाश आत्मा पृथिवी पुच्छं प्रतिष्ठा यजुरेव शिरः इति प्राणमयमनोमयपर्याययोश्चक्व
चिदेकदेश एव पुच्छत्वादिदृष्टिः क्वचिदनेकदेश एव शिर आदिदृष्टिरिति वत् क्वचित् पुच्छशब्दः अवयवलक्षकः क्वचिदाधार
लक्षक इति वैषम्य मविरुद्धमिति द्योतयितुं च शब्द इति व्याख्येयं ॥ यदुक्तं पूर्वपूर्वपर्यायेषु अवय विनः स्वप्रधानतया प्र
तिपाद्यत्वदर्शनादानंदमयस्याप्यवयविनः अत्रापि स्वप्रधानतया प्रतिपादनं युक्तमिति तत्र पूर्वपूर्वपर्यायेषु अवयविनां प्रा
धान्यमभ्युपेत्य प्रकारांतरेण समाहितमिदानीं परमार्थतो विचारे पूर्वपर्यायेष्वप्यंतरात्मतया ब्रह्मण एव स्वप्रधानस्य प्रति
पाद्यतानान्नमयादीनामित्याह मांत्रवर्णिकमेव च गीयते ॥ मंत्रवर्णोगुहानिहितत्वेन प्रतिपादितं ब्रह्मैवान्नमयादिष्व

पि स्वप्रधानतया प्रतिपाद्यते यतो ऽन्नमयादिपर्याया अपि सर्वांतरतया प्रत्यगात्मतया ब्रह्म प्रतिपादयितुमेवान्नमया
दीन्प्रतिपादयंति न स्वप्राधान्येन अन्यार्थतयोपदिश्यमानान्नमयाद्याश्रितानां ब्रह्मदृष्टीनां फलविशेषोद्देशेन विधानेपि
न तावता तेषां प्राधान्यं वक्तुं शक्यं दर्शपूर्णमासांगापप्रणयनमाश्रित्य पशुरूपफलोद्देशेन विधीयमानस्यापि गोदोहनस्य
प्रकरणित्वादर्शनात् गोदोहनेन पशुकामस्येति वाक्येन तस्य फलवत्त्ववत् सर्वं वै तेऽन्नमाप्नुवंति येऽन्नं ब्रह्मोपासते इति वा
क्येष्वन्नमयाद्युपासनानां फलवत्त्वं न प्राधान्यार्थं तेन नैतावता तस्य प्रकरणित्वमिति ॥ न कारणीभूतप्रधानस्यापि मनोम
यपर्याये व्यभिचारः समुद्भाव्यते ॥ ननु प्रक्रमादावपि जीव एव प्रतिपाद्यः तस्य देशतः परिच्छेदराहित्येन शरीरबृंहणेन
च ब्रह्मशब्दार्थतोपपत्तेः तदुपासने च सर्वकामावाप्तिलक्षणफलमपि दिश्यते स एव चाविद्यालक्षणायां गुहायां नि
हितत्वेन मंत्रवर्णप्रतिपाद्यः तस्य चान्नमयादिक्रमेण कोशचतुष्टयांतरत्वमुपासनार्थमुपदिश्यते आनंत्यं च देशतः
कालतो वा तस्यापि संभवति आकाशाद्युपादानतापि तस्यैवोक्ता आकाशाद्यात्मना परिणममानाविद्याश्रयत्वात् ॥ ननु
निरवयवस्य ब्रह्मणः आनंदप्रचुरत्वमानंदविकारत्वं वानंदमयत्वं तस्यैव युक्तं ॥ तद्विजातीयदुःखाश्रयत्वात्
प्रियादिविशिष्टतया कार्यत्वसंभवाच्च ॥ तस्य चाभिधेयवपुर्विशिष्टस्य प्रतिपत्तिकल्पनमपि निराबाधं तस्यैष ए
व शारीर आत्मा यः पूर्वस्येत्यस्य च तस्य पूर्वस्य विज्ञानमयस्य एष एव शारीर आत्मा य एष आनंदमय इत्यर्थः शारीरत्वम
पि तस्यैव प्रसिद्धं शारीरश्चोभयेपि हीति सौत्रनिर्देशात् ॥ एवं च निगमनश्लोकप्रतिपाद्योपि स एव एवमुपक्रमे जीवप

रत्वात्पवसितेउपसंहारेपिहिरण्यगर्भाद्युक्तदूजीवपरत्वात्कथंचिन्नेयः अपसंजातविरोधमुपक्रमानुरोधेनोपसंहा
रोनेयइत्यर्थस्यपूर्वंप्रसिद्धत्वादितिशंकांनिरस्यति ॥ नेतरोनुपपत्तेरिति ॥ इतरोजीवोनस्वप्राधान्येनात्रभति
पाद्यः तत्रब्रह्मणाहुमुख्यार्थत्वसंकल्पपूर्वकनिखिलहिरण्यगर्भादिसहितजगत्कारणत्वानुपपत्तेः नचाक्षेपेणवाक्या
र्थसंभवेक्लेशाश्रयणंयुक्तंतस्यैषएवशारीरआत्मायःपूर्वस्येत्यस्यपूर्वपक्ष्यभिमतमर्थंदूषयति ॥ भेदव्यपदेशाच्चे
ति आनंदमयादंतरात्मनोभेदव्यपदेशाच्चेत्यर्थः तस्याशिष्यशंकानिरासायचशब्दः तेनोक्तयोजनाक्लेशस्याभुक्तता
समुच्चीयते सोकामयतइतिकामयितृत्वस्यचेतनधर्मस्यश्रवणान्नप्रधानापेक्षेतिसूत्रार्थः अत्रप्रधानस्यैतदुपनिष
त्प्रतिपाद्यत्वंनिराक्रियते यद्यप्यानंदमयादिश्रुतीनांज्ञानत्वादिलिंगानांचभूयसामुपक्रमेपिसत्वान्नप्रधानपर-
त्वशंकोन्मिषति तथापिगतिसामान्यप्रपंचनायतदुक्तिः केचित्तुनन्वोपसंहारिकप्राधान्यलिंगैर्बहुभिरेकंपुच्छपदम
प्राधान्यद्योतकंतदनुरोधेनाधारलक्षणयाऽन्यथाव्याख्येयमित्युक्तमिदानींमुपक्रमानुरोधेनाप्यन्यथाव्याख्येयमि
त्याह मांत्रवर्णिकमेवचगीयतइति मंत्रवर्णेहिब्रह्मत्वप्रधानमवगतंतदेवब्रह्मपुच्छमित्यत्रब्रह्मपदेनप्रत्यभिज्ञा
यते अतः स्वरमश्रुतपुच्छपदंमयमश्रुतब्रह्मपदानुरोधात् आधारलक्षकंभविष्यतीत्यभिप्रायः नन्वानंदमयंप्रति
ब्रह्मणःपुच्छत्वेनावयवत्वाभिप्रायामानंदमयोपासनंनिरंगस्यात्तत्पूर्वपर्यायेषूपासनांगतयागौणत्वांगूलत्व
विवक्षादर्शनादित्यतआह नेतरोनुपपत्तेरिति ॥ आनंदमयइहपर्यायेउपास्योनभवति उपक्रमोपसंहारावगत

ज्ञेयब्रह्मतात्पर्यके प्रकरणे उपासनाविवक्षानुपपत्तेः ननु ब्रह्मप्रकरणेऽपि यथा अन्नमयादिकोशेष्वांतरोऽपासना
निविवक्षितानि तद्वत्प्रकृतेऽपि किं न स्यादित्यत आह ॥ भेदव्यपदेशाच्चेति ॥ भेदो वैलक्षण्यं पूर्वपर्यायेषु फलनिर्देशः इ
ह नास्तीति वैलक्षण्यं कामाच्च नानुमानापेक्षा एतत्सूत्रार्थः पूर्ववदेवमानंदमयपर्याये फलनिर्देशो नास्तीत्यसंगतं
उपक्रांतसर्वकामावाप्तेरेव फलत्वस्य तत्र संभवात् ॥ न च तत्र ब्रह्मविद्याफलं नानंदमयोपासनाफलमिति शंक्यं ॥ विदे
रुपास्तिपरताया अपि दर्शनात् ब्रह्मपुच्छफलेनानंदमयोपासनाया अपि ब्रह्मोपासनत्वसंभवात् ॥ न च ब्रह्मविदा
प्नोति परमिति परशब्देन मोक्षप्राप्तेरेव फलत्वावगमात् ॥ तस्य चानंदमयोपासनतः असंभवेन विदेरुपास्तिपर
त्वं न संभवतीति वाच्यं ॥ विज्ञानमयमनोमयपर्याययोरपि शरीरे पाप्मनो हित्वा सर्वान् कामान् समश्नुते आनंदं ब्रह्म
णो विद्वान्न बिभेति कुतश्चनेति मोक्षरूपफलकीर्तनात्तत्र चेच्छिन्नश्रुत्यध्याहारात्तत्फलकत्वं तर्हि प्रकृतेऽपि किं न स्या
त् अत आह अस्मिन्नस्य च तद्योगं शास्तीति ॥ अस्मिन्नेतदुपनिषत्प्रतिपाद्यनिर्विशेषप्रत्यगभिन्नब्रह्मताज्ञाने सति-
अस्य जीवस्य तद्योगस्तदात्मना योगस्तद्योगः तद्भावापत्तिरिति यावत् तच्छब्दोऽत्र ब्रह्मपरः शास्ति शास्त्रं यतो वा
चो निवर्तंते अदृश्येऽनात्म्ये इत्यादिना वाङ्मनसागोचरं अदृश्यत्वादिधर्मकं निर्विशेषं एतस्मिन्नित्यनेन प्रकृत्य ॥
अभयं प्रतिष्ठां विंदते ॥ अथ सोऽभयं गतो भवतीति शास्त्रं ॥ नहि ब्रह्मपुच्छकानंदमयोपासनतस्तादृशमोक्षाख्यफ
लमुपपद्यते ॥ तमेव विदित्वाति मृत्युमेति ॥ नान्यः पंथा अयनाय विद्यत इति ॥

तोक्तेः नापि मनोमयाधिष्ठानमयकोशाभिप्रायं। मनोमयपर्यायेऽपि यतो वाच इति श्लोकस्याम्नानात् तस्मिंश्चानंदं
ब्रह्मणो विद्वानिति दर्शनात् मनोमयोपासनं मोक्षजनकब्रह्मविद्यासाधकमिति लौकिकपतेऽपि ज्ञानमयकोशोऽपि शारीरेपा
प्मनो हित्वेति वचनात् ब्रह्मविद्याप्रतिबंधकस्य पापनिवृत्तिस्तत्फलमिति लौकिकपते नैवमानंदमयपर्यायेऽपि किंचित्फलं श्रूयमा
म्नायते अतोऽनंदमयपर्याये उपासनाविधिरस्तीति अपि च जीवः प्रधानं वा न प्रकरणिनौ अस्मिन्ने तदुपनिषत्प्रतिपाद्यवि
षयकज्ञाने सति अस्य जीवस्य तद्योगं ब्रह्मभावापत्तिरूपं शास्ति शास्त्रं पूर्वोक्तं न हि प्रधानस्य जीवस्य वाचेतनेन चेतनांतरेण वा
ऐक्यं संभवति जीवस्यानुपहितं रूपं परमात्मैवेति तत्सूत्रार्थः ननु ब्रह्मविदाप्नोति परमित्युपक्रमे भेदगर्भब्रह्मप्राप्तेः फलत्व
कीर्तनात् सोऽश्नुते सर्वान् कामानिति तद्विवरणोपिका मयाऽऽह्लादित परमानंदजगत्कारणत्वादिकल्याणगुणविशिष्टभगवद
नुभवरूपापास्त्यास्तेः फलत्वाभिधानाच्च तदनुरोधेन चरमश्रुतस्य उदरमंतरं कुरुते अथ तस्य भयं भवतीत्यादेस्तदविरोध्य
र्थपरतया एव वाच्यत्वान्न तद्भावापत्तिरूपतद्योगशासनमत्रेति चेदस्मिन्नस्य च तद्योगं शास्तीत्यस्यैव तच्छ्लोकोत्तरत्वाद्
॥ तथाह्यस्मिन् प्रकरणे अस्य जीवस्य ब्रह्मविद् ब्रह्मैव भवतीत्यादिश्रुत्यंतरेषु प्रसिद्धतद्योगं ब्रह्मभावापत्तिरूपं शास्ति शा
स्त्रं ब्रह्मविदाप्नोति परमिति शास्त्रमिति अयं भावः ब्रह्मविदाप्नोति परमिति प्राप्यप्राप्तृभावेन भेदनिर्देशस्त्वापाततः ब्रह्म
वित् ब्रह्मैव भवतीति सावधारणश्रुत्यंतरानुरोधादाप्नोतीत्यस्य भवत्यर्थकत्वात् मोक्षप्रकरणे प्राप्त्यर्थकानां पदानां त-
द्भावापत्तिरूपार्थकत्वेन श्रुत्यैव स्वयं व्याख्यातत्वाच्च ॥ तथाहि असतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्मामृ-

तं गमयेति मंत्रास्तेषां ब्राह्मणं स यदाहासतो मा सद्गमयेति मृत्युर्वा असत्सदमृतं मृत्योर्मामृतं गमयामृतं मा कुर्वित्ये
तदाह तमसो मा ज्योतिर्गमयेति मृत्युर्वै तमो ज्योतिरमृतं मृत्योर्मामृतं गमयामृतं मा कुर्वित्येतदाह मृत्योर्मामृ
तं गमयेति नात्र किंचन तिरोहितमिवेति अत्र मंत्रद्वये गमयेत्यस्य कुर्वित्यर्थं मंदर्श [illegible]
व्याख्येयत्वेऽपि गमयेत्यस्य कुर्वित्यर्थपरतया व्याख्येयत्वमस्तीति द्योतयितुं नात्र ति [illegible]
पूर्ववदेव गमये त्येतद्व्याख्यातुं वाक्यतदिति स्पष्टतया न व्याख्यातं क्वचिद्दर्शिता [illegible]
तिउक्तब्राह्मणव्याख्यायाममृतीकरणं च नाहममृतमित्याकारकाज्ञाननिवृत्तिर [illegible]
व्यक्तिर्मुक्तिरिति चोच्यते॥ यत्तु मासद्गमयेत्सस्य परमं साम्यं प्रापयेत्यर्थः निरंजन [illegible]
तन्न सच्छब्दस्यामृतार्थकतायाः श्रुत्यैव व्याख्यानत्वेन तद्विहाय तदीयसाम्यार्थता [illegible]
धेन परं साम्यमित्यस्यैव तद्भावापत्तिरित्यर्थकतया वक्तव्यत्वादत एव तत्र परं [illegible] सार्थकः॥ [illegible]
मुपैतीत्यनेनैव निर्वाहे तद्व्यर्थ्यात् परमसाम्यस्य चोक्ताज्ञाननिवृत्तिरूपनिर्भेद [illegible]
नांत्वनादावेव मुख्यतया परमसाम्यापादनानुकूलव्यापारे लाक्षणिकत्वापि [illegible] व्यापार
बोधकतायामपि दोषाभावात्॥ भवति चाज्ञाननिवृत्तावपि भातिव्यपदेशः यथा य [illegible]
माने चामीकरमण्यादौ तदज्ञाननिवृत्तौ सत्यां चामीकरादिकं भासमिति व्यवहारात्॥ न हि परमसाम्यापादनं क्वापि

श्रावित्वेनापरिच्छिन्नत्वेन सङ्कोचं प्रमाणमुतार्थः स्यात् कृत्स्नोपि न बादरायणार्थे कापि अयोगः ॥ मंत्रतुल्योनुयोगः मृत्युरा
हृत्यभ्रमाद्य — परत्वर्थोयमाज्ञानवाचकतायाः प्रमादं वै मृत्युमहं ब्रवीमीति सनत्सुजातेन विवरणात् मृत्युपदस्या
पि साधनस्य प्रमादपरतया अमृतं प्रमादमृत्युं कुर्वित्यनेन सनूपाभिव्यक्तिरेव सद्भमनामिति पर्यवसानेन कृत्स्नो
भिन्नसिद्धार्थपरत्वाभावात् असतद्भिन्नयल्लोपे पंचमीतथाचासद्गुपगृह्य संतमासद्मयेत्यर्थः नयाभिधानं च प्रसि
ध्य ब्रह्मभावस्य तेऽकथं न स्थापणानुपपद्यत इति शंकास्पुदासाय यद्यप्यस्ति मे ब्रह्मभावस्तथापि न दर्शयानिर
स्कारिण्या असत्कल्पमतः परमानुग्रहेण मामपृतं कुर्विति हि तत्र पर्यवसितोर्थः ॥ एतेन जीवब्रह्मणोर्भेदे ब्रह्मैव स
न् ब्रह्माप्येतीति श्रुतिविरोधमाशंक्य तत्र परब्रह्माभिधायक आद्यब्रह्मशब्दः किंतु ब्रह्माणि जीवाः सर्वेपीति श्रुते जीवाभि
धायक एव ब्रह्मशब्दस्य परब्रह्मणि मुख्यत्वेपि नात्र तत्परता तथा सति ब्रह्माप्येतीति श्रुतब्रह्मप्राप्तिविरोधादिति भेद
व्यपदेशाच्चेति सूत्रे जयतीर्थोक्तमपास्तं ॥ ब्रह्मविद् ब्रह्मैव भवतीति श्रुत्यनुरोधादुक्तब्राह्मणानुरोधात् सहयोवैतत्
परं ब्रह्म वेद ब्रह्मैव भवति तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवदिति श्रुत्यंतरानुरोधात् एतादृशस्य भवस्य फल
स्याकारस्यान्याय्यत्वात् किंचास्मिन्नप्यभ्रमुख्यासंभवदुक्तिकाऽन्यस्यात्येन परिच्छिन्नेन परिच्छिन्नस्य च सा मुख्या
दृष्टा अपरिच्छिन्नं च सर्वात्मकं ब्रह्मेति परिच्छिन्नयदनात्मवस्तु तस्य भाविप्नुपपन्नैवेति दर्शनादर्शनापेक्षयैव तस्या
स्य ग्रासो गौण एव वाच्यो ब्रह्मतिवरंश्रुत्यंतरानुगुणार्थकल्पनं भास्यर्थकशब्दस्येति कृतधियो विदांकुर्वंतु नाग्रहेणेति

दिष्टः॥ आनंदतीर्थीयास्तु य आनंदमयो ब्रह्मणोऽन्यस्तदा न ब्रह्मजिज्ञासा संभवति अतद्धिन एव जिज्ञास्यत्वं प्राप्तेरयथाविजि
ज्ञासां विना अबद्धपरमात्मजिज्ञासायोगात् ब्रह्मजिज्ञासा नश्रुत्युक्ता न हातुं शक्या अत आनंदमयस्य विष्णोरन्यत्वेन
ब्रह्मजिज्ञासासंभवतीत्यनेन सूत्रेणानंदमयस्य विष्णुत्वमाह सूत्रकारः इति जिज्ञासासूत्रसंगतिः॥ तस्माद्वा ए
तस्माद्विज्ञानमयादन्योंऽतर आत्मानंदमय इत्यादि ब्रह्मपुच्छं प्रतिष्ठेत्यंतवाक्ये आनंदमयो विषयः स किं चतुर्मुखा
दिः किं वा विष्णुरिति चिंता तदर्थमसत्ब्रह्मेति वेद चेदित्यादावानंदमये श्रुतो ब्रह्मशब्दः किं जघन्यवृत्तिरुत मुख्यवृ
त्तिः तदर्थं मयड्प्रत्ययः किं ब्रह्मशब्दस्य मुख्यत्वविरोधी उत नेति तदर्थं मयट् किं विकारार्थः किं वा प्राचुर्यार्थः इत्यादि
श्चांद्रिकायां दर्शितो विशयः आनंदमयो न विष्णुः किंतु चतुर्मुखादिः जीवांतः आनंदमयमधिकृत्यास्ति ब्रह्मेति चेद्वे
देत्यादिवाक्येनूद्यादिनाच्चतुर्मुखादिनिष्ठब्रह्मशब्दश्रवणादिति पूर्वपक्षे सिद्धांतः॥ आनंदमयोऽभ्यासादिति॥ वि
ष्णुरेवानंदमयः असन्नेव स भवति असत्ब्रह्मेति वेद चेदस्ति ब्रह्मेति चेद्वेदेत्यानंदमये ब्रह्मशब्दाभ्यासात् ब्रह्मश
ब्दस्य च तदेव ब्रह्मेत्यादिश्रुतिषु विष्णुनिष्ठतोक्तेरन्नमयादीनामपि ब्रह्मशब्दादेवाविष्णुत्वमिति विकारशब्दाच्चेति
चेन्न प्राचुर्यात् नायमानंदमयो विष्णुः किंतु प्रागुक्तक्रमरूपत्वादयमेव विकाराभिधायकमयट्शब्दप्रयोगाद्विकारार्थशब्द
वाच्यत्वप्रवृत्तिनिमित्तस्याविकारित्वस्याविकारितादात्म्यस्य चाविद्यमानत्वादिति शंका मा भूदतः प्रचुरानंदत्वादानंदम
यशब्देनानंदमयः कथ्यते न त्वानंदविकारित्वात्॥ तादात्म्यार्थे विकारार्थे प्राचुर्यार्थे मयड्भिधेति प्राचुर्येऽपि मयट्

प्रयोगात् आनंदप्रचुर इति यथा स्त्रीणामभिधाने प्रचुरो ग्राम इत्यादाविव नानंदप्राप्तेः प्रचुरानंद इति विग्र-
हीत समासः कृतः प्रचुरानंदत्वेनानंदमयपदवाच्यो विष्णुरेव ब्रह्मशब्दाभ्यासादित्युक्तं तत्र हेत्वंतरमाह यथा तदेव
हेत्वंतरेण प्रतिपादयति ॥ तद्धेतुव्यपदेशाच्चेति ॥ आसमंतात् कारयामानः प्रकाशयामानः विष्णुर्यदि पूर्णानंदो न स्यात्त-
दासौ लोकं न प्रवर्तयेत् आनंदोद्रेकमंतरेण तत्प्रवृत्तौ कारणाभावात् यदुक्तमन्नमयादीनां ब्रह्मशब्दादेव विष्णुत्वं
ब्रह्मत्वं येति नैतद्युक्तं ब्रह्मशब्दस्यापरब्रह्मण्युपपत्तेः ब्रह्मशब्दस्य परब्रह्मणि मुख्यत्वेपि विष्णोरानंदमयावयवत्वो-
क्त्यादिना अमुख्यार्थस्यैव ग्रहणोपपत्तेरिति शंकां परिहरति ॥ मांत्रवर्णिकमेव च गीयत इति ॥ नेदमानंदमयादि-
कमपरं ब्रह्म यतः सत्यं ज्ञानमनंतं ब्रह्मेति मंत्रवर्णोक्तलक्षणवत्त्वोक्तं परमेव ब्रह्मान्नमयादिशब्दपंचकेन गीयते सत्य-
ज्ञानानंतशब्दानामन्नमयादिशब्दानां चार्थानुसंधाने सत्येकार्थत्वप्रतीतेः आनंदमयस्य विष्णुत्वे अनन्यथासिद्ध-
लिंगमाह ॥ नेतरोनुपपत्तेरिति नानंदमयादिर्विष्णोरितरः ब्रह्मविदाप्नोति परमित्यानंदमयादिज्ञानेन मोक्षश्रव-
णात् न चान्यज्ञानान्मोक्षः उपपद्यते ॥ तमेवं विद्वानमृत इह भवति नान्यः पंथा अयनाय विद्यत इति श्रुत्या विष्णुज्ञा-
नादेव मोक्षोक्तेः हेत्वंतरेणापि ब्रह्मादीनामानंदमयत्वं निराकुरुते ॥ भेदव्यपदेशाच्चेति ॥ नेतर इत्यनुषज्यते ते ये श-
तं प्रजापतेरानंदाः स एको ब्रह्मण आनंद इति रुद्रात् शतगुणमानंदत्वोक्तेर्न वाच्यदानंदमयो विरिंचिः यतो वाचो
निवर्तंते अप्राप्य मनसा सह इत्यानंदस्यापरिमितत्वोक्तेः अत एव न रुद्रः तस्य हिरण्यगर्भात् शतांशेनानंदत्वोक्तेः

॥ एवमन्येपि अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयंप्रतिष्ठांविंदते अथ सोऽभयंगतो भवतीति श्रुतौ प्रकृत्याद्ययोग्य
स्वातंत्र्यश्रवणान्न प्रकृत्यादीनामानंदमयत्वं अदृश्ये अनात्म्ये स्वामिरहिते जीवगुणविधुरे वा साकल्येन वचनागो[illegible]
पराश्रये तस्मिन्नानंदमये योऽभयतया प्रतिष्ठां ध्यानं विंदते अनंतरं स उपासकः अभयं भगवंतं गतो भवतीति तादृशश्रु
त्यर्थः स यश्चायं पुरुषे यश्चासावादित्ये इति आनंदमयस्यापकृष्टोत्कृष्टजीवेषु पुरुषादित्यपदोपलक्षितेषु स्थितिकथना
न्नानंदमयो ब्रह्मादिजीवसमूहः न त्वमस्यादिश्रुतयोपि नाभेदप्रमाणं नामानि सर्वाणीति श्रुत्या तत्त्वमस्यादिशब्दै
र्विष्णोरेव वाच्यत्वोक्तेः ॥ अस्तु वा तासामभेदपरत्वं भगवतः सकलस्वामित्वेनाभेदव्यपदेशोपपत्तेरिति अस्त्वानंद
मयो विष्णुस्तथापि कथं तेन ब्रह्मादीनां भेदोऽभेदबोधकश्रुतिभिस्तदभेदावगमादिति शंकानवकाशः ॥ नन्वनुमान
मेवाभेदे प्रमाणं तथाहि विमतानि शरीराणि मद्भोगायतनानि शरीरत्वादिति शंकां परिहरति ॥ कामाच्च नानुमानापे
क्षेति ॥ किमद्वैतं श्रुत्या युक्त्वानुमानेन साध्यते केवलेन वा ॥ नाद्यः अद्वैतश्रुत्यभावस्योक्तत्वात् ॥ न द्वितीयः पृथ-
गनुमानस्याकामगतित्वेनादृष्टार्थविषयेऽसाधकत्वात् ॥ नन्वस्त्वानंदमयेन ब्रह्मणा हिरण्यगर्भादीनां भेदः परं सं
सारिक एव न पारमार्थिकः भेदवाक्यानां सांसारिकभेदपरत्वेनोपपत्तेरिति शंकां परिहरति ॥ अस्मिन्नस्य च तद्यो-
गं शास्तीति न केवलं भेदव्यपदेशादानंदमयेन जीवानां भेदः किंतु अस्य जीवस्यानंदमयेन सह मुक्तावपि सोऽश्नुते सर्वा
न्कामान् सह ब्रह्मणा विपश्चितेति श्रुतिः संबंधमेव शास्ति न त्वैक्यं संबंधस्य भेदनियतत्वात् इति [illegible] अधिकरणयो

ज्ञ न चा सूत्राधिकरणे स्वते त्रैवं दर्शितत्वात् ॥ यदुक्तं ब्रह्मपदजिज्ञासां विना अन्यपदजिज्ञासा न संभवतीति तन्न सर्वसं

मतं तद्यन्मुनिवाक्यस्य तात्पर्याज्ञानान्नहि घटजिज्ञासां विना कपालजिज्ञासा न भवतीति त्वदुक्तिमात्रस्याप्रत्येयत्वा

त्। न च ब्रह्मपदस्य ब्रह्मत्वनियमादानंदमयपदजिज्ञासया ब्रह्मजिज्ञासा न संपद्यत इत्याक्षेप इति वाच्यं नहि तत्प

आदिश्रुतिबाधकत्वेन ब्रह्मशब्दस्यान्यपरत्वसंभवेन ब्रह्मविदाप्नोति परं तद्विजिज्ञासस्वेत्यादिश्रुतिप्रापितब्रह्मविचा

राक्षेपकत्वायोगः ॥ नाप्यानंदमयो न विष्णुः किंतु चतुर्मुखादिजीवोऽतः ब्रह्मशब्दस्य नू द्यादिना तन्निष्ठस्यासत्ब्रह्मेति-

वेदचेदित्यादिवाक्ये श्रवणादिति पूर्वपक्षोऽपि युक्तः जिज्ञासासूत्रे तद्विजिज्ञासस्व तत्ब्रह्मेति वाक्यस्थब्रह्मशब्दस्य

यौगिकत्वेन जीवाद्भेदकत्वोक्तेः जन्मादिसूत्रेऽपि तस्मिन्नेव वाक्ये ब्रह्मशब्दस्य कारणत्वादिना जीवादौ रूढिं बाधित्वा

योगस्य ब्रह्मणि व्यवस्थापनाच्च पुनरूढ्याश्रयणे न पूर्वपक्षानुत्थितेः ॥ यत्तु चंद्रिकायां यद्यप्येवं तथापि आनंदमयवाक्ये

रूढेर्बाधकाभावः प्रत्युत विकारशब्दादेस्तत्साधकस्य सत्त्वादिति पूर्वपक्षोदय इत्युक्तं तदसत् जन्मादिसूत्रे तद्विजिज्ञास

स्व तत्ब्रह्मेति वाक्ये ब्रह्मशब्दार्थः यदि जीवादिः स्यात् तदा तत्र यतो वेत्याद्युक्तजगत्कारणत्वानुपपत्तिरिति यथानू

क्तार्थत्यागे बाधकं तथात्राप्यानंदमयमभिकृत्य प्रवृत्ते असत्ब्रह्मेति वाक्ये ब्रह्मशब्दार्थः यदि विष्णोरन्यः जीवादिः स्या

त् तदा तस्यानंदमयं प्रकृत्य प्रवृत्तेन को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनंदो न स्यादित्यादिवा-

क्येनोक्तजगत्कारणत्वजगत्प्राणनादिहेतुत्वाद्यनुपपत्तिरिति बाधकतौल्यात् विकारबोधकमयट्शब्दस्य च मानु

र्यपरतयाऽन्यथासिद्धत्वात्संदिग्धत्वाच्च ॥ सोऽकामयतेति वाक्यं तस्यैष एव शारीर आत्मा यः पूर्वस्येति वाक्यनिर्दिष्टमा
त्मानं परामृशतीति सत्यात्मा ब्रह्मविदाप्नोति परमिति पद्व्याख्यानरूपो उक्तः यस्य च तस्माद्वा एतस्मादात्मन आकाशः संभू
त इति वाक्येनाकाशादिक्रमेण हेतुत्वमुक्तं तत्ब्रह्मैव तस्य पूर्वस्य विज्ञानमयस्य एष एव शारीर आत्मा य एष आनंद
मय इति योजनया तस्यानंदमयपरत्वोक्लिष्टकल्पमापचेरित्येवं पूर्वपक्ष्याशय इति तु न युक्तं ॥ तस्यैष एव शारीर आ
त्मेत्ययं मंत्रः प्रथममन्नमयपर्यायेनाम्नातः प्राणमयपर्यायमारभ्य समाम्नायते तत्र यः पूर्वस्यान्नमयस्य शारीर आ-
त्मा एष एव तस्य प्राणमयस्यात्मेति वक्तुं न शक्यते अन्नमयस्य प्राणमयादन्यत्वेनात्मत्वेनोऽनाम्नानात् तस्माद्वा अन्नरस
मयादन्योंतर आत्मा प्राणमय इति प्राणमयस्यैव तं प्रत्यात्मत्वेनाम्नानात्तस्य पूर्वस्यान्नमयस्य एष एव शारीर आ
त्मा य एष प्राणमय इत्येवार्थो वर्णनीयः ततश्च तदैकरूप्यायोत्तरेष्वपि पर्यायेषु तथैवार्थः स्वीकर्तव्यः इति आनंदम
यपर्यायाम्नातः तस्यैष एवेति मंत्रः दर्शितयोजनया आनंदमयपर एवेति तदुत्तरमाम्नाते सोऽकामयतेति वाक्ये त-
स्यैव परामर्शविषयकत्वात् ॥ एवं सोऽकामयतेति जगत्कारणवस्तुनिरूपणानंतरं भूतं रसो वै सः रसं ह्येवायं लब्ध्वा
नंदी भवति को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनंदो न स्यादिति वाक्यं तदेकार्थमिति जगत्कारणत्वं च तत्र जगत्का
रणानादिहेतुत्वस्यानंदमय एव पर्यवसानात् ॥ यदि चानंदमयपर्यायाम्नातस्तस्यैष एव शारीर आत्मेति मंत्रः अद्वैति
मतरीत्या ब्रह्मविदाप्नोति परमित्युपक्रांतमर्थांतरमेवानंदमयादन्यमात्मानं परामृशतीत्युच्यते क्लिष्टयोजनया आ

नंदमय. ब्रह्मणोपेक्षया यथाश्रुतार्थग्रहणस्यैवयुक्तत्वात् ॥ ननु प्राणमयपदार्थेन तस्यैव एवेति मंत्रस्य यथाश्रुतार्थ ग्रहणं न संभवति प्राणमयादन्यस्यान्नरसमयस्यात्मनोऽनुक्तेरिति चेन्न ॥ यस्मादन्नरसमय उत्पन्नः स एव मूल कारणभूतः प्राणमयस्यात्माभविष्यतीति तस्यैष एव शारीर आत्मा यः पूर्वस्येत्यनुवादबलादेव गंतुं शक्यत्वा त्सर्वमूलकारणतया तस्माद्वा एतस्मादात्मन आकाशः संभूत इति निर्दिष्ट एव तन्मयः पूर्वस्येति षष्ठी जन्यज नकभावे तथा च तस्य प्राणमयस्यैष एवात्मेत्यत्रापि षष्ठी जन्यजनकभावे शारीरपदं च तस्य जीवस्य रूपाभेदसू चकं अयं जन्यजनकभावः उपादानोपादेयरूपेणापि भवतीति स वा एष पुरुषोऽन्नरसमय इति अन्योऽन्तर आत्मा प्रा णमय इति आत्मपदसामानाधिकरण्यं चोपपन्नमिति सोऽकामयतेति वाक्यमपि तादृशात्मानमेव परामृशतीति पूर्वपक्ष्याशय इत्युच्यते ॥ तदावन्यते असन्नेव स भवति असद्ब्रह्मेति वेद चेदिति ब्रह्मशब्दाभ्यासस्य पुच्छब्रह्म विषयतया आनंदमयं प्रकृत्य ब्रह्मशब्दाभ्यासासिद्धेः तं प्रति तेन हेतुना आनंदमयस्य ब्रह्मत्वसाधनायोगात् ॥ इत्यादि तन्न तं असन्नेवेति मंत्रो ब्रह्म पुच्छं प्रतिष्ठेति वाक्यनिर्दिष्टब्रह्मपरः न त्वानंदमयपरः तदप्रस्ताभिधानात् पूर्ववाक्यस्वारस्येन ब्रह्मभिन्नतया अवगते तस्मिन् ब्रह्मपदलक्षणाप्रसंगात् प्रियादिविशिष्टस्य तस्य रूपस्य दृष्टि निमतीयमानस्यासत्त्वशंकानास्पदत्वेन तच्छंकानिवारणार्थं प्रवृत्तस्य मंत्रस्य तद्विषयत्वे आनर्थक्यप्रसंगात् ॥ अपि चैतस्य मंत्रस्य पुच्छवदानंदमयविषयत्वे स एव चैतन्मंत्रे प्राधान्येन वेद्य इत्यनभ्युपगतानिवेदनकर्तृत्वेन

समाम्नातस्य तस्य परामर्शोप्यसंगतः स्यात् यदि तु त्वयैव तस्य योविरोधादिति ॥ एवमानंदमयेब्रम्हशब्दाभ्यासादानं
दमयोविष्णुरेवेति सिद्धांतोप्ययुक्तः आनंदमये ब्रम्हशब्दाभ्यासासिद्धेस्तस्य पुच्छं ब्रम्ह विषयत्वान्नहि तदनभिधा
यकेन शब्देन तदभ्यासोस्ति ॥ किंचानंदमयप्रकरणे श्रुतं ब्रम्हपदं तस्यैव वाचकमिति वाच्यं ॥ किमानंदमयस्य प्रकरणि
त्वमभ्यासात् किंवान्यतः ॥ नाद्यः आनंदमयस्य प्रकरणित्वे अभ्यासस्यानंदमयविषयत्वात् ब्रम्हशब्देनानंदमयोप
स्थितिः अभ्यासस्यानंदमयविषयत्वे आनंदमयस्य प्रकरणित्वमित्यन्योन्याश्रयापातात् ॥ नद्वितीयः अभ्यासादि
तिसौत्रहेतुवैय्यर्थ्यापत्तेः ॥ अथ समानप्रकरणे भृगुवल्ल्याम धीहि भगवो ब्रम्हेत्युपक्रम्य सैषा भार्गवी वारुणी विद्याप
रमे व्योमन् प्रतिष्ठितेति आनंद एव परिसमाप्तिदर्शनात् तत्रानंदमयत्वस्य एतमानंदमयमात्मानमुपसंक्रम्येत्यनेना
यगमादिहाप्यानंदमयो ब्रम्हैवेति असन्नेव स भवति असद्ब्रम्हेति वेद चेदस्ति ब्रम्हेति चेद्वेदेत्यादि ब्रम्हशब्दाभ्या
सः आनंदमयविषय एवेति निश्चयान्नोक्तान्योन्याश्रयः ॥ तथा चोक्तं चंद्रिकायामन्नमयादीनां कोशत्वनिराकरणेन
ब्रम्हत्वनिरूपणप्रस्तावे भृगुर्वै वारुणिरित्युत्तरानुवाक्येउक्तानामन्नादीनां तावत् ब्रम्हत्वं वक्तव्यं भार्गवी वारुणी वि
द्या परमे व्योमन् प्रतिष्ठितेति श्रुत्यास्य यमेव परब्रम्हत्वोक्तेः अधीहि भगवो ब्रम्हेति ब्रम्ह प्रश्नोत्तरत्वात् स तपस्तप्त्वा
अन्नं ब्रम्हेति व्यजानादिति श्रवणानंतरभाविनिदध्यासनाख्यतपसापरोक्षीकृतत्वलिंगात् अन्नं ब्रम्हेत्यादि ब्रम्ह
शब्दात् अन्नाद्ध्येव खल्विमानि भूतानि जायंत इत्यादि ब्रम्हलक्षणाच्च तत्समाख्ययाचात्रापि अन्नमयादीनां ब्रम्हत्वं

नन्वन्नमयादेरप्यब्रह्मणो भिन्नत्वेन तत्प्राप्तेरन्नमयमात्मानमुपसंक्रम्येत्यादौ एतमानंदमयमात्मानमुपसंक्र
म्येत्युपसंक्रारे च तत्तुल्यतापत्तेः अत आह प्रजाः प्रजापतिरित्यादौ तद्वदेव तदप्राप्यन्नमयादीनामब्रह्मत्वे एतमन्न
मयमात्मानमुपसंक्रामतीत्यादि तत्र ब्रह्मस्वरूपमप्राप्यत्वस्य चायोगादित्यभिप्रायः ॥ आनंदमयपर्यायोन्तरं पुच्छं ब्र
ह्मणः तस्यैष एव शारीर आत्मा यः पूर्वस्येत्यनेनानंदमयान्तरात्मत्वेनाम्नानोत्तरं ॥ सोकामयत रसो वै सः को ह्येवा
न्यात् कः प्राण्याद्यदेष आकाश आनंदो न स्यात् ॥ यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्र
तिष्ठां विंदते अथ सोऽभयं गतो भवति ॥ भीषास्माद्वातः पवते भीषोदेति सूर्य इत्यादि कार्यरसलाभप्राणनाभयप्रति
ष्ठाभयदर्शनोपपत्तिभ्योऽस्येव तदाकाशादिकारणं ब्रह्मेति प्रतिपादनेन ब्रह्मविषये अस्ति नास्तीति प्रश्नमपा
कृत्य ह्यवन्यायं तु प्रश्नौ विद्वदविदुषोर्ब्रह्मप्राप्तिविषयौ तत्र मध्यमोऽनु प्रश्नो विद्वान् समश्नुत इत्यंत्यप्रश्नापकर
णेनैवापाकृतो भविष्यतीति तमनपाकृत्यांत्यप्रश्नापकरणायाम्नातं स य एवंवित् अस्माल्लोकात्प्रेत्य एतमन्नमयमा
त्मानमुपसंक्रामतीत्यादि एतमानंदमयमात्मानमुपसंक्रामतीति तत्रायमर्थः स यः कश्चित् एवं यथोक्तं ब्रह्मोत्सृष्टोत्क
र्षापकर्षमद्वैतं सत्यं ज्ञानमनंतमहमस्मीत्येवंवित् एवं शब्दस्य प्रकृतपरामर्शार्थत्वात् स कः यः अस्माल्लोकात् प्रेत्यान्न
मयादिमानंदमयांतमात्मानमुपसंक्रामत्यथादृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विंदत इति तयाच्चो
पक्रमितत्वात् अन्नमयादिप्रवाहपतितस्यानंदमयस्योपसंक्रमणकर्मत्वाय गभात् प्रियमोदादिविशिष्टस्य तस्य

कत्वहृमितिप्रत्यक्षाविषयस्य सत्वासत्वाशंकानास्पदत्वेन तत्परिहारायासन्ब्रह्मेत्यादिवाक्यप्रवृत्त्यर्थानभिधा-
दिभिरिहस्य च तस्याहृदयत्वादिधर्मकत्वासंभवाद्यतोवाचोनिवर्तंत इतिश्रुतिप्रतिपादितवाङ्मनसागोचरत्वासं
भवात्पूर्वोक्तरीत्या आनंदमयपदार्थे दुःखलेशप्रतीत्या ब्रह्मशब्दमुख्यार्थत्वाभावाच्चानंदमयस्याब्रह्मत्वसिद्धौ भृ
गुवल्या आम्नातस्य सैषाभार्गवीवारुणीविद्यापरमेव्योमन्प्रतिष्ठितेत्येतदनंतरमाम्नातस्य य एवंवेदेत्यस्य ए
तमानंदमयमात्मानमुपसंक्रम्येत्यनेन संबंधात् अहरहेनात्वेत्यादेरमपमित्यंतस्यानंदवल्लीस्थस्यापि तत्संनि
धौ योजनया य एवंवेद स कः यः एतमन्नमयादिमानंदमयांतमात्मानमुपसंक्रम्याहृदयत्वादिधर्मकेऽभयंप्रतितिष्ठ
तिप्रतिष्ठां च भवत इत्यस्यैव वाच्यत्वात् भृगुवल्ल्या आनंद एव समाप्तिर्नानंदमय इत्यादेरतिस्पष्टत्वात्॥ अत एव प्रा
तिपदिकमात्रमेवाभ्यस्यते रसो वै सः यदेष आकाश आनंदो न स्यात् सैषानंदस्य मीमांसा भवति आनंदो ब्रह्मेति व्य
जानादिति उपसंक्रामति उपसंक्रम्येत्यानंदमयादावुपसंक्रमणकर्मत्वस्यैव प्रतीतेर्न तस्य मुक्तप्राप्यत्वं आत्मव
द्वस्तु अमुख्यान्नमयाद्यनात्मप्रवाहपतितत्वात् तत्र गौण एवेति विवचयिष्यते चेदमुपरिष्टात्॥ यत्तु चंद्रिकायां नोप
संक्रम्येत्यत्रोपशब्दोऽतिक्रमार्थः अव्ययानामनेकार्थत्वस्यापि प्रयोगानुसारित्वात् अन्यथा अंतःशब्दो बहिरर्थः स्यात्
अस्मात् लोकात्प्रेत्येत्यनेनैव चरमशरीरत्वान्नमयपरित्यागस्योक्तत्वेनान्नमयमुपसंक्रामतीत्यनेनापि तदुक्तौ
पुनरुक्तिः स्यादिति॥ तत्तुच्छमेव॥ नह्यत्र जलूकावत् नीडे पक्षिप्रवेशवदामुख्यं संक्रमणं विवक्षितं अन्नमयेषा

धात् न त्वन्नमयमुपसंक्रामतो जाह्यादत्वा लोकात् जलूकावदन्यथासंक्रमणं इत्यपते स्वीकृतं वास्तवमपि किंतु ज्ञानमात्रं
प्रयोगानुसारेण विकल्पनाया अपि तात्पर्याधीनत्वात् सकृतेन्च योऽवेद निहितं गुहायामिति सर्वांतरब्रह्मप्रतिपादकवाक्ये
यान्नमयाद्यानंदमयांतकोशानिरूपणेन ब्रह्मात्मताज्ञानेनान्नमयाद्यानंदमयांतेषु अनात्मस्वात्मतया प्रागतिगृहीते
ष्वनात्मत्वमुद्रूपयायव्योपसंक्रमणपदार्थः ॥ एवं सति न पुनरुक्तिरपि अस्माल्लोकात् प्रेत्येत्यस्य स्त्रीपुत्रादिदृष्टा
दृष्टविषयसमुदायोऽयं लोकः स्वोपकारकत्वात् स्वीयत्वेनात्मतया गृहीतः तदुक्तमध्यासभाष्ये स्त्रीपुत्रादिषु सकलेषु
विकलेषु वा अहमेव सकलः विकलो वेति बाह्यधर्मानात्मन्यध्यस्यतीति तस्मात् लोकात् प्रेत्य प्रेत्य एतेनाहमिति
विवेकेनान्नविकारे अन्नमये देहे आत्मबुद्धिं कृत्वा ततः यथाव्याख्यातमन्नमयमात्मानमुपसंक्रामति अनात्मत्वेन
पश्यति ततः प्राणमयं ततः मनोमयं ततो विज्ञानमयं ततः आनंदमयमुपसंक्रामति अथादृश्यत्वादिधर्मके सत्यज्ञाना-
नानंदादिरूपे आत्मन्यभयं प्रतिष्ठां विंदते ब्रह्मरूपेणास्थितो भवतीत्यस्यैव विवक्षितत्वात् ॥ यच्चोक्तमन्नं ब्रह्मेति ब्र-
ह्मवाह्लादन्नाद्ध्येव खल्विमानि भूतानि जायंत इति ब्रह्मलक्षणाच्च तत्समाख्ययापि अन्नमयादीनां ब्रह्मत्वमिति तद-
प्यसत् ॥ अधीहि भगवो ब्रह्मेति ब्रह्मप्रश्नानंतरं तस्मा एतत्प्रोवाच अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति तं होवा-
च यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति स तपोऽत-
प्यत स तपस्तप्त्वा अन्नं ब्रह्मेति व्यजानादित्याद्याम्नायपतेतत्रायमर्थः भृगोः प्रश्नानंतरं पिता वरुणः ब्रह्मप्रतिपत्त्यौप

न्नादीनां द्वारत्वमन्नं प्राणमित्यादिनाभिधाय यतो वेत्यादिना ब्रह्मलक्षणं चाभिधायैवं लक्षणं ब्रह्मान्नादिद्वारेण प्रति-
पद्यस्वेत्युक्तवान् अन्नादीनां ब्रह्मप्रतिपत्तौ द्वारत्वं च प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये म-
नो विदुस्ते निचक्युर्ब्रह्म पुराणमिति श्रुत्यंतरप्रसिद्धमेवेहोक्तं स भृगुः ब्रह्मोपलब्धौ द्वाराणि ब्रह्मलक्षणं च श्रुत्वाद्-
दमित्थमिति स्वरूपेण ब्रह्मानिर्दिशन् पिता ब्रह्मप्रतिपत्तौ नूनं साधनांतरमपेक्षत इति अनिर्दिष्टमपि तपः ब्रह्म-
प्रतिपत्तौ साधनत्वमवगत्य भृगुः कुत्रेदं पित्रोदितं लक्षणं वर्तते केदं परिपूर्णं भवतीत्येकाग्रेण चेतसा पर्यालोचना-
त्मकं तपः कृत्वा अन्नाद्ध्येव खल्विमानि भूतानि जायंते अन्नेन जातानि जीवंति अन्नं प्रयंत्यभिसंविशंतीत्यस्मादु-
क्तमन्नस्य ब्रह्मत्वमिति प्रथमतः अन्नं ब्रह्मेति व्यजानात् ज्ञातवान् अन्नं ब्रह्मेति विज्ञायापि अन्नस्योत्पत्तिदर्शनात्-
श्रुत्युक्तं लक्षणं तत्र परिपूर्णं न भवतीति पुनरपि संशयमापन्नो भृगुः। पितरमुपसृत्याधीहि ब्रह्मेत्युक्तवान् ततः पा-
धनत् ब्रह्मणो लक्षणं परिपूर्णं न भवति यावत्ते जिज्ञासा न निवर्तते तावत्तप एव ते ब्रह्मप्रतिपत्तौ साधनं न त्वन्यत् इ-
ति प्रतिपर्यंतं तपसा ब्रह्म विजिज्ञासस्वेति पिता तस्मा उक्तवान् ततः तपसा विमृश्य प्राणादिष्वपि साकल्येन ब्रह्मल-
क्षणमपश्यन् शनैः शनैरांतरमानंदं ब्रह्मेति प्रतिपन्नवानित्यर्थः प्रकरणस्य प्रतीयते तत्र कथमन्नं ब्रह्मेति ब्रह्मत्वाद-
न्नादौ अन्नाद्ध्येवेति ब्रह्मलक्षणाच्चान्नस्य ब्रह्मत्वं वक्तुं शक्यं तथा सति पुनरुपसत्त्यनुपपत्तेः वस्तुतो द्विकायामन्नादीनां ब्रह्मत्वे
पितद्विज्ञाय पुनरेव वरुणं पितरमुपससार अधीहि भगवो ब्रह्मेति पुनरुपसत्तिस्तु एकरूपं निदिध्यासनेन साक्षा-

क्तत्वरूपांतरस्य गुणांतरविशिष्टतयानिदिध्यासनार्थमनुज्ञामादातुं तत्रानुजानीहीति वक्तव्ये यदधीहीत्याह तद्वि
यातिद्यायादित्युक्तं तदसत् ॥ अधीहीत्यस्यानुजानीहीत्यर्थकत्वे मुख्यार्थत्यागापत्तेरस्मदुक्तरीत्याविरहेनुज्ञा
यांबीजाभावात् ॥ किंच एवं हि पुनरुपसत्तौ तत्तद्ब्रह्मरूपसाक्षात्कारे भृगोरकृतार्थताबुद्धिरेव हेतुर्नान्यत् ॥ तथा
चान्नाद्येकदेश्यादिब्रह्मरूपसाक्षात्कारेपि अकृतार्थताबुध्या ततोपि गुणांतरविशिष्टतयानिदिध्यासनायानुज्ञामा
दातुं पुनरुपसन्नस्य तस्यानंदमयांतपंचब्रह्मरूपसाक्षात्कारानंतरमपि ब्रह्मण अनंतरूपतयानंतगुणविशिष्ट
तयाचाकृतार्थताबुध्या ततोपि गुणांतरविशिष्टतयानिदिध्यासनायानुज्ञामादातुं पुनरनुपपत्तौ बीजाभावात् ना
पि ब्रह्मण अनंतरूपत्वेपि अन्नमयादिपंचरूपसाक्षात्कार एव कृतार्थतेति भृगोर्निश्चये किंचिद्गमकमस्ति ॥ अथ
ब्रह्मविदाप्नोति परमित्युपक्रमे ब्रह्मज्ञानस्य फलवत्त्वमभिज्ञाय किं तद्ब्रह्म किं वा तद्वेदनमित्याकांक्षायां सत्यं ज्ञा-
नमनंतं ब्रह्मेति तल्लक्षणमुक्तं ॥ तत्रानंतपदबोधितं सर्ववस्त्वनुस्यूततया सर्वांतरत्वमेव यो वेद निहितं गुहाया
मित्यनेन वेदनस्वरूपकथनपरेण तस्माद्वा एतस्मादित्यादिना चोपपादितं तस्य च सर्वांतरत्वस्या नंदमय एव
पर्यवसानस्य कृतत्वात् तस्यैवोक्तलक्षणवत्तया परमाप्तिफलकवेदनविषयत्वजगत्कारणत्वादिना ब्रह्मत्वाव
माप्तिरुक्ता ॥ स आनंदमयविषय इति निश्चीयत इति चेन्न ॥ आनंदमयस्योपक्रांतसर्वांतरत्वपर्यवसानस्यासि
द्धेः ॥ अन्नमयादिभ्य इव ततोन्योंतर आत्मेत्यनाम्नानात् तत्सिद्धिरिति चेन्न ॥ आनंदमयपर्यायोत्तरं तस्यैष एव शा

रीरआत्मा यः पूर्वस्येत्यानंदमयादन्यस्यानरात्मन आम्नानेन तत्रैव सर्वांतरत्वपर्यवसानेन पुच्छब्रह्मरूपत्वविषयए
वाक्यास इति वक्तुं युक्तत्वात् अभ्यासस्य पुच्छब्रह्मविषयत्वेपि सोकामयतेति पुंलिंगनिर्देशोपपत्तिः प्राक् समर्थि
तैव ॥ वस्तुतस्तु सर्वांतरत्वं नात्रोपक्रांतं योवेद निहितं गुहायामिति गुहानिहितत्वमात्रोक्तेस्तस्य च तस्यानंदम
यएव पर्यवसानं तस्य जीवत्व एव लिंगं हि प्रकारेणाहि ब्रह्मणो गुहानिहितत्वं ब्रह्मणः पारमेश्वररूपेण जीवरूपेण च
अत्र योवेद निहितं गुहायामित्यत्र गुहायां स्थितमित्यनभिधाय निहितमित्युक्त्या पारतंत्र्यावगमात् ॥ परमे
व्योमन् प्रतिष्ठितमिति तस्य परमेश्वराश्रितत्वोक्तेश्च ॥ अत्र हि परमे व्योमशब्दः परमेश्वरपरः भृगुवल्ल्यां सम्यं
वं ब्रह्मस्वरूपं निरूप्य सैषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठितेति ब्रह्मपरपरमव्योमशब्दसमानार्थ
कत्वानुरोधात् ॥ अतएवोपसंहारेपि ब्रह्म पुच्छं प्रतिष्ठेति तस्य ब्रह्माश्रितत्वं प्रतीयमानं न यथाकथंचिन्ने
यमुपक्रमोपसंहारैकरूप्यस्य न्याय्यत्वात् ॥ न चैवं सति ब्रह्मविदाप्नोति परमिति संक्षिप्य कथितस्यार्थस्य
योवेद निहितं गुहायामित्यादि सोश्नुते सर्वान् कामानित्यनेन विवृतत्वेन गुहानिहितस्य जीवत्वे तद्वेदनस्य
सर्वकामावाप्तिफलकत्वासंभव इति शंक्यं ॥ गुहायां निहितं सत्यं ज्ञानमनंतं ब्रह्मेति यो वेदेति योजनया स
र्वकामावाप्तेर्ब्रह्मज्ञानफलकत्वस्यैव प्रतीतेः ॥ न च जीवस्य ब्रह्मताज्ञानस्य ब्रह्मणा सह सर्वकामावाप्तिः फलं
तव मतेन संभवतीति वाच्यं ॥ यतः सोश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेत्यत्र न सहार्थे तृतीया सहेत्यस्याहि

न ब्रह्मपुच्छमित्यनेनान्वयः वैदिकसंप्रदायागतस्य हेत्वभिधानस्य तदगमकत्वात् किंतु स इति योगपथे का आनित्यत्वा
नंति ब्रह्मणो वीत्यं भावे तृतीयातादात्म्येन ब्रह्मानुभवानस्य लक्षणं ॥ तथा च ब्रह्मात्मना सर्वान् कामानश्नुते एतस्यैवा
नंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः विषयभूतानंदानुभवेन सर्वकामावाप्तेः सुकरत्वात् ननिर्विशेषप्रकर
णानुगुण्यं न च पूर्वपर्यायेषु अन्नाद्वै प्रजाः प्रजायंते प्राणं देवा अनुप्राणंति विज्ञानं यज्ञं तनुते इति श्लोकानामयथि
विषयत्वदर्शनात् माध्यपाठात् आनंदमयपर्यायेपि असन्नेव स भवति असद्ब्रह्मेति वेद चेदित्यादिनिगमनश्लोकस्या
नंदमयविषयत्वेन तत्स ब्रह्म शब्दाभ्यास आनंदमयविषय इति वाच्यं ॥ मनोमयपर्याये यतो वाच इति श्लोकस्य
ब्रह्मविषयत्वेन तादृशानियमासिद्धेः प्रायपाठभंगात् ॥ यदि च तत्रापि ब्रह्मविषयकमास्थाय तथा मनः प्रतिपा
दितमेव प्रासिद्धं निरूपत्वात् तस्य च मनोवृत्तिरूपत्वादिति श्लोकस्य कथंचिन्मनोविषयत्वमित्युच्यते तदा भक्ते
पि असन्नेव स भवतीत्यत्र स इत्यनेन परामृष्टस्यानंदमयस्य ब्रह्मविषयकसदसद्वेदनाभ्यां सत्तासत्ताश्रयतया प्र
तिपादनमस्तीति श्लोकस्यानंदमयविषयत्वं वक्तुं सुवचं परं तस्मादानंदमयस्य ब्रह्मत्वसाधकं तेनानंदमये ब्रह्मश
ब्दाभ्यासासिद्धेः असन्नेव स भवतीति श्लोकस्य सर्वनाम्नाति सन्निहितत्वेन परामृष्टस्याभियादिविशिष्टस्य सत्तास
त्त्वशंकानास्पदत्वात् तन्निवारणाय प्रवृत्तमंत्रस्य तद्विषयत्वे आनर्थक्यापातस्य पूर्वमुक्तत्वाच्च ॥ एतेन तत्रैव तुल्य
व्यपदेशात् मांत्रवर्णिकस्यानध्यपदेशादयोप्यानंदमये सुतरामसिद्धा इति व्याख्यातमाद्यमेव सोकामयतेति पुल्लिंगेन स

र्थेनाम्नातिसन्निहितस्यानंदमयांतरात्मनस्तस्यैष एव शारीर आत्मेतिनिर्दिष्टस्यैव परामर्शः नानंदमयस्येत्यप्युक्तमे
वेतिनन्तुलादपितस्येतुव्यपदेशोपपत्तिः॥ यदप्यन्नमयादीनामपिब्रह्मशब्दादेव ब्रह्मत्वमितिजयतीर्थोक्तं श्रुताव
न्नमयस्यादित्वेपिसूत्रेआनंदमयस्येतरोपलक्षकतयोपादानंयुक्तमितिचंद्रिकोक्तं तदप्यसत् अभ्यासादित्यसंगतेः
॥ यद्यपिविज्ञानं देवाः सर्वे ब्रह्म ज्येष्ठमुपासते विज्ञानं ब्रह्म चेद्वेदेति विज्ञाने ब्रह्मशब्दाभ्यासोस्ति तथापि येन्नं ब्रह्मोपा
सते प्राणं ब्रह्मोपासते इति सकृदेव ब्रह्मशब्दश्रवणादन्नमयादौ ब्रह्मशब्दाभ्यासाभावात् ॥ यदित्र ब्रह्मशब्दाभ्यासा
दितिभाष्ये ब्रह्मार्थकशब्दाभ्यास एव विवक्षितः ॥ तथा च एतमन्नमयमात्मानमुपसंक्रम्येत्यादौ ब्रह्मशब्द-
समानार्थकात्मशब्दस्यापि सत्वात् ॥ येन्नं ब्रह्मेत्यादिरूपादभ्यासान्नैत्तिरीयकइत्यनुव्याख्यानानुसारेणैक
विषयासकृदुक्तिलक्षणमुख्याभ्यासाभावेप्यसकृदुक्तिरस्ति॥ तथान्नमयादिविषयत्वेन ब्रह्मशब्दस्या
सकृत्श्रुतत्वाभिप्रायोऽभ्यासशब्द इति सुधोक्तरीत्यावानानुपपत्तिरितिविभाव्यते तदापि सूत्रेप्रथमोपस्थितत्वा-
न्नमयानिर्देशत्यागेबीजाभावः ॥ यत्तु अन्नमयादीनां तर्हि ब्रह्मतां नासूत्रयदित्यत्राहि सूत्रे स्वात्मादरत्वा
मत्वेप्यानंदमयस्य संगतत्वेन ग्रहणमिति जयतीर्थोक्तं सर्वासामन्नमयादीनां तान्नमयस्यादित्वेपि सूत्रे आनंदम
यस्येतरोपलक्षकत्वेनोपादानं युक्तं न त्र जिज्ञासासूत्राक्षेपकस्याद्यत्वादिपूर्वपक्षहेतोः सत्वादितिचंद्रिकोक्तंचा
सत् ॥ जिज्ञासासूत्रासंगतेः प्रागेव निरस्तत्वात् अन्नमयेपि स्थूलश्रुतिविशारार्थोपपादकस्यान्नात्प्रपु

अन्नस्मात्सर्वौषधमुच्यत इत्यादेःपूर्वपक्षोपपादकस्य सत्त्वाच्च ॥ एवमन्नमयादितः पूर्वपूर्वस्मादुत्तरोत्तरस्य प्रा-
णमयादेरन्यत्वोपदेशेनान पञ्चानां ब्रह्मता ब्रह्मशब्दभावं च यो नाम ब्रह्मोपास्त इत्यादावपि न ब्रह्मतागमकं किंतु
ब्रह्मत्वेनोपासनमात्रं ॥ यत्तु नाविद्यमानं भुवने वेदाध्यातुं न वैदिकाः न चतरमंत्य हो असदुपासनया त्मनहन
इति स्मृत्या अचेतनासत्त्वायोग्यान्यनुपास्यान्यफलत्वविपर्ययाभ्यामिति संकर्षणसूत्रेण चासदुपासनाया नि
षेधान्नामब्रह्मेति वाक्ये ब्रह्मशब्दः नामाभिमानिनी चोपास्त्यां ब्रह्म हरिं स्मरेदिति स्मृत्यनुरोधेन ब्रह्माधिकरणो-
नामपदार्थे वादौ गौणः नामेति प्रथमा वचनं वा वसंतो मारुत इतिवत् सप्तम्यर्थे सप्तम्या वा स्यादेशः सुपां सुलुगि
ति सूत्रात् अन्यथा श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति श्रुत्यात्मानं पृष्टवंतं नारदं प्रति नामोपास्ति
कथनमयुक्तमेव स्यात् उक्तः कालादिकध्येयस्य हरेराधार इति उपासीत उपादिकं यथा धारो भवति तथोपासीत उ
क्तः कालादौ विद्यमानः सन् हरिमुपासीतेति नारदशास्त्रेरर्थः एवं मतिमायामपि देवताधारत्वबुद्ध्यैवोपासनं न तु
देवतातादात्म्यबुद्ध्येत्यादिकमानंदतीर्थीयैरुक्तं तदसत् ॥ उक्तस्मृत्या असदुपासनानिषेधेनान्नादौ ब्रह्मदृष्टिवि
धानासंभवेपि नामादिवाक्यद्वयानापि तद्दुक्करीत्यैव प्रथमायाः सप्तम्यर्थवृत्तिं सप्तम्या वा स्यादेशमुपेत्य येऽन्नं ब्र
ह्मोपासत इति श्रुत्यर्थसंभवेन ब्रह्मश्रुतिमात्रेणान्नादेर्ब्रह्मत्वासिद्धेः ॥ न च सर्वकारणत्वलिंगादन्नस्य ब्रह्मता
नामादौ तदभावान्न तस्य सेति वाच्यं अन्नात् पुरुषः ओषधीभ्योऽन्नमिति जन्यत्वलिंगेनासंज्ञानविरोधिनान्नस्या

न्यधानेयत्वात् अन्नाद्वै प्रजाः प्रजायन्त इति प्रजाशब्देन संकोचावगतेश्च न सर्वकारणत्वं तस्य उक्तस्मृतिसूत्रयोर
त्यंतासदुपास्तिनिषेधपरत्वसंभवेन नामादौ ब्रह्मत्वेनोपासनविधेर्न्नं ब्रह्मोपासनमित्यादावन्नादौ ब्रह्मत्वेनोपासन
विधिपरत्वेन ब्रह्मशब्दोपपत्तेस्तस्यान्नादौ ब्रह्मत्वासाधकत्वाच्च ॥ ननु उक्तस्मृत्यादिनिषेध्योपासनाया अत्यंतासत्वं
प्रातीतिकत्वमलीकत्वं वा ॥ नाद्यः प्राधेन्वादेरुपास्यत्वात् ॥ न चोपास्यत्वेनाविहितं यत् तदन्यप्रातीतिकत्वं तदिति
वाच्यं ॥ तदुपासनस्याप्रसक्तत्वेन तन्निषेधायोगात् ॥ अत एव नान्त्यः अलीकस्योपास्यत्वेनाविहितत्वात्तदुपास
नस्याप्रसक्तत्वेन तन्निषेधायोगात् ॥ अथोपास्यत्वेनाविहितस्यापि देहादेः रागप्राप्तोपास्यत्वेन निषेधार्हत्वमिति
प्रथमपक्षः साधुरेवेति चेन्न हि स्मृतेः प्रतिषेधपरत्वेन साधकाशत्वेऽपि सूत्रानर्थक्यं न्यायाप्रतिपादनात् ॥ नहि सूत्रं विधि
प्रतिषेधरूपं किंतु न्यायविशेषप्रतिपादनद्वारा प्रतिषेधतात्पर्यनिर्णायकमिति चेदत्र वदंति ॥ अत्यंतासत्वं हि प्र-
कृते उपास्यत्वेनाविधेयत्वायोग्यत्वरूपं विवक्षितं तत्वं च देहाद्युपास्यत्वेनाविध्यभावात् तद्वायेन्यायविरोधाद्वा त
धान्यदेहादेरुपास्यत्वेनाविधेयत्वेऽपि उपास्यत्वेन रागप्राप्तत्वात् स्मृत्योपास्यत्वेन निषेध्यता सूत्रेण तु यत्र व्यावहा
रिकं प्रातीतिकं च विहितोपास्यत्वेन प्रसक्तं तत्र व्यावहारिकमेवोपास्यं शास्त्रार्थो न तु प्रातीतिकं व्यवहारिकस्य सं
भवे प्रातीतिकस्यानादेयत्वात् ॥ यथोद्गीतोपासनायां प्रणवत्वादिकं प्रातीतिकमाकाशादौ नोपास्यं किंतु ब्रह्मणि
सत्यं यथा वा सत्यकामत्वादिकं ब्रह्मणि व्यावहारिकमुपास्यं न प्रातीतिकं देवताधिकरणन्यायेनोपासनावाक्य

स्यात्यावहारिकप्रामाण्यात् ॥ एवं यत्नेनैतन्न कस्येनोपास्यं भिन्नभिन्नकं तत्रन्ते तन्मे धोपास्यत्वात्स्वार्थः स्वत्वाविद्-
षत्वाभावात् यत्नेनोपास्यत्वेन पंगुरूपं प्रतिपदयोग्यं पर्यालामसंप्रतिपरमसात्त्विकी विष्णुमूर्तिः सात्त्विकं प्रति पातालसी
मैरवविजोषादिमूर्तिः तत्त्वेन नोपास्यं अप्रत्यासंभवात् इति बोध्यं तदाह न सूत्रे वैष्णव्यं ॥ वाच्यं धेनुमुपासीत योषितमग्निं
ध्यायीतेति प्रातीति के वा धेनुतादात्म्योपास्यत्वदर्शनादुक्तस्मृत्यादेर्मिथ्याभूतेऽपास्यत्वानिषेधपरत्वासंभवाद्धुक्री
त्या अत्यंतासदुपासितिनिषेधपरत्वं तत्राप्य तथ्यं वाच्यं पत्नुराणि धेनुमिवायतीतिश्रुत्यंतरेऽवागौ धेनुरग्निरुक्तेः रेतो-
जुहदीतिश्रुत्यंतरे रेतोन प्राहुत्याधारत्वस्याग्नावुक्तेः धेनुसाहाग्निशब्दौ गौणौ अस्तौ यत्र गौणो गौ न माणवकोग्निरित्यादिपंचा-
ग्निविद्यायां श्रद्धोग्न्यपास्य लोकादयः प्रतीयमाना न पंचाग्नयः किंतु नारायणादयः पंचकप्राप्तं पंचाग्नयः स्मृताः अ
दनादंगने तृप्यान्वितरामख्यत्वनदन इति भाष्योक्तरीत्या नारायणादयः योगेन तद्वर्णयिता इति वत् योषितमग्निं ध्यायी
तेति वाक्ये अग्निशब्दो यौगिको वेति परैरुक्तं ॥ तदसत् ॥ आरोपेण मुख्यत्वसंभवे गौणत्वायोगात् अन्याय्यत्वात् न चैवं सति
गौणपुरुषेऽप्रसंगः संभवः यत्र उपासनाया अध्यर्थं पश्चाकृडपायिनामयने श्रुते मासमग्निहोत्रं जुहोतीत्यादौ वेदे आरो-
पस्य निष्प्रयोजनत्वा अग्निहोत्रसादृश्यार्थकाग्निहोत्रपदेन नेह्याभिकाग्निहोत्रधर्माणां तात्पर्यविषयाणां मासाग्नि-
होत्रे प्राप्त्यर्थं तत्रासिद्धो देवदत्त इत्यादौ लोके आरोपस्य निष्प्रयोजनत्वा सिंहगुणशौर्यादि प्रतीति तात्पर्यनिर्वाहार्थं
गौण्या आश्रयणत्वात् तु ध्यायार्थस्यारिनगौणार्थविपक्षापानुदयर्थस्यात्यागात् यौगिकार्थस्य च अनावयववृत्तिसापेक्ष

त्वेन मूलस्य परिपेक्षया दुर्बलत्वात् मूलस्यार्थस्य सादृश्यादिमति योगितया शाब्दबोधविषयत्वे संभवति सति गौणार्थत्या
गेन यौगिकार्थग्रहणस्य रथकाराधिकरणाधिकृतत्वात् नाम ब्रह्मेत्युपासीतेत्यादौ प्रथमायास्तत्स्यार्थवृत्तित्वं न स्यादा
त्वारोपं स्वीकृत्य वाक्यार्थवर्णने समानविभक्तिकत्वाभावेऽपि ब्रह्मनन्यप्रसंगान्नाम्नि ब्रह्मत्वारोपेणोपासनमेव
भक्त्यार्थ इति युक्तं ॥ एवं च प्रतिमादावपि देवतात्वारोपेण मुख्यत्वासंभवे गौणार्थग्रहणमन्याय्यं यत्तु प्रतिमायां देवता
त्वारोपेणोपासनया फलानुत्पत्तिः यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः यत्तीर्थबुद्धिः सलि
ले न कर्हिचिज्जनेष्वभिज्ञेषु स एव गोखर इति स्मृत्या शिलादेव इति ज्ञानस्य भौम इज्यधीरिति निषेधादिति परैरुक्तं ॥
तदसत् मणिप्रभायां मणिबुध्या धावतो मणिलाभवत् संवादिभ्रमरूपप्रतिमादेवताज्ञानस्य फलजनकतायाः शा
स्त्रप्रामाण्येन स्वीकारात् स्पष्टं चेदमाकरे ॥ यस्यात्मबुद्धिरित्युक्तस्मृतेः देहादिभिन्न आत्मा कलत्रभौमसलिलादिभि
न्नाः साधवः स्वीयाः पूज्यास्तीर्थभूताश्चेत्यर्थः तात्पर्यात् देहादिभिन्नो नात्मा कलत्रादिभिन्नाः साधवः स्वीयत्वपूज्यत्वती
र्थत्वभूत्या इति भ्रमव्युदासपरत्वेन शिलादौ देवतात्वारोपनिषेधकत्वाभावात् अयमेतच्च दृढं कुमतसमर्थवादं प्रति
शास्त्रं मदर्थं पश्चाद्यथा चन्द्रो दर्शनेन तत् प्रथमतः श्रुत्वात्मनो दुर्बोधत्वात् पश्चात्तेनापृष्टमपि बोधयितुं नामाद्यपाङ्क्ति
न्नात्मनूनामाद्योपास्तिमुक्त्वा पश्चाद्भूमानन्त्यं श्रुत्वात्मोपदेशः कृत इति श्रुत्वात्मानं पृष्टवन्तं नारदं प्रति नाद्योपास्तिकथ
नमयुक्तमिति दूषणानवकाशादित्यलमप्रस्तुतप्रासंगिकविचारेण ॥ एवमन्नस्य ब्रह्मत्वेऽत्र चोदिते भूतानि तस्मा

दन्नं तदुच्यत इति श्रुत्युक्तमयत्वजनितमानुपपन्नमेव स्यात् ॥ यत्तु उपजीव्यत्वमेवाधत्वं ... प्रा(ण)वृत्त्यन्नमयादं
मादित्यानंदतीर्थोक्तं तदपि न साधु यद्यत्र मुपजीव्यत्वं तदा अन्नत्व मुपजीवकत्वं स्यात्तच्च ... त्वामेव ना
त्मा उपजीव्यानि किंचोपजीवनं नादिधातोः शब्दार्थ इति भक्षणमेव तस्य ... ना दिता स्वर्था
श्रित्वाल्लाक्षणिक प्रयोगोपि दृष्टः ॥ नन्वाद्यत इत्यत्रादिरुपजीवनपरः अत्तीत्यत्र संहारपरइति चेन्नएवं किंचिद्भक्षम
स्ति संहारोपि नादेर्मुख्योर्थः प्रसिद्ध्याऽन्नमयादिपरत्वेनूनमयं युक्तं पुरुषा अन्नापरिणामस्य तस्य भूतावयवत्वान्नादनुत्वा
च्च तस्मादन्नमयादप्रकोश एव न ब्रह्म ॥ अत एव ओषधीभ्योन्नं अन्नात्पुरुष इति प्रसिद्धान्नविकारदेहमुक्त्वा स
वा एष पुरुषोन्नरसमय इति तदेतत्त्वं श्रुत्यामत्कृताचिसन्निहितान्नविकारः प्रत्यक्षशिरः पाण्याद्याकृतिमान् परामृष्टः
॥ यत्तु स वा एष इत्यत्र प्रारंभादित्य ... न यस्मादाकाशादिक मुत्पन्नं स एवात्मा तदेतत्सदात्म्यापरामृश्यत इत्यानंदतीर्थो
क्तं तदसत् ॥ उक्तरीत्या प्रकृतानि संनिहितान्नमयपुरुषपरामर्शसंभवे दूरस्थपरामर्शकल्पनायाअन्याय्यत्वात्दूर
स्थपरामर्शेप्यस्मदीत्योपादानपरमात्मनादात्म्योपदेशपरत्वोपपत्तेस्त्वदीत्यापि तत्त्वमसीत्यादौ तच्छब्दस्य तद
धीनेलक्षणावत्तदेतच्छब्दयोरपि तदधीनेलक्षणोपपत्तेश्च न तत्तोन्नमयस्य ब्रह्मत्वं ॥ न च लक्षणाकल्पने बीजाभा
वः शंक्यः अद्यते तिच ओषधीभ्योन्नं अन्नात्पुरुषः इत्यादि विकारोपपादकबहुतराब्रह्मलिंगदर्शनस्यैव बीजत्वात् ॥
एवं प्राणमयादीनामप्युक्तरीत्या परस्परान्यत्वबोधनात् मुख्यार्थस्य प्रसिद्धस्यत्यागात्ततोप्यंतरात्मश्रवणाच्च न ब्रह्म

तायनो मयेत्तु न मयट्शब्दः श्रूयते आनंदात्मकमुख्यब्रह्मसाक्षात्कारसाधनत्वेनापि मुख्यमनसस्सूयमानत्वादिति दिक्॥
प्रचुरानंदत्वादानंदमयो विष्णुरिति द्वितीयसूत्रार्थोऽप्यसाधुरेव आनंदमयशब्दस्य हि प्रचुरानंदापेक्षत्वं तत्प्रकृतवचने मय-
डिति सूत्रेण प्रचुरतायां विहितमयडंतत्वात् वक्तव्यं तच्च व्याकरणतत्त्वज्ञाः अस्मदीयाः केचित् न सम्मन्यंते॥ तथाहि तदभि-
यः इदं सूत्रं वैयाकरणैरित्थं व्याख्यातं तदिति प्रथमांतोपस्थापकं तथा प्रथमासमर्थात् प्रकृतस्य प्राचुर्येण प्रतिपादने वि-
वक्षिते मयट् प्रत्ययः स्यादिति सूत्रार्थः अत्र च प्रकृतत्वं नाम अधिकत्वं इत्यादिवचनग्रहणाल्लोके मयडंतैः शब्दैः प्रकृतस्यार्थस्य प्रति-
पादनं प्रसिद्धं तेन प्रकृतस्यार्थस्य प्रतिपादने विवक्षिते मयट् प्रत्ययः स्यादिति तत्र लोके च प्राचुर्येण प्रस्तुते प्रकृतार्थे विव-
क्षिते मयडंतप्रयोगदर्शनात् प्राचुर्येण प्रस्तुतत्वं वचनग्रहणाल्लभ्यते अस्मिन्पक्षे प्राचुर्येण प्रस्तुतत्वं प्रकृतत्वार्थः प्रकृ-
तस्यार्थिक एव तदर्थद्योतकः तस्य चोदाहरणं अपूपमयाः पर्वाणि प्राचुर्येण प्रस्तुता अपूपा इत्यर्थः प्रस्तुतत्वं प्रा-
प्रस्तुतत्वं प्रस्तावार्थः तथापि सा विप्रकृत्यर्थसंख्यावत् प्रकृतस्यार्थविशेषणमेव वस्तु सतिर्यच्चित्याः [illegible]
समर्थात् प्रस्तुतत्वविशिष्टप्रकृत्यर्थसंबंधित्वेनान्यस्मिन्नर्थे [illegible]
चनमित्यधिकरणार्थस्तु उक्तप्रकृते मयडंतशब्दस्य स्त्रीकृत्यान्यपदार्थत्वं [illegible]
करणोपज्ञ इति तदर्थः अस्मिन्पक्षे प्राचुर्येण प्रकृत्यर्थः किंत्वधिकरणाभेदेन प्रयुक्तः [illegible]
प्रयक्षद्वयेपि प्राचुर्येण प्रस्तुत आनंदः आनंदमयः प्रस्तुतोऽस्मिन्नानंदः आनंदमय इति प्रस्तुतत्वं आनंदस्योक्त-

लेशानंदमपपदं आख्येयं तच्च न संभवति पूर्वस्मिन् ग्रंथे आनंदस्यामस्तुतत्वान् श्राद्धेनोत्सर्गतः श्रद्धैवैव अस्तु तत्त्वस्य प-
कुं युक्तत्वात् कथमत्र तत्र कृतवचनइति सूत्रेणमपद्माधिष्यतीति ॥ अस्तु वा यथा कथंचिदानंदस्यामस्तुतत्वं तथाप्यत्र
भानुपर्यंक्रमपडयुक्त एवं तथास्त्वभानुपर्यशाद्धेनाधिवक्षितमाधिक्यं संख्याकनस्तुतपरिमाणकं वानायुः ब्रह्मानंदाने-
कत्वे प्रमाणाभावात् आनंदं ब्रह्मणोविद्वानिति तदेकत्वस्य वर्णात्स्वनत्व सतिप्रमाणांतरेविप्रतिपन्नमपरातन्निर्णयः
संभवति जगच्चेष्टकत्वादेरपि अनावृताधिकैकानंदमात्रेणाप्युपपन्ने नह्य प्रामाणिकं गौरवमसति प्रमाणांतरे युक्तमभ्यु-
पगंतुं॥ ननु यतो वाचो निवर्तंत इति श्रुतिरेवानंतासंख्याकानंदवत्तयाऽपचापरिच्छेदकवागाविषयत्वं ब्रुवती ब्रह्मानंदाने-
कत्वे प्रमाणमित्यपि वक्तुं शक्यं अपरिच्छिन्नतामात्रेणापि तस्या अन्यथासिद्धत्वात् नह्यसंख्याकानंतानंदस्वीकारेपिय-
थाश्रुतं वाङ्मनसागोचरत्वमुपपद्यते भगवदानंदा अनंता इति वाग्विषयत्वानपायात् विशिष्य वाचा वक्तुं न शक्यत इ-
ति तदर्थोपि विशिष्येत्यस्यार्थविचारे शिथिल एव यतो विशिष्येति सकलविशेषवत्तयेत्यर्थकं चेदनैव शक्नुमानंदो वो-
ढ्यस्तथा भवतीति व्याघातः निवर्तंत इत्यत्र स्वगतयावद्विशेषनिष्ठानवच्छिन्नप्रकारता शालिबोधजननासामर्थ्यमेवानि-
वृत्तिरित्युक्तावपि मनुष्यानंदसाधारण्येव नहि मनुष्याद्यानंदगतावि शेषाः स्वेतरतत्तदानंदव्यावृत्तिलक्षणाः निःशेष्य
केनापि गणयितुं शक्याः प्रतिपादितं चैतदीक्षत्यधिकरणे विस्तरेण ॥ तस्माद्यतो वाचो निवर्तंत इत्यनेन इतः उत्कर्ष-
बोधकप्राचो निवर्तंत इत्येवार्थो वाच्यः स चैकस्मिन्नप्यानंदे सर्वानंदांतरावधिकोत्कर्षाभ्युपगमेनापि निर्वहतीति कि-

प्रानंदशब्दस्योपगमेन ॥ नापि द्वितीयः पक्षः परिमाणाधिक्यमात्रेण लोकवेदयोः क्वापि मयट्प्रयोगादर्शनात् न चैवं ह-
स्तिमत्त्वाद्युपदातिप्रयुक्तायां सेनायां गजमयी सेनेति प्रयोगः प्रामाणिकः अत एवोत्कर्षमात्रं पूर्णत्वं वा मयडर्थ इति निर-
स्तं ॥ न च प्रचुरैश्वर्यमहौदार्यादिगुणशालिब्राह्मणवत्परिमितभूरिभूयिष्ठपरिपूर्णैकवराकादिमति तदितरस्य
भूयिष्ठत्वाभावे अपि विविधविचित्ररत्नखचितैकशकटवत्यामनेकरत्नकीर्णवत्त्वायां वा यां ब्राह्मणमयोऽयं ग्रामः तथा च
अयं ग्रामः शाकटमयी यं यात्रेत्यादिप्रामाणिकप्रयोगादर्शनात् तस्मादन्नमयादिशब्दवद्विकारार्थ एवानंदमयट्प्रत्यय इति
मयट्प्रयोगो युक्तः ॥ एतेन भर्तुरानंदत्वेनानंदमयपदवाच्यो विष्णुरेवाभ्यासादित्युक्तं तदेवमद्वैतं तरेण प्रतिपादयन्तीश्रु-
ति अभिव्यक्त आख्यापि भक्त्याख्यातैव यातु सत्यं ज्ञानमनंतमिति मंत्रवर्णे लक्षणवत्त्वोक्तं परमेव ब्रह्मान्नमयादिशब्दभेद-
केनाभीयते सत्यज्ञानानंतशब्दानामन्नमयादिशब्दानां चार्थानुसंधाने एकार्थत्वप्रतीतेरिति चतुर्थसूत्रव्याख्यापि च युक्त-
मन्नादिशब्दप्रतिपाद्यस्य कालत्रयाबाध्यत्वादेरन्नमयादिशब्दप्रतिपाद्येऽनवगमात्तेषां सैकार्थत्वप्रतीतेरसिद्धेः ॥ यत्तु स-
त्यमित्यत्र सच्छब्दः सद्भाववाची सद्भावश्च जन्मलयाद्यजन्यात्मककर्मवाचिनि सच्छब्दे उपपदे अंतर्भूतण्यर्थात् या धा-
तोरदंतादातोरनुपसर्गात्कर्मण्युपपदे कः स्यादित्यर्थकेनातोऽनुपसर्गे क इति सूत्रेण कप्रत्यये कृते सत्यमिति सिद्धं त्व-
मुच्यते ॥ एवमस्ति देवदत्त इत्युक्ते जीवतीति प्रत्ययात् जीवनमपि सद्भावः तथा च द्रव्यविशारणगत्यवसादनेष्विति
सत्तारूपां सदादिनाविशारणादिकमुच्यते ततश्चास्तेः शत्रंतस्य सदेः क्विबंतस्य रूपं सदिति प्रायमर्थानं चैतदिति अन्यत्र मा-

यत्र एवं च सत्यशब्देन जगत्सृष्ट्यादिकमुच्यते तदेतत्प्रमाणयोरवगम्यते अन्नाद्धे भूतानि जायन्ते अन्नेन जातानि जीवन्ति अन्नं प्रयन्त्य-
भिसंविशन्तीत्यादिना चेति तेषामेकार्थता प्रतीतिर्नासिद्धेति पराभिमायवर्णनं केषांचित्तन्नवैय्याकरणसंमतं ॥ तथाहि-
सतिभूतौ सत्य इति प्रयोगापत्तेः अपत्यस्यादित्वाद्धि संज्ञेत्यपि न प्रत्येयं सत्यादिशब्देषु अपत्यमयादिगणपाठविरहात्सिद्धेः-
त्वदीयव्याख्यानमात्रेण तत्कल्पनायाअप्रत्येयत्वात् अनुशासनव्यमते अकृतव्यूहपरिभाषाया असत्त्वेन हरिः गच्छतीति
गतसत्यमित्यस्योपपत्तिः पूर्वमप्रसानविवक्षया जन्स्यापवादत्वेन ततउपपदसमासे इष्टरूपसिद्धेः ॥ तथापि सत्यशब्द-
स्य बाधितेनूदत्स्यनूदिंप्रत्यक्षानिरुक्तयौगिकार्थग्रहणेत्वन्मतेजन्माधिकरणे तद्धि जिज्ञासस्व तद्ब्रह्मेति वाक्ये ब्रह्मशब्द-
स्य नूदित्यागेन यौगिकार्थग्रहणेनूद्यर्थे जीवपरतोपेत्यादिश्रुत्युक्तजगत्कारणत्वानुपपत्तिवत् अनुपपत्त्यादिबाधकाद-
र्शनेन तदनुसरणायोगात् सत्यशब्दस्योक्तयौगिकार्थकल्पाभावेपि श्रुतिबलादेव कारणत्वसिद्धिसंभवात् भगवतः सू-
त्रकारस्य तात्पर्याभिप्रायानुसारित्वे तल्लिंगात् तत्समोपदेशादिति विन्यासोपेक्षायां बीजाभावादेवं सर्वज्ञत्वसर्वकर्तृत्व-
सर्वप्राणनहेतुत्वसर्वभीषकत्वादीनां स्पष्टतयाबोधकश्रुतिशतसिद्धार्थस्यातिकृष्टेन सत्यादिशब्देनोक्तिकथनं नैष्फ-
ल्यान्नतःकिंचिदेतत् ॥ पंचमसूत्रार्थोपि न युक्तः ज्ञात्वा शिवं शांतिमत्यंतमेति यदा चर्मवदाकाशं वेष्टयिष्यंति मानवाः त-
दा शिवमविज्ञाय दुःखस्यांतो भविष्यतीत्यादिश्रुतिभिः शिवज्ञानादपि मोक्षोक्तेः तमेव विदित्वेत्यादिश्रुतेरपि शिव-
परत्वव्युदासे हेतदर्शनात् पुरुषादिशब्दानां विष्णौ वैफल्यं निरसनेन शिवसाधारण्यस्य पुंसूक्तस्यापि शिवपर

त्वस्य च पूर्वमेवापादितत्वाच्च ॥ प्रकृतसूत्रार्थोऽप्यनुपपन्नः एव रुद्रानंदस्य ब्रह्मानंदशतगुणन्यूनतायाः श्रुतेः नहि बृहस्प
तिशब्दः प्रजापतिशब्दो वा शिवशब्दो योगमात्रस्यातिप्रसंगान्नत्वादरः साधुः देवशब्दस्य परिच्छिन्नशक्तौ च शतक्रतौ रुद्रा अपि नि
विशेषस्यापि परशिवस्यानन्तत्वानिषेधः किंतु कार्यरुद्राणामेव रुद्रा दशादित्ये सुनिविष्टो विष्णुर्विभूतिविशेष एवेति न्याय
य तस्य न्यायसाम्यात् समन्वयसूत्रव्याख्यापि न साधीयसी यतो जीवस्यानन्दमयानन्दमयपदवीं निराकर्तुमिदं सूत्रमिति हि त
व मतं भेदव्यपदेशाच्चेति सूत्रेण पूर्वतनेन ब्रह्मरुद्रादेः शतगुणानन्दतोक्तेरानन्दमयस्य विष्णुत्वं प्रसाध्य तस्यानंदमयत्वोपि वि
ष्णुस्तथापि कथं तेन ब्रह्मादिजीवानां भेदस्तत्त्वमस्यादिश्रुतिबाधितत्वादित्याक्षेपे तत्त्वमस्यादिश्रुतीनां तेषामभेदपरत्वं व्या
ख्याय श्रुतिविरोधाभावेऽप्यनुमानविरोधान्न तेषां तेन भेद इति एतत्सूत्रं निरस्य तत्कथं ब्रह्मादिजीवस्य सुखदुःखानन्दप्रद
सम्भिन्नार्थ एव प्रपर्यवसानात् तच्च न संभवति जीवपूर्वपक्षस्यैवाप्रसंगतेः ॥ तथाहि न तावत् ब्रह्ममताभिप्रायेणायं पूर्वपक्षः
उपदर्शितानुमानस्य स्वपक्षमात्रिकृत्येन शंकितुमशक्यत्वात् नाप्यद्वैतिमताभिप्रायेण तेनाप्यविद्यालक्षणोपाधिकस्य
जीवस्य संकल्पपूर्वकजगत्कर्तृत्वस्यानभ्युपगमात् आनन्दमयस्य च तथा श्रवणाभिनिवेशत्वानभ्युपगमात् तद्बुद्ध्यादिनब्र-
ह्मैवानंदमयपदप्रतिपाद्यमिति पूर्वपक्षिणापाद्यं तदपि नोचितं वक्तुं मुख्यस्य ब्रह्मणोऽभोक्तृत्वेनोक्तानुमानस्य तद्विषयेतेन शंकि
तुमशक्यत्वात् अस्यानुमानस्याद्वैतिपूर्वापादितैः सर्वशरीरेषु जीवैस्य साधनं एवोपन्यस्तत्वाच्च न मुख्यब्रह्मसाधक
तानापि जीवब्रह्मभेदसाधकत्वेन तस्य तद्विदामतिस्पष्टत्वात् तस्मात् दुक्तानुमानमपरम्य पूर्वपक्षासम्भवात् तत्समा-

धानार्थैव स्वरूपाभिव्युक्तिरस्त्वंतात्युक्तैव ॥ किंचास्य स्वतंत्रानुमानविरोधनिरासकत्वमिति तेनमतं अद्वैतश्रुत्यादेरभावस्या
कत्वात् पृथगनुमानस्यकाप्रगतित्वेनादृष्टार्थविषये अनपेक्षितत्वोक्त्या पक्त्या योगादितिका माश्चेति सूत्रावयवव्या
ख्यानात्तच्चायुक्तं तथासति अनुमाननिरासकत्वस्य एवेदं वक्तव्यं नाथेनि दूषणस्य स्पष्टत्वात् ॥ किंच भेदव्यपदेशाच्चेति
सूत्रेण प्रतिपादिते भेदे प्रसक्तं तत्त्वमस्यादिश्रुतिविरोधं परिहृत्य निरस्यानुमानविरोधमनेन निरस्यतीति व्याख्यानमप-
श्यं निरसनीयं नसूत्रितं युक्तं निरस्तप्रायत्वं सूत्रितमिति सूत्रकारेणानुमानफलकं सुचिंत्यमेव सूक्ष्मबुद्धिभिः ॥ अस्य
सूत्रार्थोऽप्यनुपपन्न एव भेदव्यपदेशादित्यनेन चारितार्थ्यात् भेदव्यपदेशादिति सूत्रोदाहृतवाक्येऽपि न साक्षाद्भेदव्यपदे
शः किंतु प्रजापत्याद्यानंदस्य ब्रह्मानंदात् शतगुणन्यूनत्वोक्त्या स अनुमेय एव प्रकृतेऽपि गम्यं भेदमाश्रित्यैव भेदव्यपदे
शसमर्थने विशेषात् ॥ अथ भेदव्यपदेशाच्चेति सूत्रोदाहृतवाक्यगम्यस्यापि भेदस्य आपंचिकत्वशंकया मुक्तिकालेऽपि
सोऽश्नुते सर्वान् कामान् सहेति श्रुत्या जीवस्यानंदमयेन ब्रह्मणा संबंधश्रवणात् तद्व्यवस्य भेदस्य पारमार्थिकत्वमस्मि
न् सूत्रे समर्थ्यतात् तथैव भाष्यतत्त्वप्रकाशिकयोर्व्याख्यानान्नास्य भेदव्यपदेशाच्चेत्यनेन गतार्थत्वमिति चेन्न ॥ तथासं
त्यनेन तस्य वैयर्थ्यं दुर्वारं मुक्तिकालेऽपि जीवब्रह्मणोर्भेदस्य शास्त्रबोध्यत्वे आनंदमयेन ब्रह्मादीनां भेद एवास्त्विति भे
दव्यपदेशादिति सूत्रनिवर्तनीयशंकाया एवानुदयात् मुक्तिकालेऽपि यदि जीवब्रह्मणोर्भेदस्तदा संसारकाले सुतरा
मित्यतिस्पष्टत्वात् मुक्तिकाले जीवस्य ब्रह्मभावापत्तिबोधकश्रुतिविरोधेन सोऽश्नुते सर्वान् कामानिति श्रुतेः सहेत्यस्य

यौगपद्यापेक्षकत्वं ब्रह्मणो न्यूनत्वं प्रत्यक्षेणेतरत्रायोनिर्वा स्यात् वाक्यार्थस्यावश्यकत्वात्। पूर्वमेवोदितत्वेन तत्स्वां मुक्तिकाले पा-
रमार्थिकजीवेश्वरभेदबोधकत्वाभावात् जीवेश्वरभेदस्य पारमार्थिकतायाः विचारासहत्वात्॥ तथाहि न तावत् भेदस्वरू-
पमार्थिकत्वं भोक्त्रादिवत् [illegible] प्रत्यक्षं वा श्रुतिजीवेश्वरभेदाभावात् [illegible] भेदानधिष्ठानत्वात् तत्सम्बन्धे भेदमा-
त्रे किन्तु वाग्गोचरत्वं तच्च न जीवेश्वरभेदे। नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता नान्योऽतोऽस्ति मन्ता नान्योऽतोऽस्ति विज्ञा-
तेति श्रुतिवाक्येन जीवेश्वरयोर्भेदनिषेधात्॥ अथ प्रत्यक्षवाग्गोचरत्वं तत्र न जीवेश्वरभेदे प्रत्यक्षस्वीकृतिरेवाभावे न वा-
ग्गोचरत्वस्यैव परमार्थपदार्थत्वात् तद्भावे दोषोक्तत्वात् [illegible]॥ अथ नान्योऽतोऽस्ति द्रष्टेति वाक्यं न स्वार्थपरं किन्तु
द्विविधः परमो जीवः संघादिस्वभेदनिषेधानुवादित्वादिति चेत् न तथा सति दर्शनाद्यभेदनिषेधकनिषेधबोधकतया दर्शनादेरप्र-
माणत्वं न भेदाभावो भेदः प्रमाणबोधकं च निषेधबोधकमिति चेत् न पात्र सर्वस्यैव प्रमाणस्य निषेधकत्वापत्तेः तत्प्रत्यय-
स्य स्वाभाविकत्वाद्रूपत्वात् किं वा सतो भासस्य वा निषेधायोगात्। न भेदवाक्येनाभेदो निषिध्यत इति वदतः अभेदः प्रातीतिकः
अहोस्वित् व्यावहारिकः स्यात्॥ नाद्यः अहं ब्रह्मास्मीत्यादिप्रत्यक्ष [illegible]॥ नान्त्यः
न द्वितीयः नाहं तथा वेदकभेद प्रमाणाभावात् व्यावहारिकत्वे [illegible]
तोऽस्ति द्रष्टेति वाक्येन भेदवाक्यबाधः किन्तु पारमार्थिकभेदपरत्वेन॥ [illegible]
द्वाभेदव्यापकः [illegible] निषेधाभेदनिषेधपर्यवसानस्य [illegible] सद्भा-

[illegible] ॥ [illegible]

[illegible] ॥ [illegible] ॥ [illegible]

[illegible] यत्र प्रमाणं तत्र [illegible] तस्य प्रत्यक्षत्वेन श्रुतिं विना प्राप्त्यभावात् [illegible] तस्य चानि

पातेगावदित्यत्रापि प्राक्कार्य आसीदिति भाव्यम् प्रतीयते न तत्र स्वतः प्रत्यक्षं श्रुतिनिषिद्धतत्त्वमित्यर्थः [illegible] निषेधाय

श्रुत्यर्थापरिज्ञानमिति [illegible] प्रत्यक्षागमयोर्विरोधे तन्निषेधपदस्तु के ॥ तत्र च श्रुत्यर्थापरिज्ञानान्निमित्तमपाः सौरिस्यनेन प्रमाणसि

स्थभेदाभावस्यैव निषेधश्रुत्या प्रत्यक्षोक्तेरिति चेन्न ह्यभेदवादिप्रत्यक्षस्य [illegible] ज्ञानत्वस्य निष्प्रकारकत्वात् करणान्तर

ज्ञानजन्यज्ञानस्य अर्थः तद्ज्ञानग्राहितायाः प्रसिद्धेः किञ्चित् करणानिरूपणीयं ग्राह्यमेव हेतुमपेक्षते न भ्रान्तिः अन्येषां

अर्थग्राहकत्वाभिसंभवात् न तावत् प्रत्यक्षस्यापौरुषेयत्वे हेतुः जीवपरभेदस्य प्रत्यक्षेणाग्रहणात् प्रत्यक्षस्य भेदप्रमा

पांसुत्वात् भेदकान्तलक्षणानामनुमानं स्फुरत्तरं प्रत्यक्षाविरोधेन प्रवृत्तो न्यायानुमानं च तदुक्तं यथा तद्भेदपक्षे व्याप्ति

नासत्त्वात् न च प्रत्यक्षस्य भ्रमत्वाभिमानात् भ्रमत्वकल्पनाविति वक्तुं युक्तं प्रत्यक्षमिति निपातात् भ्रमत्वाभिमानायोगात्

प्यनादिदीर्घरूपेण पर्याप्तं तत्त्वादिना ऽन्यस्य याथार्थ्यहेतुः स्फुरत्तरभेदादर्शनवाक्यार्थेन ग्राह्यबाधानुदयात् ॥

ग्राह्यप्रमाणस्य योग्यताज्ञानजन्यत्वात् ॥ पौरुषेयवाक्यस्य च प्रत्यक्षादिविलक्षणप्रामाण्यासिद्ध्या अ

द्वैतवादिभिरनभ्युपगमाच्च न तस्य भेदनिषेधश्रुतितुल्ययोगक्षेमता न च प्रत्यक्षेण भेदाभवनीतिदशायामनुमानात् भेद

धेयवाक्याद्यभेदज्ञमद्गितिवाच्यं जीवपरपदार्थद्वयज्ञाने सति तद्भेदज्ञानस्यापि दोषदर्शनवशादुत्पत्तेः पदार्थद्व
यज्ञानाभावे अभेदानुमितिशाब्दादेरनुदयात् सर्गप्रलययोरंगीकारेण पौरुषेयवाक्यस्यानुमानप्रवाहस्याविच्छिन्नत्वा
त् सर्गाद्यकालीनभ्रमासंभवाच्च न च जीवभेदाभिधेयश्रुतेर्जीवपराभेदे तात्पर्यभ्रमाद्द्वैतप्रसिद्धिः अनुपस्थिते प्रमाणां
तराभिलेयाअभेदे तत्र श्रुतितात्पर्यभ्रमासंभवात् श्रुतिप्रमितेतन्निषेधायोगात् ॥ ननु दृश्यपूर्वं मन्यमानापरिछिन्नत्वा
दाविव श्रुतितात्पर्याज्ञानेन तथैकआकुरसदेवेदमग्रआसीदित्यादावपि नादिकुसमयेन वा देहेन्द्रियादीन् प्रतिस्यात्-
अनूपस्यैश्वर्यस्य सर्वैरपि स्वात्मन्यभिमन्यमानत्वेन प्रत्यक्षेणाप्यैक्यस्य प्रसक्तिरिति तन्न ॥ तात्पर्यनिर्णायकैरुप
क्रमादिलिंगैरैक्यतात्पर्यस्य प्रमितत्वेन भ्रमसंभवत्वस्याकरेष्वपस्थापितत्वेन च तात्पर्याज्ञानकुसमयप्रमासत्वस्यम-
कुप्रशक्यत्वात् ऐक्यलिंगस्याभिमानिकस्याभावेन तेन भ्रमसकस्यनिषेधायोगाच्च देहेन्द्रियादीनां जीवैक्येनाध्यस्तत्वात्
तान् प्रतिस्यात्माभिमानस्य सार्वलौकिकस्यच कुप्रशक्यत्वात् यत्किंचित् प्रतिस्यात्माभ्यस्यैश्वर्यलक्षणत्वासंभवाच्च ॥
ननु यत्किंचित् प्रत्यपि स्यात्माभ्यनं जीवस्येति तदपीशलक्षणभेद [illegible]
वस्तु स्वाभिन्नस्येशस्याधीन एव तत्पारतन्त्र्याभिन्नस्य स्यात् अनूप [illegible]
तिवाच्यं ॥ स्वतानत्तुगमात् ईशोहितदन्याधीनत्वघटितमेव स्यात् [illegible] ॥ किं
जीवे यत्किंचित् प्रत्येव स्यात्माभ्यवाच्यं तदपि नेशस्वरूपस्य [illegible]

धकत्वे स्थापितेपि तस्माददैतप्रसिद्धये मूलान्तराभावान्नान्योतोस्ति द्रष्टेत्यपि श्रुतिः साक्षात्प्रभेदनिषेधको भूद्रष्टेति
नाद्वैतश्रुतिरनुवादः किंच प्रमाणासिद्धस्यैवानुवाद इति वदतः कथमद्वैतप्रमाणं भेदादावद्वैतिमतद्वयतत्प्रत्यक्षादिक
प्रमाणाप्रसरात् तदंशे तात्त्विकप्रमाणविषयत्वस्यैव वक्तव्यत्वात् न च निषेधार्थत्वात्प्रमाणानपेक्षेति वाच्यं प्रेक्षावतः क्व-
चित्प्रमितस्यैवान्यत्र निषेधात् जीवेश्वरभेदस्यान्यत्राप्रमितत्वात् ॥ न चैवमसदेवेदमग्र आसीदिति असद्वादो न स्यात्-
प्रपंचसत्यताग्राहिप्रत्यक्षविरोधेन तद्भावानुपपत्तेः अतस्तत्प्रसिद्धिरपि श्रुतिमूलैव स्यादिति वाच्यं ॥ असद्वादिना श्रुतिप्रा-
माण्यानभ्युपगमात् उत्पत्तेः पूर्वं कार्यमसदेवान्यथोत्पत्त्ययोगादित्यादितर्काभासप्रसिद्धस्यासतोनुवादसंभवात् न च प्रत्य-
क्षविरोधोपि तस्येदानीं तत्प्रपंचसत्यताग्राहिणः भिन्नविषयत्वात् तस्मान्न द्रष्टृभेदश्रुतिर्भेदश्रुतिशेषा यथा नापि द्रष्टृभेदो-
पासनार्थो अन्तर्याम्यक्षरब्राह्मणयोरुपासीतेत्यादिविध्यश्रवणात् कल्पकाभवतीत्यश्रवस्य स्यादनूद्यमानप्रमेयपरत्वे
संभवति न हि रुत्वा श्रुतार्थकल्पना याऽन्याय्यत्वात् ॥ अमय आत्मानि तिष्ठन्नात्मानमंतरो यमयति एष त आत्मेत्यादिवा-
क्येन नियंतृनियंतव्यत्वादिना ईश्वरजीवयोर्भेदप्रतीतेस्तत्सन्निधानान्नान्योतोस्ति द्रष्टेत्यादिवाक्यं तदविरोधेनात-
अन्तर्यामिणः सकाशात् तत्सजातीयोन्यो द्रष्टा नास्तीत्येवमर्थकतया व्याख्येयं न च तत्सजातीय इति मध्ये पूरणमयुक्तमयुक्तं
न चास्य पाठानामश्रयवाचिनां द्रष्टादिशब्दानां मंत्रश्रीमद्रष्टृपरत्वमिति वाच्यं ॥ सजातीय इत्यस्यानभिव्युक्तमन्यसरणाधि-
करणे तथाध्याहारे गतिरितिव्युत्पत्तिसिद्धत्वात् यथा सिंह इव नायमितीय वाहू पदितं वाच्यां सिंहान्यां सिंहसदृशोपपत्ति

तथानभ्युक्तमप्यङ्गस्य आनयेत्यादिवाक्यमप्यान्यअभ्यस द्रव्यं स्पृशेत्पश्चात्तीतास्य ज्ञोकमपि अस्मात् कस्मूपदं चान्यपर
स्याप्युपलक्षणं लौकिकव्युत्पत्तेस्तथा । घटतुल्यत्वात् ग्राह्यणा द्रव्यमानयेत्यादौ केन घटादिवाचीपदेनापि द्रव्यतस्य द्रव्याः स्वानि
ब्रादिरेयेत्यस्य सर्वलौकसिद्धत्वात् नापि द्रष्ट्रादिपदासांगत्यं पश्यत्यन्य चक्षुः सम्भुणोत्यन्य कर्णः इत्यादिप्रयोगात् रूपादिसाक्षा
त्कारवाचिन एव हृद्‍इत्यादि धातवः इति ते ष्वां तादृशसाक्षात्कारान्यपरत्वे : अंगत्यभावादिति चेद्दत्त्वं वदंति ॥ नचिवेति ना-
न्यः नसर्वथ प्रवर्तते किंतु यत्रापर आनयेत्यादौ विशिष्यानिर्देशात् किंनद्रव्यभिन्नमित्याकांक्षा यायामिति योगि सम्पर्कोणाप
देनतत्सद्भावोपस्थित्या न देवान्यत्वेन निर्णायिते तत्रैव न त्रुप्रगापि शेष्यस्यानिर्देशेन निराकांक्षितान नापि अनीतं घटमानय
येत्यादौ तद्प्रवृत्तेः प्रकृते च नान्यो तोऽस्ति द्रष्टेत्यादौ द्रष्ट्रादिपदैर्विशेष्यस्यानिर्देशान्न तदाकांक्षेति श्रुतिसंकोचकृतमान
त्वादृशोन्यायः कुलधर्म इत्येवाम्पिशुशुकः नापि द्रष्ट्रादिपदानां रूपसाक्षात्कारत्वमात्रनिमित्तकत्वेनजीवेश्वरसाधारण
त्वं येन तद्‍विशेष्यानिर्देशोपि तद्विशेषाकांक्षायां [illegible]
न्यतमञ्च्छेदकजातिविशेष एव प्रवृत्तिनिमित्तं न रूप [illegible]
प्रयोगासामंजस्यप्रसंगाच्च दर्शनायन्नस्तुः चक्षुर्भ्यद्रष्टव्यं [illegible]
येतिप्रसंगात् ॥ नचैवं सति पश्यत्यन्य चक्षुः सम्भुणोत्य [illegible]
प्रभेजवचनादिवाद्धस्यनतत्पदार्थभासादिमात्रपरत्वे न [illegible]

णत्वोपपत्तेः चक्षुराद्यभावेऽपि दर्शनमस्त्यश्रुतमिवेति वक्तुं प्रवृत्ताया एतच्छ्रुतेः जातिविशेषस्य द्रष्ट्रादेः अभावाभिप्रायेणाभिहि
तमित्यस्यैव तात्पर्याच्च ॥ आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति श्रुतिर्नैतत्प्रतिपादिका ॥ आत्म
नो वा दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितमिति श्रुतिमतिप्रतिपादितानां वा दर्शनादीनां ग्रहणं न्याय्यं शब्दक्रमसंख्यामत्य
भिज्ञानात् ते च जीवधर्मा एवेति द्रष्ट्रादिशब्दैर्जीवस्यैवाभिधेयस्य समर्पितत्वात् प्रकृतादन्तर्यामिणः सकाशात् द्रष्टृ-
रूपो जीवोऽन्यो नास्तीत्येव प्रतीयते न तु तत्सजातीयोऽन्यो द्रष्टा नास्तीति अस्तु वा यथा कथंचित् तच्च नाभिधेयमिति न्यायप्रवृ
त्त्या तदन्यवत्सजातीयस्य द्रष्ट्रादिशब्दैरुपस्थितिः तथापि तदान्ये अतोऽन्तर्यामिणः सकाशात् न तत्सजातीयो द्रष्टा नास्ती
ति जीवेश्वरयोर्भेदमादाय वाक्यार्थवर्णनमसंगतमेव ॥ न चाहि किमत्र साजात्यं यथा कथंचित् जीवेश्वरसाधारणरूपे-
णोत ईश्वरासाधारणरूपेण नाद्यः तथा सति जीवस्यापि परमात्मसदृशात् तथा द्रष्ट्रादिशब्दैरुपस्थितेर्जीव एवान्तर्यामि
भेदो निषिध्यत इति पर्यवसानात् तस्मात् सिद्धः न द्वितीयः तथान्तर्यामिणा सजातीयस्याप्रसक्ततया तन्निषेधा
योगात् एतेन नान्योऽतोऽस्ति श्रोतेति वाक्यमीश्वरान्तरनिषेधकत्वं निरस्तं ईश्वरभेदस्येश्वरनानात्वरूपस्याप्रसक्तेः न च क्षि
त्यादिकमनेककर्तृकं विचित्रकार्यत्वात् प्रासादादिवत् इत्यनुमानेनेश्वरनानात्वप्रसक्तौ तन्निषेधतीति वक्तुं युक्तं पृथिव्या
देः स्वतन्त्रनानेश्वरकर्तृकत्वे एकस्य सर्जनेच्छायामेकस्य संहारेच्छायामेकस्य पालनेच्छायां जगदुच्छेदप्रसंगः असर्वज्ञ-
नानाशिल्पिकर्तृकप्रासादादिदृष्टान्तेन नानाकर्तृकत्वसाधने असर्वज्ञनानाकर्तृणामेव सिध्या तेषामीश्वरत्वासिद्धिरि-

[illegible] देरा ऽकबाधितत्वात् ॥ कामाद्यनात्वनानापेक्षेति सूत्रेऽनुमानस्य कामचारत्वेन ह्यपि विषये ऽप्रमाणत्वस्य च स्थापकत्वात्व-
[illegible] त्वानुमानिकेश्वरनानात्वस्य सदके पंकुशराक्यत्वात् ज्ञौपनिषदत्वस्य प्रमाणादेको देवः सर्वभूतेषु गूढ इत्येकत्वप्रमाणा-
[illegible] ह्यानुमानस्य श्रुतिबाधितत्वाच्च अस्तु शाकपंचितृप्रसक्तिः स्वयापि अन्नादीनां पंचानामपि ब्रह्मत्वं पदत्वात्पाञ्च
[illegible] ः श्रुतेरीश्वरनानात्वनिषेधफलत्वं न पर्युदास्यं किं त्वस्याः श्रुतेः परमात्मभेदनिषेधफलेनान्योऽतोऽस्ति द्रष्टेत्येतावन्मात्रेण
[illegible] स्यानान्योऽतोऽस्ति श्रोतेत्यादिकं निरर्थकमेव स्यात् असंगतमेव च स्यात् परमात्मनः नित्यज्ञानाश्रयस्य तद्रूपस्य श्रा
[illegible] त्रादिजन्यज्ञानाश्रयत्वरूपश्रोतृत्वाद्ययोगात् ॥ मच्चनान्योऽतोऽस्तीत्यादिवाक्यस्य जीवेश्वरभेदनिषेधकत्वे
[illegible] आत्मनि तिष्ठन्नित्यादिनानिर्यंतृनियंतव्यत्वादिना भेदव्यपदेशः एष त आत्मेति भेदव्यपदेशश्चानुपपन्न इति वाच्यं ॥
[illegible] आत्मनीत्यत्र श्रुत्याख्यानानिर्दिष्टः योपि ज्ञानेति तिष्ठन्नित्यात्मनान्तःकरणस्य [illegible] ज्ञानोपाधिकस्याभिधानात्
अज्ञापितस्यैवात्मशब्देन निर्देशइत्यभ्युपगमात् सत्यं [illegible]
[illegible] पिस्तुत्यनूपेण तद्भेदबाधकाभावात् एष त आत्मेति [illegible]
[illegible] योऽतोऽस्तीत्यभेदधीः भ्रान्तिमतीतजीवेशाभेदमेवाप्र [illegible] ॥ [illegible]
[illegible] कोभेदस्य तद्विरोधो भगवतः सकलस्वामित्वेनैव [illegible]
[illegible] द्वहि पिबन्तं भगवानिवेतरोऽप्य लोकगतस्थाननिरोध [illegible] ॥ नान्यो

वोऽजीवभिन्नजीवे वृथक्भेदनिषेधकनिरवकाशाश्रुतिविरोधेनाद्वैतश्रुतेरक्षयातात्पर्यवर्णनायोगात् इदं हि विश्वं भगवानिव
रोऽत्स्येतरद्विश्वं भगवानितिपः स्थाणुः सपुमान् यदूजनमभात्वाश्रुत्कैरिति वत्वाधाया नप्युपपन्नं सामानाधिकर
ण्यं नत्वदुक्तार्थगमकमित्याकरेस्पष्टत्वात् ॥ यत्तु भेदः पारमार्थिक एव सत्य आत्मा सत्योजीवः सत्यंभिदा सत्यंभिदा
इतिश्रुतेरिति ॥ तन्नकेचिन्नक्षमंते ॥ मासिसत्यात्मानव गमाद्य्याः श्रुतित्वएवाविमतिपत्तेः अस्तु वाश्रुतित्वं
तथापि नान्योतोस्तीत्याद्यनवकाशश्रुतिविरोधेननिषेधापेक्षितसत्यत्वेन मतीतव्यावहारिकभेदानुवादपरत्वेन तच्छे
षतया स्वार्थपरत्वाभावात् अभेदश्रुतेर्व्यावहारिकभेदविषयत्वासंभवात् मास्तु वास्याः श्रुतेरभेदश्रुतिशेषत्वं तथा-
पि भेदभिषेधश्रुत्याविरोधायास्याभेदनिषेधपरत्वमेवास्तु ॥ तथाहि सत्य आत्मेति आत्मनस्त्रिकालाबाध्यत्वमाह किंत
द्विजीवत्वमपिपास्त्वं नेत्याह असत्योजीव इतिभावप्रधानोनिर्देशः जीवत्वमिति यावत् विशिष्टनिषेधस्यविशेष्यवा
धेविशेषणेप्रसंक्रमात् द्विविधेपदविभागेसंभवत्यपिबहुभेदश्रुतिवाक्यानुरोधेनोक्तन्यायेनचाभासत्यइतिपदच्छे
दएवोचितः ॥ एवं सजातीयभेदंनिराकृत्यविजातीयभेदंनिराकरोति सत्यंभिदा सत्यंभिदेति सत्यशब्देन पंचभूतात्म
कंजगत् भतिपाद्यते सच्चत्यच्चाभवदिति श्रुतेः तत्रसदिति पृथिव्यप्तेजांसित्यदिति वाय्वाकाशौ तदेवभिद्यत इति भि-
दा असत्यमभिवचनीयं तस्यदाढ्यायपुनरुक्तिः भिदाः सत्यंभिदेति काकाक्षिगोलकन्यायेनासत्यमित्यस्योभयत्रा-
नुषंगः स्मृतिरपिभेदमपवदति विभेदजनकेज्ञानेनाशमात्यंतिकंगते आत्मनोब्रह्मणोभेदमसंतंकः करिष्यतीति ·

द्वा सुपर्णा इत्यादिश्रुतीनामपि भेदपरत्वं निरस्तं प्राक् आकरे चातिविस्तरेणोति दिक् ॥ श्रीमत्शंकरपादाब्जभूषणे परदूषणे ॥ आनंदमयसित्थांते राघवाचार्यसूरिणां ॥ शिष्यस्य रघुनाथस्य कृतिर्भवतु सन्मुदे ॥ अनयातुष्टिमायातु श्रीपतिः श्रीपतिः स्वराट् ॥ श्रीरस्तु शुभं भवतु ॥

श्रीगणेशाय नमः ॥ अंतस्तद्धर्मोपदेशात् सविशेषब्रह्मनिरूपणस्य यथाशास्त्रादिसंगतिस्तथा भागे वोक्ता मानंदम-
याधिकरणोपक्रमे ॥ पूर्वाधिकरणे बहुभिः प्राधान्यलिंगैरेकमप्राधान्यद्योतकं पुच्छपदमिवेह बहुभिरनीश्वरधर्मैः सर्वपा-
प्मोदितत्वं यथाकथंचिद्व्याख्येयमिति मत्वा परस्थानादनंतरसंगतिः इदमाम्नायते य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्य-
ते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात् सर्व एव सुवर्णस्तस्य यथा कप्यासं पुंडरीकमेवमक्षिणी तस्योदिति नाम स एष
सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेत्याधिदैवतमथाध्यात्मं य एषोंतरक्षिणी पुरुषो दृश्यते इत्या-
दि आप्रणखात् प्रणखो नखाग्रं तदभिव्याप्य तस्य यथा कप्यासं पुंडरिकमित्यत्र कप्यासशब्दः लक्षणया तत्सदृशपरः-
आस्ते उपविशत्यनेनेत्यासः पश्चाद्भागः कपेर्मर्कटस्यासः गुदभागस्तत्सदृशं रक्तवर्णमिति पर्यवसितोर्थः पुंडरिकं प-
द्मं यथा एवं तस्य मंडलांतर्वर्तिनः पुरुषस्याक्षिणी इति छांदोग्यभाष्ये श्रीमच्छंकरभगवत्पादैरर्थो वर्णितः अन्यैस्तु अस्मिन्नर्थे-
कप्यासपदे लक्षणा कप्यासपदस्योक्तत्वात् मर्कटगुदपरत्वे हीनोपमानं स्यात् अतः अर्थांतरेण कप्यासशब्देन पुंडरी-
के रक्तत्वलाभेन पुंडरीकस्थितां सोज्ज्वलामिति कोशादेवन नविरोधश्च स्यादिति मत्वा कं जलं पिबतीति कपिः सूर्यस्तेनासितं-
विकसितं कप्यासं यद्वा कं जलं पिबतीति कपिः पद्मनालस्तत्रास्ते इति कप्यासं यद्वा कं पिबतीति कपयस्तास्मिन् कपिस-
लस्य। अलुक्समासे कप्यासं यद्वा कंप्यास्ते इति कप्यासमिति पुंडरीकविशेषणे बह्वोऽप्यन्ये योजनाः दर्शिताः तत्राचार्य-
पादाः भाष्ये यो वर्णितस्तदनुयायिभिः योगाद्रूढिर्बलीयसीति न्यायेन कपिशब्दस्य [illegible] दयर्थग्रहणसंभवे योगाश्रय

पं नव्याख्यं आसशब्दश्च सर्वेषु पक्षेषु यौगिक एव यद्यपि कपिशब्दस्य सूर्यपरत्वे कप्यासशब्दो लाक्षणिकस्तथापि रू-
ढिपूर्वकलक्षणापेक्षया यौगिकार्थग्रहणं जघन्यं योगमपेक्ष्य रूढेः शीघ्रोपस्थितिकत्वेन न न्यूनलक्षणाया अपि शीघ्रोप-
स्थितिकत्वात्॥ अपि च कपिशब्दस्यादित्यपरत्वे योगोऽतिक्लिष्ट एव कं पिबतीत्यस्य आदित्ये मुख्यजलपानस्याभावात्-
आदित्यकिरणसंपर्काज्जलं शुष्यतीत्येतावन्मात्रम्[illegible] आदित्यकिरणानां जलग्रहीतृत्वमुपचरणीयं जलग्राहकांगा-
रकत्वे चादित्यकिरणानां जलादर्शनप्रयोजकत्वसाम्यात् तस्मिन्नौपचारिके ग्रहणे अथ पीतांबुन्यायेन पानत्वमारो-
प्यकिरणकर्तृके आदित्यकर्तृकता अध्यवसानीया एवं कपिशब्देनादित्योक्तिः क्लिष्टगत्या सुसाधता हि कसितत्वमपि पद्मानां
कृतो नैष व्याख्येयं न हि रात्रौ मुकुलितानि पद्मानि पुनः प्रातः सूर्यो विकासयति किंतु किंचित्कालं मुकुलितानि विका-
वस्थां भासानि न पुनर्मुकुलितानि भवंति अत एव काननमात्रे सिंहशार्दूलादि नदीमात्रे हंसचक्रवाकादि नगरमात्रे अ-
त्युच्चगोपुरप्रासादादिकीर्तौ यावत्यं प्रतापेडोहित्यं चंद्रोदयमात्रे कुमुदविकासः दिवा सूर्यकृतः पद्मविकास इति कृ-
विसमयहत्वाद्वंकारिकैरुक्तं रात्रौ मुकुलितानां दिवा विकासः पद्मानामिति नियमो[illegible] न सू-
कृतः सूर्यस्य सर्वदा सत्त्वेन सर्वदा विकासापत्तेस्तत्र कालोपलक्षितः सूर्यस्य [illegible] इत्युक्तं॥ अत एव-
शमाथणे कविप्रौढोक्तिः किं च दिवागाढांधकारं प्रस्तुत्य निरीयमाणो [illegible]
तो संज्ञायते रविरिति कालकृतावेव विकाससंकोचौ प्रतिपादितौ एव [illegible]

स्तुनालस्यजलग्रहणकर्तृतास्त्येव ग्रहणेपानरूपमात्रमुपचरणीयं आसनाद्वेनकेनाडीन नातिकुष्ठापेतो कृष्णे-
प्यास्त इति तुरीययोगस्याशंक्यैवं तथापि सर्वेष्वेतेषु योगेषु कुत्राद्वेनाप्रसिद्धं जलंगमाद्यामिति निहतार्थत्वदोषो दुष्टे
आद्येषु त्रिषु रूपित्राद्वेन सूर्योनालोपायाद्यः इति निहतार्थत्वमस्त्येव श्लेषयमकादिप्रयोजनं विनाप्रसिद्धार्थप्रयोगे
निहतार्थत्वं तद्द्वयावाचकत्वमप्युच्यते अलंकारिकैरपि चाद्ययोगे भगपदाश्रयीभूते आदित्ये अमंगलरूपित्राद्वः प्रयुक्त
इत्यश्लीलत्वमपि दोषः द्वितीयतृतीययोर्योगयोर्नैव दृष्टांतभूतपुंडरीकेन दाश्रयेन रूपित्राद्वः प्रयुक्त इत्यश्लीलत्वम
विवक्षितामंगलव्रीडाद्यपि श्लेषयमकादिप्रयोजनं विनार्थप्रत्यायकत्वं पदस्याश्लीलत्वमिति तल्लक्षणात् अपि चा
स्मत्पक्षे न हीनोपमा हीनोपमानचक्षुरुपमान पुंडरीकोपमानत्वमात्रेण चक्षुषि हीनोपमाऽप्रसक्तेः कवयो हि वर्ण्य
मान एव हीनोपमानं प्रयुंजते यथा महामहानीलशिलारुचः पुरो निषादवान् कंसकृषः स विद्रवैरश्रितोदयाद्रेरभिसा
यमुच्चकैरनूनुरत्रंद्रमसोभिरामतामिति माघकाव्ये इंदूदयाश्रयान्वाभिमुखः सायंकालो वर्ण्यमानस्तस्य श्रीकृष्णस्यो
पमानत्वेन निबद्धः ननु सायंकालस्यत्वमस्ति तथापि न हीनत्वमनादिकविसमयस्वीकृतत्वादिति चेन्नवर्ण्यनादिवेदस्वी
कृतत्वान्मर्कटपश्वाद्यागस्यापि न हीनत्वमपि च कप्यासनाद्वेन रक्तिम्नः पुंडरीकविशेषणत्वासिद्धौ तादृशपुंडरीको
पमितं चक्षुररुणमिति सिध्यति न ह्यादित्यांतर्वर्तिपुरुषस्य यज्ञदर्गानाहृतोर्णवाद्दीप्यमानः सलिलस्थमध्यात्सभा
वृषभोद्भोद्धितास्तः सूर्योपि पश्चिन्मनसा पुनातीति मंत्रानुमतं न च पुंडरीकं सितांभोजमिति कोशविरुद्धत्वात् पुंडरी

कपदस्य न पद्ममात्रपरत्वं रक्तपद्मपरत्वं वा किंतु सिताम्भोजपरत्वमिति शंक्यं अनेकवृद्धव्यवहारविरुद्धस्य कोशव
चनस्याप्रमाणत्वात् शाबरे भाष्ये मौञ्जं चरुं निर्वपेत् श्रीकाम इति वाक्यविहितायामिष्टौ पुंडरीकाणि बर्हींषि भवंतीति
बर्हिःस्थाने पुंडरीकाणां विधानेन तत्र प्रकृतितः प्राप्ते दर्भैः स्तृणीत हरितैरिति मंत्रे दर्भपदस्थाने पुंडरीकपदवत् हरितप
दस्थाने रक्तपदोहः कर्तव्य इत्युक्तं आकाशात् पीतसितपुंडरीकमिति महाकविप्रयोगे पद्मत्वसामान्यमादायैव पुंडरी
कशब्दः प्रयुक्तः अन्यथा सितेति विशेषणवैयर्थ्यापत्तेः महापुरुषनेत्रोपमानुपपत्तेश्च पाणिपादतलनखनेत्रान्ततालु
जिह्वाधराणां समानां रक्तिमा हि महापुरुषलक्षणमिति सामुद्रिकशास्त्रविदः वदंति अतउपजीव्यप्रयोगविरोधे कोश
वचनमप्रामाणिकमेवेति अन्तः आदित्याक्ष्णोरंतः स्थत्वेन प्रतीयमानः विद्याकर्मातिशयवशात् प्राप्तोत्कर्षः कश्चिदादित्यपु
रुषरूपदेवताविशेषरूपो जीवः स्यादाहोस्वित् परमात्मेति संशयः ऐश्वर्यमर्यादाधारत्वरूपवत्त्वाद्यनीश्वरधर्माणां स-
र्वपाप्मोदितत्वादीश्वरधर्माणां चवशावशानवधारणात् तत्र आदित्याद्यंतःस्थः तावत् न परमेश्वरो भवितुमर्हति य एषोंत
रादित्य इत्याधारश्रवणात् अपरिच्छिन्नस्य स्वमहिमप्रतिष्ठितस्य निराधारस्य च तस्याधारायोगात् स्वे महिम्नि प्रतिष्ठित
इति श्रुतेः स एष ये चामुष्मात् पराञ्चो लोकास्तेषां चेष्टे देवकामानामिति ऐश्वर्यमर्यादाश्रवणाच्च एष सर्वेश्वर इति श्रुत्या पर
मेश्वरस्य निरंकुशैश्वर्यावगतेः हिरण्यश्मश्रुरिति रूपश्रवणाच्च अशब्दमस्पर्शमरूपमव्ययमिति श्रुत्या ब्रह्मणो नीरूप
त्वश्रवणादेवमक्षिस्थोपि न परमेश्वरः चक्षुषीत्याधारश्रवणात् ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां चे

त्वैश्वर्यमर्यादाश्रवणात् तस्यैतस्य तदेव रूपं यदमुष्य रूपमित्यतिदेशेनाक्षिस्थेऽपि रूपवत्त्वश्रवणादादित्यपुरुषरूपदेवता
त्माजीव एवेहांतस्थ इति मतिप्रत्तुं प्रयुक्तं नादेशाज्जीवविशेषस्य विद्याकर्मातिशयवशात् भासोत्कर्षस्य सर्वमेतद्युक्तमिति
पूर्वपक्षे सिद्धांतः ॥ अंतस्तद्धर्मोपदेशादिति सूत्रे ॥ अंतरिति शब्दः आदित्ये अक्षिणि चांतर्दृश्यमानपुरुषोपस्थापकः आ
धिकारिकब्रह्मपदं चात्र संबध्यते आदित्यांतस्थस्तावत्परमेश्वर एव तस्य परस्य ब्रह्मणो ये धर्मा य आत्माऽपहतपाप्मा इदं
सर्वं यदयमात्मेत्यादिश्रुत्यंतरे परमात्मधर्मत्वेनावगताः सर्वपाप्मोदितत्वसार्वात्म्यादयस्तेषामुपदेशात् तथाहि तस्यो
दिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेतीति सर्वपाप्मोदितत्वस्य तस्यर्क् च साम च गेष्णावित्यृक्सामयोरिंद्रादि-
स्तावकयोस्तत्स्तुतिसाधनत्वेनोक्त्या तदैंद्राद्यात्मकत्वोपलक्षितसार्वात्म्यस्य निरंकुशसर्वलोककामेशितृत्वस्य च परमा
त्मन्येव संभवात् एवमक्षिस्थोऽपि परमेश्वर एव तत्रापि यन्नाम तन्नाम यावमुष्य गेष्णौ तौ गेष्णाविति सर्वपाप्मोदि
तत्वप्रवृत्तिनिमित्तोन्नामातिदेशेन सैव ऋक् तदुक्थं तद्यजुरित्युक्त्या विधेयाभिमायंत्र्यौक्थिंगादिकं तद्य इमे वीणायां गा
यंत्येतमेव ते गायंतीत्यनेन लौकिकगीतिगेयत्वोक्त्या च सर्वपाप्मोदितत्वेंद्राद्यात्मकत्वर्ग्यजुरात्मकत्वलौकिकगीतिगे
यराजाद्यात्मकत्वोपलक्षितसार्वात्म्यरूपधर्मोपदेशात् स एष ये चैतस्मादर्वांचो लोकास्तेषां चेष्टे मनुष्यकामानां चेति नि
रंकुशलोककामेशितृत्वश्रवणाच्च तेषां धर्माणां सर्वकारणत्वात् सर्वात्मनः परमेश्वर एव संभवात् रूपवत्त्वादिकं च स्या
त् परमेश्वरस्यापीच्छावशात् मायामयं दिव्यं रूपं साधकानुग्रहार्थं मायाह्येषा मया सृष्टा यन्मां पश्यसि नारद सर्वभूतगुणै

युक्तं नैवं मां द्रष्टुमर्हसीति स्मरणात् अपि च यन्निरस्तसमस्ताविशेषं पारमेश्वरं रूपमुपदिश्यते भवति तत्र शास्त्रमनूपम
सर्वामित्यादिकारणत्वात् क्षुधिकारधर्मैरपि कैश्चित् विशिष्टः परमेश्वरः उपास्यत्वेन निर्दिश्यते सर्वकर्मा सर्वकामः इत्यादि
भात याहिरण्यश्मश्रुरित्यादिनिर्देशोपि भविष्यतीत्यादिश्रीमध्वाख्योक्तदिशा उपास्ये ब्रह्मण्यपि संभवतीति ॥ ननु रूप
स्थादीनि जीवलिंगानि मध्वाख्योक्तदिशा यथाकथंचिन्नेयानीति भवतु युक्तं तुल्यवच्छ्रुतानां जीवब्रह्मलिंगानामेकानुरोधे
नान्यस्य नयने नियामकाभावात् ॥ न च निरवकाशत्वं नियामकं जीवेपि परमात्मलिंगानां यथाकथंचिद्योजयितुं श-
क्यत्वात् सर्वपाप्मोदितत्वं तावत् आदित्यमंडलाभिमानिनि जीवेपि नेतुं शक्यं देवानां पुण्यसंबंधे सत्यपि न ह वै देवान्पा
पं गच्छतीति श्रुतिपर्यालोचनेन पापासंबंधस्य वक्तुं शक्यत्वात् ॥ न चेंद्रादीनां वृत्रवधादिना पापश्रवणात् उक्तश्रुतिः-
पापफलाभावाभिप्रायेणेति वाच्यं तथा सत्यनोदितस्य सर्वपाप्मोदितत्वस्यापि तद्दुःखाभिप्रायेण नेतुं शक्यत्वात्
जीवपरत्वेपि बाधकाभावात् न चादित्यादिः स्वस्य परमेश्वरत्वमभ्युपेत्य सर्वपाप्मोदितत्वस्य यथाश्रुतस्यैव नेतुं शक्य
तयोः कार्यैलक्षणाकल्पनं निर्युक्तिकं एवं तात्पर्यलिंगांतर्गतं फलवचनमुदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेति सर्वपा
प्मोदयनरूपे गुणे श्रूयते तथा च सर्वपाप्मोदयस्य निरंकुशस्य फलतया प्रतिपादनात् तत्क्रतुन्यायेन गुणभूतं सर्वपाप्मो
दितत्वं निरंकुशमेव भविष्यति तथा च तात्पर्यलिंगोपबृंहितस्यान्यथा कथंचिन्नयनमनुचितमिति वाच्यं हिरण्य
श्मश्रुत्वादिविशिष्टशरीरसंबंधविरोधात् रमणीयचरणा रमणीयां योनिमापद्यंते कपूयचरणाः कपूयां योनिमापद्यं

तेन "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः" इति श्रुतिपर्यालोचनेन शारीरमा-
त्रस्य पुण्यपापलक्षणसंबंधापादकत्वावगमात् ॥ न चोक्तबन्धलिङ्गेन तस्येश्वरत्वसिद्धौ तस्य सशरीरत्वावगतौ "न ह वै सश-
रीरस्य" इत्यादेः स्वकर्मार्जितशरीरपरत्वं कल्पनीयमिति वाच्यं ॥ एवमपि प्रियाप्रियसंबंधव्याप्त्या तस्मिन् शारीरत्वस्यापच्छेदक-
त्वेनावधिभूतिरूपोपपत्तिरूपतात्पर्यलिंगसचिवात् "न ह वै सशरीरस्य" इत्यादिश्रुतेरन्यथानयनेन नियामककामावा-
प्तसमर्थादैश्वर्यप्रतिपादनमपि व्यवस्थितनिर्देशोपपत्तिसयुक्तं "स एष ये चामुष्मात्पराञ्चो लोकास्तांश्चाप्नोति देवकामां-
श्चाथानेनैव ये चामुष्मादर्वाञ्चो लोकाः तांश्चाप्नोति मनुष्यकामांश्च" इति न तत्क्रतुन्यायेन व्यवस्थितफलनिर्देशानुपपत्तिसु-
क्तं कथमिवेश्वरस्याख्यातुं शक्यं ॥ तथा च प्रबलानेकजीवलिंगानुसारेण सर्वपाप्मोदय एव यथाकथंचित् व्याख्येयः अ-
पि चोदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेति फलवचनानुसारेणैव सर्वपाप्मोदयः संकुचितोऽवगम्यते फलवाक्ये हि जीव-
गत एव सर्वपाप्मोदयः प्रतिपाद्यते न च जीवे निरंकुशः सर्वपाप्मोदयः संभवति ॥ अपि चादित्यमण्डलाभिमानिन्या देवतायाः
जीवन्मुक्तायाः प्रारब्धमात्रशेषाशेषपापविलये ज्ञानाग्निदग्धनिखिलापत्तान्त्याः प्रारब्धं तु अधिकारमात्रोपयोगित्व-
मस्त्येव ॥ तथा च तत्र निरंकुशसर्वपाप्मोदयस्यापि सत्त्वात् नानेन धर्मेण परमेश्वरत्वनिर्णयः संभवति ऋगाद्यात्मत्वं तु
आदित्यमण्डलस्थपुरुषस्यापि संभवति तैत्तिरीयके "आदित्यो वा एष मण्डलं तपति" इत्युपक्रम्य मण्डलतदर्चिस्तदन्तर्वर्तिपुरु-
षाणां ऋगाद्यात्मत्वक्रमेण निरूप्य सेषा त्रय्येव विद्या तपतीत्युपसंहारात् दृशात्मत्वं तु परमेश्वरस्यापि न पारमेश्वररूपेण संभवतीत्युक्तमेवैतत्

त्मनाऽभेदस्तु देवतापक्षेपि योजयितुं शक्यः निरंकुशैश्वर्यं तु न श्रूयते ॥ तथा च कथमनुपरमेश्वरनिर्णय इति चेदुच्यते ॥
जीवन्मुक्तेपि न सर्वपाप्मोदयः निरंकुशः संभवति कर्मार्जितशरीरस्याप्रियसंबंधनियमस्य श्रुतिसिद्धत्वात् ॥ न च तर्हि शरी
रमात्रस्यैव तन्नियमोस्तु लाघवसहकृतोक्तश्रुतेरिति वाच्यं ॥ फलवचनरूपतात्पर्यलिंगापेक्षया निरंकुशसर्वपाप्मोदयबो
धकयोक्तश्रुत्या य आत्माऽपहतपाप्मेत्यादिश्रुतावीश्वरधर्मत्वेन प्रसिद्धस्य सर्वपाप्मोदयस्येहावगमादीश्वरत्वे निर्णीतेन
च सशरीरत्वस्यापि श्रुत्या प्रतीयमानतयोक्तनियमे कर्मजन्यत्वस्य शरीरविशेषणस्यावश्यकतया वैदिकफलवचनरूप
तात्पर्यलिंगमपेक्ष्य लाघवस्य लौकिकोपपत्तिरूपतया दुर्बलत्वाच्च न प्रागुक्तो विनिगमकाभावः ॥ एवं रमणीयेत्यादिश्रुति
रपि जीवविषयैव व्याख्येया न च फलवचनानुसारेणैव सर्वपाप्मोदयः संकोचनीयः इति युक्तं कर्मयुक्तिमादाय जीवेपि स
र्वपाप्मोदयस्य निरंकुशत्वात् वृक्षापादानकं शकुनोद्भवनमिव पाप्मापादानकं जीवोद्भवनं तु बाधितं पाप्मनाममूर्तत्वाद्वि-
शेषावधित्वायोगात् ॥ तथा च वृक्षादुद्भूतः पक्षी सर्वात्मना वृक्षासंस्पृष्टो भवति तथा जीवोपि पापासंस्पृष्टो भवतीत्येवं वदे
यवाच्यं ॥ तत्र जीवेऽसंभवीत्युक्तं परमेश्वरे तु तदाञ्जसं एवमैश्वर्यं यद्यप्यस्पष्टतया निर्दिष्टमपि सर्वाधिपत्य एव पर्यवस्यति
आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशदिति श्रुत्यादित्यपुरुषयोरभेदावगमात् पूर्वपक्षिणापि तस्य भक्त्याख्यानायोगात्
अध्यात्माधिदैविकविभागापेक्षया विभज्य निर्देशश्चोपासनार्थस्तथा च निरंकुशानंदैश्वर्यं परमेश्वरमेव लिंगं ॥ एवं स
र्वत्वमपि नन्वेश्वरस्याविद्योपाहितस्याविद्याविषयत्वोपहितस्य चानतादूप्ये योद्धा धानन्दकत्वमित्युक्तं युक्तं आविद्योपाहि

तेऽविद्यापरिणामांतःकरणोपहितताद्रात्म्यापन्नत्वात्समुद्रावच्छिन्नाकाशेन रंगावच्छिन्नाकाशतादात्म्यस्य लोके दर्शि
नान्न्यानस्तीति मतेतु अविद्याविषयचैतन्यस्यैव सर्वाधिष्ठानत्वात अविद्याश्रयतादात्म्यस्य सत्वमक्षतमेव जीवस्तु अ
विद्याविशिष्टांतःकरणविशिष्टो वा न जगदुपादानमित्यादिकं स्पष्टमाकरेष्वेवेति तद्भितिदिक्॥ भेदव्यपदेशाच्चान्यः॥ य
च प्रत्यभिज्ञानात् तथा च नरमंनिर्दिष्टस्यापहतपाप्मत्वादेरनन्यथासिद्धत्वेन प्रयोजनवत्वेन तात्पर्यवत्वेन च बलव
त्त्वान्तदनुरोधेनोक्तलिंगानुसारेण चाक्ष्यादित्ययोरंतःस्थः परमेश्वर इति सिद्धं॥ यत्तु चंद्रिकायां अभ्येति त्यादिना निरुक्त
पूर्वपक्षसिद्धांतावनूद्य नीरूपे ब्रह्मणि रूपादियद्युपासनार्थमुच्यते जीवेऽपि पाप्माभावादि तद्गुणास्य पर्युन्यतां तन्मतेऽपा
स्तनामवागादौ ब्रह्मत्वधेनुत्वादेः प्रातीतिकत्वनियमेनापि तथैव वक्तुं युक्तत्वाज्जीवे पाप्माभावादेर्व्यावहारिकस्यासं
भवेऽपि न क्षतिः तन्मतेऽपासनावाक्यस्य तत्कर्तव्यतामात्रपरत्वेन स्वार्थपरत्वाभावात् कर्तव्यतायां च व्यावहारिकप्राति
भासिकविभागानपेक्षणात्श्रुतोऽप्यस्थाणुनाश्रुत्योर्विषयभेदेन तात्विकत्वस्यैव वक्तव्यतापाताच्च॥ किंच ब्रह्मणि हिरण्य
श्मश्रुत्वादेर्भ्रांतराभावतया तद्वाक्यस्यानुवादकत्वाभावेन तद्वाक्यं तत्परमेव वाच्यं॥ तथा च तस्य तात्विकत्वं दुर्वारि
मेव यच्चोपादानं ब्रह्म कार्यकारणयोरभेदात् कार्यधर्मैर्व्यपदिश्यत इत्युक्तं तन्न स्वर्णे कटकत्वादेरिव कटकादावपि स्व
र्णत्वव्यवहारेण ब्रह्मधर्मैः कार्यस्य व्यपदेशापातादिति दूषणमुक्तं॥ तन्नोच्यते यद्यपि नाम ब्रह्मेत्युपास्ते वाचं धेनुमुपासीत

त्यादावुपास्यस्य प्रातिभासिकत्वमस्ति तथापि न सर्वज्ञाभिमतयैव वाच्यमित्यस्तिनियमः मानाभावात् परंतु मनोवृत्तीनां प्रा
माण्यस्यौत्सर्गिकतया तत्संभवे विषयस्याबाध्यत्वमेव तत्र नाभिकालाबाध्यत्वं मुख्यस्यैव ग्रहणमिति तद्विषयकज्ञानध्या
नादीनामेव मुख्यं प्रामाण्यं यत्र च प्रमाणांतरेण बलवत्ताविरोधात् नाभिकालाबाध्यत्वं विषयस्य संभवति तत्स्वादर्थक्रिया-
दिकं च दृश्यत्वेन दृश्यते च व्यवहारदशायां बाधः तत्र तद्विषयकज्ञानध्यानादीनां व्यवहारकालाबाध्यविषयकत्वलक्षणं व्या
वहारिकप्रामाण्यमेव यत्र व्यवहारकाल एव विषयस्य बाधः तद्विषयकज्ञानध्यानादीनां हि विषयस्यापि यथार्थतापरपर्या
यस्य प्रामाण्यस्यासंभवादयथार्थत्वमेव ॥ एवं चाविनापवादं पूर्वपूर्वस्य त्यागायोगात् प्रकृते जीवस्योपास्यत्वे सर्वथाप्यादृ
तौ ध्यानस्य यथार्थतापरपर्यायप्रामाण्यमेव स्यात् ब्रह्मणस्तथात्वेनोपपत्तौ द्वैतवादिनां तद्विषयकध्यानादीनां यथार्थ
त्वोपपत्तेः चेतनत्वोपपत्त्यादीनां ब्रह्मणि व्यवहारकालाबाध्यत्वात् यथार्थत्वोपविधेयतासंभवेऽयथार्थत्वोपविधेयताकल्पनस्यानु
चितत्वात् प्रतिपादितं चैतत् भवते तत्रासत्यायोग्योपास्यत्वनिष्फलत्वविपर्ययाख्यातिसंकर्षणसूत्रार्थवर्णने प्रसङ्गु
पासनानवद्ये दृश्यत्वयुक्तिदूषणप्रकरणे सविस्तरमानंदमयाधिकरणे इति न जीवस्योपास्यता युक्ता नापि श्रुतिविरूपस्य
विपर्यये दृष्टास्तिकविषयकत्वं कल्पनं युक्तं श्रुतिविरूपस्य समानबलत्व एव तत्कल्पनाप्रसरात् प्रकृते च न तथा अद्वैत-
श्रुत्येकप्रकरणादितात्पर्यग्राहकत्वेन बलवत्त्वात् उपपत्त्यादिबोधकश्रुतेरपि धेयध्यानांगगुणसमर्पकतया तद्वैशिष्ट्ये ता
त्पर्याभावात् ॥ ननु तर्हि व्यावहारिकचेतनत्वादिकमपि न सिध्येत् तद्बोधकश्रुतेस्तात्पर्याभावादिति चाच्यं ॥ श्रुत्य

परार्थत्वादेरसति प्रमाणान्तरविरोधे देवताविग्रहादिसिद्धिवत् प्रमाणान्तरविरोधे तु भजनाभावैरभिप्रेत्यैर्देवताविग्रह-
गुणवादेन सिद्धिसंभवात् किंच स्तुत्यादेरपूर्वत्वानवधारणेऽनुवादासंभवे मन्त्रानुवादत्वस्यैव वाक्यस्य स्यान्नहि
फलमेव स्यादिति किं चैवं मुक्ति प्रतिकारणीयेन अपूर्वत्वेऽप्यन्यदोषस्यावकाशः पूर्वपक्षे दर्शपूर्णमासनिर्णयस्यात् ॥ त-
थाह जर्तिलयवाग्वा जुहुयात् गवीधुकयवाग्वा जुहुयात् न ग्राम्यान् पशून् हिनस्ति नारण्यानथो खल्वाहुरनाहुतिर्वै जर्ति-
र्तिलाश्च गवीधुकाश्च पयसाग्निहोत्रं जुहुयादित्यग्निहोत्रे श्रुतं तत्र जर्तिलयवाग्वेत्यादिना विहितयोर्जर्तिलगवीधुकयवाग्वो-
रनाहुतिरित्यादिनिन्दया प्रतिषेधकल्पनात् तयोर्विधिप्रतिषेधाभ्यां विकल्पः पयसेत्यादिकं तु पयोविधिः वाक्यभेदस्त्विष्टः पू-
र्वपक्षव्याख्यानश्रवणात् इति पूर्वपक्षे सिद्धान्तः ॥ जर्तिलयवाग्वेत्यादेर्विधित्वेऽपि अनाहुतिरित्यादिर्न विकल्पतात्पर्यं यतो हि
नापि पयोविधिवादेऽपि विकल्पस्य प्राप्तिः यवन्यायेनासिद्धेः किंतु नहि निन्दान्यायेन पयःस्तुतिपरं यत्तु जर्तिलयवाग्वे-
त्यादेरपि न विधिः किंतु पयसो निन्दाद्वारेण पयःस्तुतिपरत्वादिति नापि ब्रीहियवन्यायेन विकल्पोपसंभवेन यावत् स्वर्गेच्छ-
व्यानिन स्यात् यथा भुंक्ष्व विष्णुमपूजयित्वा भुंक्ष्व विषभोजनमत्र महदृष्टं विष्णुं पूजयित्वा भुंक्ष्वेत्यादावपि नान्यनिन्दापोषणद्वा-
राऽन्यस्तुतिपरं प्रथमवाक्यमिति पयोविध्येकवाक्यतापन्नमेव जर्तिलादिवाक्यमिति तथा च यथा जर्तिलयवाग्वादेरपूर्व-
दोषसाधनतावाक्यस्यानाहुतिरिति पूर्वनिन्दाबोधकवाक्यस्य च पयसा जुहुयादिति विधिशेषत्वापत्तेः तदेकवाक्यतापन्नस्य
न जर्तिलयवाग्वादिनिषिद्धहोमसाधनत्वादिपरत्वं ॥ तथा हिरण्यश्मश्रुरित्यस्यापि उपासनाविधिशेषत्वे योपासनाविध्येक

शास्यतापन्नस्य न हिरण्यश्मश्रुत्वादिपरत्वमिति तस्यापूर्वं त्वेन तात्त्विकत्वापादनमापातत एवेति यच्च स्वर्णे कटकत्वादेरिव-
कटकादौ स्वर्णव्यवहारेण ब्रह्मधर्मैः कार्ये एव व्यपदेशापातादिति दूषणमुक्तं तदप्यविचाररमणीयं कार्यकारणयोरभेदात् क्वचित् के-
नचित् कारणधर्मेण कार्यव्यपदेशोऽपि न सर्वैरेव कारणधर्मैः कार्यं व्यपदिश्यत इति वक्तुं शक्यं किंतु यत्र यत्र बाधकानुपलंभस्तेन तेनैव
तथा च सर्वकार्यसाधारणयत्किंचित्सत्त्वादिब्रह्मणः धर्मेण कार्यव्यपदेशोऽपि इंद्राद्यात्मकत्वराजाद्यात्मकत्वादिना आदित्यव्यपदेशायोग-
स्तद्विरुद्धादित्यत्वस्य तत्रोपलंभात् बाधकसत्त्वात् अन्यथा कार्यकारणयोरभिन्नत्वनियमवत् तदभिन्नाभिन्नस्य तदभिन्नधर्मेण तदभिन्नत्व-
नियमात् कटकाभिन्नसुवर्णाभिन्नकुंडलस्य सुवर्णात्मना कटकाभिन्नस्य कटकधर्मसुवर्णत्वव्यपदेशवत् कटकत्वव्य-
पदेशापातात् ॥ एवं सर्वपाप्मोदितत्वइंद्राद्यात्मत्वोपलक्षितसर्वतादात्म्यादिनापि नादित्यव्यपदेशः संभवति संसारी-
त्वनियतपापादिमत्त्वासार्वात्म्यादिविरुद्धधर्मोपलंभात् सर्वात्मके ब्रह्मणि तु सर्वधर्मवत्त्वस्याविरोधात् तन्नात्कार्यधर्मे-
ण व्यपदेशो युक्त एव सकलकल्पनानिदानाविद्यानिवर्तकविजातीयब्रह्मसाक्षात्कारं यावत्तथाव्यवहारे बाधकाभावात् ॥
एतेन कथं चाधिष्ठाने ब्रह्मणि शापराहित्याद्यसाधारणरूपेणाभासमाने तदाध्यस्तगतधर्मव्यवहार इति चंद्रिकोक्तं दूषणं
निरस्तं ॥ तादृशाधिष्ठानभानस्याखिलकल्पनामूलाविद्यानिवर्तकत्वाभावात् भ्रांतिपादितं चैतत् जिज्ञासासूत्रे विस्तरे-
ण ॥ मुमुक्षुं प्रति सविशेषब्रह्मनिरूपणं च मोक्षसाधननिर्विशेषज्ञानार्थं तत्त्वज्ञानं महावाक्यजन्याद्वैतब्रह्मात्मैक्यबोध-
प्रयोजकनिर्विशेषात्मरूपमहावाक्यघटकपदार्थज्ञानं यथोक्तं कल्पतरौ ॥ निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः ॥

येऽंशास्तेनु कथं ते सविशेषनिरूपणे॥ वशीकृते मनस्येषां सगुणब्रह्मशीलनात्॥ तदेवाविर्भवेत्साक्षादपेतोपाधि-
कल्पनमिति॥ आविर्भवेत्सगुणज्ञानाधीनसगुणोपासनापरिपाकेनैकाग्र्यादौ वशीकृते मनसि विशेषपरित्यागेनाविः
र्विशेषाकारवृत्त्याऽपरोक्षीभवेत्॥ यत्तु चंद्रिकायां सविशेषनिरूपणं मोक्षसाधननिर्विशेषज्ञानार्थमित्यनेनोक्तार्थ
मनूद्य तन्न उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेति श्रुतपापनिवृत्तिरूपमुक्तिफलहानस्याश्रुतफलांतरकल्पनस्याप्रसं-
गात्॥ किंच सविशेषज्ञानं निर्विशेषज्ञानार्थं किं यावित्तस्य विजातीयवृत्त्यंतररूपमारोपितविषयमुपासनापर्यायं ध्यानं-
वानाद्यः निर्विशेषग्राहिना विशेषाभाववैशिष्ट्यस्योक्तौ त्वन्मते विशिष्टज्ञानस्य मोक्षाहेतुत्वात् तदभावोपलक्षितस्योक्तौ
काकेन गृहसंस्थानविशेषस्येव विशेषाभावेनोपलक्ष्यांतरस्यैवाभावात् विशेष्यस्यैवोपलक्ष्यत्वे तस्य विशिष्टग्राहिणा
ज्ञानेन प्रागेव ज्ञातत्वात् उपलक्ष्यताकारेण ज्ञानस्य त्वन्मते मोक्षसाधनत्वात्॥ न चापि विशेषणाविषयं विशेष्यज्ञानं मा
गास्त्वमिति वाच्यं॥ विशिष्टज्ञानस्य विशेषणज्ञानाभावार्थत्वायोगात्॥ तथा च विशिष्टब्रह्मधीसाध्यमुक्त्यधीरि
त्यसंगतं विशिष्टमत्यये यस्माद्विशेष्यं भासते तयामिति दूषणमुक्तं॥ तदसत् उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेत्यत्र
विदेरुपासनार्थकतया निर्विशेषात्मसाक्षात्कारप्रतिबंधकपापनिवृत्तेः विचारारंभसामर्थ्यं च लब्ध्वोपासते गुरोरित्यभि
युक्तोक्तरीत्या तत्क्रतुन्यायेन सविशेषब्रह्मज्ञानाधीनतदुपासनाफलत्वस्यैवोक्तत्वेन श्रुतफलहानाश्रुतफलकल्पनाप्रसंगा
भावात्॥ अध्यारोपापवादाभ्यां निष्प्रपंचं निरूप्यत इति न्यायेन सृष्ट्याद्यध्यारोपेण सृष्ट्यादिविशिष्टज्ञानस्यैव सविशे-

पात्मज्ञानस्य निर्विशेषत्वाद्द्वितीयान्यज्ञानार्थत्वस्याकरे सविस्तरं प्रतिपादनात् ॥ यथाहि तयोर्रूपं नास्ति तु गौरूपस्यासं
तिका सत्वं नत्वन्यतेन स्य चा यावन्मात्रज्ञानेपि पृथिव्यादावुपादानकारणे सत्त्वोपपत्तेः ॥ तथा निर्गुणनिर्विशेषब्रह्मणि
उपास्यतया विवक्षितगुणविशेषयोर्निषेधेप्यन्यत्र तेषां सत्त्वाशंकया न तत्कृतपरिच्छेदेन चतुर्विधाभावाप्रतियोगित्वरूपं नि
रंकुशं ब्रह्मत्वमाखनिन संभवतीति तेषामधिष्ठाने ब्रह्मण्युपचारोपपत्तेः सर्वांनिषेधेन जगत इव उपासनादत्यन्तं तेषां सत्त्वायोगा
त्तत्कृतपरिच्छेदासंभवाच्च तन्नैव निषेधेऽद्वैतानिर्विशेषात्मप्रतिपत्तिः सुकरैवेति निर्विशेषशब्देन सकलविशेषाभावोपलक्षि
तं ब्रह्मैव विवक्षितं तेनाविशिष्टात्मज्ञानस्य मोक्षहेतुत्वाभावेपि न क्षतिः ॥ यदुपलक्षितं धर्मान्तरवत्तया ज्ञातं तदविधेयत्व-
विधेयवदन्यव्यावृत्तेर्विशेषः तस्योपलक्षणत्वमिति नियमस्य काकादिरूपोपलक्षणोपस्थितगृहत्वादिरूपधर्मान्तरवत्तया
ज्ञान एव देवदत्तगृहत्वस्य देवदत्तगृहेतरव्यावृत्तेर्देवदत्तगृहबोधात् नानाव्यक्तिगतकाकादिरूपोपलक्षणधर्मे धर्मान्तरोप
स्थापकतानियमदर्शनेन संभवेपि एकव्यक्तिमात्रगतोपलक्षणेन तादृशनियमसंभवः ॥ तथाहि देहसंस्थानविशेषविशि
ष्टदेवदत्तस्य तदन्यव्यावृत्तेश्च प्रत्यक्षसिद्धत्वात् तथा सोयमित्यादिवाक्येन तद्बोधने तादृशवाक्यवैयर्थ्यात् सोयमित्यादिवाक्यात्तत्
आदिरूपैकव्यक्तिमात्रगतोपलक्षणोपस्थितदेहसंस्थानरूपधर्मान्तरवत्तादमर्थस्य तद्व्यावृत्तेर्वा प्रतियोग्यसंभवापातात् तत्र
तादृशनियमस्य पक्षमतेनस्वत्वात् तस्मात् धर्मस्य धर्मिणो वा उपस्थितिद्वारा स्वाविषयकं स्वाश्रयविषयकं यज्ज्ञानं येन अ
न्यतोनस्मिन् स्वाश्रयज्ञाने तस्योपलक्षणत्वमिति सर्वोपलक्षणसाधारणनियमस्य वाच्यतया तादृशोपलक्षणत्वस्य ध

मंतिरासुपस्थापकेविशेषाकारोपि प्रकृतेसंभवानुस्यूतं चंद्रमहेतन्निःसंदेहात् ॥ सविशेषब्रह्मज्ञानप्रकारोनेननिर्विशेषवि
षयमुपासनापरपर्यायंध्यानरूपं चैकाग्र्यरूपचित्तवृत्तीकरणम् ध्याननिर्विशेषध्यानमन्यथा आत्मानुभवाद्विनसंस्कारज
न्यार्थस्मरणहेतुकमहावाक्यार्थनिर्विशेषब्रह्मात्मापरोक्षज्ञानार्थमित्यपि वक्तुं युक्तं ॥ तथाहि यतोवाइमानिभूतानिजायं
तेइत्याद्याः श्रुतयः तत्पदस्यादिमहावाक्यस्थतत्पदवाच्यार्थबोधिकाः सत्यंज्ञानमनंतंब्रह्मेत्याद्याः श्रुतयः तत्पदलक्ष्या
र्थबोधिकाः ॥ तथा यामहामत्स्यउभेकूलेअनुसंचरति पूर्वंचापरंच एवमेवायंपुरुषः स्वप्नांतंचबुद्धांतंचेत्येवमाद्याः श्रुत
योजाग्रत्स्वप्नसुषुप्त्यवस्थाभिमानिजीवचैतन्यबोधिकाः महावाक्यस्थत्वंपदवाच्यस्यबोधिकाः योयंविज्ञानमयः प्राणे
षुहृद्यंतर्ज्योतिः पुरुषः नदृष्टेर्द्रष्टारंपश्येरित्याद्याः श्रुतयः त्वंपदलक्ष्यस्यबोधिकाः ॥ तथाचोक्तवाक्यार्थबोधकश्रुतिभि
र्मुख्यवृत्त्योपस्थितयोर्विशिष्टजीवब्रह्मणोरैक्यबोधस्यप्रमात्वानुपपत्तिज्ञानेनलक्षणयोक्तावांतरवाक्येभ्योऽनुभूतयोः
श्रुत्यतत्त्वंपदार्थयोः स्मरणेनब्रह्मात्मैक्यरूपवाक्यार्थापरोक्षबोधेसति तस्य स्वतः प्रमाणभूतवेदवाक्यजनितत्वात्स्व
तएवप्रामाण्यात् तस्याविद्यातत्कार्यनिवृत्त्याख्यमोक्षसाधनत्वेपि असंभावनाविपरीतभावनादिशून्यस्यैव तस्योक्ता
विद्यातत्कार्यनिवृत्तौशक्तत्वात् प्रमाणप्रमेयासंभावनाविपरीतभावनादिनिवृत्तौ च श्रवणमनननिदिध्यासनानां तद्विचारस्यै
वसामर्थ्यावधारणात् उक्तविचारप्रतिबंधकप्रज्ञामांद्यकुतर्कविपर्ययदुराग्रहाद्यभिभूतस्य पुरुषस्योक्तनिदिध्यासनात
द्विचारस्यासंभवेन सविशेषोपासनासाध्यनिर्विशेषोपासनाक्रमेण निर्विशेषत्वंपदलक्ष्यार्थात्मानुभवद्वारोक्तनिवृत्ति

स्वमोक्षब्रह्मात्मैक्यरूपमहावाक्यार्थापरोक्षबोधः ॥ तदुक्तं वासिष्ठे ॥ द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव ॥ योगश्चित्तनिरोधः स्यात् ज्ञानं सम्यगवेक्षणं ॥ असाध्यः कस्यचिद्योगः कस्यचिज्ज्ञाननिश्चयः इति ॥ चित्तनाशो नाम चित्तधर्मादर्शनमयुक्तमुत्था त्मदर्शनस्य अदर्शनं स्वरूपेण सत्त्वेन वा क्रमौ साधनानुष्ठानक्रमेणाक्रियमाणौ उपायौ सम्यगवेक्षणं श्रवणमनननिदिध्यासनांतविचाररूपं योगः सविशेषध्यानरूपसंप्रज्ञातसमाधिसाध्यासंप्रज्ञातसमाधिरूपः उक्तस्य संप्रज्ञातसमाधेरसंप्रज्ञातसमाधिहेतुत्वं चोक्तं भगवद्गीतासु कृष्णेन भगवता ॥ यत्रोपरमते चित्तं निरुद्धं योगसेवया ॥ यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥ सुखमात्यंतिकं यत्तद् बुद्धिग्राह्यमतींद्रियं ॥ वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥ यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ॥ यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते ॥ तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितमिति व्याख्यातं च मधुसूदनसरस्वतीभिः ॥ योगसेवया संप्रज्ञातसमाधिरूपयोगाभ्यासेन यत्र यस्मिन् मनः परिणामे जाते सति चित्तं निरुद्धं सर्ववृत्तिशून्यं सत् उपरमते कमपि विषयं न गृह्णाति यत्र यस्मिन् मनः परिणामे सति आत्मनाशुद्धसत्त्वेन मनसैव व्यंजकेनात्मानं ब्रह्माभिन्नं साक्षिणमेव पश्यन् पुरुषः आत्मन्येव तुष्यति हैतमानप्रमुक्तानंदात्यंतरहितः भवति तं परिणामं योगसंज्ञितं विद्याज्जानीयात् असंप्रज्ञातसमाधौ निरुद्धेन मनसा ब्रह्मैवात्मस्वरूपं भाति न तु संप्रज्ञातसमाधाविव ब्रह्मान्यत् ध्यातृध्यानादीति भावः ॥ तदुक्तं ध्यातृध्याने परित्यज्य क्रमाद्ध्येयैकगोचरं ॥ निर्वातदीपवच्चित्तं समाधिरभिधीयत इति ॥ यथा दीपो निवातस्थो नेंगते सोपमा स्मृता ॥ भगवानसुमेवार्थमर्जुनायान्यवेदयदिति च ॥ आत्मन्येव तोषमुपपादय

नियत्रमनः परिणामे सति आत्यंतिकं सर्वसुखेभ्य उत्कृष्टं सुखं वेत्ति विषयादिसुखादि नास्ति अतींद्रियमिति निविषयेंद्रियसंयो

गाजन्यं ॥ सैषुप्तसुखात्भिन्नमिति पुत्येयाद्यमिति निरुत्यमनोभिव्यक्तं सुषुप्तौ मनो न व्यंजकं लीनत्वात् उक्तं च गौडपादैः ली

यते तु सुषुप्तौ तन्निरुद्धं न तु लीयत इति आत्यंतिकत्वे हेतुमाह यत्र परिणामे स्थितो यं योगी ततस्तोत्रस्वाभिन्नस्वरूपात्

परमार्थान्न चलतिद्वैतमानाभावात् ॥ तथा च पातंजलसूत्राणि ॥ योगश्चित्तवृत्तिनिरोधः ॥ तदा द्रष्टुः स्वरूपेवस्थानं ॥ वृ

त्तिसारूप्यमितरत्रेति सकलचित्तवृत्तिनिरोधकाले द्रष्टुः दृक्स्वरूपस्य पुरुषस्य स्वरूपएवावस्थानं न तु व्युत्थितवृत्तौ भवतिविंवि

तत्वं इतरत्र कालांतरे तु वृत्तिसारूप्यं व्युत्थितवृत्तौ भवति विंवितत्वं द्वैतमानं विषयवासनात्यात्यंतिकसुखाभिव्यक्तौ प्रयोजकं

तत्राद्येन तत्त्वतो न चलतीत्यनेन द्वितीयमपमित्यनेन निर्यासनबोधकेन निरस्तं अस्यासंप्रज्ञातसमाधेरवश्यकतामाह यंप

रिणामं लब्ध्वा अपरं श्रवणादिभिन्नं लाभं मन्नाद्याव्यावर्त्य परोक्षधीप्रयोजकं न मन्यते तस्थेवस्तुत्वतं पदार्थसाक्षात्कारद्वारम

हावाक्यार्थापरोक्षधीप्रयोजकत्वात् ॥ अपमर्थः मैत्रायणीयशाखायामपि ॥ लयविक्षेपरहितं मनः कृत्वा सुनिश्चलं ॥ य

दा यात्यमनीभावं तदा तत्परमं पदं ॥ तावन्मनो निरोद्धव्यं हृदि यावत्क्षयं गतं ॥ एतज्ज्ञानं च मोक्षं च शेषान्ये ग्रंथविस्तराः

॥ समाधिनिर्धूतमलस्य चेतसो निवेशितस्यात्मनि यत्सुखं भवेत् ॥ न शक्यते वर्णयितुं गिरा तदा स्वयं तदंतःकरणेन गृ

ह्यते ॥ अपामापोग्निरग्नौ वा व्योम्नि व्योम न लक्षयेत् ॥ एवमंतर्गतं यस्य मनः स परिमुच्यते ॥ मन एव मनुष्याणां कार

णं बंधमोक्षयोः ॥ बंधाय विषयासंगि मोक्षे निर्विषयं स्मृतमिति मतिपादितः ॥ अत्र मध्ये लयो निद्रा विक्षेपो विषयस्मृत

द्वि अमनीभावः मनः   यदेशा कृतनिरोधस्य आभित्यागः तं पदमाहित तदेतत् परमं पदं यतिर्हृदि साक्षिणि गलः प्राप्तः विना
शोधेन तत्त्वधा अंतःकरणेन भुक्तसत्त्वेन निरुध्येन गृह्यते व्यक्ते अंतःकरणाय स्वाभिशेषवशात् साक्षिणा स्वयं गृह्यते तेन स्व
प्रकाशात्मतया तदा लीलया अपामम्बु आपः अपः निक्षिप्ता इत्यध्याहारः अग्निरग्नौ निक्षिप्तः इत्यनुषंगः व्योम पदाया
कावाः एवमिति तथा चित्तनिरुद्धं सत् अमृतं भवतीति असंप्रज्ञातसमाधिकाले साक्षिस्वरूपं ब्रह्मैव भवतीत्यर्थः ॥ कठवल्ली
ष्वपि यदा पंचावतिष्ठंते ज्ञानानि मनसा सह ॥ बुद्धिश्च न विचेष्टति तामाहुः परमां गतिं ॥ अथ मनस्तदा भवति यो गो हि प्र
भवाप्ययौ इत्यनेनापमर्थः ॥ ज्ञानानि ज्ञानेंद्रियाणि मनो बुद्धिश्च न विचेष्टते वृत्तिरूपेण न परिणमते अत
एव द्वैतभानरूपभ्रमारंभशून्यः निरुद्धस्य मनसोऽपि स्वभावेन साक्षिभास्यत्वाभावात् ॥ सौषुप्तस्थायामुपस्थ
यावस्थायामप्यावृतत्वमेवेत्यपदइति भावः अज्ञानस्यापि साक्षात्कारेण तस्यापि [illegible]
धातिगुरुणा तत्त्वज्ञानानाश्यभुज्यमानप्रारब्धकर्मजन्येन प्रारब्धकर्मापि क्षयात् समाधे [illegible]
मैणीनाशाकृतपातज्जन्यं दुःखं नो भवेत् इत्यर्थः ॥ तथा च संप्रज्ञातसमाधिपादयेन संप्रज्ञात [illegible]
धिस्तु प्रथमश्रवणमननादिरूपविचारसमर्थस्य पंचकोशविवेकादिना देहादिभिन्नतयात्मसाक्षिणो ज्ञान [illegible]
त्मसाक्षात्कारेण नरं तु ब्रह्माहमस्मीति ज्ञानमयावह्रूपः तदसमर्थस्य तु सविशेषब्रह्मोपा [illegible] रूपः असंप्रज्ञात
समाधिस्तु उक्तफलद्व्यातृध्यानादि त्रिपुटीत्यक्तवृत्तिशून्यनिरोधरूपफलवान् ॥ नचापरो हेतुर्वैतो श्याद् इति [illegible]

परोक्षज्ञानाधीनतन्निदिध्यासनादेव सिद्धेश्चित्तवशीकरणाभावे सविशेषनिदिध्यासनस्याप्यसंभवः इति चंद्रिकोक्तदूषणं साधुशनैः शनैः रुपरमेत् बुद्ध्या धृतिगृहीतया ॥ आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेदिति ॥ भगवद्वचनेन चित्तस्य बाह्यविषयासक्तिस्वाभाव्यात् निर्विशेषोपासनस्य प्रथमत एवासंभवेन विषयेषु दोषदर्शनादिनोपायेन क्रमेण विषयेभ्यो मनआकृष्य सविशेषोपासनाभ्यासेनैव चित्तवशीकरणद्वारा निर्विशेषनिदिध्यासनाख्यकोक्तासंप्रज्ञातसमाधिहेतुत्वस्योक्तत्वात् ॥ यत्तु दशमस्त्वमसीत्यादाविव शाब्दापरोक्षज्ञाने चित्तवशीकरणानपेक्षेति चंद्रिकोक्तं दूषणं तदप्युक्तरीत्या संप्रज्ञातसमाधिस्थनिर्विशेषानुभवाहितसंस्कारजन्यपदार्थस्मरणद्वारा वाक्यार्थापरोक्षज्ञाने चित्तवशीकरणावश्यकतापदर्शनेन निरस्तं अन्यथाऽसंप्रज्ञातसमाधेरेवानुपपत्तेः ॥ एतेन किंच सविशेषज्ञानं निर्विशेषज्ञानस्य न तावत् दृष्टद्वारा हेतुः तद्विशिष्टज्ञानजन्येनाज्ञानध्वंसेन वा चित्तवशीकरणेन वा तदभावविशिष्टज्ञानस्य तदुपलक्षितज्ञानस्य चाप्यदर्शनात् नूपादियुक्तपरांगभूतविशेषज्ञानेन तद्विपरीतनिर्विशेषज्ञानायोगाच्च निषेधोपयोगिनो बुद्धिपूर्वकारोपस्यापि शाब्दप्रमाणानपेक्षणाच्चेति चंद्रिकोक्तं दूषणं निरस्तं ॥ उक्तरीत्या सविशेषज्ञानस्योपासनासाध्यचित्तवशीकरणद्वारा निर्विशेषात्मविज्ञानहेतुत्वस्योक्तश्रुतिस्मृतिप्रमाणसिद्धतया क्वाप्यदर्शनादित्युक्तेस्तदनालोचननिमित्तत्वस्य स्पष्टत्वात् अध्यारोपन्यायेन निर्विशेषात्मज्ञानस्य सविशेषज्ञानजन्यता या अद्वैतग्रंथेषु बहुश इहाप्यनुपदमेवोक्तत्वात् प्रमाणांतरागम्योपास्यसत्यकामत्वादिवैदिकगुणारोपेणोपासनयोक्तफलासौभ्यस्योत्पादनान्यप्रमाणमूलत्वा

भाष्यएवोक्तत्वात्ध्यानस्यज्ञानांगभेदस्य॥ नबुद्धिंमर्दयन्हृदयोपरतत्त्वस्यवेदिता॥ उपमृद्नातिचेत्बुद्धिंध्याताऽसौ
नहितत्त्वविदितिविद्यारण्यचरणैरुक्तत्वाच्च॥ तमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसाऽनाशके
नेत्यादिनानित्यकर्मणांविविदिषार्थत्वप्रतिपादनेनतेषांविविदिषाप्रतिबंधकदुरितनिवर्तकत्वेपिविविदिषोत्तरमपिनि
र्विशेषात्मसाक्षात्कारप्रतिबंधकदुरितनिवर्तकत्वाभावेऽङ्गीकृतत्वात्तस्यसविशेषोपासनादिनैवनिवृत्तेःप्रमाणसिद्ध
त्वात्नविचारशास्त्रेनित्यकर्मविचारापत्तिः॥ सहस्राचार्यैःऐहिकमप्रस्तुतप्रतिबंधेतद्दर्शनादितिसूत्रेभाष्यतदी
यटीकादौ॥ तथाहिप्रतिबंधकानिपापानिद्विविधानिप्रारब्धफलान्यप्रारब्धफलानीतितत्रविविदिषाप्रतिबंधकानि
पापानियान्यनारब्धफलानितानिविविदिषोद्देशेनकृतैःकर्मभिर्नष्टानिप्रारब्धफलानितुभोगैकनाश्यानीतिप्राग्योगस्य
यंविविदिषैवनोदेतितथाचश्रुतिःश्रवणायापियोबहुभिर्नलभ्यइतिसत्सुप्रतिबंधकेषुश्रवणसामग्र्याएवानिष्पत्तेः॥ ए
वंविविदिषोत्तरमपियदिप्रारब्धफलानिप्रतिबंधकानिसंभावितानितदाश्रवणादिकंदुर्घटमेवयावद्योगस्यविविदिषो
त्पत्त्यनंतरंविद्यमानानांश्रवणादिप्रतिबंधकानांतुपापानामनारब्धफलानांज्ञानोद्देशेनकृतैःकर्मभिर्नाशः॥ ज्ञानमु-
त्पद्यतेपुंसांक्षयात्पापस्यकर्मणःधर्मेणपापमपनुदतीतिवचनेनकर्मणांपापनिवृत्तिद्वाराज्ञानार्थतायाअपिप्रतीतेःश्र
वणादिषुप्रवृत्तस्यापिप्रारब्धफलान्यप्रारब्धफलानिचनिदिध्यासनपर्यंतंविचारप्रतिबंधकानिपापानिसंभाविता-
नितत्रापिप्रारब्धफलानांभोगादेवनाशःअप्रारब्धफलानांतुश्रवणोपासनादिनियमानुष्ठानेन॥ तथाचश्रुत्योक्तंभूयएवतो

पिबहवो यन्न विद्युः श्रवणायापि बहुभिर्यो न लभ्य इति अत्र हेतुः कुशलोस्य लब्धा आश्चर्योस्य ज्ञाता कुशलानुशिष्ट इति अस्यात्म
नो साक्षात्कारवान् कुशल एव योपि ध्यानं सम्यगनुतिष्ठति कृतश्रवणस्यापि निदिध्यासनप्रतिबंधकं पापं प्रस्तुतं भवति तदा यावद्भो
गक्षयं ध्यानासंभवात्ते दुर्लभ एवा स्तीति भावः किं बहुना क्रियमाणेपि श्रवणे बुद्धिमांद्यादिना ब्रह्मज्ञानमपि नोत्पद्यते तदिदमाहाश्चर्यो ज्ञाते
ति कुशलेनाचार्येणानुशिष्टो बोधितोपि ज्ञाता आश्चर्यो दुर्लभ एव न चान्यस्य ध्यानपरिपाकं तं प्रतिबंधकानि प्रारब्धफलानि पा-
पानि न भवंति तस्यैवेह विद्यासिध्यति अन्येषां तु श्रवणादिषु प्रवृत्तानामपि जन्मांतर एवेति ॥ सेतुज्ञानाकार्यस्यापि पा
पस्य सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहतीति वचनबलेन सेतुदर्शननिवर्त्यत्वस्येव सविशेषज्ञानाकार्यस्यापि निर्वि
शेषात्मज्ञानप्रतिबंधकपापस्य सविशेषज्ञानसाध्योक्तसविशेषोपासननिवर्त्यतायाउदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं
वेदेति श्रुतिबलादंगीकारात् अधिष्ठानसाक्षात्कारत्वेनाधिष्ठानसाक्षात्कारस्याज्ञानमात्रनिवर्तकत्वेपि नोक्तदूषणावका
शः उक्तरीत्या सविशेषज्ञानस्य निर्विशेषज्ञानार्थत्वानपायात् तथात्वेपि श्रुतहानाश्रुतकल्पनाभावस्योक्तत्वाच्च ॥ एते
नैत्यादिचंद्रिकोक्तदूषणमाभास एव सविशेषध्यानं निर्विशेषध्यानार्थमिति चंद्रिकायां विकल्पितः पक्षोपि साधुः ॥ उक्त
रीत्या संप्रज्ञातसमाधिरूपसविशेषध्यानस्य चित्तवशीकरणद्वारा असंप्रज्ञातसमाधिरूपनिर्विशेषोपासनापरपर्या
यनिर्विशेषध्या नार्थता याः श्रुतिस्मृतिप्रमाणसिद्धता या उक्तत्वात् ध्यानस्य ज्ञानाहेतुत्वस्य भाष्यादिसंमतस्यो
क्तत्वात् विद धातोरुपासनार्थप्रयोगस्य बहुस्थलेषु दृष्टत्वादिदमेवं वेदेत्युपासनायाः एव विवक्षितत्वात् वेदन

ध्यादिसंमतत्वोक्तत्वात् विदधातेरुपासनायां प्रयोगस्य बहुस्थलेषु दृष्टत्वादिह य एवं वेदेत्यत्रोपासनाया एव विवक्षि
तत्वात् वेदनस्य तत्क्रतुन्यायेनोक्तत्वाच्च ॥ नापि सविशेषध्यानं निर्विशेषध्यानार्थमिति द्वितीयः पक्षः ध्यानविशेषोऽज्ञा
नमित्यन्यत्रोक्तत्वात् इह य एवं वेदेति ज्ञानार्थविदधातुश्रवणाच्चेति चंद्रिकोक्तं दूषणं निरालंबनमेव ॥ यच्चोक्तं चंद्रि
कायां भगवति तात्त्विकं रूपमित्यन्यत्रोक्तत्वात् हिरण्मयः पुरुषो दृश्यत इत्यपरोक्षज्ञानविषयत्वोक्तेः नहि योषित्यग्नि
त्वं दृश्यत इत्युच्यते किंच योषिदादेरग्नित्वाद्युपासनेऽपि तथा ध्यानवत् निर्विशेषब्रह्मण एव हिरण्यश्मश्रुत्यादिना ध्यानसं
भवेन सविशेषब्रह्मणः साधकानुग्रहार्थमैश्वर्यरूपपरिग्रहोक्तिरयुक्ता तस्मान्न सविशेषनिरूपणं निर्विशेषज्ञा
नार्थं अन्यथा वैपरीत्यं स्यात् सत्यं ज्ञानमनंतं ब्रह्मेत्यादि सद्ब्रह्मनिरूपणमपि असद्वा इदमग्र आसीदित्यादि श्रुतिसि
त्वासत् ब्रह्मज्ञानार्थं स्यात् ॥ एवं चासद्रूपं ब्रह्म साक्षात्कर्तुमनीश्वराः ये मंदास्तेऽनुकंप्यंते सद्ब्रह्मप्रतिपादनैरित्या
द्यपि स्यादित्यादि तत्रोच्यते केवलो निर्गुणश्चेति श्रुत्या आत्मनो निर्गुणत्वप्रतिपादनात् ब्रह्मणि रूपवत्त्वादिकं न तात्त्विकं-
किंतु उपासनार्थमारोपितमेव ॥ यत्तु बृहंतोऽस्य धर्मा इति श्रुत्या ब्रह्मेशानादिभिर्देवैः समेतैर्यद्गुणांशः कः नावसायितुं-
शक्योऽव्याच्च साणोऽस्य सर्वदेति स्मृत्या च ब्रह्मधर्मवत् पदार्थत्वादित्याद्यनुमानैश्च ब्रह्मसमानसत्ताकधर्मवत् ब्रह्मेति परै
रुक्तं तदाकरग्रंथेषु दूषितं विस्तरेण तत्संक्षेपतोऽत्र प्रसंगादुच्यते ॥ न तावत्तदुदाहृतसगुणादिश्रुत्या ब्रह्मणस्तात्त्वि
कगुणवत्त्वसिद्धिः सगुणप्रकरणस्थायास्तस्याः उपास्तिविधिविषयविशेषणसमर्पकत्वेन ब्रह्मणि धर्मविशेषप्रकारको

पासनाविधायकत्वेन ब्रह्मणि धर्मवैशिष्ट्येनातात्पर्याभावात् ॥ अन्यथा वाक्यभेदप्रसंगात् सत्यकामादिरूपं ब्रह्मोपासीतेत्यादि
वाक्यस्य ब्रह्मणि सत्यकामत्वादिप्रकारकोपासनापरतात्पर्येऽपि ब्रह्मणि सत्यकामत्वादिवैशिष्ट्यस्याबाधितत्वात् मानान्तरा
प्राप्तत्वरूपापूर्वत्वस्य तात्पर्यनिर्णायकषड्लिङ्गान्तर्गतस्य तस्मिन् सत्त्वात्तु तत्परत्वमप्युक्तं श्रुतेरस्मात्प्रामाणिकमिति चेदेकवाक्यताभंग
ते मानान्तरभासस्यापि अन्यत्रोपस्थितत्वरतापासदृशतं पूर्वमेवोपपादितत्वेन चानिरस्तमेव निर्गुणप्रकरणस्थवाक्यस्य
श्चाद्वितीयब्रह्मरूपत्वानुकूलनिषेधापेक्षितप्रतियोगिसमर्पकतया अन्यथासिद्धेश्च नेह नानास्ति किंचनेति द्वैतसामान्या
भाववोधकश्रुतिस्थेन किंचनेत्यादिसामान्यवाचकेन पदेनैव ब्रह्मातिरिक्तसकलनिषेध्योपस्थितौ विशेषसमर्पणमन-
र्थकमिति तद्वाक्यस्य लौकिकतया सगुणोपासनावाक्यप्रमेयत्वाद्ब्रह्मस्वरूपसार्थत्वेन सार्थक्यात् ॥ यत्तु श्रुतिप्राप्तस्य श्रुत्या
निषेधे अहिंसावाक्यस्य अग्नीषोमीयपशुप्रापकेनेतिवाक्यबोधितहिंसायां नातिरात्रे षोडशिनं गृह्णातीत्यस्य ग्रहणवाक्यं अति
रात्रे षोडशिनं गृह्णातीतिवाक्यविहितषोडशिग्रहणस्य सद्वा इदमग्र आसीदिति वाक्यं सदेव सोम्येदमग्र आसीदिति वाक्य
बोधितब्रह्मसत्त्वस्य द्वा सुपर्णेत्यादिभेदवाक्यं च तत्त्वमस्यादिवाक्यबोध्यस्याभेदस्य नेह नानेत्यादिनिषेधकं तद्वदेव नि
रस्तं ॥ प्रकृते श्रुतिप्राप्तत्वस्यैवाभावात् श्रुतिप्राप्तत्वं हि न यथाकथंचित् श्रुतिबोधितत्वं तथा सति न कलंजं भक्षयेत् ब्राह्मणं
हन्यादित्यादौ मानान्तररागादिप्राप्तकलंजभक्षणानुवादकेन कलंजं भक्षयेदित्यनेन कलंजभक्षणादेर्बोधनात्तत्तस्य श्रुत्यैव
नेत्यनेन निषेधे विकल्पापत्तेः किंतु श्रुतितात्पर्यविषयत्वं श्रुतिप्रमितत्वापरपर्यायमेव तद्वाच्यं तच्च न प्रकृतेऽस्तीत्युक्तमेव

अहिंसावाक्यस्य वैधहिंसाविषयत्वाभावात् वैधहिंसादिविषयाग्नीषोमीयहिंसाबोधकवाक्य-- समानविषयकत्वाभावेन नाहिं
सावाक्यमग्नीषोमीयहिंसाया बाधकस्यादित्यापादनं युक्तं द्वयोः समानविषयत्व एव बाध्यबाधकभावकल्पनावसरात् तयोः समा
नविषयत्वे ग्रहणाग्रहणवद्विकल्पस्यैवापत्तेर्न बाध्यबाधकभावापादानं संभवति ग्रहणाग्रहणवाक्ययोस्तु सत्यपि समा
नविषयत्वे एकस्याधिकबलवत्त्वाभावेन बाध्यबाधकभावस्यासंभावितत्वात् अन्यथा विकल्पानाश्रयणप्रसंगात् असद्वाक्यभेदवा
क्ययोस्तु कथमसतः सज्जायेतेति दूषणाय नान्योतोस्ति द्रष्टेत्यादिनाभेदनिषेधाय च वाक्यद्वयवदनुवादतयोपक्रमादवग
तसदैक्यतात्पर्यकसदैक्यपरवाक्यतो दुर्बलतया न ब्रह्मसत्तैक्यनिषेधकता संभवः ॥ अथवा सगुणश्रुतिरपरब्रह्म
विषया उक्तरीत्या वाक्यभेदापत्तेस्तस्याः सगुणत्वे तात्पर्याभावेपि देवताधिकरणन्यायेन तया श्रुत्या ब्रह्माख्यं सगुणं ब्रह्म
प्रमाप्यते निर्गुणश्रुत्यनुरोधेन विषयभेदस्यावश्यकत्वात् तावतापि श्रुत्या ब्रह्मणो निर्गुणत्वे बाधकाभावः अविद्याबिंबत्वा
द्युपाहितस्यैव सगुणस्य प्रमापणात् ॥ ननु सगुणातिरिक्तस्य ब्रह्मणोऽसिद्धिः सगुणश्रुत्या तात्त्विकत्वस्य गुणादावपि
बोधकरणेपि बाधकाभावात् तात्त्विकगुणवत्त्वस्य तदर्थतया अवर्जनीयतया तथात्वसत्त्वे तात्त्विकगुणवद्व्यतिरिक्तस्याभावा
दिति वाच्यं द्वैतमिथ्यात्वश्रुत्यनुमानादेरेव बाधकत्वात् सगुणत्वांशे श्रुतेर्व्यावहारिकप्रामाण्यवत्त्वात् निर्धर्मकश्रुतेर्विषयान्त
राभावेन श्रुत्यैव निर्धर्मकप्रमापकत्वावश्यकतया निर्धर्मकत्वादिश्रुत्यैव श्रुत्या ब्रह्मसिद्धिसंभवात् ॥ अत एवोक्तस्मृतिसूत्रा
णां न विरोधः व्यावहारिकधर्मभेदाद्यंशविषयत्वेन तेषां श्रुत्यान्यसगुणब्रह्मप्रमापकतया श्रुत्यविषयकत्वाभावात् ॥ एवं

न किंचाद्यसूत्रे धर्मब्रह्मद्वितीये भेदग्राहकतः निर्धर्मकत्वमैक्यं च निरस्तं ॥ परब्रह्मणः धर्मोभेदश्च मिथ्याचेत ॥ श्रुतिसूत्राप्रमा-
णता व्याख्याव्याजेन चोक्ता स्यात् तथा सौगतसौहृदादिति चंद्रिकोक्तप्रलापउन्मत्तप्रलाप एवेत्युपेक्षणीयः अन्यमासिद्धमर्थं प्रम
सिद्धत्वेन बोधयतां श्रुतिसूत्राणामप्रमाणत्वासंभवस्य जिज्ञासाधिकरण एवोक्तत्वात् ॥ न च सगुणः परः पराणामित्यादि
स्मृत्या सगुणस्य परादपि परत्वं स्मर्यते तथा च कथं सगुणवाक्यानामपरविषयत्वमिति शंक्यं जडापेक्षया परः किंचिज्ज्ञस्तद
पेक्षया सर्वज्ञस्य मुख्यापेक्षया अपरस्यापि परत्वात् ॥ नन्वेवं सति सदेव सोम्येदमग्र आसीत् असद्वा इदमग्र आसीदिति श्रुतीश्च
प्यपरब्रह्मपरब्रह्मविषये स्यातामिति वाच्यं नेदमिदमिति निर्देशस्यैव प्रकृतत्वेन ब्रह्मपरत्वस्य वक्तुमशक्यत्वात् तथा सप्रपंचस्यैव सृष्टेः पूर्वं
कारणात्मना सत्त्वमनभिव्यक्तनामरूपत्वस्य रूपं कार्यात्मना असत्त्वं च विषयी कुरुतः ॥ अत एव पश्चात्ततो वै सदजायतेति
विशेषणाभिव्यक्तत्वोक्तिः संगच्छते नापि ग्रहणाग्रहणवाक्ये परापरयागविषये स्यातामित्याशयेन सत्यं कृते अतिरात्रे षोडशिनं गृ-
ह्णातीत्यादिवाक्यवत् षोडशिग्रहणवाक्यस्य यागपरत्वेपि अग्रहणवाक्यस्य तदभावबोधकत्वे यागविषयत्वाभावात् ॥ न
च ग्रहणवाक्यस्य यागविधायकत्वस्येव अग्रहणवाक्यस्याग्रहणमूलकपरयागविधायकत्वमस्त्विति वाच्यं ॥ ग्रहणवाक्यप्रतिपादितया-
गनिषेधपरत्वसंभवे ग्रहणमूलकपरयागविषयकत्वे मानाभावात् अपूर्वपरयोगग्रहणस्याप्रसक्तत्वेन तन्निषेधवैयर्थ्यात् ॥
न च ग्रहणाभाववनित्यानुवादेनापूर्वयागपरत्वकल्पनमपि युक्तं यदेव ग्रहणवाक्ये विधीयते तस्यैव निषेधानुपपत्तेर्मुख्यार्थपरत्व
संभवे व्यर्थाभाववनित्यानुवादेनापूर्वयागपरत्वकल्पनायोगात् निर्गुणवाक्ये तु अद्वैतश्रुतिविरोधेन निषेधपरत्वासंभवा

त्प्रतिषेधोपलक्षितश्रुत्यब्रह्मपरत्वस्यैव वक्तुं युक्तत्वात् ॥ नन्वेवं सत्यसन्नेव स भवति असद्ब्रह्मेति वेद चेदिति श्रुतिः प्र-
पंचासत्त्वसिध्यर्था किंतु शून्यतापत्तिरूपपरममोक्षपरेति स्यादिति ॥ असद्रूपं परं ब्रह्म साक्षात्कर्तुमनीश्वराः ॥ ये मंदास्ते
तु कंप्यंते सद्ब्रह्मप्रतिपादनैरिति चंद्रिकोक्तदूषणमापतेदिति चेन्न ॥ शून्यताया अपुरुषार्थत्वादानंदं ब्रह्मणो रूपं तच्च-
मोक्षे प्रतिष्ठितमिति श्रुतिसिद्धानंदात्मकब्रह्मस्वरूपताप्राप्तिरूपपरमपुरुषार्थमोक्षसाधनज्ञानविषयसद्रूपब्रह्मस्वरूप-
प्रतिपादनाय प्रवृत्तायाः श्रुतेः शून्यतापत्तिरूपपरममोक्षपरत्वस्य वेदबाह्यशून्यवादिसुहृदैवैव वक्तव्यत्वात् यत्तु श्रुत्योर्विरोधे ए-
कस्याः तात्त्विकविषयकत्वमन्यस्या अतात्त्विकविषयकत्वमिति कल्पनं युक्तं तंत्रांतरे व्याकरणादौ च शास्त्रयोर्मिथो विरो-
धे संकोचविकल्पादिनोभयप्रामाण्यस्यैव निर्णीतत्वात् तदुदा हरणानां पूर्वतंत्रे स्पष्टत्वात् व्याकरणेऽपि परेणं पूर्वस्यानि-
त्येनानित्यस्येत्यादिना बाध स्योक्तत्वेऽपि तस्य संकोचरूपत्वेन तथा चोक्तं कोऽहि मीमांसको ब्रूयात् विरोधे शास्त्रयोर्मिथः ए-
कं प्रमाणमितरत्त्वप्रमाणं भवेदिति निर्गुणसगुणश्रुत्योर्विरोधे निर्गुणश्रुतेः प्राकृतहेयगुणशून्यार्थकतया संकोच एव यु-
क्त इति पराभिमतं ॥ तदसत् ॥ पूर्वतंत्रादौ विधिनिषेधशास्त्रयोः द्वयोरपि स्वार्थे तात्पर्यसत्त्वेन प्रामाण्ये समकक्षतया ए-
कतरस्यात्यंतिकबाधायोगात् संकोचेन विकल्पेन पर्युदासादिना वा पाक्षिकं प्रामाण्यमाश्रितं इह तु निर्गुणश्रुतेः स्वार्थपरत्वे-
न प्राबल्यात् सगुणश्रुतेः स्वार्थे तात्पर्याभावेन ततो दुर्बलतया प्रामाण्ये समानकक्षत्वाभावेन निषेध्यसमर्पकतयैव वाक्यतया
प्रामाण्यसंभवेन वाक्यभेदेन गुणप्रमापकताया अन्याय्यत्वेन च वैषम्यात् अत एव कोऽहि मीमांसको ब्रूयादित्यादिना न विरोधः तस्य

समानसत्ताविशिष्टस्य ब्रह्मविषयकत्वादधिकमाकरे द्रष्टव्यं नाप्यनुमानेन ब्रह्मणि तात्त्विकरूपवत्त्वासिद्धिः ब्रह्म धर्मिसमान
सत्ताकधर्मवत् पदार्थत्वात् घटवत् ब्रह्मस्वज्ञानाबाध्यप्रकारवत् अधिष्ठानत्वात् शुक्तिकादिवदित्याद्यनुमानेषु परोक्तेषु धर्मिपद
स्वपदघटितेषु धर्मिपदस्वपदयोर्यत्किंचित् धर्मियत्किंचित्संबंधिपरत्वे घटादिसमसत्ताककल्पितधर्मवत्त्वेन सिद्धसाध
नं ब्रह्मपरत्वे साध्याप्रसिद्धिः घटादिधर्मैर्ब्रह्मसमानसत्ताकत्वादेरप्रसिद्धेः ॥ न च दृष्टांते साध्यनिरूपणवेलायां तदेव धर्मि
पक्षे तन्निरूपणवेलायां ब्रह्मैव धर्मिधर्मिपदस्वपदादीनां समभिव्याहृतपरत्वादिति वाच्यं ॥ शाब्दस्याभासोपन्यासस्यानुमा
नं प्रत्यप्रयोजकत्वात् पर्वतोऽरुणवह्निमान् धूमात् यो यो धूमवान् सोऽरुणवह्निमानित्यादिवाक्यस्यानुमानानुपयोगात् येन
रूपेण साध्यं प्रतिज्ञातं तेनैव हेतुव्यापकत्वस्योदाहरणादौ प्रदर्शनीयत्वात् प्रतिज्ञावाक्ये पक्षरूपधर्म्यादिपदार्थघटितरू
पेणोदाहरणादौ दृष्टांतरूपधर्म्यादिपदार्थघटितरूपेण साध्यबोधकतेति शाब्दस्याभासस्यानुमानोपयोगित्वाभावात् ॥ य
तु एवं सति प्रमाणज्ञानं स्वप्रागभावातिरिक्तस्वनिवर्त्यस्वदेशगतवस्त्वंतरपूर्वकं अप्रकाशितार्थप्रकाशकत्वात् अंधकारे
प्रथमोत्पन्नप्रदीपप्रभावदिति विवरणोक्तानुमानासंगतिस्तत्राधिस्वपदस्य पक्षपरत्वे दृष्टांते तद्घटितसाध्याप्रसिद्धिः
दृष्टांतपरत्वे पक्षे तद्घटितसाध्याबाध इति परेणोक्तं तदसत् ॥ तत्रानुमाने स्वपदस्य पक्षदृष्टांतान्यपरत्वस्याविचारणासं
मततयाजिज्ञासाधिकरण एव तादृशानुमाने परोक्तदूषणनिराकरणप्रसंगेऽस्माभिरुक्तत्वेनोक्तदूषणानवकाशा
त् प्रकृते धर्म्यादिपदस्य पक्षदृष्टांतान्यतरपरत्वे घटादिसमानसत्ताककल्पितधर्मवत्त्वमादाय सिद्धसाधनापत्तेर्दुर्वा

रत्वात् ॥ अशरीरंशरीरेष्वनवस्थेष्ववस्थितं ॥ महांतंविभुमात्मानंमत्वाधीरोनशोचति ॥ सपर्यगाच्छुक्रमकायमव्र
णमस्नाविरंशुद्धमपापवि त्यमितिश्रुत्यानिराकारमपिब्रह्मस्नाविराः नाड्यः अव्रणमितिक्षतशरीरत्वव्यापकमव्रणस्नाविर
द्दिमत्वनिषेधेनैवशरीरनिषेधेसिद्धेअकायमिति ॥ व्रणस्नाविरादिशून्यलीलाविग्रहत्वमपिमिथ्यात्वेनपरमार्थत
स्तन्निषेधायेतिबोध्यं ॥ अतएवमायाह्येषामयासृष्टायन्मांपश्यसिनारदसर्वभूतगुणैर्युक्तंनैवंमांद्रष्टुमर्हसीतिनारदं
प्रतिभगवद्वाक्यं ॥ ननुआदित्यवर्णंतमसःपरस्तात्यदापश्यतेरुक्मवर्णंकर्तृ॰सत्यंपरंब्रह्मपुरुषंकृष्णपिंगलंविश्व
तश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात्सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात्पश्यमेपार्थरूपाणि
शतशोथसहस्रशःसर्वतःपाणिपादंतत्सर्वतोक्षिशिरोमुखमित्यादिश्रुतिस्मृतिभ्यःब्रह्मसविग्रहंरूपवत्त्वात्पाचयि
तृत्वात्इत्याद्यनुमानैश्चब्रह्मणोविग्रहसिद्धिरितिचेन्न ॥ आदित्यवर्णमित्यस्याविद्याविलक्षणस्वप्रकाशस्वरूपप्र
तिपादनपरतयाआरोपितशरीरवत्वेनोपासनापरतयाचोपपत्तेरुक्मश्रुत्यनुरोधात् ॥ नचतमसःपरस्तादित्याउपास
नापरत्वानुपपत्तिःउपास्यविग्रहोपलक्षितस्यैवतेनतमसःपरस्तात्त्वेनैवविशिष्टस्यतमसःपरत्वानुक्तत्वात् ॥ यत्तूक्तं
द्विकार्यायांएषोंतरादित्येहिरण्मयःपुरुषोदृश्यतइत्यत्रवर्तमानापरोक्षज्ञानविषयत्वोक्तेःपरमात्मशरीरस्यानारोप्यत्वं
नहियोषित्यग्नित्वंदृश्यतइत्युच्यतइत्युक्तं ॥ तदपिनसत्हिरण्मयशरीरविशिष्टस्यदृश्यतोक्त्याहिरण्मयशरीरस्या
पिदृश्यत्वआभादविद्यमानस्येंद्रियसन्निकर्षसाक्षिसंबंधाद्यभावेनवर्तमानापरोक्षज्ञानविषयत्वाभावात्तत्रदृश्यत्व

स्यश्रुत्यनुक्तस्यानुपपत्त्या दृश्यत्वेनोक्तं शरीरमनारोप्यमिति वक्तव्यं तन्न संभवति नाप्यादित्यप्रतीके ब्रह्मोपासनेऽउपास्य साक्षात्कारनियमाभावेऽपि यस्य स्यादद्धा न विचिकित्सास्तीति श्रुत्या यस्योपास्यमध्या साक्षात्कृतं भवति उपासनाफलं भगवा- सं न वेति विचिकित्सा नास्ति तस्योपास्यभा तद्रूपं क्रतुं किं रूपं क्रतुमासीदिति बोधनेनाहंग्रहेण सगुणब्रह्मोपासनायामुपा- स्य साक्षात्कारनियमात् न च मुख्यशरीरविशिष्टस्य ब्रह्मणः इंद्रियसाक्ष्ययोग्यत्वेऽपि अविद्यमानस्यापि तस्य हिरण्मयशा- रीरविशिष्टस्यादित्यवर्णत्वादिनाविर्भावेनातिशयेन साक्षात्कारसंभवादुपासनाकालीनसाक्षात्कारमादाय दृश्यत इति श्रु- त्युपपत्तेः ॥ योषिताद्यग्निध्याद्युपासनायामग्नीकोपासनात्वेनोपास्यसाक्षात्कारनियमाभावाद्योषिदादावग्नित्वं दृ- श्यत इति न प्रयोगः ॥ अथवा उपासनाया ज्ञानत्वाभावेऽपि इच्छाविषयत्वेन न तादृग्विषयत्वेनारोप्यस्यास्याविद्यमानस्या- पि साक्षिभास्यत्वादादित्यवर्णत्वहिरण्मयत्वादेरारोप्यस्य वर्तमानदर्शनविषयत्वबोधिका दृश्यत इति श्रुतिरुपपन्ना ॥ न चोपासनाविषयत्वेन दृश्यत्वोपपादनेऽपि स्वरूपेणाविद्यमानस्य दृश्यत्वं नोपपादितमिति वाच्यं ॥ दृश्यत इत्यनेन स्व- रूपेण दृश्यत्वस्याबोधनात् ॥ एतेन हिरण्मयवाक्ये यदृश्यत इति क्रियापदश्रवणात् एकवाक्योपात्तवर्तमानत्वार्थका- ख्यातानामेककालीननानाक्रियाबोधकत्वात् यदा यदोपासना तदा तदा दर्शनमिति लाभादुपासनासाध्यदर्शनमादा- य न दृश्यत इति श्रुत्युपपत्तिरिति परोक्तं चोद्यमपास्तं ॥ उक्ताख्यातानामेककालीननानाक्रियाबोधकत्वेऽपि क्रियाणां परस्परं व्याप्यव्यापकभावबोधकत्वस्याभावात् न हि पचति पठति भुंक्ते यदा यदा पाकस्तदा तदा पाक इति बुध्यते तथा

चोपास्ये याज्ञवल्क्येऽपि आम्नायघृणान्त्यापि दृष्टमिति न्यायेनाभरणांतमुपासनाया एवोपासनायाक्येन बोधनादुपासनाफ-
लेऽपि कदाचित्तद्दर्शनसत्त्वेन तदादायदृश्यत इतिश्रुत्युपपत्तेः प्रथमपक्षोपि संभवाच्च ॥ यद्यपि एतन्मितः प्रेत्याभिसंभवितास्मी-
त्यादिश्रुत्योपास्यरूपमासेनुपासनाफलत्वेनोक्तत्वादुपास्यशरीरमावश्यकमितिपरोक्तं ॥ तद्यपि न तावत्ताप्यनारोपितश-
रीरस्याऽऽसिद्धेर्यवारोपितशरीरस्यास्माभिरप्यंगीकारात् ब्रह्मणा सह ते सर्वे इतिस्मृत्यनुसारेणोक्तश्रुतेरारोपितसगुणब्रह्मा-
भिपरत्वस्यापरूपकत्वात् विश्वतश्चक्षुरित्यादिश्रुतिस्मृतीनां ब्रह्मणः सर्वात्मकतया सर्वांतर्यामितया च यान्जीवान्नियतः
मपातितदीयशरीरचक्षुःपाणिशिरआदिभिरेव शरीरचक्षुरादिमत्त्वमित्यनुवादितयोपपत्तेः पाणेः सर्वदेशवृत्तित्वे पा-
दादेस्तदसंभवः पादादेः सर्वदेशवृत्तित्वे पाण्यादेस्तदसंभवः मूर्तयोः समानदेशतायाविरोधात् भगवतः सर्वतः पाणिपा-
दत्वादेरसंभवात्तत्र याप्येवमेव वाच्यमन्यथा भगवत् शरीरं यदि सर्वदेशवृत्ति पाण्यादियुक्तं तर्हि वैकुंठादिदेशविरो-
धाय केन शरीरमास्ति मुक्तिः शरीरिण ईशस्यांतर्यामिरूपेण सर्वकार्येषु भवेशादितित्वदुक्तिरनुपपन्ना न स्यात् ॥
न च सर्वदेशव्यापकं शरीरं परमेवार्थरूपाणीत्यादिस्मृतिसिद्धं वैकुंठस्थ शरीरमाभिरपि एतन्मितः प्रेत्याभिसंभविता-
स्मीत्यादि शास्त्रासिद्धेरिति वाच्यं ॥ सर्वतः पाणिपादादियुक्तोपासकस्यापि त्वन्मते वैकुंठप्राप्यस्थापरमेपार्थरूपाणीत्या-
दिस्मृतेरपि शरीरबोधकत्वेपि ॥ तत्स्य स्वाबोधकत्वस्य ॥ मायाह्येषा मया सृष्टेत्यादिस्मृतिविरोधेनासं-
भवात् ॥ एवमत्रापि मुक्तप्राप्यशरीरस्यैव सत्यत्वौचित्यात्तदुक्तानुमानेप्यारोपितशरीरमादाय सिद्धसाधनं ॥ नच स-

ऽपि पूर्वकालावच्छिन्नेशत्वेन पक्षत्वान्न कालावच्छेदेन सविग्रहत्वसिद्धेरुद्देश्यत्वान्न सिद्धसाधनमिति वाच्यं ॥ तथाप्यन
दिमिथ्याशरीरमादायार्थान्तरस्य दुर्वारत्वात् उद्देश्यासिद्धेः ॥ अपाणिपादत्वेपि जवनत्वग्रहीतृत्ववत् अचक्षुष्कत्वाश्रोत्र-
त्वादिमत्त्वेपि दर्शनश्रवणादिवत् अशरीरित्वेपि सृष्ट्याद्युपपत्तेरुक्तानुमानस्याप्रयोजकत्वाच्च ॥ चक्षुराद्यभावेपि त
त्कार्यकारित्वेन तत्स्थानीयाविद्यापरिणामात्मकेक्षणादेः सृष्ट्यादिप्रयोजकस्य स्वीकारेणोपपत्तेश्च ॥ यत्तु तत्सृष्ट्वा
तदेवानुप्राविशदादिति श्रुत्युक्तं प्रवेशत्वं ब्रह्मविदाप्नोति परमिति श्रुत्युक्तं गम्यत्वं च भगवतो विग्रहमन्तरेणानुपपन्नमि
ति तत्सिद्धिरिति परोक्तं तन्न ॥ स्वसृष्टमन आदिकार्येषु जीवादिविशिष्टरूपेण स्फुरणस्यैव तदनुप्रवेशशब्दार्थत्वाद्व्या
पकस्य तस्य मुख्यप्रवेशासंभवात् तत्स्वरूपतः स्वतः प्राप्तस्यापि अविद्यातिरोधाननिवृत्त्यपेक्षया प्राप्यत्वोपचारस्य पूर्वमे
वोदितत्वान्न तत्र विग्रहापेक्षा ॥ यत्तु तमेवं विद्वानमृत इह भवतीति श्रुतौ सविग्रहस्यैव सर्वनाम्ना परामर्शात्तज्ज्ञान
स्यैव मोचकत्वेन विग्रहसिद्धिरिति तदपि न सगुणविद्यायाः क्रममुक्त्यर्थत्वेनारोपितशरीरबोधकत्वेनान्यथासिद्धेः सा
क्षात् मुक्तिजनकत्वबोधकत्वस्वीकारपक्षेपि तदुपलक्षिततत्त्वज्ञानस्यैव मोचकत्वबोधनात् एतेन देवा अप्यस्य रूपस्य नित्यं
दर्शनकाङ्क्षिण इति स्मृत्यापि न विग्रहसिद्धिरुक्तदिशा तदुपपत्तेः ॥ किञ्च भगवद्विग्रहः किं भौतिकः अभौतिको वा अभौति
कोपि मायिकोऽमायिको वा अमायिकोपि ब्रह्मभिन्नो ब्रह्मणोऽभिन्नो वा भौतिकमायिकावपि स्वकर्मार्जितौ वा परकर्मार्जि
तौ वा स्वकर्मार्जितत्वे संसारित्वापत्तेः परकर्मार्जितत्वे इष्टापत्तिः भक्तानुग्रहार्थं भक्तकर्मार्जितमायिकदेहस्येष्टत्वाद्भगवते

मयापिस्वीकारात् ब्रह्माभिन्नत्वे विग्रहस्य सत्यब्रह्मभेदास्वीकारान्नयापाधिस्यांतः अपाणिपाद इति श्रुतिविरोधश्च ब्र-
ह्माभिन्नस्य सत्यत्वतून्यामायिकत्वस्वीकारे अतोन्यदार्तं नेति नेति श्रुतिविरोधः ब्रह्माभिन्नामायिकभगवद्देहस्वीकारे जी-
वतदेहयोरत्यभेदापत्त्या देहात्मवादपर्यवसानात् चार्वाकमतप्रवेशश्च अभौतिकब्रह्मविग्रहे प्रमाणाभावः ॥ न च नाभ्या आ-
सीदंतरिक्षमिति मूलकारणत्वोक्त्या तस्याभौतिकत्वसिद्धिः शंक्या अग्निर्मूर्धा चक्षुषी चंद्रसूर्यौ च नेत्रे दिशाश्च पादौ-
क्षितिं च इत्यादिश्रुतिपर्यालोचनया अंतरिक्षादीनां नाभ्यादितादात्म्यारोपेण विराट्पुरुषदेहप्रतिपादकतया शरीरस्य
मूलकारणत्वप्रतिपादकत्वाभावेसिद्धेर्नाभ्या इत्यस्य नाभिरित्यर्थकत्वात् ॥ यदपि एको ह वै नारायण आसीन्न ब्रह्मा ने-
शान इति श्रुत्या महाप्रलये नारायणास्थित्युक्त्या नित्यविग्रहसिद्धिः स देव सोम्येदमग्र आसीदिति श्रुत्यनुरोधेन नारं जी-
वसमूहः । यन्नं नियम्यं यस्येति व्युत्पत्त्या नारायणशब्देन मायावच्छिन्नचैतन्यस्यैव भूतभौतिकसकलकार्यस्रष्टृत्वविशिष्ट-
स्योक्तिसंभवात् ॥ न च शरीरविशिष्टे एव नारायणशब्दरूढ्या स देवेत्यादिश्रुतिरेव शरीरविशिष्टपरेति वक्तव्यमन्यथा सं-
ज्ञायां विहितणत्वानुपपत्तिरिति वाच्यं ॥ एकमेवाद्वितीयमित्यादिविरोधेन तथा वक्तुमशक्यत्वात् श्रुतिविरोधेन णत्वादि-
धायकस्मृतिबाधोपपत्तेः नरायणस्यायं नारायण इति व्युत्पत्त्या णत्वोपपत्तेः पूर्वमुक्तत्वाच्च मायादेस्तु मिथ्यात्वेन तात्त्वि-
काद्वैतबाधकश्रुतिविरोधाभावात् मायां तु प्रकृतिं विद्यात् जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवतीति श्रु-
त्या मायादेरनादित्वसिद्धेश्चानादिशरीरे मानाभावाच्च ॥ न चाद्वितीयमित्यस्यासहायमित्यर्थकतया न श्रुतिविरोधः जगत्स्र-

इत्यादिनाशरीरसाक्षित्वं वदता तस्य शरीरसाहाय्यस्य सृष्टौ सत्त्वेन तादृशार्थबाधात् ॥ ननु नारायणशब्दस्य मायोपहि-
तचैतन्यपरत्वे तस्य जीवसाधारण्याद्व्यावर्तकत्वासंभवः शंक्यः मायाशब्देनाखंडमायाग्रहणेन जीवानां मायाप्रदेशानुपा-
विद्योपहितत्वेन व्यावर्तकत्वसंभवात् मायाविद्ययोरभेदपक्षे मायाबिंबत्वमेव प्रतिबिंबव्यावर्तकं वस्तुत एवं सति प्रलयेश-
रीरं विना चैतन्यसामान्यसत्त्वात् ॥ नारायणस्यैव सत्त्वकथनमयुक्तं स्यादिति परेणोक्तं तदसदेव ॥ नारायणस्येक्षणादि
पूर्वकं जगत्सृष्ट्यादेर्वाच्यत्वेन तदर्थं तस्यैव प्रलये सत्त्वोक्तेः एतेनैव स एकाकी न रेमे तस्य ध्यानांतस्थस्य तस्मिन् पुरुषा-
श्चतुर्दश जायंत एका कन्येत्यादिना मूर्तेंद्रियसृष्टिमुक्त्वा तस्य ललाटात् त्र्यक्षः शूलपाणिरजायतेत्युक्तेः शरीरत्रयकारणं
नारायणः इत्युक्तमपि समाहितं एकमेवेत्यादिश्रुत्यनुरोधेन ललाटपदस्य मायापरत्वात् ॥ तदानीं सुसन्न नारायण
शरीरत्वादपरत्वाद्योपपत्तेः न च पुराकल्पापाये त्वकृतमुदरीकृत्य विकृतमिति पुराणाद्युक्त्या महाभवे देहस्य साक्षा-
त्स्थित्यवगमात् भगवतो नित्यशरीरसिद्धिः शंक्या सविकारमूलकारणाविद्यायाः संस्कारात्मनावस्थानस्य तदोदरीकर-
णशब्दार्थत्वात् न चोदरपदस्य मुख्यार्थत्यागः संस्कारात्मना कार्यस्य कारणेऽवस्थानं हि प्रलयः न संस्काररूपापन्नस्य ज-
गतः उदरेऽवस्थानं उदरस्याकारणत्वात् अत उदरपदस्य विनाश्यमानाधारत्वगुणयोगेन मायायां गौणत्वस्य त्वयापि
वाच्यत्वात् मायायास्तु कारणत्वं मायां तु प्रकृतिं विद्यादित्यादिश्रुतिसिद्धमेव वस्तु भगवद्विग्रहस्य नित्यस्यानंगीकारे स-
र्वनित्याः शाश्वताश्च देहास्तस्य महात्मनः परमानंदसंदोहा ज्ञानमात्राश्च सर्वदेत्यादिपुराणादिवचनविरोधः इति तदपि

न ॥ नित्याः प्रलयपर्यंतस्थायिनः आभूतसंप्लवं स्थानममृतत्वेन भाष्यत इति न्यायात् तस्यैवार्थस्य विवरणं शाश्वता
इति योगधारणायाद्य इति पुराणवचनेन श्रीकृष्णादिदेहस्य प्रलयपर्यंतस्थित्यभावावगतावपि देहस्य न ह्रस्वोपि तत्सजा
तीयदेहांतरं जनयित्वा भक्तवात्सल्येन प्रदर्शनमानत्वात् उपासनातिशयेन तज्जातीयादेहाः प्रलयपर्यंतं सर्वदा भक्तैर्द्र
ष्टुं शक्याः परमानंदसंदोहाः दुःखभोगानायतनाः ज्ञानमात्राः ज्ञानमात्रप्रधाना आवरणशून्या इति यावत् रघुनाथादिदेहे
रोदनाद्यावरणकार्यं तु नावरणेन किंतु ब्राह्मणशापाद्यैश्वर्यसूचनायैव लोकदृष्ट्यैवेति तादृशपुराणवचनार्थत्वात् ॥
अत एव भगवद्विग्रहो जडः ततो भिन्नश्च ॥ यत्तु आनंदरूपममृतं यद्विभाति आश्रणरवात् स एव आनंदः मोदो दक्षिणः पक्षः य
दात्मको भगवान् तदात्मिकाव्यक्तिः किमात्मको भगवान् ज्ञानात्मक ऐश्वर्यात्मक इत्यादिश्रुतेर्भेदाभावेपि यथाकारादेः
कुंडलाभेदेपि तयोर्विशेषबलात् यथा अहिः कुंडलीति व्यवहारः तथा ब्रह्मशरीरयोरपि विशेषस्वीकारेण ब्रह्मशरीरी-
ति व्यवहारोपपत्तिरिति परोक्तं तन्न ॥ संयोगविशेषविशिष्टस्याहेः कैवल्याद्धित्वविशिष्टात् भेद एव संभवति ॥ अत एव
भट्टादिमते गुणगुण्याद्योर्भेदाभेदस्वीकारः घटत्वनीलत्वादिरूपभेदेन तदुपहितयोर्भेदसंभवात् प्रतीयमानत्वेनाभेद
स्यापि संभवाच्च न चाभेदस्यैव विशेषेति नाममात्रमेवेति विशेषस्यैवासिद्धेः अस्तु वाभेदान्योपि विशेषः तथापि ब्रह्मतच्छ
रीरयोर्न तत्संभवः स हि अहिकुंडलन्यायेन विभिन्नधर्मोपहितयोरेव वाच्यः अन्यथा तद्व्यक्तिस्तद्व्यक्तिमतीत्यादिप्रत्यय
व्यवहारयोरपि विशेषकल्पनप्रसंगमात्रापातात् ॥ न च ब्रह्माभिन्नशरीरवृत्तिब्रह्मत्वान्यतशरीरत्वादिकमस्ति नानाभा

भावात् चेद्शावदत्वापयपित्वं शारीरत्वमिति हि शारीरलक्षणं पृथगवदंति तस्य ब्रह्मवृत्तित्वेन निष्कलं निष्क्रियमिति श्रुति
विरोधः नच प्रकृतां शक्तिं प्रयोनिषेधपरा सा श्रुतिरिति वाच्यं ॥ संकोचे प्रमाणाभावात् सावयवत्वेन विनाशित्वापत्तेश्चन
च श्रुतिबलात् सावयवोपि भगवान् हि प्रहो नित्यः शरीरीत्वबोधकश्रुतेर्गतेरुक्तत्वात् विग्रहांगीकारे अपाणिपाद इति श्रुति
विरोधाच्च न चासुखमिति श्रुतौ प्राकृतसुखनिषेधवदपि प्राकृतावयवनिषेधपरता अन्यथा शृणोति पश्यतीति वाक्य
विरोध इति वाच्यं ॥ आनंदादिरूपताबोधकश्रुतिविरोधेन तत्र संकोचवत् अत्र संकोचे कारणाभावात् श्रवणत्वादिजाति
विशिष्टशक्तस्यापि शृणोत्यादेः शब्दविषयकत्वरूपशक्यगुणेन वा साक्षिणि प्रयोगोपपत्तेः ॥ अन्यथा त्वन्मतेपि भगवति
श्रवणचक्षुरादिसाध्यज्ञानानंगीकारेण न हि विरोधस्य दुर्वारत्वेव असुखमित्यादौ विषयसंयोगजन्यवृत्त्याभिव्यक्तविंबरू
पसुखत्वविशिष्टस्यैव निषेधात् सुखरूपस्य ब्रह्मणः नास्ति सुखं यस्मिन्निति व्युत्पत्त्या सुखशून्यत्वबोधनेनाविरोधाच्च सं
कोचाभावाच्चोक्तश्रुतेः यदात्मकोपत्स्वरूपेणात्यंताभिन्नस्वरूपे भगवानीश्वरस्तदात्मिका तत्स्वरूपेणात्यंताभिन्नास्य व्यक्तिर
भिव्यक्तिपरोक्षा निरूपमात्मा ज्ञानात्मकः ज्ञानस्वरूपात्यंताभिन्नः ऐश्वर्यात्मकः नित्यनिरतिशयानंदस्वरूपात्यंताभिन्नस्त
था चान्विदात्माप्युक्तस्वरूपाभिन्न इति जीवब्रह्मस्वरूपयोरभेदप्रतिपादकाभावस्तनोज्ञानानंदरूपत्वप्रतिपादनपरत्वेन वि
ग्रहाप्रतिपादकत्वात् आप्रमाणत्वात् सर्वं पूर्णानंद इति श्रुतेर्लीलाकल्पितः भगवत्स्वपर्यंतः सर्वोपि देहः पूर्णत्वान्न ब्रह्मदेहत्वस्य धर्मि
रत्वादन्यथा प्रमाणत्वादिमयदेहस्यानंदरूपत्वानुपपत्तेः नापि विविधनश्वरः गुरुरूपः पुराण इति वचनं अभिन्न इति नित्यत्वेन आर्यं

स्वरूपात्मकविचित्रशक्तेः कार्यस्यसंभावितत्वेनियामकत्वेपिईश्वरस्वरूपाभिन्ननित्यदेहाप्रयोजकत्वात्तस्यानित्यत्वेनशक्तिनियम्यत्वाभावात् ननुनित्यत्वादिकंब्रह्मस्वरूपमेवेतित्वयापियान्यमन्यथाब्रह्मणोनित्यान्यत्वसाधापत्तेस्तथाच सतिविग्रहस्यापिब्रह्मस्वरूपतासंभवेनतस्यनित्यसत्यत्वादिसंभवोनविरुध्यतइतिचेन्नर्हिंजितंविग्रहस्यारोपितत्वआदिभिः सोपादानकद्रव्यस्यचेष्टापदंत्वात्तथाचेनशरीरपदशक्यतायास्तंत्रांतरसिद्धत्वात्तस्यचब्रह्मरूपसंभवात्तत्रशरीरमितिपरिभाषामात्रत्वात्भगवत्स्वरूपेनित्यानंदादिर्हितीयात्मकेशरीरमितिनामत्वंत्वयाकृतंतदिष्टमेवास्माकमितिश्रीदोदाक्षिणःपक्षइत्यादेरानंदमयकोशपरतयाब्रह्मपरत्वाभावस्यानंदमयाधिकरणएवप्रतिपादनात्कृतंब्रह्मविग्रहपरत्वं ॥ किंचभगवद्विग्रहोविनाशीमहत्वेसतिरूपवत्वात्विग्रहत्वात्संमतवदित्यनेनानुमानेनाप्यनित्यत्वंरूपमात्रंपरमाण्वादौपरमतेव्यभिचारीति महत्वेसतीतितावन्मात्रमात्मादौव्यभिचारीतिरूपवत्वादीतिनचानित्यत्वश्रुतिबाधःश्रुतेरन्यथासिद्धेरुक्तत्वात् ॥ नचाप्रयोजकत्वंकृष्णरामादिभगवद्विग्रहेनवनीरदश्यामइत्यादिनानीलरूपश्रवणात्नीलत्वपीतत्वरक्तत्वतद्व्याप्यजात्यवच्छिन्नप्रतिपार्थिवीत्वेनकारणत्वान्नीलादिरूपसामान्यस्यपृथिवीजन्यत्वेनब्रह्मविग्रहेनित्यरूपंतावन्नसंभवतिजन्यंरूपंतुविग्रहेकार्यत्वजन्यत्वसंपादकमेवतथाहितत्विग्रहकारणरूपात्पाकाद्वावक्तव्यंआद्येविग्रहस्यकारणजन्यत्वसिद्धिः अंत्येपाकात्पूर्वंरूपांतरंवक्तव्यंतथाचकृष्णादिविग्रहस्यनानारूपतापत्तिर्नहिसकदाचिन्नवनीरदश्यामःकदाचिदिंद्रनीलश्यामइतिसंभवतितथासतितध्या

नस्याप्यवच्छिन्नत्वापत्तेः ॥ न च नवनीरदश्यामलमेवोपास्यं नवनीरदश्याममिति गौतमीयतंत्रादौ तथैवोक्तत्वात्तथा च-
श्रीकृष्णादिविग्रहे एकैकजातीयमेव रूपमुपास्यमिति प्रतिविग्रहं पाकजनानारूपस्वीकारे विनोपासनाव्यवस्थेति वा-
च्यं एवमपि पूर्वरूपनाशकरूपांतरोत्पादकतेजःसंयोगविशेषरूपः पाको ब्रह्मणि जायत इत्यत्र नियामकाभावात् सर्गा-
दौ जायत इति वक्तव्यं ॥ तथा च रूपरसगंधादीनां चतुर्णामुत्पत्तिनाशकल्पने गौरवादनादिरूपादिविशिष्टं पूर्वदेहं विन-
श्य तादृशमुत्तरं देहं पाकेन जनयतीत्येवोच्यतां अत एव ब्रह्मण्येव देवकीपुत्रश्चिन्मयेऽस्मिन् महाविष्णौ जाते दशरथे हरौ
इत्यादिश्रुतयः तदात्मानं सृजाम्यहं जन्म कर्माभिधानानि संति मेंऽग सहस्रशः बहूनि मे व्यतीतानि जन्मानि तव चार्जुनेति
स्मृतयश्च न बाध्यंते ॥ एवं रूपसमानाधिकरणमहत्त्वस्यापि जन्यत्वनियमात् जन्यमहत्त्वेन स्वाश्रयावयवमहत्त्वं बहुत्व-
मन्यो वा हेतुः घटादौ कपालमहत्त्वात् त्र्यसरेणौ द्व्यणुकबहुत्वात् तूलपिंडादावयवप्रचयाच्च महत्त्वोत्पत्तेस्तथा च विग्रहे
महत्त्वोत्पत्तिं प्रति तावदुक्तकारणान्यतमहेतुत्वावश्यकतया सावयवत्वेन विग्रहे जन्यत्वं तेन च विनाशित्वमावश्यकं न चो-
क्तानुमाने सावयवत्वमुपाधिरिति वाच्यं ॥ तस्य साधनव्यापकत्वात् पक्षीभूतविग्रहे प्राकृतत्वस्य वादिविप्रतिपत्त्या संदि-
ग्धत्वेऽपि संदिग्धोपाधिना प्रकृतानुमानदुष्टत्वासंभवः अनुकूलतर्काणां प्रतिपादितत्वात् अनुकूलतर्कविरह एव तस्य दू-
षकत्वात् एवं सावयवत्वादपि विग्रहो न नित्यः ॥ अत्र द्रोणं बृहस्पतेर्भागं द्रौणिं रुद्रांशसंभवं ॥ दुर्वाससं शंकरस्यांशमित्यादि-
ना जीवानामप्यंशोक्तेः यस्यायुतायुतांशांशे विश्वशक्तिरवस्थिता परब्रह्मस्वरूपस्य प्रणमामि तमव्ययं विष्टभ्याहमिदं

कृत्स्नमेकांशानस्थितोजगदित्यादिनापरमेश्वरस्याप्यंशोक्तेर्जीवेश्वरयोर्व्यभिचारइतिवाच्यं॥ जीवेश्वरयोरंशांशोपाधि
कृतयास्वाभाविकत्वाभावात्अंशव्यवहारस्यभाक्तत्वात्प्रदीपवदावेशास्तथाहिदर्शयतीतिसूत्रेकायव्यूहस्थलेउपासना
महात्म्येनमनश्चक्षुराद्यंतरसृष्टेरुक्तत्वात्द्रोणादिशरीरावच्छिन्नंयत्प्रमूहस्यत्यादिशरीरावच्छिन्नमनोजन्यचक्षुरादि
कंतदुपाधिकआत्मैवव्यूहस्यत्यांशः मायापरिणाममनआद्युपाधिकहिरण्यगर्भादिरूपेणेश्वरस्यबहुभवनस्यश्रुत्युक्त
त्वात्हिरण्यगर्भादयस्तदंशाइतिव्यवहारः एतेनभगवल्लोकादेरपिनित्यत्वमपास्तंनचातोहिवैष्णवालोकानित्यास्तेवै
तन्नात्मकाः तत्प्रसादात्परांशांतिंस्थानंप्राप्स्यसिशाश्वतमितिप्रमाणविरोधः शंक्यः आत्मावाइदमेकएवाग्रआसीन्नान्य
त्किंचनमिषत्एकोहवैनारायणआसीत्नब्रह्मानेशानोनाग्नीषोमौनेमेद्यावापृथिवीननक्षत्राणिनसूर्यइत्यादिश्रुतिभिः
प्रलयेसंकल्पकार्यसंस्कारोपहितमायावच्छिन्नचिन्मात्रसत्तामुक्त्वासईक्षतलोकान्नुसृजाइतिसइमान्लोकानसृजतइत्या
दिनासर्वलोकघटितप्रपंचसृष्टेरुक्तत्वात्यतोवाइमानिभूतानीत्यादिनासुषुप्तिकालेसकलेविलीनेएतस्मादात्मनः स
र्वेलोकाः सर्वेवेदाः सर्वेदेवाः सर्वाणिभूतानिव्युच्चरंतीत्यादिश्रुतेः भूतत्वावच्छेदेनब्रह्मजन्यनाश्यत्वकल्पनेलाघवादभौति
कवैकुंठलोकेमानाभावात्अनादित्वेनश्रुतिसिद्धमायादिभिन्नजडत्वावच्छेदेनलाघवात्ब्रह्मोपादानकत्वेनसोपादानकमा
त्रस्याविद्याकल्पितत्वेनाविद्यानाशनाश्यत्वेनचजडसामान्यस्यविनाशित्वसिद्धौपूर्वोक्तवाक्यस्थनित्यादिपदस्यावांत
रप्रलयपर्यंतस्थायित्वपरत्वात्॥ यदपिचंद्रिकायांश्रीविद्यादेरनित्यत्वाद्याभासेपितथाध्यासपत्तनिर्विशेषब्रह्मणएवहिरण्यश्मश्रु

त्यादिना ध्यानसंभवेन सविशेषब्रह्मणः साधकान्न प्रत्यर्थमौक्तिकरूपपरिग्रहात्क्रियस्य केत्युक्तं तदसत् सगुणब्रह्मणः हिरण्यश्म
श्रुत्यादिना ध्यानस्य यथार्थस्याविधेयत्वसंभवे निर्विशेषतया ध्यानात् कथं तस्य यथार्थ्याविधेयत्वासंभवात् तदुपपादितं चैत
त्प्राक् इति दिक् ॥ पञ्चोक्तं चान्द्रिकायामस्याधिकरणस्यान्तर उपपत्तेरिति द्वितीयपादीयाधिकरणेन पौनरुक्त्यमिति तदप्यस
त् अन्तर उपपत्तेरित्यधिकरणानि येये य एषोऽक्षिणि पुरुषो दृश्यत इति विषयवाक्ये अक्षिणि पुरुषो दृश्यत इति यथाश्रुतं प्रतिबिंब
एव स्वरसमिति प्रतिबिंबं पूर्वपक्षः अन्तरादित्यवाक्ये तु न प्रतिबिंबं पूर्वपक्षः संभवति आदित्ये प्रतिबिंबदर्शनस्यासाक्षित्वात्
तथा च प्रथमोपस्थितप्रतिबिंबानुसारेणात्मादिश्रुतिब्रह्मलिंगानि तत्रैव कथंचिद्व्याख्येयानीति नैवमन्तरादित्यविद्यान्तर्ग
ताक्षिवाक्येपि य एषोऽक्षिणि पुरुषो दृश्यते सैव ऋगित्यादावपि प्रतिबिंबसंभवात् परमेश्वरनिर्णयो न स्यादिति चेन्मास्तु एतद
धिकरणे तस्यापि विषयत्वोपपत्तेः ननु प्रथमश्रुतायामविगीतयत्रामुत्रोत्तराभिर्रश्मिभिरेषोऽस्मिन् प्रति [illegible]
नाप्येतत्तु यद्यस्यन्यायप्रसादेवं प्रकृतेपि किं न स्यात् न भवेदेवं य एषोऽक्षिणि पुरुषो दृश्यते सैव ऋगि [illegible]
त्यादि ब्रह्मलिंगसमाम्नानात् प्रकृते तथा संभवति अन्तरादित्यादिश्रुतयोरेव आत्मेति होवाचेतरभय [illegible]
स्तथा च नाम ब्रह्मेत्युपासीतेत्यादावपि नस्यार्थे सन्नापेक्षित्वस्य द्रष्टा दृष्टिसन्निधानार्थत्वात् यद् [illegible]
एवमानीत्यादावपि ति यद्यप्यन्यस्य तथापि पूर्वश्रुतस्य तथात्वस्यानुपपत्तौ अपि अविरुद्धदृष्टिविधान [illegible]
धानार्थत्वेनोपपत्तेः पौनरुक्त्यं रित्यधिकरणोक्तानि करणार्थत्वेनास्य ब्रह्मलिंगानां समन्वया [illegible]

स्य प्रवृत्तत्वात् अस्य च स्पष्टब्रह्मलिंगशब्दसमन्वयार्थतायाः पूर्वस्मिन्नोपपादितत्वाच्च न पौनरुक्त्यं अंतस्तद्धर्मोपदेशादित्यत्राक्षिप्ति
पुरुषादित्यत्र इत्यस्य आनिविष्टप्रस्तारस्यैकदेशत्व जीवदेवतादि पूर्वपक्षो भाष्ये दर्शितः अत्रेतरद्वपि प्रश्नस्यैवं भवत्यनुप्र
दर्शनार्थतायाः भाष्यटीकायां दर्शितत्वात् ॥ आनंदतीर्थीयास्तु य एतस्मिन्हिरण्मये नात्वस्य निरुक्ते भिन्न इत्यानंदमयसूत्रस्थः
हिरण्मयत्वमुक्तं तच्च अंतःप्रविष्टं कर्तारमेतमंतश्चंद्रमसि मनसा चरंतं सह वै संतं न विजानंति देवाः इंद्रो राजा जगतो य ईशे सप्त
युंजंति रथमेकचक्रमित्यादावंतस्थस्य श्रूयते सचांतस्थः इंद्रादिश्रुतिभिः सप्ताश्वत्वादिलिंगैश्च विष्णोरन्य एवेत्यानंदमयो-
पि न विष्णुरित्यानंदमयाक्षेपेणास्याधिकरणस्य संगतिः अत्रांतस्थः किमिंद्रादिः किंवा विष्णुरिति चिंतायां यदर्थं किमिंद्रादिश्रु
त्यनुसारेण समुद्रव्यापित्वादिलिंगमन्यथा नेयमुत विपरीतं तदर्थं किं श्रुतिर्निरवकाशा लिंगं तु सावकाशमुत विपरीतं तथा
लिंगस्य निरवकाशत्वेपि किं श्रुतित्वप्रयुक्तप्राबल्यं बलवत् किं वा निरवकाशत्वप्रयुक्तं प्राबल्यं प्रबलमिति चिंतायां इंद्र एवांत
स्थः इंद्रो राजा अहमिंद्रमग्निमित्यादींद्रश्रुत्यभ्यासेनापानेतारमित्यादिवरुणादिलिंगानां बृहस्पत्यादिश्रुतीनां बाधादित्येकः पूर्वप
क्षः सूर्य एवांतस्थः सप्त युंजंति रथमेकचक्रमेकमिति निरवकाशलिंगसहितया सवितारं बृहस्पतिमित्यादिसावित्रश्रुत्या इंद्रा
दिश्रुतीनां स्वोचितैश्वर्यादिमत्त्व सूर्ये संभवादित्यपरः वरुण एवांतस्थः वरुणलिंगस्यांतेश्रवणात् पूर्वदौर्बल्यन्यायेन तेनेत
रबाधादित्यपरः इति सिद्धांतस्तु लिंगादिभ्यो बलवती श्रुतिर्यद्यपि च स्वतः अवकाशोज्झितो लिंगैः सावकाशात्तु बाध्यते यदु
पैन्द्रागार्हपत्यश्रुतिबले इत्यादौ श्रुत्या लिंगबाधेन श्रुतेरुत्सर्गतो बलवत्त्वं तथापि यथा येनेनाभिचरन् यजेतेत्यादौ श्येनशब्दो

अन्यत्र भूतोपि यथा वैश्ये नोनिपत्याद्वेदिति वाक्यशेषात् कस्यस्येन वा दरपस्यस्येने ऽन्नपपत्या पागपरः तथा समुद्रांत स्खला
दीनामन्यत्रासंभवाद्दिद्वाद्वित्राद्यापि श्रुणपरा एव लोके श्रुतौ स्मृतौ चैव पवि श्रुलिंगत या स्थितं समुद्रान्तरपस्थान पूर्वकं कथम
न्यगां एवं चानर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायेन निरवकाशलिंगेन वैदिकतपास सर्वथा बाधायोगेन सावका
शश्रुति बाध इति रीत्यैतदधिकरणत्वमाहुः तत्रोच्यते आनंदमयाक्षेपेण संगतिस्तावद् दुक्ताउकविषयवाक्ये अदृश्यत्व-
मिथ्यातः प्रविश्य कर्तारमिति कर्तृत्वं सर्वे वेदा यत्रैकं भवंतीति ब्रह्मयोनित्वं अंतः प्रविष्टः शास्ता जनानामित्यंतर्यामित्वम्
शासितृत्वं चेत्याद्यन्यनिष्ठमप्यवगम्यते इत्यतो जन्माद्यधिकरणशास्त्रयोनित्वाधिकरणांतर्याम्यधिकरणादिने काक्षेपकस्य-
कथमेकमात्राक्षेपकत्वोक्तिः तदनाक्षेपेन च तैरेव धर्मैः परमात्मासाधारणतया कैर्वक्ष्यमाणैश्च परमात्मपरत्वनिश्चयात् पूर्वपक्षा
नुत्थितिः स्यात् यदपि आनंदमयशब्दे कश्चिदन्यत्र निरूढेषु कामम् परत्वाद् ब्रह्मशब्दस्यान्यत्रार्थविशेषेण निरूढेन ब्रह्मणोऽरूप
रोविज्ञातुमिति प्रत्यवस्थानात् संगतिरिति चं द्विकाराक्तं तदपि न सत् तथा सत्यानंदमयशब्दस्यान्यत्र प्रसिद्धत्वनायस
मन्यपरप्रथमपादासंगतिप्रसंगात् अन्नमयादिशब्दानामप्यानंदमयाधिकरणेऽप्रकृतपरत्वात् श्रुतिशब्देनैतेषां चान्य
त्र निरूढतया तस्यान्यत्र निरूढमात्राविषयत्वौचित्यात् ॥ यत्तु अन्यत्रासंभावितात् अयं पूर्वेति च भूताभिरसाद् दृष्टांत दु-
ष्टत इति योगबलानत्र तन्निर्णयेपादिं श्रादिवाक्ये श्रुतौ योगारूढे: पूर्वाधिकरणवैलक्षण्येन पूर्वपक्षोत्थानात् संगतिरिति चं
द्विकाराक्तं तदपि प्राणशब्दे न्यत्र निरूढे श्रुतौ योगारूढे व्यभिचारादयुक्तं आनंदमयशब्दस्य नामत्वे लिंगत्वे क्रमात् कृतयो

अथ यत्र संगतत्वेपि प्रथमातिक्रमे कारणाभावात् प्रथमतो निरूपणमित्यानंदमयशब्दस्य नामलिंगोभयात्मकत्वमाश्रि
त्य पादद्वयसंगतिपरस्य ग्रंथविरोधाच्च पदद्वयपादेपि ब्रह्मशब्दादानंदमयो ब्रह्म न तद्ब्रह्मादिशब्दादंतस्थ इंद्रादिः न तु ब्रह्म त
च्छब्दाभावादिति पूर्वपक्षित्वांतन्यायेन पूर्वपक्षिते पूर्वाधिकरणोक्तं श्रुत्या निर्णयमपोद्य लिंगेन निर्णय उच्यत इति संग
तिरिति चंद्रिकायामुक्तं तदपि न सत् तथा सत्यानंदमयपदाभ्यस्तब्रह्मशब्दाभ्यासेनेव प्रकृते इंद्रसवितृशब्दाभ्यासस्त्वे
नेंद्रसवितृपूर्वपक्षसंभवेपि ॥ वरुणश्रुत्याद्यभ्यासाभावेन वरुणपूर्वपक्षानुत्थितिप्रसंगात् अंतस्थेपि विष्णुनिष्ठ
यज्ञशब्दाभ्यासेन ब्रह्मपरत्वस्यापि संभवेनेंद्र एवेति पूर्वपक्षानिर्णायकत्वाच्च यदभिमंत्रवर्णिकसूत्रे यो वेद निहितं गु
हायामित्यानंदमयस्यांतःस्थत्वमुक्तं तदिहाक्षिप्य समाधीयत इति संगतिरिति चंद्रिकायामुक्तं तदपि न सत् गुहानि
हितत्वांतस्थत्वयोर्भिन्नत्वेनांतस्थत्वमात्रे गुहानिहितत्वाप्रत्यभिज्ञानात् अंतस्थवाक्यशेषे देवानां बंधो निहितं गु
हास्विति श्रवणं तत्प्रत्यभिज्ञापकमिति चंद्रिकोक्तं तु न सत् तत्रानंतशब्दसमानार्थकेन यज्ञो वै विष्णुरिति श्रुतिसि
द्धेन यज्ञशब्देनामृतस्य प्राणं यज्ञमेतमिति पूर्वाधिकरणनिर्णीतब्रह्मपरनाकप्राणशब्दसमभिव्याहृतेनाविरुद्धत्वा
त् एकवचनांतबहुवचनांतयोः प्रत्यभिज्ञानुपपत्तेश्च साक्षात् गुहानिहितत्वाक्षेपेणैवोत्थानसंभवे भाष्योक्तादृश्यत्व
द्वारकतदाक्षेपप्रकारासांगत्यप्रसंगाच्च न च साक्षात्तदभिधाने अदृश्यत्वेन विष्णुपरत्वशंका स्यादिति तद्वारणाय तदा
क्षेप इति कल्पनमपि युक्तं तथा सति प्रागुक्तकर्तृत्वादिनापि विष्णुपरत्वशंकानिवारणाय तद्वारकत्वस्यापि वक्तव्यत्वे

तदनुक्तौ बीजाभावात् वस्तुतस्तु अंतस्थे सहैव संतं न विजानंति देवा इति देवा ह्येव तां केस्तस्य सर्वादरपत्यां निपततां यो

देवाः स्वपिदन्नपश्यदिति अभिहितमिति तस्मिन्देव इत्युक्त्वा अन्योन्यविरोधेन चतन्मुखेन नोक्ताक्षेपसंगतव इति नामसमन्वयप्रवे

चास्मिन्पादे अंतःस्थत्वसमन्वयोपि न सम्यक् कृतः तस्य सम्यक्त्वं तु तत्समन्वयपरैः द्राघनेकनामसमन्वयार्थत्वात् फलतो

नामसमन्वयरूपत्वात्पादसंगतिरिति न दोषः सत् न वा सांति सर्वत्र प्रसिद्धोपदेशादित्यत्र सर्वगतत्वसमन्वयस्याप्या

दित्यादिना अससमन्वयरूपस्य कृतत्वात्प्रपादपत्यापत्तेः इंद्रादिशब्दसमन्वयस्याप्यदृष्टत्वलिंगसमर्पणार्थत्वात्फलतो

नामसमन्वयानुपपत्तेश्चेति इंद्रो राजा ब्रह्म इंद्रमग्निमित्यादींद्रश्रुत्या अस्य अनेंद्र एव अंतःस्थ इति निर्धारणायां पूर्वपक्षोऽनु

पपन्नः अस्मदिंद्रमग्निं जगतः प्रतिष्ठां दिवं आत्मानं सवितारं बृहस्पतिं चतुर्होतारं प्रदिशोनुक्लृप्तं वाचो वीर्यं तपसान्वविंदद

ति ॥ तथा इंद्रं राजानं सवितारमेतं वायोरात्मानं कवयो निचिक्युः रश्मिं च तथा अग्निं जगतः प्रतिष्ठां अग्निस्त्वा ऽ अग्ने प्रमुषो

कुदेवा इत्यादिमंत्रेषु सवित्रादिपदानामप्यध्यासाद्यौनानां सत्त्वं जंतिरयञ्चक्रमे एकमिति निरवकाशसवितृलिंगस्य हि त्वे

न सवितृश्रुतेरिंद्रश्रुतितोपि प्रबलत्वात् अतः स्थः सूर्य एवेति द्वितीयपूर्वपक्षस्यापि दर्शितत्वात् वस्तुतः येन चेदेव मापि अया

नेतारमिति वरुणादिलिंगमास्नानादवरुणपूर्वपक्षोऽस्थिति दर्श्य आलिंगस्यांतेश्रवणात् पूर्वदैवत्वेन्ये नेनेनरक्षाथ

तदुक्तौ तारिरिति मंत्रे अर्कोक्तं तु न सत्वस्तु पर्णधर्मानुवाक्ये द्रयाद्धो वृहदपारव्यमंत्रेषु इंद्रस्यात्मानं दशधा चरंतं अंतः समुद्रे

मनसा चरंतं ब्रह्मान्वविंदद्दशहोतारमर्णे अंतः प्रविष्टः शास्ता जनानामेकः सन् बहुधा विचारः शतं शुक्राणि यत्रैकं भ

भवंतिसर्वैर्येदायन्नैकंभवंतिसर्वैर्होतारोयन्नैकंभवंतिसमानसीनआत्माजनानांअंतःप्रविष्टःशास्ताजनानां २ सर्वा
त्मासर्वाः प्रजाः यत्रैकंभवंतिचतुर्होतारोयत्रसंपदंगच्छंतिदेवैःसमानसीनआत्माजनानामितिबहूनांसमुद्रशायि
त्वादिविष्णुलिंगानामुपलंभात्तथाचतुर्होतॄहृदयाख्यमंत्रेषुप्रथमायांऋचिप्रभुरिंद्रमाग्निंजगतःप्रतिष्ठामितिजग
त्प्रतिष्ठात्वादिरूपविष्णुलिंगोपलंभाद्द्वितीयायामृचितृतीयायांचऋचिअंतःप्रविष्टंकर्तारमेतंत्वष्टारं २ रूपाणिविकु
र्वंतंविपश्चिंअमृतस्यप्राणंयज्ञमेतंचतुर्होतॄणामात्मानंकवयोनिचिक्युःअंतःप्रविष्टंकर्तारमेतंदेवानांबंधुनिहितं
गुहासुअमृतेनक्लृप्तंयज्ञमेतंचतुर्होतॄणामात्मानंकवयोनिचिक्युरितिकर्तृत्वादिरूपाणांविष्णुलिंगानांयज्ञश्रुत्यभ्या
सस्यचोपलंभात्विष्णुपरत्वस्यैवसंभवेनतद्वाधेनअपांनेतारमित्येकलिंगमात्रेणवरुणएवेतिपूर्वपक्षेनियाम
काभावात्नचवरुणलिंगस्यांतेश्रवणांगमकंषष्ठ्यांतृहृदयमंत्रेषुससदश्यामृचि पतंगमक्तमसुरस्यमाययाहृदाप
श्यंतिमनसामनीषिणःसमुद्रेअंतःकवयोविचक्षतेमरीचीनांपदमिच्छंतिवेधसइतिअपांनेतारमित्यस्योत्तरमंतः
समुद्रेइतिविष्णुलिंगस्यश्रवणाद्विष्णुलिंगस्यततोप्यंत्यत्वात्सहैवसंतंनविजानंतिदेवाइत्यनेनोक्तस्यदेवादृश्य
त्वस्येंद्रादिष्वसंभवाच्चउक्तमंत्रेषुभद्रंपश्यंतउपसेदुरग्रेतपोदीक्षामृषयःसुवर्विदःततःक्षत्रंबलमोजश्चजातंतदस्मै
देवाअभिसंनमंत्वितिद्वादश्यामृचिआदित्यसकाशात्क्षत्रादिजातमित्यभिधायश्वेत २ रश्मिंबोभुज्यमानंअपांने
तारंभुवनस्यगोपाःइंद्रंनिचिक्युःपरमेव्योमन्नितित्रयोदश्यामृचिआदित्यस्यैवअपांनेतृत्वस्यवृष्ट्यादिकर्तृत्वरूपस्यो

क्तत्वात् नतेन सवितृश्रुतिबाधः संभवति सर्वनियंतरि विष्णौ अपां नेतृत्वस्य संभवात् उक्तमंत्रेष्वयमर्थः दशहोतृ
हृदयं परमात्मा नतत्सुन्वते सुपर्णं घर्ममित्यादिना अहं मंत्रद्रष्टा इंद्रस्य परमैश्वरस्यात्मानं निजस्वरूपं परिवेद परितः
सर्वत्रावस्थितं जानामि कीदृशमात्मानं सुपर्णं सुपर्णसदृशं स्वत एव भासमानं घर्मं अन्यवस्तुनो दीपकं वनं सर्वदुः
खराहित्येन कमनीयं दशभाविति स्रुगित्यादि दशहोतृमंत्रप्रतिपादितैराकारैः चरंतं लोके व्यवहरंतं अंतः समुद्रे ब्रह्मांड
सृष्टेः पुरा सर्वत्र व्याप्यावस्थितो योयं जलसंघः सोयं समुद्रः तस्य मध्ये मनसाचरंतं इदं सर्वं जगत् सृजेयेत्येवंरूपेण मनो
वृत्तिविशेषरूपेण संकल्पेन सह प्रवर्तमानं ब्रह्मा चतुर्मुखः प्रजापतिः अर्णे अर्णवे यथोक्तसमुद्रे दशहोतारं दशहोतृमंत्र
प्रतिपाद्यरूपेणाविर्भूतं परमात्मानं अन्वविंदत् सृष्टिसाधनत्वेनान्विष्य लब्धवान् सोयमेवंविधः परमात्मा जनानां स
र्वेषां शास्ता अंतर्यामिरूपेण नियामकः सन् हृदये प्रविश्यावस्थितः स चांतर्यामी स्वकीयेनेश्वररूपेणैक एव सन् पुनर्जी
वरूपेण बहुधा भूत्वा विचारः विविधाचरणवान् भवति शतं शुक्राणि शतसंख्योपलक्षितान्यनंतानि सूर्यचंद्रनक्षत्राणि
ज्योतींषि यत्र यस्मिन् परमात्मनि एकीभवंति एकत्वं प्राप्नुवंति सर्वे ऋग्वेदप्रभृतयो वेदाश्चत्वारः नानाविधशाखोपेता
यत्रैकीभवंति होतारश्चतुर्होमकर्तारः सर्वे यजमाना दशहोत्रादिमंत्रा यस्मिन्नेकत्वं प्राप्नुवंति यथा बुद्बुदा जलमध्ये
समुत्पद्य किंचित्कालमवस्थाय विलीयमाना जलमेवैक्यं प्राप्नुवंति तथा सर्वे भावाः परब्रह्मण एवोत्पद्य तत्रैवस्थित्वा
विलीयमाना तेनैकतां गच्छंति स तादृश ईश्वरः सर्वेषां जनानां आत्मा स्वरूपभूतः सन् मानसीनः योगयुक्तेन मनसा उ

पलभ्यो भवति सर्वे जीवा योगेन निरुद्धचित्ताः सन्तो जगदीश्वरं स्वस्वरूपत्वेन साक्षात्कुर्वन्ति न तु भेदेनेति पूर्वोक्तः स
र्वोऽप्यर्थ उपपन्न इत्युपसंह्रियते सर्वाः प्रजा देवमनुष्यादयो यत्र यस्मिन् योगिप्रत्यक्षगम्ये चैतन्यैकरसे परमात्मन्येकी
भवन्ति चतुर्होतृमन्त्राश्च सर्वेऽपि स्वप्रतिपाद्यैर्देवैः सह यस्मिन्ब्रह्मणि संपदं सम्यगेकीभावं प्राप्नुवन्ति स तादृशो मानसी
नः मानसप्रत्यक्षगम्यो जनानामात्मा ऋचां भेदादपुनरुक्तिः ब्रह्मा च तुर्मुखः इन्द्रं परमैश्वर्ययुक्तं परमात्मानं तपसा-
न्वविन्दद्विष्णुलब्धवान्कीदृशमिन्द्रं जगतः प्रतिष्ठामग्निं सर्वस्य जगत आधाररूपो यो यं च चतुर्होत्रीयचित्तिरूपोऽग्नि
स्तत्स्वरूपं दिव आत्मानं सवितारं बृहस्पतिं चतुर्होतारं प्रदिशोऽनुक्रमं संयाचो वीर्यं तपसान्वविन्ददिति मन्त्रशेषः दि
वः द्युलोकस्य प्रकाशकत्वेनात्मवत्स्थितो यः सविता तद्रूपं तथा बृहस्पतिर्यो देवगुरुस्तद्रूपेणावस्थितं सर्वेषु प्रदेशे
ष्वनुस्थिरं चतुर्होतारं पृथिवी होतेत्यादिमन्त्रस्वरूपं यावो वीर्यं सर्वस्य वेदयान्वः सारभूतं कवयो विद्वांसो वेदशास्त्रपार
गताश्च तुर्होतॄणां चतुर्होतॄ इत्यादिनाभिधीयमानानां सर्वेषां होतृमन्त्राणामात्मानं स्वरूपभूतं परमेश्वरं निचिक्युर्नि
तवन्तः कीदृशमात्मानमन्तः प्रविश्य जीवरूपेण शरीरेषु प्रविश्यावस्थितं कर्तारमेतं लौकिकवैदिकसर्वक्रियानिष्पाद
कं गर्भेषु देवतिर्यङ्मनुष्यादिरूपाणि विविधानि निष्पादयन्तं तत्तत्स्वरूपं विपश्चिन्तं तद्रूपनिर्माणप्रकाराभिज्ञं अमृत
स्य प्राणं मरणरहितस्य परमात्मनो व्यवहारहेतुभूतप्राणोपाधिस्वरूपं यज्ञमेतं सर्वैरनुष्ठीयमानत्वेन दृश्यमानं द
र्शपूर्णमासादियज्ञस्वरूपं चतुर्होतृमन्त्रस्य यज्ञसृष्टिसाधनत्वात्तच्च ब्राह्मणे समाम्नातं स एतं चतुर्होतारमपश्यत्तं

मनसानुद्रुत्याहवनीयेजुहोत् ततोवैसदर्शपूर्णमासावसृजतेतियोयंपरमात्मासोयंदेवानांबंधुवत्प्रियः तादृशंस्वेषु-
पक्षपातित्वेनविजयहेतुं तदुक्तंब्रह्मदेवेभ्योविजिग्येइतिनलदकारैः गुहासुबुद्धिषुनिहितंसाक्षित्वेनस्थितंअमृतेन
स्वर्गफलनिमित्तेनक्रतुंसंपादितंएतंयज्ञंयज्ञइत्येवंनामानंसुवर्विदः स्वर्गमार्गाभिज्ञाऋषयः भद्रंकल्याणंसप्तहोतृनूप-
मादित्यंपश्यंतः प्रासत्वेननिश्चित्यतपोऽनशनादिरूपंदीक्षांनियमविशेषंचउपसेदुः अनुष्ठितवंतः ततः आदित्यसकाशा
त्क्षत्रंक्षतात्त्राणमनिष्टनिवारणंबलंशरीरशक्तिः ओजः कांतिश्चेत्येतत्सर्वंजातंसंपन्नंतच्चक्षत्रादित्रयंमस्मैयजमा-
नायअभिसंनमंतुअभितः संपादयंतु परमेव्योमन्नुत्कृष्टेहृदयाकाशेइंद्रंपरमैश्वर्ययुक्तंसप्तहोतृदेवमादित्यंनिनिक्षुः
ध्यातवंतः कीदृशंश्वेतंप्रकाशरूपत्वेनशुक्लवर्णंरश्मिंरश्मियुक्तंयोभुज्यमानंसर्वैः प्राणिभिर्वृष्टिद्वारेणपुनःपुनः भुज्यमानं
एतदेवस्पष्टीक्रियते अपांनेतारंआदित्यात्जायतेवृष्टिरितिस्मृतेः सूर्यंभुवनस्यगोपाः पालकंयदपियथासिद्धांतप्रापक-
सद्भावेपितदज्ञानेनपूर्वपक्षः तथासूर्यादिप्रापकसद्भावेपितदाच्छादनेनंद्राधेकैकावधारणेनालेकेपूर्वपक्षाइतिचंद्रिका
यामुक्तंतदपिनसत् अनाच्छादनेनास्मदीत्यापूर्वपक्षसंभवेउक्तवाक्यमालंब्यपूर्वपक्षासिद्धांतरचनायोक्तसूत्रव्याख्याने
स्वारस्याभावात् ॥ पत्रस्मदीतौआदित्यमंतरोयमयतीतिश्रुत्यंतरे ॥ भेदव्यपदेशादितिसूत्रव्याख्यानं ॥
नस्वरसंस्सप्रकरणस्थभेदव्यपदेशावतोवाक्यस्योदाहरणत्वसंभवेतद्रहितस्यतदयोगादितिदूषणंचंद्रिकायामुक्तंत
दसत् इंद्रस्यात्मानमित्यत्रात्मशब्दस्यस्वरूपपरतयाल्दुक्तविषयवाक्येपिसूत्रोक्तभेदासिद्धेः यदपिसद्वैवसंतंनापि

जानंति देवा इति साहित्यकर्तृकर्मभावादिनाभेदोक्तिरिति चंद्रिकायामुक्तं तदप्यसत् पक्षो तृहृदयमंत्रेषु अंतःप्रवि-
ष्टं कर्तारमेतं अंतःश्चंद्रमसि मनसा चरंतं सहैव संतं न विजानंति देवा इंद्रस्यात्मानं शतधा चरंतमिति तृतीयायामृ-
चि स्वकीये हृदये स्थेन जीवात्मना सहैवावस्थितं इंद्रस्यात्मानं स्वरूपं न विजानंतीति अंतस्थे इंद्रे देवजीवसाहित्यस्य
देवकर्तृकदर्शनकर्मत्वाभावस्यैवोक्तेरंतस्थे इंद्रे अस्मदभिमतरीतौव आदित्येतिष्ठन्नादित्यमंतरो यमयति यमादि-
त्यो न वेदेति आदित्यांतस्थे आदित्यभेदस्य स्पष्टं भेदव्यपदेशाद् इतरवरीतो इंद्रभेदव्यपदेशासिद्धेर्देवशब्दस्य चयास्मिं-
शत देवपाचित्रायाः प्रसिद्धत्वात् जनानामात्मेत्यभांतर्यामिणि अस्मिन् प्रकरणे आत्मशब्दो स्वरूपपर एव अस्मिन् प्रक-
रणे शास्ताजनानामिति भेदव्यपदेशाभावे अयुक्तं स्यादिति चंद्रिकोक्तं तु न सत् इंद्रो राजा जगतो य ईश इत्यस्मिन् प्रक-
रणे इंद्रस्य जगत् शासितृत्वोक्तेस्तस्यांतस्थे इंद्रभेदव्यपदेशासाधकत्वात् सर्वात्मेत्यत्र सर्वेषां प्राणिनामात्मा पारमा-
र्थिकस्वरूपभूत इत्यस्यैवार्थस्यांतः प्रविष्टः शास्ताजनानां समानसीन आत्माजनानामित्युपक्रमानुरोधेन वक्तव्यतया
अत्रैव प्रकरणे सर्वात्मेति नात्यंतमयुक्तं स्यात् ज्ञानादिरूपस्य ब्रह्मणस्तद्विरुद्धजडरूपतायाः केनाप्यनंगीकारादिति
चंद्रिकोक्तं तु निरालंबनमेवानंतरोऽनुपपत्तेरित्यत्र तमेवं विद्वानमृत इह भवति नान्यः पंथा अयनाय विद्यते इति प्रकर-
णांतरस्थवाक्येन पूर्वपक्षनिराकरणपरतया सूत्रं योजयतः ईक्षत्यधिकरणे पूर्वपक्षनिराकरणायानेकप्रकरणस्था-
नेकवाक्यान्युदाहृत्य सूत्राणि योजयतस्तवात्र स्वप्रकरणस्थभेदश्रुत्यभावरूपदूषणोद्भावनस्याहेतुत्वादपि हूषमा

त्रमूलत्वमेवेति स्पष्टं विदुषां न चानन्यगतिकत्वमपि अस्माद्बीत्यागत्यं तरस्य वक्तुमशक्यत्वात् ॥ यदपि चंद्रिकायां इंद्रा
द्यनेकस्मारकश्रुतिलिंगादिसत्त्वेनेंद्रादिषु निर्धारितएकएवांतरस्थ इति पूर्वपक्षमाक्षिप्योक्तरीत्यात पक्षं समर्थ्यानिर्धारितो
यः कश्चिदिति पूर्वपक्षोऽस्तु न च संदेहादविशेषः अंतस्थो विष्णुरन्यो वेति संदेहे अन्य एवेत्येवकारेण प्रवृत्तपूर्वपक्षे संदे
हाद्विशेषसद्भावादित्युक्तं तदप्यसत् वरुणादिज्ञापकलिंगादिवत् विष्णुलिंगानामपि सत्त्वेनान्य एवेत्यवधारणे गमका
भावात् विष्णुलिंगानां भूयस्त्वेन यज्ञश्रुत्यभ्यासेन च विष्णुरेवेति निर्धारणापत्तेश्च न चेंद्रादिश्रुत्यादिषु लोकप्रसिद्ध्याप्रा
बल्यं वैदिकशब्दार्थनिर्णये वैदिकप्रसिद्धेरेव प्राबल्यमित्यस्य पूर्वतंत्रसिद्धत्वात् विष्णौ नरेंद्र सुरेंद्र इत्यादिप्रयोगप्रा
चुर्येणेंद्रादिशब्दानामपि तन्मात्रप्रसिद्धेश्च पूर्वोक्तरीत्या विष्णुलिंगसंदर्शनेनेंद्रादिश्रुतेरेवान्यथासिद्धौचित्याच्च एतेन विष्णु
लिंगानां बहुत्वेऽपि बहुत्वप्रयुक्तप्राबल्यस्य स्वभावप्रयुक्तप्राबल्यात् दुर्बलत्वमिति चंद्रिकोक्तं निरस्तं विष्णुलिंगसंद
र्शश्रुतेस्तदयोगात् निरवकाशेन विष्णुलिंगेनेंद्रादिश्रुतेर्यौगिकत्वलाक्षणिकत्वादिना सावकाशायाः बाधौचित्याच्च उक्तं
हि तत्त्वप्रदीपे चाधिकरणपूर्वपक्षे अदितिशब्दस्य विष्णौ लक्षणादिना वृत्तिसंभवेऽपि नात्तृत्वं तस्मिन् संभवति ॥ नहि गंगाप
दमिव गंगात्वमपि तीरे संभवतीति यदत्र चंद्रिकायां न च विष्णुलिंगानां निरवकाशत्वं समुद्रस्थत्वादेर्वरुणेऽपि
संभवादित्युक्तपूर्वपक्षोपपादनायोक्तं तदपि न सत् ॥ वरुणस्य समुद्रपतित्वेऽपि समुद्रस्थत्वासिद्धेः न विजानंति दे
वाः जगतोऽपईशा इति देवाद्यस्य जगदीशितृत्वादीनां च वरुणाद्यसंभवेन तेषां निरवकाशत्वाच्च इंद्रो राजा जगतोऽपई

शाद्वलत्वेना परसामानाधिकरण्यमात्रदन्यत्र जगदीश्वित्वेन भासिरसिप्रभिद्धानं इंद्रशब्दः विष्णु परत्वयुक्तैंद्रशैवे यादृ
श्यत्वात्संभवत्येतिनोक्तपूर्वपक्षसंभावः यदपिप्रद्विधायां लिंगस्यानिरवकाशत्वं निमित्त वशात्सुन्नायोऽस्तु नाद्विनिरवकाश
शाशामानकोमृगेंद्रेणनबाध्यतेनचनिरकाशभिदं द्वयमितिज्ञानेनेदंद्वयमितिज्ञानेननवाध्यनदत्युक्तपूर्वमसमवलयोर्कवदवि
चाररमणीयंश्रुतिलिंगादीनां प्रमाणानां भावलप्रयोजकंनिरवकाशत्वं हि अनन्यथासिद्धप्रामाण्यकत्वंश्रुत्यादिगधा
धेद्दिवाधितं लिंगमप्रमाणमेव प्रसत्वातिविषयाभावात् श्रुतिस्तुनिर्गेनमुख्यार्थे बाधितापियौगिकलाक्षणिकार्थं त्रूपाविष
यसद्भावात् प्रामाण्यमश्नुतइतिनत्वेताद्दशानिरवकाशत्वंशाशाशावकादेरस्तिनचाविषयानरथानमनन्यथासिद्धप्रामा
ण्यकत्वत्रूपंश्रुत्यादिनिष्ठंसावकाशत्वं वा मृगेंद्रस्यास्तितयोऽप्रमाणत्वात् येनशशाशावकादेर्नायत्वरूपमृगेंद्रसाध्यत्वंनस्या
त्श्रुतिलिंगादिप्रमाणगतश्च ध्यवाधकभावस्योक्तत्रूपस्यप्रमाणवद्दिर्मिनशशशावकमृगेंद्रगजनाश्यनाशकभावत्रूपस्य
साध्यवाधकभावस्यान्यत्वात् इदंद्वयमितिज्ञानस्य प्रवृत्तिप्रयोजकमातीतिविषयसत्या वानुप्रामाण्याभावाश्चोक्तत्रूपंनि
रवकाशत्वमेवासित्वमितितस्यनेदंरजतमितिज्ञानेनवाधोपुक्तएवप्रमत्वनिश्चयस्यैवनेदंरजतमितिप्रमात्मकज्ञान
विषयावाधिनरजताभावप्रयुक्तस्यतत्रवाधकत्वात् तस्यचोक्तत्रूपप्रमाणगतनिरवकाशत्वप्रयुक्तात्॥ प्रमाणगतसाव
काशत्वप्रयुक्तोक्तवाधादन्यत्वान्नकिंचिदेतत् पदपिइंद्रःसवितावरुणः एतेसर्वेषा अंतस्थास्तद्विषयेश्रुतिलिंगादीनास
त्वादितितृतीयोयास्तुपूर्वपक्षः नचैवंसतिअंतःप्रविष्टःशास्ताजनानामितिसर्वात्मनामंतःप्रविष्टशास्तृत्वादेः श्रवणेनाने

केश्वरापात इति शंक्यं विष्णुलिंगानां निरवकाशत्वेनाबाध्यत्वादिंद्रादिश्रुतीनां च श्रुतित्वादेव लिंगाबाध्यत्वादुभयानुग्रहार्थं वि-
ष्णुरेव तत्तदुपाधिवशादिंद्रादिसंज्ञां लभत इति पूर्वपक्षिणेंद्रादीनां विष्णौ वृत्त्यंगीकारेणानेकेश्वरापत्त्यभावान्न तथा च
श्रुतिः स ब्रह्मा स शिवः सेंद्रः सोऽक्षर इत्यादिका स्मृतिरपि अहं भवो भवंतश्च सर्वं नारायणात्मकमित्यादिका न चैवं विष्णोरे-
वांतस्थत्वं स्यादिति वाच्यं कल्पितभेदस्योपाधिकृतस्य न सत्त्वेऽपींद्रादिरेवांतस्थ इति पूर्वपक्षात् विष्णुलिंगानां चानुपाधि-
तरूपाभिप्रायेणोपपत्तेरिति चंद्रिकायामुक्तं तदपि पूर्वोक्तरीत्या विष्णुलिंग संदेहश्रुतेः स्वरूपबाधस्य निरासकोक्तरीत्या
निरस्तं न स्तु नस्तु न तैत्तिरीयकवाक्यमुदाहरणार्हं संदेहाभावान्न ह्यत्र जामायाश्च नहींद्रादिश्रुतिः संदेहबीजं इंद्रस्यात्मा
नमित्युपक्रमे योंतः प्रविष्टः शास्ता जनानां सर्वात्मेति मानसीन आत्मा जनानामिति बहुधा रंभ ध्येचाभ्यासेन सर्वात्म-
ताप्रतिपादन एव सुपर्यवसानात् वाक्यस्यात्मपर्यवधारणात् तदुपष्टंभकतयैव सर्वे वेदा यत्रैकं भवंति चतुर्होतारो यत्रै-
कं भवंति सर्वाः प्रजाः यत्रैकं भवंति चतुर्होतारो यत्र संपदं गच्छंति देवैरित्यादुच्यते चतुर्हो तृणामात्मानं कवयो निचि-
क्युः तदेवानुपरमुच्यते अमृतं देवानामायुः प्रजानामिति तदेवोपपाद्यते अंतरं वैद्रं राजानं सवितारमेतं ब्रह्म इंद्रमग्निं
जगतः प्रतिष्ठां दिव आत्मानं सवितारं बृहस्पतिमिति सर्वैः शब्दैरभिधानं सार्वात्म्यप्रयुक्तमिति निर्णीयते अतो नेंद्रादि
श्रुतीनामन्यपरत्वशंकेति तदनुरोधेन पूर्वपक्षः तल्लिंगानुरोधेन वा सिद्धांतो वा युक्त इत्यस्य च्छाप्यकारोक्तमुदाहरणमे-
व युक्तं छांदोग्ये अंतरादित्यवाक्याकाशवाक्यप्राणवाक्यं ज्योतिर्वाक्यानां क्रमिकाणां क्रमिकाधिकरणचतुष्टयोदाह

रणत्वसंभवादित्यलंविस्तरेण ॥ सिद्धांतोपयुक्तः गह्वासिन्नधिकरणेनिरवकाशावगवबाहुल्यत्वहावन्स्यातत्त्व
विष्णुपरत्वान्नहिंसा इत्येन समास्यये न लिंगेन सूर्यादिपरत्वापि मत्र त्वेन अन्यायासि त्विसहत्संबंधमुद्र स्तत्व स्थापि
प्रसिसिरत्सुपभो खुत्वानत्वमूपत्वात्तद्विष्णुलिंगानां मावल्यं संस्यं श्रुतिसाहित्येनान्येषामपिभावत्वात् ॥ नन्वविष्णु
लिंगैः श्रुतिबाधः स्वतूपतो दुर्बलानामुपसंहारगतानामुपक्रमगतनिरवकाशलिंगसहकृतप्रबलानेकश्रुत्यभ्यास
बाधनासामर्थ्यात् यज्ञश्रुतिसाहित्यानिरवकाशात्सबाहुल्यादिभिः भावत्वेन पूर्वपक्षाश्रुत्स्थितिः तदाच्छादनं चगतिसंभ
वेनयुक्तमितिपूर्वोनिवोक्तं यदपिस्येनादिशब्दानां लोके अन्यत्रनिरूढानामपियथावेदप्रयोनिपत्याद त्वेद्वतिवाक्यशेष
बोधितसादृश्यस्यस्यत्वेने ऽनुपपत्त्यारयेनसहशा यागपरत्ववदिंद्राग्नीद्रादिपदानां यमंतः कथमोपिन्न क्षत इतिवाक्यशेष
बोधितसमुद्रांतस्थ आदीनामन्यत्रासंभवाद्विष्णुपरत्वमितिचंद्रिकायामुक्तं तदपिनस्येनेनाभिचरन् यजेतेतिमतीत
यागसामानाधिकरण्यनिर्वाहायस्येनादिपदानांयावस्यशो चवजागौणत्वाश्रयणेपीहत्तथोपिपोपक्रमगतनूदिभंगानि-
मित्वादर्शनेनवैषम्यात् अनएवश्रुतिसंदेहे अनन्यथासिद्धलिंगेननिर्णय इतिन्यायविवरणोपबृंहकवर्णनमपिनिर
स्तंइंद्रादिश्रुतेरिंद्रादौनूढत्वेनासंदिग्धत्वात् ॥ यदपिइंद्रादिशब्दानामन्यत्रभसित्यावपिनिहृद्रूढ्याविष्णुपरत्वात्तस्य
श्वमावल्यात्तविष्णुपरत्वमितिचंद्रिकायामुक्तं तदसत् विहृद्रूढ्येवासिद्धांतकरणेधर्मोपदेशादितिहेतोरसारस्यप्रसंगा
त् ॥ नचविहृद्रूढ्युपष्टंभनायैवधर्मोक्तिरितिवाच्यं तथासतिधर्मोपदेशाद्धिहृद्रूदित्तस्याश्चाविष्णुपरत्वमितिसाध्यांतर

हे त्वं नरा [illegible] भसंगा [illegible] मानं [illegible] भाभि [illegible]
[illegible] धर्मो [illegible] पवार्दि [illegible]
[illegible] ददं [illegible]
[illegible]
[illegible]
[illegible] ॥ [illegible]
[illegible] ॥ [illegible]
[illegible] ॥ [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

विनियोगवैयर्थ्यं स्वेनैव विनियोगेन सामानाधिकरण्यस्यैव तल्लक्षकः तन्त्रमस्यादि तद्धुपदके. प्रातिपदिकार्थे
हृणा   यदृणयोश्च भेदाद्भिन्नस्य बाधित सान्नाय्यं दः कल्पयितुं शक्यः ॥ ननु जीवपरमात्मनोः ऐक्योपदेशः सा
गेनैव प्रकृतेऽभेदापादनं चतुरस्रं ब्रह्मकाश्यो व्रीहियवयोः विरुद्धाकारपरित्यागेन जीवस्य सूक्ष्मरूपतया स्थूलत्वेन त
स्याकारस्यैवाकाराभावात् ॥ किंच विरुद्धाकारत्यागः स्वकीय हृदयाद्ध्नूते कथं तु ओषधिवचनत्वभेयतत्पापः तत्स्या
शाकाभावात् तच्च तत्त्वमसि सोऽयमित्यादौ विरुद्धांशयोः त्यक्तैव प्रवर्तते तत्त्वमसीत्यादावुपक्रमोपसंहारैक्यानू
पतात्पर्यनिर्णायकलिंगावगतजीवब्रह्मैक्यस्य अनूपपन्नप्रमेयनिर्णायकविरुद्धाकारविपरीतानूनतत्कारणस्य प्रकृ
ते तादृशकारणानुपलंभात् व्रीहियवयोर्विरुद्धाकारपरित्यागेनोभयानुस्यूतैकरूपके गानेन तदृष्टावशषत्व
नूपत्यागस्य तद्विरुद्धाकारे असंभवाच्च ॥ यदपि चंद्रिकायामिदं भिन्नमित्यादिवाक्यस्योक्तं नूपादेपरत्वमाशं
क्याहुरिति तत्तच्छब्दवाच्यत्वस्यैवोक्तेः स सार्वगभा भुवनस्य रेतोऽपि योऽस्ति इति मादृशापि पर्मात्मनि वाक्यशेषे
दोक्तेश्च सौनकः स रुद्रः स प्राणभृत् प्राणनायको सदुरो यो हरिरिति श्रुत्यंतरे अभेदविवक्षायां रुद्र इत्यनेन सदृशा
इत्यस्य पौनरुक्त्यापत्त्या तत्तच्छब्दवाच्यताया एव विवक्षणीयत्वाच्चेत्यादिनेन्द्रादिशब्दानां परमात्मनिर्वचोऽपि दूरू-
दिव्यवस्थापनं तदपि न सत् ॥ निर्धर्मके निर्विशेषे निष्क्रिये च परमात्मनि शब्दप्रवृत्तिनिमित्तगुणक्रियाजात्याद्यभावेन
शब्दमस्पर्शमरूपमव्ययं यतो वाचो निवर्तन्ते इत्यादिश्रुत्या शब्दवाच्यताया अ[illegible]

ध्यतायाअसंभवेन तस्य तत्स्वरूपैक्येऽपि व्यावहारिकेंद्रादिस्वरूपभेदानुवादित्वेनाहुरित्यस्योपपत्तेः लौकिकदृष्ट्या इं-
द्रत्यादिस्वरूपभेदभिन्नमपि ज्ञानदृष्ट्या तं परमात्मस्वरूपाभेदेन निश्चित्यैंद्रं मित्रं वरुणमित्यादि ज्ञाह्ने लक्षणया व्यवहरं-
तीत्येवं तत्त्वयावा प्रतर्दनं प्रति मामेव विजानीहि प्राणोऽस्मि प्रज्ञात्मेति इंद्रवाक्यवत् ब्रह्म वा इदमग्र आसीत् तदात्मानमे-
वावेदहं ब्रह्मास्मीति वदुपपत्तेः ॥ यत्त्वहंशब्दः जीवांतर्यामिणि मुख्यः अहं मनुरभवं सूर्यश्चेत्यंतर्यामिणि अहंशब्दप्रयो-
गात् ॥ सर्वांतर्यामिको विष्णुः सर्वनाम्नाभिधीयते ॥ एषोऽहं त्वमसौ चेति तन्मस्य स्वरूपत इति स्मृतेश्चेति परोक्तं ॥ तदपि
न साधु ज्ञानदृष्ट्यातूपदेशो वामदेववदिति न्यायेन वामदेवजीवस्यैतन्न्यायस्य वस्तुतो ब्रह्माभेदेन सूर्यादिभावस्योक्त-
तया अंतर्यामिपरत्वाभावात् तद्यो यो देवानामिति पूर्वतनवाक्ये तत्त्वबोधनिमित्तकब्रह्मभावस्य प्रकृततया पश्यन्
प्रतिपेदे इत्यादेरपि बोधनिमित्तकब्रह्मभावपरतया अंतर्यामिपरत्वाभावात् अन्यथा तस्मात्तत्सर्वमभवदिति वा-
क्यशेषे बोधनिमित्तकसार्वात्म्यलक्षणफलकीर्तनस्यायुक्ततापत्तेः ॥ न चैवं सति तद्यो यो देवानां प्रत्यबुध्यत स एव त-
दभवत् ऋषीणां तथा मनुष्याणामिति भेदपरत्वं वाक्यशेषस्य विरुध्येतेति वाच्यं ॥ तत्र देवादिषु प्रबुद्धं पुरुषं नि-
र्धार्य स एव तदभवदिति ब्रह्माभेदपरत्वेन भेदपरत्वाभावात् ॥ न चात्र वाक्ये ब्रह्मेति ब्रह्मण एव प्रकृतत्वान्ना-
नजीवब्रह्मैक्यसिद्धिरिति शंक्यं ॥ यो यो देवानामिति जीवपरामर्शिवाक्यशेषानुसारेण ब्रह्मपदस्य कार्यब्रह्मप

रत्वात् मुख्यब्रह्मपरत्वेऽस्य स्वर्गोपनिमिरस्य तस्मात्सर्वमभवदिति सार्वात्म्याप्तिरूपफलकीर्तनस्यायुक्तत्वाप
त्तेः ॥ न च नामब्रह्मेत्युपासीतेत्यादावपि ब्रह्मशब्दशिरस्कतया नामाद्यभेदाभाववत् अत्रापीति ब्रह्मशब्दशिरस्कतयाब्र
ह्माभेदाभावः इति वाच्यं ॥ नामब्रह्मेत्यादावप्युपासनाप्रकरणे अस्मिन् वाक्ये अभेदाविवक्षा
यामप्रकृतमशक्यत्वात् ॥ न च तद्धैतिपदवैयर्थ्यं शंक्यं आत्मेत्येवोपासीतेत्यादाविव ब्रह्मज्ञानयोः स्वाभाविकसकर्मफल
भावोत्तन्निराकरणपरत्वेनोपयोगात् ॥ न चैवमुक्तस्मृतिविरोधः शंक्यः इंद्रादिब्रह्मादिशब्दानां साधारणतत्त्वदात्म
निशक्तेरावश्यकतया तत्साहचर्येणांतर्यामिणि एषोऽहमित्यादिप्रयोगः अग्निरधीतेऽनुवाकमिति माणवके अग्नि
साहचर्येणाग्निरिति प्रयोगवत् अंतर्यामित्वाद्युपहितयोरैक्यासंभवादंतर्यामिणः अहं त्वमित्याद्युपहितसर्वस्व
रूपत्वनिबंधनं सर्वनामभिरभिधानमिति तत्परत्वात् ॥ किंचांतः कर्तारमिति वाक्ये समुद्रांतस्थत्वाभिधानं तथ्यं दूमसि-
मनसाचरंतमिति अष्टमूर्तेः शिवस्यास्ति लिंगं पृथिव्यां तिष्ठति विष्णुः पृथिवीयोनिर्नैव तं रूपं च पृथिवीयस्य तस्यैव रू
तात्मनेनम इत्यादित्यपुराणादिषु शिवस्य पृथिव्यादिमूर्त्यष्टकोक्तिषु यः पृथिव्यां तिष्ठन् पृथिवीमंतरो यमयति यं पृथिवी
न वेद यस्य पृथिवी शरीरमित्यादि तया [illegible]णार्थप्रत्यभिज्ञानदर्शनात् विष्णुत्वपरिपंथिनी प्रजापतिश्चरति गर्भेंत
रिति प्रजापतिस्मृतिश्चास्ति न च सा समुद्रांतस्थत्वरूपलिंगानुसाराद्योगादिना विष्णुपरेति शंक्यं ॥ अष्टमूर्तिलिंगानु
सारेण पातियस्मात् प्रजाः सर्वाः प्रजापतिरिति स्मृत इति लैंगेदर्शितयोगेन शिवपरेति वक्तुं शक्यत्वात् ॥ नच लो

केऽस्तु तौ स्मृतौ चैव विष्णुलिंगतयास्थितं समुद्रांतरयस्थानपूर्वकं कथमन्यगामित्यादिना समुद्रांतस्थत्वस्यानिरव-
काशत्वेनप्राबल्यं त्वदुक्तं साधु ॥ मध्ये लिंगं महाघोरं महाध्वरं महालिंगमित्यादिस्मृत्युक्तौ केः समुद्रांतस्थत्वस्य
शिवसाधारण्यात् ॥ न च पंचहोतृहृदयाख्यमंत्रे श्रुतनीयायाः भूमिरंडकोशोऽप्युपनंक्षिप्तानि आनिर्भिण्णः सन्नयलोका-
न्पिबच्चैयस्यांडकोश इत्युपमाहुः प्राणमुत्संतेन क्लोमभूतेनाहमस्मीति ब्रह्मांडवीर्यत्वं विष्णुलिंगे निरवकाशं च युक्ता
श्च यः पंचहोतृदेवः ब्रह्मांडमध्ये अभेदेनावस्थितः सन् कृत्स्नं भुवनं भूतजातं धारयति अथ ब्रह्मांडभेदानंतरं तदंतःस्थि-
तान् भूरादिलोकान् विशेषेण प्रख्यापयति यस्य परमात्मन आंडकोशाः भुवं प्रवलं ब्रह्मांडानपाशस्थभूम्यात्मरूपमाण
शाश्रुपिशेषं तत्त्वं गमयति एनस्थानीयमाहुः तेन परमात्मना ऽभूतरूपेणाहं मंत्रद्रष्टा भूमः व्यवहारसमर्थत्वेनोत्पादितो
स्मि इत्यर्थकं परमात्मनः ब्रह्मांडवीर्यत्वप्रतिपादकं यदुक्तं तदनुवादस्यप्रतीतेस्तस्य पुरोवादापेक्षायां सामान्येन प्रतीतस्य-
विशेषाकांक्षायां वा अंडं हिरण्मयं मध्ये समुद्रं रुद्रस्य वीर्यात् प्रथमं संबभूव तन्मध्ये ब्रह्मा विष्णुर्जातो आत्मयेदाइ निरुद्धप्रतिपा
दकश्रुत्युपस्थितेः ॥ रुद्रसंज्ञस्य देवस्य रूपं मूर्तिः प्रजापतेः ॥ तेन क्षिप्तं रेतसे वीर्यं परमूर्त्यभिमानिना ॥ तदंडमभवत्सौर-
सहस्रकिरणप्रभं ॥ विष्णुस्तत्राधिराट् साक्षात् प्रमयाकेस्तु वैभवात् ॥ पुनर्नारायणाख्यां मे नियोगात् आसवानसा
वित्यादिलैंगादिषु नदुपबृंहणेषु शिवस्यैव ब्रह्मांडवीर्यत्वेन तदर्थप्रतिपादनात् ब्रह्मांडवीर्यत्वस्य शिवसाधारण्या

त् ॥ तथा च हरिहरयोर्द्वयोरपि लिंगयोः सतोः तत्र ब्रह्मत्वमुदाहृत्य पूर्वपक्षोत्तरपक्षाभ्यां यनात्मकन्यायेनासति च तद्ध
लाबलविवेके कथं शिवसाधारणसमुद्भूतस्य लिंगेनांतः प्रविष्टब्रह्मलिंगाद्यंतस्थस्यापि विष्णुरेवेति विष्णुत्वनिर्णयः ॥
यदप्युक्तं परमैश्वर्यादिलिंगवत्तिनिरवधिकत्वेन भगवति महायोगसंभवादन्नूदितोपि विहृद्भूदेरेव प्राबल्यादन्यगत
प्रवृत्तिनिमित्तस्यापि भगवदधीनत्वेन ह राद्वैष्णवादिश्रुतीनां मुख्यत्वमिति ॥ तदपि न सर्वप्राज्ञसंमतं निरवधिकपरमै
श्वर्यस्यापि शिवसाधारण्यात्तायाः श्रुतिसिद्धत्वात् ॥ तथाह्याथर्वशिरसायां किं तत् ध्यानं को वा ध्याता कश्च ध्येय इत्युपक्रम
स्य प्रश्नानुरोधेन ध्यानध्यातृनिरूपणानंतरं ध्येयनिरूपणायाम्नायते ध्यायीतेशानं प्रध्यायितव्यं सर्वमिदं ब्रह्मविष्णु
रुद्राः संप्रसूयंते सर्वाणि चेंद्रियाणि सह भूतैर्न कारणं कारणानां धाता ध्याता कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरः
शंभुराकाशमध्ये इत्यादि शिव एको ध्येयः शिवंकरः सर्वमन्यत् परित्यज्य समाप्ताथर्वशिखेत्यं तं अत्र शिवतत्त्वविदः योग
रूढ्या परमशिवे वर्तमानस्येशानशब्दस्य तात्स्थ्ये त्याय्येशानः शक्तत्वायोगेन स्वाभाविकनिरतिशयैश्वर्यपरत्वात्
रूढ्या च परमशिववाचित्वात् सर्वोत्कृष्टफलार्थिभिः सर्वातिशयैश्वर्यः परमशिवो ध्यातव्य इति भावेनेशानशब्देनाविशे
ष्यनिर्देशः कृतः प्रध्यायितव्यमित्याधिक्यात् ध्यानार्हत्वेन स्तुतिः किमन्येन तादृशायेनैवमवधारणमिति शंकानिराकर्तुं
देवमनुष्यादिरूपे सर्वप्रपंचे ब्रह्मादीनां च तुर्णां प्रामुख्यमुक्त्वा तेषामप्यैश्वर्यपरिच्छेदसूचनाय सोपपत्तितयादीपकेन स
हेतुत्वाच्च भूतेंद्रियादितौल्येन तेषामुत्पत्तिमत्त्वं दर्शितं सर्वमिदमित्यारभ्य सह भूतैरित्यंतेन ॥ यद्येतत्परशिवस्यापि स्यात्

नस्यात् तस्यापि तद्वदेव ध्येयत्वमित्याशंक्योक्तं न कारणं कारणानां ध्याता ध्यातेति संप्रसूयत इति यन्न न विपरिणामेना-
नुषंगः तथा चायमर्थः ब्रह्मादीनां प्रसूत्युक्तिसामर्थ्यात् यत्तेषामर्थसिद्धं कारणं तद्रूपः कारणानां ब्रह्मविष्णुरुद्राणां मंत्रोप-
निषदुक्तानां कालादीनां वा ध्याता आदिसर्गसंकल्पकर्ता एवंभूतेशानः कुतोपि न संप्रसूयत इति यद्यप्यनेन ब्रह्मादीनाम-
र्थसिद्धं यत्कारणं तन्न संप्रसूयत इत्येतावदिह प्रतीयते न त्वीशानस्तथापि तस्य ध्येयत्वं विधाय ब्रह्मादीनां परिच्छिन्नैश्वर्य-
त्वरूपदोषमुद्भाव्य तत्परिजिहीर्षया ध्येयत्वेनोपदिष्टस्येशानस्यापरिच्छिन्नैश्वर्यं प्रतिपादयितुं प्रवृत्तं न तत् पृथिव्यादिषु
आविष्टांतवत्त्वदोषपरिहाराय साकगतिपरंपराविश्रांतिभूमेरनंतत्वप्रतिपादनाय प्रवृत्तं स एषोऽनंत इति वाक्यमनन्य-
थासिद्धं स्वदउपक्रमस्थत्वेन बलवतीमप्याकाशादितिहोवाचेत्याकाशश्रुतिमविगणय्य परमात्मपरमिवेशानपरमेवा-
न्यथोक्तदोषपरिहारालाभात्॥ किंच केवलयौगिकत्वेन प्रयुक्तयोर्धातृध्यातृशब्दयोः कारणं सिद्धमित्यत्र तु शब्दस्वारस्येन तत्र
वाक्यारंभप्रतीतेरिंद्रियवाक्येऽन्वितयोः स्वतो लिंगव्यवस्थाशून्यतया अन्यलिंगग्राहिणोः स्वसमानाधिकृतव्यवस्थित-
लिंगकारणशब्दलिंगग्राहित्वेन नपुंसकलिंगापत्तेः श्रुतपुल्लिंगत्वनिर्वाहाय पुल्लिंगविशेष्याकांक्षायामाकांक्षितार्थप्रत्या-
नुकूलसन्निधि श्रुतशब्दानुषंगसंभवे सत्येतादृशशब्दान्तराध्याहारायोगेन ईशानशब्दानुषंगस्यावश्यकत्वेनार्थावस्थे-
न सामर्थ्यसिद्धं ब्रह्मादिकारणत्वसिद्धं यत्कारणं तन्नैव प्रसूत इत्यभावउपन्यस्त इति निश्चीयते॥ अतएवानंतरवाक्ये कारण-
मित्यस्यांशुपदसामानाधिकरण्यं दृश्यते न त्वाकाशमध्य इति उपासनस्थानकथनं परमाकाशारूपशिवस्थानाभिप्रा-

यं सर्वेश्वर इति शिवनामत्वेन प्रयोगः न तु सर्वैश्वर्यपरत्वेन मात्रं न विशेषणेन पौनरुक्त्यापत्तेः यद्वा यौगिकत्वे पूर्वपदेनानूदितत्वे उत्तरपदेन योगानूदितत्वे पदद्वयेन पौनरुक्त्यापत्तेः ततश्च शंभुर्न केवलं प्रसूतिरहितत्वेन ब्रह्मादिकारणत्वादपरिच्छिन्नैश्वर्यः अपितु अनन्यसाधारणसर्वेश्वरशब्दवाच्यत्वादपीति सर्वेश्वर इत्यनेन ब्रह्मादीन् परित्यज्य शिव एव ध्येय इति दर्शितं भवति अमुमेवार्थमादरात् कंठोक्त्या स्फुटयति श्रुतिः शिव एको ध्येय इति इममर्थमस्याः श्रुतेरुपबृंहणान्यपि स्पष्टयंति ॥ तथाहि शिवपुराणे शिवस्य सर्वोत्कर्षनिर्धारणप्रकरणे ॥ यस्मात्सर्वमिदं ब्रह्मविष्णुरुद्रेंद्रपूर्वकं ॥ सह भूतेंद्रियैः सर्वैः प्रथमं संप्रसूयते ॥ कारणानां च यो धाता ध्याता परमकारणं ॥ न संप्रसूयतेऽन्यस्मात् कुतश्चन कदाचन ॥ स सर्वैश्वर्यसंपूर्णो नाम्ना सर्वेश्वरः स्वयं ॥ सर्वैर्मुमुक्षुभिर्ध्येयः शंभुराकाशमध्यग इति ॥ अत्र सर्वमिदमित्यारभ्य सह भूतैरित्यंतस्यार्थं प्रदर्श्य किं प्रथमश्लोके मूलवाक्ये अशब्दगृहीतोऽपि शिवादुत्पद्यत इत्ययमर्थः उत्तरवाक्यपर्यालोचनया सामर्थ्यात् सिद्ध इति सिद्धं कृत्वा यस्मादिति निर्दिष्टं द्वितीयश्लोकेन न कारणं कारणानां धाता ध्याता इत्येतावदेकं वाक्यं वचनविपरिणामेन क्रियानुषंगश्चेति दर्शितं तृतीयश्लोकेन नाम्ना सर्वेश्वरः स्वयमिति सर्वेश्वरशब्दस्य शिवनामत्वोपन्यासेन स्वयं सर्वेश्वरशब्दवाच्य इति अनन्यसामान्यं नाम्नैव तस्य सर्वेश्वरत्वं ख्यापयतीति प्रदर्शनेन पुनरुक्तिः परिहृता हरिवंशे च कृष्णकृतशिवस्तोत्रे ॥ अहं ब्रह्मा कपिलो योऽप्यनंतः पुत्राः सर्वे ब्रह्मणश्चातिवीराः ॥ त्वत्तः सर्वे देवदेव प्रसूतास्त्वं सर्वेशः कारणात्कारणमीड्यः इति पठ्यते ॥ सर्वज्ञता तृप्तिरनादिबोधः स्वतंत्रता नित्यमलुप्तशक्तिः ॥ अनंतशक्तिश्च विभोर्विधिज्ञाः षडाहुरंगानि महेश्वरस्य ॥ ज्ञानं वै

दानमैश्वर्यं तपः सत्यं क्षमा धृतिः ॥ स्रष्टृत्वमात्मसंबोधोह्यधिष्ठातृत्वमेव च ॥ अव्ययानि दशैतानि नित्यं तिष्ठन्ति शंकरे ॥
इति स्मृतयोपि शिवस्य निरवधिकपरमैश्वर्यं स्वातंत्र्यादिलक्षणं वर्णयन्ति एवं ब्रह्मविष्ण्वाद्यैश्वर्यस्य शिवाधीनत्वमपि
गम्यते ॥ तथाहि कौर्मे शिवपूजायां ॥ निवेदयीत स्वात्मानं यो ब्रह्माणमितीश्वरः इत्यात्मार्पणे विनियोगलिंगात् शिवप
रत्वेनावगता ॥ यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै इति श्रुतिः तथा शिवं प्रस्तुत्य ॥ यो मे मां विदधे पुत्रं
ज्ञानं च प्राहिणोति मे ॥ यत्प्रसादान्मया प्राप्तं प्राजापत्यमिदं पदं ॥ ब्रह्माणं मुनयः पूर्वं सृष्ट्वा तस्मै महेश्वरः ॥ दत्तवान-
खिलान् वेदान् विप्रा आत्मनि संस्थितान् ॥ इत्यादि शिवपुराणे तदुपबृंहणान्निर्बन्धतो ब्रह्मणः प्राजापत्याद्यैश्वर्यस्य शिवा
धीनत्वं ज्ञापयन्ति ॥ एवं ईशानः सर्वविद्यानामीश्वरः सर्वभूतानामिति श्रुतिः ॥ ईशानः सर्वविद्यानां स एवादिगुरुर्बुधः
॥ तस्य शिष्यो महाविष्णुः सर्वज्ञानमहोदधिरिति शैवे तदुपबृंहणं च विष्णोर्ज्ञानाद्यैश्वर्यं परमशिवाधीनमिति ज्ञापय
ति ॥ एवमारण्यपर्वणि तीर्थयात्राविधौ ॥ ततो गच्छेत् सुपर्णाक्षं विष्णुलोकेषु विश्रुतं ॥ यत्र विष्णुः प्रसादार्थं रुद्रमाराधय
त् पुरा ॥ वरांश्च सुबहून् लेभे दैवतैरपि दुर्लभान् ॥ उक्तश्च त्रिपुरघ्नेन परितुष्टेन भारत ॥ अपि चान्यैः प्रियतमो लोके
कृष्ण भविष्यसि ॥ त्वन्मुखं च जगत् सर्वं भविष्यति न संशयः ॥ इति द्रोणपर्वणि च तपोध्याये मैनाके ॥ षष्टिवर्षसहस्रा
णि तपश्चर्यया लब्धप्रसादाय नारायणाय भगवता शिवेन लोकोत्तरशौर्यादिकं दत्तमिति श्रूयते हरिवंशे च पारिजातसं
हितायां ॥ इति संस्तूयमानस्तु भगवान् गोवृषध्वजः ॥ प्रसार्य दक्षिणं हस्तं नारायणमथाब्रवीत् ॥ मनीषितानामर्थानां

भाति स्तोस्तु सुरोत्तम ॥ पारिजातापहर्तासि मा भूत्ते मनसो व्यथा ॥ पुरा मैनाकमाश्रित्य तपस्त्वमकरोर्यदा ॥ तदा मयाय नः कृष्ण संस्मृत्य स्थैर्यमाप्नुहि ॥ अवध्यस्त्वमजय्यश्च मत्तः शूरतरस्तथा ॥ भवितासीत्यथोक्तं यत्तत्तथा न तदन्यथा ॥ इत्येवमादीनि प्रमाणानि विष्णोरवतारिणस्तदवताराणां च शिवाधीनमैश्वर्यं प्रमापयंति ॥ तच्च श्रियेमरुतो मर्जयंत रुद्र यत्ते जनिम चारु चित्रमिति शिवाभिव्यक्तिस्थानं लिंगं प्रकृत्य तद्विशेषयन् पदं यद्विष्णोरुपमं निधायीति मंत्रोपि विष्णोः परमपदप्राप्तिलक्षणमैश्वर्यं शिवाधीनमिति दर्शयति तन्मंत्रार्थस्तु पराशरपुराणे विवृतः ॥ रौद्रं लिंगं महाविष्णुर्मरुत्वा लिंगं शिलामयं ॥ चारुचित्रं समभ्यर्च्य लब्धवान् परमं पदमिति ॥ तथा च ब्रह्मविष्ण्वादीनामैश्वर्यस्यापि शिवाधीनत्वं तदितरदेवतानामैश्वर्यस्य नितरां तदधीनत्वादिंद्रादिश्रुतीनां प्रवृत्तिनिमित्ततादधीन्यन्यायेन विष्णुपरत्वमेवेति वर्णनमभ्रममूलमेव ॥ एवं विद्वद्व्यापि ते देवा रुद्रं ध्यायंति ततो देवा ऊर्ध्वबाहवस्तुवंतीत्युत्तराथर्वशिरस्यायां यो वै रुद्रः स भगवान् यश्च ब्रह्मा भूर्भुवः सुवस्तस्मै वै नमो नमः शीर्षं जनदो विश्वरूपोसि ॐ यश्च विष्णुर्भू • यश्च महेश्वरो ॐ या चोमा • ॐ यश्च विनायको • ॐ यश्च स्कंदो यश्चेंद्रो भूर्भुवः सुवस्तस्मै नम इत्यादिना रुद्रेपि इंद्रादिशब्दप्रयोगात् त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिंद्रस्त्वमित्यन्यत्रापि पौराणिकेंद्रशब्दप्रयोगाच्चेंद्रादिशब्दानां विष्णावेव विद्वद्बुद्धिरित्यस्यासिद्धेरिति दिक् ॥ ७ ॥ ॥ ७ ॥ ॥

(इति अंतस्तद्धर्माधिकरणं समाप्तं.)

श्रीगणेशायनमः वंदारुवृंदानतपादपद्मोनंदात्मजः सुंदरनीलवर्णः आनंदकंदोवतुदेवदेवोमंदस्मितः कुंदरदोमुकुंदः
॥१॥ आकाशस्तल्लिंगात् ॥ पूर्वाधिकरणेनूपपत्त्याद्यन्यथासिद्धलिंगानांसर्वपाप्मोदितत्वाद्यनन्यथासिद्धलिंगानुरोधे
ननयनंयुक्तंनतुवक्ष्यमाणआकाशश्रुतेर्लिंगानुरोधेनान्यथानयनमितिप्रत्यवस्थानादनंतरसंगतिः शालावत्यदाल्भ्य
जैवलप्रवाहणयोहोद्गीथेकुशलाबभूवुस्तेहोचुरुद्गीथेवैकुशलास्मोहंतोद्गीथेकथांवदामइत्युपक्रम्यदाल्भ्यंप्रतिशालावत्य
प्रश्नप्रवर्तितायांकासाम्नोगतिः स्वरइत्युत्तरिते ॥ गतिः कारणं ॥ तादृशस्वेवप्रमाणाज्जातस्वर्गपर्यंतप्रश्नोत्तरपरंपराप्रवृत्तात
तस्यदाल्भ्यनिरूपितासामगतिविश्रांतिभूतिः स्वर्गलोकरूपाअंतवद्वैकिलदाल्भ्यसामेतिशालावत्येनांतवत्त्वदोषेणदूषि
तात्तस्यशालावत्यंप्रतिशिष्यभावमुपगतस्यदाल्भ्यस्यप्रश्नोऽमुष्यलोकस्यकागतिरिति अयंलोकइतिहोवाचेत्युत्त
रंततः शालावत्येनसामगतिविश्रांतिभूमित्वेनप्रतिपादितेनचनिरूपितेपृथिवीलोकेअंतवद्वैकिलतेशालावत्यसामेत्यनेन
पूर्ववद्दूषितेशिष्यभावमुपगतस्यशालावत्यस्यजैवलिंप्रतिप्रश्नः अस्यलोकस्यकागतिरिति आकाशइतिहोवाचस
र्वाणिहवाइमानिभूतान्याकाशादेवसमुत्पद्यंतेआकाशंप्रत्यस्तंयंत्याकाशोह्येवैभ्योज्यायानाकाशः परायणमित्युत्तर
माम्नायतेतत्रेदमाकाशपदंकिंभूताकाशपरमुतपरमात्मपरमितिपूर्वोत्तरपक्षयुक्तिभ्यांसंशयेपूर्वपक्षः इदमाकाशप
दंभूताकाशपरमेवतत्रतस्यरूढत्वेनमुख्यत्वात्क्वचित्कोब्रह्मणितत्प्रयोगस्यव्यापकत्वादिगुणयोगाद्गौणोन्यथानेका
र्थकत्वप्रसंगात् ॥ आकाशादेर्विनिगमकस्यचभूताकाशएवसत्वात् ॥ नचास्यलोकस्यकागतिरितिसर्वकारणेपृष्टेभूताका

शाविषयोन्तरासंगतिः शंक्या अस्येतिसर्वनाम्नोऽव्यवहितपृथिवीमात्रपरामर्शकत्वात् ॥ नचसर्वाणिहवाइमानिभूता
नीतिवाक्यशेषानुपपत्तिःशंक्या अभ्यस्यमानानुपसंजातविरोधिश्रुत्यनुसारेणतस्यवाय्वादिकारणतामात्रपरत्वेनने
यत्वात् एवंन्यायस्यमनंतत्वमपिभूतांतरापेक्षयानेयंनचात्रभूयोनुग्रहन्यायस्तुल्यबलयोर्विरोधएवतत्प्रसक्तेः॥सि
द्धांतस्तुइदमाकाशपदंब्रह्मपरमेवकुतस्तल्लिंगात् तस्यब्रह्मणोऽसाधारणधर्मानूपलिंगान्वितार्थकत्वात् ॥ तथाहि सर्वा
णिहवाइमानिभूतान्याकाशादेवसमुत्पद्यंतइतिश्रूयमाणमसंकुचितसर्वकारणत्वंपरस्यैवब्रह्मणोलिंगंनचेदंभूता
काशेसंभवतिएवमनवधिकज्यायस्त्वपरायणत्वेअपिनचाभ्यस्तासंजातविरोध्याकाशश्रुतिविरोधेनसर्वाणीत्यादेः
संकोचोयुक्तइतिपूर्वपक्षयुक्तंयुक्तंअंतवदेवकिलतेशालावत्यसामेतिनिंद्यागतित्वेनवक्तव्यस्यानंत्यावगमात्तस्य
चोपक्रमोपसंहारानुगतस्यश्रुतितोबलवत्तरत्वात् ॥ तथाचानंतस्यैवगतित्वेनवक्तव्यतयाप्राधान्यमितितदनु
रोधेनत्वरमश्रुताकाशपदमेवान्यथानेयंनत्वनुपसंजातविरोधिनःआनंत्यस्योपक्रमोपसंहारस्थायिनःसंकोचोयु-
क्तः अतएवप्रश्नोपिसर्वकारणविषयएवान्यथानंत्यानुपपत्तेः एवंचप्रश्नप्रतिवचनयोरेकार्थबोधजननसामर्थ्या
ल्लिंगादप्याकाशपदस्यब्रह्मपरत्वंसिध्यतितदुक्तमाचार्यवाचस्पतिभिः यद्यप्याकाशपदंप्रधानार्थंतथापियत्पृष्टंत
देववक्तव्यंनखल्वनुन्मत्तःआम्रान्पृष्टःकोविदारानाचष्टेतदिहास्यलोकस्यकागतिरितिप्रश्नःप्रपंचमात्रगतिविष
यइतितदनुरोधाद्यएवसर्वलोकस्यगतिःसएवाकाशशब्देनप्रतिवक्तव्यइतिएषमाकाशादेवसमुत्पद्यंतइत्येव

कारणानुरोधादत्राकाशपदस्य भूताकाशपरताएवकारेणाकाशव्यतिरिक्तं कारणं व्यवच्छिनत्ति न चैतद्भूताकाशपरिग्रहे
युज्यते वाय्वादिकं प्रति कालादृष्टादीनामपि कारणत्वात् न चैतत् ब्रह्मपक्षेपि तुल्यमिति शंक्यं ब्रह्मणः सर्वात्मकतया आका
शकालादीनां ततोत्यंतभिन्नत्वाभावात् इतरव्यवच्छेदोपपत्तेः अत्र भूतले एक एव घटोस्तीत्यादौ अस्य घटव्यक्तिव्यतिरिक्ता
नां तत्सजातीयविशिष्टानां घटत्वोपहितात् भिन्नस्य द्रव्यत्वोपहितस्य च सत्त्वेनेतरसामान्यव्यवच्छेदायोगेनोक्तवाक्यस्याप्रामाण्यापत्त्यादि
घटानामत्यंतभिन्नार्थव्यवच्छेदबोधकतायाश्च वक्तव्यत्वादाश्रयणीयत्वात् अत्यंतभेदश्च तन्नादात्म्यासमानाधिकरणभेदः ए
वं सत्यन्नाकाशकालादौ तत्र ब्रह्मतादात्म्यसत्त्वात् स्पष्टं चेदमाकरे विशिष्टैक्ये चभेदादिकं चाकरे स्पष्टमुपपादितं ॥ अथानं
तत्वमापेक्षिकमेव तथा हि शालावत्त्वेनाप्रतिष्ठितं वैतेऽकिल दाल्भ्य सामेति अप्रतिष्ठितत्वदोषोद्भावनेन दाल्भ्यपक्षं दूषितवा
नपि स्वयं पृथिवीलोकापेक्षिकप्रतिष्ठायामेव निरूपितः न हि पृथिवीलोको निरंकुशप्रतिष्ठा आकाशे तस्याः प्रतिष्ठाभूतानामन्येषां
जलादीनामपि सत्वात् तद्वदाकाशगतमनंतत्वमपि वाय्वाद्यपेक्षं भविष्यति तदपेक्षयापि तस्य निरस्तुं शक्यत्वात् अमेवं उद्गी
थे कुशालावमूर्ध्नि उद्गीथे कथां वदामइत्युपक्रम्य स्वपादिपृथिव्यंतं तेन तेन दोषेण निराकृत्यानंतवस्तु प्रक्षिप्य स एष परोव
रीयानुद्गीथः स एषोनंत इति पर्यवसानकरणात्कृत्स्नोप्ययं संदर्भः उद्गीथे अनंतवस्तुध्याननिरूपणपर इत्यवगम्यते पृथि
व्यंतवस्तुपरंपरातत्र दोषश्च न हि निंदान्यायेनानंतवस्तुस्तुतिपर एवन तत्श्चांतवत्त्वदोषोद्भावनार्थमुपक्षिप्तस्य पृथिवीप्र
तिष्ठात्वस्य यथा कथंचिद्व्याख्यानेपि नानंतत्वं यथाकथंचिद्व्याख्यातुं युक्तं तत्र दोषानुद्भावनात् कृत्स्नसंदर्भस्य तत्रैव पर्यवसा

नेत्युपक्रमोपसंहारसंस्पर्शिनो लिंगस्य स्वानप्रमाणेनान्यथानयनासंभवात् ॥ अपि च पृथिवीप्रतिष्ठात्वं न स्वर्गं प्रत्यु
पजीव्यत्वं येन तदपेक्षिकं स्यात् इतः प्रदानं देवा उपजीवंति अमुतः प्रदानं मनुष्या इति स्वर्गपृथिव्योः परस्परं तत्त्वप्रतिपा
दनात् किंतु न प्रतिष्ठां लोकं प्रति नयेदिति पृथिव्याः प्रतिष्ठात्वोक्त्या निश्चलत्वरूपमेव तस्मिन्नपि पक्षिणः प्रतिष्ठितं यत्कि
ञ्चिदेतत्स्य सामेति स्वर्गस्याप्रतिष्ठितत्वं न तद्रूपत्वं पर्यवस्यति तच्च ज्योतिश्चक्रांतर्गतस्य स्वर्गस्योपपद्यते ॥ आर्यभट्टोक्त
भूभ्रमणवादो मत्स्यादिपृष्ठपक्षिपतत्सु योनित्यमधःपतनवादः यवनकल्पितः जलांतर्गतसुष्कालाबुवत्भ्रमेण कल्पितो
भूप्लवनवादो बहुप्रमाणविरोधादेतत्प्रतिष्ठात्वोक्तिविरोधाच्च हेय एव निश्चलेतेषु पक्षेषु ऊर्ध्वनिक्षिप्तकंदुकादेः इष्टप्राप्तिर्न
स्यादित्यादिदूषणसद्भावादित्यन्यत्र विस्तरः इति पृथिव्याः प्रतिष्ठितत्वं प्रदानंत्यमापेक्षिकमित्यसंगतमेव निश्चलत्वरूप
स्य तस्य स्वाभाविकत्वेन सार्वकालिकत्वेन चापेक्षिकत्वासंभवात् ॥ अपि चोपक्रांतमानंत्यं त्रिविधपरिच्छेदनिरासेनोत्त
रवाक्यैर्व्युत्पाद्यते तत्र हि सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यंते इत्यनेन वस्तुपरिच्छेदराहित्यस्याखिलकार
णत्वोक्त्या कालपरिच्छेदराहित्यस्याकाशो वैभ्यो ज्यायानिति देशपरिच्छेदराहित्यस्य च प्रतिपादनात् ॥ अतो सर्वाणि ह वा
इमानि भूतानीति वाक्यप्रतिपाद्यमपि सर्वकारणत्वं निरंकुशमेव व्याख्येयम् आपेक्षिकस्य तस्य ग्रहणे उपक्रांतमानंत्यमप्यु
पादितं स्यात् स एषोऽनंत इत्युपसंहारे आनंत्यं श्रूयते ॥ एवं चोपक्रमोपसंहारैक्यरूपकारणतासूपपत्तिरूपतात्पर्यलिं
गोपेतमानंत्यं नान्यथानेतुं शक्यं यद्यप्याकाशश्रुतिरन्यस्तात् तथापि निरूढ्या ब्रह्मण्यपि व्याख्यातुं शक्या चाकाशवत्स

र्वगतश्चनित्यइतिश्रुतिसिद्धसर्वगतत्वगुणमादायब्रह्मपरासतीउपक्रांतमानंत्यमेवोपोद्बलयिष्यतीतिनकथंचिदानं
त्यंनेतुंशक्यमुपक्रांतांत यत्वनूपदोषपरिहारालाभात् ॥ नचाकाशशब्दप्रतिपाद्यंयत्तत्प्रधानमितिप्रकृतसंदर्भनिर्ण
येसत्यपिभूताकाशमेवप्रधानमितिप्राक्निर्णयोभवतिकिंत्वाकाशपदस्यभूताकाशेरूढत्वात्भूताकाशएवोत्सर्गतस्त
त्प्रतिपाद्यइतिप्रसक्तिः प्राप्तायावद्भवतितावदेवभूयसीर्ब्रह्मलिंगप्रतिपादिकाश्रुतीरुपलभ्यसाप्रसक्तिःकुंठिताभवतित
थाचभूयोनुग्रहन्यायानुसरणेनप्रधानविरोधआपा दयितुंशक्यः ॥ अपितुप्रधानप्रतिपादकस्यलक्षणामात्रंतत्रा
नुपपन्नंअग्निरधीतेनुवाकमितिदर्शनात्अतआकाशपदंब्रह्मैवप्रतिपादयतितस्यतदेवेहप्रधानमितिसिद्धं ॥ ए
तेनप्रधानविरोधान्नभूयोनुग्रहन्यायइतिकस्यचिदुक्तिः परास्तातदेतत्सूचितमाचार्यवाचस्पतिमिश्रैः नचाकाशप्र
धान्यमुत्तरइति ॥ यत्तुचंद्रिकायांअत्रोप्रयेप्याहुः आकाशइतिह्रोवाचेत्याकाशोलिंगात्प्रथमानुपसंजातविरोध्याकाशप
दानुरोधेनबहून्यपिचरमाणिसर्वकारणत्वज्यायस्त्वानंतत्वादीनिभूताकाशेकथंचिद्योज्यानीतिप्राप्तेपद्यप्याकाश
पदंसर्वाणीत्यादितः प्रथमंतथापिपरिहारवाक्यस्थाकाशपदादपिप्रथमानुपसंजातविरोधिप्रश्नानुरोधेनचरमस्ये
तरस्यनेयत्वात् ॥ अस्यलोकस्यकागतिरितिप्रश्नस्यदृश्यमानसर्वप्रपंचविषयत्वात्सर्वलोकगतिरेवाकाशपदे
नप्रतिवक्तव्यानचलोकांतर्गतोभूताकाशः सर्वभूतगतिः किंचसर्वलोककारणत्वादिबहुनुग्रहार्थमेकमाकाशपद
मेवजघन्यवृत्याब्रह्मपरंत्वज्येदेकंकुत्रस्यार्थइतिन्यायादित्यादिनानिरुक्तपूर्वपक्षसिद्धांतावनूद्यअत्रब्रूमः प्रथमानु

सारेणाचरमस्यास्ये पूर्वाधिकरणेपिहिरण्यश्मश्रुत्वाद्यनुसारेण सर्वपाप्मोदितत्वं जीवे कथंचिन्नेयं स्यात् इहापिप्रश्ना
नुरोध्यत्वेमायम्य्मेवहेतुःप्रश्नोत्तरयोरेकविषयत्वस्योत्तरानुसारेणप्रश्नव्याख्यानेपिसिद्धेः किंच प्रकृतां पृथिवीं वक्तिम
श्नस्थं सर्वनाम यत्तस्मात्तदनुरोधीनेत्यसमाधिश्च तथा भवेत् तथाहि असौ लोक इत्यादिना दाल्भ्योक्तं स्वर्गलोकस्य स-
माश्रयत्वं शालावत्याः अप्रतिष्ठितं किलेत्यादिना दूषयित्वा अयं लोक इत्यादिना पृथिवीसमाश्रयइत्युक्ते जैवलिस्तु तं अं
तवद्वै किलेति दूषयत् तर्ह्यस्य लोकस्य कागतिरिति शालावत्येन प्रकृतपृथिवीलोकगतिरेव पृष्टा न सर्वगतिः अस्येति
सर्वनाम्नः प्रकृतपरामर्शित्वात् ॥ तथा च प्रश्नानुरोधेन व्याख्याने सर्वाणि हवेत्यत्र सर्वशब्दः पृथिवीमात्रपरः स्यात्
न च पृथिवीकारणस्यापां प्रसिद्धत्वेन प्रश्नवैयर्थ्यं सर्वलोककारणस्यापि वाक्यांतरतः प्रसिद्धेः लोकतत्त्वपां पृथि
वीकारणत्वस्याप्रसिद्धेः न च पृथिवीमात्रकारणप्रश्ने आप इति वक्तव्यत्वात् आकाशपदं सर्वाणीति पदमाकाशादेवे
त्ययधारणं चायुक्तं तस्मात् प्रश्नेपि सर्वलोकगतिर्विषय इति वाच्यं मामत्यां प्रश्नानुरोधेनोत्तरस्य व्याख्यानादित्युक्त-
त्वेनोत्तरानुसारेण प्रश्नव्याख्याने अन्योन्याश्रयात् यच्चोक्तं त्यजेदेकं कुलस्यार्थ इति तन्नाकाशश्रुतेः प्रधानत्वात् अप्रधा
नानेकलिंगबाधस्याप्यात्मार्थे पृथिवीं त्यजेदिति न्यायसिद्धत्वात् किंच कारणे कार्यगा यद्वत् तथा कार्येपि हेतुगाः व्यपदे
शा हि दृश्यंते धर्माएवं व्याविशेषतः पूर्वाधिकरणे त्वत्पक्षे कार्यगतस्य हिरण्यश्मश्रुत्वादेः कारणे व्यपदेशाद्येह कारण
गत धर्माणां सर्वकारणत्वादीनां भूताकाशे व्यपदेशोस्तु तयोरभेदाविशेषात् किंच विशिष्टविषयत्वं चेत्यनंतत्वाद्य
+ प्रवहण

संभवः श्रुत्यविषयत्वं चेज्ज्यायस्त्वादेरसंभवः नहि सोपाधिके परिच्छिन्ने ब्रह्मणि अनंतत्वादिकं नापि निर्विशेषे ज्यायस्त्वादिकं न च ज्या
यस्त्वमपरिच्छिन्नत्वमनंतमित्यनेन पुनरुक्तेः किंतु परिमाणाधिक्यं गुणाधिक्यं च न च तन्निर्विशेषेऽस्ति यद्यपि वस्तुतो निर्विशेषे आ
रोपितविशेषो न विरुद्धः तथापि त्वदुक्तो निर्विशेषसविशेषविद्ययोरधिकारिभेदः फलभेदः विद्याभेदेन पादभेदश्च न स्यात् एवमुत्तरा
धिकरणविषयवाक्येष्वपि सगुणनिर्गुणलिंगयुक्तेषु दोष ऊह्यः किंच सूत्रोक्तलिंगं न तावत् ब्रह्मणि तत्त्वतोऽस्ति यदि त्वा
रोपितं लिंगं तत्साध्या ब्रह्मतापि ह्यारोपिता स्यात् एवं च पूर्वपक्षः स्थिरो भवेदिति दूषणमुक्तं तदसारमेव प्रथमचर
मयोस्तुल्यबलत्वे प्रथमस्याधिकबलवत्त्वे वा प्रथमानुसारेण चरमं नेयं चरमस्याधिकबलवत्त्वे तु चरमानुसारेण प्रथमं
नेयमिति हि स्थितिः एवं च पूर्वाधिकरणे प्रथमश्रुतहिरण्यश्मश्रुत्वादिकमपेक्ष्य स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह
वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेति फलवचनरूपतात्पर्यलिंगोपेतस्य सर्वपाप्मोदितत्वस्य ब्रह्मधर्मतया य आत्माऽपह
तपाप्मेति श्रुत्यंतरे प्रसिद्धस्यानन्यथासिद्धतया प्रबलत्वेन तदनुरोधेनोक्तरीत्या असंकोचेनैव ब्रह्मणि संभवतो हि
रण्यश्मश्रुत्वादेर्नयनं युक्तं प्रकृते चोपक्रमोपसंहारैकरूप्योपपत्तिरूपतात्पर्यलिंगोपेतानंत्यलिंगावगतब्रह्मभावेन
विषयेण निर्णीतस्य विषयस्य प्रथमस्यानुपसंजातविरोधिनोऽनुरोधेन चरमाकाशश्रुतिरेवान्यथा नेयेति प्रथमानुसारे
णेत्याद्युक्तिप्रायश्यमेव हेतुरित्येवकारश्चासंगत एवेति स्पष्टमेव किंचेत्याद्यप्युक्तमेव अंतवद्वै किल शालावत्येति
निंद्यागतित्वेन चरमस्यमनंतमित्यवगततत्साधकत्वेन प्रक्रांतानंत्योपपादनानुरोधेन सर्वलोकगतेरेव प्रष्टव्य

तयाऽस्येति सर्वनाम्नो विशेषेणोपस्थितकार्यमात्रपरामर्शकताया एव युक्तत्वादत एवोक्तरीत्या पृथिवीमात्रकारण
तापत्तिर्माभूदिति सर्वाणि ह वेति वाक्यशेषे सर्वादिपदं प्रयुक्तं तदपि सर्वपदं प्रश्नानुरोधेन पृथिवीमात्रपरं स्यात्तथ्य
थं मे वस्यात् पृथिवीकारणत्वमात्रस्यास्य लोकस्य गतिरिति प्रश्नस्थपदत्रयानुषंगमात्रेणोपलाभेन सर्वाणि ह वा इमानि
भूतानीति बहुवचनवैयर्थ्याच्चानंत्यमभिधानाय सर्वलोककारणतावोधनस्यैव युक्तत्वात् परस्त्वन्योन्याश्रय उक्तः सोप्यत्यंत
मयुक्त एव प्रथमावगतानंत्येनैव प्रश्नविषयनिर्णयस्योक्तत्वात् प्रश्नानुरोधेन निर्णयस्याकाशपदार्थस्य प्रश्नविषयनि
र्णयेऽनपेक्षितत्वेनान्योन्याश्रयस्योक्तेर्निरालंबत्वात् सर्वाणीत्यस्याकाशादेवेत्यवधारणस्य चार्थनिर्णये प्रश्नानपेक्ष-
णाच्च आकाशपदानुसारेण प्रश्नव्याख्यानोक्तिस्त्वयुक्तोपालंभ एव श्रीमद्भाष्यभामत्यादौ तथानुक्तेः प्राधान्यं तु गतित्वे
न वक्तव्यस्यानंत्यस्यैव न भूताकाशस्येति प्रागुक्तमेवेति ॥ यच्चोक्तमित्यादिनोक्तदूषणमप्ययुक्तमेव ॥ किंच कारणैक
र्थ्यगायह इत्यादिनोक्तमपि दूषणमविचाररमणीयं ॥ जीवेपि हिरण्यश्मश्रुत्वादेर्यथाश्रुतस्योपपादयितुमशक्यत्वा
त् न हि जीवेपि हिरण्यश्मश्रुसंबंधस्याश्रयदेहतादात्म्यतत्स्वामित्वाद्यतिरिक्तः संभवति तादृशसंबंधश्च सर्वविका
र सर्वकारणसर्वनियंतरि च परमात्मन्युपपन्नमेवेति परमात्मनि तद्व्यपदेशोक्तिर्युक्तैव न न स्वकर्मोपार्जितत्वसंबंध एव
वा बहुग्राह्यर्थ इति नियंतुं शक्यं सर्वकर्मा सर्वगंधः सर्वरस इत्यादौ संबंधांतरस्यापि बहुभिर्ग्राह्यतया दर्शनात् उपक्रमा
दिभिः परमेश्वरपरतया निर्णीतवाक्यांतर्गते त्रिलोचनं नीलकंठं प्रशांतमित्यादावुक्तसंबंधातिरिक्तसंबंधार्थक

तथा एव बहुधा हिरण्यस्य पांच्यत्वाच्च एवं चान्यथासिद्धानां हिरण्यश्मश्रुत्वादीनामुक्तदिशा ब्रह्मण्यपि संभवतां तत्र व्यप
देशं शास्त्रे प्यन्यथासिद्धानामानंदत्वादीनां सर्वकारणत्वादीनां मूर्ताकाशे संभवतां पूर्वाधिकरणोक्तरीत्या तत्र व्य
पदेशोक्तिर्युक्तिरधिकारिणामतारतम्येनेति स्पष्टमेव ॥ प्रपंचितं चैतत्पूर्वाधिकरणे स्वर्णकटकत्वादेरिव कटकादेश्च
र्णत्वव्यवहारेण ब्रह्मधर्मैः कार्य एव व्यपदेशाभावादिति चंद्रिकोक्तदूषणनिराकरणे विस्तरेण ॥ किंच विशिष्टस्यादि
रूपस्य युक्तमेवोपहितस्यैवोक्तरूपेणोपास्यतायां बाधकाभावात् ॥ न च तत्रानंदत्वाद्यसंभवः उपहितस्य मुख्याभिन्नत
या मुख्यरूपेणापि तदुपपत्तेः उपहितब्रह्मणोऽप्यमिथ्यात्वेन देशकालाद्यपरिच्छेदसंभवाच्च यथा चोपहितब्रह्मणोऽमि
थ्यात्वं तथा प्रपंचितं श्रीमत्त्याधिकरणेऽस्माभिर्विस्तरेण ॥ यदपि मुख्यस्यैवाभिमतत्वादेन सविशेषनिर्विशेषविषयविद्य
योरधिकार्यादिभेदेन स्यादुक्तविद्याभेदेन पादभेदश्च न स्यादिति दूषणमुक्तं तदसत् ॥ आपादकाभावात् न चैकविषय
कत्वमापादकं धर्मैक्येऽपि धर्मिविवक्षातद्भावाभ्यां विद्याभेदस्य वक्ष्यमाणत्वात् तद्धेतुलक्षणभेदेन फलभेदलक्षणस्य चापि निष्प्रत्यूह
त्वात् निर्गुणविद्यायाः प्रपंचाधिष्ठानमुख्यब्रह्मविषयकप्रमा रूपतया सद्योमुक्तिः फलं सगुणविद्यायाश्च मुख्याभेदका
रकब्रह्मधर्मिकध्यानरूपायाः ज्ञानानात्मकत्वात् अविद्याविरोधित्वासंभवेन सरूपानुपपत्त्या हि तस्याश्च सद्योमुक्तिजननसा
मर्थ्याभावात् तयाश्रुतं कर्मसमुच्चयादि वा फलमिति स्वरूपफलादिभेदस्यानिष्प्रत्यूहतया अधिकारिभेदस्यानिरपवाद
त्वाच्च न चेदं कामियं मुक्तिरिति शुक्तेरपीदं रजतमिति भ्रमानिवर्तकसत्याया अधिष्ठानविवर्तकबाधाभावात् इष्टापत्त्या नविष

यकत्वमेवतं अनन्तुलदन्यातिरिक्तविषयकत्वमपीति ध्यानस्यानुष्ठयस्य भावविषयकत्वेऽपि पुंसोनाविद्यानिवृत्तिरिति वाच्यं ज्ञान
स्यैवाज्ञाननिवर्तकत्वनियमात् इयं ज्ञातिमद्वतीति शुक्तौ रजतमिति भ्रमोऽपि आविवर्तकत्वेऽपि भावविषयकत्वस्याप्यज्ञाननिवर्तकताया
मतं च तेन जिज्ञासासूत्रोक्तगतेरप्यपणीयतया दोषं यथाभाव्यं पयमेवोत्तराधिकरणादिषु द्रष्टव्यं विधेयगुणनिर्गुण
ब्रह्मलिंगेषु परोक्तदूषणोद्धारप्रकारस्तु किंच सूत्रोक्तमित्यादि कं तर्कं न तु कं आरोपितस्याधिष्ठानसाधारणस्य लक्ष्यभूतस्याप
कृतायां निष्प्रत्यूहत्वात् न ह्यारोपितरजततादात्म्येन साध्योरजतभेदोऽप्यारोपित इति ज्ञातव्यं सर्वेषु साधकं न पश्चितव्या
यमर्थः विस्तरेण जन्मादिसूत्रे चन्द्रिकोक्तदूषणोद्धारे स्माभिराकरे च स्पष्ट इति दिक् ॥ आनंदवल्ल्यां यास्तु आधिदैविकं ब्रह्म
दिनामसमन्वयः पूर्वाधिकरणे उक्तः अथादिभौतिकाकाशादिनामसमन्वयः क्रियते भूतेष्वाकाशस्य प्राधान्यात् ब्रह्म चक्षु
नामेतरोपलक्षकतया सूत्रे उपात्तं अनंतरसंगतिस्तु को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनंदो न स्यादित्यत्र विष्णोः
लोकचेष्टकत्वमानंदमयत्वे हेतुरुक्तः तत्र ह्याकाशस्य भूतत्वेऽपि यदि चेष्टकत्वं स्यात् आनंदमयोऽप्यन्यः स्यादित्याशंक्या
धिकरणाक्षेपादस्यापि कीर्तनात् आकाशशब्दोऽयं रूढ्या भूताकाशे प्रसिद्धः न योगमात्रेण ब्रह्मणि वर्तयितुं शक्यः यद्यप्यस्या
शेष्ययं न रूढः तथापि पृथिवीलोकगतिस्तोपपादकतयोक्तकारणत्वस्याकाशाद्वायुरित्यादौ भूताकाशएव श्रवणात् स
एवात्र गृहीतुं शक्यो नाधकाशरूपाकाशः अतो यदेष आकाश इत्युक्तोऽपि स एव स्यात् न च वैधर्म्यत्वं शक्यं रूढेर्बलवत्त्वात्
इति पूर्वपक्षेपरोपरीपरस्त्वाद्विनिरयकाशलिंगाद् आकाशोऽभिष्णुरेव न चाकाशश्रुतिर्निरवकाशा लक्षणया योगेन वा विष्णा

द्यपि वृत्तिसंभवान्नामानि सर्वाणि यमाविशंति तं यैविष्णुं परममुदाहरंतीति सर्वनाम्नां विष्णुपरत्वाच्च न चामुख्यत्वं दोषः
योगविद्रूढ्योस्तु तैरसंभवादिति सिद्धांत इति रीत्या अधिकरणयोजनामाहुः नन्वेवं चक्रध्वंसन्यायस्तु महद्रूपपूर्वपक्षहेतो
र्निरवकाशलिंगबाध्यत्वरूपसिद्धांतहेतोश्च यौगिकायौगिकसाधारण्ये अस्याधिकरणस्य यौगिकमात्रविषयकत्वे
किंचिन्निगमकं न चाधिदैविकेंद्रादिनामसमन्वयानंतरं यौगिकस्यैव बुद्धिस्थत्वात्तन्निरूपणमिति युक्तं तर्हि तन्न्या-
येनैवास्य गतार्थत्वं दुर्वारं तन्नापि निरवकाशलिंगबलादेव श्रुत्यन्यथाकरणात् यथोक्तं चंद्रिकायामंतस्तद्धर्माधिकरणे
सिद्धांते लिंगादिभ्यो बलवती श्रुतिर्यद्यपि च स्यात् तः आकाशोऽस्मिँल्लिंगैः सावकाशत्वाध्यवसाय इति न च पूर्वन्यायातिदेशाप
वादमप्यधिकशंकानिरासार्थ इति चंद्रिकोक्तं साधु अनन्यप्रमाण इति यदतिदेशस्यामत्यक्तसत्वात् अभ्यधिकशंकायाश्च
भावाच्च ॥ यत्तु चंद्रिकायां यद्यपि निरवकाशलिंगैर्यौगिकमसिद्धिर्बाध इह पूर्वमावयोरिष्टस्तथाप्यधिकाशंकानिरासाद
यौगिकत्वमित्युक्तं पूर्वत्रेंद्रादिशब्दानां तत्प्रवृत्तिनिमित्तैश्वर्यादीनां चेतनगतत्वेन भगवदधीनत्वात् युक्तो विष्णुपर-
त्वे चैतन्यमृत्युगतजयस्य राजाधीनत्वेन राजा जयीति प्रयोगदर्शनात् इहैव तु जडधर्मावृशशब्दप्रयोगदर्शनेन अचेतन
गतप्रवृत्तिनिमित्तस्य चेतनानधीनत्वावधारणात् तत्प्रसादलब्धत्वरूपं तदधीनत्वमेवेत्याह प्रवृत्तिनिमित्तं वाच्यं तथा
नाचेतने आकाशे ज्ञानाधीनभगवत्प्रसादस्यासंभवादाकाशपदप्रवृत्तिनिमित्तस्याविपरत्वादेरचेतनगतत्वात् अने
न नाकाशात्स्वभावस्य तन्त्रस्यान्याधीनत्वस्वभावत्वहानेर्भगवदनधीनत्वेन नाकाशश्रुतेः प्रवृत्तिनिमित्ततादधीन्यन्यायेन

विष्णुपरत्वसंभवतिविद्वद्भिर्महार्थैर्गौणत्वआस्थितेर्वैदिकप्रयोगबाहुल्यादेरप्याप्तसिद्धेरितिभमेयाश्रिताआकाश-
शब्दस्यब्रह्मणिमुख्यत्वाविरोधिनीअधिकाशंकाप्रमाणाभिन्नहुपूर्वत्रैवस्य श्रुतित्वात् प्राबल्यंशंकितेनिरवकाशत्वप्रयुक्त
प्राबल्यस्यबलवत्त्वात्निरवकाशलिंगेनश्रुतिर्बाधोयुक्तः अनन्ताकाशश्रुतेः आकाशादेवसमुत्पद्यंते आकाशंप्रत्यस्तं
यंतिआकाशोह्येवैभ्यो भूतेभ्योज्यायानाकाशःपरायणमितिआकाशश्रुतेः बाहुल्यात् श्रुतिप्राबल्यंतोभयप्रयुक्तप्राबल्यान्नि
रवकाशत्वमात्रप्रयुक्तप्राबल्यस्यदुर्बलत्वान्निरवकाशस्यापिलिंगस्यबाधइतिपक्षाप्रयुक्तमन्यत्रानिर्णूदनामपीशा
दिशब्दानांकेषांनादिशब्दानांपजिसामानाधिकरण्यवत्संदर्भितिवपमानविष्णुमित्यादौविष्णुशब्दसामानाधिकरण्यात्॥ योदेवा
नांनामधाइतिविशेषश्रवणात् अन्यत्रानिर्णूदांतस्थत्वप्रयुक्तसाद्वाधाच्च विष्णुपरत्वंउत्पत्तिशिष्टसोमावरुद्धेपियागेउत्प
त्तिशिष्टस्यफलचमसस्यभक्षणमुखेनानुप्रवेशायदर्शितरूपत्वेपीशादिशब्द अंतस्थत्वंमुखेनप्रवेशविरोधात्
आकाशशब्देतुक्वापितत्सामानाधिकरण्याभावात् अन्यत्रानिर्णूदप्रयुक्ताभावाच्चाविशेषणरूपत्वेयागेप्रतिनविष्टत्वात्
नविष्णुपरत्वंअथवाआकाशशब्दस्योपक्रमस्थत्वेनश्रुतित्वेनबलवत्वात्इंद्रबृहस्पत्यादिशब्दवच्चपरस्परविरुद्ध
नानार्थोपस्थापकत्वाभावेनैकवाक्यत्वभंगाभावात्॥ आकाशब्रह्मणोर्विरुद्धांशत्यागेनैक्यांगीकारेपिपूर्ववत्बाध
बाधकस्यभेदव्यपदेशस्याभावाच्चाकाशशब्दः भक्तिस्थार्थपरः इतिप्रबलश्रुत्यनुसारेणचानंतत्वादिलिंगानिकथंचित्
योज्यानीतिसविस्तरमुपपादितंतदपिनक्षोदक्षमंतत्वधर्मोपदेशात्तल्लिंगादित्यत्रधर्मोपदेशाल्लिंगादित्यत्रैवप्रसिद्धं

तस्मिन्नेव तत्तदीयाख्यानं तदसाधारण्यलाभार्थं पंक्त्यंतर्भूतधर्मलिंगयोर्निरवकाशत्वरूपं रूढिबाधनार्थं चैन वृत्त्यंतरेण तत्तच्छब्दः परमात्मपर इत्येतावदधिकरणप्रमेयं वृत्त्यंतरं च योगो वा लक्षणा वा गौणी वा पर्यवसानवृत्तिर्वा विरूढिर्वेत्यन्यतो वसेयं यथा आज्यैः स्तुवते पृष्ठैः स्तुवते श्येनेनाभिचरन् यजेतेत्यादौ धात्वर्थसामानाधिकरण्यात्तयोः नामत्वावगमादाज्यादिपदानां यदाजिमियुस्तदाज्यानामाज्यत्वं यथा वा श्येनेनाभिपतनादित्यादिवाक्यशेषात् प्रथाक्रमं यौगिकत्वलक्षणिकत्वगौणत्वनिर्णयः तद्वदिह पूर्वाधिकरणन्यायेनाकाशपदस्य निरवकाशत्वेन प्रबललिंगात् विष्णुपरत्वनिर्णये आकाशपदस्य निमित्तविवरणादेरभावेन धीनत्वेपि आसमंतात् काशते प्रकाशत इत्याकाश इति योगेनापि विष्णुपरत्वसंभवादन्येषामपि योगेन लक्षणया गौण्या वृत्त्या वा तत्संभवादुक्तप्रमेयाश्रिताधिकरणानां पौनरुक्त्यपरिहारः प्रयुक्त एव नापि आकाशश्रुतेः श्रुतित्वेन बहुत्वप्रयुक्तप्राबल्यान्निरवकाशत्वप्रयुक्तप्राबल्यस्य दुर्बलत्वानिरवकाशस्यापि लिंगस्य बाध इति प्रमाणाश्रिताधिकरणानां का युक्ता श्रुतिलिंगादिसूत्रस्य जैमिनीयस्य नियमप्रमाणश्रुतिलिंगादिनिष्ठप्राबल्यदौर्बल्यनिरूपकत्वाभावे परत्वेनार्थसामान्यनिर्णायकप्रमाणविषयत्वाभावात् ॥ अत एवापि नियोगातिरिक्तविषयलिंगादिप्रमाणमन्यार्थदर्शनमेव न तूक्तसूत्रस्थश्रुतिलिंगादिरूपमिति मीमांसकव्यवहारः ॥ तथा च श्रुतिलिंगाद्योपयविनियोगे तेषामेकाभिधायित्वे विरोधः प्रसक्तो भवति तत्र श्रुत्यादिना लिंगादिकं बाध्यतेन सर्वत्रेति पूर्वाधिकरणेष्वदर्शितमेवा । अत एवानंदमयो ऽभ्यासादित्यधिकरणे विकारार्थमयट्श्रुतेरन्यस्याप्यजापि निरवका-

शासर्वांतरत्वलिंगेन वायोश्रुतिकारैराश्रितः अस्तु वा श्रुतिलिंगादिसूत्रस्यार्थसामान्यानिर्णये प्रयोगप्रमाणविष-
यता ॥ तथापि श्रुतिसमाख्ययोर्युक्त आकाशशंकायाः पूर्वाधिकरणे एव निरस्तत्वात् श्रुतिभूयस्त्वसत्त्वेऽपि तस्यमा
बल्यप्रयोजकं भूयोऽनुग्रहन्यायस्य विरुद्धयोः प्रमाणयोर्द्वयोः समानबलत्व एव प्रवृत्तेः प्रकृते श्रुतेः योगादिना सा-
वकाशत्वात् लिंगस्य निरवकाशत्वेन द्वयोः समानबलत्वाभावान्नोक्ताधिकशंकासंभवः नापि यहेत्यादिनोक्ताप्र-
धिकशंका युक्ता इंद्रशब्दस्य विष्णुशब्दसामानाधिकरण्यस्येवाकाशशब्दस्यापि यदेष आकाश आनंदो न स्यादाका-
शो ह वै नाम नामरूपयोर्निर्वहिता इत्यादौ जगत्प्राणनादिहेतुत्वेन नामरूपनिर्वाहकत्वादिना विशेषेण निर्णीत
परब्रह्मतात्पर्यकेन शब्देन सामानाधिकरण्यदर्शनाविशेषात् सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्प-
द्यंत इति विशेषश्रवणस्याप्यविशेषात् ॥ ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः ॥ सैषा भार्गवी
वारुणी विद्या परमे व्योमन् प्रतिष्ठिता ॥ कं ब्रह्म खं ब्रह्मेत्यादौ निर्णीतपरब्रह्मतात्पर्यकेन शब्देनाकाशपर्यायवाचिनां
व्योमखादिशब्दानां सामानाधिकरण्यदर्शनाच्च ॥ अन्यत्रानिरूढपरोवरीयस्त्वादिमुख्यस्यसंभवाच्च ॥ आमिक्षाव
हृत्येयागे वाजिनवद्विरोधान्न विष्णुपरत्वमित्यादिदृष्टांतप्रदर्शनमप्ययुक्तं तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा
वाजिभ्यो वाजिनमित्युदाहरणे वैश्वदेव्यामिक्षेत्यनेन द्रव्यदेवताविशिष्टयागविध्युत्तरं वाजिभ्यो वाजिनमिति श्रूयते तत्र
वाजमन्नममिक्षारूपं येषामस्तीति व्युत्पत्त्या वाजिपदेन विश्वदेवोक्तेः तेषां वाजिनसंबंधस्तथा चामिक्षया सह वा

जिनस्यैकस्य यागे विकल्पः समुच्चयो वा अथवा आमिक्षानुनिष्पन्नवाजिनसंबंधाद्वाजिपदस्यामिक्षायागे गौणत्वा
त्तदुद्देशेन वाजि देवताधिकरणेन समुच्चयेन वा विधिरिति पूर्वपक्षे वाजिपदस्याश्वादौ रूढ्या बलीयस्त्वा अश्वस्योक्ते
यौगेन विश्वेदेवानुक्तेरसत्त्वे. शिष्टत्वेन प्रबलया आमिक्षया विश्वेदेवदेवतया वाजसहोत्पन्न. शिष्टस्य वाजिनस्य वाजि
नाधिकरण्यासंभवात् द्रव्यदेवताविशिष्टामिक्षायागाद्विजातीयमागांतरं विधीयत इति वाजिनकर्मणि योगगुणेन-
निवेशाद्दसत्तोपं जात्येन स्यान्वापि तथापि धेयकर्मणः सप्रभेदक इति सिद्धांतः कृतः ॥ प्रकृते तु निरवकाशलिंगेन रूढिबा
धस्य पूर्वाधिकरणेन सिद्धा आकाशपदस्य यौगिकत्वस्य वाच्यत्वादुक्तयोगार्थस्यापि ब्रह्मणि विरोधाभावेन तस्य विष्णुप
रत्वसंभवात् दृष्टांतवैषम्यात् ॥ किंच पूर्वतंत्रे शब्दभेदेन कर्मभेदप्रयोजकत्वेन क्लृप्तोक्तोदाहरणदृष्टांतेनाकाशादिशब्दा
द्धार्थभेदशंकाप्ययुक्तैवान्यभेदप्रयोजकस्यान्यभेदाप्रयोजकत्वादन्यथा विशिष्टभेदप्रयोजकस्य विशेषणभेदस्यापि
विशेष्यभेदकत्वापत्तेः देवदत्त उत्तिष्ठति शिष्यं बोधयति यज्ञं निददाति जुहोतीत्यादावप्यर्थभेदापत्तेः अथवेत्यादिनो
क्ताधिकरणशंकापि न युक्ता पूर्वाधिकरणादेव आकाशस्य जडत्वेन सृष्ट्यनुपपत्त्या जीवब्रह्मणोरिव विरुद्धांशत्यागेनोभ
यानुस्यूतस्वरूपाभावेनाकाशशब्दगौणत्वे हि स्थांशत्यागे चैतन्यासंभवस्योक्तत्वात् आकाशात्मनाश्रुताकाशादिसर्वभूतकार
णत्वानुपपत्तिरूपबाधकस्यातिस्पष्टत्वाच्च ॥ एवं च सूत्रे परैव परीयानुद्गीथः स एषोऽनंत इति वाक्यशेषोपक्रमस्थपरोवरीयस्त्व
मनंतत्वादि निरवकाशलिंगेनाकाशशब्दस्य विष्णुपरत्वनिर्णयोऽप्यधिकरणेन ॥ आनंदमयाधिकरणे [illegible]

श्रीगणेशायनमः ॥ अत एव प्राणः ॥ अध्यायादिसंगतयः प्राग्वत् अनंतरत्वालिंदेशिकी पद्धा पूर्वाधिकरणे आनं त्यादुन्न्यायासिद्धब्रह्मलिंगोपोद्बलितनिर्णीतविषयात्तु पसंजातविरोधिप्रश्नानुरोधादाकाशश्रुतेरन्यथानयनं युक्तं इह च तदभावात् श्रुतित्यागोऽनुचित इति प्रत्यवस्थानात् प्रत्युदाहरणरूपता ॥ छांदोग्ये उद्गीथाध्याये धनाशया कस्य चिद्राज्ञो यज्ञशालायां प्रविष्टेन चाक्रायण ऋषिणा स्वज्ञानख्यापनाय प्रस्तावोद्गीथप्रतिहाररूपसामभक्तिदेवताधि- ज्ञानरहितानां भवतां मम विदुषः सन्निधावार्त्विज्यं कुर्वतां मूर्धपातो भविष्यतीति शापतैव तत्तद्देवताविज्ञानं परीक्षितुं प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां ब्रूहीत्येवं पृष्टानां प्रस्तोत्रुद्गातृप्रतिहर्तॄणां तत्तद्देवताविज्ञानरहितत्वाद्भीतानां तं प्रति शिष्यभावमुपगतानां कतमा सा देवतेत्येवं त्रयाणामपि प्रश्नमुपक्षिप्य प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशंति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्तेति प्रस्तोदेवता प्राणरूपा प्रतिपादि ता ॥ आदित्य इति होवाच सर्वाणि ह वा इमानि भूतानि आदित्यमुच्चैः संतं गायंतीत्युद्गीथदेवता अन्नमिति होवाच स र्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवंतीति प्रतिहारदेवता च तत्र प्राणवाक्यं विषयः ॥ तत्रस्थप्राण शब्दतात्पर्यविषयः किं मुख्यः प्राणः अथवा परं ब्रह्मेति उभयत्र प्राणशब्दप्रयोगदर्शनात् संशयः मुख्यप्राणे प्राणशब्द प्रयोगस्तावत् प्रसिद्धतरः प्राणनिबंधनं हि सोम्य मनः प्राणस्य प्राणमित्यादौ च ब्रह्मण्यपि प्रयोगो दृश्यते तत्र प्राणश ब्दतात्पर्यविषयस्तावत् मुख्यप्राण इति युक्तं विना बाधकं रूढित्यागायोगात् ॥ न च वाक्यशेषगतानन्यथासिद्धनि

सिद्धजगत्कारणत्वादिलिंगात् न त्याग आवश्यक इति वाच्यं॥ अभ्युपगमानान्न पसंजातविरोधि प्राणश्रुत्यनुरोधे
न वाक्यशेषस्यान्यथा नेयत्वात् न च भूयोनुग्रहन्यायेन वाक्यशेषगतानेकलिंगानुसारेणैकस्याः प्राणश्रुतेरन्यथा नयन
युक्तमिति वाच्यं मुख्यप्राणस्यापि भूतसंवेशनोद्गमनाधिकरणत्वस्य श्रुतिप्रत्यक्षसिद्धत्वात् श्रुतिस्तावत् यदा वै पुरुषः स्व
पिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मनः स यदा प्रबुध्यते प्राणादेवाधि पुनर्जायंत इत्यादिका स्वापकाले प्रा
णवृत्तावपरिलुप्यमानायामिंद्रियवृत्तीनामपि परिलोपः प्रबोधकाले प्रादुर्भाव इति सार्वजनीनं प्रत्यक्षमिति इंद्रियसारत्वा
च्च भूतानामविरुद्धो भूतसंवेशनोद्गमनवादि वाक्यशेष इति एतेन पूर्वाधिकरणनिर्णयाकाशवाक्य इवात्रापि तल्लिंगात् ब्रह्म
ण एव ग्रहणं युक्तं इहापि वाक्यशेषभूतसंवेशोद्गमनं पारमेश्वरं कर्म प्रतीयत इति पौनरुक्त्यशंकानवकाशः॥ अधिको-
क्तशंकानिरसनार्थत्वाद तिदेशोक्तेः सार्थकत्वात् ननु संवर्गविद्यागतेन वाक्येन वागादीनामेव प्राणे लयो निरूप्यते न
सर्वभूतानां सोपि न मुख्यः अपि तु प्राणवृत्तौ विद्यमानायां वागादिवृत्त्यभावमात्रे पर्यवसितः औपचारिकः प्रत्यक्षसंवादोपि तावत्ये
व सर्वाणीत्याद्युक्तवाक्ये च प्राणे सर्वभूतलयः प्रतिपाद्यते न याच्च भूतशब्दस्य प्राणिमात्रपरत्वे आकाशादि सर्वभूतपर
त्वे भवंतीति भूतानीति व्युत्पत्त्या कार्यमात्रपरत्वे वा नाकाशवायुविकारप्राणपरिग्रहो युक्तः एतेन भूतसारभूतेंद्रियलया भि
धानेन भूतलयोर्थाल्लभ्यत इति भाष्योक्तं निरस्तं मुख्यभूतलयासंभवस्योक्तत्वात् यथाकथंचित् गौणार्थग्रहणे च प्रमा-
णाभावात् न च प्राणश्रुत्यनुसारेण लिंगान्यथानयनं युक्तं उपक्रमगतचेतनपदाचिदं बलात् श्रुत्यनुसारेण प्राणश्रुतेरेवान्यथान

दिकात्स्न्येन शिवपरत्वप्रतिपादनेन तदंतर्गतेन यस्मात्परं नापरमस्ति किंचिदिति शिवपरेण मंत्रेण हिरण्यगर्भादि
सर्वापेक्षया परत्वज्यायस्त्वोक्तेः परोवरीयस्त्वस्य शिवसाधारणतायाः श्रुतिसिद्धत्वस्य तत्रैव व्यवस्थापितत्वात् तल्लिंगस्य
स्वलोकस्य कारणातिरित्याकाशाद् इति हावा चेति वाक्यस्य तत्स्थाकाशपदस्य चाविष्णुमात्रपरत्वनिर्णयाशक्तेः एवं अचिंत्य
मव्यक्तमनंतरूपं शिवं प्रशांतममृतं भूतयोनिं तथादिमध्यांतविहीनमेकं विभुं चिदानंदमरूपमद्भुतं उमासहायं परमेश्वरं प्रभुं
त्रिलोचनं नीलकंठं प्रशांतमिति कैवल्योपनिषद्युक्त आनंत्यस्यापि शिवसाधारण्यावगमात्तेनाप्याकाशवाक्यस्य विष्णुपरत्वनि
र्णयासंभवः एवं चिद्रूपस्येशतंत्रत्वे स्यादेवाचिद्रूपस्य तत्त्वं यतोऽत्यंतपराधीनं चेतनादप्यचेतनं अस्ति च राजा जयीति प्रयोगव
दजडगतस्य मृत्वादेरभिमानिदेवताधीनत्वाद्देवतायां मृदब्रवीदित्यादिप्रयोगः तस्माद्धि परत्वादिकमपीश्वराधीनं तथा विवरस्व
भावत्वादिकमपि अस्तु खं छिद्रमिति यदाहुः तच्छिद्रात्मकं हि संजातमन्यथा निबिडं भवेत् आकाशस्योत्पत्त्यनंतरमपि छि
द्रत्वं निह्नुत्य तं पादयितुं शक्त ईश्वरस्तथेच्छाभावान्न संपादयतीति नयेच्छाभावात् औषधिवशात् लोके ताम्रादेरप्यताम्रतां कुर्वंतीतीशस्तु
नेच्छतीति किं छिद्रस्याछिद्रताकृतेः नस्मादन्यथाकरणाभावेऽप्यन्यथाकर्तुं शक्यतायां येश विनियोगार्हतास्त्येव बोधयंति च श्रुतिस्मृ
तयः स्वभावस्यापीश्वराधीनत्वं स्पंदते शासनान्न द्योऽभीषास्मात् पर्वते नीरुः नमो ददाति स्वसतां मार्गमित्यादिका इति रीत्या
आकाशस्येश्वराधीनत्वेनाकाशश्रुतेर्विष्णौ मुख्यत्वोक्तिरपि न साधीयसी कैवल्योपनिषदि शिवं प्रकृत्य एतस्माज्जायते प्राणो मनः
सर्वेंद्रियाणि च खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी इत्याकाशस्य शिवाधीनोत्पत्तिवर्णनेनाष्टमूर्तेः शिवस्य शरीरत्वात्पृथ्वी

क्त्रीत्वाशिवस्य तदंतर्यामिभावेनावस्थितेराकाशस्य तत्स्वभावस्य चाशिवाधीनत्वेन तदधीनत्वाद्युक्त्याधेयमुख्यत्वमाकाश-
श्रुतेरित्यस्यासिद्धेः एवमेवाविरुद्धयाआकाशश्रुतेर्विरोधे चमुख्यलौकिकेंर्याशिवसाधारण्याद्व्येकनिष्ठविरुद्धदेर-
सिद्धेरितिदिक् ॥ श्रीमच्छंकरपादाब्जभूषणेपरदूषणे ॥ रघुनाथकृतिर्भूयादाकाशाधिकृताविथं ॥ १ ॥ शंकरानंदतीर्थय
व्याख्ययोस्तत्त्वनिर्णये यदनयुक्तंविद्वांसस्तन्नगृण्हंतुरूपालवः ॥ २ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥

इति आकाशाधिकरणं समाप्तं.

यत्वात् ॥ न चान्नादित्ययोः प्रस्तावदेवतानंतरमुद्गीथप्रतिहारदेवतयोर्निर्देशात्तयोरब्रह्मत्वात्तत्पाठानुसारेण-
प्राणपदस्याप्यब्रह्मपरत्वं भाष्योक्तं युक्तं लिंगविरोधेऽपाठस्यानिर्णायकतायाः ईक्षत्यधिकरण एवोक्तत्वादिति चे
दयमत्र पूर्वपक्षाभिप्रायः प्रथममश्रुतापि देवताश्रुतिरन्यत्र बलवत्प्राणश्रुत्यनुरोधेनाचेतनपरैव वाच्या भूयोऽनुग्रह
स्य न्याय्यत्वात् ॥ नन्वेवं तर्हि तेनैव न्यायेन प्राणश्रुतिरप्यन्यथा नेयेति वाच्यं प्राणश्रुतीनामपि भूयस्त्वेन त्यजेदेकमिति न्यायान
वतारात् पूर्वत्रैव श्रुतितो लिंगानां भूयस्त्वेन लिंगानुसारेण श्रुतीनामन्यथानयनं युक्तं न तथाऽन्नादित्यादौ प्राय
ऽध्याधिकः सत्य बलवत्या प्राणश्रुत्यापोद्धृतः पूर्वं प्रवचनबलवतीश्रुतिरित्यसकृदावेदितमेव ॥ न च तत्रापि देवताश्रुत्यानं
तन वाचिन्या ब्रह्मपरत्वानिर्णय इति युक्तं भाष्यस्थान्नादित्यश्रुतेरेव ततोऽपि बलवत्त्वात् देवताश्रुत्याचेतनत्वावगमेऽपि तत्र
ब्रह्मत्वसाधकलिंगाभावेनाब्रह्मभावपाठस्यानिराधत्वात् ॥ हंताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरू
पे व्याकरवाणीत्यत्राचेतनेऽपि तेजोऽन्नादौ देवताशब्दप्रयोगाद्देवताशब्दस्य चेतनवाचित्वैकांत्यासिद्धेः ॥ किं च त्यज्य
मानहविरायुद्देश्यत्वलक्षणं देवतात्वं न चेतनत्वपर्यवसितं तन्नियतं वा पूर्वकांडे जडस्यापि मंत्रादेर्देवतात्वनिर्णयात् ॥
सास्य देवतेति पाणिनिसूत्रेऽपि देवतापदमुक्तलक्षणदेवतात्वपरमेवातः अग्न्यादिशब्दानां देवतात्वेऽपि अग्न्यादिशब्दा
नामाग्नेयमित्यादिदेवतातद्धितोपपत्तिः ॥ एवं च न तदनुरोधेनान्नादित्यादिश्रुत्यन्यथानयनं युक्तमस्तु न सर्वाणि ह
वा इमानि भूतान्यादित्यमुच्चैः संतं गायंति सर्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवंतीत्यब्रह्मलिंगबोध

ःकवाक्यशेषानुसारेण तन्मुख्यार्थ एव ग्राह्यः सर्वाणि ह वा इमानि भूतान्यादित्यमेवोच्चैः संतं गायंतीत्यादित्यकर्मकगानं नतीय
तेन आदित्यशब्दः अचेतनमंडलपरत्वेनोच्चैः संतमिति तल्लिंगात् श्रुतिभंजकब्रह्मलिंगाभावाच्च एवमन्नमेवप्रतिहरमाण
निर्जीवंतीत्यत्राप्यन्नशब्द ओदनपर एव भिक्षार्थी भक्ष्यमं धान्यमिति कोशादेवं च प्राणश्रुत्यनुसारेण लिंगस्यान्यथा
नयनेऽस्थिते कीदृग्विधः प्राणाधिकरणकः संवेशः कीदृग्विधश्चोद्गमः कस्तदन्ययोनिश्च कानि सर्वाणि भूतानीत्यपेक्षा
यामुक्ताधिकारांकार्थकं संवर्गविद्यागतं वाक्यं मत्स्य संचोदाहृतं श्रीमद्भाष्यकारैः न च प्राणमेवाभिसंविशंतीत्यवधार
णं प्राणस्य ब्रह्मत्वे विरुध्येत सुषुप्तिदशायां ब्रह्मणोऽपि संवेशाधारत्वादन्ययोगव्यवच्छेदकैवकारानुपपत्तेरिति वाच्यं
अन्नमेव प्रतिहरमाणानि जीवंतीति समभिव्याहृतवाक्यशेषे हि एवकारस्य नान्ययोगव्यवच्छेदार्थकत्वं संभवति उक्तके
शावगतान्नशब्दमुख्यार्थौदनातिरिक्तापूपशाकादेरपि जीवनोपयोगितया प्रतिहरणीयानां सत्त्वात् तत्रैवकारस्यायो
गव्यवच्छेदार्थकत्वमभ्युपेत्य जीवंत्येवेत्यन्वयो वाच्यस्तद्वत् प्राणमभिसंविशंत्येवेत्येवकारस्यायोगव्यवच्छेदार्थक
त्वेनुपपत्त्यभावात् एवमन्नादित्यपर्याययोः सर्वपदमपि संकुचितमेव वाच्यं वृक्षादिभिः प्राणिभिरन्नस्यानाहरणात् तें
षामादित्यगानत्वाभावाच्च तथैवात्रापि सर्वपदमिंद्रियादिषु संकुच्यतामित्येव वाच्यमिति वायुविकार एव प्राण इति पूर्वपक्षे
सिद्धांतः अत एव प्राण इति उक्तप्राणशब्दितं ब्रह्मैव सर्वभूतसंवेशनोद्गमनाश्रयत्वात् ब्रह्मलिंगात् न च प्राणश्रुतेरुक्त
रीत्या प्रबलत्वं दैवताश्रुतिहृदयस्य सर्वपदसंकोचस्यैवकारव्यत्ययस्य संविरतात्स्मुज्जिहते इत्यनयोरप्रसिद्ध्यार्थत्वा

क्षाणिकत्वस्य च कल्पनप्रसङ्गस्य भूयोऽनुग्रहन्यायेन श्रुतिलिङ्गानुरोधेन श्रुतेरेवान्यथानेयत्वात् । यच्चोक्तं त्यज्यमानहवि-
रुद्देश्यत्वमात्रं देवतात्वमिति न देवताश्रुतिबाध इति तदसत् कोशादावमरा निर्जरा देवा इति चेतन एव तद्रूढेरुक्त-
त्वात् क्वचिदचेतने देवताशब्दप्रयोगस्य लाक्षणिकत्वात् देवशब्दाद्धि स्वार्थे तलि ते देवताशब्दो निष्पन्नः चेतनवाची
न चरमपठितप्रमाणश्रुत्यनुसारेण लाक्षणिक इति वक्तुं युक्तम् उक्तार्थस्य कथंचित् योगलभ्यत्वेऽपि योगाद्रूढेर्बलीयस्त्वात्
नूद्यपर्यचेतनाश्रयणमेव युक्तम् उक्तधर्मस्य नूद्यवच्छेदकत्वेऽपि प्रयोगमात्रानुपातात् मीमांसकमते पङ्कजादिपदात् पद्मस्यैव यो-
गात् ॥ धेन्वादिपदात्स्थानकर्मार्थकात् चेतनगवादेरेव झटित्युपस्थित्यालम्भतेऽनुपस्थितत्यागानुपस्थितकल्पनयो-
र्दुर्वारत्वात् श्रुतेः प्राबल्येऽपीदमेव तत्र पशुलक्षणाद्याश्रयणेऽनुपस्थितत्यागेनानुपस्थितकल्पनं तच्छक्तिस्थलेऽपि तुल्यं शी-
घ्रमंदप्रवृत्तोस्तुल्यत्वात् अत एव लक्षणत्वाविशेषेऽपि निरूढलक्षणात आधुनिकलक्षणाया दौर्बल्यं एतेन प्रधानप्र-
माणश्रुत्यनुरोधेनानेकप्रमप्यप्रधानमन्यथानेयमिति कस्यचित्कुचोद्यमपास्तं देवताश्रुत्यनुरोधेन चेतनस्यैव प्राधान्याव-
गमात् ॥ नन्वग्न्यादित्यपर्याययोरपि देवताशब्दवत्तत्स्वमचेतनपरत्वमप्यादित्यमण्डलपरत्वमेवौदनपरत्वमेव च वक्तव्यं न
चेतनप्राप्यपि प्रथमश्रुतदेवतापदानुसारेणाग्न्यादित्यपदयोरेव तदभिमानिदेवतापरत्वं कुतो नावगम्यत इति शंक्यं सर्व-
भूतगानस्य प्रसिद्धमण्डल एव संभवात् देवतायाश्लोकाप्रसिद्ध्यत्वेन सर्वभूतगानकर्मत्वानुपपत्तेः एवं सर्वभूताग्न्यव-
हार्यत्वमपि न देवतायां संभवति ततस्तत्र देवताशब्दो लाक्षणिक एव तस्माद्यथागतं क्रतेऽपि देवताशब्दो लाक्षणि-

कोऽभविष्यतीति चेन्न तथा वाक्यशेषस्य सर्वात्मना चेतनेऽनुपपत्त्या प्रथमश्रुतदेवतापदस्य लाक्षणिकत्वाभ्युपगमेऽपि देवता
पदस्य चेतनब्रह्मपरत्वेऽपि प्रकृते वाक्यशेषस्य स्वारस्येनान्वयोपपत्तौ वाक्यशेषविरोधिनः स्थानस्यानादरणीयत्वात् किंच
सर्वाणि ह वा इमानि भूतानीत्यत्र भूतपदं भवंतीति भूतानीति व्युत्पत्त्या सर्वकार्यमात्रपरं आदित्यान्नवाक्यशेषे प्राणिनिकार्य
परतया प्रायपाठानुरोधात् तत्सर्वा महाभूतपरं वा सर्वथा भूतसंवेशनोद्गमनाश्रयत्वं मुख्यप्राणेऽसमंजसमेवाद्यपक्षे
तस्य सर्वत्वात् द्वितीयेऽपि सुषुप्तिदशायामेकस्मिन् प्राणे सर्वप्राणिलयस्य गौणस्याप्यभावेन व्यक्तिसाकल्यमादाय त-
स्य वक्तुमशक्यत्वात् तत्र त्वाणे तत्त्वप्राणिसंवेशनविवक्षायां च सर्वपदासामंजस्यं तस्य सर्वः पटो रक्त इतिवदवयवसा
कल्यपरत्वं च नूर्दित्याग एव शरीरमारभ्य चेतनपर्यंतस्य प्राणितया चेतनेंद्रियसंवेशनस्य यथाकथंचिद्वक्तुं शक्यत्वेऽपि श
रीरांशे वृत्तिलयस्याप्यभावेनावयवसाकल्येन लयासंभवात् तृतीयेऽपि महाभूतलयासंभवो वायुविकारे प्राणे स्पष्ट एव श्र
यास्मिन्प्राण एवैकधा भवति तदेनं वाक् सर्वैर्नामभिः सहाप्येतीत्यत्रापि न मुख्यः प्राणशब्दार्थः अपि तूक्तन्यायेन ब्रह्मैवेति
निषंधे तु प्रस्तोतर्यां देवतामित्युपक्रम्य श्रूयते कतमा सा देवता प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसं
विशंतीति तत्र प्राणशब्दः प्रसिद्धप्राणपर इति प्राप्ते ब्रह्मपर एव सर्वभूतसंवेशनादिब्रह्मलिंगादिति सिद्धांतः न चैवं पूर्वेण
दं गतार्थं यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुरित्यादिश्रुतेः स्वापकाले प्रसिद्धप्राणे सर्वभूतसारेंद्रियलया-
युक्तिद्वारा सर्वभूतलयपरतया प्रमाणांतरानुगृहीतत्वेन प्रबलत्वात् ब्रह्मणि भूतलयबोधिकायाश्च यतो वा इमानीति श्रुतेः तद

ननु गृहीतत्वेन दुर्बलत्वात् प्रस्तावपावाक्यमपि प्रबलानुसारेण प्रसिद्धप्रमाणे सर्वभूतलयादिपरं न तु ब्रह्मणि प्रसिद्धभूत
लयपरं यद्वा प्रबलस्वापवाक्यानुसारेण प्रस्तावपावाक्यमपि प्रसिद्धप्राणेंद्रियमात्रलयादिपरं आकाशाद्वायुरित्यादिस
र्व्यं तु मानांतरानुगृहीतमिति तदनुसारेण सर्वाणि भूतान्याकाशादेवेति वाक्यं न वाय्वादिमात्रकारणभूताकाशपरमि
ति तदुक्तं भामत्यां अर्थैश्रुत्यैकगम्ये हि श्रुतिमेवाद्रियामहे मानांतरापगम्ये हि तद्वशात्तद्व्यवस्थितिरिति पूर्वस्मादस्याधिक
शंका पुंवाक्ये मानांतरानुग्रहतदभावाभ्यां प्राबल्यदौर्बल्ये स्तः अपुंवाक्ये तु अनाशंकितदोषेन ताभ्यां ते स्तः तदुक्तं भाम
त्यां पुंवाक्यस्य बलीयस्त्वं मानांतरसमागमात् अपौरुषेयवाक्ये तत्संगतिः किं करिष्यतीति इति न निरासार्थत्वादस्येति
रीत्या अधिकरणारचनोक्ता यत्तु चंद्रिकायां अन्ये त्वित्यादिनोक्तनिबंधरीत्या पूर्वपक्षसिद्धांतानाधनूद्य तन्न पूर्वपक्षे प्राण
स्य जडवायुत्वे कतमासा देवतेति प्रश्ने प्रतिवचने च सैषा देवतेति च देवताशब्दायोगात् तदभिमानिचेतनत्वे च वायुविका
रस्य पंचवृत्तेः प्राणस्योपादानमयुक्तमित्यादित्वदीयभाष्यविरोधः स्वापवाक्ये मानांतरसंवादस्यैवाभावात् स्वीकृत्य पूर्वपक्षो
त्तरपक्षोक्त्ययोगाच्च तथाहि न हि स्वापे पृथिव्यादेरक्ष्णां वा विनाशधीः प्रत्यक्षादनुमानाद्वा देवतायां जडे वा न तावत् स्वापका
ले जडे देवतायां वा महाभूतानां लयादौ मानांतरसंवादः तेषां स्वापकालेऽप्यलीनानामेवानुभवात् दृष्टिसृष्टिवादे च तदापा
यु विकारादेरप्यभावेन तत्र भूतलयायोगात् नापि स्वापकाले जडे देवतायां वा इंद्रियाणां लये प्रत्यक्षसंवादः तेषामतीं
द्रियत्वात् न च स्वापकाले वायुवृत्तेरुपादिंद्रियादिवृत्तीनां च लोपात्तत्र तेषां लयोऽनुमीयत इति वाच्यं तत्र जन्मादिसू

मेवब्रह्मणउपादानत्वेपिश्रुतिसंवाद्यनुमानानामुक्तत्वात् यस्मिन् सव्यापारेसतियन्निर्व्यापारंतत्तत्र लीयतइतिव्याप्त्य
भावाच्चपूर्वंयेनैवदृष्टंतेनैवपश्यामीतिप्रत्यभिज्ञाविरोधाच्चयथासौम्यवयांसिवासवृक्षंसंप्रतिष्ठंतेएवंहवैतत्सर्वंपरआ
त्मनिसंप्रतिष्ठतइतिप्रकृत्यचक्षुश्चद्रष्टव्यंचश्रोत्रंचश्रोतव्यमित्यादिनासुषुप्तौचक्षुरादीनामनाशस्यैवोक्तत्वाच्च किंचाकाशा
द्वायूत्पत्तिरपिमानांतरसंवादिनीआकाशात्पवनस्यपवनाच्चफूत्काराद्दहनस्यदहनाच्चोष्मणः स्वेदस्यवृष्टितःपार्थि
वपदार्थानामुत्पत्तिदर्शनात्नाकाशवाक्यात्प्राणवाक्येऽप्यधिकाशंकायद्यपिभाष्येप्रत्यक्षसंवादोऽप्यधिकाशंका
प्रयोजकत्वेनकंठतोनोक्तःतथापिप्रत्यक्षंचैतत्इत्याद्युक्तस्यवैयर्थ्यापत्त्यास्याप्यधिकाशंकाप्रयोजकत्वेतात्पर्यंभाष्यमत
एवटीकायामर्थैश्रुत्यैकगम्येहीत्युक्तमितिचंद्रिका भिप्रायः नचकृतमासादेवताउद्गीथमन्वायत्ताआदित्यइतिहोवाचे
त्यादिनाउद्गीथादावादित्यादेरब्रह्मणएवदेवतात्वोक्त्यातत्सान्निहितेप्रस्तावेप्यब्रह्मणएवदेवतात्वमित्यप्यधिकाशं
कामाव्योक्तायुक्ता ॥ पूर्वाधिकरणेपिअपांकागतिरितिअसौलोकइतिहोवाचेत्यादिकेनाब्रह्मणएवगतित्वेनोक्त
तयातत्सान्निधानादस्यलोकस्यकागतिरितिवाक्येपिआकाशस्याब्रह्मत्वंयुक्तमितिसाम्यात्पदव्यर्थैश्रुत्यैकगम्येतु
किंनिरासायपुंवाक्यस्येत्युक्तंटीकायांतदपिनप्रपुंवाक्यरूपेप्येकेनान्यानुसरणेध्रुवंकर्तव्येसातिकूलत्वात्संवादे
नानुरुध्यतांतथाहिप्रमाणभूतेषुपुंवाक्येषुप्रत्यक्षादौचसंवादिनएवानुसरणीयत्वंकॢप्तमितीहापितथैवयुक्तमर्थाबाधरूप
प्रामाण्यस्यसंवादेनदार्ढ्यात्अनपेक्षत्वस्यचदेवात्संवादेनाहानेः सप्रयोजनत्वायप्रस्तावाक्यस्यापूर्वार्थत्वेस्याप-

वाक्येपि तत्प्रसंगात् स्थापवाक्यस्याप्यभिमानिदेवतापरत्वे अपूर्वार्थत्वसंभवाच्चानाशंकितदोषत्वं तु द्वयोरपि प्रामा-
ण्यप्रयोजकं नत्वन्योन्यमननुसरणमन्यथा श्रुत्याश्रुत्यंतरसंवादः उपक्रमादिकं चाननुसरणीयं स्यात् मानांतरविरो-
धश्च न परिहार्यः स्यात् उक्तं च भामत्यामपि यद्यपि श्रुतयः स्वतः प्रमाणतयाऽनपेक्षाः तथापि मानांतरोपनीतार्थवशेन
व्यवस्थाप्यंत इति तस्मात्सरेवायमधिकरणं न युक्तमिति दूषणमुक्तं ॥ तत्रोच्यते यदुक्तं चेतनवाचिदेवताशब्दसंनि-
धानात् प्राणो वायुविकार इति पूर्वपक्षोदय इति तत्पूर्वपक्षे अचेतनेपि देवताशब्दप्रयोगोपपादनेन पूर्वपक्षाभिप्रा-
यवर्णनात् प्रागेव निरस्तं अभिमानिचेतनपरं प्राणपदमिति तु नास्मदभिमतपूर्वपक्षार्थं न भाष्यं विरुध्येत अत्रोद्गीथप्र-
तिहारयोः सामभक्त्योर्ब्रह्मणोन्ये आदित्यश्चान्नं च देवते अभिहिते कार्यकारणसंघातरूपे तत्साहचर्यात् प्राणोपि कार्य-
कारणसंघातरूपदेवतात्मा भवितुमर्हतीत्यादि वाचस्पतिकल्पतर्वोस्तदुक्तिस्तु उक्तरीत्या वायुविकारपूर्वपक्षे चेतन-
वाचिदेवताश्रुतित्यागात् विभ्यता केनचित् यद्यन्नादित्यपदयोरपि देवतापरत्वमभ्युपेत्याथापि प्राणाभिमानिदेवता-
प्राणशब्दोन्यत इत्युच्यते तदापि पूर्वपक्षनिरासार्थैव न तु तत्र निर्भरः अत एव भामत्यां पूर्वपक्षकोटिप्रदर्शनावसरे उ-
त वायुविकारवचन इति सिद्धांतकोट्युल्लेखेपि न वायुविकार इति पूर्वपक्षोपसंहारेपि तस्माद्वायुविकार एवात्र प्राण-
शब्दार्थ इति सिद्धांतोपसंहारेपि तस्मात् प्रस्तावभक्तिं प्राणशब्दाभिधेयब्रह्मदृष्ट्योपासीत न वायुविकारदृष्ट्येत्यु-
क्तं कल्पतरौ तु प्रथमप्राणाभिमानिदेवतालक्ष्ये तत्युक्त्या अनिर्भर एव सूचितः परिमले तु आक्षेपसमा- धानाभ्याम

परमर्थः स्पष्ट एवोक्तः अन्यथापि न पैवेति न किंचिदेतत् स्वापवाक्ये इत्यादिकं च वाचस्पतिकल्पतरोरभिप्रायानवबोध
निबंधनमेव ॥ तथाहि यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येतीत्यादौ अप्ययः सूक्ष्मरूपेणावस्थानरूपो विवक्षितः न
त्वात्यंतिकलयरूपः स च नासंभवी वृत्त्यात्मना परिणतानां वागादीनां स्वापकाले वृत्तिविगमेन सूक्ष्मरूपेणावस्थानस्य
सर्वसिद्धत्वात् जले लवणं लीनमासीदित्यादौ लवणादेरात्यंतिकनाशाभावेपि लयव्यवहारदर्शनात् न च ध्वंस एव ता
दृशव्यवहारविषयः सूक्ष्मरूपातिरिक्तस्य ध्वंसस्य तादृशस्थले अनभ्युपगमात् प्रपंचितं चैतत् सत्कार्यवादनिरूपणे अहं
तत्रांशिकायां ब्रह्मानंदैः सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशंति तत्राभिसंविशेः स्वप्नमेवार्थः यत्प्रयंत्यभिसंविशंतीत्यादौ तेन त
थाभिधानात् अस्ति चात्रापि सः प्राणवाक्ये ह वै इति प्रसिद्धनरवन्निर्देशात् प्रसिद्धयतिशायद्योतनाय प्रात्यो श्रुतिप्रत्यक्षरू
पप्रमाणद्वयसंवाद उक्तः न चैवं वागादिलयस्य प्रत्यक्षसिद्धत्वेपि न भूतलयप्रसिद्धिरिति वाच्यं यदा वै पुरुषः स्वपिति प्रा
णं तर्हि वागप्येतीत्यादौ वागाद्यप्ययोक्त्या तदधीनवृत्तिकस्य भूतशब्दाभिधेयचेतनप्राणिवर्गस्य तल्लाभात् चेतनस्या-
पि हि वृत्त्यभिव्यक्तिदशायां स्थौल्यमापन्नस्य स्वापे उपाधिलयात् सूक्ष्मता संभवत्येव यदा वै पुरुषः स्वपिति नाम सता सौ-
म्य तदा संपन्नो भवतीति श्रुतेः तस्यां श्रुतौ संपत्तिरप्यय एवेति स्वाप्ययादिति सूत्रेपि स्फुटं तैरेव वर्णितं आदित्यान्न प्रस्ता
वेगानान्नाभ्यवहरणलिंगात् भूतपदस्य चेतनप्राणिविशेषपरत्वात् तस्मादेव यावत् प्राणवाक्येपि भूतपदस्य चेतनप्राणि
विशेषपरत्वमित्याशयस्य पूर्वमेव वर्णितत्वात् ॥ एवं च भूतशब्दोपात्तचेतनप्राण्यभिसंवेशनमुक्तरूपं प्रख्यमाणे—

उपपद्यत एव श्रुतिप्रत्यक्षसंवादाद्बाधितं चेति सिद्धे अभ्यस्तमाणश्रुतेर्मुख्ये प्राणे संभवतोऽह्यैवेद इति प्रसिद्धतरत्वस्य निर्दिष्टेन श्रुतिप्रत्यक्षसंवाद इष्टीकृतेन च भूताप्ययेन मुख्यार्थान्तरव्यावर्तनमुक्तं आकाशाच्छ्रुतेश्चाहृयैवेद इति प्रसिद्धत्ववन्निर्देशोऽपि ब्रह्मणि भूतकारणत्वप्रसिद्धेराकाशो वाय्वादिकारणतातः प्रसिध्यति शायोन संभवति द्वयोरपि श्रौतत्वात् असंदिग्धप्रमाणांतरस्याप्रवृत्तेश्चेत्यप्यधिकशंकया आचार्यवाचस्पतिभिरधिकरणांतरारंभस्योपपादितत्वेन तत्र वायुविकारे पृथिव्यादिलयाभावस्याकिंचित्करत्वेन तदुक्तेर्निर्बंधार्थानवबोधविजृंभितत्वस्य विदुषां स्पष्टत्वात् प्रत्युत वाचस्पत्युक्तमर्थं दूषयितुमुत्सुकेन दृष्टिसृष्ट्यभिप्रायेण भूताप्ययोपपादनमाशंकितं तदयुक्तं ॥ अज्ञानानेकतामते दृष्टिसृष्टिपक्षस्यानभ्युपगमाद्वाचस्पतिमते चाज्ञानानेकत्वात् ॥ यच्चेंद्रियाप्ययो न प्रत्यक्षः इंद्रियाणामतींद्रियत्वादित्युक्तं तत्तथैव ॥ नचैवं सति प्रत्यक्षसंवादालाभः ॥ असंदिग्धप्रत्यक्षावगतकार्यलिंगकानुमानसंवादाभिप्रायेणाप्यदीकादिनये नच ब्रह्मणि जगत्कारणतायाः क्षित्यादिकं कार्यं सकर्तृकमिति तार्किकानुमानसंवादिन्या ब्रह्मगतजगत्कारणताया अपि प्रसिध्यति शायशालितया तस्याः मानांतरसंवादाभावकथनं विरुध्येतेति वाच्यं ॥ कार्यं सकर्तृकमित्यानुमानस्य केवलस्य प्रतिपक्षादिपराहततया स्वयमप्रतिष्ठितप्रमाणत्वेन तेन श्रुतेः संवादित्वस्यासंभवात् ॥ अत एव शास्त्रयोनित्वाधिकरणे ब्रह्मणः शास्त्रैकसमधिगम्यत्वमुक्तं संगच्छते ॥ परमतेऽपि जगत्कारणतायाः शास्त्रैकसमधिगम्यतोक्तिः संगच्छते ॥ प्रकृते च प्रत्यक्षतोऽनिर्णीतेन तत्त्वस्य घ्राभा-

भविंगेनतत्त्वहृस्य भावस्य धूमेनेव वन्हेर्निश्चितत्वात्तदव्यभिचारिभूताप्यवस्था [illegible]

प्रत्यक्षतुल्यप्रत्यक्षमूलकानुमानसंवादि तथा प्रत्यक्षसंवादिल्लौकिकसामंजस्यात् [illegible]

येन मूर्खतायाः अनुमानेपि अस्य मूर्खता प्रत्यक्षसिद्धेति लौकिको व्यवहारः अनुमाने [illegible]

रणमित्यादिकं जन्मादिसूत्रद्वयभाष्यटीकादौ सुप्रसिद्धमेव परस्यापि प्रत्यक्षतुल्य [illegible]

भिमतमेव यथोक्तं श्रुतिसाहित्यरहितमनुमानं न कुत्रचिदिति अत्र श्रुतिपदं प्रत्य [illegible]

व्यापारेपाणिव्यापारं तत्र न लीयत इति व्याप्तिर्नास्तीति तन्नास्मा कं क्षतिकरं ता इ [illegible]

भावात् वागादिकमेतत्सर्वं वृत्तिशून्यमयं सर्वो वागादिवृत्तिशून्यः तत्कार्यानधि [illegible]

मानस्यैवास्मदभिमतत्वात् नन्वेतावता मुख्यप्राणे वागाद्यवस्थानाभावात् ॥ नत [illegible]

तिवाच्यं सर्वशरीरव्यापिनः प्राणस्य वागादिसंबंधस्यावश्यकत्वात् सूक्ष्मतापन्नवाग [illegible]

नन्वेवं तत्सर्वाधारे परमात्मन्यपि तुल्यमिति चेत् को नाम नेत्याह कथं तर्हि वायुविका [illegible]

सिद्धावपि प्राणश्रुतेर्विनिगमनाहेतोर्जागरूकत्वात् ॥ अतएव भाष्ये मुख्येपि प्रा [illegible]

आपि ब्रह्मः प्रयुक्तः इयांस्तु विशेषः परमात्मनि भूतसंवेशनोद्गमनादिकं श्रुत्यैक [illegible]

णस्य तु प्रत्यक्षसिद्धत्वमप्यस्तीति मुख्यप्राणे भूतसंवेशनोद्गमनादेः प्रसिद्ध्यतिशायद [illegible]

पूर्वं येनैव दृष्टं तेनैव पश्यामीति प्रत्यभिज्ञाविरोधाभिधानं तदसत् ॥ चक्षुरादीनामतींद्रियतया प्रात्यक्षिकप्रत्यभिज्ञाया असि
द्धेरनुमानस्याप्रयोजकत्वात् चक्षुरादीनां सूक्ष्मरूपेणावस्थानाभ्युपगमाच्च ॥ एतेन सुप्तौ चक्षुरादीनामनाशश्रवणम
प्यप्रतिकूलमिति स्पष्टमेव किंचेत्यादिकमपि न युक्तं आकाशस्यातींद्रियतया प्रत्यक्षेण वायुकारणताया निश्चेतुमशक्य
त्वात् नानुमानेन लिंगाभावात् अप्रयोजकत्वाच्च नन्वाकाशः साक्षिवेद्य इति चेदास्तां तावत् तथापि वायुकारणतायां प्रत्य
क्षाद्ययोगएव सन्निधेरपि तस्यान्यथासिद्धत्वसंभवात् सत्यप्याकाशे क्वचित् फूत्कारानुत्पत्त्या अतिप्रसंगभंजककारणां-
तरकल्पनाया आवश्यकत्वेन तेनैव निखिलातिप्रसंगवारणसंभवे आकाशे स्वतंत्रान्वयव्यतिरेकयोरसिद्धेः न च पाषा
णाद्यंतर्भागावच्छेदेन वायोरनुत्पत्त्या अवकाशे सत्युत्पत्त्या चान्वयव्यतिरेकाभ्यामाकाशस्य वायुकारणतासिद्धिरिति वा
च्यं विभोराकाशस्य पाषाणाद्यंतर्भागसंयुक्तत्वस्यावश्यकतया तदसत्त्वप्रयुक्तकार्यानुत्पादस्य वक्तुमशक्यत्वात् अव
काशत्वेनाकाशस्य कारणतेति चेत् किमिदमवकाशत्वं न तावन्निबिडद्रव्यरूपावरणाभावविशिष्टत्वं अंतश्छिद्रपाषाणांतर्भागावच्छे
देनोक्तावकाशसत्त्वेऽपि वायोरनुत्पादेन तन्निर्वाहाय कारणांतरकल्पनापातात् तत्कल्पने च तेनैवोक्तातिप्रसंगभंगेनाका
शकारणतायां मानाभावात् न चान्यविधमनतिप्रसक्तमवकाशत्वं सुवचं किंच स्थूलवायुं प्रति सूक्ष्मस्य तस्य हेतुतया आ
वश्यकतया निबिडद्रव्याभावविशिष्टवायुत्वेनैव हेतुतायाः क्लृप्तत्वात् वायोरिति न च वायुनानात्वगौरवं नानात्वेऽपि क्लृप्तत्वे
न कारणतायां गौरवानवकाशात् ॥ कथमन्यथा भूतचतुष्टयवादिनां वाय्वाद्युत्पत्तिनिर्वाहः तस्मात् पुंस्त्वैककारणताया

प्रत्यक्षेणानुमानेन वा नाकाशस्य वायुकारणत्वसिद्धिरिति युक्ताभ्यधिकाशंका अपि चाकाशस्य वायुकारणत्वे प्रमाणांत
रसिद्धेः विना संकुचितसर्वभूतकारणतायां प्रमाणांतरसंवादः तत्र हि भूतपदं भवंतीति भूतानीति व्युत्पत्त्या कार्यमात्रपरमा
काशपृथिव्यादिभूतानामुपस्थितत्वात् तत्संबंधादुपस्थितमहाभूतपरं वा उभयथापि साकाशनिखिलभूतकारणत्वमाका
शे ऽप्रसिद्धमेव ब्रह्मणि तु प्रसिद्धमिति युक्तं ॥ तत्राकाशपदस्य परमात्मपरत्वं हेतवे इत्युक्तिश्च तत्सरत्व एवोपपन्ना अन्नव
दित्यन्नपर्यायो भूतपदस्य गातृत्वाभ्यवहर्तृत्वलिंगेन प्राणिपरत्वावधारणात् तत्सामान्यादत्र भूतपदस्य प्राणिपरत-
याप्यसंकोचेनैव प्राणितत्त्वाभिधानं वक्तुं शक्यत इति शंकाविशेषो निराबाधः एवं च वाक्यशेषस्य वायुविकारसाधार-
णत्वात् अभ्यस्तायाः प्राणश्रुतेश्च बलवत्त्वात् देवताश्रुतेरपि पूर्वपक्षे प्रदर्शितयुक्त्योपपत्तेश्चाविरोधयुक्तेर्वाभावेन प्रायपा
ठस्यापि लब्धावसरत्वमस्तीति तस्यापि मुख्यप्रमाणनिर्णायकतया अभ्यधिकाशंकाप्रदर्शकभाष्येप्रदर्शनेन विरुध्यते पूर्वा
धिकरणे तु बलवल्लिंगवाक्यशेषानुरोधात् प्रायपाठः अकिंचित्कर एवेति युक्ताभ्यधिकाशंकेति पूर्वनिरुक्ताभ्यधिकाशं
कां भाष्योक्तां न चेत्यनेनानूद्य पूर्वाधिकरणे पीत्यादिचंद्रिकोक्तदूषणं सुचिंत्यमेव सैषाभ्यधिकाशंकाटीकायां पुंवाक्यस्य व
शीप्रसक्तं मानांतरसमागमात् ॥ अपौरुषेयवाक्ये तत्संगतिः किं करिष्यतीत्यनेन परिहृता यत्वत्र अपुंवाक्य हृ येपीति दूषण
मुक्तं चंद्रिकायां तदसत् ॥ यत्र हि प्रामाण्यतात्पर्ये निर्णीते अपि न दृढे तत्र प्रामाण्य दार्ढ्याय प्रमाणांतरसंवादस्यापेक्षित
त्वेपि निर्णीततात्पर्यकस्य यस्या प्रामाण्यव्यावर्तकधर्मवत्त्वमवधृतं तत्र न प्रमाणांतरसंवादापेक्षा न वा तात्पर्यनिर्णयेस

भ्रान्तिविषयकप्रमाणांतरापेक्षात्तथा सत्यपूर्वतायाएव भंगप्रसंगात् किंतूपक्रमादीनां श्रुत्यादीनां च एवं न्यायेन पाठक्रमात्
श्रुत्या प्रतीयते नादरो ऽर्थः प्रमाणांतरसंवादमपेक्षत इत्याशयः न तु प्रमाणांतरसंवादलोभेन न्यायसिद्धार्थं मुख्यं असंकोचादिना
संपादयितुं तत्परत्वकल्पना युक्ता न्यायश्च मुख्यसंवेशनोद्गमनयोः सर्वप्राणिनां वायुविकारे ऽसंभवात् परमात्मपक्षपाती
ति प्रपंचितं प्राक् ॥ एतेनान्यपरेत्यादिकमप्यपास्तं तात्पर्यनिर्णायकोपक्रमादीनां मानांतराविरोधस्य चाश्रयणीयत्वात्ता
त्पर्यनिर्णायकांशाभेदेन श्रुत्यंतरसंवादस्यापेक्षितत्वात् प्रामाण्यं यद्यपीत्यादेरयमर्थः अनपेक्षप्रमोत्पादने अन्यानपेक्षा
व्यवस्थाप्यं तेन विषयविशेषोपरक्ततात्पर्यं च न चानिर्णीयं नेदानीं तथाचर्ष्यकौशिकरस्मदनुकूलैवेति सर्वं शिवं ॥ यदपि सुधा
यामुक्तं उक्तवाक्ये प्रस्तावमन्यायपरत्वेनाधिष्ठातृत्वोक्तेस्तस्य देवतान्तरेण चैतन्य एव संभवेन वायुविकारविषयसं
शयपूर्वपक्षयोरनुत्थानमेव मापि दुर्घटं ॥ किंचात्र भूतानां संवेशनमुद्गमनं च परमेश्वरकर्मप्रतीयत इति तद्ग्रहणमेव यु
क्तमिति कुतः पूर्वपक्षावकाशः ॥ यतो वा इमानि भूतानीत्यादि सर्वप्राणिनिकायस्य तस्यैव संवेशनं तत एवोद्गमनं चाम्ना
यते निसुप्तिजागरयोरपि सता सोम्य तदा संपन्नो भवतीत्यादि यदि च सर्वप्राणिसंवेशनोद्गमनाधारत्वं मुख्यप्राणस्या
प्युच्यत इति मन्येत तदापि संशयः स्यात् न पूर्वपक्षः सम्भवत्वात् किंच यदा वै पुरुषः स्वपितीत्यादिवाक्यमपि मुख्यप्राणविषयमि
नि कृतोपगतं मत्पक्षानुगुण्यात् मुख्यप्राणविषयत्वं प्राबल्यं चानुमीयत इति चेदिंद्रियाणां मुख्यप्राणे संवेशनोद्गमनयोरप्र-

नयोः श्रुत्यनुमानयोः सत्त्वेपि द्विःप्रायात्तं सर्वभूतसंबंधिनोस्तयोः सर्वेंद्रियसारत्वाद्भूतानां संगतिरिति चेत्किमेतदनुमानं संभाव
नाधानाद्यः व्याख्यायां तद्द्वितीये तु श्रुत्यनुमानाभाससमूलसंभावनामात्रेण श्रुतिबाधया पूर्वपक्ष इति सुविभावितं ॥
नन्वादित्यान्नरूपाब्रह्मप्रायपाठमाश्रित्यायं पूर्वपक्ष इति चेन्न लिंगविरोधिनः प्रायपाठस्यानिर्णायकत्वात् स्पष्टं चान्न-
वाक्यशेषे परमेश्वरं कर्मैत्युक्तं कथं चावधारितमादित्योन्नं चाब्रह्मेति श्रूयते हि तत्रापि सर्वाणि ह वा इमानि भूतान्या
दित्यमुद्यंतं गायंतीत्यादिब्रह्मलिंगं अन्नमेव प्रतिहरमाणानीति तु प्रायपाठादुपजीवनार्थंप्राप्तमिति ॥ तदसत् ॥ प्र
स्तावमन्वायत्तेत्यस्य प्रस्तावमनुगतेत्यर्थकत्वासंभवादधिष्ठातृत्वस्य ततोऽलाभात् श्रुतिवाक्यशेषयोर्विरोधाद्देवता
ग्रहस्य गतेः प्रागेव दर्शितत्वात् किंचेत्यादिकमप्ययुक्तं तस्य मुख्यप्राणसाधारण्यस्योपपादितत्वात् ॥ यच्चोक्तं तदापि सं
शयः स्यान्न पूर्वपक्ष इति तदपि न प्राणश्रुतिमादाय पूर्वपक्षसंभवात् ॥ किंच यदा वै इत्यादिकं सुभावितमित्यंतं तु प्रायोदू
षितमेव प्राक् अवधारणमपि प्रायपाठादन्यथा नेयमित्युक्तमेव प्राक् श्रुतिबाधया पूर्वपक्ष इत्युक्तिस्तु न युक्ता देवताश्रुत्य
बाधेनैव पूर्वपक्षप्रवृत्तेरुपपादितत्वात् ॥ प्रायपाठेपि लिंगाविरोधः पूर्वमुक्त एव वाक्यशेषस्य कोटिद्वयसाधारण्योपपाद
नात् ॥ ननु सिद्धांतयुक्तिभिः पूर्वपक्षयुक्तीनामाभासीकरणान्नायं पूर्वपक्षो युक्त इति चेन्न हंत सिद्धांतयुक्तिभिरपरि
हार्यं पूर्वपक्षमुपदर्शयितुं भवानेव कुशलः अध्यायनीयमज्ञोसि कथं चावधारितमित्यादिकं तु इदं प्रमादित्यान्नश्रुतेरुक्तैः सत्ता
दिलिंगस्य चानेकस्यासामंजस्यात् कथंचिदाभिमानिकदेवतापरत्वेपि ब्रह्मप्रतीतत्वाल्लिंगाभावेन ब्रह्मपरत्वाभिधेन्न

हि ब्रह्मणोऽप्यसंकुचितं सर्वप्राणिध्येयत्वादिकं संभवतीह यैद्वन्निशाह्वोपमासिद्ध्यतिशयं श्रीनयंतावादित्यश्रुतिमैत्रोपह्व
यंतावितिनकिंचिदेतत् ॥ श्रीः ॥ आनंदतीर्थीयास्तु अत्राध्यात्मिकप्राणादिसमन्वय उच्यते प्राणशब्दप्रवृत्तिनिमित्तं जीव
नादिहेतुत्वमन्वयव्यतिरेकाभ्यां प्राणशब्दार्थत्वेन प्रसिद्धस्य वायोरेवेति स एव प्राणशब्दवाच्यो न तु विष्णुरित्यभ्यधिकाशं
कानिरासेन पूर्वन्यायएवातिदेशिकी अवांतर संगतिः ॥ भूताकाशस्यत्ववकाशहेतुत्वे अन्वयव्यतिरेकौ न स्तः परि-
च्छिन्नस्य तस्याभावेऽपि क्वचिदवकाशादर्शनात् प्रयोजनं तु तद्वैतं प्राणोऽप्यप्रभवः महान् भोगः प्रजापतेः भुजः करिष्यमाणःप
द्यान् प्राणयोनवेति प्राक्त्ये यदि प्राणोऽब्रह्मान्यः स्यात् तदा अतिशयितभोगशाहित्वानंदयत्वेन प्रतिपन्नोऽसावानंदमय
स्यादिति प्राप्नुक्तानंदमयस्य ब्रह्मत्वं न सिद्ध्येदिति तत्समर्थनं पूर्वपक्षस्तु प्राणशब्दस्तावत् स्वप्रवृत्तिनिमित्तजीवना
न्वयव्यतिरेकानुविधायिनि वायावेव युक्तो न ब्रह्मणि तस्य सर्वगतस्याशरीरस्य त्वतः शरीरहानिवाक्यासद्वादिशरीरप्र
भावादिति ततः व्यतिरेकाज्जीवनव्यतिरेक इत्यन्वयव्यतिरेकयोरसंभवात् प्राणप्रसिद्धिविरोधाच्च ॥ न च निरवकाशलिं
गेन तद्बाधः तदभावात् महाभोगवत्त्वस्य वायावपि सावकाशत्वात् अतो वायुरेवायं प्राण आनंदमयश्चेति सिद्धांतस्तु श्री
श्रुतेस्तल्लक्ष्मीभ्युपत्यावितिनिरवकाशलिंगादयं प्राणो विष्णुरेव न च योगरूढयोरसंभवः महायोगविद्रूढ्योर्व्यतिरेकात्
प्राणगतजीवनकारणत्वस्यापि भगवदधीनत्वेन ईशानः प्राणदः प्राण इति नामपाठेन च तयोरवगमाच्च तस्माद् ब्रह्मा

तोरभसित्व्याभा कार्योप्यन्वयव्यतिरेकतौल्यात् प्रयोजनमप्युक्तं अस्याब्रह्मत्वे ध्यानंदमयेयदेष आकाश आनंदो नस्यादि
ति आकाशपदसामानाधिकरण्यवत् आनंदमये प्राणपदसामानाधिकरण्याभावेन तस्यैतदभेदहेत्वभावात् ननु ब्रह्मा कृ-
भोगः प्रजापतेर्मुक्तः करिष्यमाण इति ब्रह्मभोगकारणत्वेन महाभोगत्वप्रतिपादनात् अन्यभोगकर्तृत्वेनास्य ब्रह्मान-
दत्वप्रतिपादनादस्यानंदमयाभेद इति चेदुक्तं तथा सति तेनैवैतस्यैवानंदयातिरसं ५ लब्ध्वानंदी भवतीत्यादिभिन्न
मार्गैर्ब्रह्मासाधारणतयावगतेन निरवकाशलिंगेनाकाशपदस्येव प्राणपदस्यापि प्राणपर्यायस्य [illegible]
परत्वनिर्णयसंभवे पूर्वपक्षानुत्थितिप्रसंगात् अत एव श्रुतिर्निरवकाशलिंगसाधकाशामित्युक्तिर्निरस्ताद्र्योरध्यानंद
मयाधिकरणे परमात्मपरत्वदर्शनात् ॥ नचतदुभयाक्षेपेणारंभ इति युक्तं तदाक्षेपकानुपलंभात् नहि प्राणश्रुतिस्त
दाक्षेपिका भवत् आनंदमयाधिकरणे ब्रह्मणि स्पष्टप्रयोगत्वात् ननु सत्यं दृष्टः प्रयोगः तथापि प्राणपदप्रवृत्तिनिमित्तस्य जीवनहेतु
त्वस्य ब्रह्मणि अन्वयव्यतिरेकायोगात् यौगिकत्वात् प्राणशब्दस्तत्रैव मुख्यवृत्तो न ब्रह्मणि मुख्यार्थग्रहणसंभवे [illegible]
ग्रहणं युक्तमिति तदाक्षेपेणोत्थानमिति चेन्नाहि तत्रैवाक्षेपसंभवे वाक्यांतरोदाहरणस्य व्यर्थत्वापातात् [illegible]
ह्मविरोधान्न तत्र तदाक्षेप इति चेत् कथमिदानीमपि तदाक्षेपः अत्राप्युक्तब्रह्मासाधारणलिंगविरोधस्य साम्यात् ॥
किंचान्येनन प्रवृत्तिधर्माणामपि परमात्माधीनत्वस्य पूर्वाधिकरणे निर्णीतत्वात् युगतजीवनहेतुत्वस्यापि पर[illegible]
नस्तत्रैवानिश्चिते कुतः पुनरिदानीमाक्षेपः किंच मास्तां ब्रह्मणि जीवनहेतुत्वान्वयव्यतिरेकौ येन जातानि जी[illegible]

ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनंदो न स्यादिति श्रुतिभिरेव ब्रह्मणि जीवनहेतुत्वनिर्णयोस्तु प्राणमयस्त्वोकेन
प्राणं देवा अनु प्राणंति मनुष्याः पशवश्च ये इति तदेवोच्यते न चैतदपि वायुपरमिति शंक्यं ब्रह्मासाधारणतया निर्णीतब्र-
ह्माकाशादिश्रुतिविरोधात् भूयोनुग्रहन्यायादत्र त्वत्प्राणश्रुतिभंगस्यैव न्याय्यत्वाच्च किंच पूर्वत्राकाशशब्दप्रवृत्तिनिमि-
त्तावकाशहेतुत्वान्वयव्यतिरेकयोः प्रसिद्ध्याकाशे भावादाकाशपदेन तदुक्तं स्यात्तर्हि प्राणपदप्रवृत्तिनिमित्तप्राणनहेतुत्व-
स्य वायावन्वयव्यतिरेकसद्भावात् प्राणशब्दस्तत्परएव स्यादिति शंकास्यात् न च तत्र तथासिद्धांतस्त्वया संकलितः किं-
तु निरवकाशलिंगेन तद्बाधमस्तीत्युक्तं न च लिंगद्वयोः सावकाशं अचेतने स्वयमनानंदे आनंदयितृत्वासंभवात् श्रुतिस्तु
सावकाशा प्राणमयेतत्प्रयोगादित्युक्तं वस्तुतस्तु नात्र जडो वायुरिति पूर्वपक्षः तर्ह्येष प्राणो अभय इति चेतनसंबोध्यवा-
चित्वमिति निर्देशविरोधात् न चाभिमानिदेवतापरो निर्देश इति युक्तं प्राणश्रुतेरमुख्यत्वापत्तेर्मुख्यप्राण एव तत्स्याः मुख्य-
त्वात् स च प्राणः प्रसिद्धो वायुरित्याध तीतित्यदीयभाष्यविरोधात् अस्मद्रीत्या पूर्वपक्षं दूषयता त्वया पूर्वपक्षे प्राणस्य ज-
डवायुत्वे प्रश्नप्रतिवचनयोर्देवताशब्दायोगात्तदभिमानिचेतनत्वे च वायुविकारस्येत्यादिभाष्यविरोध इत्युक्तदूषणविस्म-
रणेन स्वकीयमतेतया पूर्वपक्षकरणानौचित्यात् अमुख्यत्वे च परमात्मपरत्वस्यैवोचितत्वात् नापि मुख्यप्राणमाश्रित्य पू-
र्वपक्षोयुक्तस्तस्मिन्जीवनहेतुत्वान्वयव्यतिरेकानुविधायित्वाज्ञानेनोक्ताधिकरणशंकानुदयात् ॥ यत्तु प्रत्यक्षेण जीवनस्य-


चंद्रिकायामुक्तं सदसत् येन जातानि जीवंतीत्यादिश्रुत्या तदनुविधानस्य परमात्मन्यपि संभवात् नन्वेतन्न पूर्वपक्षे प्राण-
पदघटितानां सर्वेषामपि वाक्यानां मुख्यप्राणपरत्वात् परमात्मनि न तत्संभव इति चेन्न तथापि प्राणपदाघटितानां ये-
न जातानि जीवंतीत्यादीनां तद्ग्राहकतासौलभ्यात् प्राणशब्दवतां सर्वेषामप्येवं विचारे प्राणस्तथानुगमादित्यादेर्वैय-
र्थ्यापातान्न निरवकाशान्यलिंगवतामेतद्विषयत्वेऽप्यसाधारणलिंगवतामपि तथैवाविषयत्वसंभवेन तैरेवैतत्सि-
द्धिरस्तु यदपि चंद्रिकायां तत्प्राण इत्यत्र प्राणस्तथानुगमादिति वक्ष्यमाणन्यायेन प्राणो विष्णुरिति तत्प्राणे प्रपन्न इ-
त्यादिश्रुत्युक्तं मुख्यप्राणे जीवनान्वयव्यतिरेकानुविधानमाक्षिप्य प्रत्यासत्त्यां तन्न्यायेन प्राणशब्दप्रवृत्तिनिमित्तं
जीवनादिहेतुत्वं विष्णोरंगीकृत्य निरवकाशान्यलिंगेन तत्र पूर्वपक्षोदयेन तद्विचारस्यैतत्सिद्ध्यां नोत्तरभावितया
एतत्पूर्वपक्षदशायां तत्प्रत्यासत्त्यां तासिद्धेरनेन प्राणस्तथेत्यनेनास्य गतार्थत्वशंका निरस्ता एतदभावे प्राणो जी-
वनहेतुत्वाभावेन तत्प्राणशब्दस्य मुख्यत्वासिद्धेरित्युक्तं तदप्यसत् न प्राणेनापानेन मर्त्यो जीवति कश्चन इतरेण
तु जीवंति यस्मिन्नेतावुपाश्रिताविति श्रुतौ प्राणशब्दितस्य जीवनहेतुत्वं निषिध्येतरेण तु जीवंतीति परमात्मन एव-
जीवनहेतुत्वविधानान्मुख्यप्राण एव तद्धेतुत्वं ब्रह्मणि तदभावो वेति शंकितुमशक्यत्वादेतदभावेऽपि परमात्मनि प्राण-
शब्दस्य मुख्यत्वासिद्धेर्निष्प्रत्यूहत्वात् न चोक्तश्रुतौ प्राणशब्दो वायुपरः इतरशब्दस्तद्भिन्नमुख्यप्राणपर इति चंद्रिको-
क्तं वक्तुं युक्तं मुख्यार्थत्यागापत्तेरितरपदस्य स्वसमभिव्याहृतान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकभेदपरत्वस्य सत्ति

विरोधाच्च एतेन यद्वायुकुंभलशरीरस्य यदंप्रतीयमुख्यप्राणशरीरभूतवायोर्जीवनंप्रत्यन्वयव्यतिरेकदर्शनमात्रेणत
स्यनत्रहेतुत्वंअनएवोक्तंसुधायांवायुविकारशरीरत्वान्मुख्यस्येतिब्रम्हणस्तुसर्वगतत्वादशरीरत्वाच्चतस्यवातच्छरी
रस्यघ्राणास्यदादिशरीरेऽभावादितिततःव्यतिरेकात्जीवनव्यतिरेकस्तस्मान्नधियोजीवनहेतुत्वमन्वयव्यतिरेकक
ल्प्यंप्राणापिश्रुतिसिध्यमित्यादिनाचंद्रिकास्थपूर्वपक्षोपपादनंनिरस्तंमुख्यप्राणस्यवायुशरीरकत्वात्छरीरद्वारातस्मि
न्जीवनहेतुत्वस्येवब्रम्हणोपिसर्वशरीरतायाःयस्यात्माशरीरंयस्यपृथिवीशरीरमित्यादिश्रुतिसिध्यत्वेनतद्वाराब्र
म्हण्यपितत्संभवेनपूर्वपक्षानुत्थानाच्च ॥ यत्तुअन्वयव्यतिरेकमात्रगम्यत्वंहेतुतायामुपजीव्येतत्पूर्वपक्षप्रवृत्तिःत
च्चनब्रम्हणीतिकेनचिदुक्तंतन्मुख्यप्राणेपितदसंभवात्यागादेःस्वर्गादिहेतुत्वासिध्यापाताच्चेतिदूषणेनचंद्रिकाया
मेवदूषितंब्रम्हणःजीवनहेतुतायाःनप्राणेनेत्यादिश्रुतिसिध्यतयाब्रम्हणितदभावस्यशंकितुमशक्यतयाउक्तत्वाच्च॥
यदपिव्यतिरेकगर्भायाःहेतुतायाःश्रुत्यापिब्रम्हण्यसंभवाज्जीवनहेतुतानब्रम्हणइतिवर्णनंतदपिनित्यविभूनांनक
पिकारणत्वमितिप्रसंगादितिदूषणेनचंद्रिकायामेवदूषितंकारणत्वस्यब्रम्हणोलक्षणत्वाभावप्रसंगाच्चायुक्तंकिंच
मुख्यवायुरेवप्राणःसएवानंदमयइतिपूर्वपक्षेआनंदमयेश्रुतब्रम्हशब्दायोगःनहिमुख्यप्राणेतस्यरूढिःजातिजीवा
द्यन्यत्वात्नापियोगःगुणपुर्त्यभावात्ब्रम्हत्वमात्रस्यातिप्रसक्तत्वात् ॥ यदपिचंद्रिकायांभूताकाशाश्रुतेरन्यस्तायाम

दुर्बलत्वान्निरवकाशेनापि लिंगेनन बाध इति वा यदि प्राणशब्दो योगेन प्रसिद्धिविरोधेपि विष्णुपरः स्यात् न तदान्यस्मिन्शब्दोपिनह्य
दयप्रसिद्ध प्राणपत्नीपरः स्यात् इति वा मुख्ये मुख्यः प्रतीति तइ ति वचनात् परमात्मनि प्राणशब्दस्य मुख्यत्वायोगान्मुख्य
संभवे चामुख्यग्रहणासंभवान्न प्राणशब्दः परमात्मपर इति वा प्रमेयाश्रिताभ्यधिकाशंकायां तन्निराकरणायायम
तिदेश इति मतिपादितं तदप्यसत् यतः श्रुतेर्लिंगाद्बाधकतावच्छेदकं श्रुतित्वमेव न भूयस्त्वं लिंगस्यापि श्रुतिबाधकता
वच्छेदकं निरवकाशत्वमेव न भूयस्त्वं शतां धन्यायेनाप्रयोजकत्वात् समानबलत्व एव भूयोनुग्रहन्यायस्य प्रवृत्तेरस
कृदावेदितत्वाच्च ॥ पूर्वाधिकरणोक्त्याकाशश्रुतीनां भूयस्त्वे न लिंगबाधकापत्तेश्च ॥ नच विजातीयभूयस्त्वं
बाधकतावच्छेदकमिति वाच्यं ॥ वैजात्यस्यार्थगतत्वे अप्राप्यभावात् शब्दगतत्वे अंतस्तद्धर्माधिकरणेपि इद्रबृहस
त्यादिशब्दे लिंगबाधापत्तेः नचार्थसाजात्यविशिष्टशब्दवैजात्यमेव लिंगबाधकतावच्छेदकमुपेयते अंतरधिकरणे
नार्थसाजात्याभावादधिकरणेच न शब्दवैजात्यमिति नातिप्रसंग इति शक्यं वक्तुम प्रयोजकत्वात् ननु नाप्रयोजकता
एकस्मिन्धर्मप्रकृते विजातीयानेकशब्दप्रयोगस्य तत्र तात्पर्याधिक्य सूचनार्थत्वादिति चेन्न सजातीयानेकशब्दप्रयोग-
स्यैव तात्पर्यग्राहकलिंगांतर्गताभ्यासत्वाद्धार्यत्वेन विजातीयानेकशब्दप्रयोगस्य तात्पर्यग्राहकत्वायोगात् नयाचाकाशा
धिकरण एव लिंगबाधप्रसंगः अतोनिरवकाशत्वाल्लिंगस्यैव श्रुतिबाधकतायुक्तेति नैवाधिकाशंकासंभवदुक्तिकानापि
द्वितीयातल्लिंगसमर्पकपदानां श्रुत्यंतरेणान्यथासिद्धिशंकायाः सर्वत्र सौलभ्येन प्रयोक्तिभंगप्रसंगात सर्वाल्लिंगेपाणांचा

मधृतेरत एवेत्याद्यतिदेशाविरुद्धत्वात् ॥ एतेन यद्यपि नेयमाशंका आ काशादिसाधारणीत याप्याकाशपदस्य म
सिद्धार्थज्ञानादनंतत्वादिलिंगानामपि तत्सामान्येनोरित्याशंक्यत तथापि पूर्वाधिकरणे ऽनुभूतत्वात्स्यादेवाधिकाशंके
तिचंद्रिकायां समाधानमुक्तं तदपि निरस्तं तच्छंकायाः सूत्रेणानुत्थानादतिदेशानुपपत्तेश्च तृतीयाधिकरणोक्ता आकाशा-
दिपदानामपि भूताकाशे मुख्यता यद्दहराकाशादिसङ्ग्रहात् पत्र सामान्यमुक्तमभिलितभागपत्वापि सत्त्वाच्च तस्मादधिका
शंकातन्निरसनपूर्वपक्षस्तावदनुपपन्ना एवेति सिध्यंतोऽपि नचतुरस्रः अत एवेत्यस्य हेतुसमर्पकस्याभुक्तत्वस्मीप
तित्वादिलिंगपरत्वे वारस्यविरोधात्तल्लिंगतत्त्वरूपसामान्यरूपावच्छिन्नातिदेशपरत्वेन कथंचिद्योजनेऽपि नागपितथा
ज्ञायमानयोक्तिसंभवेनान्ययोक्तेर्विनिगमनानुपपत्त्या सात् पूर्वानुवादोक्तस्यैवोपपत्त्याद्विलिंगसमाम्नानेपि अकृतानुवादेन तदभय
त्तदेकवाक्यतांगीकारेपि मधममध्रुतमासीत्यादिव्यवसाधारणलिंगाविरोधेनासाधारणमहापुरुषादिश्रुतिविरोधेन नान्यः पंथा इति
कंठतोऽन्यज्ञानस्य मुक्तिहेतुत्वनिषेधेन चाभ्यान्यपरत्वशंकानुदयात् ॥ अत्रानुवाकेपि तवदेवाद्वयमायंतित्वमेकोबहू
ननु भविष्यदिति सर्वांतर्यामित्वसर्वशरीरत्वाखिलकर्माराध्यत्वादेरितरासंभावितस्य श्रवणादुपक्रम एव तमेव मृत्यु
समृतमाहुस्तं भर्तारं तमु गोप्तारमाहुरित्यादिधारकत्वपोषकत्वभोग्यत्वरूपाणां ब्रह्मलक्षणानां भूतानां श्रवणेन सर्वांतर
त्वं प्रयत्कृतत्वं अव्यवहारविषयत्वस्य स्पष्टत्वेन त्वं भर्ता मातरिश्वा प्रजानामित्यस्य त्वं यज्ञः त्वमेवासि सोम इत्यादे

र्णयो र्घ इति न तद्विषयमिदं सूत्रं श्रीश्च ते लक्ष्मीश्च पत्न्याविति पुरुषशब्दस्य भर्तासंश्रियमाण इत्याद्यनेकपरोक्षनिर्देशाच्च
प्रहितस्य तद्वैत्वमित्यत्र प्रत्यभिज्ञानोक्तिश्च न युक्ता ॥ मातरिश्वशब्दस्य पूर्वपक्षबीजस्यांतराधिकरणन्यायेन ब्रह्म
परत्वोक्तिश्च न युक्ता ॥ प्राणशब्दस्यापि तन्न्यायेन गतार्थतयाउपेक्षकाभावात्तस्मादस्मद्व्याख्योक्त च्छांदोग्यक्रमपठि
तप्राणवाक्योक्तोदाहरणमेव सम्यक् ॥ तद्वैत्वं प्राणो भव इत्यादिवाक्ये प्राणशब्दस्य तत्सूत्रानुवाक श्रुतेन श्रीश्च ते ल
क्ष्मीश्च पत्न्याविति लक्ष्मीपतित्वलिंगेन विष्णौ समन्वय इत्यपि तल्लिंगस्यानंदमयाधिकरणे प्रदर्शितरीत्या शिवसा-
धारण्यादनुपादेयमिति स्पष्टमेव दूषणं ॥ ईशानः प्राणदः प्राण इति विष्णुरूढ्या योगेन च प्राणशब्दस्य विष्णौ सावका
शतेत्युक्तिरपि न समीचीना सर्वातिशयस्तोतुं प्रवृत्ते शिवं विष्णुरित्यादौ अन्यदेवतानाम्नामपि परिगणनेन न तस्य
शक्तिग्राहकत्वमित्यस्य पूर्वमेव प्रतिपादितत्वात् प्राणशब्दस्य विष्णौ रूढ्यसिद्धेः ॥ अन्यथा आथर्वशिखायां देवकृ
तशिवस्तोत्रे यो वै रुद्रः स भगवान् यश्च प्राणस्तस्मै नमो नम इत्यत्र यश्च प्राणस्तस्मै रुद्रायेत्यथर्वके मंत्रे प्राणोपि रु
द्रपदप्रयोगात् कैवल्योपनिषदि उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकंठं प्रशांतं ध्यात्वेति प्रक्रम्य स ब्रह्मा स शिवः स
हरिः सेंद्रः सोक्षरः परमः स्वराट् स एव विष्णुः स प्राणः स कालोग्निः स चंद्रमा इति शिवेपि प्राणशब्दप्रयोगात् शिवसहस्र
नाममध्येपि प्राणशब्दश्रवणाच्च ॥ तत्रापि रूढेर्वक्तुं शक्यत्वात् तथा लिंगस्य च तत्साधारण्याच्च तद्वाक्ये प्राणो विष्णुरेवेत्य
स्यासिद्धिरिति स्पष्टमेव ॥ एतेनैव योगेन प्राणशब्दो विष्णौ सावकाश इत्यपि निरस्तमेवेति ॥ श्रीमच्छंकरपादाब्ज



श्रीगणेशाय नमः ॥ ज्योतिश्चरणाभिधानात् ॥ अत्राध्यायादिसंगतयः पूर्ववदेव पूर्वाधिकरणे स्ववाक्यगतब्रह्म-
लिंगानुसारेण प्राणश्रुतेरन्यथानयनं युक्तं इह च तदभावान्न ज्योतिःश्रुतेरन्यथानयनमिति प्रत्यवस्थानादनंतरेण
प्रत्युदाहरणसंगतिः इदमाम्नायते अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लो-
केष्विदं वाव तद्यदिदमस्मिन्नंतः पुरुषे ज्योतिरिति तत्रादिमः परं ज्योतिः शादित्यादिरुत परं ब्रह्मेत्युभयत्र ज्योतिःशब्द-
प्रयोगात् संशयः तत्रादित्यादौ ज्योतिःशब्दः प्रसिद्ध एव ब्रह्मण्यपि तदेव ज्योतिषां ज्योतिः परं ज्योतिरुपसंपद्येत्यादौ प्र-
युक्तः पूर्वपक्षस्तु इदं ज्योतिरादित्यादिकमेव ज्योतिःशब्दस्य चक्षुरनुग्राहकतमःप्रतिद्वंद्विन्येव प्रचुरप्रयोगात् दीप्य-
त इत्यनुभूतभास्वररूपवत्तस्य ज्वलनकर्तृत्वस्य वा श्रवणाच्च किंच इदं वाव तद्यदिदमस्मिन्नंतः पुरुषे ज्योतिरिति कौक्षे-
यके ज्योतिषि परंज्योतिरध्यस्यमानं दृश्यते अध्यासाश्च प्रायो रूपवत्सादृश्यनिमित्ताः तच्चाचेतनयोर्ज्योतिषोरतितरामु-
पपद्यते न चेदमपि ज्योतिर्ब्रह्मेति शक्यते वक्तुं तस्यैषा दृष्टिस्तस्यैषा श्रुतिरिति चौष्ण्यघोषविशिष्टत्वश्रवणात् तस्यैषा
दृष्टिर्यत्रैतदस्मिन्शरीरे संस्पर्शेनोष्णिमानं विजानाति तस्यैषा श्रुतिर्यत्रैतत्कर्णावपिधाय निनदमिव नदथुरिवाग्ने-
रिव ज्वलतः उपशृणोति तदेतत् दृष्टं च श्रुतं चेत्युपासीत चक्षुष्यः श्रुतो भवतीति च दर्शनीयरूपवत्त्वकीर्तिमत्त्वरूपा-
ल्पफलश्रवणाच्च नहि परमपुरुषोपासनमल्पफलायेति वक्तुं युक्तं ॥ न चैतादृशश्रुतिलिंगबाधनक्षममस्त्यत्र ब्रह्म-
लिंगं येन तदनुरोधात् ब्रह्मपरत्वमाश्रयितुमीशमहे तस्माद्दिवः परं ज्योतिरादित्यादिकमेव एवं सति द्युमर्यादात्वबद्ध-

धारत्वश्रुतिरप्यमुमेव पक्षमनुरुणद्धीति एवं पूर्वपक्षे सिद्धांतः ज्योतिश्चरणाभिधानादिति दिपः परंज्योतिरिह ब्रह्मैव पूर्ववाक्ये द्युसंबंधितया ब्रह्मचरणाभिधानात् तथाहि पादोस्य सर्वभूतानि त्रिपादस्यामृतं दिवीति त्रिपात् ब्रह्म द्युसंबंधिनिर्दिष्टं तदेवेह द्युसंबंधात् प्रत्यभिज्ञायते तावानस्य महिमेत्युपक्रांतज्यायस्त्वमुपपादयति पादोस्येति सर्वाणि भूतानि अस्य ब्रह्मणः पादः एकदेशः पर्यायश्च तुष्पादयुक्तात् पदार्थान्नदेकदेशः पादपरिमितं वस्तु तस्मादस्यं तत्त्व-त्प्रपंचोप्यल्प इति द्योतयितुं पादत्वकल्पनं अस्य परमात्मनः दिवि स्वलोकोपरिभागे त्रिपात् ब्रह्म विष्णुशिवात्मनाभिव्यक्तं स्वरूपममृतात्मकमस्तीति मंत्रार्थः अथवादिति द्योतनात्मके स्वरूप इत्यर्थः सर्वनाम यच्छब्दश्च प्रक्रांतपरामर्शको गायत्रीवाक्ये प्रक्रांतं ब्रह्मैव परामृशति यद्यपि यदाग्नेयोऽष्टाकपालो भवतीत्यादौ प्रकरिष्यमाणपरामर्शकत्वमपि यच्छब्दस्य दृष्टं तथाप्यौत्सर्गिकं प्रक्रांतपरामर्शकत्वं प्रसिद्धार्थानुवादकत्वं च तस्य न विना बलवद्बाधकं त्यागमर्हति अत एव यस्योभयं हविरार्तिमार्छेदित्यादौ विधिविभक्तिमप्यपूर्वार्थबोधनस्याभावात् प्रख्याव्ययस्य दोपनीतां प्रसिद्धार्थानुवादकतामेवाद्रियंते नाभिज्ञाः अत एव लोकेपि देवदत्तोस्ति तमानय यज्ञदत्तो गच्छतीत्यादौ सर्वनाम्ना प्र-स्तुतयद्देवदत्त एव परामृश्यते न प्रस्तोष्यमाणयज्ञदत्तः यत्सदर्पितवाक्यस्यानुवादकत्वमपि यो ब्राह्मणो वेदवित्तस्मै देयमित्यादौ प्रसिद्धमेव तथा च प्रकृते यत्पदस्य सर्वनामतया प्रकृतवस्त्वपेक्षायां तद्घटितवाक्यस्यानुवादत्वात् पू

तोजगदित्यादिस्मृत्युपबृंहितात् पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीति निखिलपादत्वलिंगाच्च गायत्री वा इदं
सर्वमित्युपक्रम स्थसार्वात्म्यकत्वरूपपारमेश्वरलिंगाच्च स एवोपक्रांतः परमेश्वरः सर्वनामाकांक्षां तद्यदिति पा
न्यस्य पुरोवादाकांक्षां च स्वप्रतिपादकमंत्रद्वारा पूरयतीति द्युसंबंधात् प्रत्यभिज्ञायमानं यच्छब्दोपात्तमपि ज्योतिः स
एवेत्युपक्रमगतबलवत्श्रुत्यनुरोधेन ज्योतिःश्रुतिरेवान्यथा+नेतुं युक्ता ननु अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्व-
ज्योतिरेतेन सहस्रदक्षिणेन यजेतेत्यादावेष इति सर्वनाम्नः उत्सर्गतः प्रस्तुतपरस्याधिप्रकृतज्योतिष्टोमपरत्वं न सं-
भवति ज्योतिष्टोम इति ज्योतिरिति च नामभेदस्यार्थांतरपरत्वस्वारस्यात् अथेत्यनेनाधिकारार्थेन प्रकरणविच्छेदावग
मात् प्रकृतज्योतिष्टोमपर्यायस्य वा प्रत्यस्य सहस्रदक्षिणालक्षणगुणविधानार्थतायां एतेनेत्यादिमात्रस्यैव पर्याप्ततया
अथैष ज्योतिरित्यनुवादवैयर्थ्याच्च तस्माज्ज्योतिर्नामकं यागांतरमेव प्रस्तोष्यमाणमेष इति सर्वनाम्ना परामृश्यत इ
ति संज्ञाधिकरणे पूर्वतंत्रे निर्णीतं तद्वदिहापि ज्योतिः पुरुष इति संज्ञाभेदावगमात् अथ यदतः परो दिव इत्यथशब्दे
न प्रकरणभेदावगमाच्च यदिति सर्वनाम्नः न प्रकृतब्रह्मपरामर्शकतेति चेन्नैवं ज्योतिःशब्दस्य प्रकाशवाचिनः त्रिपा
द्रूपेण प्रकृते ब्रह्मणि यावत्कृतयैव प्रवृत्तिसंभवात् श्रुत्यंतरे भास्वरूपेण ब्रह्मप्रयोगत्वात् ॥ संज्ञाभेदेनार्थभेदस्यैव प्रकृते
अभावात् ॥ अथशब्देन प्रकरणभेदोक्तिस्तु किंचित्करी गायत्रीविद्याप्रकरणभेदेपि यदिति सर्वनाम्नः औत्सर्गिकप्र

+ तदुपलक्षितब्रह्मपरतया

क्रांतपरामर्शस्य भावान् पोह्नात् नचैवं ज्योतिष्टोमपरामर्शापत्तिः यतस्तत्र ज्योतिष्टोमानुवादेन यागांतरविधाने अथशब्दाद्युपगतप्रकरणविच्छेदस्यानुपपत्तिर्दुर्वारैव ज्योतिष्टोमप्रकरणानुवृत्तेः अत्र च प्राक्प्रविहितायाः गायत्रीविद्यायाः यत्सदस्य विपात् ब्रह्मपरामर्शकल्पेपि अनुवृत्तेरप्रसक्तेरनुपपत्त्यभावात् ॥ अथशब्दस्यानंतर्यार्थकत्वे तु कथंचिदप्युक्तदोषानवकाशः ज्योतिर्विद्यायाः स्वोपयोगिवाक्यार्थनिर्णायकगायत्रीविद्याविधायकसंदर्भार्थपर्यालोचनापेक्षाधीननायानंतर्योपदेशस्य सार्थक्यात् यत्सदस्य प्रकृतब्रह्मपरामर्शकतायुक्तैव ब्रह्मपरवाक्यसंदंशाच्चेदं ज्योतिर्ब्रह्मेत्यवगम्यते गायत्रीविद्यायाभितः प्राचीनायामव्यवहितायां ज्योतिर्विद्यातः परस्यां शांडिल्यविद्यायामपि सर्वं खल्विदं ब्रह्मेति ब्रह्मप्रकरणसद्भावात् शांडिल्यविद्याया ब्रह्मविषयत्वं च सर्वत्र प्रसिद्धोपदेशादित्यधिकरणे स्पष्टं दीप्तिधानादिति सूत्रे गायत्रीविद्यायाः ब्रह्मविषयत्वं च नन्वेवं संदंशात् प्रकृतपाठस्य कथं ज्योतिःश्रुतिबाधकत्वं श्रुतितः स्थानस्य दुर्बलत्वात् ॥ न च दर्शपूर्णमासौ प्रकृत्य प्रयाजसमीपे अभिक्रामं जुहोतीति श्रूयते तत्राभिक्राममित्यस्याभिक्रम्येत्यर्थकत्वात् जुहोतिना प्राकरणिकसर्वहोमानुवादात् तदुद्देशेनाभिक्रमणं विधीयते प्रयाजानां सन्निधिसत्वेपि तदपेक्षया प्रकरणस्य बलवत्वादन्यथाऽतिसन्निहितोत्तमप्रयाजांगं स्यात् ॥ न चावांतरप्रकरणेन प्रयाजांगतेति वाच्यं ॥ अवांतरप्रकरणस्य विनियोजकत्वे सर्वेषामंगानां तत्संभवेन मियोगांगितापत्तेरिति प्रा

यन्नति धायाभिक्रामं जुहोतीत्युक्त्वा यो वै प्रयाजानां मिथुनं वेद सभि धावद्भिर्गिंय यजति तनूनपातमेकमिवेत्यादिप्रयाजा
नि ध्याशाद्यन्त्राभिधारयतीत्यंते न प्रयाजपरामर्शात् तावत् संदर्भस्य प्रयाजप्रकरणत्वनिश्चयात् तन्मध्ये यदाहिर्हितं त
त्तत्प्रयाजांगमिति निश्चयात् यदीयांगतायां तु न संदंशो न तस्यापांतरप्रकरणं तदुक्तं न विद्यते तु संदंशो यत्र चानि
कैर्गुणैः तत्रांगानां कथं भावः सन्न्यायविनियोजकः निष्फलत्वेन सर्वेषामपि विशेषोवगम्यते फः शेषः कस्य शेषित्वमतः सर्वे
प्रधानांगमिति प्रयाजाभिक्रमणन्यायेऽस्ति तन्न्यायेनापि प्रसक्तप्रकरणोक्तेयावत्त्वकरणेमाकृतज्योतिः प्रतिपादनवैयर्थ्यपरिहारा
यप्रकरणानुरोधेन ज्योतिः श्रुतेर्ब्रह्मपरता आश्रयणीयेति वाच्यं ॥ प्रयाजाभिक्रमणे हि उभयतः प्रयाजांगसंदंशमात्रे
णावांतरप्रकरणोन्मेषः किंतु प्रयाजानामंगाकांक्षाया अभिक्रमणस्य चाभिक्रामं जुहोतीति वाक्येन होमान्वये अपग
तेति कोयं विशेषहोम इति अपेक्षायाश्च सत्त्वाद्वेनोभयाकांक्षारूपं प्रकरणमस्त्येव परं तु द्वितीयस्याः प्रधानाकांक्षाया
जुहोतिपदस्य प्रधानहोमपरत्वप्रसक्त्या प्रयाजप्रकरणस्य जुहोतिपदार्थानियामकत्वप्रसक्तौ श्रुत्यादिप्रमाणप्रसांग
संदंशेनाविद्यमानस्यैव प्रकरणस्योच्छेदः संपाद्यते अत्र चाति सृणांविद्यानामन्योन्यानिरपेक्षत्वात् सत्यपि प्रकरणे ब्रह्मो
पासनांगतया प्राकृतज्योतिः उपासनासंभवान्न संदंशेन श्रुतिबाधोन्याय्य इति सैषं सर्वं खल्विदं ब्रह्मेति शांडिल्य
विद्यागतेवाक्ये इदंशब्देन सर्वविशेषणं व्यर्थत्वात् न चात्रैवेदं सर्वमित्यादिवाक्येषु इदंपदं सर्वविशेषणं तेन चेदंप
दं न सर्वस्य द्वस्यत्वोपक्षेपद्वारा मिथ्यात्वमुपाक्षिप्य सर्वपदार्थस्य विवर्ताभिप्रायोपक्रमणेनाकृतनानाविर्भावस्य तत्त्वम

नाधिकरणयं बाधायां स्तु साधने एवं प्रकृतेप्यस्तु एकस्य द्व्यसंभवे वैरूप्यकल्पनाया अन्याय्यत्वादिति भाव्यं ॥ ध्यातौ
चेदं सर्वमित्यादिषु निर्विशेषब्रह्मप्रकरणगतवाक्येषु इदंशब्दस्य सर्वस्य मिथ्यात्वद्योतकत्वेन सर्वपदार्थविशेषण
त्वसार्थक्येपि सविशेषब्रह्मप्रकरणस्थेस्मिन् वाक्ये तद्द्योतनस्य निष्प्रयोजनत्वात् प्रस्तुतस्य ध्यानविधावफलत्वापातात् हि प्रे
धितैवं तथा चेदंशब्दो ब्रह्मविशेषणमेवेदंशब्दस्य सर्वनामत्वादेव ब्रह्मविशेषणं भवेद्यादि पूर्वसंदर्भे ब्रह्मप्रस्तुतं तत्स्य
गायत्रीवाक्ये ब्रह्मणः प्रस्तुतत्वेपि ज्योतिर्वाक्यस्यान्यपरत्वे तेन व्यवहितस्य गायत्रीवाक्यस्थस्य ब्रह्मणः परामर्शो न संभ
वतीतीदंशब्दो ज्योतिर्वाक्ये ब्रह्मणः प्रस्तुतत्वमपेक्षते अतः इदंशब्दयुक्तसंदंशादपि ज्योतिर्वाक्ये ब्रह्म सिध्यति दीप्य
त इत्यनेन च प्रभावत्वमुच्यते तच्च ब्रह्माद्यात्मकदिव्यशरीरस्य ब्रह्मणो नानुपपन्नं ॥ किंचेत्याद्युक्तमपि न सत् नामादा
वपि ब्रह्मदृष्टिदर्शनात् अल्पफलश्रवणमपि न ब्रह्मताविरोधि उपाधिविशेषावच्छेदेन ध्यानस्य संसारगोचराल्पच
फलदातृत्वसंभवात् ॥ यथाहि लोके सार्वभौमोपि तत्तत्सेवकरुतोपासनभेदेन कस्मैचिदल्पमेव फलं कस्मैचिन्महत्फ
लं ददातीत्येवमेतत् द्युमर्यादात्वश्रुतिश्चांतराधिकरण ऐश्वर्यमर्यादाश्रुतिव्याख्यानरीत्या व्याख्येया पूर्वपक्षे तदभिधा
नं चाभ्युच्चयमात्रं तस्मात् सिद्धं ज्योतिर्वाक्यं ब्रह्मपरमिति ॥ नन्वेतदनुपपन्नं गायत्रीवाक्यगतायास्त्रिपादस्यामृतं
दिवीति ऋचोपि ब्रह्मणि द्युसंबंधप्रतिपादकत्वासिद्धेः ॥ तथाहि गायत्रीविद्यायामेवं हि श्रूयते गायत्री वा इदं सर्वं भूतं य

तिष्ठितमेतामेव नातिशीयन्ते यां वै सा पृथिवी इयं वाव सा यदिदमस्मिन्पुरुषे शरीरमस्मिन्हीमे प्राणाः प्रतिष्ठिता ए
तदेव नातिशीयन्ते यद्वै तत्पुरुषे शरीरमिदं वाव तत् यदिदमस्मिन्पुरुषे हृदयमस्मिन्हीमे प्राणाः प्रतिष्ठिता एतदेव
नातिशीयन्ते सैषा चतुष्पदा षड्विधा गायत्री तदेतदृचाभ्यनूक्तं ॥ तावानस्य महिमा अतो ज्यायांश्च पूरुषः पादोऽस्य स
र्वभूतानि त्रिपादस्यामृतं दिवीति अस्यार्थः वागर्थत्वाद्गायत्र्याः कानि सर्वाणि भूतानि गायत्री सर्वभूताश्रयत्वात् पृथिव्य-
पि गायत्री शरीरहृदययोर्भूताश्रयत्वात् गायत्रीत्वं तथा च भूतपृथिवीशरीरहृदयरूपपादचतुष्टययुक्ता वा
क्प्राणभूतादिचतुष्टयरूपषट्प्रकारा गायत्रीति चतुश्चरणात्मिका षट्प्रकारात्मिकेति यावत् अत्र यद्यपि मुख्यं सर्वभू
तात्मत्वं मन्त्ररूपाया गायत्र्या न संभवति तथापि गौणं संभवत्येवोपासनार्थं च गौण मपि यासां ग्रामरक्षके पुरुषे अयमे
व सर्वो ग्राम इति यद्वत् भूतानि हिंसां मा कुरु तव रक्षको भूतानि हिंसकस्य भविष्यतीत्येवंरूपप्रतिपादनरूपेण गानेन सर्वभूत
त्राणहेतुत्वाद्गायत्र्यैव सर्वभूतानीति वाचो यथा कथंचित् सर्वभूतात्मत्वोपपादनेन तदभिन्नाया गायत्र्या अपि सर्वभू
तत्वं निरूप्यते अतो वाक्प्रयोगानुसारेण सर्वभूतात्मत्वं गायत्र्याः पर्यवस्यति पृथिव्यात्मत्वमपि भूतप्रतिष्ठात्वसा
मान्येनाप्युपपद्यते शरीरहृदयात्मत्वमपि भूतैकदेशप्रतिष्ठात्वसामान्यात् तच्च गौणं भूतात्मत्वेन सर्वभूतप्र
तिष्ठात्वमप्यर्थात्सिद्धं तादृशं भवतीत्येवमिमा यथा दोषाः प्रयोगानुसारेण भूताद्यात्मत्वस्य गौणस्यैव प्राप्तेर्नेदं
गायत्र्या ब्रह्मत्वे लिङ्गं सैषा चतुष्पदेति त्वृग्ग्रहणेऽप्येवं समञ्जसं तदा तु चीति ऋचि या व्याख्या मे प्रदर्शि धानात् नचाभि

पदाया गायत्र्यास्तु ब्रह्मसंपन्नं पङ्क्तिये न्यूनेन चतुर्विंशत्यक्षरायाः पङ्क्तिः षड्भिरक्षरैश्चतुर्णां पादान् प्रकल्प्य चतु
ष्पात्त्वसमर्थनस्य दर्शितत्वात् ॥ ननु वैषीति वचनानुसारेण भूतानामेव भूतानां पादत्वं प्रतीयत इति वाच्यं ॥ त
था सति पाचा सह पंचपादत्वप्रसंगात् एवं चान पासस्यैव तावानित्यादेर्ब्रह्मपरत्वावसायात् तत्र ब्रह्मणो द्यु
संबंधितया ब्रह्मण्यात् नत्वांतपदमर्शस्य ग्राह्ये नापि सर्वनाम्ना कथं तत्परामर्शः ॥ ननु पुरुषसूक्ते ब्रह्मपरतया-
अवगतस्य सर्वात्मकताप्रकाशकस्य कथं छंदोभिधायकत्वमिति वाच्यं ॥ उपक्रमे अभ्यस्ताया गायत्र्याः श्रुतेरन्य
थानेतुमशक्यत्वात् छंदःपरत्वे निर्णीते सति पश्चात् पुरुषसूक्ते ब्रह्मपरतया निर्णीतस्यापि तदेतदृचाभ्युक्त
मिति वचनेनैव गायत्रीप्रतिपादकतयापि विनियुक्तस्यार्थांतरपरत्वकल्पनोपपत्तेः विनियोगभेदेन मंत्राणामर्थभे
दस्य दृष्टत्वात् मंत्रप्रतिपाद्यं सर्वभूतात्मत्वमपि पूर्वपदे सोपासनार्थं भविष्यति पुरुषत्वं च पूर्णत्वात् त्रिपादस्यामृ
तं दिवीत्येतत्तु बाह्यशरीरहृदयाकाशांतरत्वाभिप्रायं व्याख्येयं गायत्र्या मेयरूपरुदाहरणानंतरं हीदं वाक्यं प
ठ्यते यद्वै तद्ब्रह्मेतीदं वाव तत् योऽयं बहिर्धा पुरुषादाकाशो योऽयं बहिर्धा पुरुषादाकाशोऽयं वाव स योऽयमंतः पुरु
ष आकाशो यो वै सोऽन्तः पुरुष आकाशोऽयं वाव स योऽयमंतर्हृदय आकाशो यो वै सोऽन्तर्हृदय आकाशस्तदेतत्पूर्णमप्र
वृत्तीति अत्र हि पाद्येऽयं ब्रह्मशब्दो वेदैकदेशभूतायां गायत्र्यामुपपन्न एवं तस्या एव गायत्र्याः शरीरबाह्यत्वेन तत्र काशोहृ
दयाकाशभेदस्य ध्यानार्थं प्रतिपादनात् न तु शुद्धस्य चाकाशांतरत्वेत्युपपत्तेश्च तदभिप्रायं त्रिपादमृतं दिवीत्यु

पपन्नं तस्याभेदोपासनार्थं पूर्णत्वगुणाभिधानात् पूर्णत्वान्नु पुरुषः स्मृत इति निरुक्तानुसारेण पुरुषत्वमुपपन्नं ॥ न
च वाक्यशेषसामंजस्याय गायत्रीपदमेव तदुपहितब्रह्मपरमस्त्विति युक्तं गायत्र्युपहितस्यापि परिच्छिन्नत्वेन पूर्णत्व
भूताद्यात्मत्वानुपपत्तेर्जीवरूपत्वात्तदुपासनार्थं तदुपदेशश्चेदं गायत्रीश्रुत्यनुसारेण छंदस एव पूर्ववाक्ये ग्रहणम
न्यथा स्वशब्देन ब्रह्मानभिधाय गायत्र्यादिपदलक्षणया तत्प्रतिपादनस्य निष्फलत्वापत्तेरित्याशंकां मत्वाह ॥ छंदोभि
धानान्नेति चेन्न तथा चेतोर्पणनिगदात्तथाहि दर्शनं ॥ पूर्वादिति वाक्येषु संबंधितया छंदस एवाभिधानान्न ब्रह्मसंबंध म
स्याभिज्ञेय तद्वाक्याभिहितब्रह्मणोपच्छंदेन परामर्श इति चेन्न तथा गायत्रीद्वारेण तदनुगतेन तदुपलक्षिते ब्रह्मणि-
चेतोर्पणस्याभिचित्तसमाधानस्यानेन ब्राह्मणेन प्रतिपादनात् यतो विकारद्वारेण तदुपलक्षितेन ब्रह्मणि चेतोर्पणस्य
न्यत्रापि दर्शनमस्ति ॥ यथा एतं ह्येव बह्वृचा महत्युक्थे मीमांसंत एतमग्नावध्वर्यव एतं महाव्रते छंदोगा इति ॥ एवं च गा
यत्र्युपरागेणोपासनार्थं गायत्रीपदेन तदुपलक्षितब्रह्मण एवोपलक्षणीयत्वान्न लक्षणानुसरणनैष्फल्यं नासर्वात्म-
कत्वाद्यनुपपत्तिरिति भावः ॥ नन्विदं लक्षणाद्याश्रयणं तदैवोपपद्यते यदि मुख्यार्थबाधकं न च वाक्यशेषगतसर्वात्म
कत्वादिकमेव छंदः परत्वे बाधकमिति वाच्यं ॥ वाक्यशेषानुसारेणोपासनार्थमेव सार्वात्म्यं प्रतिपाद्यत इत्युक्तत्वात्तत्र
त्राह ॥ भूतादिपादव्यपदेशोपपत्तेश्चैवं ॥ भूतादिपादव्यपदेशस्य ब्रह्मण्येवोपपत्तेश्चैवमभ्युपगंतव्यं न चोक्तयुक्त्या
वाचोपयथाकथंचित्सर्वात्मकत्वमुपपाद्य तदभिन्नाया गायत्र्यास्तदुपपादनादिदं गौणमिति वाच्यं ॥ गायत्री वा इदं सर्वं

मित्यस्य मुख्यसार्वात्म्यपरत्वेपि ॥ गायत्री गायत्रीत्यादिवाक्यशेषस्य गायत्र्यवच्छिन्नब्रह्मस्तावकत्वेन ब्रह्मोपाधिभूता-
या गायत्र्या वा उपासनार्थं सार्वात्म्यप्रतिपादकत्वेनोपपन्नस्य पूर्ववाक्यगतसार्वात्म्ये गौणताप्रतिपादनपरत्वकल्प-
नाया अयुक्तत्वात् ॥ नन्वेतत्सूत्रस्येदं सर्वं भूतमिति वाक्योक्तसार्वात्म्यसमर्थनपरत्वे सत्यतिनतव्यपदेशादित्येव सूत्रं-
स्यात् छन्दोभिधानादिति चेन्नैवं ॥ यद्यप्युक्तसार्वात्म्यसमर्थनपरमिदं सूत्रं तथापि तदुक्तरीत्या सूत्रविन्यासे सार्वात्म्ये गौणत्वशं-
कायाः परिहारेण लभ्यत इतीत्थं विन्यस्तं ॥ एवं सति भूतादिपादव्यपदेशानुपपत्त्याऽनस्य माहिमेत्यादिमंत्रात्मकोपपत्तेः स-
द्भावात् ॥ भूताद्यात्मकत्वपर्यवसितं भूताद्यात्मकपादत्वं यथाश्रुतमेवानुसरणीयं ॥ तथा च भूतादिव्यपदेशस्य ब्रह्मण्येव
संभवात् गायत्रीपदं ब्रह्मपरमेवेत्यर्थादुक्ताशंकापरिहारो लभ्यते न च प्रकृते भूतादयः पादा ग्राह्या इत्यत्र नियामका-
भावः शंक्यः गायत्री वा इदं सर्वमिति पूर्ववाक्ये सर्वभूताद्यात्मतया निरूपितायाः गायत्र्या एवेति पदेन परामर्शाच्चतुष्प-
देति पूर्वोक्तप्रकारस्यैव निगमनत्वमिति प्रत्यभिज्ञानात् ॥ न च तथा सति वागात्मतयाभिगायत्र्या निरूपितत्वात् पंचपदेति व-
क्तव्यमिति शक्यं ॥ वाग्वा इदं सर्वं भूतमिति वाक्यस्य हेतु वाभिग दार्थवादन्यायेन भूतात्मकत्वोपपादकतया अस्यां-
हीदं भूतं प्रतिष्ठितमिति वाक्यवच्छिन्नफलानुवादत्वेन तदर्थस्य षड्विधेति पदेन संग्रहोपपत्तेः षड्विधेत्यनेनाहि वागात्म-
नायज्ञानत्राणहेतुत्वरूपं प्रकारद्वयमुक्तं यच्च पृथिव्यात्मना भूतप्रतिष्ठात्वभूतानातिक्रमणीयत्वरूपं प्रकारद्वयमुक्तं
तदुच्यते तथा च गायत्री च तुष्चरणा त्रिकापदप्रकारा चेति अतो न चतुष्पदेत्यस्य ब्रह्मणि सर्वात्मत्वनिगमनाभिप्रा-

पकत्वं कथंचिदनुपपन्नमित्याशङ्क्येत्यनुशासनविरोधोपि नास्त्येवाध्यासिकेनाभेदेन ब्रह्मगुणविशिष्टे ब्रह्मणि गायत्रीपदप्र
योगबलस्य गत्यनुशिष्टदापोपि प्रयोगेऽनुपपत्त्यभावात्॥ तथाचायं निर्गलितोर्थः गायत्रीपदं सर्वभूतात्मकत्वरूपलिं
गानुसारेण नेयमुत नेदमेव श्रुत्यनुसारेण नेयमिति विशये गायत्रीश्रुतिस्तावदनिर्णीतार्थैव तत्र वाक्यशेषस्यापि न
निर्णायकत्वं तस्योभयथाप्युपपत्तेरुक्तत्वात्॥ एवं च स्वभावबलवत्या श्रुत्या निर्णये प्रसक्ते तन्निरासायेदमुक्तं भूता-
दीत्यादिना यथा संदिग्धामप्यस्तामपि श्रुतिमपेक्ष्य निर्णीतार्थकता यानित्यादिमंत्रसंवाददृढीकृतमप्यस्तां लिंगमेव बल
वीयः उपक्रमोपसंहारयोः समबलत्वे उपक्रमस्याधिकबलवत्त्वे वा उपक्रमानुसारेण निर्णयस्योक्तत्वात्॥ न च भूता
द्यभिप्रायेण सैषा चतुष्पदा गायत्रीत्युक्तौ तदर्थकतया मंत्रोदाहरणमयुक्तं मंत्रे एकपदात्मनैव सर्वभूतान्युक्त्वा अ
मृतात्मकपादत्रयस्य द्युसंबंधितया निर्देशात् नहि पृथिवीशरीरादीनाममृतत्वसंभव इति वाच्यं अत्र चतुष्पदेत्युक्त्या
कल्पितस्य सर्वभूतात्मकत्वस्य तावानस्य महिमा पादोऽस्य सर्वा भूतानीत्यनेनैवोक्ततया तदंशमादाय मंत्रसंवादस्याप्र
त्यूहत्वात् इदं सर्वं भूतं यदिदं किंचेति निरवशेषभूतपरिग्रहोक्त्या त्रिपादस्यामृतं दिवीति कार्यमूर्तिपरिग्रहसंभवा
च्च इयांस्तु विशेषः अत्रोक्तं पादचतुष्टयं प्रकारांतरेण विभज्य तत्र पादचतुष्टयत्वेनाभिहितमिति न चतावतासं -
वादविरोधः फलीभूतसर्वात्मकत्वप्रतिपत्ते रुभयत्र तुल्यत्वात् अत एव पुरुषसूक्ते सहस्रशीर्षेत्यादिमहिमाप्रस्तु
तः इदं तु सर्वभूतात्मत्वादिरिति कथं पुरुषसूक्तमंत्रस्ययोर्थः स एवेह गृहीतुं शक्यत इति परास्तं उभयत्रापि सर्वा

स्य तन्निरूपणस्य ब्रह्मणि तात्पर्यान्न तु छन्दसि तात्पर्यात् अखिलभूतानां तदेकदेशत्वोक्त्या तदभ्यासस्य प्रतिपादन-
स्य च तुल्यत्वात् ॥ किंचात्र यत्तदेतत् प्रकृतं गायत्रीपदप्रतिपाद्यमारुह्य ब्रह्मत्वसंबंधानुपपादादवगम्यते गायत्रीब्र-
ह्मेति न चात्र ब्रह्मपदस्य वेदपरत्वं ब्रह्मण एव प्रयोगप्राचुर्येणाद्यतिरिक्तस्यापारोहात् अपि च प्रकृतस्य गायत्रीपदाभिधेयस्य
हृदयाकाशाभेदेनोपासनां विधाय हृदयस्य प्रागादिषु चतुर्षु दिक्षूर्ध्वं च पंच यानि छिद्राणि तेषु प्राणापानव्यानोदा-
दानसमानादित्यचंद्रार्कपर्जन्याग्न्याकाशदेवताभिश्चक्षुःश्रोत्रवाङ्मनोवायुसंबंधिभिरधिष्ठितानतु क्रम्यते ये ए-
ते पंच ब्रह्मपुरुषाः स्वर्गलोकस्य द्वारपाः स य एतानेवं पंच पुरुषान् स्वर्गस्य लोकस्य द्वारपान् वेदास्य कुले वीरो जा-
यत इत्याम्नायते अत्र गायत्रीपदार्थं प्रति वेश्मत्वेन कल्पिते हृदये पंच सुषिरेषु द्वारत्वेन कल्पितेषु विद्यमानान् द्वार-
पालकत्वेन ध्येयान् प्राणादीन् प्रति ब्रह्मपुरुषत्वाभ्यासोऽपि गायत्र्या ब्रह्मतां गमयति इदं च सौत्रचशब्देन संगृहीत
ननु द्युसंबंधिप्रत्यभिज्ञानात् यच्छब्देन त्रिपादस्यामृतं दिवीति प्रकृतं ब्रह्म परामृश्यत इति न युक्तं प्रकृतत्वं प्रत्यभि-
ज्ञानेऽपि प्रत्ययार्थभेदावगमोऽसत्यप्रधानप्रकृत्यर्थप्रत्यभिज्ञाया अप्रयोजकत्वात् ॥ न च संख्येव कारकमपि प्रकृत्य-
र्थविशेषणं ॥ एवं सति गामानयेत्यादौ कर्मत्वादिविशेषितगवादीनामभेदातिरिक्तसंबंधेन धात्वर्थविशेषणत्व-
पातात् कारकस्यापि प्रकृत्यर्थत्वे प्रमाणाभावप्रसंगाच्चेत्यादिकमन्यत्र विस्तृतं ॥ एवं च दिवीत्यस्य द्युलोकांतर्गत-
त्वादिप्रकृत्यर्थ च तदनंतर्गतस्य च प्रत्ययार्थकत्वं प्रत्यभिज्ञोक्तिः संगतास्यादित्याशंकां प्रत्याह ॥ उपदेशभेदा

न्तीति नेत्रो भवत्स्विन्नप्यविरोधात् ॥ यद्यपि च विभक्त्यर्थः प्रधानं तथापि नोपदेशभेदात् प्रत्यभिज्ञाभावः शंकितुं युक्तः
उभयस्मिन्नपि सप्तम्यंते पंचम्यंते च निर्देशे कृते पि तदर्थयो रविरुद्धतया प्रत्यभिज्ञाया अविरोधात् ॥ यथा हि वृक्षाग्रे श्ये
नः इति वृक्षाग्रात् परतः श्येन इति निर्देशयोः सप्तम्यादिभेदे पि न श्येनाभेदप्रत्ययविरोधस्तथा दिवि दिवः परमित्युक्ता
वपि नाभेदप्रत्यभिज्ञाविरोधः सप्तम्युक्ताधिकरणतायाः पंचम्या व्यवस्थापनात् सप्तमीनिर्देशेन हि वृक्षाग्रगतेषु पल्ल
वेषु निलीन इव पल्लवानां मध्यभागे स्थितः श्येनो नावृतो पि पक्षी निर्देष्टुं शक्यस्ततः साधारणः सप्तमीनिर्देशः पंचमीनिर्देशे
तु वृक्षाग्रमध्यवर्ती श्येनो न प्रतिपादयितुं शक्यते तस्मिन् वृक्षाग्रा ॥ पर इति निर्देशानुपपत्ते रतो वृक्षाग्रात् पर इति
निर्देशो वृक्षाग्रात्यंतावयवभूता ये पल्लवास्तदुपरिभागे लभ्यते तत्र च यद्यपि वृक्षाग्रात् ॥ परभागो वृक्षासंलग्न
स्यापि संभवति ॥ तथापि सप्तमीबलेन वृक्षाग्रसंश्लेषस्यावगमेन पंचम्या वृक्षाग्रोपरि संलग्न एव पर्यवसानात् ॥
तथा च यथा केवलसप्तमीनिर्देशो वृक्षाग्रमध्यस्थितेरपि केवलपंचमीनिर्देशो वृक्षाग्रासंलग्नताया अपि प्रतीतिर्भव
ति उभयनिर्देशे तु मध्यभागाद्यसंलग्नस्थितिव्यावर्तनेनाग्रोपरिभागे संलग्न एव श्येनोवगम्यत इति सप्तमीपंचम्योः
परस्परार्थनियामकतया यथा न विरोधः तथा दिवि दिवं इति निर्देशेपि न विरोधः द्युलोको हि द्वेधा भूर्भुवः स्वर्महर्ज
नस्तपः सत्यमिति सप्तलोकीपक्षे पृथिवी भूलोकः पृथिव्यादित्ययोर्मध्ये भुवर्लोकः आदित्यादुपरि ध्रुवलोकांतस्मिन्नंत
निवासो द्युलोक एव स्वरिति व्यपदिश्यते तदुपरि महरादिलोका इत्येकः प्रकारः भूर्भुवः सुवरिति त्रिलोकीपक्षे आद्यो

पूर्ववदेव स्वर्लोकस्तु सूर्यमंडलमारभ्य सत्यलोकांतो द्युशब्दार्थोपि स एव त्रिपादस्यामृतं दिवीत्यत्र तु कः पक्षो विवक्षित
इति विशये दिवः परइत्युत्तरवाक्यपर्यालोचनया लोकत्रयपक्ष एव विवक्षित इति निर्णीयते सत्यलोकपक्षमादाय द्युलो
कग्रहणे विश्वतः पृष्ठेष्वित्याद्युत्तरवाक्ये सत्यलोकोपरि त्रयांतर्गतानां महरादीनां विद्यमानत्वात् लोकत्रयपक्षमादाय स
त्यलोकांत द्युलोकविवक्षया तदग्रभागावच्छेदेन विद्यमानताप्रतिपादको दिवीति निर्देशोभ्युपगम्यते चेद्विश्वतः पृष्ठे-
ष्वित्यादि समंजसं भवति तस्माद्द्युशब्दसंबंधप्रत्यभिज्ञानात् त्रिपादस्यामृतं दिवीति वाक्ये प्रक्रांतब्रह्मैव यदिति
सर्वनाम्ना परामृश्यत इति सूत्रक्रमस्तु आद्ये स्वपक्षसाधकोक्तिः द्वितीयादित्रये बाधकोद्धारः तत्रापि द्वितीयतृतीय-
योः प्रत्यभिज्ञासंभवमुपेत्यासिध्यां तेमुख्यसार्वत्र्यासंभवात् त्रिपादित्यादिवाक्यगायत्रीवाक्ययोर्ब्रह्मपरत्वं तत
श्च यत्तदस्य ब्रह्मपरामर्शकत्वासिद्धिमाशंक्य तदुद्धारः द्वितीये वाक्यशेषावगतगौणतादात्म्यसंभवादसिद्धिशंका
या निरासः चतुर्थे प्रत्यभिज्ञाया एवासिद्धिर्निराकृतेति ॥ यत्तु चंद्रिकायां चरणाभिधानादित्यस्य पादाभिधानादित्य
र्थविवक्षायां लाक्षणिकार्थमुख्यत्वानुगमार्थं च पादाभिधानादित्येव सूत्रं स्यात् ॥ किंचास्मदुक्तरीत्या आनंदमयाधिकरणाक्षे
पेण पूर्वपक्षसंभव तदनाक्षेपेणाथ यदत इति वाक्योदाहरणमयुक्तं पौनरुक्त्यं च परमं ते ज्योति भूतादि सूत्रयोः पा
दोपदेशादन्यानैवास्ति चरणाभिधा पादोस्य सर्वाभूतानीति पूर्ववाक्यस्थ पादाभिधानादन्यस्य ज्योतिर्वाक्ये पादाभि
धान्याभावात तस्य च भूतादिसूत्रेणैवोक्तत्वात चरणाभिधानादित्यस्य पौनरुक्त्यं ॥ अथ चरणाभिधानादित्यनेन

पादोऽस्य सर्वा भूतानीति मंत्रवाक्यस्थं सर्वभूतानामेकपादत्वममृतस्याभिधानं चोच्यते भूतादिपादत्वेनेन सैषा चतु-
ष्पदेति ब्राह्मणवाक्यस्थं भूतपृथिवीशरीरहृदयानां पादत्वमुच्यते अतो न पौनरुक्त्यमिति चेन्न चरणाभिधानादित्य
नेन मंत्रब्राह्मणोभयगतपादाभिधानसंभवे सूत्रद्वयवैयर्थ्यात् किंच त्वन्मते ब्रह्मणो भूतादिपादत्वं तदात्मत्वं तथाच
सर्वात्मकत्वं चरणाभिधानादित्यनेनैवोक्तमिति किं तदेक देशभूतात्मकत्वमतिपादकेन भूतादिसूत्रेण । किंच चतु
ष्पदत्वश्चतुःशब्देन भूतादिपरः पूर्ववाक्ये वाक्प्राणयोरप्युक्त्या भूतादीनां षट्त्वेन चतुष्ट्वायोगात् ॥ अत एव श्रुतौ ष
ड्विधेत्युक्तं न च वाच्यं भूतादीनां वाक्प्राणरहितानां चतुर्णां पादत्वं तत्सहितानां षण्णां विधात्वमिति पादशब्देन तदात्म
कत्वविवक्षायां वाक्प्राणयोरपि तदात्मकत्वाद्विधाषट्कांतर्गतस्य भूतादिचतुष्टयस्य पृथक्पादत्वोक्तेर्निष्फलत्वात् उपा
सनार्थं ब्रह्मणि चरणत्वारोपं श्रुत्वा गायत्र्याख्यच्छंदस्येवास्यादिति गायत्री ब्रह्मेति सिद्धांतासिद्धिः ॥ तस्मात् सैषेत्य
त्र षाड्विध्यमनूद्य चतुष्पदत्वं विधाय तद्विवरणाय पादोऽस्येत्यादिकमुदाहृतेति युक्तमन्यथा मंत्रब्राह्मणयोर्भिन्नार्थक-
त्वात् ब्राह्मणोक्तेस्तदेतदृचाभ्यनूक्तमिति मंत्रसंमतिर्न स्यात् । त्रिपादस्यामृतं दिवीति पादोऽस्येति पादशब्दनिर्दिष्टे-
चतुष्टये सति तदनिर्दिष्टस्य भूतपृथिव्यादेः पादचतुष्टयत्वायोगात् दिवि दिव इति विरुद्धविभक्तिद्वयसहितद्युमाति
पादिकार्थसंबंधस्यै क्यं न द्वद्विहितचतुःसंख्यानां तु मंत्रब्राह्मणस्थपादानां भेद इत्यस्यास्त्वं तमयुक्तत्वाच्चास्माकं मते
षाड्विध्यं तु गायत्र्यां संस्थितोऽपि विष्णुरिति छांदोग्यविवरणात् ज्ञेयं तस्मात् मांत्रवर्णिकादन्यस्य पादाभिधानस्याभा

यात्तस्य च चरणाभिधानेनैवोक्तत्वात् दुर्वारं परमते भूतादिसूत्रवैयर्थ्यं अस्माकं पक्षे तु भूतादीत्यादिपदेनामृतं दि
वीत्युक्तामृताख्यपादत्रयपरिग्रहः न चात्र पादमुद्दिश्याविश्वभूतत्वविधिः येन पादैकत्वमुद्देश्यविशेषणत्वात् ग्रहं
संमार्ष्टीत्यत्र ग्रहगतैकत्ववद्विवक्षितमिति चतुष्पात्त्वेन न सिध्येत् किंतु विश्वभूतोद्देशेन पादत्वविधिः पादानामे
व जिज्ञासितत्वात् यथा च पौर्णमास्यां पौर्णमास्या यजेतेत्यत्र प्रथमः पौर्णमासीशब्दः काले मुख्यः द्वितीये कर्मणि गौणः एवं
त्रिपादित्यत्र पादशब्दः स्वरूपांशे मुख्यः पादोऽस्येत्यत्र भिन्नांशे गौण इति न कश्चिद्विरोध इति दूषणमुक्तं तदसत् ॥
पादाभिधानादित्युक्ते भूतात्मकपादप्रतिपादकत्वप्रतीतिः स्यात् तच्च प्रकृते अविवक्षितं किंतु भूतादिव्यतिरिक्तं-
यत् त्रिपादस्यामृतमित्युक्तं तदत्राभिमतमिति सूचनाय शब्दभेदानुसरणसाफल्यात् अनुसृते च शब्दभेदे श्रुत्य
नुगमं परित्यज्य शब्दभेदानुसरणं किमर्थमिति फलजिज्ञासायां फलांतरानुपलंभात् पादशब्दसमानाधिकरण
तया श्रुतात् भूतादतिरिक्त एवार्थो विवक्षित इति बुद्ध्यनुसंधाने इति न कश्चिद्विरोधः न चैवं त्रिपादभिधानादित्ये
व सूत्रांशः कुतो न कृत इति वाच्यं गायत्र्यास्त्रिपदात्वेनांशभासित्वतया तद्बुद्धिर्मा भूदिति चरणपदोक्तिसामंजस्या
त् न च चरणाभिधानादित्युक्तेऽपि चरणशब्दस्य रमणीयचरणा रमणीयां योनिमापद्यंत इत्यादौ क्रियायामपि प्रयो
गदर्शनात् तद्ग्रहणेऽपि पुनरविवक्षितार्थप्रतीत्या असामंजस्यं दुर्वारमेवेति वाच्यं अभिधानादित्यनेनैव तच्छंका
निरासात् यच्छब्देनाभिधानं हि प्रक्रांतस्य करिष्यमाणस्य वा भवति भूतादीनां तु पादत्वेन प्रक्रांततया यच्छब्देन पराम

श्रीः प्रसज्यते इति तद्वारणाय यत्नः न च सर्वनाम्नां प्रक्रांतमुख्यविशेष्यपरामर्शकतास्वाभाव्येन पर्युदास इति
शक्यं तेषां कुंदशौनेरजमातंगास्तस्यैवामी तुरंगमा इत्यादौ प्रक्रांतविशेषणपरामर्शदर्शनात् तादृशस्वभावासि-
द्धेः किं चादित्यस्यापरामर्शप्रसंगाच्च अवांतरबोधीयमुख्यविशेष्यताच भूतादावप्यविशिष्टेति दिक् ॥ यदपि भूतादि
सूत्रस्य पौनरुक्त्यमुक्तं तच्चिंत्यमेव तावानस्येति मंत्रस्य ब्रह्मपरतासिद्ध्यर्थं तत्कृत्स्नपरामर्शकयच्छब्दस्वारस्येन
ज्योतिर्वाक्यस्य ब्रह्मपरताया आद्यसूत्रप्रमेयत्वात् ॥ तादृशवाक्यस्य ब्रह्मपरत्वेनासिद्धेरिति शंकायां भूतपादत्वादिभि
गायत्रीवाक्यस्यापि ब्रह्मपरत्वमित्यस्य भूतादिसूत्रप्रमेयतया पौनरुक्त्यलेशस्याप्यनवकाशात् श्रीमद्भाष्यफक्कि
कानामुक्तार्थताया अतिस्पष्टतया एवमपि स्पष्टेऽपि प्रमेयभेदे न पौनरुक्त्योद्भावनं व्यामोहमात्रनिबंधनं द्वेषनिबंधनं वेति भाष्य
दर्शिनां स्पष्टमेव किं च चतुष्पदेत्याद्यप्यसत् यागादेरन्यार्थमुक्तत्वेन भूतादिवदमुख्यत्वात् ॥ तथा हि भूतमिति वाक्यस्य
हेतुवन्निगदार्थवादन्यायेन गानत्राणकर्तृत्वादिना स्तुत्यार्थत्वकत्वोपपादनाय स्यां हीदं भूतं प्रतिष्ठितमिति भिन्न
कक्षानूद्यवाक्यवत् तादृशवाक्यभेदो गायत्र्यामुक्तः न तु प्राधान्येन अत एव यावै सा गायत्रीयं वाव सा येयं पृथिवीति
वत् यावै सा गायत्रीयं वाव सा येयं वागिति नोक्तं अन्यथा अग्रिमपर्यायसाम्याय तथैवावक्ष्यत् प्राणस्य तु गायत्र्या
त्मकत्वं विशिष्य नोक्तमिति न किंचिदेतत् ॥ श्रीः ॥ आनंदतीर्थीयास्तु चतुः सूत्र्या एकाधिकरणत्वं स्वीकृत्यैवं विमेक-
र्णापतयतो विनष्टुर्वादं ज्योतिर्द्दृदय आहितं यत् इत्याद्य भिन्नसूत्रस्थं वाक्यं यदतः परो दिवो ज्योतिर्दीप्यत इति

छांदोग्यस्थवाक्यं वा उदाहरणं अधिकरणमिदं स्वीकृत्य ज्योतिश्चरणाभिधानादिति सूत्रं पूर्वोक्तमाग्नसूक्तस्थ
वाक्यमुदाहरणं उत्तरत्रि सूत्र्यास्तु उक्तछांदोग्यवाक्यमुदाहरणमिति या प्रतिपादयंति तथा गुहानिहितत्व
स्यान्यनिष्ठत्वशंकया आनंदमयाधिकरणाक्षेपेण संगतिं वदंति तथाहि लोकतोन्यत्र भासितत्वज्योतिर्नाम्नोब
ब्रह्मणि समन्वयप्रतिपादनात् शास्त्रसंगतिः यो वेद निहितं गुहायां । आनंदमयस्य हृदयगुहानिहितत्वमुक्तं
तद्गुहानिहितत्वं विमेकर्णापतयतो विचक्षुर्वीदमिति कस्य चिज्ज्योतिषः प्रतीयते तत्र वाक्ये प्रसर्थः मे कर्णौ ज्योतिषः
विरुत्थं पततश्चक्षुश्च विरुत्थं पतति यदिदं हृदये आहितं ज्योतिस्तदप्युत्थं तं कर्णादि विरुत्थं वर्तते मे मनश्चातीव
विरुत्थं चरति अतो व्यासबुद्धिरहं किंनु वक्ष्यामि किंचेदं चिंतयामीति एतच्च यदि विष्णोरन्यत् तर्ह्यानंदमयत्वं च-
तस्यैव प्रसज्जेत इति निर्णयं प्रपतीति ॥ तत्रेदं चिंत्यं संगतिस्तावदयुक्ता गुहानिहितत्वस्य हृदयाहितत्वयोरैकरू
प्याभावेनाप्रत्यभिज्ञानात् छांदोग्यवाक्ये सुतरां तदभावाच्च अस्तु तर्हि यदिदमंतःपुरुषे ज्योतिरिति जाठरज्योति
षोरैक्योपदेशेन तदभावस्यैव ज्ञापनाच्च योयमंतर्हृदय इति गायत्र्याख्यवर्णेपि पूर्वपक्षे गायत्रीज्योतिषो भिन्नत्वे
न ज्योतिर्द्वारा तदाक्षेपायोगाच्च न तु सूत्र्या एकाधिकरणत्वं स्वीकृत्योक्ताग्निसूक्तस्थवाक्योदाहरणत्वमप्ययुक्तं
तत्र छंदोभिधानभूतादिपादव्यपदेशोपदेशाभेदानामभावेन छंदोभिधानभूतादिसूत्रासांगत्यप्रसंगात् ॥ य
त्तु त्रिमायामुक्ताक्षेपे ज्योतिर्हृदय आहितं यदित्यग्निसूक्तस्थस्यैव ज्योतिषः छांदोग्येपि ज्योतिःश्रुत्यापि समंतर्द

रूपइति ॥ हृदयनिहितत्वधर्मेणच ॥ शाखांतराधिकरणन्यायेन ॥ प्रत्यभिज्ञायमानत्वेनैक्यान्नो
क्तसूत्रासंगतिरिति समाधानमुक्तं तदसत् ॥ दिवः परत्वविश्वोत्तीर्णप्रदेशवृत्तित्वेन छांदोग्यवाक्ये श्रुतस्य ज्यो
तिषः हृदयनिहितत्वेनाग्निसूक्तोक्तज्योतिषः भिन्नत्वेन ज्योतिर्द्वयस्यैक्यकल्पनायोगात् ॥ अत एव न शाखांतर
न्यायविषयत्वं अग्निसूक्ते कर्णादिविदूरत्वश्रवणेन छांदोग्ये तदेतत् दृष्टं च श्रुतं चेति श्रवणेन मासाग्निहोत्रनैत्यमि
काग्निहोत्रयोरिवात्रापि ज्योतिषोर्भिन्नयोर्नामैक्यस्य वस्त्वैक्याप्रयोजकत्वात् ॥ यच्चोक्ताक्षेपे आकारभेदेन तयोर
विरोधोपपत्तिरिति चंद्रिकायां समाधानमुक्तं तदप्यसत् ॥ निश्चिते हि द्वयोर्ज्योतिषोरैक्ये आकारभेदेनाविरोधोप
पत्तिकल्पना तत्कल्पनया चैक्यसिद्धिरित्यन्योन्याश्रयत्वप्रसंगात् ॥ यच्च चंद्रिकायां पूर्वपक्षे अग्निसूक्तस्य समा-
ख्याबलादग्निपरत्वात् छांदोग्यवाक्यस्य च छंदःपरत्वान्नयोरेकविषयत्वाभावान्न प्रत्यभिज्ञासंभव इत्याक्षिप्यते
जोवैब्रह्मवर्चसं गायत्रीति गायत्र्यां तेजोरूपताश्रवणात्तेजःशब्दाग्निशब्दयोरनतिभिन्नार्थत्वादग्नौ गायत्रीशब्दस्य
गायत्र्यां वाग्निशब्दस्य संभवेनाग्निसूक्तवत् छांदोग्यस्याप्यग्निपरतायाः छांदोग्यवदग्निसूक्तस्यापि गायत्रीपरता
याः वा संभवेन द्वयोरेकार्थत्वात् न प्रत्यभिज्ञासंभव इति समाधानं तदुपहास्यमेव ब्रह्मवर्चसतेजोहेतोर्गायत्र्यामा
पुष्टतमिति यत् गौणव्यपदेशोपि तस्य तेजसोऽग्निरूपताभावेन तावन्मात्रेण वाक्यभेदासिद्ध्या च तयोरैक्यासिद्धेरन्य
यातेजःशब्दगायत्रीशब्दयोः सामानाधिकरण्यदर्शनवत् यजमानः प्रस्तर इति निर्देशात् यजमानप्रस्तरयोरपि ऐक्य!

पत्या सूक्तवाक्येन यजमानस्यैव प्रहरणं स्यात् ॥ चतुः सूत्र्याऐकाधिकरण्येच्छांदोग्यवाक्यमुदाहरणमित्यपि नयु-
क्तं छांदोग्यवाक्ये विचरणाभिधानाभावात् ॥ अग्निसूक्तछांदोग्यस्थज्योतिषो रुक्तरीत्या ऐक्यस्यायुक्तत्वात् स्व-
वाक्यगतासाधारणानेकश्रुतिलिंगत्यागेनान्यवाक्यगतलिंगेन निर्णये बीजाभावाच्च ॥ यच्च चंद्रिकायां यद्यपि
छांदोग्योक्तस्य ब्रह्मत्वे यदेतत् ब्रह्मेत्यादिश्रुतिलिंगानि स्ववाक्यस्थानि संतीत्याक्षिप्य तथापि तत्तत्सूक्तस्थनिर-
वकाशविष्णुलिंगैः सावकाशश्रुतिसूक्तबाधेन सर्ववेदांतानां विष्णौ समन्वयं दर्शयितुं सूत्रकारेणाग्निसूक्तस्थं लिं-
गमुक्तमिति समाधानं तथा च छांदोग्यस्थं ज्योतिर्विष्णुरस्यैव ज्योतिषः अग्निसूक्ते चरणाभिधानादिति सूत्रार्थेन
बाधकमिति तदसत् निरवकाशलिंगविरोधेन श्रुतिबाधस्यांतराधिकरणाकाशाधिकरणन्यायसिद्धतया अनन्य-
थासिद्धचरणादिविदूरत्वलिंगेनैव तत्समाख्याश्रुतिद्वयभंगेनाग्निसूक्तस्यांतरादित्यन्यायसाजात्येन ब्रह्मपरत्व-
सिद्ध्या तन्निर्णयस्यानपेक्षिततया तन्मुखेन तदभिधानवैफल्याच्च निरवकाशलिंगबलात् तस्य ज्योतिषः परमात्म-
त्वे प्यस्य ज्योतिषो निरवकाशजाठराग्नैक्यसाधिश्रुतिबलादन्यपरत्वशंकायास्तेनापरिहाराच्च ॥ किंचैतन्मते छं-
दोभिधानादिति सूत्रं न विचारणाभिधानरूपहेत्वाक्षेपकं तत्प्रतिपादकाग्निसूक्तगायत्रीविद्ययोरैक्ये हेत्वभावात्-
कथंचित्तदुपपादने वा ज्योतिःशब्दस्यैव गायत्रीशब्दस्यापि निरवकाशान्तद्विरोधेनान्यपरत्वानुपपादकत्वात् श्रुते-
र्निरवकाशलिंगभंजकत्वे च ज्योतिःशब्दस्यैव तद्भंजकत्वापत्तेरन्यथासिद्धिसद्भावस्योभयोस्तुल्यत्वात् ॥ अतए

यनसाध्याक्षेपकत्वमपिगायत्रीशब्दसमभिव्याहारादत्रज्योतिषोब्रह्मान्यत्वेप्यग्निसूक्तस्थज्योतिषोब्रह्मान्यत्वा
सिद्धेः द्वयोरैक्यासंभवस्तूक्त एवेतिदिक्॥ भिन्नाधिकरणपक्षस्तुसुतरांन संभवतिविकारशब्दान्नेतिचेदित्याद्य
धिकरणछंदोभिधानान्नेतिचेदित्युक्तेरैकाधिकरण्यसूचकत्वात् छंदोभिधानादित्यधिकरणस्यछांदोग्यस्थगायत्रीशब्द
निर्णयार्थत्वोक्तिरपिनस्वरसा॥ तथासतिगायत्रीतल्लिंगादित्येवव्यक्तव्यत्वात् हृदयनिहितंज्योतिर्विष्णुरित्यभिहि
तंतत्रछांदोग्यश्रुतौभूयते॥ यदतःपरोदिवोज्योतिरिति तत्रगायत्रीत्वेनपठ्यतेगायत्रीशब्दस्यछंदस्येवरूढइतिहृ
दयनिहितंज्योतिर्नविष्णुरित्युक्ताक्षेपपूर्वकगायत्रीशब्दनिर्णयार्थत्वापाक्तविन्यासइत्यपिनस्वरसंगायत्रीशब्द
समभिव्याहारात् छांदोग्यस्थज्योतिषःअब्रह्मत्वेप्यग्निसूक्तस्थस्यअब्रह्मत्वानाक्षेपात् उभयोरैक्यासंभवस्योक्तत्वा
त् अग्निसूक्ते अनुक्तस्यगायत्रीशब्दस्यतदनाक्षेपकत्वात्॥ यदपिचंद्रिकायामैकाधिकरण्यमतद्द्वयेपिवाक्यद्वय
मप्युदाहरणमितिकल्पनंतथायथाह्यग्निसूक्तस्थवाक्येप्रकरणानुगृहीतश्रुत्यापूर्वपक्षःतथाछांदोग्येपिगायत्रीवाइदंस
र्वमित्युपक्रमात् सैषाचतुष्पदा षड्विधागायत्रीतिचोपसंहारात् तस्यगायत्रीप्रकरणत्वेन तदनुगृहीतज्योतिः
श्रुत्यापूर्वपक्षइतिपूर्वपक्षयुक्तिसाधारण्यात् तथाअग्निसूक्तेनिरतिशयवैभवलक्षणचरणेनास्तिस्वांतयत् छां
दोग्येपिएतावानस्यमहिमेतिनिरतिशयवैभवरूपेणचरणेनास्तिस्वांतइतिसिद्धांतयुक्तिसाधारण्यादैकाधि
रणतायथाआघाराग्निहोत्राद्यधिकरणेषुआघारमाघारयतिअग्निहोत्रंजुहोतीत्युदाहरणद्वयेपिद्रव्यदेवताल

णयागरूपामापाभ्यागविधित्वमिति पूर्वपक्षयुक्तिसाधारण्यात् मंत्रवर्णादिनादेवतादिज्ञानाद्रूपाद्यभाव इति
सिद्धांतयुक्तिसाधारण्याच्चैकाधिकरणतालाभादिति वाक्यद्वयोदाहरणत्वोपपादनं च तदपि न सत् ॥ छांदोग्यस्थज्यो-
तिषः विचारणाभिधानाभावेन पूर्वपक्षसिद्धांतयुक्तिसाधारण्यस्याधिकरणैक्येऽपि वाक्यद्वयोदाहरणतायां साधक-
त्वेनोपन्यस्तस्यासिद्धेः ॥ यदपि चंद्रिकायामग्निसूक्त इधं तापनातिशयं त इति निरतिशयवैभवरूपं छांदोग्येऽप्यस्यै-
व विचारणाभिधानमस्तीत्युक्तं ॥ तदपि न विमे कर्णा पतयतो वि चक्षुरित्यादेरग्निसूक्तोक्तस्य कर्णादेर्विरुध्य पनरू-
पज्योतिरतिक्रमणरूपविचरणस्य एतामेव नातिशीयं त इति छांदोग्योक्तगायत्र्यनतिक्रमणरूपस्य विचरण-
स्य परस्परं भिन्नरूपस्यैकशब्दनाभिधानायोगात् ताभ्यां गम्यमाननिरतिशयवैभवपरत्वे तु नाभिधानरूपं संभव
त्यागतौ क्लिष्टं कल्पयितुं युक्तं ॥ किंच यद्युभयोर्वाक्ययोरन्यविषयता तदा छंदोभिधानादिति पदमन्याभिधानादिति वक्तव्ये
तदभिधानापेक्षायां बीजाभावः छंदः शब्दः मयंत्र्युपलक्षक इति चंद्रिकोक्तं तु न सत् ॥ उपदेशभेद भूतादिपादव्यपदेश-
योस्तदाप्यगतेः उपदेशभेदादिति पूर्वपक्षयुक्तिः भूतादिपादेति सिद्धांतयुक्तिश्च छांदोग्यवाक्यमात्रासाधारणीति चं-
द्रिकोक्तं तु छंदोभिधानादिति सूत्रे तथैव पक्षे शब्दस्य गायत्र्युपलक्षणत्वोपपत्त्या कारस्य निष्कलत्वापत्त्यानुपादेयमेव आ-
घाराग्निहोत्राधिकरणदृष्टांतोऽप्ययुक्त एव ॥ तदधिकरणे अग्निहोत्रं जुहोति आघारमाघारयतीत्यादिवाक्यं न कर्मवि-
धायकं तत्र द्रव्यदेवतयोरश्रुतत्वात् द्रव्यदेवतावद्यागरूपस्याभावात् किंतु अग्निहोत्रवाक्यं पयसा जुहोतीति दध्ना

जुहोतीत्यादिवाक्यविहितस्य कर्मसमुदायस्याघारवाक्यं ऋजुमाघारयति ऊर्ध्वमाघारयतीत्यादिवाक्यविहित-
कर्मसमुदायस्यानुवाद इति पूर्वपक्षे दध्यादिवाक्येन न दध्यादिगुणमात्रविधानं संभवति तन्मते अग्निहोत्रवाक्य
स्य कर्मविधायकत्वाभावेन गुणिनः कस्यचिदसिद्धेः नापि दध्यादिगुणविशिष्टकर्मविधानं संभवति विधिगौरवापत्तेस्तस्माद
ग्निहोत्रादिवाक्यमेव कर्मविधायकं तत्र दध्यादिवाक्यैर्द्रव्यलाभः देवता च होमकरणमंत्रवर्णादिति सिद्धांते चोभ
यगोचरग्राहकस्य साधारणस्यैव प्रकृते पूर्वपक्षसिद्धांतयुक्तिसाधारणस्यासिद्धेरुक्तत्वात् ॥ यदपि चंद्रिकायां
उपदेशभेदादिति पूर्वपक्षयुक्तिः भूतादिपादेति सिद्धांतयुक्तिश्च छांदोग्यवाक्यमात्रासाधारणीत्यर्थवादनयेम
हमने एको विचारः अर्थवादमंत्रादिसाधारणः अन्यस्तु अर्थवादमात्रासाधारण इति द्विपर्वविचारदृष्टांतकथनं तद
पि न अर्थवादनये हि वायुर्वै क्षेपिष्ठा देवतेत्यर्थवादगताः शब्दास्तथोरुप्रथस्वेति मंत्रगताश्च शब्दाः वायव्यं श्वेत
मालभेत भूतिकाम इति विधिगतवायव्यादिशब्दानां तथा पुरोडाशं प्रथयतीति विधिगतशब्दानां च नैरपेक्ष्येणैव भू
तार्थमन्वाचक्षते विधिवाक्यगतवायव्यादिशब्दा अर्थवादगतशब्दनैरपेक्ष्येणैव विशिष्टमर्थं विदधतीति मंत्रार्थ
वादेभ्यः भारतरामायणादिवत् कश्चित् वृत्तांतः प्रतीयते न त्वनुष्ठेयं किंचिदित्येकवाक्यत्वाभावान्नार्थवादमंत्रा
णां धर्मे प्रामाण्यमिति पूर्वपक्षे पदैकवाक्यत्वाभावेऽपि विधिवाक्यस्य पुरुषं प्रेरयितुं विधेयार्थप्राशस्त्यदेवताप्रक
शनापेक्षत्वात् अर्थवादमंत्राणां च फलवदर्थावबोधपर्यवसिताध्ययनविधिपरिगृहीतत्वेन पुरुषार्थापेक्षत्वात् प्राश

...स्यभाव तयाशीघ्रफलप्रदो वायुरस्य पशोर्देवता ततः प्रशस्तमिति वाय
व्यं पशुमालभेतेति वाक्ययोरन्वयादर्थवादानां विधिवाक्यैकवाक्यतया धर्मे प्रामाण्यं ॥ एवं मंत्राणामपि विध्येकवा
क्यतयैव प्रामाण्यमित्येको विचारः मंत्रार्थवादसाधारणः यतो वायुः क्षिप्रमेव फलप्रदः अतो वायव्यं पशुमालभेतेत्येव
मर्थवादोक्तं हेतुमपेक्ष्यैव विधिः पुरुषं नियुंक्ते ततः सापेक्षत्वाद्विधेर्न प्रामाण्यमनपेक्षत्वरूपमिति पूर्वपक्षे सापे-
क्षत्वं हि प्रमाणांतराधिगतार्थबोधकत्वं अर्थवादे विमतं कर्मानुष्ठेयं फलप्रददेवतोपेतत्वात् राजसेवावदित्यनु
मानं यदि विवक्षितं स्यात्तदा विधेर्मानांतरसापेक्षत्वलक्षणमप्रामाण्यं स्यात् न त्वेवमस्ति किंतु फलप्रददेवतोपे
तत्वोपन्यासेन कर्मप्राशस्त्यमुपलक्ष्यते तथा सति प्रशस्तं कर्मानुष्ठेयमित्यस्मिन्नर्थे सार्थवादविधेः पर्यवसाना
देकवाक्यतालभ्यत इति कुतः प्रमाणांतरसापेक्षत्वमिति विधिः प्रमाणमेवेति सिद्धांत इति ॥ अन्यो विचारः अर्थ
वादमात्रसाधारणः तत्र द्वितीयविचारेण कृतस्य मानांतरानपेक्षत्वरूपप्रामाण्यप्रकारविशेषस्थापनस्य प्रथमवि
चारकृतसामान्येन प्रामाण्यसिद्ध्यधीनसिद्धिकत्वाद्विचारद्वयस्य परस्परापेक्षत्ववदिह विचारद्वयस्य परस्परापेक्ष-
त्वाभावात् ॥ तद्वदिह विचारद्वयस्य सामान्यविशेषरूपहेतुद्वयाभावाच्च वैषम्यस्य तद्विदां स्पष्टत्वात् ॥ यदप्या
नंदतीर्थीयानां प्रथमाधिकरणशरीरं ज्योतिरिदमग्निर्विष्णुर्वेति संदेहः अस्य सूक्तस्याग्निसूक्तत्वात् तद्गतज्यो
तिः शब्दोऽग्निपरः ॥ न च त्वद्रूप आहितं यदिति गुहानिहितत्वलिंगेन बाधः शंकनीयः प्रकरणसनाथायाः श्रुतेर्लिंगे

न्दुर्बलेन बाधायोगात् न चाग्निरवकाशत्वं श्रुतेरिव लिंगस्यापि जाठरे जातवेदसि लिंगस्य सावकाशत्वात् अतः सावकाशलिं-
गात् प्रबलाभ्यां प्रकरणश्रुतिभ्यां युक्तं ज्योतिषो युक्तमग्नित्वमिति पूर्वपक्षे निरवकाशेन करणादिविदूरत्वेन प्रकर-
णबाधात् श्रुतेर्विष्णावेव महायोगाद्धि रूढिभ्यामुपपन्नेः विष्णुरेवेदं ज्योतिरिति सिद्धान्तः स्पष्टं चेदं चन्द्रिकादौ तदी-
यग्रंथेन नेदं चिंत्यं निरवकाशलिंगेन श्रुतिबाधस्य पूर्वाधिकरणे हि प्रसिद्धत्वेन पुनरिहान्यपरत्वशंकानुत्थानात् प्रकर-
णस्य लिंगात् दुर्बलत्वेन तत्सहायेनोक्तशंकोत्थानं निरवकाशतया प्रबलेन लिंगेन प्रकरणबाधस्य कैमुत्यन्याय-
सिद्धत्वात् ॥ एतेन त्वमग्न इत्यग्निशब्दसन्निधानादग्निपरत्वशंकेति चन्द्रिकोक्तकल्पनं निरस्तं सन्निधानस्य
प्रकरणादपि दुर्बलत्वेन तद्बाधस्य दंडापूपिकान्यायसिद्धत्वात् किंच ज्योतिःशब्दाग्निशब्दयोर्देवतापरत्वे अंतर-
धिकरणन्यायेन भूतपरत्वे आकाशाधिकरणन्यायेन गतार्थत्वं दुर्वारं न च प्रकरणानुग्रहादधिकाशंकेति युक्तं श्रुते-
र्विष्णुपरत्वे प्रकरणस्यापि विष्णुपरत्वसंभवेनान्यपरत्वायोगात् न चाग्निसूक्तत्वादिव्यवहारेण प्रकरणस्यान्यप-
रत्वशंकेति कल्पनं युक्तं अक्षिविद्या आदित्यविद्येत्यादिव्यवहारस्याक्षिशब्दादित्यादिशब्दवत्तामात्रेणैव गार्हपत्य-
परा या अपि ऋचः ऐंद्रीति व्यवहारस्येन्द्रपदवत्तामात्रेणैव विष्णुपरस्यापि सूक्तस्याग्निपदवत्तामात्रेणाग्निसूक्त-

विरोधेन तत्सावकाशत्वकल्पनानुपपत्तेश्च कर्णादिविदूरत्वस्याम्नायसंभवाच्च नदाच्छादनेन पूर्वपक्षस्तु असद्भीत्य
पूर्वपक्षसिद्धांताभिप्रायेणाधिकरणयोजनासंभवेनायुक्त एव ॥ यदपि चंद्रिकायामिदमग्निसूक्तं न विष्णुसू
क्तमित्यध्यापकप्रसिद्ध्याग्निसूक्तत्वविष्णुसूक्तत्वाभावव्यवहारसाचिव्यान्निरवकाशमपि लिंगं श्रुतिः प्रति वध्नी
तीति निरवकाशत्वमात्रप्रयुक्तलिंगगतप्राबल्यस्य निरवकाशोक्तव्यवहारसाचिव्यश्रुतित्वोभयप्रयुक्तश्रुति-
गतप्राबल्यात् दुर्बलतया लिंगगतबहुत्वप्राबल्यस्य श्रुतित्वरूपस्वभावप्रयुक्तप्राबल्यात् दुर्बलतया युक्तमेतत्सू
क्तस्याग्निपरत्वमिति पूर्वपक्षोपपादनं तदपि न विचारक्षमं ॥ प्राणविद्या अक्षिविद्या आदित्यविद्येत्यादिव्यवहार
वदेवं मंत्रप्रसिद्धिवच्चोक्तरीत्यान्यथासिद्धव्यवहारादेरर्थविशेषनिर्णायकत्वायोगात् ॥ अत एवैकविष्णुविष
यकत्वाविशेषेपि तत्र तत्पदश्रवणाश्रवणरूपपरविशेषश्रवणप्रयुक्तः पुरुषसूक्तमिदं नारायणसूक्तमिदं नेदं पुरु
षसूक्तं नेदं नारायणसूक्तमिदं विष्णुसूक्तं नेदं विष्णुसूक्तमित्यादिव्यवहारः संगच्छते तन्न तु पदाश्रवणेन तत्तु

सा सह वर्तमाने ज्योतिःशब्दासंभवेन पूर्वपक्षोत्थानमित्यपि परास्तं न सत्प्रजननं ज्योतिर्विराट्छंदसां ज्योतिः त्रिवृत् पंचदशः सप्तदश एकविंश एतानि वै ज्योतींषीत्यादि बहुतरप्रयोगविरोधेन तमोविरोधित्वस्य ज्योतिःपदप्रवृत्तिनिमित्तत्वाभावात् आदित्यादितेजोमये ब्रह्मणि तमसा सहावस्थानस्यैकेनापि प्रमाणेनासंप्रतिपत्तेः प्रकाशकत्वमात्रस्यैव तत्प्रवृत्तिनिमित्तत्वौचित्यात् ॥ अस्तु वा यथाकथंचित् तमोविरोधित्वं ज्योतिःपदप्रवृत्तिनिमित्तमित्याशंका तथापि तस्यादित्यादिसाधारणतया अग्निमात्रपूर्वपक्षोपष्टंभकत्ववर्णनमसंगतमेवेति नोक्तपूर्वपक्षो युक्तः पूर्वपक्षस्यायुक्तत्वेनैव तन्निराकरणसिद्धांतोऽप्ययुक्त एव ॥ किंच कर्णादीनां विदूरत्वं विष्णोरन्यत्र नैव हि अग्नेस्तु श्रुतिसूक्तादिसाधकाशं परा त्मनीत्यादिना कर्णादिविदूरत्वलिंगेन ज्योतिःश्रुतेर्विष्णुपरत्वनिर्णयसिद्धांतो न युक्तः तल्लिंगस्याशिवसाधारण्यात् ॥ तथाह्याथर्वशिरसायां अथ हैनं पैप्पलादोऽगिराः सनत्कुमारश्चाथर्वणमुवाच भगवन् किमादौ प्रयुक्तं ध्यानं ध्यायितव्यं किं तद्ध्यानं को वा ध्याता कश्च ध्येय इत्यनेन ध्यानध्यातृध्येयविषयप्रश्नमपतार्य स एभ्यो अथर्वा उवाचोमित्येतदक्षरमादौ प्रयुक्तं ध्यानं ध्यायितव्यमित्येतदक्षरं परब्रह्मेति प्रणवानुगतं ब्रह्म ध्येयत्वेनोक्त्वा अस्य पादाश्चत्वारो वेदा इत्यादिना प्रणवस्य त्रिमात्राभिस्तस्य व्याप्तिमुक्त्वा एतस्मात् ध्यानादौ प्रयुज्यते सर्वकरणोपसंहारत्वात् धार्यं धारणात् तुरीयं ब्रह्मेत्यनेनावसाने स्थितं चतुर्थमात्रात्मकप्रणवाख्यतुरीयपरब्रह्मणः सर्वकरणव्यवहारातीतत्वस्य ध्येयत्वे हेतुत्वमुपन्यस्य ध्याता

तेशानं प्रध्यातव्यमित्युपसंहारे शिव एव ध्येयस्वरूपमिति निर्णयात् सर्वकरणविदूरस्य शिवस्य कर्णादि
विदूरत्वासत्तेः उक्तप्रश्नवाक्ये यमर्थः प्रथमतो विधानेति शेषः ध्यानं ध्यायत इति ध्यानं ध्यानविषयः ध्यायितव्यं शि
ष्यपुत्रादीनामुपदेशयोग्यमथवा ध्यानयोग्यं अयमत्रापि विवक्षितोऽर्थः ध्येयत्वेन योग्यं प्रयुक्तं प्रथमोत्पन्नो विधाता
किं ध्यातवान् भगवदादिभ्यः पुत्रेभ्यश्चापि मुक्तयांश्चेति शेषः स्वस्वार्थमंत्रोपनिषदिच ॥ यदा तमस्तन्न दिवा न रात्रिर्न
सन्न चासत् शिव एव केवल इति शिवं प्रस्तुत्य नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् इत्यनेन को ध्येनं कुत्रापि न गृ
हीतवानित्यभिधाय तदर्थं न संदृशे तिष्ठति रूपमस्येत्युक्तात् ध्येयत्वेन न चक्षुषा पश्यति कश्चिदेनमिति श्रुतं तत्र च
क्षुषेत्युपलक्षणमन्यैरपींद्रियैरेनं न कश्चिज्जानाति ततो न संदृशोऽस्य रूपं स्वरूपं तिष्ठति संदृशो सम्यक् दर्शनेऽ
त्यर्थः तथाच चक्षुः कर्णादि विदूरत्वस्य शिवसाधारण्यं श्रुतिसिद्धं निर्विवादमेव कर्णादि विदूरत्वं च यदातिपरिच्छेद
नहेतुभवत्वमेवेति चंद्रिकोक्तमसाध्वेव ॥ विमे कर्णा पतयतो विचक्षुरित्यनेन कर्णादीनां ज्योतिरतिक्रमणस्यै
वोक्तेर्निरतिशयवैभवत्वस्य तेन गम्यमानत्वे तु चरणाभिधानादित्यत्रापि धानपदास्वारस्यमित्यभिहितमेव पूर्वप
क्षनिराकरणे तस्यापि शिवसाधारण्यं विष्णवाद्यैश्वर्यस्यापि शिवाधीनत्वप्रतिपादनेन व्यवस्थापितमंतस्तद्धर्मा

स्नुधान्यमसि धिनुहीति मंत्रस्य मांसहविष्कयागे निवि ष्टस्य मांसमसीत्यूहे कर्तव्ये मृगोसीत्यूहमसीत्यिपदज्ञा
नमूलं वपिष्टवादिशाद्वाभावादेव न तमसि त्येतिनि चंद्रिकोक्तं तु न साधु ॥ बहुजन संवादविषयमसि त्येरज्ञानविषय
त्वकल्पनस्यायुक्तत्वात् दृष्टांतोक्तिस्तु स्वकीयभ्रममूलैव धान्यशाद्वस्य सतुषद्रव्यवाचिनः ॥ पुरोडाशानूपहविः प्र
कृतिद्रव्यत्वेनैव निर्दिष्टस्य मांसे हविषि तत्प्रकृतिद्रव्यवाचिनो मृगशाद्वस्यैवोहनीयत्वौचित्यस्य न्यायवित् संमत-
त्वात् ॥ यदपि चंद्रिकायां अग्नेर्नापरिच्छेद्यत्वेप्ययत्वमग्निर्वै देवानामवम इत्यवमतयाभीधास्त्वादग्निस्त्वपतीतिस
मयनयापरिच्छेदं नाग्नियंतेविद्युत्वृष्टिश्च चंद्रमाः आदित्योग्निरितिमरणादिमत्तयाचतस्य श्रुतत्वादग्निश्रुत्यादितु-
अग्निनाग्निः समिध्यते तद्देवा ज्योतिषां ज्योतिः नारायणपरो ज्योतिर्विष्णुरेव ज्योतिः अहमग्निरहंहुतं ज्योतिषामपि
तज्ज्योतिरित्यादि श्रुतिस्मृतिभिर्विष्णोसाधकाशाभिस्तुत्का एवं सूक्तांतरेष्वपि द्रष्टव्यं ॥ तथाहि ऐंद्रे नत्वावांइंद्रक
श्चन जातो न जनिष्यत इति तथाईशानमस्य जगतः स्वर्दृशमीशानमिंद्र तस्थुष इति तथा समुद्रेंतः शयन इति ॥ त
थाबार्हस्पत्येविश्वेषामिज्जनिता ब्रह्मणामसीति ॥ तथा सौरे सूर्य आत्मा जगतस्तस्थुषश्चेति तथा वारुणे योविश्व
स्य जगतो देव ईशइति ॥ तथा विश्वकर्मसूक्ते विश्वतश्चक्षुः यो नः पिता जनितेत्यादीनि संति ब्रह्मलिंगानि किंच सौ
रेयेनापावकचक्षुषा भुरण्यंतं जनां अनु त्वं वरुण पश्यसीति सूर्यस्य पावक वरुणादि शब्दैः संबोधनं तथा वारुणे अथा
वयमादित्येति वरुणस्यादित्यादिशब्दैः संबोधनं तथा आग्नेये त्वमग्न इंद्रो वृषभः सतामसि त्वं विष्णुरुरुगायो नम

स्य इत्यग्निं संबोध्यते नेंद्रविष्ण्वादिशब्दप्रयोगः उक्तसूक्तानां सर्वशब्दवाच्यब्रह्मपरत्वे युक्तो नान्यथेति सर्वसूक्त
गतनामसमन्वयपरत्वमस्योक्तं तत्पक्षहेत्वोरादिशब्दाभावादुपलक्षणत्वाश्रयणस्याक्लिष्टत्वाद्वेयं ॥ किंचाग्नि
सूक्तस्थज्योतिषैव निर्णये ज्योतिर्दर्शनादित्यस्य गतार्थतापत्तिश्च ॥ यदपि चंद्रिकायां ज्योतिर्दर्शनादित्यत्र तु अ
ग्निसूक्तस्थस्यापि ज्योतिषो ध्रियमाणत्वादिलिंगैर्जीवत्वे शंकितानि लिंगानि ब्रह्मपरोपक्रमोपसंहारस्थत्वाद्दंत
र्भावितण्यं तानीति वक्ष्यत इति पौनरुक्त्यापत्तिनिवारणं तदपि ध्रियमाणत्वादिलिंगानां ब्रह्मणि संदंशन्यायेना
न्यार्थपरतायां अत्रैव निरूपयितुं युक्तत्वात्त्येयं ॥ यदपि छंदोभिधानादित्यादित्रिसूत्र्या अधिकरणांतरत्ववर्ण
नं तथाहि अत्र लोकतोन्यत्र प्रसिद्धगायत्रीनामसमन्वयः क्रियते छांदोग्ये गायत्री वा इदं सर्वमित्यारभ्याथ यद
तः परो दिवो ज्योतिर्दीप्यत इति श्रूयते तत्र गायत्री यदि विष्णोरन्या स्यात् तदिदं ज्योतिश्च सा स्यात् अतो गायत्री किं
छंदोविशेषउत विष्णुरिति संशये गायत्रीश्रुतिप्रसिद्ध्या वाग्वैषेति वाक्यत्वसंकीर्तनाच्च छंदोविशेष एव ॥ नच ज्यो
तिःश्रुत्याबाधः श्रुत्याश्रुतिबाधायोगात् ज्योतिःपर्यायतेजःशब्दस्य तेजो वै गायत्रीति श्रवणेन गायत्र्यामेव तदुपपत्ते
श्च गायत्रीशब्दश्च न विष्णौ रूढः तत्र मानाभावात् लिंगस्य रूढ्या बाधात् न चात्र तदधीनत्वन्यायः प्रवर्तते वेदरूपा-
यास्तस्याः नित्यत्वात् तथा चेदं ज्योतिरपि तद्रूपमेवेति पूर्वपक्षे सिद्धांतः गायत्री विष्णुरेव तथाहि दर्शनं श्रुतिरि

तानन्यनित्यत्वविरोधः स्वभावो जीवकर्माणि द्रव्यं कालः श्रुतिः क्रियापलसादा दिमे संति न संति तदुपेक्षयेति नित्या
नामपि तदधीनत्वश्रुतेः भूतादिपादव्यपदेशादपीदं निर्णीयते सैषा चतुष्पदा षड्विधा गायत्रीति गायत्र्याः षड्विधत्व
मनूद्य चतुष्पदत्वं व्यपदिश्यते तथैव पुरुषसूक्तमंत्रः संपादयोदाह्रियते तदेतदृचाभ्युक्तं तावानस्येति अस्य पुरुषस्य
तावान् पूर्वोक्तमहिमा न केवलमेतावान् किंतु पुरुषस्ततः पूर्वोक्तादपि महिम्नो ज्यायान् कथं सर्वाणि भूतान्यस्यैकः
पाद अस्यामृतं स्वरूपभूतं पादत्रयं दिवि तिष्ठतीति यदुक्तं गायत्रीज्योतिश्च विष्णुरिति तद्रूपेणादि गायत्रीज्योतिःप्रसं-
गयोरैक्यं पस्तूच्यते तन्नैवं त्रिपादस्यामृतं दिवीति गायत्र्याः द्युस्थितत्वोक्त्या परो दिवो ज्योतिष्यः दिवः परत्वोक्त्या
विरोध इति नाशंकनीयं त्रिलोकसप्तलोकाद्यभिप्रायेणोपदेशभेदोपपत्तेः तथाहि भूर्भुवः स्वरिति लोकत्रयाभिप्राये
णलक्ष्योजितोच्छ्रितांतरिक्षोपरितनस्य तदीयानंतासनवैकुंठानां द्युत्वात् तत्र तद्रूपत्रयं दिवीत्युच्यते सप्तलोका
पेक्षयेंद्रसदनस्य द्युत्वात् वैकुंठस्य दिवः परत्वं मेरोरपि द्युत्वात् तत्स्थानंतासनस्य दिवः परत्वं सूर्यमंडलस्यापि द्यु
त्वेन तदुत्तरश्वेतद्वीपस्य दिवः परत्वं नक्षत्रस्थमूर्तित्रयस्य दिवः परत्वं च युज्यते अत उभयथोपदेशोऽपि विरोधाभावा
दुभयत्राप्येकमेव विष्ण्वाख्यं वस्तूच्यत इति गायत्री विष्णुरेव स एव ज्योतिरानंदमयश्चेति सिद्धांत इति ॥ तन्नैवं चिंत्य
ते यद्यत्र गायत्रीनाम समन्वेतव्यं तर्हि मध्ये ज्योतिर्वाक्योपन्यासः किमर्थः न तावत् पूर्वाधिकरणाक्षेपार्थः ज्योतिर्वाक्य
स्यो मयाधिकरणविषयतामनेतदाक्षेपेपि ज्योतिः सूत्रे अग्निसूक्तस्थ सूक्तवाक्यमेवापि विषय इति पक्षे तदनाक्षेपान्

अनाक्षेपे च चिंतावैफल्यात् गायत्रीशब्दस्य भाक्‌ब्रह्मविषयत्वान्नु स्याच्छंदोभिधानान्नेति चेन्नेति शंकानुत्थानाच्च यदि चैतद्दोषपरिजिहीर्षया ज्योतिर्नाम्नैव छांदोग्यस्थं समन्वेतव्यमिष्यते तर्हि समन्वेतव्यनामाग्रहणान्न्यूनतास्वपक्षसाधनमनुक्त्वैव छंदोभिधानादित्याक्षेपोपि नोचितः यत्तु गायत्रीवाक्ये विषये ज्योतिर्वाक्योपादानं पूर्वपक्षे ज्योतिरधिकरणाक्षेपदर्शनार्थं ज्योतिर्वाक्यविषये गायत्रीवाक्योपादानं गायत्रीशब्दरूपपूर्वपक्षबीजप्रदर्शनार्थमिति चंद्रिकायामुक्तं न तत् गायत्रीवस्तूपक्रमात् छांदोग्यस्थज्योतिषः छंदस्त्वेप्यभिन्नसूक्तस्थज्योतिषः कणादिविदूरत्वेन साधितस्य ब्रह्मत्वस्यानाक्षेपात् चिंतावैफल्यात् न तु द्वयोरैक्याश्रयणेन पंचांकेति परैरुक्तमेवेति चेत् कणादिविदूरत्वस्य ब्रह्मत्वसाधकत्वादैश्वर्यस्यातादिरूपतया प्रत्यभिज्ञाया अस्योक्तत्वात् यत्तु चंद्रिकायामुक्तमाक्षिप्य ज्योतिषो गायत्रीत्वे इयं वाव सा येयं पृथिवीति गायत्र्याभिन्नत्वेनोक्तायां पृथिव्यामस्यां हीदं सर्वं प्रतिष्ठितमित्युक्तस्थितिहेतुत्वादेरपि तद्धर्मत्वापत्त्या जन्मादिसूत्राक्षेपसंभवात् चिंतासाफल्यं वर्णितं तन्मंदं इदं सर्वमिति मत्यज्ञायगत किंचिदाश्रयत्वमात्रोक्त्या जन्मादिसूत्राभिहितचेतनाचेतनात्मककृत्स्नजगज्जन्मस्थितिलयहेतुत्वादिरूपमवदभिमतात्मकत्वानाक्षेपात् तावतापि ज्योतिर्वाक्यप्रयोजनालाभाच्च एतेन योयमंतर्हृदय इति छांदोग्यस्थे ज्योतिषि आनंदमयधर्मसूत्र हृदयनिहितत्वश्रवणेन ज्योतिरधिकरणमनाक्षिप्यैवानंदमयाधिकरणाक्षेप

धिकरणाक्षेपकत्वाभावस्य पूर्वमुक्तत्वाच्च किंच गायत्र्याः छंदस्त्वेपि तदुपक्रममात्रान्न ज्योतिषः छंदस्त्वं प्रकरणवि
च्छेदकाथशब्दश्रवणेनार्थेषु ज्योतिरित्यादावेतच्छब्दस्यैवाथयदतः परो दिवो ज्योतिरित्यत्रापि यच्छब्दस्याप्युक्तपरा
मर्शित्वासंभवात् अस्मन्मते तु छंदोभिधानादित्यत्रैव प्रकरणविच्छेदमाक्षिप्य तन्निराकरणेन यदतः पर इत्यत्र यच्छ
ब्दस्य पूर्वप्रकृतवाचित्वमेव नार्थेषु ज्योतिरित्यत्रैव प्रस्तोष्यमाणपरामर्शित्वमिति व्यवस्थाप्यत इति न दोषः अत ए
व गायत्री पूर्वपक्षोपि नयुक्तः किंच निरवकाशाकर्णादिविदूरत्वलिंगमात्रेण सावकाशज्योतिःश्रुतिबाधस्य पूर्वाधिक
रणे उक्तत्वात् अत्र पत्नैतल्लब्धेति निरवकाशश्रुतिसहितेन निरवकाशभूतादिपादत्वलिंगेन गायत्रीश्रुतिबाधस्य कैमु
तिकन्यायसिद्धत्वान्नोक्तपूर्वपक्षोदयः यत्तु चंद्रिकायां विष्णौ प्रसिद्धेषु अन्येषु भगवन्नामसु सत्सु अन्यत्र प्रसिद्ध
गायत्र्यादिशब्दप्रयोगवैयर्थ्यान्न गायत्रीशब्दो भगवत्पर इत्यधिकशंकया पूर्वपक्षोत्थानवर्णनं तदसत् आकाश
दिपदसामानाधिकरण्ये अस्याः शंकायाः विशिष्याकीर्तनेन तत्परिहारायोगात् सर्वत्र तत्परिहारस्तु न सूत्रारूढः सू
त्रे छंदोद्यभिधानादिति विन्यासापत्तेः एतेन आकाशादिशब्दासाधारणीयं गायत्रीशब्देऽनुपपत्त्यंतरसद्भावादधिक
शंकोदय उदाहृत इति चंद्रिकोक्तमनादरणीयं ॥ यदपि चंद्रिकायां युक्तमग्निसूक्तस्थज्योतिषो विष्णुत्वमुपदेश-
भेदाभावात् इह तु दिव इति गंधमप्युपदेशपदवाक्यस्थस्य ज्योतिषः ज्योतिःश्रुत्या विष्णुत्वेपि दिवीति तद्विरुद्धस्य सप्तम्यु
पदेशवद्वाक्यस्थायागायत्र्या न विष्णुत्वमिति असाधारणीत्वन्येत्यधिकशंकाप्रदर्शनं तदप्यसत् प्रत्यभिज्ञाप्रयु


क्तस्यैवविष्णुपरत्वस्योपदेशभेदमतिबध्यतयानिमित्तांतरमपेक्ष्यस्यतस्यतदभेदप्रतिबध्यतयातन्नतदभाव-
हेतुत्वाभिधानस्यायुक्तत्वात् छांदोग्यवाक्यगतद्युत्वादिविरुद्धकर्णादिविदूरत्वोपदेशस्यतत्रापिसत्वान्नप्र
त्यभिज्ञानमित्यस्योक्तत्वात् अतएव पंचमीनिर्देशोत्वाद्यपिनयुक्तं पंचमीनिर्देशस्यविष्णुपरतायामहेतुत्वात् ज्यो
तिषःचरणाभिधानादिहेत्वंतरेणविष्णुपरत्वस्येवसर्वात्मत्वादिहेत्वंतरेणविष्णुपरत्वस्यगायत्र्यामपिसंभवेन
तत्रोपदेशभेदस्याप्रतिबंधकत्वात् यदिहिज्योतिरुपक्रमात् गायत्रीस्यात् तस्यास्तदभेदाच्च तस्याः विष्णुपरत्व
मुक्तं स्यात् तयोपदेशभेदान्न तदभेदइतिशंकास्यात् इहतु गायत्र्युपक्रमाज्ज्योतिषःछंदस्त्वेशंकितेतद्रूपभेदाभिधा
नं छंदस्त्वाभावेऽनुकूलमेवस्यात् नतु गायत्र्याविष्णुत्वात् ज्योतिषोपिविष्णुत्वमप्रतिपाद्यं तत्रोपदेशभेदज्ञापनइतिमैवंगायत्रीनाम
समन्वयेप्रधानेसिद्धे ज्योतिर्नामसमन्वयाभावेव्यदोषात् नह्यत्र ज्योतिषोन्यत्वे पूर्वाधिकरणस्थज्योतिषोप्यन्यत्वंहे
तुभेदादित्युक्तंप्रमधाने चार्थकेन चोद्यपरिहारोयुक्तोनेत्युक्तार्थप्रतिक्षेपास्वारस्यात् उभयोरप्रतिपाद्यत्वेनैकदे-
शाक्षेपयुक्तः तथासत्याक्षेप्यनाम ग्रहणकर्तव्यतापत्तेः यदपिचंद्रिकायांअग्निसूक्तस्थज्योतिर्निष्कर्णादिविदू
रत्वविरुद्धदहश्रुततायुपदेशभेदान्नेदंज्योतिर्विष्णुस्ततश्चगायत्र्यपिनविष्णुरित्यपराधिकशंकाप्रदर्शनंतदपि
पूर्वोक्तशंकानिराकरणयुक्त्यैवनसतज्ज्योतिषोन्यत्वेपिगायत्र्याविष्णुत्वाविरोधात् ॥ यदपिचंद्रिकायांएकस्या

काशदर्शनं तदप्यसदेव अंतराधिकरणे श्रुतिबाहुल्येऽपि लिंगेन बाधदर्शनात् प्रकृते एकविषयाने कश्रुत्यभावेन श्रु
तिबाहुल्यासिद्धेश्चान्यथातिप्रसंगात् गायत्रीपदयोरपर्यायत्वात् प्राणमातरिश्वादिपदवत् लिंगबाध्यत्वोप
पत्तेश्च ॥ यच्च चंद्रिकायामंतराधिकरणे इंद्रादिबहुश्रुतीनामन्यत्र प्रसिद्धिबाधस्तु अन्यत्राप्रसिद्धत्वान्न स्वरूपत्वसुखे
नयुक्तः नतेह तथा सुखप्रसक्तौ त्युक्तं तत्र प्रकृतेऽपि तथाभूतसर्वभूतात्मकत्वादि सुखसम्भवात् ॥ यदपि चंद्रिकायां
एताश्च प्रमाणाभिताः प्रमेयाभिन्ना सुयुक्त माकाशाद्यधिकरणोक्तं जन्यभूताकाशस्य भावस्यापि परत्वादेर्ज्योतिःश
ब्द प्रवृत्तिनिमित्तस्य चेशाधीनत्वं धर्मिणा सह जन्यत्वात् गायत्रीरूपवेदस्य तु अनादित्वेन सत्त्वभावस्य गानत्राण
कर्तृत्वादेः प्रवृत्तिनिमित्तस्य नेशाधीनत्वमित्यपि काशंकाप्रदर्शनं तदपि न सत् न तावत् वर्णानां पदानां वा नित्य
त्वं वेदनित्यत्वं कविकाव्यादेरपि नित्यत्वप्रसंगात् अपि त्वानुपूर्वीनित्यत्वं तच्चोच्चारणप्रयोज्यमिति कथं तस्यनेश्व
राधीनता न स्याः अनादित्वनूपनित्यत्वस्य सादित्वनूपजन्यत्वविरोधित्वेऽपि ईश्वराधीनत्वाच्चेति पूर्वपक्षश्चापि न युक्तः
पूर्वाधिकरणे ब्रह्मपरत्वेन निर्णीतप्राज्योतिः श्रुत्या गायत्रीश्रुतिबाधसंभवात् ॥ अत एव श्रुत्या श्रुतिबाधायोग इति
तत्त्वप्रकाशिकायां जयतीर्थीयाक्तिरपि न युक्ता निर्णीतत्वानिर्णीतत्वाभ्यां वैलक्षण्यात् ॥ न चोपक्रमस्थत्वात् गाय
त्रीश्रुतिप्राबल्यमित्यभिप्रायकल्पनमित्यपि साधु ब्रह्म तर्कादुपक्रमापेक्षयोपक्रमप्राबल्यप्रयगन्तव्यत्वात् सूर्यपक्ष
णात्तथा पूर्वपक्षिणुप्रयोग्यत्वात् ननु गायत्र्या अविष्णुत्वे अथ यदतः इति यदतः परो ज्योतिरिति निर्दिष्टमति निर्देशः य

च्छब्दसमानाधिकरणो ज्योतिःशब्दोपि तत्परः स्यादिति ज्योतिरप्यविष्णुः स्यादिति चेन्न अथैव ज्योतिरित्यत्र तच्छ-
ब्दस्यैव प्रकृतेप्यथशब्देनाविभिन्नप्रकरणस्य यच्छब्दस्य प्रकृतपरामर्शित्वायोगेन करिष्यमाणपरत्वौचित्यादनेका
र्थस्य तस्येदमादि यत्पूर्वपरामर्शित्वाभावाच्च तस्य गायत्रीपरत्वे याज्योतिरिति स्त्रीलिंगतौचित्याच्च ब्रह्मपर्वसते
जोहेतौ गायत्र्यामासुपूर्वतमितिवत्तेजोवै गायत्रीत्यन्यथासिद्धमिति पूर्वमेवोक्तमतो ज्योतिर्गायत्रीवाक्ययोरेक
विषयताग्राहकप्रमाणाभावात् गायत्रीशब्दस्य छंदःपरत्वेपि ज्योतिःशब्दस्य तत्परत्वासिद्धेः कथंचिदेकवाक्यता
कल्पनेच निर्णीतोपसंहारस्थज्योतिःपदानुरोधेन गायत्रीपदस्यैव ब्रह्मपरतापत्त्या न छंदःपरो ज्योतिर्गायत्रीश-
ब्दावितियुक्तं कल्पयितुमिति एवं सिद्धांते सूत्राक्षरार्थस्तावदयुक्तः तथा चेतोर्पणेत्यादेः पंचम्यंतस्य हेतुसमर्पकत्वे
तथाहि दर्शनमित्यस्य दृष्टांतसमर्पकत्वं स्वतः स्वरसं तत्सारित्यज्यत याहीत्यादेर्हेतुसमर्पकत्वकल्पनस्य चे-
तोर्पणेत्यादेः प्रयोजनसमर्पकत्वकल्पनस्य चायुक्तत्वात् किंच तथाशब्दः सादृश्यवाची प्रसिद्धः तेन सादृश्या
नुसंधानमेव स्वरसतः प्रतीयते तथाहीत्यखंडो निपातः उक्तार्थोपपादनप्रतिज्ञायां स्वरसः तदुक्तार्थे तु नस्वार
स्यं उत्तरसूत्रद्वयानन्वयस्तूक्त एव तादृधीन्यासंभवस्य पूर्वपक्षोपन्यस्तस्य न किंचिदुपपादकं सौत्रं पदं उत्सूत्र
सिद्धांतस्त्वयुक्तः अत एव प्राणाइत्यादि यदतिदेशादेव तं द्वारणसूचनं तत्तिदेशाभावादेव न युक्तं ॥ यत्तु चंद्रिकायां

नामपि गगनादिपरिमाणादीनां स्वाश्रयगगनाद्यधीनता यथा अद्वैतिमते वा अनादेरप्यज्ञानसंबंधस्य जीवब्रह्म
विभागादेश्च संबंध्यज्ञानाद्यधीनता यथा वा भास्करमते अनादेर्दुःखप्रागभावस्य मोक्षस्य ज्ञानाधीनता यथा वा मतां
तरे दुरितप्रागभावस्यानादेरपि निषिद्धाकरणाधीनता तथा गायत्र्यास्तत्पदप्रवृत्तिनिमित्तस्य चोक्तस्वभावेपि
किंचावधीनतास्त्विति तैवेति पूर्वपक्षपरिहारप्रदर्शनं तन्न सम्यक् गायत्र्याश्रितस्य धर्मस्य गानत्राणकर्तृत्वस्य कथं तद
नाश्रयब्रह्माधीनत्वमिति शंकायां गुणानां स्वाश्रयाधीनत्वोपपादनेनापरिहारात् नहि नित्यायां गायत्र्यां तत्स्वभा
वस्य चान्याधीनत्वे गगनादिपरिणामादिदृष्टांतो घटते न हि दिह गुणगुणिभावाभावात् स्वनिष्ठानि हि द्रव्याणि नि
त्यानि गगनादीन्यनधीनान्युपलभ्यन्ते अतः तत्साधारण्यं न तादधीन्यप्रयोजकं अनित्येष्वपि नोत्पादकत्वमाश्रितत्वं
वा तादधीन्यनियामकं अनुत्पादकपोषकाद्यधीनत्वस्यैव बहुशमुपलंभात् श्रुतिप्रामाण्यात् तदं गीकारे तु तद
पलाहिं यक्तव्यं न तु दृष्टांतभावात् दुःखप्रागभावेन ज्ञानाद्यधीनता अपितु प्रागभावनाशकप्रतियोग्युत्पत्तिप्रतिबंध
कत्वमात्रं तत्त्वात्वेण तादधीन्यव्यवहारमात्रं एवमद्वैतिमतेप्यनाद्यज्ञानसंबंधस्य जीवब्रह्मविभागादेश्च अपिधाना
ज्ञाधीननाशप्रतियोगित्वेनाविद्याधीनत्वव्यवहारमात्रमेव दुरितप्रागभावस्यापि निषिद्धाकरणाधीनत्वं दुरितोत्प
त्तिकारणनिषिद्धकरणाभावादेवनैवं परमात्मनो गायत्र्यास्तद्रूपेगानत्राणकर्तृत्वे वा कारणत्वमिति दृष्टांतोप्य-
युक्त एव किंचास्त्वनादेरपि गायत्र्याख्यवेदस्येश्वराधीनत्वं मास्तु वा किं तेन स्यात् न च गायत्र्यास्तादधीन्यात्तत्पद

वाच्यता ब्रह्मणः किंतु तत्पदप्रवृत्तिनिमित्तस्य तादधीन्यात् तच्चेदानीमपि सिध्यति भृत्यस्य राजाधीनत्वेऽपि तद्भृत
त्त्वापविशेषाणां तादधीन्यादर्शनेन तत्तु न स्यादधीन्यस्य तत्त्वमात्रविशेषतादधीन्यं मत्यप्रयोजकत्वात् दीपगत
प्रकाशकत्वादेस्तत्पदप्रवृत्तिनिमित्तस्य तैलाद्यधीनत्वदर्शनेऽपि तैलादेर्दीपादिपदवाच्यत्वादर्शनेन तत्पदप्रवृ-
त्तिनिमित्तस्य तादधीन्येऽपि तस्य तत्पदप्रयोगाप्रयोजकत्वाच्च तस्मान्न तुः सूत्र्या ऐकाधिकरण्यं तत्र च छांदोग्यवा
क्यमेव विषयः तत्रस्थज्योतिःपदस्यैव परमात्मपरत्वं साध्यं तत्र मंत्रवर्णोक्तचरणाभिधानमेव हेतुः तत्र छंदोभिधा
नादित्यसिद्धिशंका तस्यां छंदसि भूतचरणत्वासंभवसूचनेन छंदोभिधानस्यान्यथासिद्धिसूचनेन तत्रापि भूतादिपा
द्व्यपदेशेनोपष्टंभनं पुनरुपदेशाभेदप्रयुक्तासिद्धिशंकानिवारणमित्येवास्माद्भाष्यकारेणोपदर्शितः क्रम एव युक्त
इति ॥ श्रीमत्शंकरपादाब्जभूषणे परदूषणे रघुरघुनाथकृतिभूयाज्ज्योतिर्न्यायविवेचने ॥ श्री ॥ ॥७॥ ॥



श्रीगणेशाय नमः ॥ सन्न्यायहेत्वादिप्रतिभटकपिलाद्यागमस्यैव बाधो न्याय्यस्त्वेवं गुरूणां कृपया विपरणाक्षे-
पिणां दूषणाय ॥ क्रमः कोपि प्रबंधः सरलमतिमता रायवाचार्यसूरिच्छात्रेणायं प्रयत्नात्प्रभवतु विदुषां संसदि-
प्रोत्सवाय ॥ १ ॥ स्मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात् ॥ पूर्वाध्याये जगदुपादानत्व
कर्तृत्वाद्युपलक्षितं प्रत्यगभिन्नाद्वितीयं ब्रह्म वेदान्तैः प्रतिपाद्यत इति वेदान्तानां तादृशब्रह्मपरत्वं सप्रपंचं निरूपितं
॥ तदिह स्मृत्यादिविरोधोद्भावनेनाक्षिप्यास्मिन्नध्याये समर्थ्यत इत्यनयोरध्याययोर्विषयविषयिभावः संगतिः
अत एवास्य प्रथमाध्यायानंतर्यं फलवत्त्वं च विषयपरिज्ञानं विना च सांगत्यनाक्षेपस्य तत्परिहारद्वारस्य वा कर्तु
मशक्यत्वात् ॥ अत्र साक्षात्परंपरया वा बाधकोद्भावनेन समन्वयाक्षेपः पूर्वपक्षाभिमतः तत्र साक्षाद्बाधकमपेक्ष्य
परंपरया बाधकस्य विलंबितप्रवृत्तिकत्वादतिविरोधिनः स्वपक्षे स्मृतिन्यायविरोधस्य साक्षाद्बाधकस्यैव प्रथम
पादे निरासः ततश्च इतरेषां चानुपलब्धेरिति सूत्रे महत्त्वादिसाधकप्रमाणाभावेन तद्विषयकस्मृतेरमूलकत्वा
त्कार्यस्मृतेरिव तेनैव रूपेण तत्स्वधर्मतया कारणस्मृतेरप्रामाण्यं प्रसाध्य स्मृत्यनवकाशप्रसंगस्येष्टापत्तिपरा
हतत्वेनाबाधकत्वे समर्थिते वक्ष्यमाणानुमानाद्यदुष्टप्रमाणमूलकत्वादमूलत्वासिद्ध्या नेष्टापत्तिः संभवतीति-
पुनः स्मृत्यनवकाशोऽप्यापादिते उक्तपरंपरया स्वपक्षविरोधिनां तादृशानुमानादीनां दुष्टत्वोपपादनेन हि

नुपपत्तेः अंत्यता स्यादिति चंद्रिकाकारोक्तं दूषणं निरस्तं कारणस्मृतेरनुमानादिमूलकत्वस्मृत्यनवकाशप्र-
संगेष्टापत्तियोगः उक्ता यांत मूलत्वाभिमतानुमानादीनां दुष्टत्वोपपादनमंतरेणोपक्रांतस्मृत्यविरोधस्यानर्थक्यसं-
भावात् द्वितीय एव तदुपपादनस्यावश्यकत्वात् ॥ अथैवं पराभिमतमूलप्रमाणदुष्टत्वोपपादनं न विलक्षणादित्यतः
प्रागेव कर्तव्यं स्यादिति चेन्न तात्पर्यविदः स्मृतिविरोधे सति स्मृत्यप्रामाण्यस्याविरोधेऽत्यनपेक्षामिति न्यायेन स-
र्वैरेव वेदप्रामाण्यवादिभिरुपगंतव्यत्वात् न विलक्षणत्वादितर्कमुपजीव्य वेदांतानां वेदांत्वाभिमतार्थपरत्वनिरास-
कृत एव तं प्रत्यप्रामाण्यासंभवात् तदुपजीव्य वेदांतानां स्मृतिविप्रतिषेधेन ब्रह्मपरत्वाभावः शंकितुं शक्यः त-
न्यथेति प्रथमसूत्रोक्तबाधकोपजीव्यब्रह्मपादसाक्षाद्बाधकविलक्षणत्वादितर्कनिरासस्यैव प्रथमं कर्तुमुचितत्वा-
दिति तृतीयतुरीययोर्भूतभौतिकादिविषयश्रुतीनां परस्परविप्रतिषेधात् ॥ विरुद्धवाक्यद्वयान्यतरत्वस्य ...
रिगृहीतत्वादेः प्रामाण्यप्रयोजकत्वासंभवेन तदन्यस्य च प्रामाण्यप्रयोजकस्य वेदे दुर्वचतया प्रामाण्य ...
धर्मभून्यानां वेदांतानां नोक्तब्रह्मपरत्वलक्षणसमन्वयः संभवतीति रीत्या परंपरया ब्रह्मवादविरोधिनः श्रुति ...
रोधस्य निरास इति पादोपाधिभेदः एतेन पादोपाधिभेदात् श्रीमद्भाष्ये भगवत्पादैः संक्षेपेण दर्शिताः इदानीं स्वपक्षे स्मृ-
तिन्यायविरोधपरिहारः प्रधानादिवादानां न्यायाभासोपबृंहितत्वं प्रतिवेदांतं सृष्ट्यादिप्रक्रियायाः अविगीतत्वाभि-
त्यस्यार्थस्य प्रतिपादनाय द्वितीयोऽध्याय आरभ्यत इति ॥ तृतीयचतुर्थपादयोर ... प्युपाधिभेदस्तैरेवोपदर्शितः वे

यदादिविषयवृत्तिविमतनिषेधस्तृतीयेन परिहृतस्तथ्यतु येनेदानीं प्राणादिविषयः परिह्रियत इति ॥ यत्तु चंद्रिकायां
अन्येतु आद्यपादे स्वपक्षे सांख्यादिस्मृतिभिस्तद्युक्तीतर्कैश्चाविरोधपरिहारः द्वितीये सांख्यादिमतानां दुष्टत्वोक्तिः
तृतीये पूर्वभागे महाभूतश्रुतीनामुत्तरभागे तु जीवश्रुतीनां च तुर्थपादे लिंगशरीरश्रुतीनां परस्परविरोधपरिहार इति
पादार्थानाहुरिति निरुक्तपादोपाधिभेदमनूद्य तन्न आद्ये तृतीये च पादे एकोपाध्यभावात् ॥ आद्येपीतरेषां चानुक्त
धेः एतेन योगः प्रत्युक्तः स्वपक्षदोषाच्च ॥ एतेन शिष्टापरिग्रहा अपि व्याख्याता इत्यादौ परपक्षाणां दुष्टत्वोक्तेस्तत्रापि
स्वीकृतत्वाच्च पाद्येतेषां दुष्टत्वोक्तिः स्वपक्षस्य तैर्विरोधनिरासार्थेति चेन्न ॥ द्वितीयेपि तदुक्तेस्तदर्थत्वात् ॥ य
था आद्यपादे दृश्यते त्वमित्यत्र विलक्षणयोरपि ब्रह्मप्रपंचयोः वृश्चिकगोमययोरिव कार्यकारणभाव इत्येतदर्थ
प्रतिपादके स्वपक्षे तर्कविरोधपरिहारः तथा द्वितीयेपि महद्दीर्घवदिति सूत्रं ॥ यथाद्व्यणुकादणोर्ह्रस्वाच्च सतो महद्
दीर्घं च ॥ अणुकं जायते नाणुर्नातिह्रस्व एवं चेतनात् ब्रह्मणोऽचेतनं जगन्निष्पद्यत इति व्याख्यातत्वेन तत्रापि तर्क
विरोधपरिहारोस्त्येव तृतीयस्य पूर्वभागेपि अंतरा विज्ञानमनसीत्यत्र त्वन्मते एतस्माज्जायते प्राणो मनः सर्वेंद्रिया
णि चेत्यादि प्राणमनआदिविषयश्रुत्याविरोधस्योक्तत्वेन न भूतश्रुत्यविरोध इत्येव नियमः ननु अन्नमयं हि सौम्य
मनः आपोमयः प्राणस्तेजोमयी वाक् इति श्रुतेर्मनआदीनि भूतान्येवेति तद्विचारो भूतविचार एवेति चेत् तर्हि चतुर्थे

चतुर्थेपि संज्ञामूर्तिक्लृप्तिस्त्वित्यादिना जीवेनेति वाक्ये जीवस्य कर्तृता नोच्यते किंतु ब्रह्मण इति [illegible]
लिंगशरीरस्यैव विचार इति नियमः किंच तृतीयचतुर्थयोरपि स्वपक्षविरोधपरिहारस्य [illegible] ॥ अथाद्यानंतरसंगत्या
द्वितीयस्य तु परपक्षदूषणरूपत्वात् अंत्यत्वमस्यादिति दूषणमुक्तं न मोक्ष्यते पदुक्तं आद्येतृती [illegible]
तदसत् स्वपक्षसाक्षाद्बाधकोद्धारः प्रथमपादोपाधिरनुगत एव स्वपक्षे स्मृतिन्यायविरोधपरिहार इति ॥ [illegible]
पाधिकथनपरभाष्ये स्मृतिन्याययोर्द्वैरास्येन कथनं तु तयोः स्वपक्षसाक्षाद्विरोधित्वपरि [illegible]
णातत्त्वमहाजनपरिगृहीतत्वादिना वेदतुल्यायाः स्मृतेरभ्यर्हितत्वसूचनद्वारा तद्विरो [illegible]
दनाय अभ्यर्हितत्वबाधश्च [illegible] द्वैपायनमतनिर्देशादभ्यर्हितं पूर्वमित्यनुशासनात् एवं तृ [illegible]
मूलजीवादिविषयकश्रुतेर्विरोधपरिहारेपि मूलिकेतरादिविषयश्रुतिपरिहाररूपस्तत्त्वः दोषापि तु [illegible]
त्येन रधिषयकत्वपरितस्यैव तृतीयपादोपाधेरुपदर्शितत्वात् ॥ यदपि इतरेषां चानुपलब्धेरित्य [illegible]
णतत्त्वाचिंत्यं इतरेषां चानुपलब्धेरित्यत्र कार्यस्मृतेरिव कारणस्मृतेरपि निर्मूलत्वोपवर्ण [illegible]
त्वाभिमतानामनुमानादीनां दुष्टत्वोपवर्णनस्यानभिमतत्वादत एव प्रथमपादांते इदानीं [illegible]
णं प्रारिप्समाणः स्वपक्षपरिग्रहप्रधानं प्रकरणमुपसंहरतीति भगवत्पादैरभिहितं तथा [illegible] स्मृति
विरोधरूपं स्वपक्षबाधकमुद्धृतं ॥ न तु तन्मताभिमतानुमानादिदुष्टत्वमुपपादितं ॥ [illegible]

न्यस्तब्रह्मवादविरोधिदूषणानां परपक्षसाधारणतया परैस्तेषां दूषणं नास्तीत्येवांगीकार्यमित्येवाभिप्रायो भाष्ये
वर्णितः न तु परमतानां दुष्टत्वं एतेनाशिष्टापरिग्रहा इत्यत्रापि वैशेषिकाद्युक्तानां ब्रह्मवादसाक्षाद्विरोधितर्काणां
निरास एव कृतो न तु तदीयस्मृतिमूलत्वाभिमतानुमानदुष्टत्वमुपवर्णितमिति नैवं तेषां सूत्राणां परंपरया बाधक
निरसनपरे द्वितीयपादे संगतिः यथा आद्यपादे इत्यादिकमपि न संगतं कारणगुणाः कार्येषु स्वजातीयगुणमारभंत
इत्यभ्युपगमाद्यादिना जगतश्चेतनब्रह्मकार्यत्वाभ्युपगमे जगतश्चेतनत्वं स्यादित्यापादिते यदि कारणगुणानां स
र्वेषामेव नियमेन स्वजातीयगुणारंभकत्वं तवाप्यनुमतं तदा स्वपक्षविप्रतिषेधः ह्रस्वपरिमंडलाभ्यां महद्दीर्घयोरुत्पत्ते
स्त्वयोपगमेन पारिमांडल्यादेः कारणगुणस्य स्वजातीयकार्यगुणारंभकत्वादिति परपक्षदूषणमुखेनैव स्वपक्षबा
धकोद्धारस्य महद्दीर्घवद्वेति सूत्रेऽभिमततया तत्सूत्रस्य स्वपक्षबाधकोद्धारपरपक्षदूषणोभयरूपतया परपक्ष
दूषणपरद्वितीयपादेपि निवेशोपपत्तेः ॥ न चैवं तत्सूत्रस्योभयरूपत्वे प्रथमोपस्थितस्वपक्षबाधकोद्धारपरप्रथम
पादनिवेशपरित्यागे बीजाभाव इति वाच्यं स्वातंत्र्येण वैशेषिकाभिमतस्वपक्षबाधकोद्धारस्य प्रथमपादकृतत्वेन द्वि
तीये च स्वातंत्र्येण तन्मतनिरासस्य प्रस्तुतत्वाच्च तत्रैव तन्निवेशोपपत्तेः ॥ त्वन्मतेपि भोक्त्रापत्तेरिति सूत्रेण ननु भक्ते
श्वरयोर्भेदसमर्थनं फलाध्यायसंगतमतो नैव तत्सूत्रार्थ इत्यादिना फलत्वेपि युक्तिविरोधेन भोगवादस्योक्तिमिति भा

न्यतोभयांतर्भूतस्यैकभाष्यनुक्तिप्रसंगादितिउभयांतर्भूतस्यैकत्रनिवेशस्वीकाराच्चैतद्दूषणंस्वस्याशिरस्तापनत्रू
पत्वात्॥ तृतीयस्यपूर्वभागेपीत्यादिकमपिभाष्यादर्शिनांभ्रमतारणमात्रत्वादसाध्येयअंतराविज्ञानमनसीत्येतत्सू
त्रात्मकभूतानामुत्पत्तिप्रलययोरनुलोमप्रतिलोमक्रमाभ्यांभवतइतिनिरूपितेआथर्वणेभूतानामात्मानश्चांतरालेक
रणान्यनुक्रम्यंतेएतस्माज्जायतेप्राणइत्यादिनातेषांचोत्पत्तिलयक्रमांतरान्वेषणेउक्तक्रमविरोधइतिअंतराविज्ञानमन
सीक्रमेणतल्लिंगादितिचेत्यनेनाक्षिप्ते॥ यदितावद्भौतिकानि करणानितर्हिभूतोत्पत्तिलयाभ्यामेवतेषामुत्प
त्तिलयौभवतइतितयोःक्रमांतरंमृग्यमत्याविशेषादितिसूत्रभागस्यभाष्यव्याख्यानात्तत्सूत्रस्यभूतविषयश्रुतिवि
रोधपरिहाररूपत्वस्यातिस्पष्टत्वात्॥ तथाचतस्मात्पूर्वोक्तोत्पत्तिप्रलयक्रमभंगोभूतानामितिपूर्वपक्षोपसंहा
रेनस्मान्नास्तिभूतोत्पत्तिक्रमभंगइतिसिद्धांतोपसंहारेभाष्यकृदुक्तौतिचतुर्थेपीत्यपिनसत्भौतिकेतरविषयश्रु
तिविरोधपरिहारात्मके तृतीयेपादेभौतिकप्राणादिविषयश्रुतिविरोधपरिहारपराणांअतएवप्राणइत्यादीनांनि
वेशायोगात्उत्पत्तिविषयश्रुतिविप्रतिषेधःप्राणानांपरिहृतसंख्याविषयइदानींपरिह्रियतइतिससंगतेर्विशेषि
तत्वाच्चेतिसूत्रावतरणभाष्यपर्यालोचनयातत्रेंद्रियविचारस्यकृतत्वेपिपदद्वयेइंद्रियविचारस्यविषयभेदोबाले
नापिसुबोधएवचतुर्थेपीत्यादावपिनयुक्तंसंज्ञामूर्तीत्यत्रानेनजीवेनात्मनानुप्रविश्येत्यादिवचनानुसारेणजीवस्यैव
भौतिकनामरूपस्रष्टृत्वमपगम्यते॥ तत्वेदंतर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेवव्याक्रियतइत्यत्रतुपरमेश्व

स्येति मैवं तत्‌ नामनूपविषयश्रुतिविरोधस्यैव निराकृतत्वेन चतुर्थपादोपाधिनियमात्यागस्यातिस्पष्टत्वात्‌॥
तृतीयचतुर्थयोरप्याद्यपादस्वपक्षाविरोधपरिहाररूपत्वादाद्यानंतर्यस्यात्‌॥ द्वितीयस्य तु परपक्षदूषणरूप
त्वादंत्यतास्यादिति दूषणं तु प्रागुक्तनिरस्तमेवेति दिक्‌॥ आनंदतीर्थीयास्तु प्रथमे युक्तिविरोधो द्वितीये समया
विरोधः तृतीये केवलश्रुत्यविरोधश्चतुर्थे सयुक्तिकश्रुत्यविरोध इत्याहुस्तदसत्‌॥ अलौकिकार्थगोचरबहु-
जनपरिगृहीतवाक्यसंदर्भरूपसमयत्वस्य तदीयचंद्रिकाकारोक्तस्मृतिसाधारणतया स्मृतीनां समयरूप-
ताभिप्रायेणैव स्मृत्यधिकरणे समयविगानसंदेहबीजमिति तत्प्रकाशिकायां जयतीर्थोक्त्या च स्मृतीनां स
मयबहिर्भावायोगेन स्मृत्यविरोधस्य समयपाद एव संगतेः स्मृतीनां युक्त्यादिरूपत्वेनेति जयतीर्थोक्तेः स्मृ-
तीनामिव समयानामपि युक्तिरूपत्वाविशेषात्‌ समयविरोधस्यापि स्मृतिविरोधवदाद्यपादे निरसनौचित्यात्‌ स
मयानामपि स्मृतिविशेषरूपतया स्मृतिविरोधपरिहारेण समयाविरोधस्यापि उक्तानुपाध्याद्‌ इतरेषां चेत्यत्र कृ
तत्वेन तदर्थं द्वितीयपादानपेक्षणाच्च॥ न च तत्र सामान्यतो निराकृतानामत्र विशेषतो निराकरणादिति जयती
र्थोक्तिरपि साधीयसी॥ विशेषतो निराकरणस्य समयेष्विव स्मृतिष्वपि तुल्यतया द्वितीयपादे स्मृत्यविरोध एवोप
वर्णित इत्यस्यापि वक्तुं युक्तत्वात्‌॥ यत्तु चंद्रिकायां स्मृत्यविरोधपराधिकरणस्य युक्तिपादे निवेशानुपपत्तिमाशं-

काविरोधप्रतिपादके पादविशेषे अनंतभावेऽपि अविरोधाध्यायांतर्भावेन कश्चिन्निवेशोऽकर्तव्यः प्रथमं तदतिक्रमे हेत्व
भावात् ॥ चतुरात्मकतया प्रबलतया च प्रथमं निरसनीयत्वाच्चाध्यायादावेव निवेश इति समाहितं तदसत् ॥ अतः अ
वैदिकस्मृतीनामप्रमाणत्वान्न श्रुत्युक्तजगत्कारणत्वस्य तद्विरोध इति जयतीर्थोक्तिः का णादबौद्धार्हतादिस्मृ
त्यवलंबिपूर्वपक्षाणां स्मृत्यधिकरण एव चंद्रिकायां प्रदर्शितत्वाच्च वैदिकस्मृतिमात्रं विरोधपरिहारस्य तदभि
प्रेतत्वेन सांख्यपाशुपतादिचतूरूपाणामेव समयानामाद्ये निरास इति निर्बंधस्य वक्तुमशक्यत्वात् ॥ किंचा
भिमान्यधिकरणे मृदब्रवीदयाहाचेतनाश्चाचेतनाश्च ॥ तेजोवन्नाकाशादीनि तान्यचेतनानि वायुर्वा अचेतन
इति श्रुत्योर्विरोधस्यासदधिकरणे असदेवेदमग्र आसीत् ॥ सदेव सौम्येदमग्र आसीत् इति श्रुत्योर्विगानस्य एते
न शिष्टापरिग्रहा इत्यत्र अकस्मादिदमाविरासीत् अकस्मात्तिष्ठतीति एतस्माज्जायते प्राण इत्यादिश्रुतीनां भो
क्तापत्तेरित्यत्र परेऽव्यये सर्व एकीभवंतीत्यैक्यश्रुतिभेदश्रुत्योः इतरव्यपदेशादित्यत्र जीवकर्तृताबोधकश्रुतेरे
को ह वै नारायण इत्यादिश्रुतीनां च परस्परविरोधनिरासकत्वसंभवे प्रबलाया श्रुतेरुपसर्जनत्वं परिकल्प्य मृन्न
वदति जडत्वात् कारणमलयेऽसम्बद्धमपि तु मर्हति वस्तुत्वात् ॥ कार्यवत्त्वविप्रतिपन्नं निष्कारणं अचेतनकारणं
जीवकारणं वा कार्यत्वात् कूलपतनदध्यादिवत् विष्णुर्न जगत्कर्ता जीवाभिन्नत्वात् इत्यादियुक्तिविरोधपरिहार
ताकल्पनेनाद्यपादांतर्भावोक्तिरनुचितैव ॥ एवं केवलश्रुतिविरोधपरिहारपरतृतीयपादे वियदधिकरणे आ

त्मन आकाशः संभूतः अनादिर्वायमाकाश इति श्रुत्योर्विरोधपरिहारपरे आकाशस्योत्पत्तिमत्त्वांगीकारे अनु
पपत्तिश्रुतिबहुवाक्यविरोधादित्यादिना वियदनुत्पत्तिमत्त्वश्रुत्यादिति युक्तेर्ग्रंथतोऽपि दर्शितायाश्च तवि
यदनादित्वसाधकाया एतेन मातरिश्वा व्याख्यात इति द्वितीयाधिकरणेनासां गायुक्तेः सा चाएषा देवतानादिर्वी
यं पवत इति श्रुत्योर्विरोधनिरासपरे सर्वदेवतोपास्यता च नोत्पत्तिमत्त्वे घटत इत्यादिनोपदर्शिताया सर्वदेव
तोपास्यत्वातिशयितचेतनत्वयुक्तेस्तदनादित्वसाधिकायाः असंभवस्तु सतोऽनुपपत्तेरित्यधिकरणे असतः स
दजायत सदेव सौम्येदमग्र आसीदिति श्रुतिविरोध निरासके ब्रह्मणः सादित्वसाधिकायाः असंभवदुत्पत्तिक
नभोनभः स्वस्वाम्यनूपाया असंभवदुद्भवयोर्नभोनभस्वतोरित्यादिना जन्मश्रुतेः युक्तिकृत्वेन भाक्त्यादित्वं ते
नत्वदुक्ताया युक्तेः ॥५॥ आप इत्यधिकरणे अपो रापस्तदपो सृजतेति श्रुतिविरोधपरिहारपरे अपां तेजोजनि
साधिकाया विमता आपस्तेजसो जाता आस्वात् स्वेदादिवदित्यादिना त्वदुक्ताया युक्तेः ॥७॥ तदभिध्यानादेव तु
तल्लिंगात् स इत्यधिकरणे सत्यं त्वाभिसंविशंति रुद्रो माविशालक इति श्रुत्योः विरोधपरिहारपरे विष्णोः सं
हारकर्तृत्वाभावसाधिकाया विष्णोर्जगदुत्पादकत्वाल्लोके पितुरन्यस्यैव मारकत्वदर्शनादिति त्वदुक्ताया उत्पा
दकयुक्तेः ॥९॥ अंतराविज्ञानमनसीत्यधिकरणे अक्षरात्परमादेव श्रुतेः यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आ
त्मनीति पर्यायस्थितमनस्तत्त्वस्य पर्यभेदलक्षमिति लिंगादर्शनस्य चोत्पत्ति [illegible]

धपरिहारपरत्वेन सर्वेषां व्युत्क्रमेणोपलयः किंतु केषांचित्क्रमात् केषांचित् व्युत्क्रमेण ॥ तथाहि विज्ञानतत्त्वं तावन्म-
नस्तत्त्वादुत्पन्नं भूयते मनस्तु विज्ञानमिति श्रुतौ तस्य च पश्चादुत्पन्नस्य विज्ञानतत्त्वस्य पश्चादेव लयश्रुर्यापत्ति-
मूस्य मनस्तत्त्वस्य पूर्वमेव लय इति पूर्वपक्षोपपादिकाया ज्ञानत्वयुक्तेः तस्याऽस्त्युक्तिकलिंगदर्शनेत्यादिनात्व-
दुक्तायाः ॥ ११ ॥ जीवत एवेत्याधिकरणे नित्यो नित्यानां सर्व एताश्चिदात्मानो व्युच्चरंतीति श्रुत्योर्विरोधपरिहारे जीवा-
नुत्पत्तिसाधिकाया न जीव उत्पत्तिमान् अनादित्वात् ईश्वरवत् न च साध्यविशिष्टता हेतोः प्रागभावशून्यत्वाद्या-
विवक्षितत्वात् न च तत्र विवादः कारणानुपलब्धेरित्यादिना त्वदुक्तायाः कारणराहित्ययुक्तेः ॥ १२ ॥ उत्क्रांतिग-
त्यधिकरणे व्यासाधारण्यात्वानश्चेतनानि निर्गुणाश्च सर्वात्मानः सर्वरूपा अनंता इति कापायणश्रुतेः अणुर्ह्येष आत्मायं
वा एते सिनीतः पुण्यं चापुण्यं चेतिमौपवनश्रुतेश्च जीवस्य व्यासत्वाणुत्वविषये विरोधनिरासके जीवव्यासित्वसा-
धिकायानतावदणुरात्मा सर्वदेहगतस्य वा ज्ञानादित्यादिना त्वदुक्ताया देहव्यापिसुखाद्युपलब्धिरूपयुक्तेः ॥
१३ ॥ व्यतिरेकोगंधवत्तथाहि दर्शयतीत्यधिकरणे स नित्यो निरवयवः पुण्ययुक् पापयुक् इमं लोकमसुं चापर्तते-
त्यपि मुच्यते स एकधा न सप्तधा नवधा शतधेति गौपवनश्रुतिः स एकधा सप्तधा द्विधा सहस्रधा स गच्छतीति स सुपच्य-
त इति पाराशर्याणां श्रुतेश्च जीवस्य एकत्वबहुत्वविषये विरोधपरिहारपरे जीवस्यैकरूपत्वसाधिकायाः युज्यते
खलु रिभावादिनियोगमभावेन शरीरबहुतया चेत्यादिना त्वदुक्ताया अनेकशरीरयोगित्वरूपयुक्तेः ॥ १४ ॥ याव-

पदात्संभावितत्वाच्च न दोषस्तद्विज्ञानादित्यधिकरणे लयसम्प्रुपैति स चानंत्याय कल्प्यत इत्यनित्यत्वानित्यत्वयोः
श्रुतिविरोधनिरासके जीवोत्पत्तिसाधिकायाः उपाधेरुत्पत्तिमत्त्वे प्रतिबिंबस्योत्पत्तिनियमादित्यनेन त्वदुक्ता-
या उत्पत्तिमदुपाधिप्रतिबिंबत्वरूपाया युक्तेः ॥ १६ ॥ पुंस्त्वादिवत्त्वस्य सतोभिव्यक्तियोगादित्यधिकरणे वि-
ज्ञानात्मा सह देवैश्च सर्वैः स आनंदः स बलः स ओजश्श्रुतेः स दुःखाद्विमुक्त आनंदी भवति सोज्ञानाद्विमुक्तो ज्ञानी भव-
तीत्यादिपैंगिश्रुतेश्च परस्परविरोधनिरासके जीवस्य ज्ञानानंदत्वसाधिकायाः सर्वदा तदनुभवप्रसंगरूपयुक्तेः त्व-
दुक्तायाः ॥ १७ ॥ कर्ता शास्त्रार्थवत्त्वादित्यधिकरणे ईश्वरस्यैव कर्तृत्वबोधकश्रुतेः फलसंपत्त्या जीवकर्तृत्वबोधि-
कायाः स यत्कर्म कुरुते तदभिसंपद्यत इति श्रुतेश्च विरोधनिरासके जीवस्य कर्तृत्वाभावसाधिकाया लाघवरूपयु-
क्तेः समर्थितं हीश्वरस्यैवानन्ययोगेन कर्तृत्वमितरव्यपदेशादित्यादौ अत एव द्वयोः कर्तृत्वमपि प्रत्युक्तं ईश्वरस्यै-
व कर्तृत्वांगीकारे कल्पनालाघवं च स्यादिति त्वदुक्तायाः ॥ १८ ॥ आभास एव चेत्यधिकरणे रूपंरूपमिति श्रुतेः प्रक-
रणपश्चादनुमितप्रतिबिंबत्वाभावबोधकश्रुतेश्च विरोधनिरासके एकेश्वरप्रतिबिंबत्वाभावसाधिकायाः प्रति-
बिंबानां एकजातीयत्वाभावरूपयुक्तेस्त्वदुक्तायाः सत्येनैषामधिकरणानां युक्तिविरोधनिरासके प्रथमपादए-
वउचितः अत्र च प्रमाणप्राप्यस्य स्वविरोधार्थविषयकज्ञानकरणत्वव्यापकप्रामाण्यकत्वनियमात् ॥ वेदांतनि

माण्यापादकत्वमप्रत्यूहं. तादृशाप्रामाण्यापादकापत्तेश्च ब्रह्मप्रमाशक्तत्वज्ञानविरोधितया वेदांताः यद्युक्तब्रह्मपरस्युस्तदास्वविरोध्यर्थकज्ञानकरणत्वव्यापकाप्रामाण्यवंतः स्युरिति तर्कः स्वपक्षसाक्षाद्विरोधीति तन्निरासकत्वादस्याधिकरणस्याध्यायपादसंगतिः ननु वेदांतानामुक्तब्रह्मपरत्वमयुक्तमुतयुक्तमिति तदर्थं सांख्यस्मृतिप्रामाण्ये साधकमस्ति उत नास्तीति तदर्थं च सांख्यस्मृतिः किमदुष्टकरणजन्यज्ञानमूला उत नेति संशये वेदांता नोक्तब्रह्मपराः तथा सति सांख्यस्मृतेरप्रामाण्यप्रसंगात् न चेष्टापत्तिः सर्वज्ञप्रणीताया महाजनपरिगृहीतायाश्च वेदवदेव प्रामाण्यस्य निरपवादत्वात् आप्तोक्तिर्हि प्रामाण्यबीजं सा च वेद इव तंत्रेऽपि तुल्या तत्प्रणेतुरिव तंत्रप्रणेतुरपि कृषिप्रणीतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येदिति श्रुतिसिद्धसर्वज्ञताकत्वात् ॥ न चेश्वरज्ञानस्य नित्यतया असंभावितदोषकरणत्वेन तन्मूलकानां वेदानां प्रामाण्यं निश्चेतुं शक्यते कापिलादिसिद्धज्ञानानां च जन्यतया संभावितदोषकरणत्वात् न प्रामाण्यनिश्चयसंभव इति वाच्यं भगवदनुग्रहाविर्भूतविज्ञानानां कपिलादीनां ज्ञाने दोषमूलकत्वशंकाया अयुक्तत्वात् ॥ नहि तेषां प्रतारणादिदोषकल्पने किंचिद्बीजमस्ति न च विरोधे तन्न वेदं स्यादसति ह्यनुमानमिति न्यायस्यात्रावकाशोऽस्ति निर्णीततात्पर्यकश्रुतिविरोध एव तत्प्रसरात् ॥ न च तदभ्युपक्रमादिभिस्तात्पर्यनिर्णयः शक्यशंकः बलवत्तर्कोपष्टंभेन सांख्याचार्यैः स्वाभिमतार्थ एव तस्य तात्पर्यस्य वर्णितत्वात् ॥ नन्वेवं सति मन्वादिस्मृत्यप्रामाण्यप्रसंगस्तत्रापि महाजनपरिगृहीतत्वस्य प्रामाण्यबीजस्य

तुल्यतयाऽदृष्टापत्त्ययोगादिति वाच्यं ॥ तासामनुष्ठेयार्थे सावकाशतया सांख्यस्मृतिविरुद्धार्थे नातात्पर्यकल्पना
त् ॥ सांख्यस्मृतीनां तु अध्यात्मदर्शनमधिकृत्यैव प्रवृत्तानां निरवकाशत्वात् ॥ अत एव वेदतंत्रयोः समबलत्वे निर्ण
योवाच्यो न तु तंत्रानुरोधेन निर्णय इति परास्तं ॥ वेदस्यापि धर्मादौ सावकाशत्वात् ॥ नचोपनिषदां निरवकाशता
तासामपि सांख्यरीत्या सावकाशतयोपपादनीयत्वात् ॥ तथाहि न तावत्कारणवाक्यानां ब्रह्मणि जगदुपादा-
नताबोधकत्वं तद्वत्कर्तृताबोधकत्वं वा वक्ष्यमाणतर्कविरोधात् ॥ नापि प्रत्यगभिन्नपरमात्मबोधकवाक्या
नां यथाश्रुतार्थकत्वं द्वैताकरणाद्बन्धमुक्तिव्यवस्थाभावप्रसंगात् ॥ इत्थमेवाद्वितीयत्वादिपक्षे दोषा उन्नेयाः ए
वं च सांख्यप्रवचनोक्तरीत्या सृष्टिवाक्येषु प्रकृतिताबोधकवाक्यानां जगत्प्रकृतिमूलप्रधानस्वामितामात्रेणौ
पचारिकत्वं कर्तृताबोधकवाक्यानां केषांचिदंतरेश्वरबोधकत्वं केषांचिदौपचारिकत्वं तत्त्वमस्यादिवाक्यानां
चिन्मंडलांतःपातित्वाबोधकत्वमित्येवागत्यानुसारणीयं ॥ तथा च सांख्यसूत्राणि तत्सन्निधानादधिष्ठातृत्वं म
णिवत् मुक्तात्मनः प्रशंसोपासासिद्धस्य वा नाद्वैतश्रुतिविरोधो जातिपरत्वात् ॥ एवमादीनि तत्र भाष्यं ननु तथापि
प्रकृत्याधिष्ठातृत्वं श्रूयमाणं नोपपद्यते लोके संकल्पादिना परिणाममानस्यैवाधिष्ठातृत्वव्यवहारादिति तत्राह त
दिति यदि संकल्पेन स्रष्टृत्वमधिष्ठातृत्वमुच्यते तदायं दोषः स्यादस्माभिस्तु पुरुषप्रकृतिसान्निधानादेवाधिष्ठा
तृत्वं स्रष्टृत्वादिरूपमिष्यते मणिवत् यथायस्कांतमणेः सान्निध्यमात्रेण शल्यनिष्कर्षत्वं न संकल्पादिना तथैवा

दिपुरुषस्य संयोगमात्रेण प्रकृतिर्महत्तत्त्वादिरूपेण परिणमते इदमेव सोपाधिकस्रष्टृत्वमित्यर्थः ॥२॥ नन्वनी
श्वरप्रतिपादकश्रुतीनां का गतिस्तत्राह मुक्तेति यथायोग्यं काचित् श्रुतिर्मुक्तात्मनां केवलात्मसामान्यस्य ज्ञेयता
विधानाय संनिधिमात्रैश्वर्येण स्तुतिरूपा प्ररोचनार्था काचिच्च संकल्पपूर्वकं स्रष्टृत्वप्रतिपादिका श्रुतिः सिद्धस्य
ब्रह्मविष्णुहरादेरेवानित्येश्वरस्याभिमानादिमतोऽपि गौणानित्यत्वादिमत्त्वात् नित्यत्वात्तु उपासनापरेत्यर्थः न
न्वेवं पुरुषनानात्वे सति एक एव हि भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचन्द्रवत् नित्यः सर्व
गतो ह्यात्मा कूटस्थो दोषवर्जितः एकः संभिद्यते भ्रान्त्या मायया न स्वभावतः इत्याद्याः श्रुतिस्मृतयः अद्वैक्यप्रतिपा
दिका नोपपद्यन्त इति तत्राह नादेतः श्रुतीति आत्मैक्यश्रुतीनां विरोधस्तु नास्ति तासां जातिपरत्वात् ॥ जातिसामा
न्यस्यैकरूपत्वं तत्रैव हेतुः श्रुतीनां तात्पर्यमित्थं खण्डने तत्प्रयोजनाभावादित्यर्थः नन्वयं पूर्वपक्षो न युक्तः उक्तदो
षाणां समन्वयाध्याय एव तत्र तत्रोद्धृतत्वात् ॥ तथाहि ईक्षत्यधिकरणे पूर्वपक्षभाष्ये प्रधानस्यानेकात्मकस्य प
रिणामसंभवात्कारणत्वोपपत्तिः मृदादिवन्नासंहतस्यैकात्मकस्य ब्रह्मण इत्युपादानत्वस्य ब्रह्मणि प्रतिक्षिप्त
त्वात् तत्साधनं विना न सिध्यतीत्यतोऽस्तीति कृत्स्नप्रसक्तिरिति न्यायाभासोऽपि तत्र निरसनीयस्तत्राविवक्षितः एवं
कश्चित् ईक्षणस्यौपचारिकत्वमित्यपि तत्रैव निरस्तं ॥ एवमदृश्यत्वाधिकरणे चिदात्मनानुसारूप्यं जडानां नोप
पद्यते जडं प्रधानमेव ततो जगद्योनिः प्रतीयतामिति निबंधे पूर्वपक्षोत्थापनात् विवर्तस्तु प्रपंचोऽयं ब्रह्मणोऽपरिणा

णाभिनः अनादिवासनोद्भूतान साङ्ख्यमतेऽस्मत इति सिध्धांतप्रणयनाच्च न विलक्षणत्वादित्याद्यधिकरणार्थ एवो
क्तः जिज्ञासासूत्र एव च सर्वज्ञत्वसर्वकर्तृत्वतदभावादिविरुद्धधर्माध्यासाज्जीवब्रह्मभेदमाशंक्य तन्मिथ्यात्व
साधनो विषयः समर्थितः इति तदनन्यत्वाधिकरणार्थोऽपि स्पष्टीकृतः प्रकृतिश्चेत्यत्रापि कार्यं चेद्जगत सावय
वमचेतनमप्रकृत्यं च रद्वयतइत्यादिनां न विलक्षणत्वादित्यादिसूत्रार्थ एव दर्शित इति तदनुगुणो लसिद्धांते न प्र
वितव्यमेवेति वेदव्यवदांते ईक्षत्याधिकरणोनित्यचैतन्यरूपस्य परमात्मनो मुख्यसर्वज्ञत्वासंभवात् ॥ तन्निर्वाहा
यजन्यज्ञानोपगमे सशरीरत्वापत्तेश्चासिध्धांनहेतोरत्वारस्यमुपपाद्य पूर्वपक्षोऽपोह्यलनायैतत्यादीयनिरसनीयस्य
निरवयवत्वादिप्रयुक्तोपादानत्वासंभवस्योपदर्शितत्वेऽपि तं निरासकन्याये एतत्यादीयसिध्धांतस्यैव संसाश्रय
णात् ॥ यथोक्तं तत्रसिध्धांतभाष्ये यथातु तर्केणापि ब्रह्मण एव कारणत्वं निर्वोढुं शक्यते प्रधानादीनां तथा प्रपंचयि
ष्यते न विलक्षणत्वादित्येवमादिनेति एतेनोक्तनिबंधः प्रकृत्याधिकरणभाष्यं चाविरोधेन व्याख्यातं ॥ एवमन्य-
त्रापि द्रष्टव्यं यत्तु चंद्रिकायां यन्न वेदांतानां बहुमुखतया परतंत्रप्रज्ञानां पुंसां तैः स्वतो र्थनिश्चयायोगेन स्मृत्यान
दर्थनिश्चेतव्ये सति मन्वादिस्मृतीनां मनुष्येयपरत्वेन साधकाशत्वात् कापिलस्मृतेस्तु सिध्धार्थनिष्ठाया मोक्ष
साधनसम्यक्दर्शनमधिकृत्यप्रवृत्तायाः अन्यपरत्वायोगात् निरवकाशत्वरूपदोषप्रसंगात्तदनुसारेण वेदां
ता अचेतनकारणपरतया व्याख्येया इति प्राप्ते मन्वादिस्मृतिषु पुराणादिषु च ब्रह्मकारणत्ववाक्यानां सत्वा

तेषामनवकाशत्वरूपदोषप्रसंगात्तदनुरोधेन चेतनकारणत्वपरतया वेदांता व्याख्येया इति सिद्धांत इत्यस्य
रीत्या पूर्वपक्षसिद्धांतावनूद्य तन्न वेदांतानां चेतनकारणतायामैकमुख्यस्य गतिसामान्यादित्यत्रोक्तत्वेन स
मन्वयाध्याये उपपादितत्वेन च बहुमुख्यशंकानुदयादिति पूर्वपक्षे दूषणमुक्तं तदत एव निरस्तं प्रसिद्धानां वेदांत
नामद्वैतकरणपरत्वमन्येषामपि न तद्विरुद्धत्वमिति भाष्योक्तत्वेऽप्युक्तरीत्या सर्वेषामेव वेदांतानां सांख्याचार्योक्त
रीत्या न ब्रह्मपरत्वमिति शंकायामनुपपत्त्यभावात् ॥ यद्यपि चंद्रिकायां स्वशौनश्रुतिविरोधेन सर्वथैव मन्वादिस्मृत्य
प्रामाण्यस्य पूर्वतंत्र एवोक्तत्वेनेह स्मृतिविरोधेन श्रुत्यसारस्यशंकानुदयादिति पूर्वपक्षे द्वितीयं दूषणमुक्तं तदपि
न सत् निर्णीततात्पर्यकश्रुतिविरोध एव विरोधे त्वनपेक्षं स्यादिति पूर्वतंत्रीयन्यायप्रवृत्तेः पूर्वपक्ष एवोपपादित
त्वात् ॥ यदपि चंद्रिकायां अस्याधिकरणस्य सौत्रस्मृतिशब्दासंकोचाय वैदिकस्मृतिमात्रविषयत्वसंभवेन तत्सं-
कोचेन कापिलस्मृतिमात्रविषयत्वोक्त्ययोगाच्चेति पूर्वपक्षे तृतीयं दूषणमुक्तं तत्परिहारश्च सतीष्वध्यात्मविष
यासु बहुषु स्मृतिषु सांख्ययोगस्मृत्योरेव निराकरणे यत्नः कृतः सांख्ययोगौ हि परमपुरुषार्थसाधकत्वेन लोके प्र
ख्यातौ शिष्टैश्च परिगृहीतौ लिंगेन च श्रौतेनोपबृंहितौ तत्कारणं सांख्ययोगाभिपन्नं ज्ञात्वा देवं मुच्यते सर्वपाशैरि
ति सांख्यस्मृतिमात्रनिरासनिर्बंधबीजकथनपरभाष्यदर्शितानां स्पष्ट एव ॥ यदि चंद्रिकायां महद्दीर्घवद्वा
त्याद्यौकाणादादिमतं दूष्यते ॥ तथा ॥ रचनानुपपत्तेश्च नानुमानमित्यत्र सांख्यमतमपीति चतुर्थं दूषण

मुक्तं तथापि न निर्दोषश्रुतिमूलकस्मृतिविरोधात् निर्मूलत्वान्महाव्रतादिकार्यस्मृतेरिव तत्स्य धर्मे तथा कारणस्मृ-
तेरप्रामाण्यस्यैतदधिकरणप्रमेयत्वे वक्ष्यमाणानुमानाद्यदुष्टप्रमाणमूलकत्वादमूलत्वासिद्धिशंकायां तत्सा-
ध्यकानुमानदुष्टत्वस्य रचनानुपपत्तेश्चेत्यधिकरणप्रमेयत्वेन वादोषात् ॥ अयमत्र सिद्धांतनिष्कर्षः तुल्यप्रब-
योर्विरोधे निरवकाशेन सावकाशस्य संकोचो वक्तव्यः न चैवं प्रकृतेऽस्ति वेदानुसारिस्मृतीनां कॢप्तमूलतया निश्चितप्र-
माण्यकत्वात् ॥ वेदविरुद्धानां च सांख्यस्मृतीनां मूलं यावदनुमीयते तावत्प्रत्यक्षश्रुतिविरोधेन प्रामाण्यमेव प्रत्यक्षमप्रत्या-
रणादिकॢप्तं मूलं निश्चीयत इति न मूलश्रुतिकल्पनावकाशः तथा च नासां प्रामाण्यनिश्चयः संभवतीत्युक्ततर्कस्येष्टा-
पत्तिशंकापराहतत्वं नास्मत्पक्षाविरोधिता तदेतदन्यस्मृतीनामप्रामाण्यमापादयता सूत्रकारेणैव सूचितं ॥ अन्य
स्मृतीनां प्रामाण्यानभ्युपगमे तासामप्रामाण्यापादनायोगात् ॥ न च सांख्यस्मृतेः प्रमाणविरुद्धार्थकत्वस्याप्रामा-
ण्यहेतोरभावात् ॥ ननूक्तं समबलत्वं श्रुतिस्मृत्योः दुरुक्तं तत् श्रुतेः प्रमाणांतरप्राप्तिनिरपेक्षाया एव प्रमाणत्वात्
स्मृतेश्च तत्सापेक्षत्वात् कपिलादिसिद्धप्रामाणांतरेणार्थमुपलभ्य तद्बुबोधयिषया स्मृतीः प्राचीचरन् अन्यथा स्मृती-
नां कथमास्ति मूलकत्वं कथं वा तदभावे प्रामाण्यं स्वतः सिद्धज्ञप्तिमूलकता च नानपेक्षत्वभंजिका यतोऽज्ञसेकृत्स-
द्यमानाया एव दोषजन्यत्वशंकायाः अप्रामाण्यशंकायाः प्रसरात् ॥ नन्वेवं तार्किकवद्वेदपौरुषेयत्वाभ्युपगमा-
पत्तिरिति चेन्न ॥ यतस्तार्किकाः वेदप्रामाण्यमाप्तप्रणीतत्वात् न स्वत इति मन्यते ॥ तथाहि सूत्रं तद्वचनादा-

न्यायमासा प्रामाण्यमितीदं च सर्वज्ञेश्वरसिद्धौ तदुक्ततया वेदप्रामाण्यसिद्धिः न स्यां च सत्यां प्रमाणवेदप्रसिद्धस
र्वज्ञेश्वरसिद्धिरित्यन्योन्याश्रयदुष्टं औपनिषदस्तु उत्सर्गतो प्रामाण्यस्य स्वतस्त्वाभ्युपगमात् न तथेति विशेषात् नन्व
नित्यज्ञानेऽपि भ्रमत्वं शाक्यशांकमसति बाधके ज्ञानानामुत्सर्गतः प्रामाण्यात् नन्वेतत्सिद्धांतविरुद्धं द्वयसामान्य-
स्य मिथ्यात्वेनेश्वरज्ञानस्यापि मिथ्याविषयत्वलक्षणभ्रमत्वानपवादत्वादिति चेन्न हि मिथ्याविषयकत्वमात्रं भ्रमत्वं
इदं रजतमनिर्वाच्यमसद्वेति ज्ञानस्याप्रामाण्यमसंगात् किंतु तदुल्लितदवगाहित्वं न चानिर्वाच्यमनिर्वाच्यत्वादि
नाविषयीकुर्वतो भगवज्ज्ञानस्य तत्संभवः ननु कपिलादिज्ञानस्यानित्यतायां किंचित्प्रमाणमस्ति तस्मान्निरस्त
समस्तदोषशंकया श्रुत्या तन्मूलया स्मृत्या ज्ञानसमबलत्वं कापिलस्मृतेरिति न सापकाशत्वनिरवकाशत्वाभ्यां
व्यवस्थायुक्ता किंच वेदविरुद्धसांख्यमपकृष्टः कपिलस्य श्रुतिप्रतिपाद्यत्वमसिद्धं कपिलमिति सामान्यश्रुतेरन्य
स्य च कपिलस्य सगरपुत्राणां प्रतप्तुर्वासुदेवनाम्नः स्मरणात् न चैतावतापि कपिलशब्दार्थसंदेह एवेति वाच्यं ॥ ऋ
षिं प्रसूतमिति वचनं श्वेताश्वतरगतश्चातद्वितीयब्रह्मप्रतिपादन एव स्वरसमिति चमसाधिकरणे निर्णीतं तेन-
चाद्वैतानुयायी वासुदेवांशः कपिल एव प्रतिपाद्यत इति निर्धारयितुं शक्यत्वात् किंच यद्वै किंच मनुरवदत्त
द्भेषजमिति मनूक्तिमात्रस्य प्रामाण्यबोधकश्रुतेर्जागरूकत्वेन तदुक्तिसापकाशत्वकथनमसंगतमन्यथा किंच
नैतिपदवैयर्थ्यापत्तेः मनुना तु सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि संपश्यन्नात्मयाजी स्वाराज्यमधिगच्छ

नीतिं सर्वात्मभावं सा कापिलं मतं निंदितमिति गम्यते कपिलो हि न सर्वात्मत्वं मन्यते आत्मभेदाभ्युपगमात् श्रुत्य
नुरोधिन्यः स्मृतयश्च यत्तत्सूक्ष्ममविज्ञेयमिति परं ब्रह्म प्रकृत्य स ह्यंतरात्मा भूतानां क्षेत्रज्ञश्चेति कथ्यत इति चोक्त्वा त
स्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमेत्याह तथान्यत्रापि अव्यक्तं पुरुषे ब्रह्मन् निःक्रिये संप्रलीयत इत्याह अत
श्च संक्षेपमिमं शृणुध्वं नारायणः सर्वमिदं पुराणः सर्गकाले च करोति सर्गं संहारकाले च तदत्ति भूय इति पुराणे भ
गवद्गीतासु च अहं सर्वस्य जगतः प्रभवः प्रलयस्तथेति परमात्मानमेव च प्रकृत्यापस्तंबः पठति तस्मात्कायाः प्रभवं-
ति स सर्वेषां मूलं स शाश्वतिकः स नित्य इति ईश्वरकारणत्ववादिन्यः महाभारते बहवः पुरुषा राजन्नुताहो एक एवेति वि
चार्य बहवः पुरुषा राजन् सांख्ययोगविचारिणामिति परपक्षमुपन्यस्य तद्व्युदासेन बहूनां पुरुषाणां हि यथैका यो
निरुच्यते तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकमित्युपक्रम्य ममांतरात्मा तव च ये चान्ये देहसंस्थिताः सर्वे
षां साक्षिभूतोसौ न ग्राह्यः केनचित्क्वचित् विश्वमूर्धा विश्वभुजो विश्वपादाक्षिनासिकः एकश्चरति भूतेषु स्वैरचारी
यथासुखमिति सर्वात्मतामेव प्राध्योक्ता अमूलत्वाच्च सांख्यस्मृतेरप्रामाण्यमाह इतरेषां चानुपलब्धेरिति इतरे
षां प्रधानादितरेषां महदादितत्त्वानां लोकवेदयोरनुपलब्धेः ॥ न तावत्स्वतंत्रप्रधानवादिनी कापिलस्मृतिरप्रमाणमूलमूलत्वा-
त् महत्तत्त्वादिबोधककापिलस्मृतिवत् महत्तत्त्वादयो यथा न श्रुत्यादिसिद्धास्तथोपपादितं न संख्योपसंग्रहादि
त्यत्र भाष्यव्याख्यानयोः अतन्निर्दोषश्रुतिमूलकस्मृतिविरोधात् सांख्यस्मृतेरप्रामाण्यं प्रथमसूत्रे उक्तं द्वितीयेन तु

मूलत्वादप्रामाण्यं निर्मूलत्वं च स्वसमानविषयकादुष्टकरणजन्यज्ञानमूलकत्वरूपसमूलत्वाभावो प्रामाण्यहेतुर्वेदव्यभिचा
रवारणाय स्मृतित्वमन्यथा हेतुविशेषणमवसेयं ॥ यत्तु चंद्रिकायां यच्चोक्तं परैः प्रधानादितरेषां महदादीनामनु
पलब्धेश्च सांख्यमनुपपन्नमितीतरेषामिति सूत्रार्थमनूद्य तन्न संख्योपसंग्रहादित्यत्रैव श्रुत्यादिषु महदादी
नामनुपलब्धेर्दर्शितत्वादिति दूषणमुक्तं तदभिनिवेशनिर्मूलं महत्तत्त्वादिकार्यस्मृतिसधर्मतया कारणस्मृतेर
प्रामाण्यस्यैतत्सूत्रार्थस्य दूषणास्पर्शित्वात्कार्यस्मृतेरप्रामाण्यात्कारणस्मृतेरप्रामाण्यात्कारणस्मृतेरप्रामाण्यं
युक्तमित्यभिप्रायकेति श्रीमद्भाष्योक्तनिरुक्तसूत्रार्थस्यातिस्पष्टत्वेन दर्शितत्वादन्यस्मिन्नर्थे शंकानुदयाच्च ॥ ए
तेन योगः प्रत्युक्तः अतो ब्रह्मवादसाक्षाद्विरोधियोगस्मृतिविरोधादध्यायपादसंगतिः संशयपूर्वपक्षावाह ॥ योगस्मृ
त्यास्तिसंकोचो न वा वेदसमन्वये धर्मेषु दक्षावकाशसंकोच्यो न वा काशायेति संशयपूर्वपक्षादिकं प्राग्युक्तदिशावसेयं यत्तु चंद्रिका
यां यच्चोक्तं विद्यामेतां योगविधिं च कृत्स्नमित्यादिश्रुत्या योगस्य परिगृहीतत्वेन न सांख्यतुल्यत्वेनाधिकाशंकायामेतेनेति
तन्न तत्कारणं सांख्ययोगाधिगम्यं ज्ञात्वा देवं मुच्यते सर्वपाशैरित्यादिषु श्रुतिषु सांख्यस्यापि परिगृहीतत्वेनाधिकाशं
काभावात् ॥ तन्न वैदिकं ज्ञानमेव सांख्यशब्दार्थः श्वेताश्वतरेऽपि ज्ञानोपाय एव योगशब्दार्थ इति दूषणमुक्तं ॥ तत्
श्रीमद्भाष्यहृदयापरीक्षानिबंधनं ॥ तथाहि योगविषये तां योगमिति विद्यामेतां योगविधिं चेत्यादिना वैदिकानि
लिंगान्युक्त्वा योगशास्त्रस्य प्रार्थत्वं दर्शनोपायो योग इति सम्यग्दर्शनार्थत्वेनैव योगोंगीक्रियते तत्संप्रतिपन्नार्थे

प्रदेशत्वादष्टकादिस्मृतिवद्योगस्मृतिरप्यनपवदनीया भविष्यतीति इयमभ्यधिकाशंकातिदेशेन निवर्त्यते ॥ आ
अधिकाशंकोपपादने ॥ अर्थतत्त्वदर्शनोपायो योग इति हिरण्यगर्भप्रणीतयोगशास्त्रीयसूत्रस्य भाष्यप्रदर्शि-
तत्वात् हैरण्यगर्भस्मृत्यवष्टंभेनायं पूर्वपक्ष इति गम्यते तत्र च संभवत्येवाभ्यधिकाशंका साचेत्थं ऋषिं प्रसूतं-
कपिलं यस्तमग्रे इत्यादिश्रुतिर्न वासुदेवावतारकपिलपरा तस्याजानसिद्धत्वाभावात् धौरेयस्यैतरानुग्राह्यत्वायोगा
त् ॥ लीलापरत्वं च संभवत्यंगतायनुचितं नापि तंत्रप्रणेतृकपिलपरा अग्रे पदासंगतेः तस्य हिरण्यगर्भपुत्रत्वे
नैव प्रसिद्धेः किंतु हिरण्यगर्भः समवर्तताग्रे हिरण्यगर्भं पश्यत जायमानं यो ब्रह्माणं विदधाति पूर्वमित्यादिबहु
श्रुतिसिद्धप्रथमजत्वादिलिंगप्रत्यभिज्ञानुरोधेनैकाकपिलश्रुतिरतिप्रसिद्धमपि तंत्रप्रणेतारं परित्यज्याप्र
सिद्धमपहाय ऐककपिलवर्णा हिरण्यगर्भपरतया नेया न च निरपेक्षवेदविरोधाद्युक्तस्मृतेरप्रामाण्यं यद्वै किंचन म
नुरवदत्तद्भेषजमिति श्रुत्या हिरण्यगर्भवचनमात्रस्य प्रामाण्योक्त्यनुरोधेन वेदांतानामेव तदनुरोधेन व्याख्येय
त्वात् अन्यथा किंचनेति पदवैयर्थ्यापत्तेः न चोक्तश्रुतिः प्रसिद्धमनूक्तीनामेव प्रामाण्यं बोधयति न हिरण्यगर्भो-
क्तीनामिति कथमेतदिति शंक्यं तस्यां मनुशब्दस्य समष्टिमनोभिमानिहिरण्यगर्भपरत्वात् तथाहि तैत्तिरीयशा
खास्थ मानवी ऋचौ धाय्ये कुर्यादिति विधेरयमर्थवादः यद्वै किंचन मनुरवददिति तद्विधिविधेययोः चौर्देवानां यइ
न्नत्रो यजमान इयक्षतीति श्रवणात् दंपमनोभिमानिहिरण्यगर्भप्रकाशकताऽवगम्यते ॥ तथा च विधिगतस्य

मानवीतिपदस्यमनुप्रकाशिकेत्यर्थपरत्वात्॥ मनुपदस्यस्मृतिप्रणेतृमनुपरत्वेनतदसंभवात्विधिप्रदस्यमनु
गतस्यहिरण्यगर्भपरत्वेतदैकार्थ्यायविधिवाक्योपात्तप्रमाविशेषस्तद्गुणत्वेनव्याख्येयतदर्थवादगतमनुश
ब्दस्यापिहिरण्यगर्भपरत्वमेवयुक्तंईश्वरप्रतिपादकत्वाच्चवेदांतपक्षानुसारित्वेनास्यहैरण्यगर्भयोगशास्त्र
स्यस्फुटंनचतेषांचानुपलब्धेरितिवाच्यंनतन्निरासस्यशक्यत्वात्किंचनोतिहिरण्यगर्भोक्तेप्रामाण्यमभिदधानः
याज्ञवल्क्यस्मृत्यादेःसमूलव्यवस्थापकत्वादन्यथाकिंचनेतिपदवैयर्थ्यस्योक्तत्वादितिउक्ताण्याधिकाशं
काचपरिहृताभाष्येअर्थैकदेशसंप्रतिपत्त्याऐक्यार्थैकदेशाविप्रतिपत्तेरितिसिद्धांतभाष्यस्यापियोगतात्पर्या
द्तात्पर्यान्तरासंभवात्अवैदिकप्रधानादौपसंकोचतत्त्वथाप्यतइतिअयंभावः अस्तुतादृशानांहिरण्यगर्भप्रका
शकतातथापिविधिगतस्यतद्भिन्नपरत्वंयस्यनप्रकाशप्रकाशकसंबंधपरत्वमपितुयच्चैकिंचेतिवाक्यशेषा
दनुसारेणतासांमनुनाहृष्टमानवीत्यर्थएवाश्रयणीयःतथाचहिरण्यगर्भप्रकाशकयोरपिमनूक्तांतर्गतत्वात्म
नुनादृष्टत्वसंभवात्नकुत्रोनमनुशब्दस्यप्रसिद्धमनुत्यागेनहिरण्यगर्भपरत्वंयुक्तमितितथाचप्रधानादौ
शैभत्यपक्षविरोधेनतदंशेयोगशास्त्रस्यतात्पर्यकल्पनेअसंगनिर्गुणपुरुषप्रसंख्यानोपदेशेनानिवृत्तिनिरुक्ता
दिरूपभाष्योक्तांशेतत्प्रामाण्यस्यरक्षितुमशक्यतयातदंशेयथाश्रुतार्थेतात्पर्यमेवनास्तीतिकल्प्यतेतात्प
र्याभावेपितत्प्रतिपादनंपरमात्मनोनिःसृष्टत्वतयातस्मिन्सहसाचितस्ययोजयितुमशक्यतयाप्रथमस्त

दपयोगितयास्थूलविषयं योगं च कृत्स्नं पूर्वपक्षासमुत्थानमाद्ये हेतोरसिद्धतां द्वितीयेऽन्याधिकरणांशानुपपत्तिस्तृ-
तीयके इति चंद्रिकाकारोक्तं सर्वं परास्तमिति दिक् ॥ आनंदतीर्थीयास्तु स्मृत्यनवकाशेत्यादिसूत्रेऽथमेकमधिकर-
णं स्मृतिविरोधनिरासकं तत्र घूर्णाक्षरतुल्यानां वेदानामाप्तमूलकत्वाभावात् ॥ सर्वज्ञप्रणीतानां च पाशुपतादि-
स्मृतीनां च रुद्रादिप्रत्यक्षमूलकत्वेन श्रुतितो बलवत्त्वात्तदनुसारेणैव वेदार्थो वर्णनीय इति न विष्णोर्जगत्कारण-
त्वं युक्तं पाशुपतादिस्मृतिषु रुद्रादेरेव जगत्कारणत्वोक्तेरिति प्राप्ते विष्ण्वादिप्रत्यक्षमूलकपांचरात्रादिस्मृतीनां-
समबलत्वे प्रतिरोधाद्विष्ण्वाद्युक्तस्य श्रुतिषु संवाददर्शनेन रुद्राद्यपेक्षया तत्र हि विष्ण्वादिप्रणीतत्वादधिकबलत्वेवा
धात् नादरा स्मृतिसंचिचयाश्रुत्या प्रतितरां बाधाच्च न पाशुपतादिस्मृतीनां प्रामाण्यमतो नोक्तवेदप्रामाण्येन-
विष्णोर्जगत्कारणत्वसमन्वयानुपपत्तिः अत्र च विशेषेणावैदिकनिखिलस्मृतिमत्यैकोपलंबनेन पूर्वपक्षाव-
हवः चंद्रिकाद्युक्ताः तथा हि चंद्रिकायां अत्र च एषां पाशुपतसांख्यादीनां मते वेदस्यापौरुषेयत्वप्रामाण्येन तन्म-
ते श्रुत्यनुसारेण श्रुतिर्नेयेति श्रुतिप्रामाण्येन पूर्वपक्षः एषां तु का   णादादीनां मते वेदस्य पौरुषेयत्वप्रामाण्ये ते-
षां का   णादादीनां स्मृतेः स्पष्टार्थत्वसद्युक्तिकत्वं चेति पूर्वपक्षिणः बौद्धादिमते तु आप्तप्रणीतबौद्धाद्यागमविरो-
धादाप्ताप्रणीतो वेदः अप्रमाणमित्येव पूर्वपक्षः ॥ अत एव सुधायां पाशुपतसांख्यबौद्धादिमते तु   बौद्धा-
दिशास्त्रप्रामाण्यादिसंकोचे प्रमाणाभावादवैदिकत्वेन संकोचस्तु न्याय्यप्रामत्वात्सह्य इत्याहुस्तदसत् रुद्रप्रणीता

नामपि परस्परविरुद्धानां बहूनामागमानामुपलंभेन तत्प्रणीतागमांतरविरुद्धायाः पाशुपतस्मृतेरपि मूलक-
ल्पमाश्रित्यापौरुषेयश्रुतिस्वारस्यभंगस्याशंकितुमशक्यत्वात् ॥ काणादादिस्मृत्यवलंबी पूर्वपक्षोऽपि न युक्तः ते-
षामपि रुद्रोपदेशादेवतादृशशास्त्रप्रणेतृत्वस्मरणात् कपिलकणभक्षयोरासीत्तु श्रुतिरुपदर्शिता ॥ न-
न्वेवं सांख्ययोगयोः परस्परविरोधादप्रामाण्यप्रसक्त्या तन्मतेऽपि कथं पूर्वपक्षसिद्धिरिति चेद्द्वयानवबोधात् ॥
तथाहि आद्याधिकरणे योगाधिकरणसिद्धांतन्यायेन योगस्मृतेरीश्वरांशेन्यायेतात्पर्यं इतरांशे तु न विरोधस्त-
योः उपायभूतयोगप्रतिपादकतया मन्वादिस्मृतिवत् सावकाशतेति पादद्वितीयस्याद्यसिद्धांतन्यायेन प्रयोक्तुरना-
मत्वमाश्रित्य पूर्वपक्षोत्थितेरप्रत्यूहत्वात् पशुपतिप्रणीतानां च स्मृतीनां परस्परविरुद्धत्वादेकतरप्रामाण्यनि-
र्धारणे कारणाभावात् तत्प्रामाण्यावलंबनेन पूर्वपक्षो न युक्त इत्युक्ते पांचरात्रादिस्मृतिविरुद्धबौद्धादिस्मृत्यव-
लंबी पूर्वपक्षोऽप्यनयैव सरण्या निरस्तः भगवत्प्रणीतपांचरात्रादिस्मृतिविरुद्धायास्तत्प्रणीतशाक्यादिस्मृतेरपि मू-
लतायाः दुर्निश्चेयत्वादिति रुद्रायुक्तस्य रुद्रादेर्जगत्कारणत्वादेः श्रुतिषु यथासंवादस्तथोपपादितं प्रागिति जग-
त्कारणत्वांशे पाशुपतस्मृत्यपेक्षया पांचरात्रादेरधिकबलत्वासिद्धेश्च यच्चेतरेषांन्यायाद्यनुपलब्धेरिति सूत्रस्येतरे-
षां पाशुपतस्मृतिप्रोक्तानामतींद्रियेभ्य इतरेषां फलानुष्ठानात्तदुक्तकर्मानुष्ठानपरित्यागयोः कृतयोरपि प्रत्यक्ष-
तोऽनुपलब्धेस्तदंशे पाशुपतादिस्मृतीनामप्रामाण्यमित्यर्थ इति तन्न वैगुण्यादपि फलानुपलंभोपपत्ते नविलक्ष

णत्वादित्यत्र कारीर्यादिस्थले त्वयातथैव फलानुपलंभस्य समर्थितत्वाच्च मनुश्रुतौ प्रामाण्यनिश्चयेन तन्निर्वा
हाय वैगुण्येन तत्र कल्पितं मयेति चेद् अत्राप्यप्रामाण्यस्यानिश्चये नोत्सर्गतः प्राप्त प्रामाण्यरक्षणाय तथा कल्पयितुम
युक्तत्वात् अत्राप्रामाण्यं प्रमाणांतरेणानिश्चितमिति चेत्तर्हि सूत्रवैयर्थ्यात् निश्चितेप्यर्थे हेत्वंतराभिधानं तदनु
चितं भवति ॥ यदि प्राचीनं हेतुमनुपजीव्यास्यस्य साध्यसाधनक्षमत्वं तच्च न संभवतीति एतेन योगःप्रत्युक्तः इ
त्यत्र योगस्मृतौ दृष्टार्थोपसंवादात् प्रामाण्यप्रसंगं प्रथमं संस्वेदनं द्वितीयं गात्रभंजनमिति तदुक्तक्रमानुपलं
भात् न तत्प्रामाण्यमित्यर्थवर्णनमपि न युक्तं इतरेषामित्यत्र याग्यानां फलानामिव क्रमस्यापि विवक्षासंभवेन
तृतीयसूत्रस्यापि त्वन्मतेऽप्यर्थत्वात् ॥ ७ ॥ मीमांसान्यायपंचास्य राघवार्यसूरिणां ॥ शिष्यस्यैव कृतिर्भूयाद्रघु
नायस्य सन्मुदे ॥ ७ ॥

इति स्मृत्यधिकरणं समाप्तं.

श्रीगणेशाय नमः ॥ न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥ अत्र ब्रह्मणो जगदुपादानत्वसाक्षाद्विरोधिन्यायवि
राक्षाद्ध्यापादिसंगतिः यदुक्तं श्रुत्यनुरोधिस्मृत्यप्रामाण्यप्रसंगात् कापिलस्मृतेरप्रामाण्ये इष्टापत्तिरिति तदयुक्तं
कापिलस्मृतेरेव श्रुत्यनुरोधित्वात् नहि ब्रह्मणो वियदादिप्रकृतितायादि श्रुतिविरोधात् सांख्यस्मृतेरप्रामाण्यं-
संभवति विलक्षणत्वादिलक्षणविरोधेन श्रुतिभिर्ब्रह्मणि वियदादिप्रकृतिताया एव बोधयितुमशक्यत्वात् स्मृत्यधि
करणपूर्वपक्षोपष्टंभक सांख्याचार्योक्तरीत्या ब्रह्मणि वियदादिप्रकृतिताबोधकश्रुतीनां तात्पर्यस्य समर्थनी
यत्वादिति प्रत्यवस्थानादनंतरसंगतिः ॥ यद्वा अमूलानां स्मृतीनां समन्वयाविरोधित्वेऽपि अव्याहतव्याप्तिप
क्षधर्मताकानां न्यायानां समन्वयाविरोधिता निरपवादैवेति सा वोध्या अप्रोक्तसमन्वयो न युक्त उत युक्त इति
तदर्थं ब्रह्मणो जगदुपादानत्वाभावसाधने विलक्षणत्वादिहेतवो दुष्टा उतादुष्टा इति संशये प्रधानमेव सुखदुःख
मोहात्मकत्वात् दृश्यजगदुपादानं न तु ब्रह्मातादृशत्वात् सजातीययोरेव प्रकृतिविकारभावात् कोपादानोपा
देयभावदर्शनात् अत्र विशेषव्याप्तौ वपि घटादृष्टांतः यथा हि लक्षणं तत् प्रकृतिकमिति सामान्यव्याप्तौ यथा
हिरण्यविलक्षणो घटो न हिरण्यप्रकृतिक इति दृष्टांतः इति पूर्वपक्षस्तादिदमुक्तं न विलक्षणत्वादिति अस्य जग
तोऽचेतनत्वादिना वैलक्षण्यात् साधर्म्याभावात् न ब्रह्मोपादानं यद्वा अस्य ब्रह्मणो न तथात्वं न जगत्प्रकृतित्वं वि
लक्षणत्वात् तथात्वं च वैलक्षण्यं च शब्दात् श्रुतेरिति सूत्रार्थः श्रुतिश्च विज्ञानं चाविज्ञानं चाभवदिति चेतनाचेतन

विभागेन प्रमहज्जगतो वैलक्षण्यं बोधयंती भाष्योदाहृता यत्तु चंद्रिकायामस्वद्रीत्या स्वीयप्रमाणाविरोधेन परकीय
प्रमाणाप्रामाण्ये पूर्वं प्रोक्ते अत्र स्वीयप्रमाणाप्रामाण्यनिरास एव युक्तो न स्वपक्षे न्यायविरोधपरिहार इति उक्त-
रीत्या पूर्वपक्षे दूषणमुक्तं तदसत् सांख्योक्तन्यायानां श्रुत्यर्थनिर्णायकानां बलवत्त्वस्य पूर्वं शंकितत्वात् तेषां दुर्बल-
त्वानुपपादने सांख्यस्मृतिविरोधनिरासापर्यवसानेन तन्निर्वाहाय तादृशन्यायानां दौर्बल्यस्याप्यवश्यवक्तव्य-
त्वेनोक्तपूर्वपक्षावश्यकत्वात् अन्यथा प्रक्रांतस्मृत्यविरोधपरीक्षामपरिसमाप्य केवलयुक्तिविरोधेन समन्व-
याक्षेपचिंताया असंगतत्वापत्तेः स्वीयप्रमाणाप्रामाण्यपरिहारस्त्वत्र न युक्तः वेदप्रामाण्यवादिभिः कपिलकण-
भासनादिभिस्तदप्रामाण्यस्य शंकितुमशक्यत्वात् बौद्धार्हतादीनां पूर्वपक्षित्वे च तदनभ्युपगतेन वेदप्रामाण्या-
धीनसिद्धिकेन वेदनित्यत्वादिना तदप्रामाण्यसाधनस्याशक्यत्वात् वर्णनित्यतायां च बौद्धाद्यागमानामपि प्रा-
माण्यापत्तेः आनुपूर्वीनित्यतां न वेदप्रामाण्यमंतरा सेत्स्यति युक्तिमात्रस्य बौद्धाद्यागमसाधारण्यात् प्रामाण्य-
स्य स्वतस्त्वादिना तत्साधने च नित्यत्वरूपवैलक्षण्यानुसरणं तस्य श्रुतिसिद्धत्वकथनं च व्यर्थं श्रुतिप्रामाण्याद्या-
वश्यानुसरणीयेन स्वतःप्रामाण्येनैव कारीर्यादिश्रुतिप्रामाण्यस्यापि सिद्धेः न च तत्राप्यस्ति विषयबाधो येन तत्राप-
वादकसत्त्वमाशंक्येत स्वरूपयोग्यतालक्षणस्य श्रुतिबोधितकारणत्वस्य क्वचित् कार्यानुत्पत्त्याविरोधाभावात्
प्रत्युत वाक्यनित्यतायामेवास्ति प्रत्यक्षविसंवादः तस्यान्यथासिद्धिकल्पनं च वेदप्रामाण्यमंतरा न सुकल्पनं ॥

यदपि चंद्रिकायां वैलक्षण्यादनुपादानत्वशंकायास्तन्मते ब्रह्मणस्तदधिकरणएव निरासात्तेनास्य पुनरुक्ततेति

दूषणमुक्तं तदप्यसत् तत्रत्यपूर्वपक्षोसिद्धांतोपोद्बलनायनिबंधादौ मत्कृतपूर्वपक्षसिद्धांतन्यायोपदर्शनेपि तस्य

तदधिकरणप्रमेयत्वाभावात् ॥ यच्च चंद्रिकायां केवलोपादानस्य कार्यसालक्षण्यनियमेपि त्वन्मते तंतून् प्रत्यूर्ण

नाभ्यादेरिव जगत्प्रतिब्रह्म वैलक्षण्येपि सिद्धांत्यभिमतस्याभिन्ननिमित्तत्वे सत्युपादानत्वस्य संभवेन पूर्वपक्षः सिद्धां

ताधिकरणस्थ इति दूषणमुक्तं तदप्यसत् ऊर्णनाभिस्थलेप्यचेतनांशस्य तदीयत्वगादेरेवोपादानत्वं मुख्यं रथचक्रकर्तृत्वं

तदसंसर्गाग्रहमात्रेणात्मनः कर्तृत्वव्यवहार इति वदतः पूर्वपक्षिणः सांख्यस्य मते चेतनस्याचेतनोपादानतायाम्

संप्रतिपत्तेः मदभ्युपगमश्च न सांख्यरीत्या पूर्वपक्षानुत्थितिप्रयोजकः यच्च चंद्रिकायां किंच त्वन्मते अविद्यादेस्ताद्दृशि

ष्टस्य चोपादानत्वात् तस्य च जगत्सालक्षण्यात् मुख्यस्य विलक्षणत्वेपि जगद्भ्रमाधिष्ठानत्वात् आत्मनि चानात्मा-

दिभ्रमस्य सांख्यादिभिरपि स्वीकारात् कथं पूर्वपक्षोदय इति दूषणमुक्तं तदप्येतेन परास्तं उपाधिभेदेपि उपाधिवि

शिष्टस्य मुख्यानतिरिक्तत्वात् तस्योपादानतानयुक्तेति सांख्यरीत्या पूर्वपक्षोदयस्य बालेनापि सुबोधत्वात् का-

र्याभिन्नकारणतारूपमुपादानत्वं मुख्यस्यापि परं तद्विवर्तोपादानतारूपमिति द्योतनाय मुख्यस्य भ्रमाधिष्ठानत्वमु

च्यते तादृशं चोपादानत्वं न सांख्यानामनुमतं तैरन्यथाख्यातेरिवानिर्वचनीयाख्यातेरपि निषेधात् तथा च सांख्यसू

त्राणि जन्मादिव्यवस्थातः पुरुषबहुत्वं उपाधिभेदेपि नैकस्य नानायोगः नाद्वैतश्रुतिविरोधो जातिपरत्वात् ॥ वस्तुत्वेसिद्धां

तद्धानिः विरुध्योभयनूपाचेत्ताद्दक्पदार्थमितीतेः तत्रभाष्यंननुचैतस्यैक्यैपितत्तदुपाधिविशिष्टस्यातिरिक्ततामभ्युपगमस्यव्यवस्थोपपादनीयात्तत्राहउपाधिरितिउपाधिरेवनानात्तुतद्वान्नोपाधिविशिष्टोपिनानाभ्युपेयः विशिष्टस्यातिरिक्तत्वेनानासत्तायाएवशाद्धांतरेणाभ्युपगमापत्तेरित्यर्थः विरुध्योभयंसाद्विलक्षणमसाद्विलक्षणंचेतिकिंचानिर्वचनीयख्यातिपक्षेपिकुंभकाचादौसर्पभ्रजताध्यासादर्शनेनाधिष्ठानारोप्ययोःसालक्षण्यस्यावश्यकतयाविवर्तोपादानतापिनब्रह्मणः संभवतीतिपूर्वपाक्षिणः परस्यशंकातिसुलभैव ॥ यदपिचंद्रिकायांकिंचममभतेतथात्वशाद्धोक्तस्यावैदिकस्मृतिसालक्षण्यस्यानिषेध्यतानपतुतदनुक्तस्यब्रह्मकारणकत्वस्यतथाममविलक्षणत्वादित्यत्रस्मृत्यनवकाशेतिभकृतस्यपरपक्षमभाणस्यभतियोगितातपतुतदभकृतस्यब्रह्मणइतिदूषणमुक्तंतदपिशिथिलंममभतेपिपूर्वाधिकरणयोःवेदांताःजगत्कारणत्वेनब्रह्मपराइतिसाध्यघटकत्वेनोपस्थितस्यजगदुपादानत्वस्यतथात्वशद्धेनोपस्थितस्यैवनिषेध्यत्वात् यद्दृत्याद्युक्तद्वितीयसूत्रार्थेसाध्यघटककर्तृत्वोपादानत्वनिरूपकतयाभकृतस्यजगतोवैलक्षण्यस्यभतियोगित्वाच्च नचोक्तद्वितीययोजनानभाष्यकारानुमतायदुक्तंचेतनंब्रह्मजगतःकारणंभकृतिरितितन्नोपपद्यतेकस्माद्विलक्षणत्वादस्यविकारस्येतितत्रयोजनादर्शनादितिवाच्यं अतआगमवशेनागमानुसारितर्कवशेनचचेतनंब्रह्मजगतःकारणंभकृतिश्चेत्येतदधिकरणोपसंहारभाष्यानुरोधेननादृशायोजनायाएवभाष्यसंमतत्वात्जगतोनब्रह्मभकृतिकत्वमितिमथमोपदर्शितोपक्रमभाष्यानुसारियोजनायाम

पिनक्षतिः जन्माद्यस्य यत इति सूत्र इव त्रापीदं शब्देन प्रत्यक्षादिसिद्धजगत्परामर्शसंभवात् परमप्रकृतस्य ब्र
ह्मणो वैलक्षण्यप्रतियोगित्वसंभवात् ब्रह्मनिष्ठोपादानतानिरूपकत्वस्य पूर्वाधिकरणायोः साध्यघटकत्वेनोपस्थि
तस्य तयात्वशब्देन परामर्शसंभवाच्च तन्मते परं स्मृतिशब्देन स्त्रीलिंगेनोपस्थितायाः पांचरात्रादिस्मृतेः सर्वना
म्नाश्रुतिबुद्धिविषयायां आत्मश्रुतेर्नित्यत्वाच्च ताभ्य इत्यत्र स्त्रीलिंगेनैव तेन निर्दिश्यमानायां श्रुतेश्चातथाभूते
नेदं शब्देन परामर्शो न स्वरसः यदपि चंद्रिकायां जगतो ब्रह्मवैलक्षण्यस्य प्रत्यक्षसिद्धत्वात् तत्र शब्दादिति शब्दो
क्तिरयुक्तेति दूषणमुक्तं तत्परिहारश्च भाष्यदर्शिनामतिस्पष्ट एवेति भाष्यादर्शनमूलकमेव तन्न तथाहि प्रसिद्ध
श्चायं चेतनाचेतनविभागो तस्मात् ब्रह्मविलक्षणत्वान्नेदं जगत् ब्रह्मप्रकृतिकमिति न विलक्षणत्वादिति सोऽत्र-
भागं व्याख्याय योपि कश्चिदाचक्षीत श्रुत्या जगतश्चेतनप्रकृतिकत्वात् तद्बलेनैव समस्तं जगच्चेतनमवगमिष्या
मि प्रकृतिरूपस्य विकारेऽन्वयदर्शनाद्विभाव्यं नतु चैतन्यस्य परिणामविशेषाद्भविष्यतीति यथा स्पष्टचैतन्याना
मप्यात्मनां स्वापमूर्छासु चैतन्यं न विभाव्यते एवं काष्ठलोष्ठादीनामपि चैतन्यं न विभावयिष्यत इति शंकाविशेष
निराकरणपरतया तादृशांशे न भागस्यानवगम्यमानमेव हीदं लोके समस्तस्य वस्तुनश्चेतनत्वं चेतनप्रकृ-
तिकत्वश्रवणात् शब्दशरणतया केवलयोत्प्रेक्ष्यते तच्च शब्देनैव विरुध्यत इति व्याख्यातत्वात् ॥ यदपि चंद्रिका
यां किंच यदि विज्ञानं चाविज्ञानं चेति श्रुतिवैलक्षण्ये प्रमाणं चेत् कथमुपादानत्वेन प्रमाणं सच्च त्यच्चाभवदिति

पूर्वपक्ष्येनोपादानत्वप्रतीतेः अपि च विज्ञानाविज्ञानशब्दौ न कार्यकारणपरौ किंतु त्यत्सत्यादिशब्द-
वत् कार्यपरावेव च शब्दाभ्यां प्रत्येकं प्रयनान्वयप्रतीतेरिति दूषणमुक्तं तदपि न सत् विज्ञानं चेतनं निर्दिश्यते-
तः पार्थक्येनाविज्ञाननिर्देशोऽकृते चेतनपदार्थ इति संबंधीततोऽन्यो बाधकाभावादचेतनः सिध्यति उपादानता
यां च निर्विकारश्रुतिरूपबाधकसद्भावादुपादानत्वश्रुतिर्गौणी भवतीति विशेषस्य शंकायां संभवात् अत एवा
पि चेत्याद्यपि निरस्तं चेतनातिरिक्तवस्तुसिद्धिमात्रेण प्रकृतपूर्वपक्षसंगत्या विज्ञानाविज्ञानशब्दयोः कार्यका
रणपरता चास्माभिरप्यनाश्रयणात् कारणस्य चेतनतायां तु ब्रह्मपाद्यनुमता सत्यं ज्ञानं यः सर्वज्ञः सर्वविदित्या
दिश्रुतिसिद्धा चेति ॥ यदपि चंद्रिकायां अपि चानुपादानत्वे यथा कथंचिद्वैलक्षण्यं हेतुश्चेत्सूत्रमवीदित्यादेरभि
मानिपरत्वाभावेऽपि शुद्ध्यशुद्ध्यादिनापि वैलक्षण्यस्य प्रत्यक्षादिनापि सिद्धेस्तदुपपादन [illegible] द्वितीयसूत्रं व्यर्थं चे
तनाचेतनत्वाभ्यामेव वैलक्षण्यं हेतुश्चेद् चेतनवृश्चिकादिकं प्रत्यचेतनस्य गो[illegible]यादेरेवोपादानतया चेतन
स्याचेतनोपादानतायाः क्वाप्यदर्शनेन तृतीयसूत्रमयुक्तं स्यादिति दूषणमुक्तं तन्नोच्यते वैलक्षण्येन कार्य
कारणभावानुपपत्तिं वदतः पूर्वपक्षिणः संभावितं वैलक्षण्यमात्रं बाधकत्वेनेहाभिप्रेतं तच्च चेतनत्वाचेतन
त्वरूपं शुद्ध्यशुद्ध्यादिरूपं च शुद्ध्यशुद्ध्योश्च सुखदुःखमोहनात्मकत्वतदभावपर्यवसितेति भाष्य एवोपदर्शितं
च श्रुतिबलात् ब्रह्मणि शुद्धेरनुभवानुसारेण जगतोऽशुद्धेश्च एकदेशिना अंगीकारात् चेतनत्वाचेतनत्वाभ्या

वैलक्षण्यस्य कथंचित् परिहारेपि मुख्यश्रुतिभ्यां वैलक्षण्यं तेन दुष्परिहारमिति न विलक्षणत्वादस्य तथात्वमित्यंशेन पूर्वपक्षोद्दीरुतः परमार्थतस्तु चेतनाचेतनत्वाभ्यां वैलक्षण्यमपि दुष्परिहारमेवेत्यभ्युपगमवादपरित्यागेन मुख्यं समाधानं न तथात्वं च शब्दादिति प्रकृतसूत्रैकदेशेन हि द्वितीयसूत्रेण च समर्थ्यत इति नासंगतिवार्तापि ॥ ननु चेतनोपादानकत्वस्य श्रुतार्थापत्त्या जगतश्चेतनत्वं कल्प्यत इति न युक्तं विज्ञानं चाविज्ञानं चेति प्रत्यक्षश्रुतिविरोधेन श्रुतार्थापत्तेरनुत्थानादिति हि न तथात्वं च शब्दादिति सोऽत्र भागो न विवक्षितं तत्र ह्युक्तं मृदादीनां भूतानामिन्द्रियाणां चाचेतनत्वाभिमतानां मृदब्रवीत् ता आप ऐक्षन्त तत्तेज ऐक्षत ते हेमे प्राणाः अहंश्रेयसे विवदमाना ब्रह्म जग्मुरिति तेच वाचमूचुस्त्वं न उद्गायेति वक्तृत्वादिलिंगेन चेतनत्वावगमात् ॥ न च मृदादीनां वक्तृत्वं न शक्यं शंकं प्रत्यक्षविरोधादिति वाच्यं सर्गाद्यकालीन मृदो वक्तृत्वाभिधायिश्रुत्या युक्तविरोधशंकानवकाशात् ॥ न चैवमप्याधुनिकमृदश्चेतनत्वासिद्धिरिति वाच्यं चेतनोपादेयत्वेन तत्सिद्धेश्चेतनकार्यादर्शनं च हेतुः प्रागुक्त एव ॥ तथा च चैतन्याभिव्यक्तितदभावावलंबनेनैव विज्ञानं चाविज्ञानं चेति श्रुतिर्नेया एतेन किं च मृदब्रवीदित्यादौ मृदादीनां वक्तृत्वोक्तिस्तत्त्वादिसिध्यापि न तथात्वं च शब्दादिति पूर्वसूत्रोक्तविज्ञानाविज्ञानादिवैलक्षण्यापरिहारान्मृदादीनां वक्तृत्वशंकायोगाच्चेति तत्परिहारार्थं द्वितीयसूत्रमयुक्तमिति चोद्यकौतुकमपास्तमित्याशंक्य परिहरति ॥ अभिमानिव्यपदेशस्तु विशेषानुगतिभ्यां ॥ तुशब्दः पूर्वपक्षिणं प्रति प्रकृतामाकांक्षामपनु

दत्त्व पूर्वपक्षमेवदर्शयति ननूत्तरसूत्रगतत्वाद् इयं पूर्वपक्षमपवदति मृदब्रवीदित्यादिश्रुत्या भूतेन्द्रियाणां चेतन-
त्वं नाशंकनीयं यतोऽचेतनेष्वपि चेतनवदनसंवदनादिरूपव्यवहारयोग्यमृद्भागाद्यभिमानि चेतनदेवताव्यपदेशोऽयं मृद
ब्रवीदित्येवं जातीयकः कस्माद्विशेषानुगतिभ्यां विशेषश्च भोक्तृणां भूतेन्द्रियाणां च चेतनाचेतनविभागलक्षणः प्राग
भिहितः सर्वचेतनतायां चानुपपद्येत अत एव कौषीतकिनः प्राणसंवादे करणमात्राशंकाविनिवृत्तयेऽधिष्ठातृदे
वतापरिग्रहाय एता ह वै देवता अहं श्रेयसे विवदमाना इति ता वा एताः सर्वा देवताः प्राणे निःश्रेयसं विदित्वेति च पठंति अ
ग्निर्वाग्भूत्वा मुखं प्राविशदित्येवमादिकां च श्रुतिं करणेष्वनुग्राहिकां देवतामनुगतां दर्शयति विस्तरेण च सूत्रार्थो भा-
ष्यनिबंधादौ द्रष्टव्यः यत्तु चंद्रिकायां यद्यपि पूर्वमीमांसादौ पूर्वपक्षसूत्राणि संति तथापि तत्राध्यायाद्यपाद एव पूर्वप
क्षसूत्रसद्भावादिह तस्मिन्नपि प्रथमाध्याये पूर्वपक्षसूत्राभावेनान्यत्रैवात्र सूत्रकृतः पूर्वपक्षत्वसूचकजैमिन्यादिग्रह
णाभावेन व्याकरणकल्पसूत्रादाविव तदकरणशीलत्वनिश्चये सति सर्वशास्त्रं पूर्ववादिमतं किंचित्किंचित्सात-
त्त्ववेदकं उपासनापरं किंचिदिति कस्माद्धि नाश्यते अन्यथा एकः पादः पूर्वपक्षः पादांतरं सिद्धांत इति स्यादिति सूत्रद्वय
स्य पूर्वपक्षप्रतिपादकत्वे दूषणमुक्तं तत्रेदं वक्तव्यं अत्रैव सूत्रांतरेषु सर्वथा चेतनांतरस्य हंचेदित्यादिवाद्यादि पूर्वपक्ष
लिंगरहितस्य इतरव्यपदेशाद्धिताकरणादिदोषप्रसंग इति सूत्रैकदेशपंचम्यंतभागस्य पूर्वपक्षांशत्वं कल्पयतो
भवतः संप्रदायविरुद्धार्थप्रपत्तमूर्धन्यस्य तंत्रांतरसिद्धशैल्याधिरूढस्य पूर्वपक्षरचनाप्रतिक्षेपोक्तिरुपहासास्प-

दैप्ययदिजीयकर्तृत्वस्यश्रुतोव्यपदेशादिसिध्यत्वात्जीवः स्वलंक्कर्तेत्युच्यते तर्हि न स्याद्धिताकरणमाहितकरणं चमन्
स्यादिति हि इतरव्यपदेशादिति सूत्रस्य जयतीर्थाद्भिभिरर्थो वर्णितः ॥ तन्मतेऽपि पूर्वाध्यायीयाद्यपादद्वयादावदृष्टस्-
स्यापि प्रासंगिकविचारस्य तृतीयपादे तदुपर्यपि बादरायणः संभवादित्यादापि याध्यायांतरे ऽदृष्टस्यापि पूर्वपक्षसू-
त्रप्रणयनस्य द्वितीयाध्यायादावयुक्तत्वायोगात् पादांतरे अदर्शनस्येवाध्यायांतरे अदर्शनस्याविशेषेणाकिंचित्क-
रत्वात् ॥ उक्तं च जयतीर्थैरन तदुपर्यपि बादरायणः संभवादिति सूत्रे अप्रदेवानां ब्रह्मविद्याधिकारसमर्थनादस्ति-
शास्त्रादिसंगतिः प्रासंगिकत्वान्नाध्यायादिसंगतिर्गवेषणीयेति इष्यते च न्यायपंचाध्याय्यां प्रथमाध्याये अदृष्टम
पिसमानानेकधर्माध्यवसायादन्यतरधर्माध्यवसायाद्वा नसंशयः विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च ॥ विप्रतिप
त्तौ च संप्रतिपत्तेः ॥ तथात्यंतसंशयः तद्धर्मसातत्योपपत्तेरित्यादि पूर्वपक्षसूत्रप्रणयनं द्वितीयाध्या . य
इति न किंचिदेतत् ॥ इष्यते तु ॥ यदुक्तं विलक्षणत्वान्नेदं जगत् ब्रह्मप्रकृतिकं यत् यद्विलक्षणं तन्न तत्प्रकृ-
तिकमिति व्याप्तेरिति तन्न ओके विलक्षणादपि गोमयादितो वृश्चिकादेश्चेतनस्य चेतनत्वेन प्रसिध्यात विल-
क्षणात्पुरुषादेरचेतनस्य केशलोमादेरुत्पत्तिदर्शनेन हेतोर्व्यभिचारात् ॥ नन्वचेतनान्येव वृश्चिकादिश
रीराण्यचेतनानां गोमयादीनां कार्याणि तथा चेतनान्येव पुरुषादिशरीराण्यचेतनानां केशनखादीनां का
रणानीति चेत् किं ततः तावता वैलक्षण्यापरिहारात् वैलक्षण्यं हि अनौपाधिकभेदवत्त्वं अनौपाधिकत्वं च माति

योग्यवृत्तिधर्मावच्छिन्नान्नयोगिताकत्वं परस्परावृत्तिधर्मवत्त्वं यथाकथंचिद्भेदवत्त्वं वा स्यात् त्रिविधस्यापि
गोमयपुरुषादिषु वृश्चिकादिशरीरकेशनखलोमादिषु च सत्त्वात् तथाहि चेतनत्वेपि वृश्चिकपुरुषशरीरा
दिकं भोगायतनं भवति न गोमयकेशनखादिकमिति गोमयपुरुषादीनां रूपरसादिकमन्यदेवान्यदेवान्य
देव वृश्चिककेशनखलोमादीनामिति पारिणामिकस्वभावविभकर्षस्य दु नुपन्नत्वात् अत्यंतसारूप्ये च
प्रकृतिविकारभावस्यानुपपत्तेश्च विपक्षे बाधकस्य सत्त्वाच्च यद्वा हेतूक्तं विलक्षणत्वं अनौपाधिकभेदवत्त्वं
तत्प्रयोजकपरस्परावृत्तिधर्मवत्त्वं वा तत् च प्रकृतिविकारयोः परमतेपि द्रष्टव्यत इत्यर्थः इत्यं परेषां मतं तदे
वं महदादिषु कार्यत्वं प्रसाध्य सांप्रतं प्रकृत्यनुमाने विशेषमाह ॥ कार्यात् कारणानुमानं ॥ कार्यात् महत्तत्त्वादे
र्लिंगात् कारणानुमानं तत्साहित्यात् ॥ कारणानुमानं यदुक्तं तत् तादृग्व्यनिवृत्तये तत्साहित्यात् कार्यसाहि
त्येनैव कर्त्तव्यं तद्यथा महदादिकं स्वोपहितत्रिगुणात्मकवस्तूपादानकं कार्यत्वात् शिलामध्यस्थप्रतिमावत्
तैलादिवच्चेत्यर्थः प्रकृतेः कार्याद्वैलक्षण्यमाह अव्यक्तं त्रिगुणाल्लिंगात् त्रिगुणाल्लिंगात् महत्तत्त्वादिरूपात् कार्या
दपि मूलकारणमव्यक्तं सूक्ष्मं महत्तत्त्वस्य हि सुखादिगुणाः साक्षात् क्रियते प्रकृतेश्च गुणोपि न साक्षात् क्रियत इ
ति प्रधानं परमाव्यक्तं स्मारयति तत्कार्यतात्त्विर्कत्वेनापलापः सुगम इत्येवं रीत्या सांख्यसूत्रभाष्यपर्यालोचनायां
हि कार्यकारणयोरुक्तानौपाधिकभेदवत्त्वादिकं दुर्वारमेव अस्यां हि प्रक्रियायां तत्तत्कार्योपहितप्रकृतिजन्य

त्वं न त्वकार्याणामुक्तं यद्यवस्थांतरापन्ना प्रकृतिरेव कार्यं तदा कार्यात्प्राक् अभिव्यक्तकार्यावस्थावत्त्वो
पहितत्वाभावेनोक्तानुमानं बाधितं स्यात् नच यथाकथंचित्कार्यावस्थावत्त्वोपहितत्वं साध्यघटकमि
तिवाच्यं तथाप्यनभिव्यक्तकार्यावस्थावत्यां प्रकृतौ तादृशत्वोपहितत्वाभावेनोक्तदोषस्य दुर्वारत्वात् त्वोप
धानाविवक्षायां न तादृग्रूपस्य निवृत्तिरिति स्पष्टमेव अन्यथा कार्यात्कारणानुमानं तत्साहित्यादिति सूत्रभा
ष्यासंगतेः ननु यद्यतो विलक्षणं तन्न तदुपादानकमिति सामान्यव्याप्त्युपष्टम्भानुमानस्य व्यभिचारादिदोषदुष्ट
त्वेपि वियदादि न ब्रह्मप्रकृतिकं तदीययावत्स्वभावानुवृत्तिशून्यत्वात्तदीयस्वभावसामान्यशून्यत्वात्त
त्तादात्म्यशून्यत्वाद्वा अविद्यावदित्यनुमानानि निराबाधान्येवेति चेन्न ॥ परमतेप्युक्तरीत्याविकारे महदा
दौ यावत्स्वभावाननुवृत्त्या सर्वत्र प्रकृतिविकारभावोच्छेदप्रसंगेन तदीययावत्स्वभावाननुवृत्त्या तदनु
पादानकत्वस्य साधयितुमशक्यत्वात् सर्वत्र पक्षे सत्त्वभावस्य सिद्धांतिनाभ्युपगमात् द्वितीयानुमाने हेतो
रसिद्धत्वात् तृतीयानुमाने दृष्टांताभावः सर्वस्य सच्चिद्ब्रह्मतादात्म्याभ्युपगमात् अनादिभावत्वस्योपा
धित्वाच्च अधिकं भाष्यादाववगंतव्यं यत्तु चंद्रिकायां तृतीयं चायुक्तं गोमयादिवत् ब्रह्मणः प्रकृतत्वपक्षेनज
गद्रूपनाभावेन दृष्टांतोऽन्ययोगाच्चेति दूषणमुक्तं तदसदुपादानोपादेययोर्वैलक्षण्योपदर्शनमात्रेण
प्रकृतिसिद्ध्या गोमयादिदृष्टांतेन ब्रह्मत्वं तत्साहचर्यविरहस्याकिंचित्करत्वात् असदिति चेन्न प्रतिषेधमात्रत्वात्कार्यप्रा

रणयोरैक्योद्युत्पत्तेः प्राक्कारणसत्त्वेन तदभिन्नस्य कार्यस्यापि सत्त्वावश्यंभावात् ॥ सदेव कार्यमुत्पद्यत
इति वाक्यं वक्तुं वैलक्षण्येप्युपादानोपादेयभावः संभवतीति वदतात्वया अचेतनस्य जगतश्चेतनब्रह्मविलक्षण
त्वांगीकारात् वैलक्षण्यस्याभेदपरिपंथित्वात् जगद्ब्रह्मणोरैक्यायोगेनोत्पत्तेः प्राक्कारणसत्त्वेपि कार्यस
त्त्वस्य समर्थयितुमशक्यत्वात् उत्पत्तेः प्राक् असत्कार्यस्यासत्त्वं प्रसज्येत इष्टापत्तौ सत्कार्यहानिरितिचेत्
प्रतिषेधमात्रत्वात् त्वदुक्तवाक्यस्यार्थशून्यत्वेन प्रतिषेधवाक्यमात्रत्वात् नास्य किंचित्प्रतिषेध्यमस्तिन
ह्ययं प्रतिषेधः प्रागुत्पत्तेः कार्यस्य सत्त्वं प्रतिषेद्धुं शक्नोति तथाहि सत्कार्यवादो नाम प्राक्कारणात्मना परमा
र्थसतः कार्यस्योत्पत्तिरित्युत्पत्तेः प्राक् सूक्ष्मरूपेण वर्तमानमेव कार्यमुत्पद्यत इति वा वादः तत्राद्य पक्षस्ताव
त् निराबाध एव इदानीमिवोत्पत्तेः प्राक्कारणात्मना कार्यसत्त्वानपायात् नहीदानीं कारणात्मानमंतरेण का
र्यसत्तास्ति सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वेदेत्यादिश्रवणात् ननु प्राक्कारणात्मना परमार्थसत इत्यस्यो
त्पत्तेः प्राक्काले वर्तमानं यत् परमार्थसत्कारणं तदा[illegible]त्मन इत्येवार्थः अन्यथा कार्याभिन्नकारणतानुपप
पादानत्वानुपपत्तेस्तथा च विलक्षणयोः कथमभेद इति चेदाशयानवबोधात् नहि वयमुपादानोपादेययोः
ब्रह्मजडयोः स्वरूपैक्यं वदामः अपितूपादाने ब्रह्मणि कल्पितस्य विलक्षणप्रपंचस्य पारमार्थिकरूपं ब्रह्मैवेति ब्रह्म
व्यतिरेकेणासत्त्वं शुक्तिकायां कल्पितविलक्षणरजतस्य शुक्तिकाव्यतिरेकेणासत्त्वमिव तथा चोत्पत्तेः प्रागपि प्रपंचस्य

पारमार्थिकस्वरूपभूतं ब्रह्मास्तीत्येतावतासत्कार्यवादोक्तिरिति ॥ द्वितीयकल्पस्तु विस्तरेणोपपादयिष्यते श्रीमद्भगवत्प्रसादैस्तदनन्यत्वमारंभणशब्दादिभ्य इत्यत्रेति न किंचिदनुपपन्नमिति ॥ यत्तु चंद्रिकायामप्रास त्कारणमिति चेन्न तस्य प्रतिषेधमात्रत्वादित्यध्याहारनैरपेक्ष्येण हेतुसाध्ययोः सामानाधिकरण्येनान्वयः साक्षाद्ब्रह्मकारणत्वाक्षेपश्च तवतु असत्कारणं प्रसज्येतेति चेन्न ॥ सत्कार्यप्रतिषेधस्य प्रतिषेधमात्र त्वादित्यध्याहारेण वैय्यधिकरण्येन चान्वयः साक्षात्तदनाक्षेपश्चेति दूषणमुक्तं तत्तदीयरीत्या सूत्रव्याख्या न दूषणेन मदीयव्याख्यायामेव ॥ स्वारस्यस्य वक्ष्यमाणत्वाददूषणमेवेति विदुषां स्पष्टमेव ॥ अपीतौ तद्वत्प्रसंगादसमंजसं ॥ ननु नाशः कारणलय इति सांख्यसूत्रे कार्याणां कारणेनाविभाग एव लय इति प्रतिपादितं इष्टश्चायमर्थस्तवापि स्वाप्ययादिति सूत्रे अविभागस्यैवापीतिशब्दार्थतायास्त्वया स्वीकृ तत्वात् एवंचापीतौ प्रलये कार्येणाविभागमापन्नस्य ब्रह्मणः कार्यधर्मस्थौल्यसावयवत्वाचेतनत्वपरिच्छि न्नत्वाशुद्ध्यादिमत्वप्रसंगात् सर्वज्ञं ब्रह्म जगत्कारणमित्यौपनिषदं मतमसमंजसं योजनांतराणि भाष्ये द्रष्ट व्यानि न च कार्यस्याप्ययेतद्धर्माणामप्यप्ययात् कार्यधर्मसंसर्गापत्तिर्न ब्रह्मण्यापादयितुं शक्यत इति शं क्यं कार्यवदपीतानां तद्धर्माणां कारणे प्रसंजनस्य दुर्वारत्वात् ॥ न च तदानीं कार्यधर्माणामसत्वात् कथं तत्सं सर्गापादनं संभवतीति वाच्यं ॥ यतो धर्माणां शशशृंगवत्नात्यंतासत्वं किंत्वतीतावस्थापत्तिरेव एवंचातीता

वस्थापन्नतद्वृत्त्यापत्तिर्दुर्वारैव ॥ एवं वर्तमानावस्थापन्नायां अतीतावस्थायाः कार्यगतायाः ब्रह्मण्यापत्तिर्दु
र्वारैवेति ॥ यत्तु चन्द्रिकायां प्रलये ब्रह्मणः कार्यधर्मापत्तौ यदि कार्यनाशो हेतुः तर्हि कार्यनाशोऽस्तु तरां तद्धर्माणा
मप्यत्वेन ब्रह्मणस्तदापादानमयुक्तमिति दूषणमुक्तं तदसत् नाशः कारणलय इति सांख्यप्रवचनसूत्रे का-
र्याणां कारणेनाविभाग एव लय इति तस्यार्थवर्णितत्वेन तदनुसारेणोक्तशंकासंगतेः यदपि चन्द्रिकायां-
अभेदेन तदापत्तौ स्थितावपि तुल्यत्वेन सूत्रे अपीतावित्यस्य वैयर्थ्यमिति दूषणमुक्तं तदप्यसत् कारणेना-
विभागो लय इति पक्षे तादृशस्थितिकाले लयव्यवहारवारणाय तत्कालवृत्तेः अतीतावस्थापन्नकार्याविभागस्यैव
लयशब्दार्थतायां वक्तव्यत्वेनाविभागेन तद्धर्मापत्तौ स्थितिकाले तदसंभवेनापीतिग्रहणसार्थक्यात् ॥ समा
धत्ते न तु दृष्टान्तभावात् नैवास्मदीयदर्शने किंचिदसामञ्जस्यमस्ति यदुक्तं प्रलये कार्येणाविभागमापन्नस्य
ब्रह्मणः कार्यधर्मस्थौल्यासत्वप्रसंगादसमञ्जसमौपनिषदं दर्शनमिति तद्दूषणं दृष्टान्तभावात् ॥
संति हि दृष्टान्ताः कार्येणाविभागमापन्नानि कारणानि न कार्यधर्मैः संसृजन्तीति ॥ यथा शरावादयो
मृत्प्रकृतिकाः विकाराः विभागावस्थायामुच्चावचमध्यमप्रभेदाः सन्तः पुनः प्रकृतिमपिगच्छन्तो प्रकृत्या
विभागमापन्नाः नात्मीयेन धर्मेण कारणं दूषयन्तीति तत्त्वसक्षेतु न कश्चित् दृष्टान्तोऽस्ति अपीतिरेव न संभवेत्
यदि कारणे कार्यं स्वधर्मेणावतिष्ठेत विस्तरस्तु भाष्याद्बोद्धव्यः ॥ यत्तु चन्द्रिकायां विलक्षणयोरपि कार्यका

रणाभावे दृष्टांतं कथयता दृश्यतेत्विति सूत्रेणास्य पौनरुक्त्यं तेनैव कार्यवृश्चिकधर्माणां कारणे गोमये अनाप
त्तावपि दृष्टांतस्यैवोक्तत्वादिति दूषणमुक्तं तदसत् तत्र वृश्चिकादीनां स्थितिकाले कारणाद्विभक्ततयैवास्थि
तत्वेन परस्परधर्मसांकर्याभावनिदर्शनेपि अविभागदशायां तस्याप्रदर्शितत्वात् तत्प्रदर्शनायैतत्सूत्रप्र-
णयनायाससार्थक्यात् ॥ स्वपक्षदोषाच्च स्वपक्षेनैव प्रतिवादिनः साधारणा दोषाः कथमिति चेत् यन्नापदर्शि
तं विलक्षणत्वान्नेदं जगत् ब्रह्मप्रकृतिकमिति प्रधानप्रकृतिकतायामप्येतत् समानं शब्दादिहीनात् प्रधानात्
शब्दादिमतो जगत उत्पत्त्यभ्युपगमेन प्रधानं प्रति योगिकानौपाधिकभेदवत्त्वरूपप्रधानवैलक्षण्यस्य जग
ति परमतेपि सत्वात् अनौपाधिकत्वं च प्रतियोग्यवृत्ति धर्मावच्छिन्नानुयोगिताकत्वं स्वीकृतं चैतत् न विल
क्षणत्वादिति सूत्रयोजनायां परमतेअतीतानागतवर्तमानावस्थात्रययोगिनः कार्यस्यानित्यत्वेन तत्रोत्प
त्तिव्यवहारस्य न भावयोगश्चेन्नाभिव्यक्तिनिबंधनौ व्यवहाराव्यवहारावितिसांख्यप्रवचनोक्तरीत्या अभि
व्यक्त्यैवोपपादनीयत्वेनाभिव्यक्तेश्च पूर्वं सत्त्वे न सत्कार्यवादहानिः सांख्यस्यैव दोषः तथाहि अभिव्यक्तिः प्रा
क्कालीनवत् आद्ये कारणव्यापारवैयर्थ्यं द्वितीये च सतः कार्याभिलक्षणायाः असत्याः उत्पत्त्यभिव्यक्तेरभ्यु
पगमात् तत्रैव सत्कार्यवादभंगः न च कारणव्यापारात् प्राक् सर्वेषां कार्याणां सदसत्त्वोपगमेन नोक्तविक
ल्पावकाशः घटादिवदभिव्यक्तेरपि वर्तमानावस्थायाः प्रागसत्वेन तदसत्तानिवृत्त्यर्थं कारणव्यापारापे

क्षणात् ॥ अनागतावस्थायाः सत्कार्यसिद्धांतस्यादलेरेकस्यापि दर्शितत्वप्रभेदेन सदसत्त्वविरोधाभा
वाच्चेति वाच्यं एवमप्यभिव्यक्तेरप्यभिव्यक्तेर्वाच्यतया अनवस्थापत्तेरपरिहार्यत्वात् अनवस्थाभियैवा
भिव्यक्तेः प्रागसत्वस्य त्वयांगीकृतत्वाच्च ॥ तथा चोक्तं सांख्यप्रवचने उत्पत्तिवद्वादोषइति अत्र भाष्यं यथा
घटोत्पत्तेरुत्पत्तिः स्वरूपमेव वैशेषिकादिभिरसदुत्पत्तिवादिभिरिष्यते लाघवात् ॥ तथैवास्माभिरभिव्यक्ते
रभिव्यक्तिः स्वरूपमेवोच्यते लाघवात् ॥ असदुत्पत्ताविवाभिव्यक्तावपि नानवस्थेत्यर्थः अथैवमप्यभिव्य
क्तेरभिव्यक्त्यनंगीकारे करणव्यापारात् प्राकृतस्याः सत्वानुपपत्त्या सत्कार्यवादक्षतिरिति चेन्न अस्मिन्
पक्षे सत एवाभिव्यक्तिरित्येव सत्कार्यसिद्धांत इत्याशयात् अभिव्यक्तेश्चाभिव्यक्त्यभावेन तस्याः प्रागस
त्वेपि नासत्कार्यवादत्वापत्तेरिति ॥ न च ममतथैवासत्कार्यवादः तवतु सर्वकार्येष्विति वाच्यं ॥ एकत्र प्रस
क्तस्यासत्कार्यवादस्यासति बाधके अन्यत्रापि प्रसक्तेर्दुर्वारत्वाच्च ॥ ममपक्षे अनिर्वचनीयवादेनादोषाच्चेति
तथा परेणाप्यपीतो कारणस्य कार्येणाविभागाभ्युपगमात् कार्यधर्माणामतीतत्वादीनां प्रधाने प्रसंगः समान
एव अधिकं भाष्ये स्पष्टं ॥ यत्तु चंद्रिकायां जलाहरणाद्यसमर्थस्यापि मृन्मात्रस्य तत्समर्थघटं प्रतीवशाद्वादिहीं
नस्यापि प्रधानस्य शब्दादियुक्तजगत्प्रत्युपादानत्वसंभवेपि न चेतनस्याचेतनोपादानत्वं क्वाप्यदर्शनात्
निर्विकारत्वाच्चेति परेणात्वां प्रत्युक्तदोषस्य तत्पक्षेप्रभासे दोषसाधारण्यापादानमयुक्तमिति दूषणमुक्तं त

दप्यसत् ॥ उक्तरीत्या अनौपाधिकभेदवत्त्वरूपहेतोः प्रकृतिविकारभावविरोधित्वेऽस्मन्मतेऽपि तदापत्तिः ब्रह्म-
न जगदुपादानं चेतनत्वादित्यनुमानेन ब्रह्मणि जगदुपादानत्वनिरासे प्रधानं न शब्दवदुपादानं अशब्दत्वा
दित्यनुमानविरोधेन प्रधानस्यापि वियदाद्यकरणत्वापत्तिर्व्यभिचारदर्शनस्योभयत्र तुल्यत्वादिति समान
न्यायेन दोषसाम्यापादनस्य निरस्तप्रायत्वात् ॥ नहि शब्दशून्यं शब्दवत उपादानं दृष्टं क्वापि लोके यथाहि परम
ते प्रकृतिसंयोगमात्रेण पुरुषस्य न परिणामिता लक्षणो विकारः तथास्मन्मतेऽपि विषमसत्ताककार्यतादात्म्ये
न न विकारितेत्यभ्युपगमेन विवर्तोपादानत्वाभ्युपगमेन चोपादानत्वेऽपि न निर्विकारत्वविरोधः ॥ तर्काप्रतिष्ठा
नादन्यथानुमेयमिति चेदेवमप्यनिर्मोक्षप्रसंगः ॥ किंच न केवलं न तर्केण ब्रह्मणः श्रौतब्रह्मकारणत्वाप
ह्नवो युक्तः तर्काणां पुरुषोत्प्रेक्षामात्रनिबंधनत्वात् पुरुषबुद्धीनां वैचित्र्यात् तेषामप्रतिष्ठितत्वात् ॥ तथाचो
क्तं यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः अभियुक्ततरैरन्यैरन्यथैवोपपाद्यत इति सर्वज्ञत्वेनाभिमता-
नामपि कपिलकणादप्रभृतीनां परस्परविप्रतिपत्तिदर्शनाच्चाप्रतिष्ठितत्वं ॥ अथाप्रतिष्ठानशून्येनैव तर्केणा
नुमेयं नहि प्रतिष्ठितस्तर्को नास्तीति वक्तुं शक्यं अप्रतिष्ठानसाधकतर्कस्यापि तथात्वापत्त्याऽप्रसिद्धेः त
र्कमूलसकललौकिकवैदिकव्यवहारोच्छेदापत्तेश्च ॥ मनुरपि प्रत्यक्षमनुमानं च शास्त्रं च विविधागमं त्रयं
सुविदितं कार्यं धर्मशुद्धिमभीप्सता आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना यस्तर्केणानुसंधत्ते स धर्मं वेद

नेतरः इति ब्रुवन् एवं मन्यते सावद्यतर्कपरित्यागेन निरवद्यस्तर्कः प्रतिपत्तव्य इति चेत् ॥ एवमपि क्वचि
त्तर्कस्याप्रतिष्ठितत्वेपि अचिंत्ये अतिगंभीरे मोक्षायज्ञेयप्रकृतविषये तर्कस्याप्रतिष्ठानादनिर्मोक्ष एव अ
चिंत्याः खलु ये भावा न तांस्तर्केषु योजयेत् इति स्मृतेः अथवा एवमप्यनिर्मोक्षप्रसंगात् मुक्त्यभावप्रसंगा-
दित्यर्थः सम्यक्ज्ञानान्मोक्ष इति सर्वेषां मोक्षवादिनां संमतं सम्यक्ज्ञानं चैकरूपमेव वस्तुतंत्रत्वात् वस्तु-
नि च विकल्पाभावात् ॥ तन्नैवं सति सम्यक्ज्ञाने पुरुषाणां विप्रतिपत्तिरनुपपन्ना कपिलकणभुगाद्युक्त
तर्कज्ञानानां तु अन्योन्यविरोधात् प्रसिद्धा विप्रतिपत्तिरिति तर्कप्रभवसम्यक्ज्ञानाभावात् ॥ मुक्त्यभाव
प्रसंगोन्यथानुमानपक्षे दुर्वारः यद्वा पूर्वोक्तवैपरीत्येन पूर्वं हि श्रुत्याद्यनुग्रहरहितस्य तर्कसामान्यस्याप्र
तिष्ठितत्वमुक्तं ॥ नन्वेतद्युक्तं तर्कसामान्ये अप्रतिष्ठितत्वसाधकतर्कस्यापि श्रुत्यादिसहाय्यरहिततया
अप्रतिष्ठितत्वे सति तर्कसामान्ये अप्रतिष्ठितत्वासिद्धेः वेदार्थनिर्णायकन्यायानामपि वेदमूलकत्वेन प
स्छापत्त्या श्रुत्याद्यमूलकत्वेपि प्रतिष्ठितत्वस्यावश्यकत्वाच्च ॥ एवं च नोक्तन्यायेन विलक्षणत्वादितर्काणा
मप्रतिष्ठितत्वसिद्धिरित्यनुमेयमिति शंकाभागार्थः साक्षात् परंपरया वा श्रुतिप्रत्यक्षानुसारिण एव ॥ त
र्कस्याप्रतिष्ठितत्वं तर्काप्रतिष्ठितत्वलक्षणस्तर्कोपि श्रुत्यनुसार्येवान्यथा बाह्योक्ततर्केण श्रुत्यप्रामाण्यप्रसं
गात् ॥ एव वेदतात्पर्यनिर्णायकोपि तर्कः क्वचित् प्रत्यक्षानुगृहीतः क्वचित् श्रुत्यनुगृहीतः क्वचिच्च तदविरु

त्यन्यायविरुध्यंबाधाभवतीतिनाप्रयोजकइतितर्काणांप्रतिष्ठितत्वंपिपिवक्तुमशक्यत्वादितर्काणांतथात्वात्
यादप्रतिष्ठितत्वंदुर्वारमेवेति ॥ एवमप्यनिर्मोक्षप्रसंगइतिसिध्यांतमार्गार्थः ॥ यद्वालक्षणमिति ध्वनादिति
यद्यस्मात्विलक्षणंतत्तदुपादानकंनेतिसामान्यव्याप्तेर्यत्तत्पदार्थघटितत्वेनपक्षसपक्षसाधार-
ण्येनानुगतीकर्तुमशक्यतयासाध्यासाधकत्वादित्यर्थः दृष्टांतेहिघटेसुवर्णविलक्षणत्वंसुवर्णोपादान
कत्वाभावेप्रयोजकंवक्तव्यंनतत्क्षित्यादेर्ब्रह्मोपादानकत्वाभावेसाध्येहेतूकर्तुंशक्यतेअपितुब्रह्मविल
क्षणत्वं ॥ तथाचदृष्टांतदार्ष्टांतिकयोःसाध्यतावच्छेदकहेतुतावच्छेदकयोरैक्यालाभात्तदलाभेपक्षवृत्तिहे
तौव्याप्तिग्रहासंभवादनुमितिरसंभाविनैवशास्त्रयोनित्वसूत्रेश्रुतिसिद्धेसाध्येसंभवनाभावप्रयोजकत्वा
य यद्यद्धिस्तरार्थंशास्त्रंयस्मात्पुरुषविशेषात्संभवतिसततोप्यधिकतरज्ञानवानितिसामान्यव्याप्तेरुप
न्यासेपिस्वातंत्र्येणकंचिदप्यर्थंप्रतिसाधकत्वेनोपन्यासाभावान्नासंगतिः ॥ ननुदृष्टांतदार्ष्टांतिकयोः
साध्यतावच्छेदकहेतुतावच्छेदकयोरैक्याभावेनपक्षवृत्तिहेतौव्याप्तिग्रहाभावेपिप्रकृतहेतुसजातीयहेतौ
प्रकृतसाध्यसजातीयसाध्यनिरूपितव्याप्तिग्रहात्प्रकृतहेतोश्चपक्षधर्मताग्रहात्प्रकृतसाध्यानुमितिः
स्वीक्रियतेअविद्यादृष्टांतेनविशेषव्याप्तिरेवापेक्षितास्तुतत्रचनोक्तदोषप्रसक्तिरितिचेत् ॥ अन्यथानुमेय
मितिप्रकृतहेतुसजातीयहेतौप्रकृतसाध्यसजातीयसाध्यनिरूपितव्याप्त्यादिविशेषव्याप्त्याधाराअनुमेयमि

त्यर्थः ॥ एवमपि उक्तपक्षेपि अनिर्मोक्षप्रसंगात् ॥ अप्रयोजकत्वपरिहारार्थं तद्विलक्षणत्वं
ब्रह्मविलक्षणत्वं वा तदुपादानकत्वे ब्रह्मोपादानकत्वे वा न स्यादिति तर्कसूत्रसामान्यव्याप्त्यादेराश्रयणीय
तया पूर्वोक्तमेवाप्रतिष्ठितत्वं पुनरापद्येतेत्यर्थः यद्वा विलक्षणत्वहेतुर्नाप्रयोजकः निर्विकारत्वबोधकश्रुत्य
नुकूलत्वादित्यस्यानुमानस्य स्वप्नोपासिध्यादिना अप्रतिष्ठितत्वादनिर्मोक्ष इति योजना ॥ यत्तु चशब्दाप्रा
यान्नास्य हेत्वंतरत्वं युक्तं किं चान्यथानुमेयमित्यनेन तथाप्येकसूत्रतया स्वीकृतस्य तर्काप्रतिष्ठानादि-
त्यस्य मदीत्या अन्यथास्वपक्षदोषाच्चेत्यादिसूत्रोक्तात् वैपरीत्येनानुमेयं तर्काप्रतिष्ठानादित्येकवाक्यत
याश्रुतसाध्यान्वयेंशांकाविशेषत्वेन संभवति विलक्षणयोरपि कार्यकारणभावस्य न हानिः तर्कस्याप्रति
ष्ठितत्वात् ॥ इत्येवमध्याहृतसाध्यान्वयेन वाक्यं भित्वासिस्थांतशेषत्वोक्त्यन्वययोगः अनिर्मोक्षप्रतियोगिनो
नुषंगापत्तिश्च प्रसंगशब्दवैयर्थ्यं चेति चंद्रिकायां दूषणमुक्तं तदसत् चशब्दाभावेपि तत्समानार्थकापिश
ब्दसत्वेन हेत्वंतरत्वोपपत्तेः यद्यपि हेत्वंतरपरत्वे तत्प्रतिपादकभागस्य सूत्रांतरत्वमुचितं ॥ तथापि तर्का
प्रतिष्ठानादित्यंशस्यानिर्मोक्षप्रतियोगिसमर्पकतया उत्तरवाक्यैकवाक्यतापत्तीति सूचनाय सूत्रैक्या
नुसरणं ईक्षतेर्नाशब्दं गौणश्चेन्नात्मशब्दात् ॥ आनंदमयोभ्यासात् विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥
ज्ञेयत्वावचनाच्च वदतीति चेन्न प्राज्ञो हि प्रकरणात् इत्यादौ तु ईक्षणाभ्यासज्ञेयत्वादेरुत्तरवाक्यार्थप्र

विष्टतया पृथक्सूत्रत्वमादृतं ॥ अन्यथा शङ्कोक्तान्यत्वप्रतियोगितया अत्यंताव्यवहिततर्काप्रतिष्ठानस्य
न्वयसंभवे पूर्वसूत्रोक्तादिति पदाध्याहारेण व्यवहितस्य तत्प्रतियोगित्वेनान्वयोपगमस्य जघन्यत्वाच्च
किंच तर्कसामान्यस्यानुकूलतर्कशून्यतया आभासत्वरूपमप्रतिष्ठितत्वं नान्यथानुमेयत्वरूपसाध्यसाधकं
त्वस्यापि तर्कसामान्यांतर्गततया आभासत्वात् ॥ अन्यथा चासिद्धांत्यभिमततर्कस्याभासत्वासिद्ध्या ॥ अन्य
थानुमित्ययोगादिति तर्काप्रतिष्ठानादन्यथानुमेयमिति व्याहृतानुमानपरतयातवैव व्याख्यानमनुचितं
ममतु श्रुतिमत्यस्यान्यतरसाहाय्यरहितस्तर्क एव तर्कशब्देन गृह्यत इति न दोषः सिद्धांतसाधकहेत्वंतर-
त्वपरत्वे संभवति निरसनीयशंकांशोपलक्षणतयाप्यनुचितत्वाच्च ॥ उक्तरीत्या व्याहृत्याकांतहेतुपर-
त्वव्याख्यानमपेक्ष्य साध्यांतरान्वयं वाक्यभेदं अनिर्मोक्षप्रतियोगिनोऽनुषंगं च स्वीकृत्य सूत्रयोजनमेवोचि
तमिति स्पष्टमेव विदुषां प्रथमयद्वेत्यादिरीत्या द्वितीययद्वेत्यादिरीत्या च सूत्रयोजनायां मन्मते व्याहृति-
शंकाया एवाप्रसरः अनिर्मोक्षप्रसंगादित्यस्य श्रुत्यभावप्रसंगादित्यर्थपक्षे प्रसंगपदसार्थक्यमपि स्प
ष्टमेव ॥ यदपि चंद्रिकायां किं तर्कमात्रस्याप्रतिष्ठितत्वं किं वा श्रुत्याद्यननुगृहीतस्य नाद्यः तर्काप्रतिष्ठित
त्वसाधकतर्कस्याप्यप्रतिष्ठितत्वेन तर्काप्रतिष्ठानासिद्धेः मीमांसानारंभप्रसंगश्च मंतव्यश्च सोऽन्वेष्टव्यः
यस्तर्केणानुसंधत्ते इत्यादिश्रुतिस्मृतिविरोधाच्च न द्वितीयः ब्रह्मणोऽनुपादानत्वसाधकस्य वैलक्षण्यरूप

तर्कस्यानिर्विकारमिति श्रुत्यनुगृहीतत्वादिति दूषणमुक्तं तदतिशिथिलं उक्तरीत्या श्रुत्याद्यननुगृहीत
स्यैव तर्कस्य केवलेन तर्केणेति भाष्येणाप्रतिषिद्धत्वोक्तेर्विकल्पस्य स्वबुद्धिमात्रकल्पितत्वात् ॥ यदुक्तं वै
लक्षण्यनूपतर्कस्यानिर्विकारमिति श्रुत्यनुगृहीतत्वात् ॥ न तस्य केवलत्वं श्रुत्याद्यननुगृहीतत्वनूपमिति
तदप्यतिशिथिलं निर्विकारत्वस्योपादानताबोधकश्रुतिविरुद्धत्वात् विपक्षविकारित्वाप्रसक्त्या लक्ष्य-
निर्विकारमिति श्रुत्यनुकूल्यासिद्धेः अन्यथा यत्तर्कबलेन सतः कारणत्वसाधनं प्रसक्तं तद्धाधनं तदु
क्तं तर्कबलेन यत्साध्यते तं स्मादन्यथापि मतितर्केण साधयितुं शक्यत्वेन तर्कस्याप्रामाण्यात् ॥ नहिम
तितर्क एतावानेवैताहशं तर्कं मतिविरोधितयाप्रवर्तते नैताहशं मतिनियामकमस्तीति त्वदीयोक्तायायु
क्तेरप्यसदेवेदमग्र आसीदित्यादिश्रुत्यनुकूलत्वेन प्रयुक्तत्वानुपपत्तेः वस्तुगत्या श्रुत्यनुसारित्वाभाव
श्च विलक्षणत्वादेरपि तुल्य इति दिक् ॥ आनंदतीर्थीयास्तु श्रुत्यादिप्रामाण्याद्द्विषोर्जगत्कारणत्वं सि
ध्यतीत्युक्तं श्रुत्यादिप्रामाण्यस्य युक्तिविरोधे ब्रह्मणो न जगत्कारणत्वं सिध्यतीत्यसौ परिहरणीय एव
श्रुत्याद्येव विषयः प्रमाणं न वेति संदेहः वृष्टिकामः कारीर्या यजेतेत्यादिश्रुतेरप्रामाण्यं दुर्वारमेव कृतायाम
पि ।. कारीर्यां फलादर्शनेनान्वयव्यभिचारेण कारणताबाधेन कारणताशून्ये कारीर्यादौ कारणताबोध

धकत्वात् ॥ दृष्टार्थकफलसंवादशून्यार्थबोधकपाशुपतादिस्मृतिवत् एवं च वेदाद्येकदेशस्याप्रामाण्ये अ
न्यदेशप्रमाणतायामनाश्वासात् श्रुत्यादिनप्रमाणमिति न विष्णोर्जगत्कारणतासिद्धिरिति भावेनोक्त
श्रुत्यादेस्तथात्वं पाशुपतादिस्मृतिवदुक्तानुपलब्ध्यादिहेतुनाप्रामाण्यं कल्प्यं ॥ उक्तान्वयव्यभिचार-
स्याकारणत्वासाधकत्वात् ॥ यतोन्वयव्यभिचारो निर्णीतघटादिकारणताकेषु मृद्दंडादिष्वपि दृश्यते
स्वस्वव्यापारेतरयावत्कारणसत्वे कार्यानुत्पत्तिस्त्वासिद्धाव्याघातात् ॥ अधिकारादिरूपकारणांतराभा
वसंभवाच्च ॥ नन्वेवं फलविसंवादेन पाशुपतादीनामप्रामाण्योक्तिरसंगतास्यादिति वाच्यं ॥ तेषामनि
र्णीतप्रामाण्यकत्वेन कारणांतराभावाधीनविसंवादकल्पनायां बीजाभावात् ॥ नच वेदानामपि तथा
त्वं तेषां ततो नित्यत्वाख्यवैलक्षण्यात् ॥ नित्यत्वं च वाचाविरूपनित्ययेति श्रुतिसिद्धं ॥ नचानित्यत्वे अ
प्रामाण्यं वक्तृज्ञास्यं वाक्याप्रामाण्यस्य वक्तृदोषाधीनत्वात् ॥ नचात्माश्रयः यतो वाचाविरूपनित्ययेत्या
दिश्रुतिजन्यज्ञानस्य प्रामाण्यं साक्षिसिद्धं नापवादमंतराहातुं शक्यं तत्र प्रमाणांतरविरोधादिरपवाद
हेतुश्चात्र नोपलभ्यते ॥ तथा च सिद्धे प्रामाण्ये तन्निर्वाहाय फलविसंवादो वैगुण्याधीन इति युक्तं कल्पयि
तुं पाशुपतादिस्मृतेरप्रामाण्यानिश्चयात् ॥ न तत्र तत्कल्पना प्रकाराः पांचरात्रादिस्मृतीनां च वेदानुसा
रित्वान्नाप्रामाण्यमतो वेदादिभिर्विष्णोर्जगत्कारणतासिद्धिरस्त्विति सिद्धांत इति रीत्या सूत्रयोज

जनामाहुः तन्नेदं दूषणं चिंत्यं अस्मद्रीत्या पूर्वतंत्राद्युपपादितवेदप्रामाण्यमनाश्रित्यैव पूर्वपक्षसंभवे तदाक्षेपेण पूर्वपक्षप्रवर्तनस्यानुचितत्वात् ॥ किंच कपिलकणादसुगतपाशुपतादीनां वेदप्रामाण्याभ्युपगंतृत्वात् ॥ न तन्मतावलंबनेनेयमाशंका कापिलतंत्रे नाहुत श्रुतिविरोधो जातिपरत्वादित्यादिसूत्रैः श्रुतिव्याख्यानदर्शनात् ॥ तद्वचनादाम्नायस्य प्रामाण्यमिति वैशेषिकतंत्रे वेदप्रामाण्यस्य न्यायपंचाध्याय्यां कंठत एवोक्तेः एवमभ्यर्थितस्तैस्तु कृतवानस्मि संहितां ॥ वेदक्रियासमायुक्तां पुरा हि द्विजसत्तम ॥ सैव पाशुपते दीक्षायोगः पाशुपतं च सः ॥ इति पाशुपतागमोक्तेश्च ॥ कारणागमेऽपि पातीति पावेदस्तं खंडयतीति पाखंड इति निरुच्यस्य वेदाविरुद्धत्वात् पाखंडताऽऽइतरेषां तथात्वं चोक्तं ॥ अथ जैनबौद्धादिमतावलंबनेनायं पूर्वपक्ष इति चेन्न ॥ तथा सति तदनभिमतवेदनित्यत्वस्वतःप्रामाण्यादिनाऽसिद्धांतेन तत्प्रामाण्यसाधनानुपपत्तेः ॥ यत्तु वाचाविरूपनित्ययेत्यादिश्रुत्यर्थे विसंवादाभावाद्वेदप्रामाण्यसिद्धिरिति तन्न उत्पन्नो गकारो विनष्टो गकार इति प्रत्यक्षविसंवादस्य तत्रापि तुल्यत्वात् ॥ प्रत्यभिज्ञायाश्च बुद्धागमसाधारण्यात् ॥ आनुपूर्वीनित्यतायामप्येवं ॥ एतेन फलविसंवादेन पाशुपतादिस्मृतिवत् कारीर्यायजेतेत्याद्येकदेशाप्रामाण्यशंकायां नित्यत्वेन प्रामाण्यसाधनमपि निनिरस्तं ॥ कारीर्यादिस्थले फलविसंवादस्येव वाचाविरूपनित्ययेत्याद्येकदेशे प्रत्यक्षविसंवादस्य तुल्यत्वे

नतदुक्तनित्यत्वेनप्रामाण्यसाधनायोगात् ॥ यदपिनविलक्षणत्वादित्यादिप्रथमसूत्रानंतरंदृश्यते-
त्वितिसूत्रंपठित्वाअधिकारिणांफलंदृश्यतेअधिकारश्चफलयोग्यत्वंकर्मवैगुण्यप्रतिबंधराहित्यंया-
वत्कारणसंपत्तिर्वाइतितदर्थवर्णनंतदपिशिथिलंक्काचित्कफलदर्शनस्यकाकतालीयत्वशंकाकवलि-
तस्यवीत्थादिभिरप्यनिरासेनतद्धेत्व्यर्थ्यात् ॥ यदपिमृदब्रवीदित्यादिवेदवाक्यस्यमृन्नवदतिजडत्वा-
दित्यादियुक्तिविरुद्धार्थकत्वादप्रामाण्येस्थितेतत्सजातीयवेदमात्रेअनाश्वासप्रसंगान्नोक्तसमन्वय
इतिप्रासेप्रवेदेतत् ॥ यदिमृदाद्येवोच्येतनैतदस्तिमृदाद्यभिमानिन्योदेवताएवतत्रमृदादिशब्दैर्व्यपदि-
श्यंते ॥ ननुताअभिमन्यमानव्यापिन्यः किंवातदेकदेशवर्तिन्यः आद्येपिविग्रहवत्त्वेनवानप्रथमेप्रथम
उपलंभप्रसंगात्नद्वितीयः वचनाद्ययोगात्नांत्यः तद्रहितदेशावद्देशांतरावस्थानोपपत्तौतद्धेत्व्यर्थ्यमि-
तिचेदस्त्येवतासांसर्वत्रानुगतिर्विग्रहश्च ॥ नचदर्शनप्रसंगः सर्वगतानांविग्रहवतीनामपितासामि-
तरेभ्योविशेषसामर्थ्येनादर्शनसंभवात् इत्यभिमानिसूत्रार्थः नन्वप्रामाणिकदेवताकल्पनात् ॥
तासांचविशिष्टसामर्थ्यकल्पनाच्च वरंवेदाप्रामाण्यंलाघवात् ॥ नचवेदेनतत्सिद्धिः तत्प्रामाण्येविवा-
दात् ॥ इत्याशंकांपरिहरतिदृश्यतेच ॥ आभिमानिदेवतानांतत्सामर्थ्यस्यचमहद्भिर्दृश्यमानत्वादिति
दृश्यतेचेतिद्वितीयसूत्रार्थइतितदप्यसत् ॥ अत्रापिकपिलकणभुगादिमतावलंबनेनपूर्वपक्षायोग

पमहत्त्वं कृ देवतादर्शनरूपसिद्धांतयुक्तेरवेदवाद्यनभिमतत्वेन तान्प्रत्येतादृशासिद्धांतोपपाद
युक्तिप्रदर्शनायोगस्य च तुल्यत्वात् ॥ न च श्रुतिस्मृत्याद्यलौकिकप्रमाणमंतरेणाभिमानिदेवतानां प्र
पुरुषप्रत्यक्षगोचरतासिध्यति प्रत्युत वेदप्रामाण्यमनपह्नुवानैर्वाभिमानिसूत्रप्रवृत्तेर्नानुपपत्तिः काचि
दपि ॥ यदपि असदेवेदमग्र आसीत्ततः सदजायत इत्यादिना असतः कारणत्वोक्तेर्विरोध इत्यतो वक्ति असं
दिति नेदं प्रतिषेधमात्रत्वादिति जगत्कारणत्वं विषयः तत् विष्णोर्युक्तमयुक्तं वेति संदेहः श्रुतिविगा
नं संदेहबीजं तत्र न विष्णोर्जगत्कारणत्वं युक्तं तत्र प्रमाणाभावात् ॥ न च यतो वेत्यादिश्रुतिः प्रमाणं अ
सदेवेदमग्र आसीदित्यादिश्रुत्या असतोपि कारणत्वोक्तेः द्वयोः श्रुतित्वाविशेषेपि असत्कारणताबोध
कश्रुतेः कारणं प्रलये असत् भवितुमर्हति वस्तुत्वात् ॥ कार्यवत् विमता भावाः प्रलयेऽसंतः भावत्वा
त् संमतवत् इति तत्त्वप्रकाशिकाचंद्रिकायुक्तानुमानरूपयुक्तिसहितत्वेन प्रबलत्वात् ॥ असदेव
कारणमिति ॥ पूर्वपक्षे सिद्धांतः युक्तमेव विष्णोः जगत्कारणत्वं न त्वसतः तस्याभावधर्मत्वान्नामंत
रेणास्वरूपत्वप्रतिषेधबुद्ध्यविषयत्वात् ॥ असतः कारणत्वादियुक्तिविरुद्धं वेदवाक्यमित्येतदत्र
निषिध्यते सर्वशब्दानां ब्रह्मणि समन्वयेपि तदधीनत्वादर्थवदित्यादिना मुख्यस्य वामुख्यस्यापि वा
च्यत्वांगीकारादसतः प्राप्तिः तथा श्रुतिप्रामाण्येपासन्नतं निषिध्यते समयस्यो परिनिषेधादर्थायुक्ति

विरोधान्निराक्रियत इति आनंदतीर्थीयानामसदितिचेन्न प्रतिषेधमात्रत्वादिति सूत्रयोजनं तत्रेदंवि
त्यकारणतायाः कालसंबंधितानियतत्वेनासतः कारणत्वशंकाया अयुक्तत्वात्॥ अथात्रासत्पदं प्रा
गभावपरं तथैव व्यासतीर्थानां चंद्रिकायां व्याख्यानदर्शनात्॥ उक्तं च चंद्रिकायां अत्रासच्छब्दः सत्
प्रत्ययस्यासदभवनमिति छांदसेन भावसाधनत्वेनासदसत्त्वमिति भावप्रधानत्वेन वा अभावपर इति
॥ तथा प्रागभावस्यैव कर्तृत्वमिति पूर्वपक्ष एव तत्संमतः तथाहि चंद्रिकायां अत्र विष्णोर्जगत्कर्तृत्वं श्रु
तिविरुद्धमुत नेति चिंता तदर्थं विश्वप्रागभावः किं विश्वकर्ता उत नेति तदर्थं प्रागभावस्य कर्तृत्वसाधि
का वक्ष्यमाणा युक्तिः श्रुतिसंवादिनी उत नेति तदर्थं असद्वा इदमग्र आसीदिति तदसदेव सन्मनोऽकु
रुतेति श्रुतिः किं प्रागभावस्य संकल्पप्रतिपादिका उतान्यस्येति पूर्वपक्षस्तु विश्वप्रागभावस्तावत्
विश्वहेतुः घटं प्रति घटप्रागभावस्येवानन्यथासिद्धनियतपूर्ववृत्तित्वात्॥ अन्यथोत्पन्नो घटः पुनरुत्प
द्येत प्रागभावस्याहेतुत्वे च पाकजरूपरसादीनां भेदो न स्यात् प्रागभावादन्यस्य कारणस्य तत्राभेदात्॥
श्रूयते चासद्वा इदमग्र आसीदिति प्रागभावस्य हेतुत्वं न त्वत्रासच्छब्दः शून्यपरः असतो नियतप्राक्सत्त्व
रूपहेतुतायोगात्॥ आसीदिति सत्त्वोक्तिविरोधाच्च॥ एवं च सिद्धे प्रागभावस्य हेतुत्वे प्रागभावांतरेऽप्र
दृष्टमपि विश्वप्रागभावस्य कर्तृत्वं दृश्यते चाचेतनेऽपि कर्तरि विहिततृतीयादिः तदसन्मनोऽकुरुतेति श्रुतौ

असत्शब्दार्थस्यविरहप्रागभावस्यज्ञानेच्छाद्युक्तेश्च शब्दगम्योर्थः यथाशब्दमंगीकार्यइतिप्रागभाव
स्यैवकर्तृत्वमस्ति तिचेन्न श्रौतासत्पदस्वारस्यहानापत्तेश्च कल्पे एतेन सर्वेव्याख्याताइतिप्रथमा
ध्यायांत्यधिकरणोक्तेनतदधीनत्वादर्थवदितिप्रवृत्तिनिमित्ततादधीन्यन्यायेनयतोवाइमानिभूता
निजायंतइत्याद्यनेकश्रुत्यैकवाक्यत्वाययथाकथंचित्प्रतीयमानार्थपरत्वमतिप्रसंगापादकंपरि
त्यज्यतत्तदस्यब्रह्मपरतायाएवोचितत्वेनश्रुत्याप्रागभावकर्तृतायाअप्रासेः पूर्वपक्षेब्रह्मकारण-
त्वाभिधायिबहुश्रुतिविरुद्धमसत्कारणत्वं स्फुटः श्रुत्यर्थः स्यात् ननुकथंश्रौतासत्पदस्वारस्यहानिः
पूर्वपक्षइतिचेत् असत्शब्दस्यप्रागभावेरूढ्याप्रयोगाभावेनप्रागभाववादिभिर्वैशेषिकादिभिरपित
स्यतेनशब्देनव्यवह्रियमाणत्वाभावेननासतोदृष्टत्वादित्यादौसूत्रकृताशून्यस्यैवतन्मतरीत्यातेनश
ब्देनग्रहणेननसदसदितिश्रुत्यासद्भिन्नत्वेनभावभिन्नत्वपर्यवसितेनतस्यप्रागभाववाचित्वसं
भावनायामपिप्रमासत्त्वाद्राहः सत्सत्त्वग्प्रसदभवनमितिछांदसभावसाधनत्वेनासदसत्त्वमितिभा
वप्रधानत्वेनवाअभावपरइतिप्रागभावस्यैवकर्तृत्वमितिनिप्रयासेनतस्यप्रागभावार्थकत्वंवर्णयतः-
त्वत्पूर्वपक्षिणस्तथाप्रयासवैफल्यापत्त्यातस्यतथाप्रागभाववाचितायाअनभिमतत्वेनप्रागभावस्या
भिधेयत्वेनभावधर्मात्मनःभावभिन्नत्वेसत्यभावत्वपर्यवसितंप्रतिषेधमात्रत्वमसित्वमितिहेतुस्व

पाधिवेचनायां ॥ त्वदुक्तरीत्या प्रागभावस्य सद्भिन्नत्वासंभवेन कथंचित्संभवेन ॥ नन्वसौ
घटस्य प्रतिषेधमात्रस्यापि संभवेन स्वरूपासिध्यभावात् तन्निराकरणाय भावधर्मात्मना मंतरेण
त्यादिहेतुस्वरूपनिर्वचनप्रयासवैफल्येन प्रासत् शब्दस्य प्रागभावार्थतायामस्वारस्यमित्यवेहि ॥
प्रागभावसत्वे प्रमाणाभावान्न प्रसुत्यातत्कर्तृत्वाभासिः नच घटोत्पत्त्यनंतरं घटस्य प्रागभावोनासीदिति-
प्रतीतिरेव तत्सत्वे प्रमाणमिति वाच्यं उत्पत्त्यनंतरं प्रागभावस्यासत्वेनोत्पत्तेः पूर्वं घटस्यैवासत्वेनास्तु
घटे प्रागभावेन वा संबंधानिरूपणात् प्रागभावस्य घटे चेत्त्वासिध्येः प्रतियोग्यनुयोगिभाव एव संबंध इत्युक्ते
पि न तस्य स्वरूपसंबंधविशेषरूपत्वेन प्रत्येकस्वरूपत्वेन संयोगादिवत् संबंधत्वासंप्रतिपत्तेः प्रतीतिप्रा
माण्यस्य वस्तुसाधकत्वात् प्रतियोग्यनुयोगिभावस्य केनचित्संबंधेन संबद्धस्यैव संबंधतोत्तासंबद्धस्य
दिविकल्पग्रस्तत्वात् घटात्यंताभावविषयकत्वेन तादृशप्रतीत्युपपत्तेश्च न चोत्पत्तेः पूर्वं मृदादौ घटादेः
प्रागभाव एव नात्यंताभावः अन्यथा असत्कार्यवादे शशविषाणस्यापि कारकव्यापाराद्दुत्पत्त्यापत्तेरिति
दृशप्रतीतेः प्रागभावविषयकत्वमेव नात्यंताभावविषयकत्वमिति वाच्यं उत्पत्तेः पूर्वमसत्वाविशे
षेउक्तविशेषस्यासिद्धेस्तन्मते शशविषाणोत्पत्तेरापादनीयत्वात् उत्पन्नोपि घटः पुनरुत्पद्येत पाकज
रूपरसादीनां भेदप्रसंगः स्याद्यदि प्रागभावस्य न हेतुत्वं प्रागभावादन्यस्य कारणस्य तत्राभेदादिति पूर्वप-

क्षेचं द्विकोक्तं तु न सत् घटं प्रति घटस्य प्रतिबंधकत्वेन कुसुमदत्यंताभावस्य कारणत्वकल्पने चैवोत्प
न्नघटोत्पत्तेरापादनायोगात् घटोत्पत्तेः पूर्वमत्यंताभावसत्त्वमुपपादितमेव ॥ एका सामग्री एकमेव का
र्यं जनयतीति स्वभावकल्पनात् धर्मिकल्पनातो धर्मकल्पनायां लाघवाच्च लघुत्वेश्वरतत्कर्तृत्वकल्पनापे
क्षया कॢप्तप्रागभावस्य हेतुत्वमित्यनेनोक्तं लाघवस्य त्वयोक्तत्वाच्च न तदापत्तिः तत्क्षणाहत्यादिरू
पकारणाभावेन सामग्र्यभावाच्च न तदापत्तिः न वा प्रागभावादन्यस्य कारणस्याभेदात् पाकजरूपर
सादीनामभेदापत्तिः विजातीयरूपरसत्वाद्यवच्छिन्नं प्रति एकजातीयाग्निसंयोगरूपपाकस्य हेतु
त्वमिति कार्यकारणभावानुरोधेनैव तद्भेदसिद्धेः तद्विरोधेन प्रत्यक्षविरोधेन च तदैक्यापादानस्या
संभवात् ॥ किं चोत्पन्नो घटः पुनरुत्पद्येतेत्युत्पन्नस्योत्पत्तिरापाद्यमानाप्रसिद्धत्वादापादयितुमश
क्यात् तदापादकतत्कारणाकॢप्तेः अन्यथा शशविषाणादीनामप्युत्पत्त्यापत्तिः स्यात् कथं वा प्रत्यक्ष
तोगृहीतभेदानां रूपरसादीनां रूपं रसः स्यादित्यापादानं संभवति रूपे रसत्वाभावादेव तदापत्त्य
योगादित्यलं ॥ अस्तु वोत्पन्नस्य घटस्य पुनरुत्पत्तिनिवारणानुरोधेन प्रागभावसिद्धिस्तथापि तस्य तत्त-
द्व्यक्तिप्रतियोगिकस्यैव सिद्धेः विश्वत्वावच्छिन्नप्रतियोगिताकस्यातिरिक्तप्रागभावस्यासिद्धेस्तत्र
प्रमाणाभावात् ध्वंसप्रागभावयोः सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वमनंगीकुर्वाणैस्तार्किकैरनं

गीकाराच्च तदंगीकुर्वद्भिरपि नहि तयोः सामान्याभावत्वमतेपि एकविशेषप्रागभावविशेषांतरध्वंस
यत्वापि समये सामान्यावच्छिन्नप्रतियोगिताकध्वंसप्रागभावयोः संभवइति दीधितिकारोक्तदिशाता
दृशध्वंसस्य महाप्रलयएव संभवेन चरमध्वंसस्यैवाद्यप्रागभावस्थैवतयात्वस्वीकारावश्यकतया आद्यप्रा
गभावएव तथावाच्यः तथाच सति आद्यकार्यमुत्पाद्य नष्टस्य तस्य द्वितीयादिकार्यकर्तृतायाअसंभवेन
कथं तस्य विश्वकर्तृत्वशंका युज्यते आद्यकार्यप्रागभावस्यैव तत्तत्कार्यानुकूलनानाशक्तिकल्पनायां
मानाभावदोषइतिचेत् प्रागभावव्यतिरिक्तशक्तेः प्रत्ययेसर्वभावासत्वंभावत्वहेतुना समर्थयतात्वत्पूर्वपक्षि
णाप्यनुकूलमशक्यत्वात् शक्तेः प्रागभावस्वरूपत्वेच तस्यास्तन्नाशेन नाशावश्यंभावादुक्तदोषानुद्धारात्
॥ किंच प्रागभाववादिना वैशेषिकादिना शक्तिपदार्थस्यातिरिक्तस्यानंगीकारात् ॥ तत्स्वीकारेउत्त
रोत्तरः पुनरुक्तदोषतप्रागभावस्याहेतुत्वेच पाकजरूपरसादीनांभेदोनस्यात् प्रागभावादन्यस्य कार
णस्य तदाभेदादिति प्रागभावस्य कार्यहेतुत्वसाधकयुक्तेः पूर्वपक्षसमर्थनावसरेउक्तायाअसंभवाप-
त्तेः शक्तिपदार्थस्वीकारेउत्पन्नघटानुकूलशक्तेः तदुत्पत्त्यानाशेन पुनस्तदुत्पत्तेरापादयितुमशक्यत्वा
त् पाकजरूपरसादीनां कारणीभूतशक्तीनांभेदात्तेषांभेदोपपत्तेश्च शक्तिपदार्थस्वीकारे प्रागभावसिद्धे
रेवदुर्घटत्वात् नचयावत्कार्यप्रतियोगिक एकएव प्रागभावस्तद्गतं तत्तत्प्रतियोगिकत्वं तत्तत्कार्योत्प

त्यानश्यतीति पूर्वपक्ष्याशयइति केषांचिदुक्तिः सुघटा तस्मात्तत्तत्प्रागभावएवतत्कार्यहेतुरिति सुधी
कः पूर्वपक्षनिगमनोक्तिविरोधात् एकस्मिन्प्रागभावे तत्तत्कार्यनाशयतत्तत्कार्यप्रतियोगिकत्वस्वी-
कृत्य तस्य हेतुत्वेऽपि विनिगमनाविरहेण सर्वेष्वपि प्रागभावेषु तथात्वं कर्तुं शक्यत्वेन लघुगौरवानवकर्तृ
त्वकल्पनापेक्षया प्रागभावहेतुत्वं कल्पनमिति पूर्वपक्षेऽचेदुक्तिविरोधाच्च तदभिमतैतादृशाभाव
स्याद्युसत्वाच्च तत्तत्प्रतियोगिकत्वस्य प्रागभावातिरिक्तस्य भावरूपस्य भवद्भये सर्वभावासत्वंसमर्थ -
यताक्वत्पूर्वपक्षिणावक्तुमशक्यत्वनया प्रागभावात्मकत्वरूपसंबंधविशेषस्यतस्यैवकार्यमुत्पाद्यान्य
कार्योत्पत्त्यर्थंस्थितस्य प्रागभावस्यास्थितौ नाशासंभवेनोत्पन्नस्य पुनरुत्पादापत्तेर्दुर्वारत्वाच्च नचतत्त
त्कार्यमतितत्प्रागभावस्य कर्तृत्वमित्यत्रापि नाथार्थोविवक्षितस्तावतैवविश्वकर्तृत्वव्यपदेशइतिय
त्त्यं तथासत्यपि असद्वाइदमग्रआसीत्तदसदेवसन्मनोऽकुरुतेति श्रुतिः किंप्रागभावस्य संकल्पप्रति
पादिकाउतान्यपरेतिव्यासतीर्थानां तदर्थसंशयप्रदर्शनासंगतेः संकल्पोहि प्रागभावस्यकार्यतेने
वचनरेन प्रागभावेन कार्यांतरजननासंभवात् किंचकार्यमात्रस्यसकर्तृकत्ववत्सोपादानकत्व
स्यापि अनुभवसिद्धत्वात् युक्तिसिद्धत्वाच्च प्रलयकाले भावमात्रासत्वंसमर्थयता पूर्वपक्षिणा आद्य
कार्यमतिउपादानप्रागभावएवेति वक्तव्यं तथासति उपादानकारणस्य संकल्पोत्तरकालीनकार्ये

अन्वयस्यावश्यंवाच्यत्वेन च प्रागभावम यदा सृष्ट्यप्रवर्तमानस्य तस्य प्रागभावत्वोक्तिरत्वं नासंव
त्वैव किंच प्रागभावस्य प्रतियोगिसमानदेशत्वं तन्मांतरसिद्धं सृष्टिपूर्वकालीनो विश्वकर्तृत्वेन त्वत्पूर्व
पक्षाभिमतो विश्वप्रागभावो दुर्घटं तेन प्रलये भावमात्रासत्त्वसमर्थनात् ॥ तथा च कुसुमप्रागभाव प्र
यदातिलंघनेन पूर्वपक्षो निनरामयुक्त एव प्रभूयते चेत्यादि दृश्यते चाचेतनेकर्तरि विहित तृतीयादिरिति
प्रागभावस्य मुख्यार्थे गौणकर्तृतामादाय पूर्वपक्षः विष्णोर्मुख्यकर्तृतासिद्धांताविरुद्धश्च अहैतरी
त्यानविलक्षणत्वादित्यधिकरणे ब्रह्मणः जगद्विलक्षणत्वादनुपादानत्वपूर्वपक्षं केवलोपादानस्य
कार्यसालक्षण्यनियमेपि तन्मते तंतूनमत्पूर्णनाभ्यादेरिव जगत्प्रति ब्रह्म वैलक्षण्येपि सिद्धांत्य
भिमतस्य निमित्तत्वे सत्युपादानत्वस्य संभवेन पूर्वपक्षसिद्धांताविरुद्ध इति दूषयता त्वया कर्तुमशक्य-
एवतदसन्मनोकुरुतेत्यादिशाङ्करग्रन्थोर्थो यथाशाङ्करंगीकार्य इत्यनेन ज्ञानेच्छादिमत्त्वरूपमुख्यकर्तृत्वमादाय पू
पक्षोपि असत्त्वाहुस्य प्रागभावास्य रसततया तदर्थत्वानिराकरणेनानिरस्तं भाय एव नोन्मज्जनमर्हतीति प्र
पिच विमताभावाः प्रलये असंतः भावत्वात् संमतवदिति प्रलये भावमात्रासत्त्वसमर्थनेनेशकारण-
ताप्रतिक्षेपसिद्धेः आवश्यकता दृश्य युक्तिविरोधपरिहारमात्रपरत्वे संभवत्येवं ताद्दशरीत्यैतत्सूत्र
स्याङ्गीकृतस्य प्रागभावस्य वा सर्वथा असंभावितं विश्वकर्तृत्वं दुराग्रहतयैव पूर्वपक्षाभिमेततयात्व

योपपद्यर्णनीयं नत्वायुक्तं ॥ न च मृत्युपसर्जनयुक्तिपरिहारस्यैतदधिकरणोपाधेर्यदभिमतस्य निर्वाहार्थं
युक्तौ श्रुतिसंवादित्वस्यावश्यं वाच्यतया प्रकृतानुपयुक्तमपि प्रागभावस्य कर्तृत्वं पूर्वपक्ष्यभिमतं तया
अद्वैतं उक्तं च चन्द्रिकायां मृत्युपसर्जनप्रागभावकर्तृत्वसाधकयुक्तिविरोधेन निरस्यते न तु समयप्रास
मसत्कारणत्वं तस्य हि तृतीये निरसिष्यमाणत्वात् नापि श्रुतिमात्रप्राप्तं तस्य तृतीय एव संगतेः नापि यु
क्त्युपसर्जनकश्रुतिप्राप्तं तस्य चतुर्थ एव संगतेः नापि समप्रधानश्रुतियुक्तिभ्यां प्राप्तं तस्य तृतीयेपि संग
तेः नापि युक्तिमात्रप्राप्तं पूर्वाधिकरणोक्तयुक्तिविरोधेन निरस्तेरिह युक्तिमात्रेण पूर्वपक्षानुदयादितीति
वाच्यं प्रलये सर्वभावासत्वसाधकयुक्तेः श्रुतिमूलकत्वासिद्धेः न च प्रागभावकर्तृताबोधकश्रुतिरेव स्वार्थ
सिद्ध्यर्थं प्रलये सर्वभावासत्वमाक्षिपतीति वक्तुं युक्तं प्रलये भावान्तरसत्वेपि प्रागभावकर्तृताया उपपद्य
मानतया तदर्थयुक्त्याक्षेपायोगात् असद्वा इदस्य प्रागभावे स्वसाभावेन यतो वेत्यादिश्रुतिविरोधेन प्रा
गभावस्यासद्वाक्यार्थत्वाभावस्योक्तत्वाच्च किं च प्रागभावस्य कर्तृता पूर्वपक्षः तत्प्रकाशिकाविरुद्धः त
स्यां हि नन्वस्त्वेवमसतः प्राप्तिस्तथापि समयोऽत्र निराक्रियत इति किं न स्यादिति शंकया श्रुतिमात्रमेवे
ति भाष्यमवतार्य शून्यस्योपरितनपादे निराकरिष्यमाणत्वात् अत्र श्रुतिमात्रमेवासन्मतं निषिध्यत
इत्यंगीकार्यमन्यथा पौनरुक्त्यापातादिति भाव इति भाष्यतात्पर्योक्तेः न च शून्यवादिनां प्रागभाव

स्यहेतुत्वमुच्यते येनात्र भागभावकारणतानिर्णा[illegible] ॥ [illegible]
समयाभावात् अत्रापि मून्यनिराकरणे अर्थोऽपि [illegible]
भावप्रवर्णनं तत्स्वोक्तिविरोधात् सु धोक्तिविरोधात्[illegible] ॥ तथाहि स्मृत्यधिकरणे [illegible]
रिहारात्मके पादे स्मृत्यधिकरणानिवेशामाक्षि[illegible] श्रुत्यादि स्मृती[illegible]
केयं संमतित्वेन श्रुतिसुक्तिकथनेन च तूरूपत्वात् तदविरोधस्यै[illegible]
अनंतभाष्येऽपि अविरोधाध्यायांतर्भावेन क्वाचित्[illegible] इत्यभावा[illegible]
बलवत्पाच प्रथमं निरसनीयत्वाद्यादावेव निवे[illegible] स्मृ[illegible]
इत्यादिस्मृतीनां ग्रहणं तन्मतरीत्या पूर्वपक्षाणां[illegible]
सकलजगज्जन्मादिकारणत्वादिकं तदयुक्तं[illegible]
धिकरणे पूर्वपक्षे सुधोक्तेश्च ॥ सुधायां च युक्ति[illegible]
र्तव्यः असंगतत्वात् कर्तव्यतायाश्चाभावस्य कृत[illegible]
पाशुपतादिस्मृतयो हि स्वसमासाभिमतपाश्च[illegible]
यंत्यो युक्तिसमयादिविरोधिवत्तु द्वयरूपाः तत[illegible]

पादचतुष्टयसंघातोऽध्यायंनतिरूक्ष्यैकस्मैपादेतर्भवतितत्तोऽध्यायादौतदंतेवावक्तव्यःप्रथमातिक्रमेचन्न
किंचित्कारणमितिआद्याधिकरणेनिरूप्यतइत्युक्तंतथान्यदपिचातुर्विध्यंवक्तीतिप्रत्येकंचतुरात्म
काइतिमूलमवतार्यतदेवव्याख्यातंचत्वारोपिपादाःप्रत्येकंचतुरात्मकाःपादचतुष्टयार्थवंतोऽदृष्टव्यःत
द्यथायुक्तिविरोधपरिहारलक्षणोऽप्ययंपादःसमयादित्रयविरोधपरिहारात्मकोपिभवतितथासमय-
विरोधपरिहारात्मकोपिद्वितीयोयुक्त्यादित्रयविरोधपरिहारात्मकोभवतीत्यादिपादइत्येवोक्तंसन्नि
हितत्वादेतदध्यायगताएवेतिज्ञायतेतदर्थंसर्वइत्युक्तंसर्वाध्यायसंबंधिनोपीत्यर्थःयोयदध्यायग
तःपादःसतदध्यायगतपादचतुष्टयार्थवानित्यवधेयःनकेवलमेवपादाःकिंतुतदंशाश्चतेपादांशा
येषांतेतदंशाअध्यायाइत्यर्थःप्रथमाध्यायःसमन्वयस्यैवाविरोधादित्रयस्यापिप्रतिपादकोभवति-
पादानांचतुरात्मकत्वेअधिकरणानांतथात्वंसिद्धमेवनचैवमध्यायादिभेदानुपपत्तिःपौनरुक्त्यदो
षश्चेतिवाच्यंविवक्षाभेदेनसामंजस्यात्यदाप्रथमःसमन्वयार्थःविवक्ष्यतेनतदेतरार्थतेतरेषामपि-
त्यादितथाचासदधिकरणेनिरसनीयस्यप्रागभावस्यसमयप्राप्तत्वाभावेतदधिकरणस्यतद्दृष्टिता
धिकरणसमुदायात्मकस्यपादस्यचचतूरूपत्वाद्यनुपपत्तेस्तस्यश्रुतिप्राप्तस्यापिसमयप्राप्तत्वस्या
वश्यकत्वात् एवंप्रागभावकर्तृतापूर्वपक्षपक्षःत्वदीयभाष्यविरुद्धःतन्नहिअत्रश्रुतिप्राप्तमेवासन्मतं

निराकरणे समयस्योपरिनिषेधादित्युक्तं ॥ यदि च प्रागभावप्रापकसमयाभावः तदा श्रुतिभासमेवे-
त्यत्र एवकारवैयर्थ्यं शून्यनिराकरणपक्षे तु तस्य श्रुतिसमयोभयभासत्वात् समयभासत्वव्यावृत्त्यर्थ-
मत्र श्रुतिभासत्वेनैव निषेधः नतु समयभासत्वेनोपरितथा निषेधादित्यर्थे एवकारसार्थक्यं अत एव शून्य-
स्योपरिनिषेधादित्यनुक्त्वा समयस्योपरिनिषेधादिति धर्मैक्येऽपि धर्मभेदेनैव परिहार उक्तः एवमसद्वा इ-
दमग्र आसीदिति श्रौतासत्तदस्य प्रागभावार्थकत्वेन तस्य श्रुतिभासत्वोपपादने एतेन सर्वे व्याख्याता इ-
त्यधिकरणतत्त्वप्रकाशिकाविरोधः तस्यां हि सर्वशब्दपात्यसदादिशब्दानां न विष्णुवाचित्वमिति समन्व-
याक्षेपाय पूर्वपक्षे न विष्णुरसदादिशब्दवाच्यः तेषां निषेधमुख्यवेद्यवस्तुवाचित्वात् परमात्मनश्च भावत्वे-
न तद्योगात् न च स्वयं निषेधमुख्यवेद्यत्वाभावेऽपि तद्वतः असतः परमात्माधीनत्वेन तस्यासदादिशब्दवा-
च्यत्वे इति वाच्यं स्वरूपशून्यस्यानियम्यत्वाभावेन पराधीनत्वायोगादित्युक्तं असत्शब्दस्य प्रागभावार्थकत्वे
तु तस्य स्वरूपशून्यत्वाभावात् सुधायामसदधिकरणे प्रागभावकर्तृता पूर्वपक्षे प्रागभावस्वरूपसत्त्वादिना
सदेवेत्यादिप्रयोगविषयत्वोपपत्तेरित्युक्तत्वाच्च स्वरूपशून्यस्यानियम्यत्वाभावेन पराधीनत्वायोगादित्य-
स्यासंगत्यापत्तेः चंद्रिकाकारैरेव एतेन सर्वे व्याख्याता इत्यधिकरणे तत्त्वप्रकाशिकायामुदाहरणत्वेन धृता-
नामसद्वा इदमग्र आसीदित्यादिश्रुतिस्थासदादिशब्दानां शून्य एव मुख्यत्वोक्तेः न ततः प्रागभावकर्तृताभा

मेत्सैर्वक्तुं शक्यातथाह्यानंदमयाधिकरणेचंद्रिकायांवैदिकशब्दानामन्यत्रैवप्रसित्योमयत्रप्रसित्यान्य
मप्रसित्यतत्रप्रसित्यानांलक्षणेषु बलवत्श्रुतिलिंगाद्यैरन्येष्वेवप्रसित्यतेति अन्येष्वेवप्रसित्यानांलक्ष
णेमुख्यादीनांबलवत्वंहिप्रवृत्तिनिमित्तस्यतदधीनत्वादिनाब्रह्मणिपरममुख्यत्वेपितस्यतद्युक्तया-
न्यस्यवाअपरममुख्यवृत्त्याअन्यपरत्वंविनानुपपद्यमानत्वंनत्वापाततोब्रह्मण्यसंभवमात्रमित्युक्तो
क्तंएवंचएतेनसर्वेव्याख्याताइत्यत्रापरममुख्यवृत्त्याअन्यपरवाक्यस्थाएवासदादिशब्दाउदाहर्तव्याः
प्रकरणात्भाष्येवाक्यविशेषानुपादानाच्चटीकायामसद्वाइदमग्रआसीदित्यस्यापरममुख्यवृत्त्या
प्यन्यपरत्वरहितस्योदाहरणंतुक्वचित्श्रुतावसतशब्दस्यशून्येमुख्यत्वेब्रह्मणिचामुख्यत्वेअसद्वा
इदमग्रआसीदित्यत्रापि मुख्यार्थत्यायशून्यमेवगृह्यतदर्शयितुमितिएवंयदुक्तंमानिषेधमात्रत्वात्
शशविषाणादिवदसतोपिनकारणत्वमितिनतद्युक्तंयुक्तिविरुद्धस्यापिश्रुतिबलात्कस्यचिदसतः
कारणत्वाभ्युपगमेबाधकाभावात् नचशशविषाणादीनामपितथात्वप्रसंगःसत्सुवैलक्षण्यवदस
त्स्वपिवैलक्षण्योपपत्तेरित्येतदधिकरणीयद्वितीयसूत्रावतरणतत्वप्रकाशिकाविरोधश्चनहि
कश्चित्प्रागभावःकारणंकश्चिन्नेतिविप्रतिपत्तिरस्तियेनवैलक्षण्याभ्युपगमेनतत्कारणत्वंसमर्थनी
यंअसत्सुशशशृंगप्रागभावादिषुकिंचिच्छशशृंगादिकंनकारणंकिंचित्प्रागभावादिकंकारणमित्ये

यथैव लक्षणयाभ्युपगम इति चेत्सिद्धत्वात्तदुपपत्तिसाधनवैयर्थ्यात्॥ युक्तिविरुद्धस्यापीति। यद्यपि विरुत्वं चेदमुच्यते ननु हि कालसंबंधनियतं कारणत्वं कालसंबंधिन एवेति युक्तिविरुद्धमपि कारणत्वं श्रुतिबलात्कस्यचिदसतः सोऽक्रियत इति कालासंबंधिनोऽपि कारणत्वे शशविषाणादीनामपि कारणत्वं स्यादित्यापत्तौ कालसंबंधिष्वपि सत्सु कस्यचिदेव कारणत्वं कस्यचिन्नेति यद्वत्तथापि कालासंबंधिषु श्रुतिबलादेव कस्यचिदसतः कारणत्वमित्युपपत्तेरित्यनेन साधितं तच्च शून्यपक्षे समंजसं न प्रागभावपक्ष इति स्पष्टमेव प्रागभावस्य कालसंबंधित्वेन तत्कारणताया युक्तिविरुद्धत्वाभावात् युक्तिविरुद्धस्यापि कारणत्वस्येत्यनेन कर्तृत्वरूपमेव कारणत्वं विवक्षितं तच्च प्रागभावे युक्तिविरुद्धमेवेति चेदेवं सति नस्याचेतनमात्रे असंभवादचेतनमात्रस्य तत्प्रसंगापत्तौ शशविषाणादीनामपि तथात्वप्रसंग इति थंधाश्चारस्य प्रसंगात् युक्तिविरुद्धस्यापीत्यनेन प्रतिषेधमात्रत्वरूपसौत्र युक्तिविरुद्धस्योक्तिविवक्षितं तस्याचेतनमात्रेण प्रसंग इति शशविषाणादीनामेव तत्प्रसंगापादनमिति चेदेवमपि शशविषाणादीनामित्यत्रात्यंतासत एवादिपदार्थत्वस्वारस्यभंगापत्तेर्दुर्वारत्वात्॥ अचेतनत्वयुक्त्या अचेतनमात्रस्य कर्तृत्वनिराकरणं विहाय प्रतिषेधमात्रत्वेन तन्निराकरणं कुर्वतः सूत्रकारस्य कारणत्वनिबंधे सामान्यनिषेधेन तद्विशेषकर्तृतानिषेधोऽप्यार्थिक इत्यभिप्रायो वर्णितः किंच प्रागभावकर्तृतापूर्वं

पक्षे असतः सकाशात् जगदुत्पत्तौ स्वीकृतायां प्रलये असन्मात्रावशेषः स्यात् कार्यनाशे कारणसत्त्व नियमादिति अपीतौ तद्वत्प्रसंगादिति सूत्रव्याख्यानतत्त्वप्रकाशिकाविरोधः तस्मात् प्रागभावस्थितेः प्राविकार्यनिमित्तकत्वेन तत्स्थितेः कार्यनाशनिमित्तकत्वाभावात् नह्यत्र प्रागभावकर्तृतापूर्वपक्षिणा प्रागभावस्योपादानत्वं वक्तुं युक्तं येनात्र कार्यनाशे तन्मात्रावशेषः आपाद्येत समवायिकारणत्वलक्षणस्य कार्याभिन्नकारणत्वरूपस्य वोपादानत्वस्य प्रागभावे दुर्घटत्वात् प्रागभावमर्यादासुलंघ्य वर्तमानस्य तस्य प्रागभावोक्तिविरोधाच्च तथा प्रागभावस्याकुशलत्वात् लघुत्वेश्वरतत्कर्तृत्वकल्पनापेक्षया क्लृप्तस्य प्रागभावस्य कर्तृत्वकल्पनमिति पूर्वपक्षे चन्द्रिकोक्तिविरोधाच्च किंतु कर्तृत्वमात्रं कर्तृमात्रावशेषश्च न कार्यनाशनियतो दृष्टः अभावधर्मात्मतामन्तरेण स्वरूपत एव प्रतिषेधबुद्धिविषयत्वादिति प्रतिषेधमात्रत्वादिति सौत्रहेतुतत्त्वप्रकाशिकाव्याख्यानविरोधश्च प्रागभावकर्तृतापूर्वपक्षे प्रागभावस्य प्रतियोगिनिरूप्यस्य प्रतियोगिपुरस्कारेणैव भाननियमात् तस्य स्वरूपतः प्रतिषेधबुद्धिविषयत्वाभावात् अन्यथा विषयनिरूप्यस्य ज्ञानस्य विषयपुरस्कारेणैव भाननियमात् निर्विषयज्ञानस्वरूपेण प्रमाणमिति न्यायामृतादौ तदुक्तिविरोधापत्तेः तस्मात् असत् शब्देन शून्यपक्ष एवाभिमतः तस्य च कालासंबंधिनः कालसंबंधनियतकारणत्वाक्षेपः अयुक्तः अन्यथा न ह्यत्रासत् शब्दः प्र

न्यपर इति चंद्रिकाविरोधः कालाद्यपरिछिन्नत्वेन शून्यवाद्यभिमतस्याविनाशिनः प्रागभावत्वोक्ति
विरोधश्चैतत्सर्वं उक्तं च तत्त्वप्रकाशिकायां शून्यस्याविनाशित्वं नासतो दृष्टत्वादित्यधिकरणे एकं शू
न्यमेव खल्वंतमपररहितं परमार्थतो विद्यमानं तस्मादेवैतदशेषं जगदुत्पद्यत इति प्रागभावस्य कर्तृतां पू
र्वपक्षादेरेतत्प्रकाशिकाविरोधः शून्यस्य कारणता पूर्वपक्षे चंद्रिकाविरोध इत्युभयत्र स्यात् रज्जुरि
ति एवं प्रागभावकर्तृताक्षेपेणोक्तसिद्धांतोप्यानंदतीर्थीयानामयुक्त एव भावस्याभावधर्मत्वकथनादि
कुतस्तेषामभावेपि भावधर्मत्वकतोक्तिसंभवात् तार्किकादिभिः प्रागभावस्य हेतुत्वांगीकारेप्यभाव
त्वहेतोः कारणत्वाभावे प्रयोजकत्वाच्च नन्वभावस्य कर्तृत्वादर्शनात् तत्त्वं हेतुः क्रियते तया चोक्तं रि
त्यांतोपपादने चंद्रिकायां न तृतीयादियोगितेह कर्तृत्वमविवक्ष्यते किंतु ज्ञानेच्छादियोगित्वं तच्चाभावे
न युज्यते नहि जन्मादिसूत्रोक्तं कर्तृत्वं तृतीयादिप्रयोजकत्वेन वैय्याकरणाभिमतं पारिभाषिकं किंतु
ज्ञानचिकीर्षादिमत्त्वं तच्चाभावेन युज्यत इति नायुक्तमिति चेन्न यः कर्तासि भावः यः प्रागभावः स न कर्ते
ति यः कालः सभाववानित्यादिदृष्टनियमलंघनेनाशंकितारं प्रति विपक्षे बाधकमनभिधाय तद्दृष्टप
गतस्याभिमतव्यभिचारिताकहेतुमात्रस्याभिधानानौचित्यात् ॥ यदपि असतः सकाशात् जगदुत्प
त्तावप्युपेतायां प्रलये असन्मात्रावशेषः प्रसज्येत कार्यनाशे कारणमात्रावशेषनियमादतो ऽसमंज

सर्वसत्त्वमिति आनंदतीर्थीयानां अपि तौ तद्वत्प्रसंगाद् असमंजसमिति सूत्रस्यार्थवर्णनं तदप्यसत् ॥
पूर्वपाद्यभ्युपगतस्य प्रलये सर्वभावासत्त्वस्यानभ्युपगमात्तत्त्वापादनायोगात् यदपि प्रलये सर्वभावासत्त्वं न युज्य
तेन तदा पदार्थसत्त्वस्यैवाविमतिपन्नोत्पत्तिः सतो भवितुमर्हति उत्पत्तित्वात् घटोत्पत्तिवत् विमतो नाशः सशे
षः विनाशत्वात् प्रतिपन्ननाशवदिति दृष्टांतबलेन साधयितुं शक्यत्वादिति अस्माभिरपि प्रलये असन्त्व
भावशेषस्याभिलषितत्वेन नानिष्टापादनमिति शंकानिवर्तकं ननु दृष्टांताभावादिति सूत्रस्यानंदतीर्थी
यानां व्याख्यानं तदप्यसत् एवं विमताः भावाः प्रलये असंतः भावत्वात् संमतवदित्येवंरूपस्यानुमानस्य
पूर्वपक्षिणाप्युपदर्शितत्वात् ॥ एवमपि सत्प्रतिपक्षतादोषो दुर्वार एवेति चेत् ॥ तथासति पूर्वपक्षस्ये
वासिद्धांतस्याप्यसिद्ध्यापत्तेः तथा चात्रत्यपक्षसाधकप्रमाणानुग्राहकस्तर्क एव प्रदर्शनीयः ननु दृष्टां
तसत्तामात्रमिति सूत्रवैयर्थ्यं दुर्वारमेव यदपि न तावत् प्रलये सर्वासत्त्वं प्रत्यक्षसिद्धं नाप्यागमसिद्धं
तस्याभावात् नानुमानमपि प्रलये सर्वासत्त्वसाधकं तत्र दृष्टांताभावेन तस्य दुष्टत्वादिति स्वपक्षदोषा-
चेति सूत्रस्यार्थवर्णनमानंदतीर्थीयं तदपि न सत् दृष्टांताभावरूपैकदोषस्य वक्तव्यत्वे दृष्टांताभावान्न
त्वनभिधायानेकदोषानुगमाय सामान्यशब्दोपादाने स्वारस्याभावात् तर्काप्रतिष्ठानादपीति सूत्रस्य
नंदतीर्थीयाभिमतव्याख्यानं यथा न युक्तं तथोक्तं प्रागेव स्वकीयरीत्यैतत्सूत्रार्थवर्णनावसर इति दिक् ॥

समाप्तं.

श्रीगणेशाय नमः ॥ एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥ एवं परिणामवादाभिमतजगदुपादानत्व
प्रतिकूलन्यायस्याविरोधमुपपाद्यारंभवादिनामभिमतस्य तत्प्रतिकूलन्यायोऽस्मिन्नधिकरणे निराक्रि
यते अयमत्र पूर्वपक्षः सांख्ययोगप्रधानांतर्कुशलमतित्वात् तदीयतर्केण ब्रह्मणो जगदुपादान
त्वबाधो माभूत् वैशेषिकादीनां तर्कमतिकुशलत्वप्रसिद्धेः तदीयन्यायस्याबाधितत्वात् तद्बाधितं ब्रह्म
णो जगदुपादानत्वमिति एवं किलारंभवादी वैशेषिको मन्यते कारणमहत्त्वस्य कार्ये स्वावधिकोत्कर्ष
शालिमहत्त्वारंभकत्वदर्शनात् यदि महत्तमं जगदुपादानं स्यात् तदा पृथिवीपवनादिकार्यं ततोऽपि महत्
तरं स्यात् यद्यत्कार्यद्रव्यं तत्तन्न्यूनपरिमाणद्रव्यारब्धं यथा तंत्वारब्धः पट इति व्याप्तेः न चास्य ब्रह्मद्रष्ट
तेऽस्ति तिन्यायाप्रचाराः नाप्यप्रयोजकता उत्कृष्टमहत्त्वस्य त्वाश्रयमहत्त्वस्य कुत्र मायाकारणतायां तद्दृष्ट
दप्रसंगस्य विपक्षे बाधकस्य सत्त्वात् ॥ न च विवर्तवादे एतद्दोषानवकाशात् नायमाक्षेप इति वाच्यं ॥
महारज्ज्वादल्पपरिमाणभुजंगभ्रमादर्शने नहि सौक्ष्म्ये ब्रह्मणि महिकामशकाद्यारोपायोगात् ननु ब्रह्म
णः कारणत्वात् परमाणुद्व्यणुकादीनां सर्वेषां कार्यतया नित्यसिद्धकारणालाभेन प्रलये सर्वेषां कार्यद्र
व्याणां नाशात् मूलकारणाभावेन पुनः सृष्टिर्न स्यादिति वाच्यं परमाणूनां मूलकारणत्वसंभवात् ॥ न च
तत्र प्रमाणाभावः द्व्यणुकं स्वन्यून परिमाणद्रव्यारब्धं कार्यद्रव्यत्वात् पटवदित्यनुमानसिद्धत्वात्

नचतेषामपि पृथिवीत्वादिना सावयवत्वानुमाने तेन च कार्यत्वानुमाने ततोपि न्यूनपरिमाणं किंचि
द्भवेत् एवं ततोपीत्यं विश्रांतिरिति वाच्यं परमाणोः सावयवत्वकल्पने सावयवत्वाविश्रांतौ मेरुसर्षपयोर
नंतावयववत्वाविशेषेण साम्यात् तुल्यपरिमाणतापत्त्या दृष्टविरोधेन पृथिवीत्वादिना परमाणोः सावय-
वत्वानुमानासंभवात् ॥ तथाच परमाणव एव मूलकारणं न ब्रह्मेति ॥ एवं बुद्धस्य भगवतो विष्णोरवतारः
अभावं जगत्येतुं स्मरति स्म तदनुकूलं च विमतं भावरूपं जगत् अभावपुरःसरं भावरूपत्वात् ॥ यथा सुषु
प्तिपुरःसरः प्रपंच इति तर्कं चाह ॥ एवं संघातवादिनोपि एवं मन्यंते न स्थिरस्य कारणता संभवति सम
र्थस्य क्षयायोगे निखिलकार्ययौगपद्यप्रसंगादिति ॥ एवं स्वभाववादिनोपि नित्यधर्माणां देशनियमव
त् अनित्यकार्याणां कालनियमस्य स्वभावादेवोपपत्त्या न कस्यचित् कुत्रचित् कारणत्वमिति कुतो ब्रह्म
णो जगत्कारणत्वमस्याशोत्यधिकाशंकायामुक्तपक्षानुक्तन्यायातिदेशेन दूषयन् एतेन शिष्टापरिग्र
हा अपि व्याख्याता इति सूत्रेण प्रासित्थांतः एतेन प्रकृतेन प्रधानकारणवादनिराकरणेन शिष्टैर्मनुव्यास
प्रभृतिभिः केनचिदप्यंशेना परिगृहीता ये अण्वादिकारणवादास्तेपि निषिद्धतया व्याख्याताः निराकृ
ताः द्रष्टव्याः सत्कार्यत्वात्मासंगत्वस्वप्रकाशत्वाद्यंशे वेदांतशास्त्रस्य प्रत्यासन्नः प्रधानकारणवादः-
सत्कार्यत्वाद्यंशेन शिष्टैः स्वीकृत इति प्रबलत्वादुपदेशः अण्वादिवादानां निर्मूलत्वात् दुर्बलत्वेनातिदे

शाइतिबोध्यं ॥ अयमत्र सिद्धांताभिप्रायः न तावन्निरवयवत्वादेव धर्मिकोदोषः उन्नतगिरिशिखरा
द्यधिरूढस्य भूमिनिष्ठन्यग्रोधमूरुहादावल्पतरदूर्वामियालाद्यभेदारोपस्य दर्शनात् घटादिपुदर्शन
मात्रेण रेदविरुद्धार्थकल्पने पृथिवीत्यादिना परमाणूनामपि सावयवत्वकल्पनं कथं वारयितुं शक्यं ॥
नचैवं मेरुसर्षपयोस्तुल्यपरिमाणतापत्तिर्दोष इत्युक्तं सम्यक् उभयोरनंतावयवत्वाविशेषेप्यानंत्य ए
वविशेषकल्पनोपपत्तेः ॥ तथाच मेरुसर्षपयोरवयवानंत्यस्याविलक्षणत्वान्न तुल्यपरिमाणतापत्तिः अ
वयवसंख्यानंत्ये विशेष आश्रयणीयः अन्यथातीतकल्पानामतीतक्षणानामनागतानांचानंत्या तुल्यतास्या
दतस्तत्रानंत्ये विशेषः कल्पनीयस्तथाच सावयवत्वाविश्रांतेर्मूलकारणमेव परेषांमते दुर्लभं स्यात् प
रिणामित्वेपि नानुपपत्तिः विजातीयमहत्वादावेवस्याप्याश्रयमहत्वहेतुतायां अन्यथा साक्षात् ब्रह्म
कार्यगतमहत्वादौ कार्यतावच्छेदकवैजात्यानुपगमसंभवात् ब्रह्मादिगतमहत्वव्यावृत्तस्यैव धर्मस्य मह
त्वारंभकतावच्छेदकत्वोपगमसंभवाच्च सति बाधके यद्विशेषयोरिति न्यायानवतारात्त्र भ्रांतिदीर्घतंत्वार
ब्धस्यापि कंदुकादेरनतिदीर्घत्ववन्महत्ववन्मूलपिंडारब्धायादीर्घपतेः सूक्ष्मत्वस्य महदारब्धस्याप्यनतिमहत्वोप
पत्तेः उक्तंच परममहत्त्वशून्यस्यापि शरीरादेः पांचभौतिकत्वं स्यात्पंचात्मकात्सौक्ष्म्यान्महत्तरादहंका
रात्सूक्ष्मोत्पत्तिः सांख्यादिभिरपि यदप्यभावपुरःसरतानुभावं यौक्तानामपि साध्यधिकलोदयां

तः सुषुप्तेरवस्थाविशेषत्वेनावस्थावत आत्मनः सद्रूपस्यांगीकरणीयत्वेन स्वप्नस्यभावपुरः सरत्वात्
एवंस्थिरस्य कारणताकार्यकारणभावावश्यकताचब्रह्मानंदादिभिः बहुतरंप्रपंचिताज्ञेया ॥ यदावै-
दिकशिरोमणिभिः पुराणकर्तृभिः तत्रतत्रप्रसंगादुदाहृतामप्रकृतिपुरुषादिप्रतिपादिका सांख्यस्मृतिः
जगत्कारणत्वविषयेदौर्बल्येन परित्यक्ता तदानिखिलैः शिष्टैरुपेक्षितानां काणादमतानांदौर्बल्यंकि-
मुवक्तव्यं नखलु ब्राह्मपाद्मादिषु पुराणेषु क्वचिदपि प्रसंगात्परमाणुकादिप्रक्रियोदाहृतामत्युत मनुस्मृ
तौहैतुकान्बकवृत्तींश्च वाङ्मात्रेणापिनार्चयेत् ॥ मोक्षधर्मे आन्वीक्षिकींतर्कविद्यामनुरक्तोनिरर्थि
कां ॥ तस्यैषफलनिर्वृत्तिः सृगालत्वंवनेमम ॥ अधीत्यगौतमींविद्यां सार्गालीं योनिमाप्नुयादितिनि
दोपलभ्यते ॥ तथाविष्णुपुराणेपि महीघटत्वंघटतः कपालिका कपालिकाचूर्णरजस्ततोणुः ॥ ज
नैः स्वकर्मस्तिमितात्मनिश्चयैरालक्ष्यते ब्रूहि किमत्रतत्त्वमिति साप्रक्रियानिंदिता ॥ यत्तु याज्ञवल्क्ये
नपुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः वेदाः स्थानानिविद्यानांधर्मस्यच चतुर्दशेतिन्यायमतप्र
क्रियायाः विद्यासाधनत्वमुक्तं तन्नश्रुत्यविरोधिपदार्थशोधकन्यायस्यैवोक्तविरोधः ॥ यत्तु चंद्रिका-
यांयत्प्रोक्तंएतेनमनुव्यासप्रभृतिभिःशिष्टैः केनचिदंशेनपरिगृहीतस्य वैदिकदर्शनमत्यासन्नस्य
प्रधानवादस्यनिरासेनतैः केनचिदप्यंशेनापरिगृहीताः वैदिकदर्शनात्यासन्नाः परमाण्वादिका

रणवादाः मन्वाख्याता इति एतेनेति सूत्रार्थमनूद्य तन्न एतेन सर्वे व्याख्याता इत्यत्रापि तथास्यैवार्थस्यो
क्तत्वेन पुनरुक्तेः निरीश्वरसांख्यवादादपि सेश्वरवैशेषिकादीनामेवेश्वरवादिभिः शिष्टैः परिगृहीतत्वा
दीश्वरकारणत्ववादिवैदिकमत्यासन्नत्वाच्च तदुक्तमनुव्याख्यानेन न च शिष्टपरिगृहीतत्वं निरीश्वरवादि
ष्विति दूषणमुक्तं तदसत् ॥ एतेन सर्वे व्याख्याता इत्यत्राण्वादिकारणवादे श्रुतिर्नास्तीत्युक्तं अत्र त
दनुमताः ब्रह्मणो जगदुपादानत्वविरोधियुक्तयो दुष्टा इत्युच्यत इति स्पष्टत्वेन पौनरुक्त्यदोषस्या
द्वैतमतविद्वेषमूलकधूलिक्षेपमात्रत्वात् ॥ निरीश्वरसांख्यवादस्य सत्कार्यत्वाद्यंशेन श्रुतिमत्यासन्न
त्वेन शिष्टपरिगृहीतत्वस्य सेश्वरवैशेषिकवादस्य परमाण्वादिकारणवादतया निर्मूलतया श्रुत्यन
त्यासन्नत्वस्य चोक्तत्वान्नानुव्याख्यानोक्तदोषः साधुः इदानीमुपादानांश एव शिष्टपरिग्रहापरिग्र
हयोरुक्त्याविरोधाभावात् ॥ अत्र यद्यपि निबंधे अस्मिन्नधिकरण एव पूर्वपक्षदशायां कार्यकारण
योरभेदो दूषितः तथापि तदभेदसाधकन्यायोत्र न विवक्षितः परं पूर्वपक्षोपोद्बलकतामात्रेण पूर्वपक्षे
स दूषित इति ध्येयं ॥ एवं रीत्या अस्याधिकरणान्तरत्वसंभवे एतत्सूत्रस्य पूर्वाधिकरणशेषत्वक
ल्पनेन एतेन सत्कारणत्वादौ दृष्टान्तभावेनासत्कारणत्वादौ दृष्टान्ताभावेनाशिष्टापरिग्रहाः अस्तु ज
गत्कारणत्वमसतः तथापि न विष्णोर्जगत्कारणत्वं संभवतीति विप्रतिपन्नं निष्कारणं अचेतनकार

णंजीवकारणं वा कार्यत्वात् कूलपतनदध्यादिवदिति श्रुतिविरोधात् ॥ न चानिर्मूलयुक्तेरसाधकत्वं अकस्मादित्यादित्यादिस्मृतिमूलत्वादिति अकर्तृकत्वाचेतनकर्तृकत्वजीवकर्तृकत्वादयः सिद्धांतव्याख्याताः कूलपतनादावपि निष्कारणत्वादेरसंमतत्वादित्यानंदतीर्थीयानां व्याख्यानमयुक्तमधिकमुक्तं प्राक् ॥ श्रीमत्शंकरपादाब्जभूषणे परदूषणे ॥ रघुनाथकृतिर्भूयात् शिष्टाधिकरणे मुदे ॥

समाप्तं.

श्रीगणेशाय नमः ॥ भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॥ अत्रोक्तसमन्वये प्रत्यक्षादिसिद्धभो
क्तृभोग्यविभागलोपप्रसंगरूपस्य पक्षबाधोत्थापनादाक्षेपादि संगतिः पूर्वाधिकरणे श्रुतिप्रत्यक्षानु
गृहीतं प्रत्यक्षसामान्यमप्रतिष्ठितमिति कारणमहत्त्वान्महत्तरकार्यापत्तिरूपस्तर्कोऽन प्रतिष्ठित इत्यु
क्तं इह च भोक्तृभोग्यविभागस्य प्रत्यक्षसिद्धत्वात् तन्मूलकस्तर्को नाप्रतिष्ठित इति प्रत्यवस्थानादनं
तरसंगतिः अत्रोक्तसमन्वयेनावगम्यमानं तत्त्वमसि सर्वं खल्विदं ब्रह्मेति वाक्यप्रतिपाद्यमानमद्वैतं
प्रत्यक्षसिद्धभोक्तृभोग्यविभागलोपप्रसंगरूपतर्केण बाध्यं न वेति संदेहे पूर्वपक्षः स्यादेव बाधः तत्त्वम
सि सर्वं खल्विदं ब्रह्मेति वाक्यस्य स्वारसिकार्थांगीकारे ब्रह्माभिन्नयोर्जीवजगतोः परस्परमभेदः स्या
दित्युक्तविभागलोपप्रसंगस्य दुर्वारतया तादृशवाक्यस्यार्थान्तरपरताया आवश्यकतया अयुक्तमि
दं ब्रह्मकारणत्वावधारणमिति ननूक्तयुक्त्या जीवजगतोरभेदाभिधानस्यायुक्तत्वेऽपि ब्रह्मकारणताव
धारणस्य कथमयुक्ततेति चेत् ॥ जीवजगतोर्ब्रह्मोपादेयतया श्रुतत्वात् उपादानोपादेययोश्च समवायं
निराकुर्वतां सिद्धान्तिना परिशेषात्तयोरभेदस्यैवोपगन्तव्यतया अभेदासंभवे उपादानोपादेयभावोऽपि
न संभवतीत्यभिमानवतः पूर्वपक्षिणः तथोक्तिसंभवात् ॥ वस्तुतस्तु पूर्वोक्तं जगदुपादानत्वमुक्तं तर्कै

विरोधादयुक्तमुतयुक्तमित्यत्र चिंत्यते तत्र तावदयुक्तमिति पूर्वपक्षः उपादानोपादेययोर्न समवा-
य इति वदतां तयोरभेद एव परिशेषाद्वाच्य इति ब्रह्माभिन्नयोर्भोग्यभोक्त्रोः परस्परात्मतापत्त्या विभा-
गाभावापत्तेः ॥ यत्तु चंद्रिकायां यदुक्तं परैः ब्रह्मण उपादानत्वे भोक्तुः शरीरिणः भोग्यतापत्तेः भोग्यस्य
शब्दादेः भोक्तृत्वापत्तेस्तयोरविभागः स्यात् द्वयोरपि परमकारणब्रह्मानन्यत्वादिति मैवं एकसमुद्र-
कार्याणां जलतरंगादीनामिव विभागोपपत्तेरिति सिद्धांत इति अनूद्य पूर्वपक्षे विवर्तसिद्धांते नोक्त-
सांकर्यशंकासंभवः जगद्भ्रमहेत्वविद्या विषयत्वलक्षणस्याधिष्ठानत्वस्य समवायतादात्म्यलक्ष-
णसंबंधद्वयनिरपेक्षत्वादिति दूषणमुक्तं तदसत् उक्ताधिष्ठानतामात्रं नोपादानता किंतु कार्य-
समवायिकारणता कार्याभिन्नकारणता वा अन्यथा पारिभाषिकतापत्तेः एकविज्ञानेन सर्वविज्ञानोप-
पादनायोगाच्च नचैतदुभयमपि ब्रह्मणि युज्यते समवायानभ्युपगमात् आद्यस्यासंभवेन द्वितीय-
स्यैवाभ्युपगंतव्यतया अविभागः स्यादिति शंकाया निरपवादत्वात् ॥ यदपि चंद्रिकायां पूर्वपक्षे
किंच पूर्वपक्षिणा किं कार्याणां चेतनत्वेन विभागो न स्यादित्यापाद्यते किं वान्येन केनचिद्रूपेण नाद्यः
चेतनस्यानादित्वेन कार्यत्वे तद्विभागाभावेऽप्यापत्तेः ननु चेतनस्यानादित्वेऽपि ब्रह्माभेदात् ब्रह्मकार्यत्वेन ब्रह्माभि-
न्नं यज्जडं तद्रूपत्वापत्तिरिति चेन्न इत्युपलक्ष्यत इति सूत्रेणैव जडोपादानत्वेऽपि ब्रह्मणश्चेतनत्वाहानेरु-

त्त्वात् ब्रह्माभेदेन जीवस्य जडस्याभावे: नान्यः एकसुवर्णपिंडकार्याणां कटकमुकुटा [illegible] नां भेद
स्यैव दर्शनेन ब्रह्मकार्याणामप्याकाशवाय्वादीनां भेदसंभवात् सुवर्णपिंडः सावयवः ब्रह्म तु निरव
यमिति चेत् तन्मते भिकृत्स्नप्रसक्तिरिति सूत्रे निरवयवस्य ब्रह्मणो युगपदनेकद्रव्योपादान
त्वं न युक्तमित्येव पूर्वपक्षयितव्यं न तु कार्याणामविभागो न युक्त इति तस्मान्न पूर्वपक्षोदय इति दूषण-
मुक्तं नदप्यकांडतांडवं भेदाभेदयोर्विरोधाद्भेदमात्रोपगमे समवायानभ्युपगमात्तु उपादानत्वानुप
पत्तिः अभेदस्यैवोपगमे मोक्षादिविभागानुपपत्तिरिति रीत्या अस्मदभिमतपूर्वपक्षोऽत्र विवक्षि[illegible]
असयत् दृश्यते त्विति सूत्रे विलक्षणयोरप्युपादानोपादेयभावो दृश्यत इति कार्याभि[illegible]
लक्षणोपादानतावादिनं सांख्यं प्रत्युक्तमिह तु कार्यकारणयोरभेदाभ्युपगमे पूर्वोक्तरीत्या [illegible] कार्य
कारणभावानुपपत्तेरिति भेद एव तयोरिति वादिनं तार्किकं शांकितारं प्रत्युक्तं सभा[illegible]
चेतनस्यानादित्वेपि ब्रह्माभेदात् ब्रह्मकार्यत्वेन ब्रह्माभिन्नं यज्जडं तद्रूपत्वापत्तेः [illegible]
न एवं च महास्वर्णपिंडेन्यादिकमपि न सत् पूर्वपक्षिणाक्वापि कार्यकारणयोरभेदानभ्युपगमेन
कारणाभिन्नकार्याणां भेदासंभवेन येनकेनचिद्रूपेणाविभागो न स्यादित्या पादनसंभवात् ॥१८॥
पूर्वपक्षसिध्धांतः स्याल्लोकवदिति अयमत्र सिध्धांताभिप्रायनिष्कर्षः यथा हि तार्किकैरुपादानभूता

त्वकपालादेः द्रव्यात् पटाद्युपादेयं द्रव्यमन्यदेव तयोश्च समवाय एव संबंध इत्युच्यते नैवमिति चेत्तेउ
पादानोपादेयभावस्थले द्रव्यद्वयमभ्युपगम्यते अपित्वेकमेव मृज्जलादि द्रव्यं पिंडावस्थारूपं धर्ममप
रित्यज्य कारकविशेषात् कंबुग्रीवादिफेनतरंगादिरूपसंस्थानविशेषभाक् भवति तथा च मृत्पिंड एव
घटोजातः जलमेव फेनतरंगादिजातमिति सामानाधिकरण्यव्यवहारोपि तथा सर्वं खल्विदं ब्रह्मेतिवा
क्ये अस्ति भाति प्रियं रूपं नाम चेत्यंशपंचकं आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततोद्वयमित्यभियुक्तोक्तरीत्या
सदादिरूपेणोपादानतया जगदनुप्रविष्टब्रह्मरूपधर्मिणमादायाभेद उपपन्नः नामरूपांशस्य तु ब्रह्म
णा सह उपादानतापरकतादात्म्यमेव तच्च समानाधिकरणशाखोद्धेखिप्रत्ययनिर्वाहकः संबंधविशे
षः नात्यंताभेदरूपस्तद्रूपैक्यं तच्च न भेदेन विरुध्यत इति न ब्रह्मजगतोः सांकर्यं ननु नामरूपांशेस्वरू
पैक्यानभ्युपगमेन सांकर्यवारणेपि जीवब्रह्मणोः स्वरूपैक्याभ्युपगमेन तयोः सांकर्यं दुर्वारमेवेति चे
न्न स्वरूपैक्ये सत्यपि तयोरौपाधिकभेदाभ्युपगमेन सांकर्यानवकाशादिति ॥ आनंदतीर्थीयास्तु परे-
ध्ये सर्व एकीभवंतीति श्रुतौ जीवस्य मुक्तावीशाभेदप्रतिपादनात् तेन संसारदशायामप्यभेदं प्रसाध्य
तेन ब्रह्मणि सर्वकारणत्वमसंभवीत्येकः पूर्वपक्षः चिप्रत्ययस्सारस्याय संसारदशायां भेद एवं मुक्तावे
व परमभेदस्तथा च जगज्जन्मादिकारणत्वलक्षणस्य मुक्तजीवे । निव्याप्तिरिति द्वितीयः ॥ संसार-

दशायां जीवब्रह्मणोर्भेदाभेदौ मुक्तौ त्वभेद एव ॥ तथा च मुक्ते संसारिणि चानि अतिरिक्तनीनः
॥ तथाहि चंद्रिकायां एकीभवंतीति ब्रह्मणस्तावन्मुक्तायभेदः सूचितेन च तावता ब्रह्मणः सर्वकर्तृत्वं
सिध्यति संसारिणइव मुक्तस्य सर्वकर्तृत्वे प्रत्यक्षादिविरोधाभावेन मुक्तस्यापि जीवस्य सर्वकर्तृत्वस्य
मुक्तेरविज्ञानेनोपगमसंभवेन च मुक्ताभिन्नस्यापि ब्रह्मणः कथंचित् सर्वकार्यकर्तृत्वसंभवात् ॥ तस्मात्
दसर्वकर्तृत्वेन प्रत्यक्षसिद्धसंसार्यभेदात् ब्रह्मणोपि न तथात्वमिति चेत् मुक्ताभेदेन संसारेप्यभे
दः साध्यः ॥ एकीभवंतीत्यभूततद्भावार्थच्विप्रत्ययस्तु न ह्यन्यस्यान्यत्वं युज्यत इति भावेन युक्ति
विरोधात् भेदभ्रमनिवृत्तेरभूततद्भावाभिप्राय इत्येकः पक्षः ॥ द्वितीयस्तु च्विप्रत्ययबलात् पूर्वं
मुक्तौत्वभेदः न ह्यन्यस्यान्यत्वं युज्यत इति युक्तिस्तु च्विप्रत्ययग्रहणमुक्त्वार्था अतीतत्वपक्षे तु पूर्वं भेदाभेदौ मुक्तौ
तु केवलाभेदः एवं च च्विप्रत्ययो युक्तः पूर्वं केवलाभेदाभावात् न ह्यन्यस्यात्यन्तादि युक्तिविरोधश्च न पूर्वमपि
प्यभेदस्य सत्त्वात् ॥ अत्र पक्षत्रये प्रत्येकं पुनः पक्षत्रयं संभवति एकपदलक्षणयैव विरोधपरिहारस्य
भवात् ॥ चिन्मात्राच्चिन्मात्रस्य भेदाभसूचनीयस्योपदेशवैयर्थ्यात् एकपदलक्षणया एकैवाविशिष्ट
पत्यागेन ब्रह्मणः प्रत्यक्षसिद्धासर्वकर्तृजीवसालक्षण्येन वा जीवस्य श्रुतिसिद्धसर्वकर्तृब्रह्मसाल
क्षण्येन वा मिथ्यावादिवत् पदद्वयलक्षणया उभयथापि विशिष्टरूपत्यागेन चिन्मात्रैक्येन वा त

आद्ये लक्षणस्यासंभवः द्वितीयेऽतिव्याप्तिः सदापि श्रुत्याऽभेद इति पक्षे संसारिणि मुक्तावेवाभेद इति पक्षे मुक्ते मु-
क्तेः पूर्वं भेदाभेदाविति पक्षेऽपि मुक्ते अभेदांशमादाय संसारिणि चातिव्याप्तिस्तृतीयेऽपीति ॥ सिद्धांतस्तु
जीवेशयोरभेदस्यासंभवान्न जगत्कारणत्वस्यासंभवादिः एकीभवंतीति मुक्तावैक्यव्यपदेशात्तत्सि-
द्धिरिति चेत् लोके उदकांतरस्यैकीभावव्यवहारेऽपि अंतर्भेददर्शनेन व्यभिचारात् ॥ ऐक्यव्यपदेशस्य स्था-
नैक्यादिनापि जलैकीभाववदुपचरितार्थत्वात् तथैव श्रुतितदुपबृंहणैर्बोधितत्वाच्च ॥ तथा च श्रुतिः यथोद-
कं शुद्धे शुद्धमासिक्तं तादृगेव भवति एवं मुनेर्विजानत आत्मा भवति गौतम ॥ स्कांदे च उदके तूदके सिक्तं
मिश्रमेव यथा भवेत् ॥ न चैतदेव भवति यतो वृद्धिः प्रदृश्यते ॥ एवमेव हि जीवोऽपि तादात्म्यं परमात्मना
॥ प्राप्तोऽपि नासौ भवति स्वातंत्र्यादिविशेषणादितीत्यधिकरणयोजनामाहुस्तदसत् ॥ तत्त्वमसीत्यादी-
नामनेकेषां सर्वदा जीवब्रह्माभेदबोधकत्वेन पराभिमतानां वेदांतानां सत्त्वेन परेऽव्यय इत्यादिश्रुत्युक्त-
मुक्तपराभेदेन प्रसाधितस्य संसारिपराभेदस्य पूर्वपक्षहेतुतोक्तेः शिरोवेष्टनेन नासिकास्पर्शतुल्य-
त्वात् ॥ मुक्तजीवस्य परात्यंताभेदे तस्य लक्ष्यतावच्छेदकाक्रांततया तत्र लक्षणसत्त्वस्यातिव्याप्तित्वा-
पत्त्याभिधानानौचित्याच्च ॥ परेऽव्यये सर्व एकीभवंतीत्यत्र स्थानैक्यादिकं विवक्षितमिति सिद्धांतोक्तिर-
प्यमुक्तजीवपरयोः स्थानैक्यस्य नित्यसिद्धतयाखिप्रत्ययास्वारस्यस्यापरिहारात् ॥ यदप्युक्तं प-

धारकं शुद्धे शुद्धमासिक्तं तादृगेव भवतीति सावधारणश्रुत्या जलद्वयसाम्यमेव अभिप्रायितं नात्यंतैक्यमि
ति तत्रेदं विचारणीयं ॥ दृष्टांते तावत् शुद्धत्वेन सादृश्यमात्रं विवक्षितं तदानासिक्तस्यापि जलस्य शुद्ध
स्य शुद्धत्वादिना सादृश्यानपायात् श्रुतिगतासिक्तांतभागस्य वैयर्थ्यमिति तद्भेदग्रहाविषयत्वादिना
सादृश्यं वाच्यं ॥ तथा सति जलद्वयमेलनस्य भेदग्रहविरोधित्वेनोक्तसादृश्यभयोर्जलयोर्मेलनलाभेन तद्भाग
स्यार्थवत्त्वमेवं च तादृक्जलस्य दृष्टांतत्वं वदता मुक्तस्य ब्रह्मणापि तद्भेदग्रहाविषयत्वादिनैव सादृश्यं
तदभिन्नत्वपर्यवसितमत्र प्रतिपाद्यत इति वक्तव्यं ॥ यद्यपि सतोपि भेदस्याग्रहणेनाप्युक्तसादृश्योपपत्ति
स्तथापि नान्योऽतोस्ति द्रष्टा नान्योऽतोस्ति श्रोता नत्वन्यास्ति द्वैतसिद्धिरात्मैव सित्थः नैव [illegible] स
ह यो वै तत् परमं ब्रह्म वेद ब्रह्मैव भवति यावन्मोहं तु भेदः स्याज्जीवस्य च परस्य च ततः परं न भेदोऽस्ति
भेदहेतोरभावतः ॥ विभेदजनके ज्ञाने नाशमात्यंतिकं गते आत्मनो ब्रह्मणो भेदमसंतं कः करिष्यतीत्या
दिश्रुतिस्मृतिपर्यालोचनया भेदाभावादेव न तथाग्रहणमिति युक्तं कल्पयितुं ॥ यथा च नान्योऽतोस्ति
द्रष्टेत्यादिश्रुतेर्जीवेशाभेदनिषेध एव स्वरसस्तथोक्तं प्रागानंदमयाधिकरणे विस्तरेण ॥ युक्तं च मुक्ति
काले भेदस्यैवासत्त्वकल्पनया तदग्रहणमन्यथा तदग्रहणकारणदोषकल्पनापत्त्या मुक्तेरप्यनुपप-
त्तेः निरस्तसमस्तदोषस्यैव मुक्तिश्रवणात् ॥ एवं मांडूक्योपनिषदः जीवब्रह्मैक्यपरत्वात् तदंतर्गतस्

परेऽव्यये सर्व एकीभवंतीत्यस्य भेदपरत्वाभावान्नोपचरितार्थत्वकल्पनं युक्तं ॥ अथ भेदांशे षड्विधता
त्पर्यनिर्णायकलिंगोपेतं मांडुक्योपनिषद्भूतस्य परेऽव्यये सर्व एकीभवंतीत्यस्य कथं न भेदपरत्वं तथाह्या
थर्वणे द्वा सुपर्णेत्युपक्रमः परं साम्यमुपैतीत्युपसंहारः तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यः अभि-
चाकशीति जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक इत्यभ्यासः शास्त्रैकसमधिगम्येश्व
रमिति यौगिकस्य कालत्रयाबाध्यभेदस्य शास्त्रं विना अप्राप्तेरपूर्वता पुण्यपापे विधूयेति फलं अस्य म
हिमानमिति स्तुतिरूपोऽर्थवादः अत्ति अनश्नन्नित्युपपत्तिरिति चेत् अत्र वदंति आथर्वणे प्रथममुंडके
कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति शौनकप्रश्नानंतरं द्वे विद्ये वेदितव्ये इति विद्याद्वय
मवतार्य ऋग्वेदादिलक्षणामपरामुक्त्वा अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रम
वर्णमित्यादिना परविद्याविषयमक्षरं प्रतिपादयता अभेदस्यैवोपक्रांतत्वात् अन्यथा तदुत्तरत्वानुप
पत्तेः द्वितीयमुंडके पुरुष एवेदं विश्वं ब्रह्मैवेदं विश्वमिति मध्येऽपि तस्यैव परामर्शात् तृतीयमुंडकांते च परेऽव्यये
सर्व एकीभवंति स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवतीत्यैक्यलक्षणफलेनोपसंहाराच्च मुंडकत्रयात्मिकाया
उपनिषदः ऐक्यपरत्वेन तन्मध्यस्थितवाक्यस्यापि द्वा सुपर्णेत्यादेः असंयुक्तप्रकरणादिति कर्तव्य
तार्थत्वादिति न्यायेनाभिक्रमणन्यायेन च तदनुकूलत्वेनैव व्याख्येयतया तस्य भेदोपक्रमत्वाभावा

त्असंयुक्तमित्यादिन्यायश्चेत्थं दर्शपौर्णमासादिकं प्रकृत्य समिधो यजतीत्यादि श्रूयते तत्र दर्शादिस
मिदाद्यंगत्वबोधकत्वमस्तिन वेतिसंशये साध्यसाधनाकांक्षयोः स्वर्गादिपाद्यन्वयेनविच्छिन्नत्वात्तद्बो
धकत्वमितिमासेनयोर्विच्छेदपीतिकर्तव्यताकांक्षायां समिधो यजतीत्यादेर्दर्शपौर्णमासाभ्यांस्वर्ग
कामोयजेतेत्यादिपूर्वमित्यमितिपदकल्पनयासमिदाद्यन्वयेनोक्तबोधकत्वमावश्यकमितिकर्तव्य
तात्वंचाख्यातपदात्सामान्यतोज्ञातभावनायाविशेषतूपत्तेनयागस्य साधनत्वापारविशेषजिज्ञा
सायामदृष्टद्वारासमिदादीनांद्रव्यदेवतादिसंस्कारद्वाराप्रयाजादीनामुपकार्यत्वेनसाधनत्वंबोधादि
वृत्तिरितिकेचित्॥ यागादिनूपकारणनिष्ठापूर्वप्रयोजकत्वात्तिसाधनत्वमितिकर्तव्यतान्वयेऽयप्र
कः सतज्जनकइतिमीमांसकाः॥ एवंचकारणंकार्यतातत्त्वहेतुःशक्तिर्योमप्या [illegible]
यासमिदादिजन्यशक्तिमत्त्वंदर्शपौर्णमासाभ्यांयजेतेत्युक्तवाक्यार्थबोधः मीमांसकमतेशाके र
नित्यत्वादखंडकारणतानूपत्वेपितद्विशिष्टस्यैवफलोपधायकत्वंतज्ज्ञान [illegible] अपूर्वफल
दित्यन्ये॥ तथाचविनियोजकश्रुत्याद्यसंयुक्तमपिसमिदादि प्रकरणात् प्रयाजादीनामुपकारकत्वं [illegible]
तिकर्तव्यतार्थित्वा दुक्तेतिकर्तव्यतात्वेनतदपेक्षितत्वादिति असंयुक्तमितिसू
त्रार्थः॥ तथादर्शपौर्णमासौ प्रकृत्य प्रयाजसमीपे श्रूयते अभिक्रामं जुहोतीति तत्राभिक्राममित्यस्याणु

ञ्जुं तत्वेनाभिक्रम्येत्यर्थकत्वात् जुहोतिनामाकरणिकस्य होमानुवादात् तदुद्देशेनाभिक्रमणं विधीयते
प्रयाजानां सन्निहितत्वेपि तदपेक्षया प्रकरणस्य बलवत्त्वात् अन्यथाऽतिसन्निहितोत्तमप्रयाजांगस्य
दिति प्राप्ते प्रयाजान्विधायतान् प्रयाजानि ष्वा समानयत उपभृत इत्यनेनोपभृत्स्थाज्यस्यार्धं जुह्वां स्था
प्यमित्येवं समानयनं विधायाभिक्रामं जुहोतीत्युक्ता यो वै प्रयाजानां मिथुनं वेद सामिधो बर्हीरिव यजति न
नूनपातमेकमिवेत्यादिप्रयाजानि ष्वाहवींष्यभिघारयतीत्यंतेन प्रयाजपरामर्शात् तावत्संदर्भस्य प्र-
याजप्रकरणत्वनिश्चयात्॥ तन्मध्येपठितं तत्प्रयाजांगमिति निश्चयादयमेव संदंशन्यायः॥ तथा
त्वमसीदादिवाक्यार्थस्य यथादर्शाद्युपकारकत्वं निर्णीयते तन्न्यायेन पूर्वापरवाक्यार्थयोरैक्यबुद्ध्यु
पकारकत्वात्॥ तन्मध्यस्थितस्य द्वासुपर्णेत्यस्याप्यर्थस्यापि तदुपकारकत्वमेव निर्णेयं॥ ननु यद्य
तयोर्निमित्तं प्रथममुंडके प्राणादिकारणत्वस्य द्वितीये द्वासुपर्णेत्यादेः तृतीयेपि सखंडस्य प्रतिपा
दनात्॥ अभिक्रमणादिवदेव तन्मध्यस्य पुरुष एवेदमित्यादेरपि तदनुकूलत्वमेवेति चेन्न॥ प्र
थममुंडके उक्तरीत्या एकविज्ञानेन सर्वविज्ञानाद्युपक्रमस्य परेऽव्यये सर्व एकीभवंति स यो वै
तत्परमं ब्रह्म वेद ब्रह्मैव भवतीत्युपसंहारस्य मध्येपि पुरुष एवेदमित्यादिपरामर्शस्याद्वैतनिष्ठत्वा
त्॥ अद्वैतस्यैव महाप्रकरणित्वेन भूतयोनिवाक्यादीनां तद्धितरुत्थ सखंडे तात्पर्यस्य वक्तुमशक्यत्वा

त् ॥ अभिक्रमणादेः प्रयोजाद्युपकारकत्वं तु न मद्वाभकरणाधिरुध्यमिति विशेषात् ॥ तृतीयमुंडकांते पं
व्ययेसर्वएकीभवंतिसह यो वै तत् परमं ब्रह्म वेद ब्रह्मैव भवतीत्यैक्यलक्षणेन फलेनोपसंहाराच्च म
वर्तिनः परं साम्यमुपैतीत्यस्यापि पूर्वोक्तसंदंशन्यायेनाभेदरूपसादृश्यपरतयानुभेदोपसंहाररूपतापि॥
अतएव परमिति साम्यविशेषणं संसारिव्यावृत्तस्य निर्दुःखत्वादिना सादृश्यस्य निरंजन इति तत्पूर्वन्
वाक्येनापि लब्धतया पुनः सादृश्यप्रतिपादने अनुपयोगात् परमत्वविशेषितं सादृश्यं चाभेदरूपमेव ॥न
च स ह यो वै तत् परमं ब्रह्म वेद ब्रह्मैव भवतीति वाक्ये द्वितीयब्रह्मशब्दः जीवपर एव तस्य जाति जीवक
सनाद्यनेकार्थत्वस्य कोशप्रसिद्धत्वात् ॥ तथा च यः परमं ब्रह्म वेद स जीव एव भवति न परं ब्रह्मेत्यर्थः
एवाद्यो ब्रह्मशब्दः परमत्वेन विशेषितः ॥ एवं सायं गावः गोष्ठ एकीभवंति एकीभूता नृपाः सर्वे ववर्षुः पां-
वशरैः कीटो भ्रमरेणैकीभूतः इति स्थानेष्वयमत्यैक्यसादृश्यनिबंधनैकीभावस्य गोनृपकीटभ्रमरादौ दर्श
नाद त्रापि तदन्यतमनिमित्तेन गौण एकीभावव्यपदेशोपपत्तिरित्युपसंहारो भेदविषय एवातएव पर
व्यय इति समस्युपपत्तिरन्यथाऽश्रुततृतीयाकल्पनापत्तिरिति वाच्यं ॥ जीवे ब्रह्मपदप्रयोगसंभवेपि
कृते ब्रह्मोपादानमेवोचितमन्यथा जीवभावस्याब्रह्मभावस्य च प्रागेव सिद्धतया तस्य ब्रह्मज्ञानसाध्
त्वाभावात् परमं ब्रह्म वेद ब्रह्मैव भवतीति तस्य ब्रह्मज्ञानफलत्वोक्तेरसंगत्यापत्तेः ॥ एवं सति द्विती

यब्रह्मभवनमप्यर्थात् परमत्वविशेषितमेव एवंचोपक्रमोपसंहारयोरैक्यविषयत्वे पूर्वोक्तन्यायेन
मध्यस्थितस्य परेऽव्यये सर्व एकीभवंतीत्यस्य तदनुकूल्येन मुक्तस्य ब्रह्मणा तद्भेदाग्रहविषयत्वरूपैक्य
प्रतिपादकत्वमेव युक्तमेवं सति परेऽव्यय इति सप्तम्यपि युज्यते भेदव्यवहारान्वितविषयतायास्तदर्थत्वो-
त् ॥ सायंगावः गोष्ठ एकीभवंतीत्यत्र च भेदव्यवहृसत्वेनोक्तरूपैक्योपपादनायोगात् युक्तमेकस्थानस्थि
तत्वादिना तादृशव्यवहारोपपादनं ॥ न च विनिगमकाभावः उभयथापि तथाव्यवहारसंभवादिति वा
च्यं ॥ अस्मदुक्तरीत्या उपक्रमोपसंहारैक्यानुगुण्यस्य विनिगमकत्वात् ॥ कर्मणां वैकुंठगमनासंभवे
न कर्माणि विज्ञानमयश्चेत्याद्यसंगत्यापत्त्या एकस्थानस्थितत्वादिना प्रकृते तादृशव्यवहारस्य समर्थ
यितुमशक्यत्वात् ॥ अत एव मत्यैक्येन तादृशव्यवहारोपपादनमपि प्रत्युक्तं कर्मणां मत्यैक्यासंभ-
वेन कर्माणीत्यस्यासंगत्यापत्तेः ॥ कीटो भ्रमरेणैकीभूत इत्यादेरिव सादृश्यनिबंधन एकीभूतव्यवहारो
ऽत्रास्त्विति शंका तु सादृश्यपरत्वे सप्तम्यनुपपत्त्या निरस्ता मन्मते तु ब्रह्मणि लीनस्य कर्मणः ततो भेदग्र-
हाभावेन जले लवणमेकीभूतमित्यादिवत् स्वीयरूपहानेन तद्धर्मिकभेदाग्रहविषयत्वरूपैकत्वस्यैवोक्त
वाक्यार्थस्य संभवेनासंगत्यभावात् ॥ अनुरूपश्चात्र नदीसमुद्रदृष्टांतः यथा नद्यः स्यंदमानाः समुद्रायणाः
समुद्रं प्राप्यास्तं गच्छंतीति पर्यंतरूपहानोक्त्या अगृह्यमाणभेदत्वोक्तेः अयं तु विशेषः परस्परावयवभेदेन

परस्परमैक्यासंभवात् तत्रसतएवभेदस्याग्रहणमत्र [illegible]

पत्तेः ॥ नहिदृष्टांतेसर्वसाम्यापेक्षास्तीति ॥ एतेनाभिहितजलभेदसाधने [illegible]

॥ सिद्धांततदैक्यानभ्युपगमात् ॥ अतएवनिबंधेअवस्थितेरिति [illegible]

तासुभवतइत्यादिनानदीसमुद्रयोर्मेलनेपितत्स्वरूपेव [illegible]

न्नदीसमुद्रदृष्टांतोक्तिरयुक्तेत्याशंक्यस्पष्टभेदविल [illegible]

क्यपरमांडूक्योपनिषद्गतंपरात्परंपुरुषमुपैतिदिव्यं [illegible]

सगुणोपास्तिफलत्वेनब्रह्मविद्याफलत्वासंभवात् ॥ [illegible]

मुक्त्यभिमाचं ॥ अतएवब्रह्मलोकगतस्यपरस्यांतेकृत [illegible]

सिद्ध्यते ॥ एतेनएतदधिकरणसिद्धांतसिद्धांतमाह [illegible]

भवतार्थअयंभावः वाक्यांतरविरोधाच्च पूर्वापरविरोधतः ॥ [illegible]

विधपक्षत्रयमपिपूर्वपक्षोक्तमुक्तावभेदसापेक्षंस [illegible] सिद्धः [illegible]

मितिश्रुत्यंतरविरोधोक्तेः न्यायविवरणेचनिरंजनः परसाम्यमुपैति [illegible]

पुरुषमुपैतिदिव्यमित्युत्तरवाक्यविरोधस्यचोक्तेः ॥ अथभेदाभेदपरत्वेच [illegible]

तन्न तु समभी सायंगावः गोष्ठ एकीभवंतीतिवत् स्यादिति चेत् तत्रस्थानैक्यस्यैव प्रतीतेः तथा कर्माणि
विज्ञानमयश्च आत्मेति पूर्ववाक्यस्थ कर्मादीनां विरोधः कर्मणां ब्रह्मैक्यायोगात् ॥ किंच भिन्ननदीसमु-
द्रदृष्टांतं वदंती श्रुतिः स्वयमेव गौणार्थपरतां स्वस्या आचष्टे तिस्पष्टमेव भूयते हि एकीभवंतीत्यस्या अनं-
तरं यथा नद्यः स्यंदमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छंतीति भिन्ननदीसमुद्रदृष्टांतः एवं च रथ्या-
जलं विष्णुपदीजले नैकत्वमागतं इतस्ततो गता गावः सायमेकत्वमागताः एकीभूता तु सा सेना पांडवा-
नभ्यवर्षत इत्यादिवत् ब्रह्मपदे एकीभवंतीत्यादिवेदवाक् ॥ न च जलस्य जलांतरमेलने ऐक्यं तादृगेवेति भाष्यं
कसाव धारणश्रुत्या यतो वृष्टिः महद्भयत इति स्मृत्या च विरोधात् ॥ किंच मानभेदात् स्पर्शरसपूर्वभेदा-
च्च नीरयोः मेलनेप्यभेदो नास्ति यथैव क्षीरनीरयोः न केवलं यतो वृष्टिरिति स्मृत्युक्तपरिमाणभेदमा-
त्रं किंतु शीतोष्णयोः स्पर्शरसयोः तत्तत्सरित्संबंधिनोश्च जलयोर्मेलने स्पर्शादिभेदोपि दृश्यते अन्य-
था हंसेन विविच्यमानयोः क्षीरनीरयोरप्यभेदः स्यात् द्रुतसुवर्णताम्रयोर्मेलनेनाभेदे तत्कार्षपणादौ के-
वलस्वर्णकार्षपणात् मूल्यादिभेदश्च न स्यात् क्षीरे सिक्तासुरापि क्षीरं स्यात् प्रसिद्धश्च कूप्यादि समन-
दीजलानां गंगादि सह स्वजलानां च पुनः प्रत्येकं समुद्रसंगमार्थं विभक्तानां विलक्षणरूपरसादिमत्तया
भेदः ॥ किं चाय स्थितेरिति काशकृत्स्न इति सूत्रे मामत्यामेव कातुनद्याभिमता युष्मतः किंपायः परमाण

व: उ तेषां संस्थानःभेदः आहोतदवयवारब्धोऽवयवीतत्रसंस्थानभेदस्यावयविनोवासमुद्रे [illegible]
शालक्ष्यंसमुद्रेणोक्ततानदीपाथः परमाणूनांतुसमुद्रपाथः परमाणुभ्यः पूर्वस्थितेभ्यः भेद [illegible]
मुद्रादपितेषांभेद एवेत्यादिरीत्यानदीसमुद्रयोरभेदोनिरस्तः एवंचमाषादिवत्त्वरा [illegible]
लांतरस्यसंश्लेषोनाभिन्नताद्रवद्रव्यत्वेनान्योन्यमिश्रणेतुभेदाप्रतीतिरितिचंद्रि [illegible]
स्त्वभायमेयोतिदिक् ॥ श्रीमच्छंकरपादाब्जभूषणेपरदूषणे॥ व्याख्याद्वयविवेकेन [illegible]
सतांमोक्षाधिकरणेभूयान्मुदेवादिजयायच मीमांसान्यायपारीणराघवार्यप्रसादजा ॥ ॥

मो॰प॰धि॰क॰

समाप्तं.

श्रीगणेशाय नमः । तदनन्यत्वमारंभणशब्दादिभ्यः ॥ पूर्वोक्तभोक्तृभोग्यविभागाभावप्रसंगापूर्वपक्षे स्याल्लोकवदिति परिणामवादमाश्रित्य समाधानमुक्तं तत्रैव विवर्तवादेन मुख्यसमाधानार्थमिदं सूत्रं तथा चैतत्सूत्रव्याख्यानोपक्रमे भाष्यं अभ्युपगम्य चेमं व्यावहारिकं भोक्तृभोग्यलक्षणं विभागं स्याल्लोकवदिति परिहारोऽभिहितः नत्वयं विभागः परमार्थतोऽस्तीत्यादि ॥ एतत्सूत्रव्याख्यानोपसंहारेऽपि वक्ष्यति भगवान् भाष्यकारः सूत्रकारोऽपि परमार्थाभिप्रायेण तदनन्यत्वमित्याह व्यवहाराभिप्रायेण तु स्याल्लोकवदिति महासमुद्रस्थानीयतां ब्रह्मणः कथयति अप्रत्याख्यायैव कार्यप्रपंचं परिणामप्रक्रियां चाश्रयति सगुणोपासनेषूपयोक्ष्यत इति तत्राभ्युपगम्येत्यस्य मिथ्यात्वेनाभ्युपाद्येत्यर्थः ॥ परिणामेत्यादेः परिणामित्वप्रक्रियां दृष्टांतत्वेनाश्रयति परिणामवादसाधारणदृष्टांतमाहेति तु फलितोऽर्थः ॥ भाष्ये महता प्रबंधेनास्मिन्नधिकरणे प्रपंचमिथ्यात्वोपपादनं च ब्रह्मणः प्रत्यगभिन्नत्वं न संभवति कर्तृत्वाकर्तृत्वादिविरुद्धधर्मयोरेकत्र समावेशासंभवात् ॥ विरुद्धधर्माणां दृश्यत्वादिना मिथ्यात्वसिद्धेर्नायं दोष इति तु नं सम्यक् प्रबलप्रत्यक्षविरोधजागरूके दुर्बलेन लिंगेन मिथ्यात्वासिद्धेरिति शंकानिरासाय ॥ केचित्तु पूर्वसूत्रे लोकवदित्युक्ते लोके विकारानृतत्वाप्रसिद्धेर्विकारं सत्यतामभ्युपेत्यैव परिहारो दर्शित इति भ्रमः स्यात् तथा औपाधिकोऽपि जीवब्रह्मणोर्भेदः उपाधिसत्यत

यापारमार्थिकः स्यादितिभ्रमः स्यादितितद्व्याकरणायास्मिन्सूत्रेविकारमिथ्यात्वप्रतिपादनमितिद्

दंति ॥ नन्वेवंमिथ्यात्वोपपादनसंगतावपि अस्मिन्सूत्रेअभ्युपगम्यचेममितिभाष्येणमिथ्यात्वाद्यु

त्पादनकीर्तनस्यकोपयोगइतिचेदत्रब्रूमः ॥ मिथ्यात्वोपपादनंविनापूर्वसूत्रसिद्धांतानानुन्मेषेणैतदधि

करणस्यतादृशमिथ्यात्वोपपादकस्यतच्छेषत्वापत्त्या अधिकरणांतरत्वानावश्यकतास्यादितिशंका-

यांतदावश्यकताद्योतनायमिथ्यात्वोपपादनंविनापिपूर्वाधिकरणसिद्धांतसंभवप्रदर्शनायतत्कीर्तन

स्यान्नसामंजस्यात् ॥ यद्दानोक्तंब्रह्मणोजगदुपादनत्वंयुक्तंसिद्धांत्यभिमतनिर्विकारत्वभंगप्रसंगा

दितिशंकायांविकारमिथ्यात्वोपपादनमत्रक्रियतेस्वपक्षसाक्षाद्बाधकनिरासस्यपादार्थत्वान्नासंग

तिः ॥ तथाचोक्ताक्षेपसंगतिप्रदर्शनायभाष्येतदुक्तिः पूर्वाधिकरणएवतद्व्युत्पादनेपुनरत्रत्वसंगतिः

संभवतीत्युपयुक्तमेवाभ्युपगम्येत्यनेनमिथ्यात्वाद्युत्पादनकीर्तनमितिध्येयं ॥ अत्र चोक्तवैत्वात्स्वप

क्षसाक्षाद्विरोधिनोविरोधिधर्मसत्यत्वादेःबाधकस्योत्थापनाद्ध्यायादिसंगतिः ॥ नात्र तत्त्वस्यभेदादि

रुद्धत्वात् भोक्त्रादिविभागानुपपत्तिरूपतर्कस्याप्रतिष्ठितत्वेपिब्रह्मत्वनुगृहीतस्यनिर्विकारत्वानुपप

त्तिरूपतर्कस्यैवप्रतिष्ठितत्वमितिमत्वावस्थानादनंतरसंगतिः ॥ अत्रब्रह्मणोजगदुपादानत्वंनिर्वि

कारत्वसंगापत्तिरूपतर्कविरुद्धंनवेतिसंशयेभवत्येवतर्कविरुद्धंब्रह्मणोनिर्विकारत्वस्यसिद्धांति

नोप्यनुमतत्वाद्धाप्यत्यनवकाशात् मूलशैथिल्याभावाच्चेति पूर्वपक्षेनोक्ततर्कविरोधः धर्मिसमानस
त्ताकविकारशून्यत्वं रूपसिद्धांत्यभिमतनिर्विकारत्वस्य ब्रह्मगतोपादानतया अविरोधात् विकारस्य
मिथ्यात्वात् ब्रह्मणश्च सत्यत्वात् स्वीकृतेप्युपादानत्वे निर्विकारत्वभंगाभावात् ॥ मिथ्यात्वं चानि
र्वाच्यत्वं नात्यंतासत्त्वमिति सिद्धांतमाह सूत्रकारः तदनन्यत्वमिति ॥ कार्यस्य विकारजातस्य तदन-
न्यत्वं कारणानन्यत्वं मिथ्यात्वमिति यावत् कुतः आरंभणशब्दादिभ्यः आरंभणशब्दस्तावत् एकविज्ञानेन सर्वविज्ञा
नं प्रतिज्ञाय दृष्टांतापेक्षायामुच्यते यथा सौम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्यात् वाचारंभणं विका
रो नामधेयं मृत्तिकेत्येव सत्यमित्येवंरूपः आदिपदात् ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वम-
सि इदं सर्वं यदयमात्मा ब्रह्मैवेदं सर्वं आत्मैवेदं सर्वं नेह नानास्ति किंचनेत्येवमादिश्रुतिजातं विश्वं
मिथ्या दृश्यत्वात् परिच्छिन्नत्वादित्याद्यनुमानं भाष्याद्युपदर्शितं संग्राह्यं ॥ अत्र चारंभणशब्दादिभ्य
इति सूत्रांशेन वाचारंभणमित्यादिश्रुतेर्हेतूकरणात् ॥ तस्याश्च प्रपंचमिथ्यात्वकथन एव स्वरसा
दनन्यत्वपदेन साध्यतया मिथ्यात्वमेव प्रतीयत इति ध्येयं ॥ अथ तदनन्यत्वपदेन कथं मिथ्यात्वं प्रतीति
स्तत्र तस्य शक्त्यादिर्याह कप्रमाणाभावादाधुनिकलक्षणाभ्युपगमे च सूत्राक्षरास्वारस्यं मिथ्यात्व
मारंभणशब्दादिभ्य इति विन्यासापेक्षायां निर्बीजता चेति चेदत्रोच्यते तदनन्यत्वमिति सूत्रेऽनन्यत्व

लइति पद भाष्यान्वीयते अनन्यत्व पदं चापवर्णनीयं ॥ तथा च तदनन्यत्व पदं तत्त्वतस्तदनन्यत्व परं तादात्
म्यं च तदनन्यमित्यत्रान्यपदस्यात्यंतभिन्नार्थकतया तादात्म्यस्यापि ततो लाभसंभवात् ॥ तदैक्यम
न्यं न तद्त्वं तभेदाभावस्य तादात्म्यं विनानुपपन्नत्वात् न च भेदात्यंताभावमात्रं तादात्म्यं पृथिवीत
द्रूपयोर्भेदाभेदवादिनो मते भेदवति भेदात्यंताभावासंभवात् किंतु तस्मादन्यत्वे सति तादात्म्यं न च तद्रू
पे धर्मे विशेषरूपमतिरिक्तं वेत्यन्यदेतत् ॥ तत्त्वतस्तदनन्यत्वं च तदन्यस्य तात्त्विकरूपशून्यत्वं त
था च विशेषनिषेधस्य शेषाभ्यनुज्ञानार्थत्वात् ब्रह्मान्यजगद्रूपस्यातात्त्विकत्वान्मिथ्यात्वापरपर्याया
लभ्यत इति नोक्तदोषः ॥ न च तत्त्वतस्तदनन्यत्वसाधनमात्रे जगतो मिथ्यात्वासिद्ध्योक्तपूर्वपक्षानिरा-
ससंभवेन तादात्म्यसाधनं व्यर्थमिति शंक्यं तुच्छसाधारणेन ब्रह्मव्यतिरिक्ततात्त्विकरूपशून्यत्वेन जग
तो मिथ्यात्वेऽपगते तस्य तुच्छत्वापत्त्या तदुपादानत्वं ब्रह्मणो दुर्घटमिति शंकानिरासाय तादात्म्यस्या
पि तत्र वक्तव्यत्वात् असत्ख्यातिमते घटातिरिक्ततात्त्विकरूपशून्यस्यापि शुक्तिरजतादुर्घटज्ञानेन
ज्ञाततात्त्विकरूपत्वासंभवापत्त्या विषयादेर्ब्रह्मविज्ञानेन विज्ञाततात्त्विकरूपवत्त्वरूपस्य वक्ष्यमाणै
कविज्ञानेन सर्वविज्ञानस्योपपादनायोगेन ब्रह्मणो विषयादितत्त्वरूपताबोधनाय तयोस्तादात्म्य
स्यावश्यं वाच्यत्वाच्च ॥ अनन्यत्वं व्यतिरेकेणाभाव इति भाष्येऽपि निरुक्तरूपमुभयं विवक्षितं न खल्व

न्यत्वमित्यभेदं ब्रूमः किंतु भेदं व्यासेधाम इति मा मत्थाः अपि अभेदं ऐक्यं भेदं तदन्यतात्त्विकरूपवत्ता
त्वादात्म्यासमानाधिकरणतद्भेदवत्त्वं चेत्यर्थो विवक्षित इति न काचिदनुपपत्तिः ॥ एतेन न तावत्
ब्रह्माभेदः तदनन्यत्वं अनृतस्याविश्वस्य ब्रह्माभेदायोगात् अनंगीकाराच्च ॥ अज्ञानविशिष्टेनोपादा
नाभेदोस्तीति चेन्मुमुक्षुज्ञेय शुद्धब्रह्मज्ञानादेव सर्वविज्ञानार्थश्रुत्यर्थे नैवाभेदस्य वक्तव्यत्वात् ॥ अ
न्यथा अविद्यापि येनाश्रुतं श्रुतमिति वाक्योक्तज्ञेयकोटिप्रविष्टा स्यात् ॥ नापि न खल्वनन्यत्वमित्यभे
दं ब्रूमः किंतु भेदं व्यासेधाम इति कल्पतरूक्तरीत्या ततो भेदाभावमात्रं तदनन्यत्वं भेदाभावे अभेदध्रौव्या
त् भेदाभावे सत्यानृतव्यवस्थायोगाच्च ॥ अभेदाभावेन व्यवस्थायां तेनैवैकविज्ञानेन सर्वविज्ञानाभा
वोपि स्यात् ॥ यदि चैकविज्ञानेन सर्वविज्ञानानुपपत्त्याभेदाभावः सत्यानृतव्यवस्थानुपपत्त्या चाभेदा
भावः कल्प्यते तर्हि उभयानुपपत्त्या लाघवाय तथा इदं सर्वं यदयमात्मा नेति नेतीत्यादि सामानाधिकर
ण्यश्रुतिभेदश्रुत्योर्मृत्पिंडादिदृष्टांतस्य च स्वारस्याय भेदाभेदावेव किं न कल्प्येते ब्रह्मण एकरसत्वश्रु
तिरपि अनेकरसात् प्रपंचात् भेदाभावेप्यभेदाभावमात्रेण वाभेदेप्यभेदेनैवोपपन्नास्तु. यथा च सत्य
स्यानृताभेदो न युक्तस्तथा ततो भेदाभावोपि ॥ नापि ब्रह्मव्यतिरेकेणासत्त्वं तदनन्यत्वं विशेषनिषेध
स्यापि प्राप्यतज्ज्ञानार्थत्वात् आनंदादिवत् जीवचैतन्यवच्च ब्रह्मात्मकत्वापातात् ॥ ब्रह्मण्यारोपित-

त्वं तु न तदनन्यत्वशब्दार्थः शुक्त्यारोपिते रूप्ये तदनन्यशब्दाप्रयोगात् प्रातिभासिकव्यावहारिकयोर्व्या-
वहारिकपारमार्थिकाभ्यामनन्यत्वाभावे अनिर्वाच्यत्वासिद्धेश्च एकविज्ञानेन सर्वविज्ञानायोगाच्च मृ-
त्पिंडादिदृष्टांतानुपपत्तेश्च कथं हि ब्रह्मविज्ञानाद्विज्ञातं सकलं भवेत् इति चंद्रिकोक्तं पूर्वोक्तभाष्याभि-
प्रेतार्थानवबोधविजृंभितमित्यनादरणीयमेव आरंभणशब्दादिभ्य इति सूत्रांशे न वाचारंभणमित्यादि
श्रुतेर्हेतूकरणात् तस्याश्च प्रपंचमिथ्यात्वकथन एव स्वरसादुक्तरीत्या नादात्म्यघटितमिथ्यात्वस्यैव तद-
नन्यत्वमित्यनेन विवक्षितार्थप्रतीतेः यद्रजतमभात् सा शुक्तिरिति सामानाधिकरण्यप्रतीतेः सर्वसं-
मतत्वात् आरोपितेऽपि तत्त्वतोऽधिष्ठानानन्यशब्दप्रयोगाविरोधात् प्रातिभासिकव्यावहारिकयोरपि
तत्त्वतो व्यावहारिकपारमार्थिकाभ्यामनन्यत्वाभावे नानिर्वचनीयतायानिष्पत्त्यूहं सिद्धेश्चोक्तचंद्रिका-
कारोक्तस्य कस्यापि दोषस्यानवकाशात् ॥ अथवा वाचारंभणमित्यादिश्रुतेः प्रपंचसत्यतामुपेत्याप्य-
र्थवर्णनसंभवात्कथं तस्याः प्रपंचमिथ्यात्वकथन एव स्वरसः तथा हि केचित् वर्णयंति एकविज्ञानेन
सर्वविज्ञानोक्त्या कार्यकारणयोरभेदे उपक्षिप्ते पिंडे दृष्टेऽपि घटादिगोचरः संशयः पिंडघटयोरयौक्ति-
यो भेदः नामादिभेदश्च कथमुपपन्न इति शंकायां वाचारंभणमिति वाक्यशेषः वाचा घटेन जलमाहर
इत्यादिवाक् तत्पूर्वको व्यवहारश्च वाक्पदार्थः तदर्थं अध्ययने नवसतीत्यादाविव फलस्यापि हेतु-

पिंडादिनामव्यवस्था भवस्थाभेदानुसारेणोपकर्तव्यानन्तदर्शनकार्यकारणद्रव्यमेद [illegible]
इतिपर्यवसितोर्थ इति व्याख्यानं तदपि वाचारंभणमित्यत्र मृदाभिन्न इति पदाध्याहारात् नामधे
यपदस्य घटादिपरत्वांगीकारेण संकोचकल्पनात् मृत्तिकेत्यत्र घटादिद्रव्यमिति पदाध्याहारापे
क्षरसं ॥ यदपि वाचा वागिंद्रियमात्रेणारंभणं यस्य तन्नामधेयं विकारः संस्कृतापभ्रंशारूपेणार्थिकं
यमाणत्वात् व्याकरणसापेक्षेण वागिंद्रियेण निष्पाद्यं मृत्तिकेत्येव सत्यं नित्यं यथा हृदपेणानादि
त्यर्थः नवधेनास्य हन्यते एतत्सत्यं ब्रह्मपुरमित्यत्र सत्यपदस्य नित्ये प्रयोगात् सदा [illegible]
तस्य सत्यपदत्वेन सदातनार्थकत्वाच्च ॥ एकविज्ञानेन सर्वविज्ञानं हि सादृश्यात् प्राधान्याद्वा त
एकस्य ब्रह्मणो ज्ञानेन सत्त्वादिना तत्सदृशस्य ज्ञाने मृत्पिंड मृन्मया दृष्टांताः प्रधानस्य [illegible] ज्ञाने
नत तूणीभूतस्य सर्वस्य ज्ञाने संस्कृतापभ्रंशो दृष्टांतः अपभ्रंशाज्ञानाद्धि यत्फलं तत् तदार्थिक
सार्वभौमिकव्यवहारादिकं संस्कृतज्ञानाद्भवतीति संस्कृतं प्रधानं तादृशगुणप्रधानदृष्टांतनालाभा
र्थं वाचारंभणमित्यादावपि यथा सौम्यैकेनेत्यादिकमनुषंजनीयमिति रीत्या आनंदतीर्थीयव्या
ख्यानं तदप्यस्वरसं ॥ तथा हि वाचेत्यनेन वागिंद्रियमात्रं लक्षणीयं ॥ अन्यथा व्याकरणनिष्पाद्य
त्वालाभेनापभ्रंशात्वाभापत्तेः मन्मतेत्वाचेत्यस्य वाङ्मात्रमित्यर्थे नामधेयमित्यत्र नामधेयमात्रः

मित्यर्थे लक्षणा तु श्रुतसामानाधिकरण्यानुपपत्तिनिबंधना लोकसिद्ध्या चेति वक्ष्यते सत्यशब्दस्या
बाध्येनूदत्वात् नित्यत्वार्थकत्वमपि लक्षणयैव संस्कृतस्यापि मुख्यनित्यत्वाभावेन सदाशब्दमा
दाययोगासंभवेन व्याकरणनिष्पाद्यत्वरूपगौणनित्यत्वे लक्षणापत्तिश्च सदाशब्दस्य सत्यवंतत्वम
पि व्याकरणासिद्धमेव विकारशब्दस्य मुख्यविकारार्थकत्वे त्वदिष्टार्थासिद्ध्या संस्कृतोच्चारणारा
त्वेनोच्चार्यमाणार्थकत्वं लक्षणयैव नामपदस्यापि शब्दार्थकत्वं लक्षणयैव अपभ्रंशस्य संकेतवत्मा
तिपादकरूपद्वयरूपार्थत्वाभावात् ॥ यथा सौम्यैकेनेत्यादिकमनुषंजनीयमित्यपि न सत् पूर्ववा
क्यमविष्टभागस्योत्तरवाक्यघटकत्वेन प्रतिसंधानं ह्यनुषंगः स च प्रकृते न संभवति प्रकृते हि मृत्तिके
त्येव सत्यमित्यादेः पश्चाद्यथा सौम्यैकेन मृत्तिकेत्यनेन सर्वस्तद्विकारो विज्ञातो भवतीत्यादि हि विव
क्षितदृष्टान्तत्वमायकल्पनीयं न चैतत् पूर्ववाक्यमविशिष्टं किंच यथा वाचारंभणमित्यादिना गुणप्र-
धानभावः श्रुत्या ज्ञापितः तथा मृत्पिंडतद्विकारयोः सादृश्यमपि ज्ञाप्येत यदि च मृत्पिंडज्ञानेपि तद्धि
द्वारा घटत्वादिना ज्ञानासंभवात् ॥ मृत्त्वेन रूपेणैव घटादिज्ञानं मृत्पिंडज्ञानादिति पर्यालो
चनात न तत्सदृशज्ञानं तज्ज्ञानाधीनमिति [illegible] इत्युच्यते तर्हि संस्कृतज्ञानादपभ्रंशज्ञानासंभव

संभवतीति तदेव श्रुत्योच्यते किं वाचारंभणमित्यादिना गुणप्रधानभावज्ञापकेनेति श्रुतिस्वारस्यहा
निः अपि च कार्ष्णायसानां सदृशदृष्टान्तानां पश्चादेव वाचारंभणं नामधेयं विकार इति यत् संस्कृत
सत्यमिति सामान्यत एवोच्यते ननु मृत्पिण्डादिदृष्टान्तस्यैवैकस्यान्ते विशिष्य श्रुतिकेत्यैकैकशद्बान्तरा
णामपि संस्कृतानां संभवे न मृत्तिकेत्येवेत्यादेरुपपादनमप्यस्वरसं आयसमित्येव सत्यमित्यस्यै
व पूर्णत्वसंभवे कार्ष्णायसमिति किमित्युक्तमिति शंकाप्यनुत्तरैव लब्धमते मन्यते तु कार्ष्णायसादि वाचक
लघुशद्बान्तरसंभवेपि न दोषः घटाद्यर्थविवक्षायां घटादिशद्बानामिव कलशादिशद्बानामपि तत्प
र्यायाणां प्रयोगात् एकविज्ञानेन तत्सदृशानन्तरधीनं च सर्वमपि ज्ञायत इत्यप्यसंगतं नियमा
भावात् ॥ नहि गोज्ञानेन गवयादेः राजज्ञानेन प्रजादेः नियतं ज्ञानं अनियतज्ञानं च सदृशादरेपि किमि
तु पादनमित्यत्रानुत्तरमेवेति दिक् ॥ एवं मतान्तरे प्रपंचसत्यतामुपेत्य वाचारंभणश्रुतेरर्थम
तिपादने अस्वारस्यमेवेत्यतो प्रपंचमिथ्यात्वपरत्वेनैवास्मद्भाष्योपदर्शितं व्याख्यानं स्वरसं ॥ त
थाहि भाष्यं एकेन मृत्पिण्डेन परमार्थतो मृदात्मना विज्ञातेन सर्वं मृन्मयं घटशरावोदंचनादिकं मृदा
त्मत्वाविशेषात् विज्ञातं भवेत् यतो वाचारंभणं विकारो नामधेयं वाचैव केवलमस्तीत्यारभ्यते वि
कारो घटः शरावः उदंचनं चेति न तु वस्तुवृत्तेन विकारो नाम कश्चिदस्ति नामधेयमात्रं ह्येतदनृतं

मृत्तिकेत्येव सत्यमिति ॥ ननु नामधेयमित्यत्र मात्रपदार्थातिभावेणानृतत्वपर्यवसायि नामधेयप
दव्याख्यानं कथं स्वरसमिति चेदत्रोच्यते वाचाव्यपदिश्यमानं विकारं वाचारंभणमिति वाक्योदितमनू
द्य नामधेयत्वविधानं ह्यत्र स्वरसतः प्रतीयते तत्र च श्रुतार्थमादाय सामानाधिकरण्यासंभवान्नामधेय
पदे नामधेयवाच्यत्वलक्षणामुपेत्य सामानाधिकरण्योपपादने पौनरुक्त्यापत्तेः मृत्तिकेत्येव सत्य-
मिति वाक्यशेषस्वरसात्त्वार्थपरिसंख्यार्थमुपेत्य मात्रपदतात्पर्येण मिथ्यात्वपर्यवसायितदर्थकथ
नस्यैव स्वरसत्वात् दृष्टं च नामपदस्याभासकद्योतकत्वं यजते नामयज्ञैस्ते दम्भेनाविधिपूर्वकमिति
लोकेपि पुत्राभासे पुत्र इति नामधेयं नाम पुत्रत्वमस्तीति मृत्तिकेत्येव सत्यमिति तु गुडजोद्दिका-
न्यायेन मृदः सत्यत्वानुवादपूर्वकं विकारानृततामतिपादनायैव स्वरसं अमुमर्थं दार्ष्टान्तिके दर्शय
ति एवं हि सोम्य स आदेशो भवतीति एवंशब्देन वाचारंभणं विकारो आदेश एव सत्य इति प्रतिपादितं
भवति आदेशश्च आदिश्यत इत्यादेश इति व्युत्पत्त्या उक्तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवतीत्युप
क्रांतं उपदेशैकगम्यं ब्रह्मैव इत्यमेवं चास्मिन् प्रकरणे तैजसानां पदार्थानां त्रिवृत्करणनिरूपणाव-
सरे स्पष्टमेव प्रतिपादितं यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्ने
रग्नित्वं वाचारंभणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यमिति अत्रापागादग्नेरग्नित्वमिति तस्य

ष्टमेवविकारोपमर्दोदर्शितोऽतःस्वरसतोवाचारंभणश्रुतेर्विकारानृतत्वपरतैवेत्यवधार्यते यद्वा मृत्तिकेत्ये
सत्यमित्यादौहेतुर्वाचारंभणंविकारोनामधेयमिति आरंभणमुत्पत्तिः वाचावाङ्मात्रंविचारासहमिति
नयाचोत्पत्तिःसतोवाऽसतोवेतिनिरूपयितुमशक्यत्वादुत्पन्नसामान्यविचारासहमितिभावः तावतापुनरा
ग्रांसाधारण्येनहेत्वलाभादाह विकारोनामधेयमितिनाशादिविकृतियुक्तंनाममात्रंविचारासहमि
तियावत् अर्थेनामाभेदासंभवात् अपृभस्य इत्यादाविवमात्रार्थोनभावेनविचारासहत्वलाभः मृत्ति
त्येवसत्यमित्यस्यार्थश्चांद्रिकोक्तदूषणपरिहारावसरेवक्ष्यते ॥ एवमैतदात्म्यमिदंसर्वंतत्सत्यंस
त्मातत्त्वमसिश्वेतकेतोइतिश्रुतेरपिविकारानृतत्वप्रतिपादनएवस्वारस्यं ॥ तथाहि ऐतदात्म्यमि
सर्वमितिहि इदंसर्वंयदयमात्मेतिश्रुत्यंतरानुसारात् ॥ सदेवसोम्येदमग्रआसीदितिउपक्र
साराच्च ॥ एषआत्माअस्येतिबहुव्रीहिंकृत्वाततोभावप्रत्ययेकृतेभावप्रत्ययस्यप्रकारीभूतमप्र
र्थपरत्वात् ॥ बहुव्रीह्यर्थविशेषणीभूतात्मपरामर्शकत्वेन एषआत्माइदंसर्वमितिप्रतिपादयति
आत्मेदंसर्वमित्येवमुक्त्वासामानाधिकरण्यमात्मात्मीयभावेनौपचारिकमितिशंकानिराक
यद्बहुव्रीहिभावप्रत्यययोरुपादानं तथासतिबहुव्रीहिणैवमुख्ययावृत्त्याआत्मात्मीयभावेलब्धेपुन
र्भावप्रत्ययद्वयप्रयत्नांतरकरणंव्यर्थंस्यादितितत्कैमुत्यान्निरासः तच्चसामानाधिकरण्यमुपपद्यत इति

यत्परिणामाभिप्रायेण यदुज्जनमभात् साधुक्तिरिति चेद्वा आरोपितबाधाभिप्रायेण नेति द्वेधास्तं
भवति अतस्तन्निर्धारणाय तत्त्वमिति वाक्यं तत्र हि तच्छब्दः प्रकृतमात्मानं परामृशति तस्यै
व तात्पर्यविषयतया अस्मिन् संदर्भे प्राधान्यात् स आत्मेति वाक्येन तस्यैव परामर्शात् ॥ तदेकार्था
नुसाराच्च तत्त्वतच्छब्देनात्मानं परामृश्य तस्याधिशिष्टसत्यताप्रतिपादनमनात्मनोः कृततांबोध
यत् पूर्वोपदर्शितसामानाधिकरण्यं बाधायामेवेति व्यवस्थापयति तत्त्वतत्त्वमसीति वाक्यमपि
स्वस्वारस्यानुसारेणोपक्रमस्वारस्यानुसारेण च यथाश्रुतमेव न तु प्रकृष्टगोत्वामहं स ओमित्यात्मानं
युञ्जीतेति श्रुतेः तस्मै त्वं समर्पणीयोसीत्यर्थेन तस्मै त्वं तत्त्वमिति यतो वा इमानि भूतानि जायन्त इति श्रु
तेः तस्मात्त्वमुत्पन्नोसीत्यर्थेन तस्मात्त्वं तत्त्वमिति स कारणं करणाधिपाधिप इति श्रुतेः तत्स्वामिकोऽ
सीत्यर्थेन तस्य त्वं तत्त्वमिति सन्मूलाः सोम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठिता इति श्रुतेः तस्मिन् त्वं प्र
तिष्ठितोसीत्यर्थेन तस्मिन् त्वं तत्त्वमिति वा सुपां सुलुगिति विभक्तिलोपादिना क्लेशेन व्याख्येयं प्रदर्शि
तानेकार्थसंभावनया व्यामोहापत्तेरर्थविशेषानिर्णयात् एवं शरीरवाचकानां शरीरिपर्यन्तत्वमुपेत्य शरी
रीरिशरीरभावेन सामानाधिकरण्याभिप्रायेण तत्त्वमसीति वाक्यार्थवर्णनमपि न स्वरसं तत्त्वं त
त्वंशब्दस्येश्वरशरीरभूतजीववाचकस्येश्वरे वृत्तिरभ्युपेयते त्वंशब्दार्थस्य तच्छब्दार्थविशेषणत्वा-

मायात् किंतु तच्छब्दस्यैव प्रकृतपरामर्शकस्य त्वंशब्दार्थजीवेऽभेदसंबंधेन विशेषणासमर्पकत्वा
न्यथा असीति मध्यमपुरुषानुपपत्तेः त्वंशब्दार्थस्येतरविशेषणत्वे आकांक्षाभावेनाख्यातसामानाधि
करण्यायोगात् युष्मच्छब्दस्याख्यातसामानाधिकरण्य एव युष्मद्युपपदे समानाधिकरणे स्थानि
न्यपि मध्यम इति सूत्रेण मध्यमपुरुषविधानात् तस्य त्वंशब्दार्थस्य विशेष्यत्वमुपेयं न च परमात्मपर
तच्छब्दस्य वृत्तिः शरीरवाचकानां शरीरिपर्यंतत्वाभ्युपगमेऽपि न संभवति ईश्वरस्य जीवं प्रति शरीर
त्वाभावात् अतो मध्यमपुरुषोपपत्तये जीवविशेष्यकमेव सामानाधिकरण्यमुपेयं दृश्यते च त्वम
शब्दार्थयोर्विशेषणविशेष्यभावव्यत्यासे मध्यमोत्तमपुरुषयोर्व्यत्यासः त्वं वा अहमस्मि भगवो देवते अ
हं वै त्वमसीति ॥ एवं सद्विद्यायाः प्रपंचमिथ्यात्वप्रतिपादन एव स्वारस्यं मोक्षधर्मे श्वेतकेतुसुवर्चो
पाख्यानरूपोपबृंहणेन स्पष्टीकृतं सूत्रकृता भगवता व्यासेन ॥ तथा हि तत्रोपाख्यायते देवकन्या सु
वर्चला जन्मांतरसिद्धसहजब्रह्मतत्वानुभवात्तादृशं पतिमिच्छंती श्वेतकेतुं पितृसमीपतो लब्ध्वा तत्त
बोधमुपश्रुत्य तं वृतवत्यपि त्रापि तस्मै निवेदिता ताभ्यां दंपतीभ्यां ब्रह्मनिष्ठाभ्यां वैदिककर्मानुष्ठा
नयुक्तं गार्हस्थ्यमाश्रित्यास्थितमिति तत्र तयोरित्थं ब्रह्मकथारूपः संवादः प्रवृत्तः ततः कदाचित् मनो
रमं श्वेतकेतुं सुवर्चला पप्रच्छ को भवान् ब्रूहि मे तत् द्विजोत्तम तामाह भगवान् वाग्मी त्वया ज्ञातो न संशयः

द्विजोत्तमोऽहंमनोसम्यग्नपरायणः ॥ सानमाहात्म्यमात्मानंपृच्छामिहृदिशायिनं ॥ नत्वमुक्ता
प्रत्युवाचैनांसर्वज्ञोमुनिपुंगवः ॥ मन्नसौवसमायुक्तमात्मानमन्यसेयदित ॥ तन्निश्च्यामोत्र
सम्भावेवर्ततदेहवधनः ॥ त्वमप्यहंमहंसर्वमहमित्येववर्तते ॥ नातनंतरमार्थेनत्वयन्या
त्वंपरिपृच्छासि अत्रसाहिद्यायांतत्त्वमसीत्यसकृत्पित्रोपदिष्टःश्वेतकेतुः कथमात्मानंबुध्यतइतिजि
ज्ञासमानयासुवर्चलयाकस्त्वंद्विजोत्तमेतिप्रश्नःकृतस्ततःप्रश्नाभिप्रायमवगच्छतापिश्वेतकेतुना
क्रमेणतमर्थंसाबोधनीयेतिमत्वातत्रोत्तरमुक्तंद्विजोत्तमेतिसंबोधयंत्यात्वयाब्रह्मणोहमित्यवग
तमेवकिमत्रप्रष्टव्यमितिततःसुवर्चलयादेहोपाधिकत्वेनात्मानेकल्पितमत्यसंब्राह्मण्यंनपृच्छा
मिकिंतुद्विजोत्तमोहमित्यहंशब्देनदेहादिविविक्तंयमात्मानंहृदिशायिनंनिर्दिशसि पृच्छा
मीत्युक्तेतत्रोत्तरमुक्तंअहंशब्दोमनःशबलितात्मस्वरूपेवर्ततेमनःशबलितात्मस्वरूपंचमिथ्याब्रा
णकुलोत्पन्नेदेहोपाधिकआत्मनिब्राह्मण्यमिवअतःआत्मतत्त्वजिज्ञासुभिर्नाहंशब्दार्थःप्रष्टव्यःअ
पिचाहंभावःसर्वसाधारणःप्रत्यक्षसिद्धोऽतःपरमार्थवस्तुजिज्ञासाचेन्नाहंभावःप्रष्टव्यः तदनंतर
कर्तृत्वभोक्तृत्वादियुक्तमहंभावंपरानृतमवगच्छसितर्हिकर्तृत्वपूर्वकंवैदिककथमाचरसिइति
पृष्टेलोकसंग्रहार्थंवैदिककर्माचरणमित्युक्तंतदनंतरंसर्वैरात्मनिप्रयुज्यमानस्याहंशब्दस्यकथं

त्मार्थता न स्यादिति मनसि निधाय शब्दार्थसंबंधप्रश्ने कृते न संयोगादिः शब्दार्थयोः संबंधोपि तु वाच्य
वाचकभाव इत्युत्तरमुक्तं तदनंतरं दंपत्योरियं प्रश्नोत्तरपरंपरा सुवर्चला सदाहंकारशब्दोयं कथं
मात्मनि संश्रितः ॥ नचात्र तत्र वर्तेत इति मिथ्या भविष्यति ॥ श्वेतकेतुः अहंशब्दोप्यहंभावेना
त्मभावे प्रभुः प्रभो ॥ नवर्तते परे चिंत्ये वाच्यः सगुणलक्षणः ॥ सुवर्चला अहंभावोत्र को नामात्मा
भावस्तथैव च ॥ तन्मे ब्रूहि यथान्यायमेवं चेन्मुनिपुंगव ॥ श्वेतकेतुः मृन्मयो हि घटाभासस्तादृ
भाव इहेष्यते ॥ अहंभावः परे चिंत्ये ह्यात्मभावो महान्परः ॥ नचात्र तत्र वर्तेत इति नैव विरु
ते ॥ अत्र शब्दार्थयोर्वाच्यवाचकभावः संबंधोस्ति चेत्कथमहंशब्दः आत्मवाच्यो न स्यादिति प्र
कृते अहंशब्दो नात्मनि मुख्यया वृत्त्या वर्तते ॥ किंतु अहमर्थ इत्युत्तरमुक्तं ततः को नामाहमर्थ
द्न्य आत्मेति पृष्टे मृदि घटाभासवदात्मन्यहंभावोप्याभास इति अहमर्थात्मनोर्विवेकं दर्शयित्वा
ल्पिताकारोपधानेन प्रवर्तमानः शब्दः नप्रुत्वाधिष्ठानपर्यंतं प्रवर्तते ॥ रजतोपधानेन प्रव
मानः शुक्तौ रजतशब्द इवातो कल्पितोपाधिनिर्मुक्तोहं शब्दो न प्रुत्वात्मनि मुख्यया वृत्त्या प्रवर्तत इ
न विरुध्यत इत्युपसंहृतं ततोहंकाराद्विविक्त आत्मैव प्रपंचाधिष्ठानं ब्रह्मेति सिद्धवत्कृत्य यथाका
स्य प्रपंचाश्रयत्वेपि तदसंगित्वमेवं ब्रह्मणोप्यसंगित्वे श्वेतकेतुना प्रतिपादिते पुनरिमं प्रश्नो

वर्चलानिर्विकारंह्यमूर्तंचानिरंशंसर्वगंतथादृश्यतेचापियन्नित्यंतादृगात्मानदृश्यतेश्येतकेतुःत्व
चास्पृशतिवैवायुमाकाशस्थंपुनःपुनःतत्स्थंगंधंतथाघ्रातिज्योतिःपश्यतिचक्षुषानभोरश्मिगणं
चैवमेघजालंतथैवचग्रहर्क्षतारागणंनैवनाकाशंदृश्यतेपुनःआकाशस्याप्ययाकाशंसद्रूपमिति-
निश्चितंसदर्थेकल्पितंसर्वंतत्सत्यंविष्णुरेवचमानिनामानिगौणानिह्युपचारात्परात्मनिनच
क्षुषानमनसानचान्येनपुरोविभुःचिंत्यतेसूक्ष्मयाबुध्यावाचावक्तुंनशक्यते॥एतत्प्रपंचमखि
लंतस्मिन्नेवप्रतिष्ठितमितिअत्राकाशवत्प्रपंचाधिष्ठानंब्रह्मकुतोनदृश्यतइतिप्रश्नेआकाश
स्थस्यवाय्वादेरेवग्रहणमस्तिनतुवियदिच्याकाशस्ययदालौकिकाकाशएवंयंगतिस्तदाकेवल
थापरमात्मनिततोपिसूक्ष्मेततःसदर्थेकल्पितंसर्वंसच्चसद्रूपंसर्वाधिष्ठानत्वात्व्यापकंतत्रो
पाधिमाश्रित्यप्रवर्तमानाःशब्दाःश्रुत्येसाक्षान्नप्रवर्तंतइत्युक्तंमुक्तंअस्याप्रश्नोत्तरपरंपरा
यामृन्मयोहिघटाभासइतिदृष्टांतोक्त्याचारंभणश्रुत्यर्थःसद्रूपमित्यात्मशब्देनप्रकृतस्यजीव
स्यसद्रूपत्वोक्त्यातत्वमसीतिवाक्यार्थःसदर्थेकल्पितंह्येतत्तत्सर्वंविष्णुरेवचेत्यनेनऐतदात्म्य
मिदंसर्वंतत्सत्यंसआत्मेतिश्रुत्यर्थश्चनिष्प्रपंचप्रत्यगभिन्नब्रह्मप्रतिपत्त्यनुकूलोदर्शितइति
एवंचोक्तोपबृंहणेनसहितायाःनिष्प्रपंचप्रत्यगभिन्नब्रह्मपरत्वएवतात्पर्यस्यसिद्धेतस्यप्रपंच

मिथ्यात्वंविनानुपपत्त्यातदनर्गतवाचारंभणमित्यादि मूलः प्रपंचमिथ्यात्वप्रतिपादकश्रुत्यादे
स्यमितिस्वप्नमेवपिदुषाएवंनेहनानास्तिकिंचनेत्यादिवाक्यस्याधिप्रपंचमिथ्यात्वप्रतिपादकत्व
स्यारस्यंअत्रहिअध्यारोपन्यायेनमहावाक्यीयपदार्थशोधकेनइहेत्यनेनजगदधिष्ठानंब्रह्मोपस्था
पनात् तत्रचनानापरिदृश्यमानंजगत् किंचनकिमपियद्दृश्यतेनापिप्रकारेणनास्तीतिहेतसामा
न्याभावरूपविधेयसमर्पणअसतिबाधकेउद्देश्यतावच्छेदकावच्छिन्नप्रतियोगिकस्यैवाभावस्य
नान्वयस्यवेद्युसन्निसिद्धत्वात् कालांतरावच्छेदनहेतुमाबधोधस्य तरतिशोकमात्मविदिति
नामरूपाद्विमुक्तः ज्ञात्वादेवंमुच्यते सर्वपाशैरित्यादिश्रुतिभिर्ज्ञाननाश्यत्वावगमात् इदंत्व
लिंगादिरूपमानांतरेणचासिद्धत्वेनतद्बोधनेनेहनानेतिवाक्येनैवोपपादनेनसंबंधेन
नरूपेणचयत्रयत्संप्रतिपन्नंतत्कालावच्छेदेनतत्संबंधावच्छिन्नतद्रूपावच्छिन्ननिषेधप्रति
तियोगित्वरूपमिथ्यात्वबाधकतायाएवतस्यस्वरसत्वात् ॥ इहब्रह्मणिनानात्वंब्रह्मप्रतियोगि
कभेदः नास्तीतिपरमतसिद्धतदर्थस्तुनस्वरसः नानेत्यस्यनानात्वपरत्वबाधकब्रह्मणिजीवप्रप
दिप्रतियोगिकभेदसत्त्वेनतन्निषेधस्यकर्तुमशक्यतयाभेदसामान्यनिषेधार्थेननानात्वांवि
त्यस्यभेदसामान्यस्वरसस्यब्रह्मप्रतियोगिकभेदविशेषपरतयासंकोचस्यायुक्तत्वात् नापतापिकि

चनेत्यस्यास्वारस्यं वैयर्थ्यं चेति दिक्॥ यदपि चंद्रिकायां परिहृतं दूषणोत्तरं एकविज्ञानेन सर्व-
विज्ञानायोगाच्च मृत्पिंडदृष्टांतानुपपत्तेश्च कथं हि ब्रह्मविज्ञानाद्विज्ञातं सकलं भवेत् नहि शुक्ति
स्वरूपविज्ञानात् रजतज्ञतामस्तु न शुक्तेस्तत्त्वापरिज्ञानात् यथैव रजतज्ञता ब्रह्मतत्त्वापरिज्ञान
त्तथा सर्वज्ञतोचितेति दूषणमुक्तं तदपि मंदं विवर्तवादे अधिष्ठानज्ञानेनारोपितस्य तत्त्वतो ज्ञा
नत्वं संप्रतिपन्नं तच्चाधिष्ठानात्मकस्वीयतात्त्विकस्वरूपकत्वमुक्तं हि भामत्यां रज्ज्वां ज्ञातायां भु
जंगतत्त्वं ज्ञातं भवति सा हि तस्य तत्त्वमिति एवं च शुक्तिसाक्षात्कारानंतरं यद्रजतमभात् सा शु
क्तिरिति प्रत्ययात् रजतं शुक्तिकात्मकज्ञातस्वीयतात्त्विकस्वरूपकत्वात्मकं शुक्तिकाज्ञानेन त-
त्त्वतो ज्ञातत्वमक्षतमेव ॥ एकविज्ञानेन सर्वविज्ञानमपि तत्त्वतः सर्वविज्ञानमेव विवक्षितं ॥ ए
वं चाधिष्ठानभूते ब्रह्मणि ज्ञाते इदं सर्वं यदयमात्मा सर्वं खल्विदं ब्रह्मेति बाधायां सामानाधिकर
ण्यानुरोधात् ब्रह्मरूपज्ञातस्वीयतात्त्विकस्वरूपकत्वस्य ब्रह्मण्यारोपिते जगति सत्त्वान्नैकविज्ञा
नेन सर्वविज्ञानानुपपत्तिः मृदादिविज्ञानेन घटादीनां विज्ञानं स्वीयतात्त्विकस्वरूपकत्वं शु
क्तिकान्यायेनैवेत्युक्तं भाति नोक्तदृष्टांतासंगतिः॥ यत्तु चंद्रिकायां रज्ज्वां ज्ञातायां भुजंगतत्त्वं ज्ञात
भवति सा हि तस्य तत्त्वं एवं च ब्रह्मज्ञानात् सर्वं तत्त्वतो ज्ञातं भवतीति भामत्युक्तमनूद्य तन्न एवं

हि ब्रह्मज्ञानेन ब्रह्मैव ज्ञानं भवतीत्यर्थः स्यात् तच्चायुक्तं सस्य सहेतुकत्वाभावात् ॥ येनाश्रुतं श्रुतं
भवत्यमतं मतमविज्ञातं विज्ञातं स्यादिति श्रुतौ श्रुतादिपदायोगात् ॥ किं चासाधारणस्वरूप
धर्मावान्तत्वमित्युच्यते न तु भ्रमाधिष्ठानतयासत्यानन्दो ब्रह्मणः रज्जुत्वं च रज्जोस्तत्त्वं न स्यात् ॥
न च रज्जुः रज्जुज्ञाननिवर्त्यस्य सर्पस्य स्वरूपधर्मावान च परस्पराभिन्नत्वे फारोप्यानुगतमधिष्ठा
नमेकैकस्यारोपितस्यासाधारणं न चारोपितमित्येतावता तोऽन्यस्य तत्त्वं भवतीति स्वीकृतं च त्वया
पि सर्पस्य रज्जुव्यतिरेकेणासत्त्वेन ततोऽन्यत्वाभावे रज्जोः सर्पव्यतिरेकेणासत्त्वेन ततोऽन्य-
त्वात् ॥ किं च रज्ज्वामयं सर्प इति धीरानन्दे ब्रह्मधीरिव सर्पे सर्पधीरिव च भ्रमः स्यात् तत्त्वे तत्त्वधी
त्वात् रज्जुज्ञानेन सर्पभ्रमनिवृत्तिस्तु अधिष्ठानतत्त्वज्ञानस्य तदज्ञाननिमित्तकभ्रमविरोधित्वा
त् ॥ न च घटादेर्मृदाद्यारोपितत्वात् तद्दृष्टान्तो युक्त इति वाच्यं मृत्त्वेऽज्ञातेऽपि घटाद्यनिवृत्तेः ॥ ए
धपिताकिंकमत इव घटादिकं मृदारब्धं द्रव्यान्तरं नास्ति तथापि कार्यकृत्पारमार्थ्यं जलाहरणा
दिसमर्थो व्यावहारिको मृदादितुल्यावस्थाविशेषरूपो घटादिशब्दार्थः तस्मिन् ज्ञातेऽप्यस्ति तत्त्वतस्तु न स
दप्यस्ति किं च यदि मृन्मात्रविज्ञानात् विज्ञातं स्यात् घटादिकं मृत्त्वेन निश्चितत्वेन पुनः संशयः स्याद्
घटादिके एतेन यदुक्तं भामत्यां मृज्ज्ञानेन घटादयस्तत्त्वतो ज्ञाता भवन्ति मृद्रूपा हि घटादीनां तत्त्वाभि

त्तितान्निरस्तं मृत्स्वज्ञानेपि संस्थानविशेषत्वन्नूपघटत्वाज्ञानेन घटस्तत्त्वतो न ज्ञात इति व्यवहारा
नुपपत्तेः घटेशरावत्वाद्यारोपानिवृत्तेश्चेति दूषणमुक्तं तदपि मंदं ब्रह्मविज्ञानेन सर्वं तत्त्वतो विज्ञातं भव
तीत्यत्र ब्रह्मविज्ञानेनेति अभेदे तृतीया अभेदस्य च विज्ञातमित्यत्र विज्ञानेऽन्वयः तथाच ब्रह्मवि
ज्ञानाभिन्नं यत्तत्त्वतो ज्ञानं तद्विषयस्वीयतत्त्वज्ञानाभिन्नज्ञानविषयकं ब्रह्मकं सर्वमिति पर्यव
सितार्थे न ब्रह्मस्वरूपे तुल्यापत्तिरूपदूषणावकाशः येनाश्रुतं श्रुतं भवतीत्यादावपि अश्रुतं वियदा
दिकं येन तत्त्वतः श्रुतं भवति यदभिन्नश्रुतात्मकस्वीयतात्त्विकस्वरूपकं भवतीति रीत्या बाधायां सा
मानाधिकरण्येन पर्यवसितान्वयेन न श्रुतादिपदायोगोपीति ॥ यदपि विवर्तवादे मृत्पिंडमृन
यादिदृष्टांतानुपपत्तिरिति चंद्रिकायां दूषणमुक्तं तदपि श्रीमद्भाष्यकारहृदयानवबोधनिबंध
नं ॥ तथाहि वाचारंभणाशङ्क्याख्याने भाष्यस्यायमभिप्रायः येनाश्रुतं श्रुतमिति बाधायां सामा
नाधिकरण्यं अश्रुतं वियदादिकं सर्वं तत्त्वतो यदभिन्नश्रुतब्रह्मव्यतिरिक्तस्वीयतात्त्विकस्वरूप
शून्यमित्यर्थस्तथा चैकं ब्रह्म सर्वस्याधिष्ठानमित्यर्थः प्रतिज्ञातः तत्र मृत्पिंडव्यतिरेकेण तत्त्वत
स्तद्विकारो यथा नास्तीत्यादि दृष्टांतो यथा सोम्यैकेनेत्यादिना प्रतिपाद्यते मृत्पिंडपदं च मुख्यार्थ
जैनप्रयोगात मृद्भिन्नपिंडार्थकं पिंडपदं तस्यौत्यविशेषबोधकं मृन्मयमात्रोपादानतायोग्य

तादात्म्याय मृन्मयपदं च भूमिविकारमात्रार्थकं तथा च भूमिरूपविकारः सर्वोऽपि मृन्मयो भूमिं विना नास्ति
नो नास्तीत्यर्थः भूमिविकारत्वं च साक्षादेव वृक्षादावस्तीति भूमेर्विभक्तपिंडस्य नापि कारणरूपा
द्वानन्तरोऽपि मस्तिः यद्यपि भूमिर्नाधिष्ठानं तथाप्यधिष्ठानतावच्छेदकमृत्त्वादिव्यतिरेकेण तत्त्वतो नृ
प्यादिर्नास्तीति व्यवहारवत् भूमिविकारादिस्वरूपविचारदशायामाधारतावच्छेदकभूम्यादिव्यति-
रेकेण तत्त्वतस्तद्विकारो नास्तीति व्यवहारात् श्रुत्या तथोक्तं एवं च सर्वं मृन्मयं एकमृत्पिंडात्मकवि-
ज्ञातस्य यत्तात्त्विकस्वरूपकमित्यपि बाधायां सामानाधिकरण्यं तत्र हेतुर्मृत्तिकेत्येव सत्यमिति सर्वं
मृत्पयवे येन च भ्रमरूपेण व्यवस्थितेइत्युक्तेः मृत्तिका भूमिरिति गृह्यमाणं यत्तत् तदवच्छिन्नसद्रूपं प्रकृ
तदेव सत्यं मृत्तिकास्वरूपस्य सत्यत्वाभावात् तदवच्छिन्नसद्रूपस्य दृष्टांतत्वं धीदशायां मृदादि-
विच्यातानात् भूमित्वेन ज्ञायमानत्वेन सद्रूपलाभार्थमेव मृत्तिकेत्येवेत्यत्र इतीत्युक्तेरन्यथा तद्व्य
र्थ्यापत्तेः एतेन शब्दप्रकरणे व्याकरणादौ प्रकरणसिद्धशब्दपरत्वं विहाय नवेति निःप्रमाणेति सून-
स्थनवेति शब्दस्य स्वार्थपरत्वस्यैवार्थप्रकरणे अर्थपरत्वस्य प्रकरणादेव लाभे शब्दपरतायाश्च
वक्तव्यतया तस्य च प्रकृतेऽनुपयोगात् मृत्तिकेत्येवेत्यत्रेति शब्दवैयर्थ्यमेव स्यादिति परास्तं
षणमनवकाशमेव ॥ आद्यर्थको वा प्रकृते इति शब्दः इति हेतुप्रकरणप्रकारादिसमासिद्धत्वम्

रकोशात् ॥ तथाच विकारस्वरूपस्याविचारदशायां तत्स्वरूपमिव भूमिस्वरूपस्य विचारदशायांस
पि मिथ्यैव तत्कारणभूतापंचीकृतभूतान्येव सत्यानि तेषामपि स्वरूपविचारदशायां तान्यपि मि
थ्या तत्कारणं ब्रह्मैव सत्यमित्याद्यर्थजातमेवमेवोत्तरेष्वपि दृष्टान्तेषु योजनीयं मृत्तिकेत्येव सत्य
मित्यत्र हेतुर्वाचारंभणं विकारो नामधेयमित्यादि तद्व्याख्यानं प्राक् ॥ अस्मिन्नेवार्थे को भवानि
ति निर्देशो वाचारंभोऽप्यनर्थकः शिबिकादारुसंघातो रचनास्थितिसंस्थितः अन्विष्यतां नृपश्रेष्ठ त
द्भेदे शिबिका त्वया एवं छत्रशलाकानां पृथग्भावो विमृश्यतां क्व यातं छत्रमित्येष न्यायस्त्वयि तथा
मयि यस्तु राजेति यल्लोके यच्च राजभटात्मकं तथान्यच्च नृपेत्थं तन्न सत् संकल्पनामयं एवमेव भि
दं विश्वं नभोदिसकलं जगत् वासुदेवाभिधानस्य स्वरूपं परमात्मनः इत्यादिविष्णुपुराणवाक्यस
हस्रैरुपबृंहणरूपैरनिर्वचनीयापरपर्यायप्रपंचमिथ्यात्वं निर्णीततात्पर्यकसाद्दद्यागतं यदग्ने
रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारंभणं
विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यमित्यादि श्रुतिवाक्यं प्रमाणं तत्र हि त्रिवृत्कृतदग्न्यादि
स्वरूपस्यात्रिवृत्कृततेजोबन्नस्वरूपव्यतिरेकेणाविचारासहत्वमग्नित्वमित्यनेन हेतूकृत्य वा
चारंभणमित्यादिना त्रिवृत्कृतमात्रं मिथ्येति प्रतिपादितं परोक्तेऽर्थे तु न किंचित्प्रमाणं स्वारस्ये

चोक्तमित्यलमधिकेन ॥ किंचासाधारणस्वरूपंधर्मोवातत्त्वमित्यादिदूषणमपिमंदं ॥ अनारो
पितस्यैवतत्त्वरूपत्वेनोक्तदूषणानवकाशात् ॥ अतएवतत्त्वज्ञानान्निःश्रेयसाधिगमइतिभा
ष्येतत्त्वमनारोपितस्वरूपमित्युदयनाचार्यैरुक्तं एवंचव्यवहारदशायांशुक्त्यादावनारोपितत्व
भ्रमेण रूप्यादितादात्म्यापन्नक्षितत्वेनचरूप्यादेःस्वरूपतत्त्वंशुक्तिरितिलोकेव्यवहारःशुक्त्या
देर्धर्मितत्त्वंशुक्तित्वादिरितिचव्यवहारः विवेकदशायांतुब्रह्मैवानारोपितत्वेनज्ञायतइतिवस्तु
गत्यातदेवसर्वेषांस्वरूपतत्त्वं एतदभिप्रायेणैवब्रह्मतत्त्वंनयोवेदइत्यमरेणोक्तं तत्त्वंपरमात्म
नि वाद्यभेदेस्वरूपेचेतिहेमतश्चप्रपंचतत्त्ववादिनस्तत्त्ववादित्वं नासाधारणधर्मवादित्वं किं
त्वनारोपितप्रपंचवादित्वमेवेतितवमतेप्यनारोपितस्वरूपस्यैवतत्त्वरूपतायाःसंमतत्वेनास
धारणस्वरूपंधर्मोवातत्त्वमित्युक्तिः स्वमतविस्मरणनिबंधनैव किंचतस्यभावस्तत्त्वमितिव्युत्प
त्तेः नतत्त्वशब्दात्नसाधारणधर्मोऽसाधारणधर्मान्तरंवाप्रतीयते घटत्वमित्यादिशब्दात् घटपद
जन्यबोधप्रकारीभूतजातिसमनियतधर्मान्तराप्रतीतेः रूढिश्चपारमार्थिकवस्तुन्येवसर्वसंम-
तानत्वसाधारण्यमपितत्त्वांतर्भावनीयं ॥ एवंचानारोपिततदीयस्वरूपमेवतदीयस्वरूपतत्त्व
मितिविवक्षिततदीयत्वंचतन्निष्ठतादात्म्यप्रतियोगित्वमित्युक्तंप्राक् ॥ ब्रह्मानंदयोःकात्स्न्य

निकभेदसत्वेन तादात्म्यसंभवादानंदस्य ब्रह्मतत्स्वरूपतोपपत्तिः रज्जुत्वं च रज्जोर्न स्वरूपत्वं किंतु धर्मतत्वमेवेति न तथा सत्यानंदो ब्रह्मणः रज्जुत्वं च रज्जोस्तत्वं न स्यादिति दूषणाय कारः सर्पभिन्नस्याप्युक्तरीत्या कात्स्न्यनिकाभेदमादाय तदीयस्वरूपतत्वेन स्वरूपतोपपत्तिश्च रज्वा मयं सर्पबुद्धिश्च न प्रमा अबाधितार्थविषयकत्वाभावात् व्यवहारकालीनबाधगोचरार्थविषयत्वा न व्यावहारिकप्रमात्वमपि तदीयतत्वविशेष्यकतत्प्रकारकज्ञान. त्वादिकं तत्प्रमात्वमिति- त्वयाप्युक्तमशक्यं तथा सति घटे द्रव्यत्वमित्याधेयतासंसर्गकघटादिप्रकारकज्ञानानां तत्प्रमते घटादंशे प्रमात्वाभावप्रसंगात् तदीयासाधारणस्वरूपादेरेव तत्तत्वरूपतायास्त्वयोक्तत्वात् ॥ द्रव्यत्वादेर्घटाद्यसाधारणस्वरूपत्वाभावात् ॥ अधिष्ठानीभूतं यत्तत्वं तज्ज्ञानस्यैव भ्रमनिवर्तकत्वात् मृत्वे ज्ञातेपि घटाद्यनिवृत्तिरुपपन्ना उपपन्ना च मृदित्यादिज्ञानादयं घटो न वेति संशयानिवृत्तिरपि समानविषयकनिश्चयस्यैव संशयविरोधित्वात् मृदादिविज्ञानेन घटादीनां विज्ञातत्वोपतत्वकत्वं गुडजिह्विकान्यायादिनोपपन्नमिति प्रतिपादितं प्रागिति मृत्ज्ञानेन घटादयः तत्वतो ज्ञाता भवंति ॥ मृदेव हि घटादीनां तत्वमिति प्रागप्युक्तमपि सम्यगेवेति एतेनेत्यादिनोक्तदूषणमपि निरस्तं यदपि चांद्रिकायां प्रकृत्याधिकरणाद्रचनानुपपत्त्यधिकरणाभ्यामस्य पुनरुक्तिश्च अद्वैतिमते प्र:

वोभयत्रापि ब्रह्मविवर्तनाया एवोक्तत्वादिनिदूषणमुक्तं तदत्यंतमंदबुद्धेः निमित्तत्वे सत्युपादान[illegible]
यात्व्यवस्थापनमेव प्रकृत्यधिकरणप्रमेयं ततो दृशोपादानतास्वीकारे भोक्तृभोग्यविभाग[illegible]
नि पूर्वपक्षे परिणामवादाभिप्रायेण लोकवदिति स्वपक्षबाधकोत्थारमुक्त्वा परमार्थतस्तादृशो विभाग[illegible]
एव नास्तीति समाधानाय तत्र विवर्तोक्तावपि तस्यैतदधिकरणप्रमेयत्वाभावात् ॥ अदृश्यत्वाधिकर
णे भूतयोनिवाक्यस्य प्रधानपरतां निरस्य ब्रह्मपरत्वव्यवस्थापनमेव प्रमेयं तदुपपादन[illegible]
वर्तोक्तावपि तस्य तदधिकरणप्रमेयत्वाभावात् ॥ यदपि चंद्रिकायां किंच त्वन्मते पूर्वसूत्रे[illegible]
चाभेदोक्तेर्विरोधः न च प्रमाणयोः सूत्रयोर्विरोध एव स्यात् भिन्नविषयत्वेन परिहर्तुं युक्त इति[illegible]
क्तं तदयुक्तं इत्यादि तदनन्यत्वमित्यनेन तादात्म्यघटितमिथ्यात्वस्यैवोक्तेरभेदानुक्तेश्च [illegible]
भागयोरपि सूत्रयोः प्रमाणमूर्धन्यसामान्यविशेषशास्त्रयोरिव भिन्नविषयत्वस्य युक्तत्वात् पूर्व
सूत्रे लोकवदित्युक्ते लोके च विकारानृतत्वप्रसिद्ध्यभावात्तत्र भोक्तृभोग्यविभागमात्रस्य [illegible]
धानमुक्तमिति तन्न कारणाय तत्सूत्रारंभ इत्यभ्युपगम्य च व्यावहारिकं भोक्तृभोग्य[illegible]
तिभाष्यादि भाष्यस्याप्रदायव्याख्यातृभिरहितत्वाच्च ॥ यदपि चंद्रिकायां किंच घटादेः [illegible]
त्वप्रतिपादक आरंभणाधिकरणे जगतां ब्रह्मानन्यत्वं तूपेत्य दीयेसाध्येन साक्षात्प्रेरकः [illegible]

निरूपणं न दूषितं ॥ नैयमतोऽपि केवलारंभणशब्दस्य हेतूपपादकत्वाभावेन किंसिद्धमीदृषि

नमारंभणाकन मास्त्वितु कथासौ दितिहि येनाधिष्ठानादिनामूर्मिथ्याचजन यनुजनयिताविशेष

णयभूयतदधिष्ठानं किमासीत् आरभ्यते अनेनेत्यारंभणं साधनं वा किमासीत् कथं वासीन्नु किं

चिन्नु कथमभीति साधनाद्याक्षेपः क्रियते आक्षेपस्य विपर्ययपर्यवसानात् किंशब्दस्य प्रश्नाक्षेपयोः

समत्वात् प्रश्नार्थो किं न स्यादित्यत आह अधिष्ठानाद्यनुक्तेरिति प्रश्नश्चेत्परिहारोऽपि वक्तव्यः किं

स्विन्नहि मस्य भेषजमिति प्रश्ने अग्निर्हिमस्य भेषजमितिवत् अत्र परिहाराया धिष्ठानाद्यनु

क्तेर्नायं प्रश्नः किंतु आक्षेप एवेति न्यदीयतत्त्वप्रकाशिकादिग्रंथपर्यालोचनया स्वतंत्रसाधनस्य

तदनन्यत्वरूपत्वदभिमतसाध्ये केवलारंभणशब्दस्य हेतूपपादकत्वाभावेन तद्दूषितवाक्यसंद

र्भस्यैव हेतुत्वस्याभिप्रेतत्वात् यामन्मतेऽपि तदनन्यत्वमित्यत्र तयोः कार्यकारणयोः अनन्यत्वं तादा

त्म्यं तस्मात् कारणात् कार्यस्य तत्त्वतोऽनन्यत्वमित्यर्थः तद्रूपनिरुक्तविवक्षितसाध्ये आरंभणश

ब्दघटितसंदर्भस्य सदृष्टान्तस्य एवं सौम्य स आदेशो भवतीत्युत्तरदार्ष्टान्तिकवाक्यरूपस्य साक्षा

द्धेतूपपादकत्वात् ॥ यदपि वाचारंभणशब्दस्य समासतया वाचारंभणशब्दादिभ्य इत्यवसू

त्रार्थे घटिशब्दपदग्रहणौचित्यात् देकदेशग्रहणं तन्नौचितमिति चंद्रिकोक्तं दूषणं तदपि न साधु

वाचैव केवलमस्तीत्यारभ्य तेषृदः शरावरदंचनंचेति भाष्यं व्यस्तस्यैव वाचेत्यस्योपादानात् ॥ नन्वेवं
तिकृद्योगेऽस्मिन्पक्षे वाचेति तृतीयानुपपत्तिरिति वाच्यं ॥ वाचेत्यत्र करणतृतीयापगमात् ॥
चेति तृतीया षष्ठ्यर्थ इति छांदोग्यभाष्यविवरणाभिन्नपदतायाउक्तत्वाच्च ॥ वागारम्भणमिति वा
लंबनमित्येतदिति छांदोग्यभाष्यं तु फलितार्थकथनपरं संदर्भविरोधात्मकवाक्यविशेषस्फुरणा
समासैकदेशोपादानेऽपि बाधकाभावादारंभणशब्दमात्रस्य मनस्येपि हेतूपपादकत्वाभावस्य
त्वात् ॥ यदपि चंद्रियालम्बनेसौ आदिशब्दार्थस्य दं सर्वं यदयमात्मेत्यादेरपि गढरूपत्वात
सूत्र वाचारंभणादिशब्देभ्य इत्येव विन्यासः स्यादिति दूषणं तदपि मंदं ॥ आदिशब्दाद्युक्ति
श्रुतितदीयभाष्येऽपि युक्तीनामिव ॥ यथा घटकरकोद्याकाशानां महाकाशानन्यत्वं यथा
गतृष्णिकोदकादीनामुखरादिभ्योऽनन्यत्वं दृष्टनष्टस्वरूपत्वात् स्वरूपेणानुपाख्यत्वादेवम
भोक्तृभोग्यादिप्रपंचस्य ब्रह्मव्यतिरेकेणाभाव इति अस्मदीयभाष्येण दृश्यत्वपरिच्छिन्नत्वा
रूपयुक्तीनामप्यादिशब्दार्थताप्रदर्शनायोपन्यस्तत्वेन शब्दमात्रस्यैवादिशब्दार्थत्वोक्त्यभाव
उक्तत्वात् ॥ दृष्टनष्टस्वरूपत्वादित्यनेन श्रुतिसिद्धे प्रपंचमिथ्यात्वेऽनुमानमपि दर्शित
प्रतिपन्नं वियदादिकं मिथ्या दृश्यत्वात् ॥ नाशप्रतियोगित्वाच्चेत्यनुमानद्वयमत्र विवक्षित

मित्यस्य दीधितिस्थाव्याख्यानाच्च ॥ भावेनोपलब्धेः अनमूभावाद्या कारणस्येति उपलब्धेरित्य
स्य पूर्वं कार्यस्येति चाध्याहर्तव्यं भाव इत्यस्योत्पत्त्यर्थः तथा च न कारणोपलब्धावेवोपलभ्यमानत्वं समुच्चीयते
॥ एवं च कारणसत्त्व एव सत्त्वस्य कारणोपलब्धावेवोपलभ्यमानत्वसमुच्चितस्य कारणान्यत्वरूप
साध्यहेतुतालाभः एतादृशार्थद्वयलाभार्थं च भावे च सत्त्वादित्यनुक्त्वा भावे नोपलब्धेरित्युक्तं तत्र च
प्रमायामुपलभ्यमानायामेवोपलभ्यघटीयरूपविशेषादेः प्रमान्यत्वात् ॥ व्यभिचारवारणाय कं
ठोक्तस्य वह्निसत्त्व एव सतो धूमविशेषस्य वह्निभिन्नत्वाद्व्यभिचारवारणाय च समुच्चितविशेषण
स्योपादानं कारणस्य भावः सत्ता चोपलम्भश्चेति टीकायां इति द्वयं हेतुविशेषणकोटौ विवक्षितमि
तिशेषः ॥ तथा च टीकाग्रंथस्य फलितार्थकथनपरत्वाद्भावशब्दोपलब्धिशब्दयोरावृत्तिर्विभक्ति
विपरिणामः कारणस्य कार्यस्य चेति पदद्वयाध्याहारश्चेत्यनेकदोषापाताच्च ॥ मम तु उपलब्धे
रित्युत्तरप्रसंगादिति हेतुमात्रं कल्प्यमिति चंद्रिकोक्तदूषणानवकाशः कारणस्य कार्यस्येति च
पूरणं च पराभिमतप्रमान्यस्य स्वतंत्रसाधनस्येति पूरणमपेक्ष्य लघु उपलब्धेरित्यस्योपल
ब्धिप्रसंगादित्यर्थकल्पनापरंपरस्यातिरिच्यते स्वतंत्रसाधनप्रमाणैरनुपलभ्यमानतायाः
स्वत एव सिद्धत्वात्तदभिधानानर्थक्यादुपलब्धेरित्यस्योपलब्धिप्रसंगादित्यर्थकतायाः आवश्य

फत्वात् ॥ तथाहि परकीयव्याख्यानं यदि भगवत्सृष्टेन दतिरिक्तस्य तंत्रसाधनमभिलाहिंपेदोदि
प्रमाणैरुपलभ्येत न चोपलभ्यते अतो नास्तीत्यर्थ इति ॥ यत्तु कारणसत्त्व एव सत्त्वरूपहेतुत्वस्या
नृतत्वरूपसाध्यविरोधितेति तन्न हेतुविशेषणप्रविष्टसत्तायाविद्यमानतानुपपत्तेर्नित्यैर्व्यस्त
रूपानृतत्वादिविरोधित्वात् अत्र सूत्रे तादात्म्यरूपानन्यत्वस्यैव साध्यतयाविवक्षितत्वान्नरूपत्वं
चाहु तानंदश्रीचरणैः अनेन सूत्रेणोपादानोपादेयभावनियामकतयातादात्म्यास्यस्वरूपसं
बंधविशेष उपपाद्यत इति यदपि शङ्कुकसमाधिगम्यानिर्विशेषचिन्मात्ररूपस्य भुवस्य प्रत्यक्षादि
शिष्टस्य सगुणस्यवाउपलंभ एव प्रपंचोपलंभेन सोऽत्र हेतुरसिद्ध इति तदपि न हि स्वप्नोपलं
नृतत्वदीयोपहितरूपान्यतरविषयकोपलब्धेरेवाविलक्षणीयत्वात् भावाद्योपलब्धौ रिति पादेन
यस्मादात्म्यं ल्यब्लोपे पंचमी भावविषयीकृत्योपलब्धेश्चेत्यर्थः च शङ्केन पूर्वोक्तानुमानादिस्वरूप-
यः प्रत्यक्षोपलब्धिभावाच्चेत्यादि भाष्यादिकं च फलितार्थकथनपरं भवतीतिहि प्रत्यक्षोपलब्धिः कार्य
कारणयोरनन्यत्वइत्यभिमभाष्ये ऽनन्यत्व इति सप्तमी विषयत्वार्थिका तच्च भाष्यं नायादिर्थत्व-
धिवरणरूपमिति बोध्यं तेनास्मिन्पक्षे भावशब्दो व्यर्थ इति शंकानिरस्ता यत्वास्मिन्पक्षे कार्यकारण
योरभेदस्यैव सिद्ध्या कार्यस्य नानृतत्वासिद्धिरिति तत्त्वागेयनिरस्तप्रायं सत्ताच्च परस्य पूर्वं

कैमत्यदानुमानासंभवप्रसादानांतंत्वाद्यभिन्नत्वप्रसंगेनेत्याह यदितेनोपादेयत्वहेतुनावियदादेःप्रपंचस्यब्रह्मानन्यत्वं सत्यान्वाचरस्यकारणात्मनैवकारणेसत्यमितितस्योपसूक्ष्मानुपातत्वात्परमकारणब्रह्मतादात्म्यमित्यर्थः कार्यावस्थापन्न वियदादिसूक्ष्मरूपस्यसत्तादात्म्यग्रहणादिति निष्कर्षः कार्यावस्थापन्नवियदादितादात्म्यविशिष्टस्यसतोग्रकालस त्वानुपपत्त्याइदंशब्दोपस्थाप्यतावच्छेदककार्यावस्थायाउपलक्षणतयैववाक्यार्थानुप्रवेशस्यावश्यकत्वात् ननुकार्या वस्थापन्नस्यैववियदादेरुपलक्षणत्वसंभवात्कार्यावस्थामात्रस्योपलक्षणत्वोक्तिरयुक्तेतिवाच्यं विशिष्टार्थपरत्व स्यौत्सर्गिकत्वाद्विशेषणांशेतत्यागमात्रेणापवादकबाधोपशांत्युपपत्तौविशेष्यांशेऽपिविनानिमित्तंतत्यागस्या- नुचितत्वादितिभावः उक्तश्रुत्यर्थस्यवक्ष्यमाणायांजगदुपादानतायामुपयोगितांद्योतयितुमाह यच्चयदात्मनेतिएवं चश्रुताविदंशब्दोपसंदानस्यप्रयोजनमुपदर्शितंभवतिनन्वेवमपिकार्यावस्थापन्नस्यजगतःसत्तादात्म्यमसिद्धमि- त्याशंक्याह ॥ तस्मात्प्रागुत्पत्तेरिति ॥ तथाचकार्यावस्थापन्नंवियदादिसत्तादात्म्यवत् स्वसमानकालीनसत्तादात्म्य वत्स्वीयसूक्ष्मरूपकत्वात् यत्स्वसमानकालीनयत्तादात्म्यवत्सूक्ष्मरूपकं तत्तादात्म्यवत् यथाघटसमानकालीनमृ त्सामान्याभिन्नस्वीयसूक्ष्मरूपत्वकार्यमृत्सामान्यतादात्म्यवानितिसामान्यमुखव्याप्त्युपष्टंभकानुमानेनकार्यम त्रेपरमकारणसत्तादात्म्यसिद्धिरितिभावः प्रकारांतरेणसूत्रंव्याख्यातुमुपक्रमते यथाचेतित्रिषुकालेषुसत्त्वंनव्य- भिचरतीतिकस्यामपिसदविषयप्रतीतौनविषयइत्यर्थः एवमग्रेपितथाचवियदादिकंसत्तादात्म्यवत् सद्विषयक

प्रतीत्यविषय- त्वात् योयद्विषयकप्रतीतिविषयः [illegible]

णोस्तादात्म्यसिद्धिरिति भावः ननु भावे चोपलब्धेरित्यनेनास्य गतार्थता सो कथं न अतं तु प्रपादानो तात्म्य प्रसाध-

नदृष्टांतेन ब्रह्मणोपि जगत्तादात्म्यमुपादानत्वेन प्रसाधितम् अत्र साक्षादेवेति विशेषात् नन्वेवं पादानत्वस्य ता-

दात्म्यघटितत्वया साध्याविशिष्टता [illegible] रूपोपादानताया एव तन्न हेतुत्वेनाविवक्षणात् ॥ नन्वेवमपि

त्वन्यायत्नयात्वेनगतार्थतापत्तिः [illegible] विषयकप्रतीत्यविषयत्वा

सिद्धेः ॥ अत्र च घटः सन्घटः [illegible] प्रतीतौ [illegible] प्रतीतिविषयत्वं [illegible]

मर्थनीयत्वात् [illegible] प्रामाणिकत्वादेव [illegible] पारमार्थिकत्वेन [illegible]

यत्वे हि ब्रह्मण एकै त्वावधारणानुपपत्तेः स्फुटत्वात् [illegible]

संभवति योजनान्तरमपि [illegible] पारमार्थिक [illegible] ॥ सतो भाव

सत्त्वमिति विवक्षितैकत्वसाधकं [illegible] स्यापपद्यते ॥ एतादृशत

र्कस्फोरणानुरोधेन च सर्वं खल्विदं ब्रह्मेत्यादिवाक्यमनुसंदधानः [illegible] नामरूपविषय

दे: सत्त्वं त्वदभिप्रेतानृतत्व [illegible] ॥ उत्पन्नः [illegible] द्वितीयसूत्रस्य त

तुपटादिविषयः ॥ तृतीयस्य तु [illegible] वाक्यप्रयोगे पासद

वेत्यादिवाक्यस्यकारणपरत्वात्कार्यकारणभेदस्य चाद्याप्यसिद्धेस्तेन कार्यसत्त्वासिद्धिश्चेति परास्तं सत्तादात्म्यकाल
संबंधादिलक्षणसत्वस्यासद्विलक्षणत्वादिनियतयतायामनिर्वाच्य तायामनुगुणत्वेन तद्विरोधित्वायोगात् ॥
अत्यंतासत्वं तु नात्र प्रसज्यते कार्यस्य सत्तादात्म्यश्रवणादित्युक्ते वियदादेः कार्यावस्थापन्नस्योक्तवाक्यैरुक्त-
तादात्म्यं प्रागुक्तरीत्या बोधयितुमशक्यमिति कथमेवमुक्तमिति शंकाव्युदासाय प्रवृत्ते भाष्ये उत्पत्तेः प्रागित्युक्तत्वे
पि सोत्र वाक्यार्थः सद्धातुप्रवेशाविरहान्नाध्याहारगौरवं द्वितीयसूत्रेत्यादिकं चापातत इति स्फुव्यक्तमेव असद्व्यप-
देशान्नेति चेन्न धर्मांतरेण वाक्यशेषात् ननु क्वचिदसत्वमपीति अयं भावः ॥ असदेवेदमित्यत्र न समस्तं पदं असदा
सीदित्युक्तौ व्याघातापत्तेः ॥ असदिति पदद्वयं तथा चेदमात्मकं सन्नासीदित्यपि क्वचिच्छ्रूयते यद्वा इदं जगदग्रे असद्व
र्तमानमासीदित्यर्थः तथा च श्रुतिद्वयप्रामाण्यनिर्वाहाय सदेवेति वाक्ये इदमग्रे इति समस्तं पदमिदमिति सद्विशे
षणं वा आत्मा वा इदमिति वाक्येप्ययं न्यायो बोध्य इति कर्मधारयो वाच्यः एवं च नानेन वाक्येन जगद्ब्रह्मतादात्म्यासि-
द्धिरिति नन्विदमसंगतं तदसदेव सन्मनोकुरुतेति वाक्यशेषादुक्तवाक्यस्य कारणपरत्वेन कार्यासत्वाप्रापक
त्वात् ॥ ननु कार्यकारणयोरनन्यत्वांगीकारेण कार्यासत्वाशंकेति युक्तं कार्यसत्वस्याप्यनन्यत्वसिध्यर्थकत्वेनान
न्यत्वापीकारेणासत्वशंकानुदयादिति चेन्न ॥ वाक्यशेषेण निर्णयस्य सिद्धांतयुक्तितया तद्विरोधेन पूर्वपक्षानुथि
यतिमानस्यत्व द्विषयस्य महामोहप्रसादैकफलत्वात् तदसत्सृष्टेः प्राक्काले वर्तमानं मनः सद्ब्रह्मा कुरुतेति यो-

न्नामाश्रित्य पूर्वपक्षप्रवृत्तिसंभवाच्च युक्तेः शब्दांतरस्य च ॥ यद्यप्यत्र शब्दांतरस्य सदेवेत्यादेरेव भाष्यकृदाहृतत्वा
त् सत्त्वाच्चापरस्येत्यनेनास्य पौनरुक्त्यमिव भाति तथाप्यव्यवहितपूर्वसूत्रे पूर्वपक्षिणा तस्यान्यथा व्याख्याततत्वात्तद
पेक्षायां तादृशवाक्यार्थेऽपि किंचिद्बाधकं नास्तीति भ्रमस्यानुद्धारणाय पुनरुक्तिः ॥ तथा चोक्तरीत्या ऽसदेवेत्यादिवा
क्यतात्पर्यविवरणितेनोक्तकृतिव्याख्यानमुचितं तथासतीदमादिपदवैयर्थ्यापत्तेः निरर्थकलक्षणादिस्वीकारापत्ते
श्चेति पूर्वोक्तश्रुत्या तात्सिद्धिरनपवादेति फल्गुव्याप्ति अन्यथा युक्तिशब्देन पूर्वापरसर्वयुक्तीनामारंभणशब्दा
दीत्यादिशब्देन वा सर्वयुक्तिग्रहणसंभवादेतत्सूत्रसार्थक्यं तदापि दुरुपपादं स्यादेवेति पदद्वयं च ॥ यथा च मा-
णादि अत्र च कार्यकारणाभिन्नत्वे तस्मिन्निश्रीयमानेऽपि संदिग्धत्वात्ततोऽधिकपरिमाणत्वात् शुक्लादिवच्चाशङ्क इ
त्यनुमाने व्यभिचारप्रदर्शनायाद्यं तत्रैव विलक्षणकारित्वहेतोर्व्यभिचारप्रदर्शनाय द्वितीयमिति दृष्टांतद्वयो
पदर्शनफलं संप्रदायविद्भिरुक्तं दृष्टांते सर्वेषामनपेक्षणाच्च संवेष्टितपटप्राणा दृष्टांतौ न विवर्तवादिनामनु
गुणौ जगतो ब्रह्मणो विप्रसारणादेः पटादावनध्यस्तत्वात् संवेष्टितप्रसारितपटादाविव निरवयवे ब्रह्मणि सं
कोचविकासयोरभावाच्चेति दूषणमनवकाशं ॥ ॥ ७ ॥ ॥ ❀ ॥ ॥ ❀ ॥ ॥ ❀ ॥ ❀ ॥

पत्र	पृष्ठ	पंक्ती	अशुद्ध	शुद्ध
२	१	८	नारोब्यव्यइति	नारब्धव्यइति
"	२	१०	त्वोन	त्वेन
४	१	११	स्पेवेन्क	स्वेवोक्त
६	१	३	सानत्व	साधनत्व
	१	१०	दर्शनसमत्वस्य	दर्शनात्मकसमत्वस्य
७	१	९	भेदनागृहीतः	भेदेनागृहीतः
"	२	९	युक्त	युक्तस्य
१०	१	४	मृज्जाति	मृद्नाति
११	१	१०	ज्ञानजन्येति	ज्ञानजन्यध्वंसप्रतियोगित्वात्मकज्ञाननिवर्त्यत्वशरीरज्ञानजन्येति
	१	५	ब्रम्हविद्या	ब्रम्हाविद्या
	२	२	णोन्क	णोक्त

पत्र	पृष्ठ	पंक्ती	अशुद्ध	शुद्ध
१३	१	१	[illegible]	वश्यकत्व
	२	१	साध्या	साध्या
	२	५	बाध्यात्मा	बाध्यात्वा
	१	१२	चैतन्य	चैतन्य
१४	१	५	तद्व्याहत्तेः	तद्व्याहत्तेः
	१	१२	तद्रुत्व	तद्रुत्व
	१	२	प्रसात्व	प्रभात्व
१५	१	५	बध	बंध
	१	११	नेदुस	नेदम
	१	६	गग	गत
	२	२९	नासद्वाशीति त्यारम्यशद्वार्थीते त्यर्नाहिर्लिखित	
२२	२	३	श्रितत्वज्ञानं	श्रितज्ञानं
	२	८	स्याप्रसिद्धेः	स्यातादृशाव्यवहारविषयस्याप्रसिद्धेः

पत्र	पृष्ठ	पंक्ती	अशुद्ध	शुद्ध
३०	१	[illegible]	हेतादित्युत्तर-गद्याविरोधात्ब्रम्हशद्वस्यजीवभिन्नहहनुणाविशिष्ट ब्रम्हपरत्वस्यत्युक्तशाक्यत्वात्कुतोनत्यागः हहेतोह्यइतिपतितंलेख्यं	
३१	१	९	सिध्यांती	सिध्यांतइति
३२	१	२	किंचित	किंचित्
	१	४	शाहूनेव	शाहुनेव
३३	१	१	गोणाभेद	गोणाभेद
	२	१३	शवन्य	शांक्य
३५	१	४	सित्यं	सित्थौ
३९	१		अप्रह्नेत्यन्मतेनवक्ष्यमाणरीत्याज्ञानकामनानुपपत्तेश्चनापिविचारइतिहिलिखितं	
	२	७	प्राप्तिते	प्राप्तिमे
४१	१	५	करण	करणं

४४	२	१	जिज्ञसोति	जिज्ञासेति	५९	१	१२	आर्तीड़ेर्वो	आर्तिड़ेर्वो	७३	२	१२	ह्रियत्	ह्रियत्
			ज्ञत	ज्ञतं	६०	१	१२	ह्रियौ	ह्रियेः					
४४	२	२	शाहुस्य	शाहुन	६१	२	११	इत्यनतर	इत्यनंतर	७४	१	१	सौम्येनैकेन	सौम्यैकेन
	२	५	तमेयो	तयमेयो		१	१२	समवतिपा	संपावतिपा	७५	२	३	अभापरं	अभानपरं
४६	२	३	शानतया	शानतया	६४	२	१	नमा	नमा		२	१		सर्वज्ञतापिदीति
४७	२	५	नतयां	नतयां	६५	१	२	अस्योति	अस्येत्यस्य	७६	२	२	तत्वतोताद्धिकरो	तत्वतत्त्वाद्धिकारो
		१०	भाष्यणा	भाष्येणा		१	५	कर्तृत्वस्यो	कर्तृत्वत्वस्यो	७७	१	१	परत्वस्यैव	परत्वस्येव
	१	२	काश्रुतः	काःश्रुताः		२	११	जन्यागीकारे	जन्यांगीकारे		१	८	बिका	बिका
५३	१	११	शंकाचाव्यर्वसित	शंकायांव्यवसित	६६	१	१	प्रकृतोपि	प्रकृतोप		२	६	ततथा	तत्तथा
५४	१	२	प्रसात्वकनूप	प्रमात्वकत्वनूप	६८	१	८	शेषणं	शेषेण	७८	१	२	मित्यर्थ	मित्यर्थे
	२	५	भा	भावः		१	११	हृन्तया	हृस्ततया		१	७	वान्धे	बाधे
		५	व्यजयितुं	व्यंजयितुं		२	१२	वाक्यार्थबोधे	वाक्यार्थबोधे		२	९	तानासंभवेन	तानासंभवेन
५५	१	१२	विलबेन	विलंबेन	६९	१		रणलक्षण	रणलक्षण		२	११	यथादि	यसादि
५७	२	१२	गंगाया	गंगाया		२	१	त्मिकाः	त्मकाः	७९	२	८	त्वद्धिशेष्य	त्वाद्विशेष्य
	२	१	पदेनवस	पदेनैवसं	७०	२	२	त्तये त्निकट	त्तयेतान्निकट	८१	१		तिष्ठन	तिष्ठन्
५८	१	१	प्रतिपाध	प्रतिपद्य		२	११	संबधोव्याहत्तिः	संबंधाव्यावृत्तिः		२	८	त्याक्तिषु	व्यक्तिषु
		९	निणर्येन	निर्णयेन	७१	१	१	कत्वस्या	कस्या	८२	१		ततत्कार्य	तत्तत्कार्य
		१७	यदन्वा	यदिन्वा	७२	२	१	प्रंशदृष्टांतः	प्रशोदृष्टांतः		२	१२	आसद्वा	असद्वा

पत्र	पृष्ठ	पंक्ती	अशुद्ध	शुद्ध
(	१	८	नारोब्धव्यइति	नारब्धव्यइति
"	२	१०	लोन	लेन
५	१	११	संघेन्त	सैधोक्त
६	१	२	सानत्व	साधनत्व
	२	१०	दर्शनसमत्वस्य	दर्शनात्मकसमत्व स्य
७	१	९	भेदनागृहीतः	भेदेनागृहीतः
	२	९	युक्त	युक्तस्य
"	१	४	मृज्नाति	मृद्नाति
१०	१	१०	ज्ञानजन्येति	ज्ञानजन्यध्वंस प्रतियोगित्वात्म कज्ञाननिवर्त्यत्व शरीरेज्ञानजन्यं ति
"	१	५	ब्रम्हविद्या	ब्रम्हाविद्या
	२	२	णोन्क	णोक्त
			[illegible]त्वेन	[illegible]त्वेन

पत्र	पृष्ठ	पंक्ती	अशुद्ध	शुद्ध
१३	१	७	[illegible]कत्व	वश्यकत्व
	२	३	साध्या	साध्या
	२	५	साध्यात्या	साध्यान्या
	२	१३	चैतन्ध	चैतन्य
१४	१	२	तब्धाहन्तेः	तद्व्याहन्तेः
	१	१२	तदुल	तदुत्व
	१	५	प्रमाल	प्रमात्व
१५	१	७	बध	बंध
	२	११	नेदम	नेदम
	१	१५	गत	गत
	२	१६	[illegible] स्वारस्यशङ्कार्थिते त्येतद्धि स्थितं	
३२	१	३	श्रितज्ञानं	श्रितंज्ञानं
	२	८	स्याभासित्वेः	स्यातादृशव्यव हारविषयस्याभा सित्वेः
[illegible]	१	१५	[illegible]	[illegible]

पत्र	पृष्ठ	पंक्ती	अशुद्ध	शुद्ध
२७	[illegible]	१२	[illegible]	
३३	२	९	[illegible]	[illegible]
३३	१	२	[illegible]	[illegible]
	[illegible]	[illegible]	[illegible]	[illegible]
	[illegible]	[illegible]	[illegible]	[illegible]
३३	[illegible]	[illegible]	[illegible]	[illegible]
	[illegible]	[illegible]	[illegible]	[illegible]
३५	[illegible]	८	[illegible]	
३६	१		[illegible]	
	२	७	आश्रिते	आश्रितं
४१	१	५	करण	करणं
	२	२	विचरणाया	विवरणप्रमाया

१	१	जिन्सेति	जिज्ञासेति
		स्तत	स्तं
२	२	शाहुस्य	शाद्धेन
२	५	तमेपर्या	तंयमेपर्या
२	३	शनतर्या	शनंतर्या
२	५	न्तर्या	न्तर्या
	१०	भाष्यंण	भाष्येण
२	२	कास्मुत:	का: श्रुता:
१	११	शंकायाव्यर्थसत	शंकायांव्यर्थसत
१	३	प्रमात्वकनूप	प्रमात्वकत्वनूप
२	५	पा	पाद:
	५	व्यजयितुं	व्यंजयितुं
१	१२	विळवेन	विलंबेन
२	१३	गंगाया	गंगाया
२	१	पदेनवस	पदेनैवसं
१	१	प्रतिपाद्य	प्रतिपाद्य
	१	नितर्येन	निर्णयेन
	८-७	यत्न्ना	वद्विना

५८	१	१२	प्रारोद्धेर्वा	प्रसिद्धेर्वा
६०	१	६३	सिद्धौ	सिद्धौ
६१	१	११	इत्यनंतर	इत्यनंतर
	१	१२	सम्भवतिवा	संभवतिवा
			नमा	नसा
६४	२	१	अस्येति	अस्येत्यस्य
६५	१	१	कर्तृत्वस्यो	कर्तृत्वत्वस्यो
	१	५	जन्मांगीकारे	जन्मांगीकारे
	२	११	प्रकृतोपि	प्रकृतोप
६६	१	९	शेषणं	शेषेण
६८	१	८	हृत्तया	हृत्ततया
	१	११	वाक्यार्थबोधे	वाक्यार्थबोधे
	२	१२	रणालक्षण	रणांलक्षण
६९	१		त्मिका:	त्मका:
	२	९	त्वयं त्निकट	त्वयेतात्निकट
७०	२	२	संबधोव्याद्यत्तिः	संबंधाव्याद्यत्तिः
	२	११	कत्वस्या	कस्या
७१	१	१	प्रंशाहदष्टांत:	प्रंशोहष्टांत:
७२	२	९		

७३	२	१३	ह्रियत्तु	ह्रियत
७४	१	१	सौम्येनैकेन	सौम्यैकेने
७५	२	३	प्रधापरं	प्रधानपरं
	२	९		सर्वज्ञतापिवेति
७६	२	३	तत्ततोताद्धिकारो	तत्ततस्ताद्धिकारो
७७	१	१	परत्वस्येव	परत्वस्येव
	१	८	विका	बिका
	२	६	ततया	तत्तया
७८	१	२	मित्यर्थे	मित्यर्थे
	१	७	वाध्ये	बाध्ये
	२	९	तानासंभवेन	तानासंभवेन
	२	११	ययादि	यसादि
७९	२	८	त्वद्विशेष्य	त्वाद्विशेष्य
८१	१		तिष्ठन	तिष्ठन्
	१	८	त्यक्तिषु	व्यक्तिषु
८२	१		ततत्कार्य	तत्तत्कार्य
	२	१३	आसद्दा	असद्दा

पत्र	पृष्ठ	पंक्ती	अशुद्ध	शुद्ध	पत्र	पृष्ठ	पंक्ती	अशुद्ध	शुद्ध	पत्र	पृष्ठ	पंक्ती	अशुद्ध	शुद्ध
८४	१	२	जीवसैक्येन	जीवैक्येन	९२	२	१३	तदेता	तदति	९९	१	३	अन्योन्यापि	अन्योन्योपि
८५	१	४		निरासासंभवात्	९३	२	२	खिंग	खिंगं		१	१३	स्वतन्त्रतः	स्वतंत्रतः
८६	१	१	हत्तौय	हत्तीय		२	७	क्षमो	क्षमा	१००	२		१०० अंकः	९९ अंकः
	१	८	हत्यान्या	हत्यन्या		२	९	पुरुष	निषदंपुरुषं		२	१०	धम	शम
८७	१	४	त्वेववार्थस्य	त्वेवार्थस्य	९४	१	३	वादः	यंवादः		२	१३		तीव
	१	१२	विधेस्त्वन्मते	विधेस्त्वन्मते		२	६	तथो	तद्यो	९९	१	४		न्यायश्चे
९०	२	१	मय	मयं		२	११	त्यादौ	त्यादौ	१०१	१	५		सादृश्यस्य
	२	६	प्रमाण	प्रमाणं	९५	२	१	भक्तिः	सक्तिः	१०२	१		व्य भेदस्यैव	व्यक्तभेदस्यैव
९०	१	१२	निरंकपंक्ती १३ जन्या	धिकरणसमास		२	१	अनेका	अनेका	१०३	१	६	धर्माद्वि	धर्माद्वि
			मित्युत्तरंप्रयमनः	शास्त्रयोनित्वा		२	५	न्यासिती	न्यासितिः		१	९	तुन्क	तुन्क
			धिकरणंलेख्यंअ	नंतरपत्र९० सांक	९६	१	५	पास्त अन्यो	पास्तोऽन्यो	१०५	१	८	यद्यापि	यदपि
			पंक्ती१ आरभ्यसम	न्वयाधिकरणंले	९७	२	६	वादौ	वादौ		१	११	र्थतु स्मिन्नेव	र्थतुतस्मिन्नेव
			ख्यं			१	१०	ध्यस्ता	ध्वस्ता	१०६	१	११	नागमत	नागत
९०	२	१	निरामय	निरामयं		२	७	यत्ता	यत्ना		१	१२	संभवात	संभवात्
.	२	२	मतिबिवतो	मतिबिंबितो		२		पुष्ट	स्पष्ट		२	१२	बुध्दि	बुध्दिपूर्विकां
	२	६	प्रमाण	प्रमाणं	९८	२	१२	आक्य	वाक्यं	१०७	१	३	पूर्वक	पूर्वकं

पत्र	पृष्ठ	पंक्ती	अशुद्ध	शुद्ध	पत्र	पृष्ठ	पंक्ती	अशुद्ध	शुद्ध
१०९	१	२	पुर्वा	पूर्वा	११७	१	१३	निवृत्ति	निवृत्ति
	२	१२	पाधिंकों	पाधिकों		२	८	नीयमाने	नीयमानानें
	१	१३	सित्थांत	सित्थांत्यते	१२१	२	२	न्यायानुत्थानस्या	न्यायो त्थानस्या
	१	१३	सवार्था	सवार्था	१२२	२	३	विष्णवेक	विष्णवेक
	१	१३	कंल्पस्य	कल्पस्य	१२५	२	२	त्वात	त्वात्
	२	९	॥		१२७	१	६	कृत्याचिंता	कृत्याचिंता
१११	१	१	ज्ञानत्व	ज्ञानवत्व	१२९	१	१२	मित्यपगमाच्च	मित्यभ्युपगमाच्च
	१	१२	स्याबाधितार्थ	स्यानेकाबाधितार्थ		१	१३	स्पष्टभासमानेषु	स्पष्टभासमानेषु
	१	१३	बहुशोऽद्वैत	बहुशोऽद्वैत		२	८	बोधेन	बाधेन
	२	५	वाल्मिकि	वाल्मीकि	१३१	१	२	शास्त्र	शास्त्रं
	२	१०	ईशो	ईशो		२	७	कटकांकुरः	कंटकांकुरः
११५	१	४	सायावृत्ति	मायावृत्ति	१३२	२	४	जिज्ञासे	जिज्ञास्ये
	१	५	स्त अनिर्वचनीय	स्तः पानिर्वचनीयमभि	१३४	२	१०	पते	पतये
			त्वेन	र्वचनीयत्वेन	१३५	२	५-६	मोपमशल्यो	मोघशल्यो

पत्र	पृष्ठ	पंक्ती	अशुद्ध	शुद्ध	पत्र	पृष्ठ	पंक्ती	अशुद्ध	शुद्ध	पत्र	पृष्ठ	पंक्ती	अशुद्ध	शुद्ध
१३७	१	८	मसादादौ	मासादादौ										
१३९	२	२	प्रवरणात्	प्रकरणात्	१५१	२	२	प्यवोति	प्येवेति	१५४	२	३	तदुभय	तदुभय
१४१	१	३	तदुभपादक	तदुपपादक	१५२	१	१०	निरर्थ	न निरर्थ			६	नायुक्तमिति	नायुक्त इति
१४२	१	११	तत्प्रयुक्त	तोपिनोक्त		२	३	श्रयितासावा	श्रयिभावा	१५५	१	१२	सिद्धिःशंका	सिध्दिशंका
१४३	२	१०	ब्रम्हणं	ब्रम्हणां	१५३	१	२	संयं	सैयं		१	१३	स्थानव्याप्य	सानव्याप्य
१४४	१	७	दर्शार्थी	द राथी		१	३	यदिदं	यदीदं		२	६-७	थायासेव	थायासेव
१४५	१	११	त्वादनिश्चयात	त्वानिश्चयात्		१	४	पर्यायात्म	पर्याप्यात्म		२	११	तथावेदांत	नयानवेद्धत
१४८	१	२	परं	भदं		१	६	करोति	निराकरोति	१५६	१	६	निरस्येते	निरस्यते
	२	८	चारः	चारः	१५३	१	८	तात्म	तात्म			१३	वृथान	वृथान्व
१५०	१	४	आत्मविज्ञेयः	आत्मानिज्ञेयः	१५३	१	१८	दर्शीत्वात्	दर्शितत्वात्				पर्रि	परि
		११	सर्ववेद	सर्ववेद		२	५	पनातत्त्वदात्म	पनात्तत्त्वात्म	१५७	२	७	[illegible]	मत्वाच्च
	२	५	विष्वानेव	विष्णोरेव		२	६	ज्ञानासंभवतीति	ज्ञानंनसंभवतीति			८-९	[illegible]	कृतमशक्तत्वमया
		७	विष्णुरेव	विष्णोरेव										व्यत्वं
१५१	१	६	गाप्या	गाप्यां				ईश्वराधिकरण				११	नतु	ननु
१५१	१	८	नतमतः	नतमनः						१५९	१	९	प्राव	प्राय
	२	१	व	न	१५४	२	२	त्वपुपादानत्वं	त्वमुपादानत्वं	१६०	१	१३	अप्रामाण्यापत्तौ	अप्रामाण्यापत्तौ

१६०	२	७	स्वतंत्राप्रधानस्य	स्वतंत्रप्रधानस्य	१६९	२	८	तात्पर्योविषये	तात्पर्यविषये	१७८	२	८	[illegible]	इधिकरणे
१६१	१	२	पनात्	घनात्	१७०	१	८	शाकेति	शाक्येति	१७९	२	१	[illegible]	[illegible]
	२	१	चोर्क्त	चोक्त	१७१	२	१२	वयोपास्य	तयोपास्य		२	२	[illegible]	[illegible]
	२	८	शाग्यासु	शाखासु	१७२	१	४	नंतरमुच्यमानानां	नंतरमुच्यमानानां				गो	धिकरणं
		८	च्यता	च्यतां	१७३	१	१०	देवलयो	देवलयो		२	९	त्वांतस्यैव	त्वांतेनस्यैव
		१३	धिपति	धिपतिः		२	१२	पुरुषशाह्वस्यै	पुरुषशाह्वस्य	१८१	१	३	तृतीयं	तृतीये
१६२	१	१२	शेपत्वे	शेषत्वे	१७४	१	३	भयथो	भयो		१	१३	वथान्न	तथान्न
		१३	व्यतस्था	व्यवस्था							२	११	पार्थन्दर	पार्श्वेश्वर
१६३	२	५	सूत्रेतेति	सूत्रितेति	१७५	१	९	वेदांतगति	वेदांतांतर्गत	१८२	१	३	शुभमतदर्पे	शुभमतद्वये
१६४	१	१३	निपेध्यते	निषेध्यते		२	१	प्रमाणाकः	प्रमाणाक	१८३	१	४	लक्षणसंमद	लक्षणासंभव
	२	५	छिद्रतर	छिद्रेतर		२	१२	तीयेत्वादेः	तीयत्वादेः		१	११	प्रधानेजाति	प्रधानेनेति
		१२	गतः	गताः	१७६	१	१०	जीव	जीव	१८५	१	१	सिध्यतः	सिद्धांतः
१६७	२	९	दककशाद्ध	दककशाद्ध	१७७	१	२	म	संबंधो		२	७	शंकाया	शंकया
१६८	१	१२	स्याबाच्यनिषेधेन	स्यावाच्यत्वनिषेधेन		२	९	त्वानाजीव	त्वादिनाजीव	१८६	१	३	माण	माण
	२	६	पूर्वमतिपादित	पूर्वप्रतिपादित	१७८	१	२	त्वात्त	त्वात्		२	५	दपान	दधान
		११	वाच्चत्वा	वाच्यत्वा		१	५	त्पादनां	त्पादीनां	१८७	१	७	ग्रंथनेन	ग्रंथनेन
१६९	२	३	नशाह्ववाच्यमिति	नञ्शाब्दवाच्य		१		त्वेततस्ति	त्वेतदस्ति		२	१	जग क	जगत्क
				मिति		१	१३	षदतः	षदन्तः	१८८	१	२	धस्ये	अस्य

पत्र	पृष्ठ	पंक्ती	अशुद्ध	शुद्ध	पत्र	पृष्ठ	पंक्ती	अशुद्ध	शुद्ध	पत्र	पृष्ठ	पंक्ती	अशुद्ध	शुद्ध
१३७	१	८	प्रसादादौ	प्रासादादौ										
१३९	२	२	प्रवरणात्	प्रकरणात्	१५१	२	२	पदनौति	प्रोणौति	[illegible]	३	३	नदुभय	तदुभय
१४१	१	३	तदुमपादक	तदुपपादक	१५२	१	१०	निरर्थ	अनिरर्थ			६	आयुक्तामिति	आयुक्ताइति
१४२	१	११	तेप्युक्त	तेऽप्युक्त		२	३	अखिलाकाल	[illegible]	१५५	२	१२	सिलोसिःशांका	[illegible]
१४३	२	१०	ब्रम्हणं	ब्रम्हणा	१५२	१	२	संतो	[illegible]		१	११	[illegible]	[illegible]
१४४	१	७	दर्शार्था	दशार्था		१	३	पदिने	[illegible]		१	[illegible]	[illegible]	[illegible]
१४५	१	११	त्वादनिश्चयात्	त्वानिश्चयात्		१	४	पर्योजास्य	प्रयोजास्य		२	११	[illegible]	[illegible]
१४८	१	२	पदं	पदं		[illegible]	[illegible]	करोति	निराकरोति	१५६	[illegible]	६	त्रिलोति	[illegible]
	२	८	चारः	चारः	१५३	[illegible]	[illegible]	तास्म	[illegible]			११	[illegible]	[illegible]
१५०	१	४	आत्मविज्ञेयः	आत्माविज्ञेयः	१५३	[illegible]	१२	प्रीमान	[illegible]				पढ़	[illegible]
		११	सर्वेवद्	[illegible]		२	५	[illegible]	[illegible]	[illegible]	२	५	[illegible]	[illegible]
	२	५	विष्वाखेव	विष्णावेव		२	६	[illegible]	[illegible]			[illegible]	[illegible]	अन्नरसमया
		७	विष्णुरेव	विष्णोरेव										ब्धात्
१५१	१	६	णात्मा	आत्मा				ईक्षत्यधिकरणं				११	गदु	गढ़
१५१	१	८	नतमतः	नतमतः						१५९	२	९	भाव	भाव
	२	१	व	स	१५४	२	२	त्वदुपादानत्वं	त्वमुपादानत्वं	१६०	२	११	अप्रामाण्यापत्ते	अप्रामाण्यापत्तेः


१५०	२	७	स्वतंत्राप्रधानस्य	स्वतंत्रप्रधानस्य	१६९	२	८	तात्पर्योविषये	तात्पर्योविषयो	१७८	२	९	णधिकरणो	णाधिकरणे
१५१	१	२	पनात्	धनात्	१७०	१	८	शाक्रेति	शाक्येति	१७९	२	१	हत्यु[illegible]मिति	इत्यधिमिति
	२	१	चोक्तं	चोक्त	१७१	२	१२	वर्योपास्य	तयोपास्य		२	२	तंत्रं दित्यधिकर	तंत्रस्वनाद्यादित्य
	२	८	शाप्त्यासु	शास्त्रासु	१७२	१	४	नंतरमुच्यमानानां	नंतरमुच्यमानानां				णो	धिकरणे
		८	च्यता	च्यतां	१७३	१	१०	देवत्वयो	देवत्वयो		२	९	त्यांतस्यैव	त्यांतितस्यैव
		१३	धिपति	धिपतिः		२	१२	पुरुषशाद्वस्यै	पुरुषशाद्बस्य	१८१	१	३	तृतीय	तृतीये
१५२	१	१२	शेपत्वे	शेषत्वे	१७४	१	३	भयमो	भयो		१	१३	यथान्व	तथान्व
		१३	व्यतस्था	व्यवस्था							२	११	पासेश्वर	पारमेश्वर
१५३	२	५	सूत्रेतेति	सूत्रितेति	१७५	१	९	वेदांतगीत	वेदांतान्तर्गत	१८२	१	३	सुगमतदर्प	सुगमतदर्थ
१५४	१	१३	निपेध्यते	निषेध्यते		२	१	प्रमाणाकः	प्रमाणक	१८३	१	४	लक्षणासंभव	लक्षणासंभव
	२	५	छिद्रतर	छिद्रेतर		२	१२	तीर्यत्वादे	तीयत्वादेः		१	११	प्रधानेलाति	प्रधानेनाति
		१२	गतः	गताः	१७६	१	१०	जीव	जीव	१८५	१	२	सिध्यंतः	सिध्यांतः
१५७	२	९	दकशाब्द	दककशाब्द	१७७	१	२	सं	संबंधो		२	७	शंकाया	शंकया
१५८	१	१२	स्यावाच्यनिषेधेन	स्यावाच्यत्वनिषेधेन		२	९	त्वानांजीव	त्वादिनाजीव	१८६	१	३	माण	माण
	२	६	पूर्वप्रतिपादित	पूर्वप्रतिपादित	१७८	१	२	त्वात्त	त्वान्		२	५	दर्पान	दर्शन
		११	वाचत्वा	वाच्यत्वा		१	५	त्पादनां	त्पादीनां	१८७	१	७	ग्रंथनेनं	ग्रंथनेन
१५९	३	३	नशब्दवाच्यमिति	न[illegible]शब्दवाच्य		१		त्वेतत्स्ति	त्वेतदस्ति		२	१	जग क	जगत्क
				मिति		१	१३	षदतः	यदतः	१८८	१	२	अस्से	अस्य

पत्र	पृष्ठ	पंक्ति	अशुद्ध	शुद्ध	पत्र	पृष्ठ	पंक्ति	अशुद्ध	शुद्ध	पत्र	पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
१८८	१	५	विष्णुई	विष्णुई	२०५	२	३	ध्येनै	ध्येनं	२१२	१	८	शोतिजव	शोतिपर
	१	८	विस्तु	विस्तु	-	२	५	पर्वांतर	पार्वांतर		१	१२	शिरपसादि	शिरःपसादि
	२	११	वाच्यो	वाच्यो	२०६	१	१२	तुल्य	तुल्य				बाहुलहराहेम निते	
१९०	२	९	नद्दीहिणो	नाहिणोः		२	१	यज्ञादि	यज्ञादि					
	२	१०	परोपवाह्यः	जपवाहः		२	२	यद्दौकिक	यज्ञौकिक	२१३	१	१	चौत्पतांति	चौत्पतांति
१९१	१	२	धनाप्तं	धेनाप्तं		२	१०	मुख्यन्	ग्रथेन्		१	७	भिव	भिय
१९३	१	११	स्वकृतः	स्वकृतः	२०७	१	२	शीलाविद्व	शीलाविद्		१	८	पास्थ	पास्य
	२	११	मद्वृषिः	मद्वृषिः	२०८	२	४	नपकृत्वात्	नपेक्षत्वात्		२	१२	वाक्यस्य	वाक्यस्य
१९४	१	१२	मापयेणे	मापयेणे		१	११	य त्	यत्वात्				२१६	२१४
१९६	२	९	अपोवा	आपोवा	२०८	२	११	पादीये	पादीये	२१४	१	३	पुच्छमनिषे	पुच्छमनिषे
१९७	२	११	कुंभवाधनलाद्यु	कुंभवाहुचनाद्य	२०९	२	३	लताता	त्वता	२१५	१	८	नगरादस्रामस्थ्यै	नगरादेरग्रामस्थे
१९९	१	१	शोषणाद्	शोषणानात		२	७	पाथिरपि	पार्थेरपि				व	व
	१	१२	जाना स्नान	नानाब्रह्मान		२	८	त्यागेतथा	त्यागेनतथा			१०	कठच्चामीकर	कंठच्चामीकर
२०१	१	१३	समवन	संभवन	२१०	१	४	येन्न	चेन्न				मेवायजमानाद्युतं	मेवायंयजमानाद्युतं
२०४	१	४	समजस	समासजसं	२११	२	५	आनद	आनंद		१	१३	माम्हणि	ब्रम्हणि
		२	[illegible]	[illegible]		२	१३	सत्यादमिति	स त्यह्यमिति		२	१७	पुच्छपदेन	पुच्छपदेन

पत्र	पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
२४१	२	१२	पारमार्थी	परमार्थी
२४२	१	३	श्रुत्यार्थी	श्रुत्यर्थी
	१	५	भादि	वादी
	१	१०	तन्मम	तद्भ्रम
२४३	१	१	स्त्वापिनिरिनत्स्मा	स्त्वापितेपिनत्वादिष्ट
				लिखितस्मृत्सामत
				स्यमुख्ययोरेकतास्या
				तुपमर्दनेनत्स्मा
	२	६	नान्युप	नाप्युप
	२	४-५	नान्यः	न्यायः
		७	विशिष्ठा	विशेष्ठा
		१२	वर्षानि	वंर्शानि
		१३	नतसद्यर्थे	तत्सदर्थे
२४४	२	१	नादृष्ट	नादृष्ट
		१	तत्र्याधरस्थापकत्ता	तत्र्यधरस्थापकता
	[illegible]	[illegible]	भकल्ल	भकल्प

पत्र	पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
	२	१३	यतो	यतो
२४५	१	१२	नितरो	निवेतरो
	१	६	नतास्यार्थी	तथास्यार्थो
२४६	१	५	क्षिणी	क्षिणि
	१	१३	तम्या	तम्या
२४७	१	६	अलं	आलं
२४८	१	२	विशोष्यस्य	विशेषस्य
	१	९	भातिदेशेन	भातिदेशेन
२४९	१	१३	लत्त्व	लत्त्वं
	२	६	एव	एवं
२५०	२	८	दृत्तोपि	दृत्तोर्वि
	२	११	फत्वंकस्पनं	कल्पकस्पनं
२५१	२	५	स्यात्पर	स्यात्तत्पर
	१	९	परथाशाद्विनापि	परंथाशाद्विनापि
	१	१०	जनमरणहेतुविष्णु	जन्मंमरणहेतुःविष्णु
२५२	१	१	तत्साक्षात्	तत्साक्षात्

पत्र	पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
	१	५	चित्तस्य	चित्तस्य
	२	५	त्यत्र	न्यत्र
	२	१०-११	य तत्रादि	यात्यात्तन्नादि
२५३	१	२	संस्कार --	संस्कारजन्यप
२५५	१	६-७	मदर्शने	मदर्शनेन
	२	२	साध्यदृष्ट	साध्यादृष्ट
	२	६	तादृशापरोक्ष	तादृशापरोक्ष
२५६	१	२	ध्यानस्यज्ञानाभेद	ध्यानस्यज्ञानाद्भे
			स्य	दस्य
२५७	२	९-१०	ध्यानविद्वत्तारम्यत	
			त्वादित्वेनपुनर्लि	
			खितानिष्कास्यं	
	१	६	स्यान्नत्र	स्यात्तत्र
	२	५	पत्यनुकूल	प्रतिपत्त्यनुकूल
२५८	१	२	बाधक। पादानं	बाधकं। पादनं
	१	३	पादानं	पादनं


इतिमंजनपादभूषणनामः